VERIFIED-2001

श्रीः

श्रीमन्महाभारतं
नीलकण्ठविरचितया
भारतभावदीपसंज्ञया
व्याख्यया सहितं
श्रीमदुभय-कुरिञ्जाडि-दुरैस्वामि अय्यङ्गार नाम्ना समर्पितं।

विजयतेतरां ॥

सौम्य संवत्सर-चित्रा-[illegible]।

॥ अथ श्रीमहाभारते उद्योगपर्व प्रारभ्यते ॥

श्रीगणेशायनमः ॥ श्रीमद्गोपालमानम्यश्रीलक्ष्मणपदानुगः ॥ नीलकंठोभावदीपंकरोत्युद्योगपर्वणि ॥ १ ॥ गोपालनारायणलक्ष्मणार्याधीरेशगंगाधरनीलकंठाः ॥ चिंतामणिःसांबशिवश्चपूज्यादिशंतुसर्वेगुरवोमतिंमे ॥ २ ॥ भारतेसारमुद्योगमितिवृद्धानुशासनं ॥ अतोविस्तरतस्तत्रव्याख्यानमुपपद्यते ॥ ३ ॥ अभिमन्योःस्वपक्षाःयादवपांडवायाः तस्यैवविवाहंकृत्वामुदिताअभूवन्निनिशेषः प्रतीताःप्रबुद्धाः ॥ १ ॥ मणयोमुक्ताप्रवालादयःतेषांप्रवेकोजालादिरूपःसमूहःतेन उत्तमरत्नैःहीरपद्मरागादिभैश्चचित्रा मणिःस्त्रीपुंसयोरुत्तमजातौमुक्तादिकेष्वपीतिमेदिनी ॥ २ ॥ आविशतामुपविष्टौ पि

श्रीगणेशायनमः॥ ॥नारायणंनमस्कृत्यनरंचैवनरोत्तमम्॥देवींसरस्वतींचैवततोजयमुदीरयेत्॥ १॥ वैशंपायनउवाच कृत्वाविवाहंतुकुरुप्रवीरास्तदाऽभिमन्योर्मुदिताःस्वपक्षाः॥विश्रम्यरात्रावुषसिप्रतीताःसभांविराटस्यततोऽभिजग्मुः॥ १॥ सभातुसामत्स्यपतेःसमृद्धामणिप्रवेकोत्तमरत्नचित्रा॥न्यस्तासनामाल्यवतीसुगंधातामभ्ययुस्तेनरराजवृद्धाः॥२॥ अथासनान्याविशतांपुरस्तादुभौविराटद्रुपदौनरेंद्रौ॥वृद्धौचमान्यौपृथिवीपतीनांपित्रासमंरामजनार्दनौच॥ ३॥ पांचालराजस्यसमीपतस्तुशिनिप्रवीरःसहरौहिणेयः॥ मत्स्यस्यराज्ञस्तुसुसन्निरुद्धोजनार्दनश्चैवयुधिष्ठिरश्च॥ ४॥ सुताश्चसर्वेद्रुपदस्यराज्ञोभीमार्जुनौमाद्रवतीसुतौच॥प्रद्युम्नसांबौचयुधिप्रवीरौविराटपुत्रैश्चसहाभिमन्युः॥ ५॥ सर्वेचशूराःपितृभिःसमानावीर्येणरूपेणबलनचैव॥उपाविशन्द्रौपदेयाःकुमाराःसुवर्णचित्रेषुवरासनेषु॥ ६॥ तथोपविष्टेषुमहारथेषुविराजमानाभरणांबरेषु॥रराजसाराजवतीसमृद्धाग्रहैरिवद्यौर्विमलैरुपेता॥ ७॥ ततःकथास्तेसमवाययुक्ताःकृत्वाविचित्राःपुरुषप्रवीराः॥तस्थुर्मुहूर्तंपरिचिंतयंतःकृष्णंनृपास्तेसमुदीक्षमाणाः॥ ८॥ कथांतमासाद्यचमाधवेनसंघट्टिताःपांडवकार्यहेतोः॥ तेराजसिंहाःसहितास्त्वशृण्वन्वाक्यंमहार्थंसुमहोदयंच॥ ९॥ श्रीकृष्णउवाच सर्वैर्भवद्भिर्विदितंयथाऽयंयुधिष्ठिरःसौबलेनाक्षवत्याम्॥जितोनिकृत्याऽपटतंचराज्यंवनप्रवासेसमयःकृतश्च॥ १०॥शक्तैर्विजेतुंतरसामहींचसत्यैस्थितैःसत्यरथैर्यथावत्॥ पांडोःसुतैस्तद्व्रतमुग्ररूपंवर्षाणिषट्सप्तचचीर्णमग्र्यैः॥ ११॥ त्रयोदशश्चैवसुदुस्तरोऽयमज्ञायमानैर्भवतांसमीपे॥क्लेशानसत्यान्विविधान्सहद्भिर्महात्मभिश्चापिवनेनिविष्टम्॥ १२॥

त्रावसुदेवेन ॥ २ ॥ रौहिणेयःबलरामः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ संघट्टिताःसन्नद्धीकृताः महार्थसारार्थं महोदयंश्रेष्ठफलं ॥ ९ ॥ अक्षवत्यांद्यूतक्रीडायां निकृत्याछलेन समयःपणः ॥ १० ॥ सत्यरथैःसत्यपृथिव्यमेजांसि त्यत्वाव्याकाशौ उभयत्रअकुंठितोरथोयेषांतैरितिमध्यमपदलोपेनसमासः सत्यंरथवदारोढुंयोग्यंयेषांवा पाठांतरेसत्यैकप्रियैः ॥ ११ ॥ १२ ॥

॥ १३ ॥ १४ ॥ बुभूषेत्प्राप्तुमिच्छेत् तङभावआर्षः ॥ १५ ॥ १६ ॥ अनामयंकुशलं यत्तुधनादिकंस्वयमेवसमाहृतंनपित्रादिभिः ॥ १७ ॥ १८ ॥ १९ ॥ पारयित्वेतिपाठेसमाप्य ॥ २० ॥ अतो राज्यार्द्धप्रदानात् कार्येराज्यलाभनिमित्तं तैर्धार्तराष्ट्रैःकृतंविप्रकारंअपकारंनिशम्यज्ञात्वा तान्पांडवान् ॥ २१ ॥ यदिइमान्बाधेयुःतर्हिएतेऽपितान्कौरवान्हन्युः इमेपांडवाः ॥ २२ ॥ २३ ॥ २४ ॥

एतैःपरप्रेष्यनियोगयुक्तैरिच्छद्भिराप्तंस्वकुलेनराज्यम् ॥ एवंगतेधर्मसुतस्यराज्ञोदुर्योधनस्यापिचयद्धितंस्यात् ॥ १३ ॥ तच्चिंतयध्वंकुरुपुंगवानांधर्म्यंचयुक्तंच यशस्करंच ॥ अधर्मयुक्तंनचकामयेतराज्यंसुराणामपिधर्मराजः ॥ १४ ॥ धर्मार्थयुक्तंतुमहीपतित्वंग्रामेऽपिकस्मिंश्चिदयंबुभूषेत् ॥ पित्र्यंहिराज्यंविदितंनृपाणांयथाऽपकृष्टंधृतराष्ट्रपुत्रैः ॥ १५ ॥ मिथ्योपचारेणयथाह्यनेनकृच्छ्रंमहत्प्राप्तमसत्यरूपम् ॥ नचापिपार्थोविजितोरणेतैःस्वतेजसाधृतराष्ट्रस्यपुत्रैः ॥ १६ ॥ तथाऽपिराजासहितःसुहृद्भिरभीप्सतेऽनामयमेवतेषाम् ॥ यत्तुस्वयंपांडुसुतैर्विजित्यसमाहृतंभूमिपतीन्प्रपीड्य ॥ १७ ॥ तत्प्रार्थयंतेपुरुषप्रवीराःकुंतीसुतामाद्रवतीसुतौच ॥ बालास्त्विमेतैर्विविधैरुपायैःसंप्रार्थिताहंतुममित्रसंघैः ॥ १८ ॥ राज्यंजिहीर्षद्भिरसद्भिरुग्रैःसर्वंचतद्वोविदितंयथावत् ॥ तेषांचलोभंप्रसमीक्ष्य वृद्धंधर्मज्ञतांचापियुधिष्ठिरस्य ॥ १९ ॥ संबंधितांचापिसमीक्ष्यतेषांमतिंकुरुध्वंसहिताःपृथक्च ॥ इमेचसत्येऽभिरताःसदैवतंपालयित्वासमयंयथावत् ॥ २० ॥ अतोऽन्यथातैरुपचर्यमाणाहन्युःसमेतान्धृतराष्ट्रपुत्रान् ॥ तैर्विप्रकारंचनिशम्यकार्येसुहृज्जनास्तान्परिवारयेयुः ॥ २१ ॥ युद्धेनबाधेयुरिमांस्तथैवंतैर्बाध्यमानायुधितांश्चहन्युः ॥ तथाऽपिनेमेऽल्पतयासमर्थास्तेषांजयायेतिभवेन्मतंवः ॥ २२ ॥ समेत्यसर्वेसहिताःसुहृद्भिस्तेषांविनाशाययतेयुरेव ॥ दुर्योधनस्यापिमतंयथावन्नज्ञायतेकिंनुकरिष्यतीति ॥ २३ ॥ अज्ञायमानेचमतेपरस्यकिंस्यात्समारभ्यतमंमतंवः ॥ तस्मादितोगच्छतुधर्मशीलःशुचिःकुलीनःपुरुषोऽप्रमत्तः ॥ २४ ॥ दूतःसमर्थःप्रशमायतेषांराज्यार्धदानाययुधिष्ठिरस्य ॥ निशम्यवाक्यंतुजनार्दनस्यधर्मार्थयुक्तंमधुरंसमंच ॥ २५ ॥ समाददेवाक्यमथाग्रजोऽस्य संपूज्यवाक्यंतदतीवराजन् ॥ २६ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिसेनोद्योगपर्वणिपुरोहितयानेप्रथमोऽध्यायः ॥ १ ॥ ॥ ७ ॥ बलदेवउवाच श्रुतंभवद्भिर्गदपूर्वजस्यवाक्यंयथाधर्मवदर्थवच्च ॥ अजातशत्रोश्चहितंहितंचदुर्योधनस्यापितथैवराज्ञः ॥ १ ॥ अर्धंहिराज्यस्यविसृज्यवीराःकुंतीसुतास्तस्य कृतेयतंते ॥ प्रदायचार्धंधृतराष्ट्रपुत्रःसुखीसहास्माभिरतीवमोदेत् ॥ २ ॥

॥ २५ ॥ २६ ॥ इतिउद्योगपर्वणिनैलकंठीयेभारतभावदीपेप्रथमोऽध्यायः ॥ १ ॥ ॥ ७ ॥ ॥ ॥ १ ॥ अर्धंराज्यस्यविसृज्य तस्यकृतेअर्धस्यराज्यस्यार्थे ॥ २ ॥

राज्यंराज्यार्धम् ॥ ३ ॥ ४ ॥ ५ ॥ बलंचतुरंगंनिगमोनीतिशास्त्रंतेउभेप्रधानंयेषां श्रुतेनकालेनचवृद्धाः वृत्ताइतिपाठेश्रुतंकालवृत्तंसर्वसंहारकत्वंयैस्ते ॥ ६ ॥ समागतेषु सभायामितिशेषः ॥ ७ ॥ वाक्यमेवाह सर्वास्विति सर्वथाऽपितेपांडवाःनकोप्याः भवद्भिरितिशेषः सोऽर्थोग्रस्तः वनवासादिप्रतिज्ञानिस्तीर्णेत्यर्थः बलंसत्यपालनेसामर्थ्यं पूर्वंकोपिताअपिअतःपरंनकोप्याइतिभावः ॥ ८ ॥

लब्ध्वाहिराज्यंपुरुषप्रवीराःसम्यक्प्रवृत्तेषुपरेषुचैव ॥ ध्रुवंप्रशांताःसुखमाविशेयुस्तेषांप्रशांतिश्चहितंप्रजानाम् ॥ ३ ॥ दुर्योधनस्यापिमतंचवेत्तुंवक्तुंचवाक्यानियुधिष्ठिरस्य ॥ प्रियंचमेस्याद्यदितत्रकश्चिद्व्रजेच्छमार्थंकुरुपांडवानाम् ॥ ४ ॥ सभीष्ममामंत्र्यकुरुप्रवीरंवैचित्रवीर्यंचमहानुभावम् ॥ द्रोणंसपुत्रंविदुरंकृपंचगांधारराजंचससूतपुत्रम् ॥ ५ ॥ सर्वेचयेऽन्येधृतराष्ट्रपुत्राबलप्रधानानिगमप्रधानाः ॥ स्थिताश्चधर्मेषुतथास्वकेषुलोकप्रवीराःश्रुतकालवृद्धाः ॥ ६ ॥ एतेषुसर्वेषुसमागतेषुपौरेषुवृद्धेषुचसंगतेषु ॥ ब्रवीतुवाक्यंप्रणिपातयुक्तंकुंतीसुतस्यार्थकरंयथास्यात् ॥ ७ ॥ सर्वास्ववस्थासुचतेनकोप्याग्रस्तोहिसोऽर्थोबलमाश्रितैस्तैः ॥ प्रियाभ्युपेतस्ययुधिष्ठिरस्यद्यूतेप्रसक्तस्यहृतंचराज्यम् ॥ ८ ॥ निवार्यमाणश्चकुरुप्रवीरःसर्वैःसुहृद्भिर्ह्ययमप्यतज्ज्ञः ॥ सदीव्यमानःप्रतिदीव्यचैनंगांधारराजस्यसुतंमताक्षम् ॥ ९ ॥ हित्वाहिकर्णंचसुयोधनंचसमाह्वयद्देवितुमाजमीढः ॥ दुरोदरास्तत्रसहस्रशोऽन्येयुधिष्ठिरोयान्विषहेतजेतुम् ॥ १० ॥ उत्सृज्यतान्सौबलमेवचायंसमाह्वयत्तेनजितोऽक्षवत्याम् ॥ सदीव्यमानःप्रतिदेवनेनअक्षेषुनित्यंतुपराङ्मुखेषु ॥ ११ ॥ संरंभमाणोविजितःप्रसह्यतत्रापराधःशकुनेर्नकश्चित् ॥ तस्मात्प्रणम्यैववचोब्रवीतुवैचित्रवीर्यंबहुसामयुक्तम् ॥ १२ ॥ तथाहिशक्योधृतराष्ट्रपुत्रःस्वार्थेनियोक्तुंपुरुषेणतेन ॥ अयुद्धमाकांक्षतकौरवाणांसाम्नैवदुर्योधनमाह्वयध्वम् ॥ १३ ॥ साम्नाजितोऽर्थोऽर्थकरोभवेतयुद्धेऽनयोभवितानेहसोऽर्थः ॥ १४ ॥ वैशंपायनउवाच एवंब्रुवत्येवमधुप्रवीरेशिनिप्रवीरःसहसोत्पपात ॥ तच्चापिवाक्यंपरिनिंद्यतस्यसमाददेवाक्यमिदंसमन्युः ॥ १५ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिसेनोद्योगपर्वणिबलदेववाक्येद्वितीयोऽध्यायः ॥ २ ॥ ॥ ७ ॥ सात्यकिरुवाच यादृशःपुरुषस्यात्मातादृशंसंप्रभाषते ॥ यथारूपोंऽतरात्मातेतथारूपंप्रभाषसे ॥ १ ॥ संतिवैपुरुषाःशूराःसंतिकापुरुषास्तथा ॥ उभावेतौदृढौपक्षौदृश्येतेपुरुषान्प्रति ॥ २ ॥

अयंयुधिष्ठिरः अतज्ज्ञःद्यूतानभिज्ञः ॥ ९ ॥ १० ॥ ११ ॥ संरंभमाणःहठंकुर्वाणः संरब्धमानइतिपाठेसंवृद्धदर्पइत्यर्थः ॥ १२ ॥ १३ ॥ युद्धेअनयःभविताभविष्यति इहसामोपायेसोऽर्थः अनयःन ॥ १४ ॥ १५ ॥ इतिउद्योगप० नै० भारतभा० बलदेववाक्येद्वितीयोऽध्यायः ॥ २ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ यादृशआत्माशुद्धःपापोवातादृशंशुद्धंपापंवाभाषते ॥ १ ॥ २ ॥

फलाफलवती सुपोलुक्आर्षःपूर्वसवर्णोवा ॥ ३ ॥ तेनवचाकृतनामराधःशकुनेर्नकश्चिदितिपूर्वोक्तकौरवपक्षपातयुक्तम् ॥ ४ ॥ ५ ॥ यथाश्रद्धंधूतेआसक्तिरहितमिव धर्मेजयःधर्मनिमित्तंजयःकुतः किंतुअधर्ममूलकएवतेषांजयइत्यर्थः ॥ ६ ॥ ७ ॥ प्रणिपेतेत्शरणागतोभवेत् पणंकृत्वाद्वादशवासप्रतिज्ञांनिस्तीर्य ॥ ८ ॥ पैतामहमितिन्यायलभ्यत्वंसूचितम् ॥ ९ ॥ १० ॥ विदिताअज्ञातचर्यायामि

एकस्मिन्नेवजायेतेकुलेक्लीबमहाबलौ॥ फलाफलवतीशाखेयथैकस्मिन्वनस्पतौ ॥ ३ ॥ नाभ्यसूयामितेवाक्यंब्रुवतोलांगलध्वज ॥ येतुशृण्वंतितेवाक्यं तानसूयामिमाधव ॥ ४ ॥ कथंहिधर्मराजस्यदोषमल्पमपिब्रुवन्॥ लभतेपरिषन्मध्येव्याहर्तुमकुतोभयः॥ ५ ॥ समाहूयमहात्मानंजितवंतोऽक्षकोविदाः॥ अ नक्षज्ञंयथाश्रद्धंतेषुधर्मजयःकुतः॥ यदिकुंतीसुतंगेहेक्रीडंतंभ्रातृभिःसह॥ ६ ॥ अभिगम्यजयेयुस्तेतत्तेषांधर्मतोभवेत् ॥ समाहूयतुराजानंक्षत्रधर्मरतंसदा ॥ ७ ॥ निकृत्याजितवंतस्तेकिंनुतेषांपरंशुभम्॥ कथंप्रणिपतेच्चायमिहकृत्वापणंपरम्॥ ८ ॥ वनवासाद्विमुक्तस्तुप्राप्तःपैतामहंपदम्॥ यद्ययंपापवित्तानिकामये तयुधिष्ठिरः॥ ९ ॥ एवमप्ययमत्यंतंपरान्नार्हतियाचितुम्॥ कथंचधर्मयुक्तास्तेनचराज्यंजिहीर्षवः॥ १० ॥ निदत्तवासान्कौंतेयान्यआहुर्विदिताइति ॥ अनुनी ताहिभीष्मेणद्रोणेनविदुरेणच ॥ ११ ॥ नव्यवस्यंतिपांडूनांप्रदातुंपैतृकंवसु ॥ अहंतुतान्शितैर्बाणैरनुनीयरणेबलात् ॥ १२ ॥ पादयोःपातयिष्यामिकौंतेय स्यमहात्मनः॥ अथतेनव्यवस्यंतिप्रणिपातायधीमतः॥ १३ ॥ गमिष्यंतिसहामात्यायमस्यसदनंप्रति॥ नहितेयुयुधानस्यसंरब्धस्ययुयुत्सतः ॥ १४ ॥ वेगंस मर्थाः संसोढुंवज्रस्येवमहीधराः॥ कोहिगांडीवधन्वानंकश्चक्रायुधंयुधि ॥ १५ ॥ मांचापिविषहेत्कुद्धंकश्चभीमंदुरासदम् ॥ यमौचदृढधन्वानौयमकालो पमद्युती॥ विराट्द्रुपदौवीरौयमकालोपमद्युती ॥ १६ ॥ कोजिजीविषुरासादेद्धृष्टद्युम्नंचपार्षदम्॥ पंचैतान्पांडवेयांस्तुद्रौपद्याःकीर्तिवर्धनान्॥ १७ ॥ समप्र माणान्पांडूनांसमवीर्यान्मदोत्कटान्॥सौभद्रंचमहेष्वाससममरैरपिदुःसहम्॥ १८ ॥ गदप्रद्युम्नसांबांश्चकालसूर्यानलोपमान्॥ तेवयंधृतराष्ट्रस्यपुत्रंशकुनिना सह॥ १९ ॥ कर्णंचैवनिहत्याजावभिषेक्ष्यामपांडवम्॥ नाधर्मोविद्यतेकश्चिद्धत्वाहत्वाततायिनः॥ २० ॥ अधर्म्यमयशस्यंचशात्रवाणांप्रयाचनं ॥ तद्भव त्वस्ययःकामस्तंकुरुध्वमतंद्रिताः॥ २१ ॥

तिशेषः अनुनीताःपरिमितःकालएनैरतिवाहितइतिबोधिताः ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ यमःशरीरात्प्राणानामुद्धर्ता कालःआयुःपरिच्छेदकर्ता ॥ १६ ॥ पांडवेयान्पांडवीद्रौपदीतत्तु ल्यान् ॥ पुंयोगलक्षणङीषंतात्स्त्रीभ्योढगितिढक् ॥ १७ ॥ पांडूनांपांडुतुल्यानांपांडवानाम् ॥ १८ ॥ १९ ॥ २० ॥ तस्यपांडवस्य ॥ २१ ॥

॥ २२ ॥ २३ ॥ ॥इतिउद्योगप०नैलकंठीयेभारतभा०तृतीयोऽध्यायः ॥ ३ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ मधुरेणसाम्ना ॥ १ ॥ कार्पण्यात् तदन्नभक्षणेनदैन्यात् ॥ २ ॥ ज्ञानेज्ञानवतांसमाजे

निसृष्टंधृतराष्ट्रेणराज्यंप्राप्नोतुपांडवः॥ अद्यपांडुसुतोराज्यंलभतांवायुधिष्ठिरः॥ २२ ॥ निहतावारणेसर्वेस्वप्स्यंतिवसुधातले ॥ २३ ॥ इतिश्रीमहाभारतेउ० सेनोद्योगपर्वणिसात्यकिक्रोधवाक्येतृतीयोऽध्यायः॥ ३ ॥ ॥ ७ ॥ ॥ द्रुपदउवाच एवमेतन्महाबाहोभविष्यतिनसंशयः॥ नहिदुर्योधनोराज्यंमधुरेणप्र दास्यति॥ १ ॥ अनुवर्त्स्यतितंचापिधृतराष्ट्रःसुतप्रियः॥ भीष्मद्रोणौचकार्पण्यान्मौर्ख्याद्राधेयसौबलौ॥ २ ॥ बलदेवस्यवाक्यंतुममज्ञानेनयुज्यते॥ एतद्विपुरु षेणाग्रेकार्यंसुनयमिच्छता॥ ३ ॥ नतुवाच्योमृदुवचोधार्तराष्ट्रःकथंचन॥ नहिमार्दवसाध्योऽसौपापबुद्धिर्मतोमम ॥ ४ ॥ गर्दभेमार्दवंकुर्याद्व्रोषुतीक्ष्णंसमा चरेत्॥ मृदुदुर्योधनेवाक्यंयोब्रूयात्पापचेतसि॥ ५ ॥ मृदुंवैमन्यतेपापोभाषमाणमशक्तिकम् ॥ जितमर्थंविजानीयादबुधोमार्दवेसति ॥ ६ ॥ एतच्चैवकरि ष्यामोयत्नश्चक्रियतामिह॥ प्रस्थापयाममित्रेभ्योबलान्युद्योजयंतुनः॥ ७ ॥ शल्यस्यधृष्टकेतोश्चजयत्सेनस्यवाविभो ॥ केकयानांचसर्वेषांदूतागच्छंतुशीघ्र गाः॥ ८ सचदुर्योधनोनूनंप्रेषयिष्यतिसर्वशः॥ पूर्वाभिपन्नाःसंतश्चभजंतेपूर्वचोदनम् ॥ ९ ॥ तत्त्वरध्वंनरेंद्राणांपूर्वमेवप्रचोदने ॥ महद्धिकार्यंवोढव्यमिति मेवर्ततेमतिः॥ १० ॥ शल्यस्यप्रेष्यतांशीघ्रंयेचतस्यानुगानृपाः॥ भगदत्तायराज्ञेचपूर्वसागरवासिने॥ ११ ॥ अमितौजसेतथोग्रायहार्दिक्यायांधकायच ॥ दीर्घप्रज्ञायशूरायरोचमानायवाविभो॥ १२ ॥ आनीयतांबृहंतश्चसेनाबिंदुश्चपार्थिवः ॥ सेनजित्प्रतिविंध्यश्चचित्रवर्मासुवास्तुकः॥ १३ ॥ बाह्लीकोमुंजके शश्चचैद्याधिपतिरेवच ॥ सुपार्श्वश्चसुबाहुश्चपौरवश्चमहारथः॥ १४ ॥ शकानांपह्लवानांचदरदानांचयेनृपाः॥ सुरारिश्चनदीजश्चकर्णवेष्टश्चपार्थिवः॥ १५ ॥ नीलश्चवीरधर्माचभूमिपालश्चवीर्यवान्॥ दुर्जयोदंतवक्त्रश्चरुक्मीचजनमेजयः॥ १६ ॥ आषाढोवायुवेगश्चपूर्वपालीचपार्थिवः॥ भूरितेजादेवकश्चएकल व्यःसहात्मजैः॥ १७ ॥ कारूषकाश्चराजानःक्षेमधूर्तिश्चवीर्यवान्॥ कांबोजाऋषिकायेचपश्चिमानूपकाश्चये॥ १८ ॥ जयत्सेनश्चकाश्यश्चतथापंचनदानृपाः॥ क्राथपुत्रश्चदुर्धर्षःपार्वतीयाश्चयेनृपाः॥ १९ ॥

नयुज्यतेअयुक्तमित्यर्थः एतद्वक्ष्यमाणम्॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ पूर्वाभिपन्नाःपूर्वंसाहाय्यार्थंदत्ताः पूर्वचोदनंपूर्वंचोदनाप्रेरणायस्यतम् ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥

॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ इतिश्रीउद्योगप०नैलकंठीयेभारतभा०चतुर्थोऽध्यायः ॥ ४ ॥ ॥ ७ ॥ ॥ ७ ॥ उपपन्नंयुक्तम् ॥ १ ॥ २ ॥ संबंधकंतुल्यमिति पांडवे

जानकिश्चसुशर्माचमणिमान्योतिमत्सकः ॥ पांशुराष्ट्राधिपश्चैवधृष्टकेतुश्चवीर्यवान् ॥ २० ॥ तुंडश्चदंडधारश्चबृहत्सेनश्चवीर्यवान् ॥ अपराजितोनिषादश्च
श्रेणिमान्वसुमानपि ॥ २१ ॥ बृहद्बलोमहोजाश्चबाह्लःपरपुरंजयः ॥ समुद्रसेनोराजाचसहपुत्रेणवीर्यवान् ॥ २२ ॥ उद्धवःक्षेमकश्चैववाटधानश्चपार्थिवः ॥
श्रुतायुश्चदृढायुश्चशाल्वपुत्रश्चवीर्यवान् ॥ २३ ॥ कुमारश्चकलिंगानामीश्वरोयुद्धदुर्मदः ॥ एतेषांप्रेष्यतांशीघ्रमेतद्धिममरोचते ॥ २४ ॥ अयंचब्राह्मणोविद्वा
न्ममराजन्पुरोहितः ॥ प्रेष्यतांधृतराष्ट्रायवाक्यमस्मैप्रदीयताम् ॥ २५ ॥ यथादुर्योधनोवाच्योयथाशांतनवोनृपः ॥ धृतराष्ट्रोयथावाच्योद्रोणश्चरथिनांवरः ॥
॥ २६ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिसेनोद्योगपर्वणिद्रुपदवाक्येचतुर्थोऽध्यायः ॥ ४ ॥ ॥ ६ ॥ ॥ वासुदेवउवाच उपपन्नमिदंवाक्यंसो
मकानांधुरंधरे ॥ अर्थसिद्धिकरंराज्ञःपांडवस्यामितौजसः ॥ १ ॥ एतच्चपूर्वकार्यंनःसुनीतमभिकांक्षताम् ॥ अन्यथात्वाचरन्कर्मपुरुषःस्यात्सुबालिशः ॥ २ ॥
किंतुसंबंधकंतुल्यमस्माकंकुरुपांडुषु ॥ यथेष्टंवर्तमानेषुपांडवेषुचतेषुच ॥ ३ ॥ तेविवाहार्थमानीतावयंसर्वेतथाभवान् ॥ कृतेविवाहेमुदितागमिष्यामोगृ
हान्प्रति ॥ ४ ॥ भवान्वद्धतमाराज्ञांवयसाचश्रुतेनच ॥ शिष्यवत्तेवयंसर्वेभवामेहनसंशयः ॥ ५ ॥ भवंतंधृतराष्ट्रश्चसततंबहुमन्यते ॥ आचार्ययोःसखाचासि
द्रोणस्यचकृपस्यच ॥ ६ ॥ सभवान्प्रेषयत्वद्यपांडवार्थकरंवचः ॥ सर्वेषांनिश्चितंतन्नःप्रेषयिष्यतियद्भवान् ॥ ७ ॥ यदितावच्छमंकुर्यान्नयायेनकुरुपुंगवः ॥
नभवेत्कुरुपांडूनांसौभ्रात्रेणमहान्क्षयः ॥ ८ ॥ अथदर्पान्वितोमोहान्नकुर्याद्धृतराष्ट्रजः ॥ अन्येषांप्रेषयित्वाचपश्चादस्मान्समाह्वयेः ॥ ९ ॥ ततोद्युर्योधनोमं
दःसहामात्यःसबांधवः ॥ निष्ठामापत्स्यतेमूढःकुद्धेगांडीवधन्वनि ॥ १० ॥ ॥वैशंपायनउवाच॥ ॥ततःसत्कृत्यवार्ष्णेयंविराटःपृथिवीपतिः ॥ गृहान्प्रस्थापया
माससगणंसहबांधवम् ॥ ११ ॥ द्वारकांतुगतेकृष्णेयुधिष्ठिरपुरोगमाः ॥ चक्रुःसांग्रामिकंसर्वंविराटश्चमहीपतिः ॥ १२ ॥ ततःसंप्रेषयामासविराटःसहबांधवैः ॥
सर्वेषांभूमिपालानांद्रुपदश्चमहीपतिः ॥ १३ ॥

पुकुंतीद्वारा कुरुषुदुर्योधनकन्यायाःसांबेनाहरणात् ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ वचःसंदेशवाक्यम् ॥ ७ ॥ ८ ॥ प्रेषयित्वादूतमितिशेषः ॥ ९ ॥ निष्ठांग[illegible]निष्पन्निनाशांतयाज्ञानिर्वहणेषुचेतिविश्वः ॥ ३ ॥
॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ ॥ इतिउद्योगप०नैलकंठीये भारतभा०पंचमोऽध्यायः ॥ ५ ॥ ॥ ७ ॥ ॥ १ ॥ वैद्याःविद्यावंतःकृतबुद्धयःसिद्धांतज्ञाः ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

वचनात्कुरुसिंहानांमत्स्यपांचालयोश्चते ॥ समाजग्मुर्महीपालाःसंप्रहृष्टाःसहाबलाः ॥ १४ ॥ तच्छ्रुत्वापांडुपुत्राणांसमागच्छन्महद्बलम् ॥ धृतराष्ट्रसुताश्चापिस
मानिन्युर्महीपतीन् ॥ १५ ॥ समाकुलामहीराजन्कुरुपांडवकारणात् ॥ तदासमभवत्कृत्स्नासंप्रयाणेमहीक्षिताम् ॥ १६ ॥ संकुलाचतदाभूमिश्चतुरंगबलान्वि
ता ॥ बलानितेषांवीराणामागच्छंततस्ततः ॥ १७ ॥ चालयंतीवगांदेवींसपर्वतवनामिमाम् ॥ ततःप्रज्ञावयोवृद्धंपांचाल्यःस्वपुरोहितम् ॥ कुरुभ्यःप्रेषयामा
सयुधिष्ठिरमतेस्थितः ॥ १८ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिसेनोद्योगपर्वणिपुरोहितयानेपंचमोऽध्यायः ॥ ५ ॥ ॥ ७ ॥ द्रुपदउवाच भूतानांप्रा
णिनःश्रेष्ठाःप्राणिनांबुद्धिजीविनः ॥ बुद्धिमत्सुनराःश्रेष्ठानरेष्वपिद्विजातयः ॥ १ ॥ द्विजेषुवैद्याःश्रेयांसोवैद्येषुकृतबुद्धयः ॥ कृतबुद्धिषुकर्तारःकर्तृषुब्रह्मवादिनः
॥ २ ॥ सभवान्कृतबुद्धीनांप्रधानइतिमेमतिः ॥ कुलेनचविशिष्टोऽसिवयसाचश्रुतेनच ॥ ३ ॥ प्रज्ञयासदृशश्चासिशुक्रेणांगिरसेनच ॥ विदितंचापितेसर्वंयथा
वृत्तःसकौरवः ॥ ४ ॥ पांडवश्चयथावृत्तःकुंतीपुत्रोयुधिष्ठिरः ॥ धृतराष्ट्रस्यविदितेवंचिताःपांडवाःपरैः ॥ ५ ॥ विदुरेणानुनीतोऽपिपुत्रमेवानुवर्तते ॥ शकुनिर्बुद्धि
पूर्वंहिकुंतीपुत्रंसमाह्वयत् ॥ ६ ॥ अनक्षज्ञंमताक्षःसन्क्षत्रवृत्तेस्थितंशुचिम् ॥ तेतथावंचयित्वातुधर्मराजंयुधिष्ठिरम् ॥ ७ ॥ नकस्यांचिदवस्थायांराज्यंदास्यं
तिवैस्वयम् ॥ भवांस्तुधर्मसंयुक्तंधृतराष्ट्रंब्रुवन्वचः ॥ ८ ॥ मनांसितस्ययोधानांध्रुवमावर्तयिष्यति ॥ विदुरश्चापिवद्वाक्यंसाधयिष्यतितावकम् ॥ ९ ॥ भीष्मद्रो
णकृपादीनांभेदंसंजनयिष्यति ॥ अमात्येषुचभिन्नेषुयोधेषुविमुखेषुच ॥ १० ॥ पुनरेकत्रकरणंतेषांकर्मभविष्यति ॥ एतस्मिन्नंतरेपार्थाःसुखमेकाग्रबुद्धयः
॥ ११ ॥ सेनाकर्मकरिष्यंतिद्रव्याणांचैवसंचयम् ॥ विद्यमानेषुचस्वेषुलंबमानेतथात्वयि ॥ १२ ॥ नतथातेकरिष्यंतिसेनाकर्मनसंशयः ॥ एतत्प्रयोजनंचात्रप्रा
धान्येनोपलभ्यते ॥ १३ ॥ संगत्याधृतराष्ट्रश्चकुर्याद्धर्म्यंवचस्तव ॥ सभवान्धर्मयुक्तश्चधर्म्येतेषुसमाचरन् ॥ १४ ॥ कृपालुषुपरिक्लेशान्पांडवीयान्प्रकीर्तयन्
वृद्धेषुकुलधर्मंचब्रुवन्पूर्वैरनुष्ठितम् ॥ १५ ॥ विभत्स्यतिमनांस्येषामितिमेनात्रसंशयः ॥ नचतेभ्योभयंतेऽस्तिब्राह्मणोत्यसिवेदवित् ॥ १६ ॥

॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ एतस्मिन्नंतरेशत्रुभिन्नानामेकीकरणेव्यापृतेष्वित्यर्थः ॥ ११ ॥ लंबमानेविलंबंकुर्वाणे ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

दूतकर्मणियुक्तश्चस्थविरश्चविशेषतः॥ सभवान्पुष्ययोगेनमुहूर्तेनजयेनच॥ १७॥ कौरवेयान्प्रयात्वाशुकौंतेयस्यार्थसिद्धये॥ वैशंपायनउवाच तथाऽनु
शिष्टःप्रययौद्रुपदेनमहात्मना॥ पुरोधाश्चत्तसंपन्नोनगरंनागसाह्वयम्॥ १८॥ शिष्यैःपरिवृतोविद्वान्नीतिशास्त्रार्थकोविदः॥ पांडवानांहितार्थायकौरवान्प्र
तिजग्मिवान्॥ १९॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिसेनोद्योगपर्वणिपुरोहितयानेषष्ठोऽध्यायः॥ ६॥ ॥ ७॥ ॥वैशंपायनउवाच पुरोहितंतेप्रस्था
प्यनगरंनागसाह्वयम्॥ दूतान्प्रस्थापयामासुःपार्थिवेभ्यस्ततस्ततः॥ १॥ प्रस्थाप्यदूतानन्यत्रद्वारकांपुरुषर्षभः॥ स्वयंजगामकौरव्यःकुंतीपुत्रोधनंजयः॥२॥
गतेद्वारवतींकृष्णेबलदेवेचमाधवे॥ सहवृष्ण्यंधकैःसर्वैर्भोजैश्चशतशस्तदा॥ ३॥ सर्वमागमयामासपांडवानांविचेष्टितम्॥ धृतराष्ट्रात्मजोराजागूढैःप्रणि
हितैश्चरैः॥ ४॥ सश्रुत्वामाधवंयांतंसदश्वैरनिलोपमैः॥ बलेननातिमहताद्वारकामभ्ययात्पुरीम्॥ ५॥ तमेवदिवसंचापिकौंतेयःपांडुनंदनः॥ आनर्तनगरींर
म्यांजगामाशुधनंजयः॥ ६॥ तौयात्वापुरुषव्याघ्रौद्वारकांकुरुनंदनौ॥ सुनंदद्दशतुःकृष्णंशयानंचाभिजग्मतुः॥ ७॥ ततःशयानेगोविंदेप्रविवेशसुयोधनः॥
उच्छीर्षतश्चकृष्णस्यनिषसादवरासने॥ ८॥ ततःकिरीटीतस्यानुप्रविवेशमहामनाः॥ पश्चाच्चैवसकृष्णस्यप्रह्वोऽतिष्ठत्कृतांजलिः॥ ९॥ प्रतिबुद्धःसवार्ष्णेयो
ददर्शाग्रेकिरीटिनम्॥ सतयोःस्वागतंकृत्वायथावत्प्रतिपूज्यतौ॥ १०॥ तदागमनजंहेतुंपप्रच्छमधुसूदनः॥ ततोदुर्योधनःकृष्णमुवाचप्रहसन्निव॥ ११॥ वि
ग्रहेऽस्मिन्भवान्साह्यंममदातुमिहार्हति॥ समंहिभवतःसख्यंममचैवार्जुनेऽपिच॥ १२॥ तथासंबंधकंतुल्यमस्माकंत्वयिमाधव॥ अहंचाभिगतःपूर्वंत्वा
मद्यमधुसूदन॥ १३॥ पूर्वंचाभिगतंसंतोभजंतेपूर्वसारिणः॥ त्वंचश्रेष्ठतमोलोकेसतामद्यजनार्दन॥ १४॥ सततंसमनश्चैवसदृत्तमनुपालय॥ कृष्णउवाच
भवानभिगतःपूर्वमत्रमेनास्तिसंशयः॥ दृष्टस्तुप्रथमंराजन्मयापार्थोधनंजयः॥ १५॥ तवपूर्वाभिगमनात्पूर्वंचाप्यस्यदर्शनात्॥ साहाय्यमुभयोरेवकरि
ष्यामिसुयोधन॥ १६॥ प्रवारणंतुबालानांपूर्वंकार्यमितिश्रुतिः॥ तस्मात्प्रवारणंपूर्वमर्हःपार्थोधनंजयः॥ १७॥

॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ प्रवारणंईप्सितप्रदानं काम्यदानंप्रवारणमितिविश्वः पूर्वमर्हः त्वत्तःकनिष्ठत्वादित्यर्थः ॥ १७ ॥ ॥ ४ ॥

॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ अपदृतंरिक्तंकृतम् ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ॥ इतिउ
मत्संहननतुल्यानांगोपानामर्बुदंमहत्॥ नारायणाइतिख्याताःसर्वेसंग्रामयोधिनः॥ १८॥ तेवायुधिदुराधर्षाभवंत्वेकस्यसैनिकाः॥ अयुध्यमानःसंग्रामे
न्यस्तशस्त्रोऽहमेकतः॥ १९॥ आभ्यामन्यतरंपार्थयत्तेदृद्यतरंमतम्॥ तद्गृणीतांभवानग्रेप्रवार्यस्त्वंहिधर्मतः॥ २०॥ वैशंपायनउवाच एवमुक्तस्तुकृष्णेन
कुंतीपुत्रोधनंजयः॥ अयुध्यमानंसंग्रामेवरयामासकेशवम्॥ २१॥ नारायणममित्रघ्नंकामाज्जातमजंनृषु॥ सर्वक्षत्रस्यपुरतोदेवदानवयोरपि॥ २२॥
दुर्योधनस्तुतत्सैन्यंसर्वमावरयत्तदा॥ सहस्राणांसहस्रंतुयोधानांप्राप्यभारत॥ २३॥ कृष्णंचापदृतंज्ञात्वासंप्रापपरमांमुदम्॥ दुर्योधनस्तुतत्सैन्यंसर्वमादाय
पार्थिवः॥ २४॥ ततोऽभ्ययाद्भीमबलोरौहिणेयंमहाबलम्॥ सर्वंचागमनंहेतुंसतस्मैसंन्यवेदयत्॥ प्रत्युवाचततःशौरिर्धार्तराष्ट्रमिदंवचः॥ २५॥ बलदेव
उवाच विदितंतेनरव्याघ्रसर्वंभवितुमर्हति॥ यन्मयोक्तंविराटस्यपुरावैवाहिकेतदा॥ २६॥ निगृह्योक्तोदृषीकेशस्त्वदर्थंकुरुनंदन॥ मयासंबंधकंतुल्यमिति
राजन्पुनःपुनः॥ २७॥ नचतद्वाक्यमुक्तंवैकेशवंप्रत्यपद्यत॥ नचाहमुत्सहेकृष्णंविनास्यातुमपिक्षणम्॥ २८॥ नाहंसहायःपार्थस्यनापिदुर्योधनस्यवै॥ इतिमे
निश्चितावुद्धिर्वासुदेवमवेक्ष्यह॥ २९॥ जातोऽसिभारतेवंशेसर्वपार्थिवपूजिते॥ गच्छयुध्यस्वधर्मेणक्षात्रेणपुरुषर्षभ॥ ३०॥ वैशंपायनउवाच इत्येव
मुक्तस्तुतदापरिष्वज्यहलायुधम्॥ कृष्णंचापदृतंज्ञात्वायुद्धान्मेनेजितंजयम्॥ ३१॥ सोऽभ्ययात्कृतवर्माणंधृतराष्ट्रसुतोनृपः॥ कृतवर्मादृदौतस्यसेनामक्षौहिणीं
तदा॥ ३२॥ सतेनसर्वसैन्येनभीमेनकुरुनंदनः॥ वृतःपरिययौदृष्टःसुहृदःसंप्रहर्षयन्॥ ३३॥ ततःपीतांबरधरोजगत्स्रष्टाजनार्दनः॥ गतेदुर्योधनेकृष्णःकिरी
टिनमथाब्रवीत्॥ ३४॥ अयुध्यमानःकांबुद्धिमास्थायाहंवृतस्त्वया॥ अर्जुनउवाच भवान्समर्थस्तान्सर्वान्निहंतुंनात्रसंशयः॥ निहंतुमहमप्येकःसमर्थः
पुरुषर्षभ॥ ३५॥ भवांस्तुकीर्तिमाँल्लोकेतद्यशस्त्वांगमिष्यति॥ यशसांचाहमप्यर्थीतस्मादसिमयावृतः॥ ३६॥ सारथ्यंतुत्वयाकार्यमितिमेमानसंसदा॥
चिररात्रेप्सितंकामंतद्भवान्कर्तुमर्हति॥ ३७॥ वासुदेवउवाच उपपन्नमिदंपार्थयत्स्पर्धसिमयासह॥ सारथ्यंतेकरिष्यामिकामःसंपद्यतांतव॥ ३८॥
वैशंपायनउवाच एवंप्रमुदितःपार्थःकृष्णेनसहितस्तदा॥ वृतोदाशार्हप्रवरैःपुनरायाद्युधिष्ठिरम्॥ ३९॥ इतिश्रीमहाभारतेउद्योगपर्वणिसेनोद्योगपर्व
णिकृष्णसारथ्यस्वीकारेसप्तमोऽध्यायः॥ ७॥ ॥ ७॥ द्योगप०नैलकंठीयेभारतभा०सप्तमोऽध्यायः॥ ७॥ ॥ ७॥

शल्यइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ येनयत्रदेशेतत्रययौ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ ॥ दिदित्सुः ददानेःस्यरूपम् ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥

वैशंपायनउवाच शल्यःश्रुत्वातुदूतानांसैन्येनमहताऽवृतः॥ अभ्ययात्पांडवान्राजन्सहपुत्रैर्महारथैः ॥ १ ॥ तस्यसेनानिवेशोऽभूद्व्यर्धमिवयोजनम् ॥ तथाहिविपुलांसेनांबिभर्तिसनरर्षभः॥ २ ॥ अक्षौहिणीपतीराजन्महावीर्यपराक्रमः ॥ विचित्रकवचाःशूराविचित्रध्वजकार्मुकाः ॥ ३ ॥ विचित्राभरणाःसर्वेविचित्ररथवाहनाः ॥ विचित्रस्रग्धराःसर्वेविचित्रांबरभूषणाः ॥ ४ ॥ स्वदेशवेषाभरणावीराःशतसहस्रशः ॥ तस्यसेनाप्रणेतारोबभूवुःक्षत्रियर्षभाः ॥ ५ ॥ व्यथयन्निवभूतानिकंपयन्निवमेदिनीं ॥ शनैर्विश्रामयन्सेनांसययौयेनपांडवः ॥ ६ ॥ ततोदुर्योधनःश्रुत्वामहात्मानंमहारथम् ॥ उपायांतमभिद्रुत्य स्वयमानर्चभारत ॥ ७ ॥ कारयामासपूजार्थंतस्यदुर्योधनःसभाः ॥ रमणीयेषुदेशेषुरत्नचित्राःस्वलंकृताः ॥ ८ ॥ शिल्पिभिर्विविधैश्चैवक्रीडास्तत्रप्रयोजिताः ॥ तत्रमाल्यानिमांसानिभक्ष्यंपेयंचसत्कृतम् ॥ ९ ॥ कूपाश्चविविधाकारामनोहर्षविवर्धनाः ॥ वाप्यश्चविविधाकाराऔदकानिगृहाणिच ॥ १० ॥ सताःसभाःसमासाद्यपूज्यमानोयथाऽमरः ॥ दुर्योधनस्यसचिवैर्देशेदेशेसमंततः ॥ ११ ॥ आजगामसभामन्यैर्देवान्वसयवर्चसम् ॥ सतत्रविषयैर्युक्तैःकल्याणैरतिमानुषैः ॥ १२ ॥ मेनेऽभ्यधिकमात्मानमवमेनेपुरंदरम् ॥ पप्रच्छसततःप्रेष्यान्प्रहृष्टःक्षत्रियर्षभः ॥ १३ ॥ युधिष्ठिरस्यपुरुषाःकेऽत्रचकुःसभाइमाः ॥ आनीयंतांसभाकाराःप्रदेयार्हाहिमेमताः ॥ १४ ॥ प्रसादमेषांदास्यामिकुंतीपुत्रोऽनुमन्यताम् ॥ दुर्योधनायतत्सर्वंकथयंतिस्मविस्मिताः ॥ १५ ॥ संप्रहृष्टोयदाशल्योदिदित्सुरपिजीवितम् ॥ गूढोदुर्योधनस्तत्रदर्शयामासमातुलम् ॥ १६ ॥ तंदृष्ट्वामद्रराजश्चज्ञात्वायत्नंचतस्यतम् ॥ परिष्वज्याब्रवीत्प्रीतइष्टोऽर्थोगृह्यतामिति ॥ १७ ॥ दुर्योधनउवाच सत्यवाग्भवकल्याणवरोवैममदीयताम् ॥ सर्वसेनाप्रणेतावैभवान्भवितुमर्हति ॥ १८ ॥ वैशंपायनउवाच कृतमित्यब्रवीच्छल्यःकिमन्यत्क्रियतामिति ॥ कृतमित्येवगांधारिःप्रत्युवाचपुनःपुनः ॥ १९ ॥ शल्यउवाच गच्छदुर्योधनपुरंस्वकमेवनरर्षभ ॥ अहंगमिष्येद्रष्टुंवैयुधिष्ठिरमरिंदमम् ॥ २० ॥ दृष्ट्वायुधिष्ठिरंराजन्क्षिप्रमेष्येनराधिप ॥ अवश्यंचापिद्रष्टव्यःपांडवःपुरुषर्षभः ॥ २१ ॥ दुर्योधनउवाच क्षिप्रमागम्यतांराजन्पांडवंवीक्ष्यपार्थिव ॥ त्वय्यधीनाःस्मराजेंद्रवरदानंस्मरस्वनः ॥ २२ ॥ शल्यउवाच क्षिप्रमेष्यामिभद्रंतेगच्छस्वस्वपुरंनृप ॥ परिष्वज्यतयाऽन्योन्यंशल्यदुर्योधनावुभौ ॥ २३ ॥

॥ २० ॥ २१ ॥ २२ ॥ गच्छस्वग्रामुहि स्वपुरंस्वराज्यम् ॥ २३ ॥

॥ २४ उपप्लव्यंविराटनगरस्यप्रदेशविशेषं स्कंधावारंसेनानिवेशस्थानम् ॥ २५ ॥ २६ ॥ २७ ॥ कृष्णाविति भीमोपिकृष्णएवासीदितिगम्यते दृष्टाविनिपाठःसुगमः ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥

सतथाशल्यमामंत्र्यपुनरायात्स्वकंपुरम् ॥ शल्योजगामकौंतेयानाख्यातुंकर्मतत्स्वतत् ॥ २४ ॥ उपप्लव्यंसगत्वातुस्कंधावारंप्रविश्यच ॥ पांडवानथतान्सर्वान्शल्यस्तत्रददर्शह ॥ २५ ॥ समेत्यचमहाबाहुःशल्यःपांडुसुतैस्तदा ॥ पाद्यमर्घ्यंचगांचैवप्रत्यगृह्णाद्यथाविधि ॥ २६ ॥ ततःकुशलपूर्वंहिमद्रराजोऽरिसूदनः ॥ प्रीत्यापरमयायुक्तःसमाश्लिष्ययुधिष्ठिरम् ॥ २७ ॥ तथाभीमार्जुनौकृष्णौस्वस्रीयौचयमावुभौ ॥ आसनेचोपविष्टस्तुशल्यःपार्थमुवाचह ॥ २८ ॥ कुशलंराजशार्दूलकच्चित्तेकुरुनंदन ॥ अरण्यवासाद्दिष्ट्याऽसिविमुक्तोजयतांवर ॥ २९ ॥ सुदुष्करंकृतंराजन्निर्जनेवसतात्वया ॥ भ्रातृभिःसहराजेंद्रकृष्णयाचानयासह ॥ ३० ॥ अज्ञातवासंघोरंचवसतादुष्करंकृतम् ॥ दुःखमेवकृतःसौख्यंभ्रष्टराज्यस्यभारत ॥ ३१ ॥ दुःखस्यैतस्यमहतोधार्तराष्ट्रकृतस्यवै ॥ अवाप्यसिसुखंराजन्हत्वाशत्रूनपरंतप ॥ ३२ ॥ विदितंतेमहाराजलोकतंत्रंनराधिप ॥ तस्माल्लोभकृतंकिंचित्तवतातनविद्यते ॥ ३३ ॥ राजर्षीणांपुराणानांमार्गमन्विच्छभारत ॥ दानेतपसिसत्येचभवतातयुधिष्ठिर ॥ ३४ ॥ क्षमादमश्चसत्यंचअहिंसाचयुधिष्ठिर ॥ अद्भुतश्चपुनर्लोकस्त्वयिराजन्प्रतिष्ठितः ॥ ३५ ॥ मृदुर्वदान्योब्रह्मण्योदाताधर्मपरायणः ॥ धर्मास्तेविदिताराजन्बहवोलोकसाक्षिकाः ॥ ३६ ॥ सर्वंजगदिदंतातविदितंतेपरंतप ॥ दिष्ट्याकृच्छ्रमिदंराजन्पारितंभरतर्षभ ॥ ३७ ॥ दिष्ट्यापश्यामिराजेंद्रधर्मात्मानंसहानुगम् ॥ निस्तीर्णंदुष्करंराजंस्त्वांधर्मनिचयंप्रभो ॥ ३८ ॥ ॥ वैशंपायनउवाच ॥ ॥ ततोऽस्याकथयद्राजादुर्योधनसमागमम् ॥ तच्चशुश्रूषितंसर्ववरदानंचभारत ॥ ३९ ॥ ॥ युधिष्ठिरउवाच ॥ ॥ सुकृतंतेकृतंराजन्प्रहृष्टेनांतरात्मना ॥ दुर्योधनस्ययद्वीरत्वयावाचाप्रतिश्रुतम् ॥ ४० ॥ एकंत्विच्छामिभद्रंतेक्रियमाणंमहीपते ॥ राजन्नकर्तव्यमपिकर्तुमर्हसिसत्तम ॥ ४१ ॥ ममत्ववेक्षयावीरशृणुविज्ञापयामिते ॥ भवानिहमहाराजवासुदेवसमोयुधि ॥ ४२ ॥ कर्णार्जुनाभ्यांसंग्रामेद्वैरथेराजसत्तम ॥ कर्णस्यभवताकार्यंसारथ्यंनात्रसंशयः ॥ ४३ ॥ तत्रपाल्योऽर्जुनोराजन्यदिमत्प्रियमिच्छसि ॥ तेजोवधश्चतेकार्यःसौतेरस्मज्जयावहः ॥ ४४ ॥ अकर्तव्यमपित्येतत्कर्तुमर्हसिमातुल ॥ ॥ शल्यउवाच ॥ ॥ शृणुपांडवभद्रंतेयद्ब्रवीषिमहात्मनः ॥ तेजोवधनिमित्तंमांसूतपुत्रस्यसंगमे ॥ ४५ ॥

॥ ३२ ॥ तंत्रंप्रधानेसिद्धांतेइत्यमरः ॥ ३३ ॥ ३४ ॥ ३५ ॥ वदान्यःमंजुलवाक् वदान्योवल्गुवाग्पीत्यमरः ॥ ३६ ॥ पारितंनिस्तीर्णम् ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥

॥ ४६ ॥ प्रतीपंप्रसंगप्रतिकूलं अहितंपरिणामविरुद्धम् ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ मन्युर्दैन्यम् ॥ ५२ ॥ ५३ ॥ ५४ ॥ इतिउद्योग० नैलकंठीयेभारतभा० अष्टमोऽध्यायः ॥ ८ ॥ ७ ॥

अहंतस्यभविष्यामिसंग्रामेसारथिर्ध्रुवम् ॥ वासुदेवेनहिसमंनित्यंमांसहिमन्यते ॥ ४६ ॥ तस्याहंकुरुशार्दूलप्रतीपमहितंवचः ॥ ध्रुवंसंकथयिष्यामियोद्धुकामस्यसंयुगे ॥ ४७ ॥ यथासदृतदर्पश्चदृततेजाश्चपांडव ॥ भविष्यतिसुखंहंतुंसत्यमेतद्ब्रवीमिते ॥ ४८ ॥ एवमेतत्करिष्यामियथातातत्वमात्थमाम् ॥ यच्चान्यदपिशक्ष्यामितत्करिष्यामितेप्रियम् ॥ ४९ ॥ यच्चदुःखंत्वयाप्राप्तंद्यूतेवैकृष्णयासह ॥ परुषाणिचवाक्यानिसूतपुत्रकृतानिवै ॥ ५० ॥ जटासुरात्परिक्लेशःकीचकाच्चमहाद्युते ॥ द्रौपद्याऽधिगतंसर्वंदमयंत्यायथाऽशुभम् ॥ ५१ ॥ सर्वंदुःखमिदंवीरसुखोदर्कंभविष्यति ॥ नात्रमन्युस्त्वयाकार्योविधिर्हिबलवत्तरः ॥ ५२ ॥ दुःखानिहिमहात्मानःप्राप्नुवंतियुधिष्ठिर ॥ देवैरपिहिदुःखानिप्राप्तानिजगतीपते ॥ ५३ ॥ इंद्रेणश्रूयतेराजन्सभार्येणमहात्मना ॥ अनुभूतंमहद्दुःखंदेवराजेनभारत ॥ ५४ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिसेनोद्योगपर्वणिशल्यवाक्येअष्टमोऽध्यायः ॥ ८ ॥ ॥ ७ ॥ ॥ युधिष्ठिरउवाच ॥ ॥ कथमिंद्रेणराजेंद्रसभार्येणमहात्मना ॥ दुःखंप्राप्तंपरंघोरमेतदिच्छामिवेदितुम् ॥ १ ॥ ॥ शल्यउवाच ॥ ॥ शृणुराजन्पुरावृत्तमितिहासंपुरातनम् ॥ सभार्येणयथाप्राप्तंदुःखमिंद्रेणभारत ॥ २ ॥ त्वष्टाप्रजापतिर्त्र्यासीद्देवश्रेष्ठोमहातपाः ॥ सपुत्रंवैत्रिशिरसमिंद्रद्रोहात्किलास्रजत् ॥ ३ ॥ ऐंद्रंसप्रार्थयत्स्थानंविश्वरूपोमहाद्युतिः ॥ तैस्त्रिभिर्वदनैर्घोरैःसूर्येंदुज्वलनोपमैः ॥ ४ ॥ वेदानेकेनसोऽधीतेसुरामेकेनचापिबत् ॥ एकेनचदिशःसर्वाःपिबन्निवनिरीक्षते ॥ ५ ॥ सतपस्वीमहदुर्दांतोधर्मे तपसिचोद्यतः ॥ तपस्तस्यमहत्तीव्रंसुदुश्चरमरिंदम ॥ ६ ॥ तस्यदृष्ट्वातपोवीर्यंसत्यंचामिततेजसः ॥ विषादमगमच्छक्रइंद्रोऽयंमाभवेदिति ॥ ७ ॥ कथंसज्जेच्चभोगेषुनचतप्येन्महत्तपः ॥ विवर्धमानस्त्रिशिराःसर्वंहिभुवनंग्रसेत् ॥ ८ ॥ इतिसंचिंत्यबहुधाबुद्धिमान्भरतर्षभ ॥ आज्ञापयत्सोऽप्सरसस्त्वष्टपुत्रप्रलोभने ॥ ९ ॥ यथाससज्जेत्रिशिराःकामभोगेषुवैभृशम् ॥ क्षिप्रंकुरुतगच्छध्वंप्रलोभयतमाचिरम् ॥ १० ॥ शृंगारवेषाःसुश्रोण्योहारैर्युक्तामनोहरैः ॥ हावभावसमायुक्ताःसर्वाःसौंदर्यशोभिताः ॥ ११ ॥ प्रलोभयतभद्रंवःशमयध्वंभयंमम ॥ अस्वस्थंह्यात्मनात्मानंलक्षयामिवरांगनाः ॥ १२ ॥ भयंतन्मेमहाघोरंक्षिप्रंनाशयताबलाः ॥ ॥ अप्सरसऊचुः ॥ ॥ तथायत्नंकरिष्यामःशक्रतस्यप्रलोभने ॥ यथानावाप्स्यसिभयंतस्माद्बलनिषूदन ॥ १३ ॥

॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ हावाःशृंगारचेष्टाःभावाःचित्तविकाराहर्षादयस्तैर्युक्ताः ॥ ११ ॥ १२ ॥ १३ ॥

॥ १४ ॥ १५ ॥ सौष्ठवंसौंदर्यंप्रहर्षंलब्धभोगोऽस्मीतितोषम् ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ वर्धकिःतक्षा ॥ २७ ॥ २८ ॥ २९ ॥ नभविष्यतिनं

निर्दहन्निवचक्षुर्भ्यांयोऽसावास्तेतपोनिधिः ॥ तंप्रलोभयितुंदेवगच्छामःसहितावयम् ॥ १४ ॥ यतिष्यामोवशेकर्तुंव्यपनेतुंचतेभयम् ॥ ॥ शल्यउवाच ॥ इंद्रेणतास्त्वनुज्ञाताजग्मुस्त्रिशिरसोंऽतिकम् ॥ तत्रताविविधैर्भावैर्लोभयंत्योवरांगनाः ॥ १५ ॥ नित्यंसंदर्शयामासुस्तथैवांगेषुसौष्ठवम् ॥ नाभ्यगच्छत्महर्षंताःसपश्यन्सुमहातपाः ॥ १६ ॥ इंद्रियाणिवशेकृत्वापूर्वसागरसन्निभः ॥ तासुयत्नंपरंकृत्वापुनःशक्रमुपस्थिताः ॥ १७ ॥ कृतांजलिपुटाःसर्वादेवराजमथाब्रुवन् ॥ नसशक्यःसुदुर्धर्षोधैर्याच्चालयितुंप्रभो ॥ १८ ॥ यत्तेकार्यंमहाभागक्रियतांतदनंतरम् ॥ संपूज्याप्सरसःशक्रोविसृज्यचमहामतिः ॥ १९ ॥ चिंतयामासवस्यैववधोपायंयुधिष्ठिर ॥ सतूष्णींचिंतयन्वीरोदेवराजःप्रतापवान् ॥ २० ॥ विनिश्चितमतिर्धीमान्वधेत्रिशिरसोऽभवत् ॥ वज्रमस्यक्षिपाम्यद्यसक्षिप्रंनभविष्यति ॥ २१ ॥ शत्रुःप्रवृद्धोनापेक्ष्योदुर्बलोऽपिबलीयसा ॥ शास्त्रबुद्ध्याविनिश्चित्यकृत्वाबुद्धिंवधेदृढाम् ॥ २२ ॥ अथवैश्वानरनिभंघोररूपंभयावहम् ॥ मुमोचवज्रंसंक्रुद्धःशक्रस्त्रिशिरसंप्रति ॥ २३ ॥ सपपातहतस्तेनवज्रेणदृढमाहतः ॥ पर्वतस्येवशिखरंप्रणुन्नंमेदिनीतले ॥ २४ ॥ तंतुवज्रहतंदृष्ट्वाशयानमचलोपमम् ॥ नशर्मलेभेदेवेंद्रोदीपितस्तस्यतेजसा ॥ २५ ॥ हतोऽपिदीप्ततेजाःसजीवन्निवहिदृश्यते ॥ घातितस्यशिरांस्याजौजीवंतीवाद्भुतानिवै ॥ २६ ॥ ततोऽतिभीतगात्रस्तुशक्रआस्तेविचारयन् ॥ अथाजगामपरशुंस्कंधेनादायवर्धकिः ॥ २७ ॥ तदरण्यंमहाराजयत्रास्तेऽसौनिपातितः ॥ सभीतस्तत्रतक्षाणंघटमानंशचीपतिः ॥ २८ ॥ अपश्यदव्रवीच्चैनंसत्वरंपाकशासनः ॥ क्षिप्रंछिंधिशिरांस्यस्यकुरुष्ववचनंमम ॥ २९ ॥ ॥ तक्षोवाच ॥ ॥ महास्कंधोभृशंत्येषपरशुर्नभविष्यति ॥ कर्तुंचाहंनशक्ष्यामिकर्मसद्विर्विगर्हितम् ॥ ३० ॥ ॥ इंद्रउवाच ॥ ॥ माभैस्त्वंशीघ्रमेतद्वैकुरुष्ववचनंमम ॥ मत्प्रसादाद्धितेशस्त्रंवज्रकल्पंभविष्यति ॥ ३१ ॥ ॥ तक्षोवाच ॥ ॥ कंभवंतमहंविद्यांघोरकर्माणमद्यवै ॥ एतदिच्छाम्यहंश्रोतुंतत्त्वेनकथयस्वमे ॥ ३२ ॥ ॥ इंद्रउवाच ॥ ॥ अहमिंद्रोदेवराजस्तक्षन्विद्धिमरुत्तवे ॥ कुरुष्वैतद्यथोक्तंमेतक्षन्माऽत्रविचारय ॥ ३३ ॥ ॥ तक्षोवाच ॥ ॥ क्रूरेणनापत्रपसेकथंशक्रेदृकर्मणा ॥ ऋषिपुत्रमिमंहत्वाब्रह्महत्याभयंनते ॥ ३४ ॥ ॥ शक्रउवाच ॥ ॥ पश्चाद्धर्मंचरिष्यामिपावनार्थंसुदुश्चरम् ॥ शत्रुरेषमहावीर्योवज्रेणनिहतोमया ॥ ३५ ॥ अद्यापिचाहमुद्विग्नस्तक्षन्नस्माद्विभेमिवै ॥ क्षिप्रंछिंधिशिरांसित्वंकरिष्येऽनुग्रहंतव ॥ ३६ ॥ शिरःपशोस्तेदास्यंतिभागंयज्ञेषुमानवाः ॥ एषतेऽनुग्रहस्तक्षन्क्षिप्रंकुरुममप्रियम् ॥ ३७ ॥

क्ष्यति ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥

॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ उपस्पृश्यआचम्य ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ अपावृत्यमुखंसंप्रसार्य ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥

शल्यउवाच ॥ ॥ एतच्छ्रुत्वातुतक्षासमहेंद्रवचनात्तदा ॥ शिरांस्यथत्रिशिरसःकुठारेणाच्छिनत्तदा ॥ ३८ ॥ निकृत्तेषुततस्तेषुनिष्क्रामन्नंडजास्त्वथ ॥ कपिंजलास्तित्तिराश्चकलविंकाश्चसर्वशः ॥ ३९ ॥ येनवेदानधीतेस्मपिबतेसोममेवच ॥ तस्माद्वक्त्राद्विनिश्चेरुःक्षिप्रंतस्यकपिंजलाः ॥ ४० ॥ येनसर्वादिशोराजन्पिबन्निवनिरीक्षते ॥ तस्माद्वक्त्राद्विनिश्चेरुस्तित्तिरास्तस्यपांडव ॥ ४१ ॥ यत्सुरापंतुतस्यासीद्वक्त्रंत्रिशिरसस्तदा ॥ कलविंकाःसमुत्पेतुःश्येनाश्चभरतर्षभ ॥ ४२ ॥ ततस्तेषुनिकृत्तेषुविज्वरोमघवानथ ॥ जगामत्रिदिवंहृष्टस्तक्षाऽपिस्वगृहान्ययौ ॥ ४३ ॥ मेनेकृतार्थमात्मानंहत्वाशत्रुंसुरारिहा ॥ त्वष्टाप्रजापतिःश्रुत्वाशक्रेणाथहतंसुतम् ॥ ४४ ॥ क्रोधसंरक्तनयनइदंवचनमब्रवीत् ॥ ॥ त्वष्टोवाच ॥ ॥ तप्यमानंतपोनित्यंक्षांतंदांतंजितेंद्रियम् ॥ विनाऽपराधेनयतःपुत्रंहिंसितवान्मम ॥ ४५ ॥ तस्माच्छक्रविनाशायवृत्रमुत्पादयाम्यहम् ॥ लोकाःपश्यंतुमेवीर्यंतपसश्चबलंमहत् ॥ ४६ ॥ सचपश्यतुदेवेंद्रोदुरात्मापापचेतनः ॥ उपस्पृश्यततःक्रुद्धस्तपस्वीसुमहायशाः ॥ ४७ ॥ अग्नौहुत्वासमुत्पाद्यघोरंवृत्रमुवाचह ॥ इंद्रशत्रोविवर्धस्वप्रभावात्तपसोमम ॥ ४८ ॥ सोऽवर्द्धतदिवंस्तब्ध्वासूर्यवैश्वानरोपमः ॥ किंकरोमीतिचोवाचकालसूर्यइवोदितः ॥ ४९ ॥ शक्रंजहीतिचाप्युक्तोजगामत्रिदिवंततः ॥ ततोयुद्धंसमभवद्वृत्रवासवयोर्महत् ॥ ५० ॥ संक्रुद्धयोर्महाघोरंप्रसक्तंकुरुसत्तम ॥ ततोजग्राहदेवेंद्रंवृत्रोवीरःशतक्रतुम् ॥ ५१ ॥ अपावृत्याक्षिपद्वक्त्रेशक्रंकोपसमन्वितः ॥ ग्रस्तेवृत्रेणशक्रेतुसंभ्रांतास्त्रिदिवेश्वराः ॥ ५२ ॥ असृजंस्तेमहासत्वाजृंभिकांवृत्रनाशिनीम् ॥ विजृंभमाणस्यततोवृत्रस्यास्यादपावृतात् ॥ ५३ ॥ स्वान्यंगान्यभिसंक्षिप्यनिष्क्रांतोबलनाशनः ॥ ततःप्रभृतिलोकस्यजृंभिकाप्राणसंश्रिता ॥ ५४ ॥ जहृषुश्चसुराःसर्वेशक्रंदृष्ट्वाविनिःसृतम् ॥ ततःप्रववृतेयुद्धंवृत्रवासवयोःपुनः ॥ ५५ ॥ संरब्धयोस्तदाघोरंसुचिरंभरतर्षभ ॥ यदाव्यवर्धतरणेवृत्रोबलसमन्वितः ॥ ५६ ॥ त्वष्टुस्तेजोबलाविद्धस्तदाशक्रोन्यवर्तत ॥ निवृत्तेचतदादेवाविषादमगमन्परम् ॥ ५७ ॥ समेत्यसहशक्रेणत्वष्टुस्तेजोविमोहिताः ॥ अमंत्रयंततेसर्वेमुनिभिःसहभारत ॥ ५८ ॥ किंकार्यमितिवैराजन्विचिंत्यभयमोहिताः ॥ जग्मुःसर्वेमहात्मानंमनोभिर्विष्णुमव्ययम् ॥ उपविष्टामंदराग्रेसर्वेवृत्रवधेप्सवः ॥ ५९ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिसेनोद्योगपर्वणिइंद्रविजयेनवमोऽध्यायः ॥ ९ ॥ ॥ इंद्रउवाच ॥ ॥ सर्वंव्याप्तमिदंदेवावृत्रेणजगदव्ययम् ॥ नह्यस्यसदृशंकिंचित्प्रतिघाताययद्भवेत् ॥ १ ॥ ॥ ५९ ॥ इतिउद्योगप० नैलकंठीयेभारतभा० नवमोऽध्यायः ॥ ९ ॥ १

॥ २ ॥ ३ ॥ क्षयंगृहं निलयापचयौक्षयावित्यमरः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

समर्थोह्यभवंपूर्वमसमर्थोऽस्मिसांप्रतम् ॥ कथंनुकार्यंभद्रंवोदुर्धर्षःसहिमेमतः ॥ २ ॥ तेजस्वीचमहात्माचयुद्धेचामितविक्रमः ॥ ग्रसेत्त्रिभुवनंसर्वंसदेवासुरमानुषम् ॥ ३ ॥ तस्माद्विनिश्चयमिमंशृणुध्वंत्रिदिवौकसः ॥ विष्णोःक्षयमुपागम्यसमेत्यचमहात्मना ॥ ४ ॥ तेनसंमंत्र्यवेत्स्यामोवधोपायंदुरात्मनः शल्यउवाच ॥ एवमुक्तेमघवतादेवाःसर्षिगणास्तदा ॥ शरण्यंशरणंदेवंजग्मुर्विष्णुंमहाबलम् ॥ ५ ॥ ऊचुश्चसर्वेदेवेशंविष्णुंवृत्रभयार्दिताः ॥ त्रयोलोकास्त्वयाक्रांतास्त्रिभिर्विक्रमणैःपुरा ॥ ६ ॥ अमृतंचाहृतंविष्णोदैत्याश्चनिहतारणे ॥ बलिंबद्धामहादैत्यंशक्रोदेवाधिपःकृतः ॥ ७ ॥ त्वंप्रभुःसर्वदेवानांत्वयासर्वमिदंततम् ॥ त्वंहिदेवोमहादेवसर्वलोकनमस्कृतः ॥ ८ ॥ गतिर्भवत्वंदेवानांसेंद्राणाममरोत्तम ॥ जगद्व्याप्तमिदंसर्वंवृत्रेणासुरसूदन ॥ ९ ॥ विष्णुरुवाच अवश्यंकरणीयंमेभवतांहितमुत्तम् ॥ तस्मादुपायंवक्ष्यामियथाऽसौनभविष्यति ॥ १० ॥ गच्छध्वंसर्षिगंधर्वायत्रासौविश्वरूपधृक् ॥ सामतस्यप्रयुंजध्वंततएनंविजेष्यथ ॥ ११ ॥ भविष्यतिजयोदेवाःशक्रस्यममतेजसा ॥ अदृश्यश्चप्रवेक्ष्यामिवज्रेह्यस्यायुधोत्तमे ॥ १२ ॥ गच्छध्वमृषिभिःसार्धंगंधर्वैश्चसुरोत्तमाः ॥ वृत्रस्यसहशक्रेणसंधिंकुरुतमाचिरम् ॥ १३ ॥ शल्यउवाच ॥ ॥ एवमुक्तेतुदेवेनऋषयस्त्रिदशास्तथा ॥ ययुःसमेत्यसहिताःशक्रंकृत्वापुरःसरम् ॥ १४ ॥ समीपमेत्यचयदासर्वएवमहौजसः ॥ तंतेजसाप्रज्वलितंप्रतपंतंदिशोदश ॥ १५ ॥ ग्रसंतमिवलोकांस्त्रीन्सूर्याचंद्रमसौयथा ॥ ददृशुस्तेततोवृत्रंशक्रेणसहदेवताः ॥ १६ ॥ ऋषयोऽथततोऽभ्येत्यवृत्रमूचुःप्रियंवचः ॥ व्याप्तंजगदिदंसर्वंतेजसातवदुर्जय ॥ १७ ॥ नचशक्नोषिनिर्जेतुंवासवंबलिनांवर ॥ युध्यतोश्चापिवांकालोव्यतीतःसुमहानिह ॥ १८ ॥ पीड्यंतेचप्रजाःसर्वाःसदेवासुरमानुषाः ॥ सख्यंभवतुतेवृत्रशक्रेणसहनित्यदा ॥ १९ ॥ अवाप्स्यसिसुखंत्वंचशक्रलोकांश्चशाश्वतान् ॥ ऋषिवाक्यंनिशम्याथवृत्रःसतुमहाबलः ॥ २० ॥ उवाचतानृषीन्सर्वान्प्रणम्यशिरसाऽसुरः ॥ सर्वेयूयंमहाभागागंधर्वाश्चैवसर्वशः ॥ २१ ॥ यद्ब्रूथतच्छ्रुतंसर्वंममापिशृणुतानघाः ॥ संधिःकथंवैभविताममशक्रस्यचोभयोः ॥ तेजसोर्हिद्वयोर्देवाःसख्यंवैभविताकथम् ॥ २२ ॥ ऋषयऊचुः ॥ सकृत्सतांसंगतंलिप्सितव्यंततःपरंभविताभव्यमेव ॥ नातिक्रामेत्सत्पुरुषेणसंगतंतस्मात्सतांसंगतंलिप्सितव्यम् ॥ २३ ॥ दृढंसतांसंगतंचापिनित्यंब्रूयाच्चार्थंह्यर्थकृच्छ्रेषुधीरः ॥ महार्थवत्सत्पुरुषेणसंगतंतस्मात्संतंनजिघांसेतधीरः ॥ २४ ॥ इंद्रःसतांसंमतश्चनिवासश्चमहात्मनाम् ॥ सत्यवादीह्यनिंद्यश्चधर्मवित्सूक्ष्मनिश्चयः ॥ २५ ॥

॥ २५ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ इति

तेनतेसहशक्रेणसंधिर्भवतुनित्यदा ॥ एवंविश्वासमागच्छमातेभूद्बुद्धिरन्यथा ॥ २६ ॥ ॥ शल्यउवाच ॥ महर्षिवचनंश्रुत्वातानुवाचमहाद्युतिः ॥ अवश्यंभग
वंतोमेमाननीयास्तपस्विनः ॥ २७ ॥ ब्रवीमियदहंदेवास्तत्सर्वंक्रियतेयदि ॥ ततःसर्वंकरिष्यामियदूचुर्माद्विजर्षभाः ॥ २८ ॥ नशुष्केणनचार्द्रेणनाऽस्त्रेणनचदा
रुणा ॥ नशस्त्रेणनचास्त्रेणनदिवानतथानिशि ॥ २९ ॥ वध्योभवेयंविप्रेंद्राःशक्रस्यसहदैवतैः ॥ एवंमेरोचतेसंधिःशक्रेणसहनित्यदा ॥ ३० ॥ बाढमित्येवऋ
षयस्तमूचुर्भरतर्षभ ॥ एवंदत्तेतुसंधानेवृत्रःप्रमुदितोऽभवत् ॥ ३१ ॥ युक्तःसदाऽभवच्चापिशक्रोहर्षसमन्वितः ॥ वृत्रस्यवधसंयुक्तानुपायान्वर्चितयत्
॥ ३२ ॥ छिद्रान्वेषीसमुद्विग्नःसदावसतिदेवराट् ॥ सकदाचित्समुद्रांतेसमपश्यन्महासुरम् ॥ ३३ ॥ संध्याकालउपावृत्तेमुहूर्तेचातिदारुणे ॥ ततःसंचिंत्यभग
वान्वरदानंमहात्मनः ॥ ३४ ॥ संध्येयंवर्ततेरौद्रानरात्रिर्दिवसंनच ॥ वृत्रश्चावध्योऽयंममसर्वहरोरिपुः ॥ ३५ ॥ यदिवृत्रंनहन्म्यद्यवंचयित्वामहासुरम्
महाबलंमहाकायंनमेश्रेयोभविष्यति ॥ ३६ ॥ एवंसंचिंतयन्नेवशक्रोविष्णुमनुस्मरन् ॥ अथफेनंतदाऽपश्यत्समुद्रेपर्वतोपमम् ॥ ३७ ॥ नायंशुष्कोनचार्द्रो
ऽयंनचशस्त्रमिदंतथा ॥ एनंक्षेप्स्यामिवृत्रस्यक्षणादेवनशिष्यति ॥ ३८ ॥ सवज्रमथफेनंतंक्षिप्रंवृत्रेनिसृष्टवान् ॥ प्रविश्यफेनंतंविष्णुरथवृत्रंव्यनाशयत्
॥ ३९ ॥ निहतेतुततोवृत्रेदिशोवितिमिराऽभवन् ॥ प्रववौचशिवोवायुःप्रजाश्चजहृषुस्तथा ॥ ४० ॥ ततोदेवाःसगंधर्वायक्षरक्षोमहोरगाः ॥ ऋषयश्चमहें
द्रंतमस्तुवन्विविधैःस्तवैः ॥ ४१ ॥ नमस्कृतःसर्वभूतैःसर्वभूतान्यसांत्वयत् ॥ हत्वाशत्रुंप्रहृष्टात्मावासवःसहदैवतैः ॥ ४२ ॥ विष्णुंत्रिभुवनश्रेष्ठंपूजयामास
धर्मवित् ॥ ततोहतेमहावीर्येवृत्रेदेवभयंकरे ॥ ४३ ॥ अनृतेनाभिभूतोऽभूच्छक्रःपरमदुर्मनाः ॥ त्रैशीर्षयाऽभिभूतश्चसपूर्वंब्रह्महत्यया ॥ ४४ ॥ सोऽतमाश्रि
त्यलोकानांनष्टसंज्ञोविचेतनः ॥ नप्राज्ञायतदेवेंद्रस्त्वभिभूतःसकल्मषैः ॥ ४५ ॥ प्रतिच्छन्नोऽवसच्चाप्सुचेष्टमानइवोरगः ॥ ततःप्रनष्टदेवेंद्रेब्रह्महत्याभया
दिते ॥ ४६ ॥ भूमिःप्रध्वस्तसंकाशानिर्दग्धाशुष्ककानना ॥ विच्छिन्नस्रोतसोनद्यःसरांस्यनुदकानिच ॥ ४७ ॥ संक्षोभश्चापिसत्वानामनावृष्टिरुतोऽभव
त् ॥ देवाश्चापिमहाशंत्रस्तास्तयासर्वेमहर्षयः ॥ ४८ ॥ अराजकेजगत्सर्वमभिभूतमुपद्रवैः ॥ ततोभीताऽभवन्देवाःकोनोराजाभवेदिति ॥ ४९ ॥ दिविदेवर्ष
यश्चापिदेवराजविनाकृताः ॥ नस्मकश्चनदेवानांराज्यंवैकुरुतेमति ॥ ५० ॥ इतिश्रीमहाभारतेउद्योगपर्वणिसेनोद्योगपर्वणिवृत्रवधेइंद्रविजयोनामद

शमोऽध्यायः १० ॥ ॥ ७ ॥ उद्योगप० नैलकंठीये भारतभा० दशमोऽध्यायः ॥ १० ॥

॥ ८ ॥

॥ १ ॥ नोस्माकंराजाभव ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ शाक्राणीमिंद्राणी आर्षआनुक् ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ इ० नै० एका० ॥ ११ ॥

शल्यउवाच ॥ ॥ ऋषयोथाब्रुवन्सर्वेदेवाश्चत्रिदिवेश्वराः ॥ अयंवैनहुषःश्रीमान्देवराज्येऽभिषिच्यताम् ॥ १ ॥ तेजस्वीचयशस्वीचधार्मिकश्चैवनित्यदा ॥
तेगत्वात्वब्रुवन्सर्वेराजानोभवपार्थिव ॥ २ ॥ सतानुवाचनहुषोदेवानृषिगणांस्तथा ॥ पितृभिःसहितान्राजन्परीप्सन्हितमात्मनः ॥ ३ ॥ दुर्बलोहंनमेश
क्तिर्भवतांपरिपालने ॥ बलवान्जायतेराजाबलंशक्रेहिनित्यदा ॥ ४ ॥ तमब्रुवन्पुनःसर्वेदेवाऋषिपुरोगमाः ॥ अस्माकंतपसायुक्तःपाहिराज्यंत्रिविष्टपे ॥
॥ ५ ॥ परस्परभयंघोरमस्माकंहिनसंशयः ॥ अभिषिच्यस्वराजेंद्रभवराजात्रिविष्टपे ॥ ६ ॥ देवदानवयक्षाणांमृषीणांरक्षसांतथा ॥ पितृगंधर्वभूतानांचक्षु
र्विषयवर्तिनां ॥ ७ ॥ तेजआदास्यसेपश्यन्बलवांश्चभविष्यसि ॥ धर्मपुरस्कृत्यसदासर्वलोकाधिपोभव ॥ ८ ॥ ब्रह्मर्षीश्चापिदेवांश्चगोपायस्वत्रिविष्टपे ॥ अ
भिषिक्तःसराजेंद्रततोराजात्रिविष्टपे ॥ ९ ॥ धर्मपुरस्कृत्यतदासर्वलोकाधिपोभवत् ॥ सुदुर्लभंवरंलब्ध्वाप्राप्यराज्यंत्रिविष्टपे ॥ १० ॥ धर्मात्मासततंभूत्वा
कामात्मासमपद्यत ॥ देवोद्यानेषुसर्वेषुनंदनोपवनेषुच ॥ ११ ॥ कैलासेहिमवत्पृष्ठेमंदरेश्वेतपर्वते ॥ सह्येमहेंद्रेमलयेसमुद्रेषुसरित्सुच ॥ १२ ॥ अप्सरोभिः
परिवृतोदेवकन्यासमावृतः ॥ नदुषोदेवराजोथक्रीडन्वबहुविधंतदा ॥ १३ ॥ शृण्वन्दिव्याबहुविधाःकथाःश्रुतिमनोहराः ॥ वादित्राणिचसर्वाणिगीतंच
मधुरस्वनम् ॥ १४ ॥ विश्वावसुर्नारदश्चगंधर्वाप्सरसांगणाः ॥ ऋतवःषट्चदेवेंद्रमूर्तिमंतउपस्थिताः ॥ १५ ॥ मारुतःसुरभिर्वातिमनोज्ञःसुखशीतलः ॥ एवं
चक्रीडतस्तस्यनहुषस्यदुरात्मनः ॥ १६ ॥ संप्राप्तादर्शनंदेवीशक्रस्यमहिषीप्रिया ॥ सतांसंदृश्यदुष्टात्माप्राहसर्वान्सभासदः ॥ १७ ॥ इंद्रस्यमहिषीदेवीक
स्मान्मांनोपतिष्ठति ॥ अहमिंद्रोस्मिदेवानांलोकानांचतथेश्वरः ॥ १८ ॥ आगच्छतुशचीमत्यंक्षिप्रमद्यनिवेशनम् ॥ तच्छ्रुत्वादुर्मनादेवीबृहस्पतिमुवाचह
॥ १९ ॥ रक्षमांनहुषाद्ब्रह्मंस्त्वामस्मिशरणंगता ॥ सर्वलक्षणसंपन्नांब्रह्मंस्त्वंमांप्रभाषसे ॥ २० ॥ देवराजस्यदयितामत्यंतंसुखभागिनीम् ॥ अवैधव्येनयुक्तां
चाप्येकपत्नींपतिव्रताम् ॥ २१ ॥ उक्तवानसिमांपूर्वमृतांतांकुरुवैगिरम् ॥ नोक्तपूर्वंचभगवन्मृथातेकिंचिदीश्वर ॥ २२ ॥ तस्माद्देतद्भवेत्सत्यंत्वयोक्तंद्विजसत्त
म ॥ बृहस्पतिरथोवाचशक्राणींभयमोहिताम् ॥ २३ ॥ यदुक्तासिमयादेविसत्यंतद्भवितांधुवम् ॥ द्रक्ष्यसेदेवराजानमिंद्रंशीघ्रमिहागतम् ॥ २४ ॥ नभेतव्यंचनहु
षात्सत्यमेतद्ब्रवीमिते ॥ समानयिष्येशक्रेणनचिराद्भवतीमहम् ॥ २५ ॥ अथशुश्रावनहुषःशक्राणींशरणंगताम् ॥ बृहस्पतेरंगिरसश्चुक्रोधसनृपस्तदा ॥ २६ ॥
इतिश्रीमहा० उ० प० से० इंद्राणीभयेएकादशोऽध्यायः ॥ ११ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ वैधर्म्यणित्वाष्ट्रवधादीनि उपधाःदम्भसलयादीनिछलानि ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ प्रपन्नंशरणागतं

शल्यउवाच ॥ ॥कुद्दंतुनदुषंदृष्ट्वादेवाऋषिपुरोगमाः ॥ अब्रुवन्देवराजानंनदुषंघोरदर्शनम् ॥ १ ॥ देवराजजहिक्रोधंत्वयिकुद्देजगद्विभो ॥ त्रस्तंसासुरगं धर्वसकिंनरमहोरगम् ॥ २ ॥ जहिक्रोधमिमंसाधोनकुप्यंतिभवद्विधाः ॥ परस्यपत्नीसादेवीप्रसीदत्वसुरेश्वर ॥ ३ ॥ निवर्तयमनःपापात्परदाराभिमर्शना त् ॥ देवराजोसिभद्रंतेप्रजाधर्मेणपालय ॥ ४ ॥ एवमुक्तोनजग्राहतद्वचःकाममोहितः ॥ अथदेवानुवाचेदंमिंद्रंप्रतिसुराधिपः ॥ ५ ॥ अहल्याधर्षितापूर्वम् ऋषिपत्नीयशस्विनी ॥ जीवतोभर्तुरिंद्रेणसवःकिंननिवारितः ॥ ६ ॥ बहूनिचनृशंसानिकृतानींद्रेणवैपुरा ॥ वैधर्म्याण्युपधाश्चैवसवःकिंननिवारितः ॥ ७ ॥ उ पतिष्ठतुदेवींमामेतदस्याहितंपरम् ॥ युष्माकंचसदादेवाःशिवमेवंभविष्यति ॥ ८ ॥ ॥देवाऊचुः ॥ ॥ इंद्राणीमानयिष्यामोययेच्छसिदिवस्पते ॥ जहिक्रो धमिमंवीरप्रीतोभवसुरेश्वर ॥ ९ ॥ ॥शल्यउवाच ॥ ॥इत्युक्तंतंतदादेवाऋषिभिःसहभारत ॥ जग्मुर्बृहस्पतिंवक्रुमिंद्राणींचाशुभंवचः ॥ १० ॥ जानी मःशरणंप्राप्तामिंद्राणींतववेश्मनि ॥ दत्ताभयांचविप्रेंद्रत्वयादेवर्षिसत्तम ॥ ११ ॥ तेत्वांदेवाःसगंधर्वाऋषयश्चमहाद्युते ॥ प्रसादयंतिचेंद्राणीनदुषायप्र दीयताम् ॥ १२ ॥ इंद्राद्दिशिष्टोनदुषोदेवराजोमहाद्युतिः ॥ वृणोत्विमंवराशेहाभर्तृत्वेवरवर्णिनी ॥ १३ ॥ एवमुक्तेतुसादेवीबाष्पमुत्सृज्यसस्वनम् ॥ उवाचरुद तीदीनाबृहस्पतिमिदंवचः ॥ १४ ॥ नाहमिच्छामिनदुषंपतिंदेवर्षिसत्तम ॥ शरणागतास्मितेब्रह्मंस्त्रायस्वमहतोभयात् ॥ १५ ॥ ॥बृहस्पतिरुवाच ॥ ॥श रणागतंनत्यजेयमिंद्राणिममनिश्चयः ॥ धर्मज्ञांसत्यशीलांचनत्यजेयमनिंदिते ॥ १६ ॥ नाकार्यंकर्तुमिच्छामिब्राह्मणःसन्विशेषतः ॥ श्रुतधर्मासत्यशी लोजानन्धर्मानुशासनम् ॥ १७ ॥ नाहमेतत्करिष्यामिगच्छध्वंवैसुरोत्तमाः ॥ अस्मिंश्चार्थेपुरागीतंब्रह्मणाश्रूयतामिदम् ॥ १८ ॥ नतस्यबीजंरोहतिरोहकाले नतस्यवर्षंवर्षतिवर्षकाले ॥ भीतंप्रपन्नंप्रददातिशत्रवेनसत्रातारंलभतेत्राणमिच्छन् ॥ १९ ॥ मोघमन्नंविंदतिचाप्यचेताःस्वर्गाल्लोकाद्भ्रश्यतिनष्टचेष्टः ॥ भीतंप्रपन्नंप्रददातियोवैनतस्यहव्यंप्रतिगृह्णंतिदेवाः ॥ २० ॥ प्रमीयतेचास्यप्रजात्यकालेसदाविवासंपिनरोस्यकुर्वते ॥ भीतंप्रपन्नंप्रददातिशत्रवेसेंद्रादे वाःप्रहरंत्यस्यवज्रम् ॥ २१ ॥एतदेवंविजानन्वैनदास्यामिशचीमिमाम् ॥इंद्राणींविश्रुतांलोकेशक्रस्यमहिषींप्रियाम् ॥ २२ ॥ अस्याहितंभवेद्यच्चममचापिहितं भवेत् ॥ कियतांतत्सुरश्रेष्ठानहिदास्याम्यहंशचीम् ॥ २३ ॥ ॥शल्यउवाच ॥ ॥अथदेवाःसगंधर्वागुरुमाहुरिदंवचः ॥ कथंसुनीतंनुभवेन्मंत्रयस्वबृहस्पते ॥ २४ ॥

॥ ११ ॥ अचेताःदुर्बलचित्तः ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥

॥ ९ ॥

कलांतरंकालावधि ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ इतिउद्योगप०नैलकंठीयेभा०द्वादशोऽध्यायः ॥ १२ ॥ ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ विष्णुत्वं

बृहस्पतिरुवाच ॥ ॥नदुषंयाचतांदेवींकिंचित्कालांतरंशुभा ॥ इंद्राणीहितमेतद्धितथास्माकंभविष्यति ॥ २५ ॥ बहुविघ्नःसुराःकालःकालःकालंनयिष्यति ॥ गर्वितोबलवांश्चापिनदुषोवरसंश्रयात् ॥ २६ ॥ ॥शल्यउवाच ॥ ॥ ततस्तेनतथोक्तेतुप्रीतादेवास्तथाब्रुवन् ॥ ब्रह्मन्साध्विदमुक्तंतेहितंसर्वदिवौकसां ॥ २७ ॥ एवमेतद्द्विजश्रेष्ठदेवीचेयंप्रसाद्यताम् ॥ ततःसमस्ताइंद्राणींदेवाश्चाग्निपुरोगमाः ॥ २८ ॥ ऊचुर्वचनमव्यग्रालोकानांहितकाम्यया ॥ देवाऊचुः त्वयाजगदिदंसर्वंधृतंस्थावरजंगमम् ॥ एकपत्न्यसिसत्याचगच्छस्वनदुषंप्रति ॥ २९ ॥ क्षिप्रंत्वामभिकामश्चविनशिष्यतिपापकृत् ॥ नदुषोदेविशक्रश्चसुरैश्च र्यमवाप्स्यति ॥ ३० ॥ एवंविनिश्चयंकृत्वाइंद्राणीकार्यसिद्धये ॥ अभ्यगच्छतसव्रीडानदुषंघोरदर्शनम् ॥ ३१ ॥ दृष्ट्वातांनदुषश्चापिवयोरूपसमन्विताम् ॥ सम दृष्यतदुष्टात्माकामोपहतचेतनः ॥ ३२ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिसेनो०इंद्राणीकालावधियाचनेद्वादशोऽध्यायः ॥ १२ ॥ ॥शल्यउवाच ॥ अ थतामब्रवीद्दृष्ट्वानदुषोदेवराट्तदा ॥ त्रयाणामपिलोकानामहमिंद्रःशुचिस्मिते ॥ १ ॥ भजस्वमांवरारोहेपतित्वेवरवर्णिनि ॥ एवमुक्तातुसादेवीनदुषेणपति व्रता ॥ २ ॥ प्रावेपतभयोद्विग्नाप्रवातेकदलीयथा ॥ प्रणम्यसाहिब्रह्माणंशिरसातुकृतांजलिः ॥ ३ ॥ देवराजमथोवाचनदुषंघोरदर्शनम् ॥ कालमिच्छाम्यहं लब्धुंत्वत्तःकंचित्सुरेश्वर ॥ ४ ॥ नहिविज्ञायतेशक्रःकिंवाप्राप्तःक्वागतः ॥ तत्त्वमेतत्तुविज्ञाययदिनज्ञायतेप्रभो ॥ ५ ॥ ततोऽहंत्वामुपस्थास्येसत्यमेतद्ब्रवीमि ते ॥ एवमुक्तःसइंद्राण्यानदुषःप्रीतिमानभूत् ॥ ६ ॥ ॥ नदुषउवाच ॥ ॥ एवंभवतुसुश्रोणिययामामिहभाषसे ॥ ज्ञात्वाचागमनंकार्यंसत्यमेतदनुस्मरेः ॥ ७ ॥ नदुषेणविसृष्टाचनिश्चक्रामततःशुभा ॥ बृहस्पतिनिकेतंचसाजगामयशस्विनी ॥ ८ ॥ तस्याःसंश्रुत्यचवचोदेवाश्चाग्निपुरोगमाः ॥ चिंतयामासुरेका ग्राःशक्रार्थंराजसत्तम ॥ ९ ॥ देवदेवेनसंगम्यविष्णुनाप्रभविष्णुना ॥ ऊचुश्चैनंसमुद्विग्नावाक्यंवाक्यविशारदाः ॥ १० ॥ ब्रह्मवध्याभिभूतोवैशक्रःसुरगणेश्व रः ॥ गतिश्चनस्त्वंदेवेशपूर्वजोजगतःप्रभुः ॥ ११ ॥ रक्षार्थंसर्वभूतानांविष्णुत्वमुपजग्मिवान् ॥ त्वद्वीर्यनिहतेवृत्रेवासवोब्रह्महत्ययां ॥ १२ ॥ वृतःसुरगणश्रे ष्ठमोक्षंतस्यविनिर्दिश ॥ तेषांतद्वचनंश्रुत्वादेवानांविष्णुरब्रवीत् ॥ १३ ॥ मामेवयजतांशक्रःपावयिष्यामिवज्रिणम् ॥ पुण्येनहयमेधेनमामिष्ट्वापाकशासनः ॥ १४ ॥ पुनरेष्यतिदेवानामिंद्रत्वमकुतोभयः ॥ स्वकर्मभिश्चनदुषोनाशंयास्यतिदुर्मतिः ॥ १५ ॥ व्यापकत्वं अव्यापकेनजगद्रक्षायाअसंभवात् ॥ १२ ॥ १३ ॥ १४ ॥ ५ ॥

॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ अकंपत्अकंपत तङ्भावआर्षः ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ उपश्रुतिसंदेहनिर्णायिकदिवीआकरोत्आकारितवती ॥ २६ ॥ यत्रेति अयंचार्थःआ
नोयाम्युपश्रुत्युक्तेषुरणयाइह दिवोअमुष्यशासतोदिवंययदिवावसोइतिमंत्रोक्तउपबृंहितः मंत्रार्थस्तुहेउपश्रुतिनःअस्मान्प्रतिआयाहि उक्तेषुकाम्येषुकर्मसुइहरणयइष्टंकामंगमयप्रापय रणगताचि

किंचित्कालमिदंदेवामर्षयध्वमतंद्रिताः॥ श्रुत्वाविष्णोःशुभांसत्यांवाणींतामृतोपमाम्॥ १६॥ ततःसर्वेसुरगणाःसोपाध्यायाःसहर्षिभिः ॥ यत्रशक्रोभ
योद्विग्नस्तंदेशमुपचक्रमुः॥ १७॥ तत्राश्वमेधःसुमहान्महेंद्रस्यमहात्मनः॥ ववृतेपावनार्थंवैब्रह्महत्यापहोनृप ॥ १८ ॥ विभज्यब्रह्महत्यांतुवृक्षेषुचनदीषुच ॥
पर्वतेषुपृथिव्यांचस्त्रीषुचैवयुधिष्ठिर ॥ १९ ॥ संविभज्यचभूतेषुविसृज्यचसुरेश्वरः ॥ विज्वरोधूतपाप्माचवासवोऽभवदात्मवान् ॥ २० ॥ अकंपन्नहुषं
स्थानाद्दृष्ट्वाबलनिषूदनः ॥ तेजोघ्नंसर्वभूतानांवरदानाच्चदुःसहम् ॥ २१ ॥ ततःशचीपतिर्देवःपुनरेवव्यनश्यत ॥ अदृश्यःसर्वभूतानांकालाकांक्षीचचारह
॥ २२ ॥ प्रनष्टेतुततःशक्रेशचीशोकसमन्विता ॥ हाशक्रेतितदादेवीविललापसुदुःखिता ॥ २३ ॥ यदिदत्तंयदिहुतंगुरवस्तोषितायदि ॥ एकभर्तृत्वमेवास्तु
सत्यंयद्यस्तिवामयि ॥ २४॥ पुण्यांचेमामहंदिव्यांप्रदत्तामुत्तरायणे ॥ देवीरात्रिंनमस्यामिसिध्यतांमेमनोरथः ॥ २५ ॥ प्रयताचनिशांदेवीमुपातिष्ठतत
त्रसा॥ पतिव्रतात्वात्सत्येनसोपश्रुतिमथाकरोत् ॥ २६ ॥ यत्रास्तेदेवराजोसौतंदेशंदर्शयस्वमे॥ इत्याहोपश्रुतिंदेवींसत्यंसत्येनदृश्यताम्॥ २७॥ इतिश्री
महाभारतेउद्योगपर्वणिसेनोद्योगपर्वणिउपश्रुतियाचनेत्रयोदशोऽध्यायः॥ १३॥ ॥ ७ ॥ ॥शल्यउवाच॥ अथैनांरूपिणीसाध्वीमुपातिष्ठदुपश्रुतिः ॥
तांवयोरूपसंपन्नांदृष्ट्वादेवीमुपस्थिताम्॥ १ ॥ इंद्राणीसंप्रहृष्टात्मासंपूज्यैनामथाब्रवीत्॥ इच्छामित्वामहंज्ञातुंकात्वंब्रूहिवरानने॥ २॥ ॥उपश्रुतिरुवाच॥
उपश्रुतिरहंदेवितवांतिकमुपागता॥ दर्शनंचैवसंप्राप्तावसत्येनभाविनि ॥ ३ ॥ पतिव्रताचयुक्ताचयमेननियमेनच ॥ दर्शयिष्यामितेशक्रंदेवंदत्रनिषूद
नम्॥ ४॥ क्षिप्रमन्वेहिभद्रंतेद्रक्ष्यसेसुरसत्तमम्॥ ततस्तांप्रहितांदेवीमिंद्राणीसासमन्वगात्॥ ५॥ ॥ ७ ॥ ॥ ७ ॥

॥ १० ॥

त्यस्यरूपं अमुष्यबुद्धिस्थस्यदिवंशासतंइंद्रस्यदिवंप्रकाशंययगमय यच्छेत्यर्थः व्ययगताविति अस्यलोटिरूपं वलोपआर्षः हेदिवावसोअह्नोधनंसूर्यस्तद्वत्तमोयस्तमर्थंप्रकाशयितुंसमर्थ ॥ २७ ॥
इतिउद्योगपर्वणिनैलकंठीयेभारतभावदीपेत्रयोदशोऽध्यायः॥ १३ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ प्रहितांप्रस्थिताम्॥ ५॥

॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ त्रास्यसि पालयिष्यसि तङ्भावआर्षः ॥ १६ ॥ १७ ॥ १८ ॥ इति०उद्यो०नैलकं०भारतभा०चतुर्दशोऽध्यायः॥ १४ ॥ ॥ ७ ॥ ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

देवारण्यान्यतिक्रम्यपर्वतांश्चबहूंस्ततः॥ हिमवंतमतिक्रम्यउत्तरंपार्श्वमागमत् ॥ ६ ॥ समुद्रंचसमासाद्यबहुयोजनविस्तृतम्॥ आससादमहाद्दीपंनानाद्रुम
लतावृतम्॥ ७॥ तत्रापश्यत्सरोदिव्यंनानाशकुनिभिर्वृतम्॥ शतयोजनविस्तीर्णतावदेवायतंशुभम्॥ ८॥ तत्रदिव्यानिपद्मानिपंचवर्णानिभारत॥ षट्पदै
रुपगीतानिप्रफुल्लानिसहस्रशः॥ ९॥ सरसस्तस्यमध्येतुपद्मिनीमहतीशुभा॥ गौरेणोन्नतनालेनपद्मेनमहतावृता॥ १०॥ पद्मस्यभित्त्वानालंचविवेशसहिता
तया॥ बिसतंतुप्रविष्टंचतत्रापश्यच्छतक्रतुम् ॥ ११ ॥ तंदृष्ट्वाचसुसूक्ष्मेणरूपेणावस्थितंप्रभुम् ॥ सूक्ष्मरूपधरादेवीबभूवोपश्रुतिश्चसा ॥ १२ ॥ इंद्रंतुष्टा
वचेंद्राणीविश्रुतैःपूर्वकर्मभिः ॥ स्तूयमानस्ततोदेवःशचीमाहपुरंदरः ॥ १३॥ किमर्थमसिसंप्राप्ताविज्ञातश्चकथंत्वहम् ॥ ततःसाकथयामासनहुषस्यविचे
ष्टितम्॥ १४॥ इंद्रत्वंत्रिषुलोकेषुप्राप्यवीर्यसमन्वितः॥ दर्पाविष्टश्चदुष्टात्मामामुवाचशतक्रतो ॥ १५ ॥ उपतिष्ठतिसक्रूरकालंचरुतवान्मम ॥ यदिनत्रास्य
सिविभोकरिष्यतिसमांवशे॥ १६॥ एतेनचाहंसंप्राप्ताद्रुतंशक्रतवांतिकम्॥ जहिरौद्रंमहाबाहोनहुषंपापनिश्चयम्॥ १७॥ प्रकाशयात्मनात्मानंदैत्यदानवसू
दन॥ तेजःसमाभुहिविभोदेवराज्यंप्रशाधिच ॥ १८॥ इतिश्रीमहाभारतेउद्योगपर्वणिसेनोद्योगपर्वणिइंद्राणींद्रस्तवेचतुर्दशोऽध्यायः॥ १४ ॥ ॥ ७ ॥
शल्यउवाच॥ एवमुक्तःसभगवान्शच्यांपुनरब्रवीत्॥ विक्रमस्यनकालोयंनहुषोबलवत्तरः॥ १॥ विवर्धितश्चऋषिभिर्हव्यकव्यैश्चभाविनि॥ नीतिमत्र
विधास्यामिदेवीतांकर्तुमर्हसि ॥ २ ॥ गुह्यंचैतत्त्वयाकार्यनाख्यातव्यंशुभेक्वचित् ॥ गत्वानहुषमेकांतेब्रवीहिचसुमध्यमे ॥ ३ ॥ ऋषियानेनदिव्येनमामुपै
हिजगत्पते ॥ एवंतववशेप्रीताभविष्यामीतितंवद ॥ ४ ॥ इत्युक्तादेवराजेनपत्नीसाकमलेक्षणा ॥ एवमस्त्वित्यथोक्तातुजगामनहुषंप्रति ॥ ५ ॥ नहुष
स्तांततोदृष्ट्वासस्मितोवाक्यमब्रवीत् ॥ स्वागतंतेवरारोहेकिंकरोमिशुचिस्मिते ॥ ६ ॥ भक्तंमांभजकल्याणिकिमिच्छसिमनस्विनि॥ तवकल्याणियत्कार्यं
तत्करिष्येसुमध्यमे॥ ७॥ नचव्रीढात्वयाकार्यासुश्रोणिमयिविश्वसेः॥ सत्येनवैशपेदेविकरिष्येवचनंतव॥ ८॥ ॥इंद्राण्युवाच ॥ ॥योमेकृतस्त्वयाकालस्त
माकांक्षेजगत्पते ॥ ततस्त्वमेवभर्तामेभविष्यसिसुराधिप ॥ ९ ॥ कार्यंचेद्दिमेयत्तद्देवराजावधारय ॥ वक्ष्यामियदिमेराजन्प्रियमेतत्करिष्यसि ॥ १० ॥
वाक्यंप्रणयसंयुक्ततःस्यांवशगातव॥ इंद्रस्यवाजिनोवाहाहस्तिनोथरथास्तथा ॥ ११ ॥ इच्छाम्यहमथापूर्ववाहनंतेसुराधिप ॥ यन्नविष्णोर्नरुद्रस्यनासु
राणांनरक्षसाम्॥ १२॥

॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ मांवक्ष्यतिममवहनंकरिष्यतेति ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ अन्विष्यतांअनुगच्छतृभवान् इषगतावित्यस्यदिवादेरूपम् ॥ २८ ॥ २९ ॥ ३० ॥

वहंतुत्वांमहाभागाऋषयःसंगताविभो ॥ सर्वैशिबिकयाराजन्नेतद्धिममरोचते ॥ १३ ॥ नासुरेषुनदेवेषुतुल्योभवितुमर्हसि ॥ सर्वैपांतेजआदत्सेस्वेनवीर्येणदर्शनात् ॥ १४ ॥ नतेप्रमुखतःस्थातुंकश्चिच्छक्नोतिवीर्यवान् ॥ ॥ शल्यउवाच ॥ ॥ एवमुक्तस्तुनहुषःप्रात्यष्यततदाकिल ॥ उवाचवचनंचापिसुरेंद्रस्तामनिंदिताम् ॥ १५ ॥ ॥ नहुषउवाच ॥ ॥ अपूर्ववाहनमिदंत्वयोक्तंवरवर्णिनि ॥ दृढंमेरुचितंदेवित्वद्दशोऽस्मिवरानने ॥ १६ ॥ बह्वल्पवीर्याभवतियोवाहानकुरुतेमुनीन् ॥ अहंतपस्वीबलवान्भूतभव्यभवत्प्रभुः ॥ १७ ॥ मयिकुद्धेजगन्नस्यान्मयिसर्वंप्रतिष्ठितम् ॥ देवदानवगंधर्वाःकिन्नरोरगराक्षसाः ॥ १८ ॥ नमेकुद्धस्यपर्याप्ताःसर्वेलोकाःशुचिस्मिते ॥ चक्षुषायंप्रपश्यामितस्यतेजोहराम्यहम् ॥ १९ ॥ तस्मात्तेवचनंदेविकरिष्यामिनसंशयः ॥ सप्तर्षयोमांवक्ष्यंतिसर्वेब्रह्मर्षयस्तथा ॥ २० ॥ पश्यमाहात्म्ययोगंमेऋद्धिंचवरवर्णिनि ॥ ॥ शल्यउवाच ॥ ॥ एवमुक्तातुतांदेवींविसृज्यचवराननाम् ॥ २१ ॥ विमानेयोजयित्वाचऋषीन्निगमामास्थितान् ॥ अब्रह्मण्योबलोपेतोमत्तोमदबलेनच ॥ कामदत्तःसदुष्टात्मावाहयामासतानृषीन् ॥ २२ ॥ नहुषेणविसृष्टाचबृहस्पतिमथाब्रवीत् ॥ समयोऽल्पावशेषोमेनहुषेणेहयःकृतः ॥ २३ ॥ शक्रंमृगयशीघ्रंत्वंभक्तायाःकुरुमेदयाम् ॥ बाढमित्येवभगवान्बृहस्पतिरुवाचताम् ॥ २४ ॥ नभेतव्यंत्वयादेविनहुषादुष्टचेतसः ॥ नत्येषस्थास्यतिचिरंगतएषनराधमः ॥ २५ ॥ अधर्मज्ञोमहर्षीणांवाहनाच्चततःशुभे ॥ इष्टिंचाहंकरिष्यामिविनाशायास्यदुर्मतेः ॥ २६ ॥ शक्रंचाधिगमिष्यामिमाभैस्त्वंभद्रमस्तुते ॥ ततःप्रज्वाल्यविधिवज्जुहावपरमंहविः ॥ २७ ॥ बृहस्पतिर्महातेजादेवराजोपलब्धये ॥ हुत्वाग्निंसोब्रवीद्राजऊर्ध्वकर्मन्विष्यतामिति ॥ २८ ॥ तस्माच्चभगवान्देवःस्वयमेवहुताशनः ॥ स्त्रीवेषमद्भुतंकृत्वातत्रैवांतरधीयत ॥ २९ ॥ सदिशःप्रदिशश्चैवपर्वतानिवनानिच ॥ पृथिवींचांतरिक्षंचविचिंत्याथमनोगतिः ॥ ३० ॥ निमेषांतरमात्रेणबृहस्पतिमुपागमत् ॥ ॥ अग्निरुवाच ॥ ॥ बृहस्पतेनपश्यामिदेवराजमिहक्वचित् ॥ आपःशेषाःसदाचापःप्रवेष्टुंनोत्सहाम्यहम् ॥ ३१ ॥ नमेतत्रगतिर्ब्रह्मन्किमन्यत्करवाणिते ॥ तमब्रवीद्देवगुरुरपोविशमहाद्युते ॥ ३२ ॥ ॥ अग्निरुवाच ॥ ॥ नापःप्रवेष्टुंशक्ष्यामिक्षयोमेऽत्रभविष्यति ॥ शरणंत्वांप्रपन्नोस्मिस्वस्तितेस्तुमहाद्युते ॥ ३३ ॥ अद्भ्योग्निर्ब्रह्मतःक्षत्रमश्मनोलोहमुत्थितम् ॥ तेषांसर्वत्रगंतेजःस्वासुयोनिषुशाम्यति ॥ ३४ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिसेनोद्योगपर्वणिबृहस्पत्यग्निसंवादेपंचदशोऽध्यायः ॥ १५ ॥ ॥ ७ ॥

॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ इतिउद्योगप० नैलकंठीये भारतभा० पंचदशोऽध्यायः ॥ १५ ॥ ७ ॥

॥ ११ ॥

॥ १ ॥ एकंजाठरं त्रिविधंगार्हपत्यदक्षिणाग्न्याहवनीयरूपेणत्वयैकेन ॥ २ ॥ तुभ्यंत्रिविधाय ॥ ३ ॥ ४ ॥ प्रसूतिःउत्पत्तिस्थानं प्रतिष्ठालयस्थानम् ॥ ५ ॥ हेतयःज्वालाः ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

बृहस्पतिरुवाच ॥ ॥ त्वमग्नेसर्वदेवानांमुखंत्वमसिहव्यवाट् ॥ त्वमंतःसर्वभूतानांगूढश्चरसिसाक्षिवत् ॥ १ ॥ त्वामाहुरेकंकवयस्त्वामाहुस्त्रिविधंपुनः ॥ त्वयात्यक्तंजगच्चेदंसयोनस्येद्धुताशन ॥ २ ॥ कृत्वातुभ्यंनमोविप्राःस्वकर्मविजितांगतिं ॥ गच्छंतिसहपत्नीभिःसुतैरपिचशाश्वतीं ॥ ३ ॥ त्वमवाग्रेहव्यवाहस्त्वमेवपरमंहविः ॥ यजंतिसत्रैस्त्वामेवयज्ञैश्चपरमाध्वरे ॥ ४ ॥ स्रष्ट्वालोकांस्त्रीनिमान्हव्यवाहप्रामेकालेपचसिपुनःसमिद्धः ॥ त्वंसर्वस्यभुवनस्यप्रसूतिस्त्वमेवाग्नेभवसिपुनःप्रतिष्ठा ॥ ५ ॥ त्वामग्नेजलदानाहुर्विद्युतश्चमनीषिणः ॥ वहंतिसर्वभूतानित्वत्तोनिष्क्रम्यहेतयः ॥ ६ ॥ त्वय्यापोनिहिताःसर्वास्त्वयिसर्वमिदंजगत् ॥ नतेऽस्त्यविदितंकिंचित्त्रिषुलोकेषुपावक ॥ ७ ॥ स्वयोनिंभजतेसर्वोविशस्त्वापोविशंकितः ॥ अहंत्वांवर्धयिष्यामिब्राह्मैर्मंत्रैःसनातनैः ॥ ८ ॥ एवंस्तुतोहव्यवाट्सभगवान्कविरुत्तमः ॥ बृहस्पतिमथोवाचप्रीतिमान्वाक्यमुत्तमम् ॥ ९ ॥ दर्शयिष्यामितेशक्रंसत्यमेतद्ब्रवीमिते ॥ ॥ शल्यउवाच ॥ प्रविश्यापस्ततोवह्निःससमुद्राःसपल्वलाः ॥ आससादसरस्तच्चगूढोयत्रशतक्रतुः ॥ १० ॥ अथतत्रापिपद्मानिविचिन्वन्भरतर्षभ ॥ अपश्यत्सतुदेवेंद्रंबिसमध्यगतंतदा ॥ ११ ॥ आगत्यचततस्तूर्णंतमाचष्टबृहस्पतेः ॥ अणुमात्रेणवपुषापद्मतंत्वाश्रितंप्रभुम् ॥ १२ ॥ गत्वादेवर्षिगंधर्वैःसहितोथबृहस्पतिः ॥ पुराणैःकर्मभिर्दैवंतुष्टावबलसूदनम् ॥ १३ ॥ महासुरोहतःशक्रनमुचिर्दारुणस्त्वया ॥ शंबरश्चबलश्चैवतथाभौमोरविक्रमौ ॥ १४ ॥ शतक्रतोविवर्धस्वसर्वान्शत्रून्निषूदय ॥ उत्तिष्ठशक्रसंपश्यदेवर्षीश्चसमागतान् ॥ १५ ॥ महेंद्रदानवान्हत्वालोकान्त्रातास्त्वयाविभो ॥ अपांफेनंसमासाद्यविष्णुतेजोतिबृंहितम् ॥ त्वयाहतोहतःपूर्वंदेवराजजगत्पते ॥ १६ ॥ त्वंसर्वभूतेषुशरण्यईड्यस्त्वयासंविद्यतेनेहभूतम् ॥ त्वयाधार्यंतेसर्वभूतानिशक्रत्वंदेवानांमहिमानंचकर्थ ॥ १७ ॥ पाहिसर्वाश्चलोकांश्चमहेंद्रबलमाप्नुहि ॥ एवंसंस्तूयमानश्चसोऽवर्धतशनैःशनैः ॥ १८ ॥ स्वंचैववपुरास्थायबभूवसबलान्वितः ॥ अब्रवीच्चगुरुंदेवोबृहस्पतिमवस्थितम् ॥ १९ ॥ किंकार्यमवशिष्टंवोहतस्त्वाष्ट्रोमहासुरः ॥ यच्चश्वसुमहाकायोयोवैलोकाननाशयत् ॥ २० ॥ ॥ बृहस्पतिरुवाच ॥ ॥ मानुषानहुषोराजादेवर्षिगणतेजसा ॥ देवराज्यमनुप्राप्तःसर्वान्नोबाधतेभृशम् ॥ २१ ॥ ॥ इंद्रउवाच ॥ ॥ कथंचनहुषोराज्यंदेवानांप्रापदुर्लभम् ॥ तपसाकेनवायुक्तःकिंवीर्योवाबृहस्पते ॥ ॥ २२ ॥ बृहस्पतिरुवाच ॥ ॥ देवाभीताःशक्रमकामयंतत्वत्रात्यक्तंमहर्दैद्रंपदंतत् ॥ तदादेवाःपितरोथर्षयश्चगंधर्वमुख्याश्चसमेत्यसर्वे ॥ २३ ॥

॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ नहुषस्यांतरेण अंतरंभेदः बुद्धिभेदार्थमित्यर्थः ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ॥ इतिउद्योगप० नैलकंठीये भारतभा० षोडशोऽध्यायः ॥ १६ ॥ १ ॥

गत्वाऽब्रुवन्नहुषंतत्रशक्रत्वंनोराजाभवभुवनस्यगोप्ता ॥ तानब्रवीन्नहुषोनास्मिशक्तआप्यायध्वंतपसातेजसामाम् ॥ २४ ॥ एवमुक्तैर्वर्धितश्चापिदेवैराजाऽभवन्नहुषोघोरवीर्यः ॥ त्रैलोक्येचप्राप्यराज्यंमहर्षीन्कृत्वावाहान्यातिलोकान्दुरात्मा ॥ २५ ॥ तेजोहरंदृष्टिविषंसुघोरंमात्वंपश्येर्नहुषंवैकदाचित् ॥ देवाश्चसर्वेनहुषंभृशार्तानपश्यंतेगूढरूपाश्चरंतः ॥ २६ ॥ ॥ शल्यउवाच ॥ ॥ एवंवदत्यंगिरसांवरिष्ठेबृहस्पतौलोकपालःकुबेरः ॥ वैवस्वतश्चैवयमःपुराणोदेवश्चसोमोवरुणश्चाजगाम ॥ २७ ॥ तेवैसमागम्यमहेंद्रमूचुर्दिष्ट्यात्वाष्ट्रोनिहतश्चैववृत्रः ॥ दिष्ट्याचत्वांकुशलिनमक्षतंचपश्यामोवैनिहतारिंचशक्र ॥ २८ ॥ सतान्यथावच्चहिलोकपालान्समेत्यवैप्रीतमनामहेंद्रः ॥ उवाचचैनान्प्रतिभाष्यशक्रःसंचोदयिष्यन्नहुषस्यांतरेण ॥ २९ ॥ राजादेवानांनहुषोघोररूपस्तत्रसाह्यंदीयतांमेभवद्भिः ॥ तेचाब्रुवन्नहुषोघोररूपोदृष्टीविषस्तस्यविभीमईश ॥ ३० ॥ त्वंचेद्राजानंनहुषंपराजयेस्ततोवयंभागमर्हामशक्र ॥ इंद्रोब्रवीद्भवतुभवानपांपतिर्यमःकुबेरश्चमयाभिषेकम् ॥ ३१ ॥ संप्राप्नुवंत्वद्यसहैवदैवतैरिपुंजयामतंनहुषंघोरदृष्टिम् ॥ ततःशक्रंज्वलनोप्याहभागंप्रयच्छमह्यंतवसाह्यंकरिष्ये ॥ तमाहशक्रोभविताऽग्नेतवापिचेंद्राग्न्योर्वैभागएकोमहाक्रतौ ॥ ३२ ॥ ॥ शल्यउवाच ॥ ॥ एवंसंचिंत्यभगवान्महेंद्रःपाकशासनः ॥ कुबेरंसर्वयक्षाणांधनानांचप्रभुंतथा ॥ ३३ ॥ वैवस्वतंपितॄणांचवरुणंचाप्यपांतथा ॥ आधिपत्यंददौशक्रःसंचिंत्यवरदस्तथा ॥ ३४ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिसेनोद्योगपर्वणिइंद्रवरुणादिसंवादेषोडशोऽध्यायः ॥ १६ ॥ ॥ ७ ॥ ॥ शल्यउवाच ॥ ॥ अथसंचिंतयानस्यदेवराजस्यधीमतः ॥ नहुषस्यवधोपायंलोकपालैःसदैवतैः ॥ १ ॥ तपस्वीतत्रभगवानगस्त्यःप्रत्यदृश्यत ॥ सोब्रवीदर्च्यदेवेंद्रंदिष्ट्यावैवर्धतेभवान् ॥ २ ॥ विश्वरूपविनाशेनवृत्रासुरवधेनच ॥ दिष्ट्याद्यनहुषोभ्रष्टोदेवराज्यात्पुरंदर ॥ ३ ॥ दिष्ट्याहतारिंपश्यामिभवंतंबलसूदन ॥ ॥ इंद्रउवाच ॥ ॥ स्वागतंतेमहर्षेस्तुप्रीतोहंदर्शनात्तव ॥ पाद्यमाचमनीयंचगामर्घ्यंचप्रतीच्छमे ॥ ४ ॥ ॥ शल्यउवाच ॥ ॥ पूजितंचोपविष्टंतमासनेमुनिसत्तमम् ॥ पर्यपृच्छतदेवेशःप्रहृष्टोब्राह्मणर्षभम् ॥ ५ ॥ एतदिच्छामिभगवन्कथ्यमानंद्विजोत्तम ॥ परिभ्रष्टःकथंस्वर्गान्नहुषःपापनिश्चयः ॥ ६ ॥ ॥ अगस्त्यउवाच ॥ ॥ शृणुशक्रप्रियंवाक्यंयथाराजादुरात्मवान् ॥ स्वर्गाद्भ्रष्टोदुराचारोनहुषोबलदर्पितः ॥ ७ ॥ श्रमार्ताश्चवहंतस्तंनहुषंपापकारिणम् ॥ देवर्षयोमहाभागास्तथाब्रह्मर्षयोऽमलाः ॥ ८ ॥ अर्च्यअभ्यर्च्य ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

गवांप्रोक्षणेप्रोक्षणोपाकरणमारणादिसंस्कारेयेमंत्राःदेवांश्चयाभिर्यजतेददातिचगावःसोमस्यप्रथमस्यभक्षइत्यादयः याभिःपशुभूताभिर्गोभिः भक्षइतिभक्षणांतयागउच्यते ॥ ९ ॥ नहुषस्तु ब्राह्मणाश्चै

पप्रच्छुर्नहुषंदेवसंशयंजयतांवर ॥ यइमेब्रह्मणाप्रोक्तामंत्रावैप्रोक्षणेगवाम् ॥ ९ ॥ एतेप्रमाणंभवतउताहोनेतिवासव ॥ नहुषोनेतितानाहतमसामूढचेतनः ॥ १० ॥ ॥ ऋषयऊचुः ॥ ॥ अधर्मेसंप्रवृत्तस्त्वंधर्मंनप्रतिपद्यसे ॥ प्रमाणमेतदस्माकंपूर्वंप्रोक्तंमहर्षिभिः ॥ ११ ॥ ॥ अगस्त्यउवाच ॥ ॥ ततोविवदमानःसमुनिभिःसहवासव ॥ अथमामस्पृशन्मूर्ध्निपादेनाधर्मपीडितः ॥ १२ ॥ ॥ तेनाभूद्धततेजाश्चनिःश्रीकश्चमहीपतिः ॥ ततस्तंतमसाविग्नमवोचंभृशपीडितं ॥ १३ ॥ यस्मात्पूर्वैःकृतंराजन्ब्रह्मर्षिभिरनुष्ठितम् ॥ अदृष्टंदूषयसिमेयच्चमूर्ध्न्यस्पृशःपदा ॥ १४ ॥ यच्चापित्वमृषीन्मूढब्रह्मकल्पान्दुरासदान् ॥ १५ ॥ वाहान्कृत्वावाहयसितेनस्वर्गाद्धतप्रभः ॥ ध्वंसपापपरिभ्रष्टःक्षीणपुण्योमहीतले ॥ १६ ॥ दशवर्षसहस्राणिसर्परूपधरोमहान् ॥ विचरिष्यसिपूर्णेषुपुनःस्वर्गमवाप्स्यसि ॥ १७ ॥ एवंभ्रष्टोदुरात्मासदेवराज्यादरिंदम ॥ दिष्ट्यावर्धामहेशक्रहतोब्राह्मणकंटकः ॥ १८ ॥ त्रिविष्टपंप्रपद्यस्वपाहिलोकान्शचीपते ॥ जितेंद्रियोजितामित्रःस्तूयमानोमहर्षिभिः ॥ १९ ॥ ॥ शल्यउवाच ॥ ॥ ततोदेवाभृशंतुष्टामहर्षिगणसंवृताः ॥ पितरश्चैवयक्षाश्चभुजगाराक्षसास्तथा ॥ २० ॥ गंधर्वादेवकन्याश्चसर्वेचाप्सरसांगणाः ॥ सरांसिसरितःशैलाःसागराश्चविशांपते ॥ २१ ॥ उपागम्याब्रुवन्सर्वेदिष्ट्यावर्धसिशत्रुहन् ॥ हतश्चनहुषःपापोदिष्ट्यागस्त्येनधीमता ॥ दिष्ट्यापापसमाचारःकृतःसर्पोमहीतले ॥ २२ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिसेनोद्योगपर्वणिइंद्रागस्त्यसंवादेनहुषभ्रंशेसप्तदशोऽध्यायः ॥ १७ ॥ ॥ शल्यउवाच ॥ ततःशक्रःस्तूयमानोगंधर्वाप्सरसांगणैः ॥ ऐरावतंसमारुह्यद्विपेंद्रंलक्षणैर्युतम् ॥ १ ॥ पावकःसुमहातेजामहर्षिश्चबृहस्पतिः ॥ यमश्चवरुणश्चैवकुबेरश्चधनेश्वरः ॥ २ ॥ सर्वैर्देवैःपरिवृतःशक्रोवृत्रनिषूदनः ॥ गंधर्वैरप्सरोभिश्चयातस्त्रिभुवनंप्रभुः ॥ ३ ॥ ससमेत्यमहेंद्राण्यादेवराजःशतक्रतुः ॥ मुदापरमयायुक्तःपालयामासदेवराट् ॥ ४ ॥ ततःसभगवांस्तत्रअंगिराःसमदृश्यत ॥ अथर्ववेदमंत्रैश्चदेवेंद्रंसमपूजयत् ॥ ५ ॥ ततस्तुभगवानिंद्रःसंहृष्टःसमपद्यत ॥ वरंचप्रददौतस्मैअथर्वांगिरसेतदा ॥ ६ ॥

वगावश्चकुलमेकंद्विधाकृतं एकत्रमंत्रास्तिष्ठंतिहविरेकत्रतिष्ठतीतिशास्त्रप्रामाण्याद्ब्राह्मणवद्गवांमवध्यत्वंमन्वानोवेदमप्रमाणीचकार वेदस्यब्राह्मणानांचावमानादधोगतिःप्राप्यतइत्याख्यायिकातात्पर्यं ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ इतिउद्योगप० नैलकंठीयेभारतभा० नहुषभ्रंशेसप्तदशोऽध्यायः ॥ १७ ॥ ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

अथर्वांगिरसोनामेति यतोंगिराअथर्ववेदमंत्रैरिंद्रंतुष्टावततोऽथर्वांगिरसोनामाभवत् अस्मिन्वेदेऽथर्ववेदेअथर्ववेदस्यऋषिरित्यर्थः उदाहरणंवाक्यमेतत्अथर्ववेदरूपं यस्यवाक्यंसऋषिरितिपरिभाषावच

अथर्वांगिरसोनामवेदेस्मिन्वैभविष्यति॥ उदाहरणमेतद्धियज्ञभागंचलप्स्यसे॥७॥ एवंसंपूज्यभगवानथर्वांगिरसंतदा॥ व्यसर्जयन्महाराजदेवराजःशत क्रतुः॥८॥ संपूज्यसर्वांस्त्रिदशानृषींश्चापितपोधनान्॥ इंद्रःप्रमुदितोराजन्धर्मेणापालयत्प्रजाः॥९॥ एवंदुःखमनुप्राप्तमिंद्रेणसहभार्यया॥ अज्ञातवासश्च कृतःशत्रूणांवधकांक्षया॥ १०॥ नात्रमन्युस्त्वयाकार्योयत्क्लिष्टोसिमहावने॥ द्रौपद्यासहराजेंद्रभ्रातृभिश्चमहात्मभिः॥ ११॥ एवंत्वमपिराजेंद्रराज्यंप्रा प्स्यसिभारत॥ वृत्रंहत्वायथाप्राप्तःशक्रःकौरवनंदन॥ १२॥ दुराचारश्चनहुषोब्रह्मद्विट्पापचेतनः॥ अगस्त्यशापाभिहतोविनष्टःशाश्वतीःसमाः॥ १३॥ ए वंतवदुरात्मानःशत्रवःशत्रुसूदन॥क्षिप्रंनाशंगमिष्यंतिकर्णदुर्योधनादयः॥ १४॥ ततःसागरपर्यंतांभोक्ष्यसेमेदिनीमिमाम्॥भ्रातृभिःसहितोवीरद्रौपद्याचस हानया॥ १५॥ उपाख्यानमिदंशक्रविजयंवेदसंमितम्॥ राज्ञाव्यूढेष्वनीकेषुश्रोतव्यंजयमिच्छता॥१६॥तस्मात्संश्रावयामित्वांविजयंजयतांवर॥ संस्तूय मानावर्धंतेमहात्मानोयुधिष्ठिर॥ १७॥ क्षत्रियाणामभावोयंयुधिष्ठिरमहात्मनाम्॥ दुर्योधनापराधेनभीमार्जुनबलेनच॥१८॥ आख्यानमिंद्रविजयंयइदं नियतःपठेत्॥ धूतपाप्माजितस्वर्गःपरत्रेहचमोदते॥ १९॥ नचारिजंभयंतस्यनापुत्रोवाभवेन्नरः॥ नापदंप्राप्नुयात्कांचिद्दीर्घमायुश्चविंदति॥ सर्वत्रजयमा प्नोतिनकदाचित्पराजयम्॥२०॥ ॥वैशंपायनउवाच॥ ॥एवमाश्वासितोराजाशल्येनभरतर्षभ॥पूजयामासविधिवच्छल्यंधर्मभृतांवरः॥२१॥श्रुत्वातुशल्य वचनंकुतीपुत्रोयुधिष्ठिरः॥ प्रत्युवाचमहाबाहुर्मद्रराजमिदंवचः॥ २२॥ भवान्कर्णस्यसारथ्यंकरिष्यतिनसंशयः॥ तत्रतेजोवधःकार्यःकर्णस्यार्जुनसंस्तवः ॥ २३॥ ॥शल्यउवाच॥ ॥एवमेतत्करिष्यामियथामांसंप्रभाषसे॥ यच्चान्यदपिशक्ष्यामितत्करिष्याम्यहंतव॥ २४॥ ॥वैशंपायनउवाच॥ ॥ततस्त्वामं त्र्यकौंतेयाञ्छल्योमद्राधिपस्तदा॥ जगामसबलःश्रीमान्दुर्योधनमरिंदम॥ २५॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिसेनोद्योगप०शल्यगमनेऽष्टादशोऽ ध्यायः॥ १८॥ ॥५॥ ॥वैशंपायनउवाच॥ ॥युयुधानस्ततोवीरःसात्वतानांमहारथः॥ महताचतुरंगेणबलेनागाद्युधिष्ठिरम्॥ १॥

नात्॥ ७॥ ८॥ ९॥ १०॥ ११॥ १२॥ १३॥ १४॥ १५॥ १६॥ १७॥ १८॥ १९॥ २०॥ २१॥ २२॥ शत्रुतेजसोवधोयेनतादृशोऽर्जुनसंस्तवः॥ २३॥ २४॥ २५॥ इतिनै०भार तभा०अष्टादशोऽध्यायः॥ १८॥ ॥५॥ ॥युयुधानःसात्यकिः॥ १॥

॥२॥ ३॥ ४॥ ५॥ ६॥ ७॥ ८॥ ९॥ १०॥ ११॥ १२॥ १३॥ १४॥ १५॥ १६॥ १७॥ वनमालाआपादलंबिनीमाला॥ १८॥ १९॥ २०॥ २१॥ समावायःसमूहः॥ २२॥

तस्ययोधामहावीर्यानानादेशसमागताः॥ नानाप्रहरणावीराःशोभयांचक्रिरेबलम्॥२॥ परश्वधैर्भिंदिपालैःशूलतोमरमुद्गरैः॥ परिघैर्यष्टिभिःपाशैःकरवालै श्चनिर्मलैः॥३॥ खड्गकार्मुकनिर्व्यूहैःशरैश्चविविधैरपि॥ तैलधौतैःप्रकाशद्भिःसदाशोभतवैबलम्॥ ४॥ तस्यमेघप्रकाशस्यसौवर्णैःशोभितस्यच॥ बभूवरूपं सैन्यस्यमेघस्येवसविद्युतः॥५॥ अक्षौहिणीतुसासेनातदायौधिष्ठिरंबलम्॥ प्रविश्यांतर्दधेराजन्सागरंकुनदीयथा॥६॥ तथैवाक्षौहिणींगृह्यचेदीनामृषभो बली॥ धृष्टकेतुरुपागच्छत्पांडवानमितौजसः॥ ७॥ मागधश्चजयत्सेनोजारासंधिर्महाबलः॥ अक्षौहिण्यैवसैन्यस्यधर्मराजमुपागमत्॥ ८॥ तथैवपां ड्योराजेंद्रसागरानूपवासिभिः॥ वृतोबहुविधैर्योधैर्युधिष्ठिरमुपागमत्॥ ९॥ तस्यसैन्यमतीवासीत्तस्मिन्बलसमागमे॥ प्रेक्षणीयतरंराजन्सुवेषंबलवत्तदा ॥ १०॥ द्रुपदस्याप्यभूत्सेनानानादेशसमागतैः॥ शोभितापुरुषैःशूरैःपुत्रैश्चास्यमहारथैः॥ ११॥ तथैवराजामत्स्यानांविराटोवाहिनीपतिः॥ पार्वतीयैर्महीपा लैःसहितःपांडवानियात्॥१२॥ इतश्चेतश्चपांडूनांसमाजग्मुर्महात्मनाम्॥ अक्षौहिण्यस्तुसप्तैताविविधध्वजसंकुलाः॥ १३॥ युयुत्समानाःकुरुभिःपांडवान्स महर्षयन्॥ तथैवधार्तराष्ट्रस्यहर्षंसमभिवर्धयन्॥१४॥ भगदत्तोमहीपालःसेनामक्षौहिणींददौ॥ तस्यचीनैःकिरातैश्चकांचनैरिवसंवृतम्॥ १५॥ बभौबलम नाधृष्यंकर्णिकारवनंयथा॥ तथाभूरिश्रवाःशूरःशल्यश्चकुरुनंदन॥ १६॥ दुर्योधनमुपायातावक्षौहिण्यापृथक्पृथक्॥ कृतवर्माचहार्दिक्योभोजांधकुकुरैः सह॥ १७॥ अक्षौहिण्यैवसेनायादुर्योधनमुपागमत्॥ तस्यतैःपुरुषव्याघ्रैर्वनमालाधरैर्बलम्॥ १८॥ अशोभतयथामत्तैर्वनंप्रक्रीडितैर्गजैः॥ जयद्रथमुखा श्चान्येसिंधुसौवीरवासिनः॥१९॥ आजग्मुःपृथिवीपालाःकंपयंतइवाचलान्॥ तेषामक्षौहिणीसेनाबहुलाविबभौतदा॥ २०॥ विधूयमानोवातेनबहुरूपइ वांबुदः॥ सुदक्षिणश्चकांबोजोयवनैश्चशकैस्तथा॥ २१॥ उपाजगामकौरव्यमक्षौहिण्याविशांपते॥ तस्यसेनासमावायःशलभानामिवाबभौ॥२२॥ सच संप्राप्यकौरव्यंतत्रैवांतर्दधेतदा॥ तथामाहिष्मतीवासीनीलोनीलायुधैःसह॥ २३॥ महीपालोमहावीर्यैर्दक्षिणापथवासिभिः॥ आवंत्यौचमहीपालौमहाब लसुसंवृतौ॥२४॥ पृथगक्षौहिणीभ्यांतावभियातौसुयोधनम्॥ केकयाश्चनरव्याघ्राःसोदर्याःपंचपार्थिवाः॥२५॥ संहर्षयंतःकौरव्यमक्षौहिण्यासमाद्रवन्॥ ततस्ततस्तुसर्वेषांभूमिपानांमहात्मनाम्॥ २६॥ ॥ ॥ २३॥ आवंत्यौविंदानुविंदौ॥ २४॥ २५॥ २६॥

॥२७॥२८॥२९॥अहिच्छत्रादयःप्रदेशविशेषाः॥३०॥३१॥३२॥३३॥ इ०नै०भा०एकोनविंशोऽध्यायः॥१९॥ ॥७॥ ॥१॥२॥वाक्येति भवद्भिःकिंचिद्वक्तव्यमतोहेतोरित्यर्थः॥३॥४॥५॥६॥शेषवंतः

तिस्रोन्याःसमवर्तंतवाहिन्योभरतर्षभ॥एवमेकादशावृत्ताःसेनादुर्योधनस्यताः॥२७॥युयुत्समानाःकौंतेयान्नानाध्वजसमाकुलाः॥नहास्तिनपुरेराजन्नवकाशोभवत्तदा॥२८॥राज्ञांस्वबलमुख्यानांप्राधान्येनापिभारत॥ततःपंचनदंचैवकृत्स्नंचकुरुजांगलम्॥२९॥तथारोहितकारण्यंमरुभूमिश्चकेवला॥अहिच्छत्रंकालकूटंगंगाकूलंचभारत॥ ३०॥वारणंवाटधानंचयामुनश्चैवपर्वतः॥एषदेशःसुविस्तीर्णःप्रभूतधनधान्यवान्॥ ३१॥ बभूवकौरवेयाणांबलेनातीवसंवृतः॥तत्रसैन्यंतथायुक्तंददर्शसपुरोहितः॥३२॥यःसपांचालराजेनप्रेषितःकौरवान्प्रति॥३३॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिसेनोद्योगपर्वणिपुरोहितसैन्यदर्शनेएकोनविंशोऽध्यायः॥१९॥ ॥समाप्तमिदंसेनोद्योगपर्व॥ ॥७॥ ॥अथसंजययानपर्व॥ ॥वैशंपायनउवाच॥सचकौरव्यमासाद्यद्रुपदस्यपुरोहितः॥सत्कृतोधृतराष्ट्रेणभीष्मेणविदुरेणच॥१॥सर्वकौशल्यमुक्त्वादौपृष्ट्वाचैवमनामयम्॥सर्वसेनाप्रणेतॄणांमध्येवाक्यमुवाचह॥२॥सर्वैर्भवद्भिर्विदितोराजधर्मःसनातनः॥वाक्योपादानहेतोस्तुवक्ष्यामिविदितेसति॥३॥धृतराष्ट्रश्चपांडुश्चसुतावेकस्यविश्रुतौ॥तयोःसमानंद्रविणंपैतृकंनात्रसंशयः॥४॥धृतराष्ट्रस्ययेपुत्राःप्राप्तंतैःपैतृकंवसु॥पांडुपुत्राःकथंनामनप्राप्ताःपैतृकंवसु॥५॥एवंगतेपांडवेयैर्विदितंवःपुरायथा॥नप्राप्तंपैतृकंद्रव्यंधृतराष्ट्रेणसंवृतम्॥६॥प्राणांतिकैरप्युपायैःप्रयतद्भिरनेकशः॥शेषवंतोनशकितानेतुंवैयमसादनम्॥७॥पुनश्चवर्द्धितंराज्यंस्वबलेनमहात्मभिः॥ छद्मनापहृतंक्षुद्रैर्धार्तराष्ट्रैःससौबलैः॥८॥तदप्यनुमतंकर्मयथायुक्तमनेनवै॥वासिताश्चमहारण्येवर्षाणीहत्रयोदश॥९॥सभायांक्लेशितैर्वीरैःसहभार्यैस्तथाभृशम्॥अरण्येविविधाःक्लेशाःसंप्राप्तास्तैःसुदारुणाः॥१०॥तथाविराटनगरेयोन्यंतरगतैरिव॥प्राप्तःपरमसंक्लेशोयथापापैर्महात्मभिः॥११॥तेसर्वंपृष्ठतःकृत्वातत्सर्वंपूर्वकिल्बिषम्॥सामैवकुरुभिःसार्धमिच्छंतिकुरुपुंगवाः॥१२॥तेषांचवृत्तमाज्ञायवृत्तंदुर्योधनस्यच॥अनुनेतुमिहार्हंतिधार्तराष्ट्रंसुहृज्जनाः॥१३॥नहितेविग्रहंवीराःकुर्वंतिकुरुभिःसह॥अविनाशेनलोकस्यकांक्षंतेपांडवाःस्वकम्॥१४॥यश्चापिधार्तराष्ट्रस्यहेतुःस्याद्विग्रहंप्रति॥सचहेतुर्नमंतव्योबलीयांसस्तथाहिते॥१५॥अक्षौहिण्यश्चसप्तैवधर्मपुत्रस्यसंगताः॥ युयुत्समानाःकुरुभिःप्रतीक्षंतेऽस्यशासनम्॥१६॥अपरेपुरुषव्याघ्राःसहस्राक्षौहिणीसमाः॥सात्यकिर्भीमसेनश्चयमौचसुमहाबलौ॥१७॥ आयुःशेषयुक्ताः॥ ७॥ ८॥ ९॥१०॥ योन्यंतरगतैरिवेति तैर्दत्तान्क्लेशान्जन्मांतरव्यवहितानिवनस्मरंतीत्यर्थः॥११॥१२॥१३॥१४॥१५॥१६॥१७॥

॥१८॥१९॥२०॥२१॥ ॥इतिउद्योगप०नैलकंठीयेभारतभा०विंशोऽध्यायः॥२०॥ ॥७॥ ॥१॥२॥३॥४॥५॥६॥७॥ धृष्टंधर्षणायुक्तंयथास्यात्तथाआक्षिप्यतिरस्कृत्य॥८॥ तत्रपांडवपक्षे॥९॥१०॥ तंसमयंकालं तच्चसंकेतवाक्यंत्रयोदशवर्षेज्ञातैःपुनर्वनेवस्तव्यमित्येवंरूपंवा समयइत्युपक्रम्यसंकेतेकालभाषयोरितिमेदिनी आश्रित्यनिर्वाह्यपैतृकंराज्यांशंनेच्छति किं

एकादशैताःपृतनाएकतश्चसमागताः॥एकतश्चमहाबाहुर्बहुरूपीधनंजयः॥१८॥यथाकिरीटीसर्वाभ्यःसेनाभ्योव्यतिरिच्यते॥एवमेवमहाबाहुर्वासुदेवोमहाद्युतिः॥१९॥बहुलत्वंचसेनानांविक्रमंचकिरीटिनः॥बुद्धिमत्त्वंचकृष्णस्यबुद्ध्यायुध्येतकोनरः॥२०॥तेभवंतोयथाधर्मंयथासमयमेवच॥प्रयच्छंतुप्रदातव्यंमावःकालोत्यगादयम्॥२१॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिसंजययानपर्वणिपुरोहितयानेविंशोऽध्यायः॥२०॥ ॥७॥ ॥वैशंपायनउवाच॥तस्यतद्वचनंश्रुत्वाप्रज्ञावृद्धोमहाद्युतिः॥संपूज्यैनंयथाकालंभीष्मोवचनमब्रवीत्॥१॥दिष्ट्याकुशलिनःसर्वेसहदामोदरेणते॥दिष्ट्यासहायवंतश्चदिष्ट्याधर्मेचतेरताः॥२॥दिष्ट्याचसंधिकामास्तेभ्रातरःकुरुनंदनाः॥दिष्ट्यानयुद्धमनसःपांडवाःसहबांधवैः॥३॥भवतासत्यमुक्तंतुसर्वमेतन्नसंशयः॥अतितीक्ष्णंतुतेवाक्यंब्राह्मण्यादितिमेमतिः॥४॥असंशयंक्लेशितास्तेवनेचेहचपांडवाः॥प्राप्ताश्चधर्मतःसर्वंपितुर्धनमसंशयम्॥५॥किरिटीबलवान्पार्थःकृतास्त्रश्चमहारथः॥कोहिपांडुसुतंयुद्धेविषहेतधनंजयम्॥६॥अपिवज्रधरःसाक्षात्किमुतान्येधनुर्भृतः॥त्रयाणामपिलोकानांसमर्थइतिमेमतिः॥७॥भीष्मेब्रुवतितद्वाक्यंधृष्टमाक्षिप्यमन्युना॥दुर्योधनंसमालोक्यकर्णोवचनमब्रवीत्॥८॥नतत्राविदितंब्रह्मन्लोकेभूतेनकेनचित्॥पुनरुक्तेनकिंतेनभाषितेनपुनःपुनः॥९॥दुर्योधनार्थेशकुनिर्द्यूतेनिर्जितवान्पुरा॥समयेनगतोरण्यंपांडुपुत्रोयुधिष्ठिरः॥१०॥सतंसमयमाश्रित्यराज्यंनेच्छतिपैतृकम्॥बलमाश्रित्यमत्स्यानांपांचालानांचमूर्खवत्॥११॥दुर्योधनोभयाद्विद्वन्नदद्यात्पादमंततः॥धर्मतस्तुमहींकृत्स्नांप्रदद्याच्छत्रवेपिच॥१२॥यदिकांक्षंतितेराज्यंपितृपैतामहंपुनः॥यथाप्रतिज्ञंकालंतंचरंतुवनमाश्रिताः॥१३॥ततोदुर्योधनस्यांकिवर्तंतामकुतोभयाः॥अधार्मिकींतुमाबुद्धिंमौर्ख्यात्कुर्वंतुकेवलात्॥१४॥अथतेधर्ममुत्सृज्ययुद्धमिच्छंतिपांडवाः॥आसाद्येमान्कुरुश्रेष्ठान्स्मरिष्यंतिवचोमम॥१५॥ ॥भीष्मउवाच॥ ॥किंनुराधेयवाचातेकर्मतत्स्मर्तुमर्हसि॥एकंएवयदापार्थःषड्रथाज्जितवान्युधि॥१६॥बहुशोजीयमानस्यकर्मदृष्टंतदैवते॥नचेदेवंकरिष्यामोयदयंब्राह्मणोब्रवीत्॥ध्रुवंयुधिहतास्तेनभक्षयिष्यामपांसुकान्॥१७॥

तुतदतिक्रमेणैवपैतृकमिच्छतीत्यर्थः॥११॥पादंचतुर्थांशमपिकिमुतार्धमित्यर्थः॥१२॥१३॥१४॥१५॥१६॥१७॥

॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ ॥ इतिउ०नैलकंठीये भारतभा०पुरोहितयानेएकविंशोऽध्यायः ॥ २१ ॥ ॥७॥ ॥ प्राप्तानिति दिष्ट्याभाग्येनआनतसंनद्धौभूत्वास्थानंस्थितिमुपास्थितःप्राप्तःइतिस भाजयेथाःपूजयेथाः ॥ १ ॥ स्वस्तिमंतोवयमितिसर्वान्वदेः कृच्छ्रंनिरुध्यापितेषांशांतिरकोधोऽस्मासुविषये मिथ्यापेतानांनिष्कपठानाम् ॥ २ ॥ मत्संपर्काकार्षुःमदर्थंपरितेआनीतवंतः ॥ ३ ॥ धर्मार्था

वैशंपायनउवाच ॥ ॥ धृतराष्ट्रस्ततोभीष्ममनुमान्यप्रसाद्यच ॥ अवभर्त्स्यचराधेयमिदंवचनमब्रवीत् ॥ १८ ॥ अस्मद्धितंवाक्यमिदंभीष्मःशांतनवोब्रवीत् ॥ पांडवानांहितंचैवसर्वस्यजगतस्तथा ॥ १९ ॥ चिंतयित्वातुपार्थेभ्यःप्रेषयिष्यामिसंजयम् ॥ सभवान्प्रतियात्वद्यपांडवानेवमाचिरम् ॥ २० ॥ सतंसत्कृत्यकौरव्यः प्रेषयामासपांडवान् ॥ सभामध्येसमाहूयसंजयंवाक्यमब्रवीत् ॥ २१ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिसंजययानपर्वणिपुरोहितयानेएकविंशोऽध्यायः ॥ ॥ २१ ॥ ॥७॥ ॥ धृतराष्ट्रउवाच ॥ ॥ प्राप्तानाहुःसंजयपांडुपुत्रानुपप्लव्येतान्विजानीहिगत्वा ॥ अजातशत्रुंचसभाजयेथादिष्ट्यानत्यस्थानमुपस्थितस्त्वं ॥ १ ॥ सर्वान्वदेःसंजयस्वस्तिमंतःकृच्छ्रंवासमतदहान्निरुध्य ॥ तपांशांतिर्विद्यतेस्मासुशीघ्रंमिथ्यापेतानामुपकारिणांसताम् ॥ २ ॥ नाहंकृच्छ्रंसंजयपांडवानां मिथ्यावृत्तिंकांचनजात्वपश्यं ॥ सर्वांश्रियंत्र्यात्मवीर्येणलब्धांपर्याकार्षुःपांडवामत्यमेव ॥ ३ ॥ दोषंत्वेषांनाध्यगच्छंपरीच्छन्नित्यंकंचिद्येनगर्हेयमार्यान् ॥ ध मार्थाभ्यांकर्मकुर्वंतिनित्यंसुखप्रियेनानुरुध्यंतिकामात् ॥ ४ ॥ धर्मंशीलंक्षुत्पिपासेतथैवनिद्रांतंद्रींक्रोधहर्षौप्रमादम् ॥ धृत्याचैवप्रज्ञयाचाभिभूयधर्मार्थयोगा न्व्यतंतिपार्थाः ॥ ५ ॥ त्यजंतिमित्रेषुधनानिकालेनसंवासाज्जीर्यंतितेषुमैत्री ॥ यथार्हमानार्थकराहिपार्थास्तेषांद्वेष्टानास्त्याजमीढस्यपक्षे ॥ ६ ॥ अन्यत्रपापा द्विषमान्मंदबुद्धेर्दुर्योधनात्क्षुद्रतराच्चकर्णात् ॥ तेषांह्रीमौहीनसुखप्रियाणांमहात्मनांसंजनयतोहितेजः ॥ ७ ॥ उत्थानवीर्यःसुखमेधमानोदुर्योधनःसुकृतमन्य तेतत् ॥ तेषांभागंयच्चमन्येतबालःशक्यंहर्तुंजीवतांपांडवानां ॥ ८ ॥ यस्यार्जुनःपदवींकेशवश्चदकोदरःसात्यकोऽजातशत्रोः ॥ माद्रीपुत्रौसंजयाश्चापियांतिपु रायुद्धात्साधुतस्यप्रदानम् ॥ ९ ॥ सत्यंवैकःपृथिवींसव्यसाचीगांडीवधन्वाप्रणुदेद्रथस्थः ॥ तथाजिष्णुःकेशवोप्यप्रधृष्योलोकत्रयस्याधिपतिर्महात्मा ॥ १० ॥ तिष्ठेतकस्तस्यमर्त्यःपुरस्ताद्यःसर्वलोकेषुवरेण्यएकः ॥ पर्जन्यघोषान्प्रवपन्शरौघान्पतंगसंघानिवशीघ्रवेगान् ॥ ११ ॥

र्थाधर्मार्थंअर्थार्थंच सुखंप्रीतिःप्रियंपुत्रादितदनुरोधेन कामात्धर्मंनत्यजंतीत्यर्थः ॥ ४ ॥ तंद्रीजायतएवमौढ्यम् ॥ ५ ॥ यथार्हमानंअर्थंचकुर्वंतितेनतथा ॥ ६ ॥ तेजःक्रोधम् ॥ ७ ॥ उत्थानेआरंभका लेएववीर्येणप्रसंगेयस्यसउत्थानवीर्यः यत्तेषांभागंहर्तुंशक्यंमन्यतेतत्सुकृतंयुक्तमितिमन्यतेमौढ्यादितिभावः ॥ ८ ॥ यस्यपदवींयांतियस्यानुगाइत्यर्थः तस्यतस्मै प्रदानंभागप्रदानम् ॥ ९ ॥ जिष्णुर्ज यशीलः ॥ १० ॥ वरेण्यःभोगमोक्षकामैर्वरणीयः ॥ ११ ॥

॥ १५ ॥

नकेवलंमध्यदेशापेक्षयाउदीचींकिंनुउत्तरान्कुरून्हिमाचलादप्युदक्कूदेशान्स्वर्गंभूमिरूपान् ॥ १२ ॥ जातवेदसेउपाहरत्खांडवमितिविपरिणामेनानुषंगः ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ एतत्परिदृश्यमा नंबलंभीष्मद्रोणादीनांसामर्थ्यंतदपिसत्यंतथापितान्पांडवान्प्राप्यनास्तीतिमन्ये तुच्छमित्यर्थः ॥ १७ ॥ प्रवर्हःश्रेष्ठः संत्यक्तात्मात्यक्तदेहः ॥ १८ ॥ सहोषितोवर्षमाचम् चरितार्थःगोपहेरक्षितः मास्थेयानां

दिशंत्युदीचीमपिचोत्तरान्कुरून्गांडीवधन्वैकरथोजिगाय ॥ धनंचैषामाहरत्सव्यसाचीसेनानुगान्द्रविडांश्चैवचक्रे ॥ १२ ॥ यश्चैवदेवान्खांडवेसव्यसाचीगां डीवधन्वाप्रजिगायसेंद्रान् ॥ उपाहरत्पांडवोजातवेदसेयशोमानंवर्धयन्पांडवानाम् ॥ १३ ॥ गदाभृतांनास्तिसमोत्रभीमाद्वस्त्यारोहोनास्तिसमश्चतस्य ॥ रथे र्जुनादाद्रुहीनमेनंबाह्वोर्बलेनायुतनागवीर्यम् ॥ १४ ॥ सुशिक्षितःकृतवैरस्तरस्वीदहेत्क्षुद्रांस्तरसाधार्तराष्ट्रान् ॥ सदात्यमर्षीनबलात्सशक्योयुद्धेजेतुंवासवेना पिसाक्षात् ॥ १५ ॥ सुचेतसौबलिनौशीघ्रहस्तौसुशिक्षितौभ्रातरौफाल्गुनेन ॥ श्येनौयथापक्षिपूगान्रुजंतौमाद्रीपुत्रौशेषयेतांनशत्रून् ॥ १६ ॥ एतद्बलंपूर्णम स्माकमेवंयत्सत्यंतान्प्राप्यनास्तीतिमन्ये ॥ तेषांमध्येवर्तमानस्तरस्वीधृष्टद्युम्नःपांडवानामिहैकः ॥ १७ ॥ सहामात्यःसोमकानांप्रवर्हःसंत्यक्तात्मापांडवार्थेश्रुतो मे ॥ अजातशत्रुंप्रसहेतकोन्वेषांसस्यादग्रणीर्वृष्णिसिंहः ॥ १८ ॥ सहोषितश्चरितार्थोवयस्योमात्स्ययानामधिपोवैविराटः ॥ सवैसपुत्रःपांडवार्थेचशश्व द्युधिष्ठिरेभक्तइतिश्रुतंमे ॥ १९ ॥ अवरुद्धारथिनःकेकयेभ्योमहेष्वासाभ्रातरःपंचसंति ॥ केकयेभ्योराज्यमाकांक्षमाणायुद्धार्थिनश्चानुवसंतिपार्थान् ॥ २० ॥ सर्वाश्चवीरान्पृथिवीपतीनांसमागतान्पांडवार्थेनिविष्टान् ॥ शूरानहंभक्तिमतःशृणोमिप्रीत्यायुक्तान्संश्रितान्धर्मराजम् ॥ २१ ॥ गिर्याश्रयादुर्गनिवासिनश्च योधाःपृथिव्यांकुलजातिशुद्धाः ॥ म्लेच्छाश्चनानायुधवीर्यवंतःसमागताःपांडवार्थेनिविष्टाः ॥ २२ ॥ पांड्यश्चराजासमितींद्रकल्पोयोधप्रवीरैर्बहुभिःसमेतः ॥ समागतःपांडवार्थेमहात्मालोकप्रवीरोऽप्रतिवीर्यतेजाः ॥ २३ ॥ अस्त्रंद्रोणादर्जुनाद्वासुदेवात्कृपाद्भीष्माद्येनहतंशृणोमि ॥ यंतंकार्ष्णिप्रतिमंमाहुरेकंससात्य किःपांडवार्थेनिविष्टः ॥ २४ ॥ उपाश्रिताश्चेदिकरूषकाश्चसर्वायोगैर्भूमिपालाःसमेताः ॥ तेषांमध्येसूर्यमिवातपंतंश्रियावृतंचेदिपतिंज्वलंतम् ॥ २५ ॥

मत्स्यदेशजानाम् ॥ १९ ॥ केकयेभ्योदेशेभ्यःअवरुद्धाःबहिर्निःसारिताःपंचभ्रातरःकेकयानाम् यतःकेकयेभ्यःराज्यंयामुमिच्छंतःपूर्वअस्मदीयाअपिसंप्रतिपांडवान्अनुवसंतिअनुसरंति तेनत्वपक्षहानिः परपक्षपुष्टिश्चदर्शिता ॥ २० ॥ २१ ॥ २२ ॥ समितिसंग्राम समित्याजिसमियुधइतिकोशः अप्रतिवीर्यतेजाः अतुल्यतेजाः ॥ २३ ॥ कार्ष्णिःप्रद्युम्नस्तत्तुल्यम् ॥ २४ ॥ चेदिपतिंशिशुपालम् कृष्णोम यर्देत्युत्तरेणान्वयः ॥ २५ ॥

ज्यांधनुर्गुणंकर्षनांधनूंषृनाम् ॥ २६ ॥ यत्यमानंवर्धयंतंतंशिशुपालंअभिनदितिसंबंधः ॥ २७ ॥ चेदिपतिविहायअन्येतंकृष्णंकेप्राद्रवन्नकेपिकिंतुसएवतेनसहस्पर्द्धांचकारेत्यर्थः ॥ २८ ॥ आशंसमानो जयमितिशेषः अशेतशयनंकृतवान्शिशुपालः ॥ २९ ॥ यत्यतःअवेदयंतज्ञापितवंतः चाराइंतिशेषः ॥ ३० ॥ कृष्णौवासुदेवार्जुनौ ॥ ३१ ॥ संगरंचेन्नगच्छेत्तशर्मलभेत् नोचेत्अन्यथा इंद्रोविष्णु

अस्तंभनीयंयुधिमन्यमानोज्यांकर्षनांश्रेष्ठनमंपृथिव्याम् ॥ सर्वोन्साहंक्षत्रियाणांनिहत्यप्रसह्यकृष्णस्तरसासंममर्द ॥ २६ ॥ यशोमानौवर्धयन्पांडवानांपुराभि
नद्धिशुपालंसमीक्ष्य ॥ यस्यसर्वेवर्धयंतिस्मनामंकरूषराजप्रमुखानरेंद्राः ॥ २७ ॥ तमसत्यंकेशवंतत्रमत्वासुग्रीवयुक्तेनरथेनकृष्णम् ॥ केप्राद्रवंश्वेदिपतिंवि
हायसिंहंदृष्ट्वाक्षुद्रमृगाइवान्ये ॥ २८ ॥ यस्तंप्रतीपस्तरसाप्रत्युदीयादाशंसमानोद्वैरथेवासुदेवम् ॥ सोऽशेतकृष्णेनहतःपरासुर्वातेनेवोन्मथितःकर्णिकारः ॥ २९ ॥
पराक्रमंमेयदवेदयंततेषामर्थेसंजयकेशवस्य ॥ अनुस्मरंस्तस्यकर्माणिविष्णोर्गावल्गणेनाधिगच्छामिशांतिम् ॥ ३० ॥ नजातुताञ्छत्रुरन्यःसहेतयेषांसस्या
दग्रणीर्वृष्णिसिंहः ॥ प्रवेपतेमेहृदयंभयेनश्रुत्वाकृष्णावेकरथेसमेतौ ॥ ३१ ॥ नचेद्गच्छेत्संगरंमंदबुद्धिस्ताभ्यांलभेच्छमंतदासुतोमे ॥ नोचेत्कुरून्संजयनिर्दहेता
मिंद्राविष्णूदैत्यसेनांयथैव ॥ ३२ ॥ मतोहिमेशक्रसमोधनंजयःसनातनोवह्निर्वीरश्चविष्णुः ॥ धर्मारामोक्षीनिषेवस्तरस्वीकुंतीपुत्रःपांडवोऽजातशत्रुः ॥ ३३ ॥
दुर्योधनेननिकृतोमनस्वीनोचेत्कुद्धःप्रदहेद्धार्तराष्ट्रान् ॥ नाहंतथात्यर्जुनाद्वासुदेवाद्भीमाद्वाहंयमयोर्वाबिभेमि ॥ ३४ ॥ यथाराज्ञःक्रोधदीप्तस्यसूतमन्यारहंभी
तनरःसदैव ॥ महातपाब्रह्मचर्येणयुक्तःसंकल्पयंमानसस्तस्यसिध्येत् ॥ ३५ ॥ तस्यक्रोधंसंजयाहंसमीक्ष्यस्थानेजानन्भृशमस्म्यद्यभीतः ॥ सगच्छशीघ्रंप्रहि
तोरथेनपांचालराजस्यचमूनिवेशनम् ॥ ३६ ॥ अजातशत्रुंकुशलंस्मपृच्छेःपुनःपुनःप्रीतियुक्तंवदेस्वम् ॥ जनार्दनंचापिसमेत्यतातमहामात्रंवीर्यवतामुदारम्
॥ ३७ ॥ अनामयंमद्वचनेनपृच्छेर्धृतराष्ट्रःपांडवैःशांतिमीप्सुः ॥ ननस्यकिंचिद्वचनंनकुर्यात्कुंतीपुत्रोवासुदेवस्यसूत ॥ ३८ ॥ प्रियश्चैषामात्मसमश्चकृष्णोविद्वां
श्चैषांकर्मणिनित्ययुक्तः ॥ समानीतान्पांडवान्संजयांश्चजनार्दनंयुयुधानंविराटम् ॥ ३९ ॥ अनामयंमद्वचनेनपृच्छेःसर्वांस्तथाद्रौपदेयांश्चपंच ॥ यद्यत्तत्रप्राप्त
कालंपरेभ्यस्त्वंमन्येथाभारतानांहितंच ॥ तद्भाषेथाःसंजयराजमध्येनमूर्च्छयेद्यन्नचयुद्धहेतुः ॥ ४० ॥ ॥ इ० उ० संज० धृतराष्ट्रसंदेशेद्वार्वि० ॥ २२ ॥

श्वअर्जुनवासुदेवौनिर्दहेतामित्यन्वयः ॥ ३२ ॥ शक्रपुत्रत्वात्शक्रसमः धर्मपुत्रत्वात्धर्मारामः ॥ ३३ ॥ निकृतोवंचितः मनस्वीजितमनाः ॥ ३४ ॥ मन्योःक्रोधात् ॥ ३५ ॥ स्थानेजाननयुक्तंपश्यन् ॥ ३६ ॥ महा
मात्रंमहाभागम् ॥ ३७ ॥ शांतिमीप्सुरस्तीतिबदेत्यध्याहारः ॥ ३८ ॥ समानीतान्एकत्रस्थितान् ॥ ३९ ॥ नमूर्च्छयेत्नवर्धयेत् क्रोधमितिशेषः ॥ ४० ॥ इति ०नैलकंठीयेभारतभा०द्वाविंशोऽध्यायः ॥ २२ ॥

॥ १६ ॥

॥ १ ॥ २ ॥ प्रतीतोदृष्टः ॥ ३ ॥ ४ ॥ यत्रआप्तवर्गेत्वंस्वस्तिकामःकल्याणार्थीयांश्चइष्टान्कामान्भोग्यान्गजरथादीन्चांछसितेसर्वेकुशलिनःकच्चिदित्यनुषंगः ॥ ५ ॥ ६ ॥ ७ ॥ वृत्तिरस्यास्तुलेहः ॥ ८ ॥
॥ ९ ॥ १० ॥ कुरुभ्यःस्पृहयंतिकच्चिदित्यनुषंगः कुरूणांकल्याणंअयुद्धेनवांछंतिकच्चिदितिभावः ॥ ११ ॥ येषांराष्ट्रेनिवसतितेषांकुरूणांमध्येधनुर्भृतःकच्चिन्मानंलभंते ॥ १२ ॥ १३ ॥ महानस्योमहा

वैशंपायनउवाच ॥ ॥ राज्ञस्तुवचनंश्रुत्वाधृतराष्ट्रस्यसंजयः ॥ उपप्लव्यंययौद्रष्टुंपांडवानमितौजसः ॥ १ ॥ सतुराजानमासाद्यकुंतीपुत्रंयुधिष्ठिरम् ॥ अभिवाद्य
ततःपूर्वंसूतपुत्रोभ्यभाषत ॥ २ ॥ गावल्गणिःसंजयःसूतसूनुरजातशत्रुमवदत्प्रतीतः ॥ दिष्ट्याराजंस्त्वामरोगंप्रपश्येसहायवंतंचमहेंद्रकल्पम् ॥ ३ ॥ अनामयंपृ
च्छतित्वांबिकेयोवृद्धोराजाधृतराष्ट्रोमनीषी ॥ कच्चिद्भीमःकुशलीपांडवाभ्योधनंजयस्तौचमाद्रीतनूजौ ॥ ४ ॥ कच्चित्कृष्णाद्रौपदीराजपुत्रीसत्यव्रतावीरपत्नीस
पुत्रा ॥ मनस्विनीयत्रचवांछसित्वमिष्टान्कामान्भारतस्वस्तिकामः ॥ ५ ॥ ॥ युधिष्ठिरउवाच ॥ ॥ गावल्गणेसंजयस्वागतंतेप्रियामहेतेवयंदर्शनेन ॥ अना
मयंप्रतिजानेतवाहंसहानुजैःकुशलीचास्मिविद्वन् ॥ ६ ॥ चिरादिदंकुशलंभारतस्यश्रुत्वाराज्ञःकुरुवृद्धस्यसूत ॥ मन्येसाक्षाद्दृष्टमहंनरेंद्रंदृष्ट्वैवचांसंजयप्रीतियो
गात् ॥ ७ ॥ पितामहोनःस्थविरोमनस्वीमहाप्राज्ञःसर्वधर्मोपपन्नः ॥ सकौरव्यःकुशलीतातभीष्मोयथापूर्ववृत्तिरस्यास्यकच्चित् ॥ ८ ॥ कच्चिद्राजाधृतराष्ट्रःसपुत्रो
वैचित्रवीर्यःकुशलीमहात्मा ॥ महाराजोबाह्लिकःप्रातिपेयःकच्चिद्विद्वान्कुशलीसूतपुत्र ॥ ९ ॥ ससोमदत्तःकुशलीतातकच्चिद्भूरिश्रवाःसत्यसंधःशलश्च ॥ द्रोणः
सपुत्रश्चकृपश्चविप्रोमहेष्वासाःकच्चिदेतेप्यरोगाः ॥ १० ॥ सर्वेकुरुभ्यःस्पृहयंतिसंजयधनुर्धरायेपृथिव्यांप्रधानाः ॥ महाप्रज्ञाःसर्वशास्त्रावदाताधनुर्भृतांमुख्य
तमाःपृथिव्यां ॥ ११ ॥ कच्चिन्मानंतातलभंतएतेधनुर्भृतःकच्चिदेतेप्यरोगाः ॥ येषांराष्ट्रेनिवसतिदर्शनीयोमहेष्वासःशीलवान्द्रोणपुत्रः ॥ १२ ॥ वैश्यापुत्रःकुश
लीतातकच्चिन्महाप्राज्ञोराजपुत्रोयुयुत्सुः ॥ कर्णोमात्यःकुशलीतातकच्चित्सुयोधनोयस्यमंदोविधेयः ॥ १३ ॥ स्त्रियोवृद्धाभारतानांजनन्योमहानस्योदासभार्या
श्चसूत ॥ वध्वःपुत्राभागिनेयाभगिन्योदौहित्रावाकच्चिदप्यव्यलीकाः ॥ १४ ॥ कच्चिद्राजाब्राह्मणानांयथावत्प्रवर्ततेपूर्ववत्तातवृत्तिम् ॥ कच्चिद्यान्मामकान्धा
र्तराष्ट्रोद्विजातीनांसंजयनोपहंति ॥ १५ ॥ कच्चिद्राजाधृतराष्ट्रःसपुत्रउपक्षतेब्राह्मणातिक्रमान्वै ॥ स्वर्गस्यकच्चिन्नतथावर्ममूलामुपेक्षतेतेषुसदैववृत्तिम् ॥ १६ ॥

नसेपरिचारिकाः वध्वःस्नुषाः अव्यलीकाःनिष्कपटाः ॥ १४ ॥ वृत्तिंजीविकांदामुमितिशेषः दायान्महत्तान्पामादीन् ॥ १५ ॥ अतिक्रमान्मोपेक्षतइत्युत्तरार्धान्नजोऽपकर्षणयोज्यम् ॥ १६ ॥

एतद्ब्राह्मणानांवृत्तेःपालनंज्योतिःपरलोकप्रकाशकंजीवलोकेइहशुक्लंयशस्करम् दोषंलोभंब्राह्मणवृत्त्युपघातेननियच्छंति॥१७॥ बुभूषतेप्रापयितुमिच्छति भेदेनजिजीविषंतिशत्रुभिर्भेदिताःसंतस्तद्वृत्तै र्धनैर्जीवितुमिच्छंति ॥१८॥१९॥ पार्थस्यअर्जुनस्यकृत्यंस्मरंति युधांसंग्रामाणांप्रणेतुर्निर्वाहकस्य आहुःशमंकुर्वितिशेषः शमेतिपाठेशमशाम्यशांतिंगच्छेत्यर्थः ॥२०॥मौर्व्याःभुजःकौटिल्यंतस्यअग्रमि वाग्रंशरसंधानदेशः ततःप्रहितान्प्रेषितान् ॥२१॥ सुवाससःसुपुंखाःहस्तवापोहस्तक्षेपः वचनभेदेपिसामानाधिकरण्यंशतंस्त्रियोऽस्यपरिग्रहइतिवत् एकषष्टिर्बाणाअस्यएकेनयत्नेनप्रक्षेप्याइत्यर्थः ॥ २२॥

एतज्ज्योतिश्चोत्तमंजीवलोकेशुक्लंप्रजानांविहितंविधात्रा॥ तेचेद्दोषंननियच्छंतिमंदाःकृत्स्नोनाशोभविताकौरवाणां ॥ १७ ॥ कच्चिद्राजाधृराष्ट्रःसपुत्रोबुभू षतेवृत्तिममात्यवर्गे॥कच्चिन्नभेदेनजिजीविषंतिसुहृद्रूपादुर्हृदश्चैकमत्त्यात्॥ १८॥ कच्चिन्नपापंकथयंतितातते पांडवानांकुरवःसर्वएव ॥ द्रोणःसपुत्रश्चकृप श्चवीरोनास्मासुपापानिवदंतिकच्चित् ॥ १९ ॥ कच्चिद्राज्येधृतराष्ट्रंसपुत्रंसमेत्याहुःकुरवःसर्वएव॥ कच्चिद्दृष्ट्वादस्युसंघान्समेतान्स्मरंतिपार्थस्ययुधांप्रणेतुः ॥ २० ॥ मौर्वीभुजाग्रप्रहितान्स्मतातदोधूयमानेनधनुर्धरेण॥ गांडीवनुन्नांस्तनयित्नुघोषानजिह्मगान्कच्चिदनुस्मरंति॥ २१॥ नचापश्यंकंचिदहंपृथिव्यांयो धंसमंवाधिकमर्जुनेन॥ यस्यैकषष्टिर्निशितास्तीक्ष्णधाराःसुवाससःसंमतोहस्तवापः॥२२॥ गदापाणिर्भीमसेनस्तरस्वीप्रवेपयञ्छत्रुसंघाननीके॥ नागःप्र भिन्नइवनड्वलेषुचंक्रम्यतेकच्चिदेनंस्मरंति॥२३॥ माद्रीपुत्रःसहदेवःकलिंगान्समागतानजयद्दंतकूरे॥वामेनास्यन्दक्षिणेनैवयोवैमहाबलंकच्चिदेनंस्मरंति ॥ २४॥ पुराजेतुंनकुलःप्रेषितोयंशिबींस्त्रिगर्तान्संजयपश्यतस्ते॥ दिशंप्रतीचींवशमानयन्मेमाद्रीसुतंकच्चिदेनंस्मरंति॥ २५॥ पराभवोद्वैतवनेयआसीद्दुर्मं त्रितेघोषयात्रागतानाम्॥ यत्रमंदाञ्छत्रुवशंप्रयातानमोचयद्भीमसेनोजयश्च॥२६॥अहंपश्चादर्जुनमभ्यरक्षंमाद्रीपुत्रौभीमसेनोप्यरक्षत्॥गांडीवधन्वा शत्रुसंघानुदस्यस्वस्त्यागमत्कच्चिदेनंस्मरंति॥ २७॥ नकर्मणासाधुनैकेननूनंसुखंशक्यंवैभवतीहसंजय ॥ सर्वात्मनापरिजेतुंवयंचेन्नशक्नुमोधृतराष्ट्रस्यपुत्रं ॥ २८॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिसंजययानपर्वणियुधिष्ठिरप्रश्नेत्रयोविंशोऽध्यायः॥ २३ ॥ ॥ ॥ ७॥ ॥ ॥ ॥

नड्वलेषुसतृणेषुस्थलेषु॥२३॥दंतकूरेकूरंअन्नं दंताःक्रोधावेशात्कूरवच्चर्व्यंतेस्मिन्निति दंतकूरःसंग्रामःतस्मिन् अस्यन्क्षिपन्॥२४॥२५॥जयःअर्जुनः ॥ २६ ॥ अहंअर्जुनस्यतदापृष्ठरक्षकःप्रेरकोऽभवमित्य र्थः भीमसेनश्चमाद्रीसुतयोःपृष्ठरक्षकोऽभूत् पंचभिरप्यस्माभिस्तेमोचिताइत्यर्थः ॥ २७॥ नकर्मणेति सर्वात्मनासर्वोपायैःदानभेददंडैश्चेत्धृतराष्ट्रस्यपुत्रंजेतुंनशक्नुमस्तर्हिएकेनसाधुनाकर्मणासामाख्येनो पायेनसुखंसुखेनजेतुंनैवशक्यंभवति साम्नाऽसाध्येहिदानादयःप्रयुज्यंतेतैरप्यसाध्यःकथंसाममात्रेणसाध्यःस्यात् अतोदंडैकसाध्यःसइतिभावः पाठांतरपरिणेतुंस्वायत्तीकर्तुं॥२८॥इ०नै०त्रयोविं० ॥२३॥

॥ १ ॥ २ ॥ यदिति अद्रुग्धेषुअनपकृतेषुधार्तराष्ट्रेषुयत्युष्माकंद्रुग्धवत्अपकृतस्येवसौनःसूनावान्हिंस्रःतद्धर्मादनपेतंसौनधर्म्यंक्रौर्यंवर्ततेतन्नसाधु द्रुग्धैरपिभवद्भिस्तेषुप्रव्राजनकालेपिद्रोहोनकृतइदा नींतुसुतरांनकर्तव्यइत्याशयः तेतुस्वकृतंभोक्ष्यंत्येवेत्याह मित्रध्रुगिति ॥ ३ ॥ नचानुजानातिसंधिंतानुमोदते तप्यंतेचपुत्रतागभयात् गरीयानितिशृणोतिचेतिसंबंधः॥ ४ ॥ कच्चिदस्मान्स्मरंतीतिपृष्टंतत्रा

संजयउवाच॥ यथात्थमेपांडवतत्तथैवकुरून्कुरुश्रेष्ठजनंचपृच्छसि॥ अनामयास्तातमनस्विनस्तेकुरुश्रेष्ठान्पृच्छसिपार्थयांस्त्वम्॥ १ ॥ संत्येववृद्धाःसाध वोधार्तराष्ट्रेसंत्येवपापाःपांडवतस्यविद्धि ॥ दद्याद्रिपुभ्योपिहिधार्तराष्ट्रःकुतोदायाँल्लोपयेद्ब्राह्मणानाम्॥ २॥ यद्युष्माकंवर्ततेसौनधर्म्यमद्रुग्धेषुद्रुग्धवत्तन्नसा धु॥ मित्रध्रुक्स्यात्धृतराष्ट्रःसपुत्रोयुष्मान्द्विषन्साधुवृत्तानसाधुः॥३॥ नचानुजानातिभृशंचतप्यतेशोचत्यंतःस्थविरोऽजातशत्रो। शृणोतिहिब्राह्मणानांसमे त्यमित्रद्रोहःपातकेभ्योगरीयान्॥ ४॥ स्मरंतितुभ्यंनरदेवसंयुगेयुद्धेचजिष्णोश्चयुधांप्रणेतुः॥ समुत्कृष्टेदुंदुभिशंखशब्देगदापाणिंभीमसेनंस्मरंति॥ ५॥ मा द्रीसुतौचापिरणाजिमध्येसर्वादिशःसंपतंतौस्मरंति॥ सेनांवर्षंतौशरवर्षैरजस्रंमहारथौसमरेदुष्प्रकंपौ॥६॥ नत्वेवमन्येपुरुषस्यराजन्ननागतंज्ञायतेयद्भवि ष्यम्॥ त्वंचेत्तथासर्वधर्मोपपन्नःप्राप्तःक्लेशंपांडवकृच्छ्ररूपम्॥ त्वमेवैतत्कृच्छ्रगतश्चभूयःसमीकुर्याःप्रज्ञयाऽजातशत्रो ॥ ७॥ नकामार्थंसंत्यजेयुर्हिधर्मंपां डोःसुताःसर्वएवेंद्रकल्पाः॥त्वमेवैतत्प्रज्ञयाजातशत्रोसमीकुर्यायेनशर्माप्नुयुस्ते॥८॥धार्तराष्ट्राःपांडवाःसृंजयाश्चयेचाप्यन्येसन्निविष्टानरेंद्राः॥यन्मांब्रवीद्धृत राष्ट्रोनिशायामजातशत्रोवचनंपिताते॥ ९॥ सहामात्यःसहपुत्रश्चराजन्समेत्यतांवाचमिमांनिबोध॥ १०॥ इतिश्रीमहाभारतेउद्योगपर्वणिसंजययानपर्व णिसंजयवाक्येचतुर्विंशोऽध्यायः॥ २४॥ ॥ ७॥ ॥ युधिष्ठिरउवाच॥ ॥ समागताःपांडवाःसृंजयाश्चजनार्दनोयुयुधानोविराटः॥ यत्तेवाक्यंधृतराष्ट्रानु शिष्टंगावल्गणेब्रूहितत्सूतपुत्र॥ १॥ ॥संजयउवाच॥ ॥ अजातशत्रुंचवृकोदरंचधनंजयंमाद्रवतीसुतौच ॥ आमंत्रयेवासुदेवंचशौरिंयुयुधानंचेकितानं विराटम्॥ २॥ पंचालानामधिपंचैववृद्धंधृष्टद्युम्नंपार्षतंयाज्ञसेनिम्॥ सर्वेवाचंशृणुतेमांमदीयांवक्ष्यामियांभूतिमिच्छन्कुरूणाम्॥ ३॥ शमंराजाधृतराष्ट्रो भिनंदन्नयोजयत्त्वरमाणोरथंमे॥ सभ्रातृपुत्रस्वजनस्यराज्ञस्तद्रोचतांपांडवानांक्षमोस्तु॥ ४॥

ह स्मरंतीति तुभ्यंत्वाम् ॥ ५ ॥ रणोयोधध्वनिस्तद्विशिष्टायाआजिःसंग्रामस्तन्मध्ये रक्ष्णस्त्राणेरणःक्वणेइत्यमरः ॥ ६ ॥ अनागतंअज्ञातंअदृष्टमित्यर्थः ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ इतिउद्योगप०नैलकंठी येभारतभा०चतुर्विंशोध्यायः ॥ २४ ॥ ॥ ७ ॥ ॥ १ ॥ २ ॥ ३ ॥ रथमयोजयत् इहआगंतुं राज्ञोवचनंपांडवानांरोचतांततश्चशमोस्तु ॥ ४ ॥

संस्थानेनाकारेण मार्दवेनकृपया आर्जवेनअकौटिल्येन अनृशंसाःअनुपाः ह्रीनिषेवाःलज्जापरायणाः ॥ ५ ॥ हीनंहिंस्रं सत्त्वंबुद्धिसत्त्वंसाधुत्वंवा भीमसेनाःभीषणसैन्याः ॥ ६ ॥ सर्वक्षयःअभावसंस्थः शून्येएवपरिसमाप्तःक्षयः तत्रतत् प्रथमार्थेत्रल् जयोपिबंधुनाशात्पराजयएव ॥ ७ ॥ ज्ञातीनांदुर्योधनादीनांकार्यंघोषयात्रायांगंधर्वेभ्यांमोचनादिकंउपकुष्टंनिंदितम् ॥ ८ ॥ निर्णीयनिश्चयंकृत्वा निगृह्य हत्वेत्यर्थः ॥ ९ ॥ ननुयुद्धेजयपराजयावनित्यावित्याह कोहीतिद्वाभ्याम् ॥ १० ॥ ११ ॥ निःश्रेयसंनिश्चयम् ॥१२ ॥ निर्धर्मार्थंधर्मार्थयोर्विरुद्धंकर्मकथंकुर्युः प्रणतोस्मीतिशेषः ॥१३ ॥ एवमेवंवचन

सर्वैर्धर्मैःसमुपेतास्तुपार्थःसंस्थानेनमार्दवेनार्जवेन ॥ जाताःकुलेह्यनृशंसावदान्याह्रीनिषेवाःकर्मणांनिश्चयज्ञाः ॥ ५ ॥ नयुज्यतेकर्मयुष्मासुहीनंसत्त्वंहिव स्तादृशंभीमसेनाः॥ उद्भासतेह्यंजनबिंदुवत्तच्छुभ्रेवस्त्रेयद्भवेत्किल्बिषंवः ॥ ६ ॥ सर्वक्षयोदृश्यतेयत्रकृत्स्नःपापोदयोनिरयोऽभावसंस्थः॥ कस्तत्रकुर्याज्जातु कर्मप्रजानन्पराजयोयत्रसमोजयश्च ॥ ७ ॥ तेवैधन्यायैःकृतंज्ञातिकार्यंतेवैपुत्राःसुहृदोबांधवाश्च ॥ उपकुष्टंजीवितंसंत्यजेयुर्यतःकुरूणांनियतोवैभवःस्या त् ॥ ८ ॥ तेचेत्कुरूननुशिष्याथपार्थानिर्णीयसर्वान्द्विषतोनिगृह्य ॥ समंवस्तज्जीवितंमृत्युनास्याद्यज्जीवध्वंज्ञातिवधेनसाधु ॥ ९ ॥ कोह्येवयुष्मान्सहकेशवे नसचेकितानान्पार्षतबाहुगुप्तान्॥ ससात्यकीन्विषहेतप्रजेतुंलब्ध्वापिदेवान्सचिवान्सहेंद्रान् ॥ १० ॥ कोवाकुरून्द्रोणभीष्माभिगुप्तानश्वत्थाम्नाशल्यकृपा दिभिश्च ॥ रणेविजेतुंविषहेतराजन्राधेयगुप्तान्सहभूमिपालैः ॥ ११ ॥ महद्बलंधार्तराष्ट्रस्यराज्ञःकोवैशक्तोहंतुमक्षीयमाणः ॥ सोहंजयेचैवपराजयेचनिःश्रेय संनाधिगच्छामिकिंचित् ॥ १२ ॥ कथंहिनीचाइवदौष्कुलेयानिर्धर्मार्थंकर्मकुर्युश्चपार्थाः ॥ सोहंप्रसाद्यप्रणतोवासुदेवंपंचालानामधिपंचैववृद्धम् ॥ १३ ॥ कृ तांजलिःशरणंवःप्रपद्येकथंस्वस्तिस्यात्कुरुसृंजयानाम् ॥ नह्येवमेवंवचनंवासुदेवोधनंजयोवाजातुकिंचिन्नकुर्यात् ॥ १४ ॥ प्राणान्दद्याद्याचमानःकुतोन्य देतद्विद्वन्साधनार्थंब्रवीमि ॥ एतद्राज्ञोभीष्मपुरोगमस्यमतंयद्वःशांतिरिहोत्तमास्यात् ॥ १५ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिसंजययानपर्वणिसंजय वाक्येपंचविंशोऽध्यायः ॥ २५ ॥ ॥ ७ ॥ ॥ युधिष्ठिरउवाच ॥ कांनुवाचंसंजयमेशृणोषियुद्धैषिणींयेनयुद्धाद्बिभेषि ॥ अयुद्धंवैतातयुद्धाद्गरीयःकस्तल्लब्ध्वाजा तुयुध्येतसूत ॥ १ ॥ अकुर्वतश्चेत्पुरुषस्यसंजयसिध्येत्संकल्पोमनसायंयमिच्छेत् ॥ नकर्मकुर्याद्विदितंममैतदन्यत्रयुद्धाद्बहुयल्लघीयः ॥ २ ॥

मितिद्विरुक्त्याविकल्पवाक्यंनकुर्यात् ॥ १४ ॥ प्राणानिति एतत्भवतांजयोपिपराजयएवेतिदीनवचनम् कोवाकुरून्जयेतेतितीक्ष्णवचनम् कथंस्वस्तिस्यादित्युभयनाशवचनंचसाधनार्थंसंधिकार्यस्य सिद्ध्यर्थंब्रवीमिनतुयुष्मान्भीषयामीत्यर्थः ॥ १५ ॥ इति०उ०नै०भा०पंचविंशोऽध्यायः ॥ २५ ॥ ॥ ७ ॥ ॥ १ ॥ अकुर्वतश्चेत्संकल्पःसिध्येत्तर्हिकर्मनकुर्यात् असिद्धावपियुद्धादन्यत्रअन्यत् अत्रापिप्रथमार्थेत्रल् लघीयोपिकर्मकुर्यान्नतुयुद्धम् ॥ २ ॥

अहीनंअनपगतम् ॥ ३ ॥ धर्मोदयंसुखंनिदाघेगंगावगाहादिजंनत्वधर्मोदयंहिंसादिजं तत्त्वतोवस्तुतस्तुसर्वंकर्मदुःखमेवयतःकृच्छ्रोपायंक्लेशसाध्यं तर्हिकुतःकर्मकुर्वंतीत्याशंक्याह सुखमिति ॥४ ॥ कामा भिध्याविषयध्यानं ययेति सर्वात्मनाविषयविस्मरणंमहत्सुखमस्तीतिभावः भोगान्निष्कामतानसंभवतीत्याह यथेति ॥५॥ उक्तमर्थंप्रकृतेयोजयति संपश्येति अस्माभिरित्यत्रधार्तराष्ट्रान्अंतर्भाव्याह पं चाधिकेनपुत्रशतेनसहधृतराष्ट्रस्यभोगंमहांतंपश्य अथापिकृत्स्नंस्वस्यैवभवत्वितिबुद्ध्याऽस्मान्राज्याद्दूरीकृत्यततोभोगात्तृप्तिंनलभतइतिभावः ॥ ६ ॥ पितृव्यनिंदादोषाद्भीतःपुनराह नाश्रेयानिति यःपु ण्यवत्तरः सविग्रहाणामीश्वरोभवतिपरैःसहविरोधंकृत्वास्वोत्कर्षंकरोति अन्यस्तुतेनैवनश्यतिअतःसपुण्यवत्तरएव अस्मद्दोषात्तुवयंवनेदुःखमनुभवामोनतुपरापराधेनेतिभावः ॥७ ॥ प्रावारान्दिव्यवासां

कुतोयुद्धंजातुनरोवगच्छेत्कोदेवशप्तोहिवृणीतयुद्धम् ॥ सुखैषिणःकर्मकुर्वंतिपार्थाधर्मादहीनंयच्चलोकस्यपथ्यम् ॥ ३ ॥ धर्मोदयंसुखमाशंसमानाःकृच्छ्रोपायं तत्त्वतःकर्मदुःखम् ॥ सुखंप्रेप्सुर्विजिघांसुश्चदुःखंयइंद्रियाणांप्रीतिरसानुगामी ॥ ४ ॥ कामाभिध्यास्वशरीरंदुनोतियथाप्रमुक्तोनकरोतिदुःखम् ॥ यथेध्यमान स्यसमिद्धतेजसोभूयोबलंवर्धतेपावकस्य ॥ ५ ॥ कामार्थलाभेनतथैवभूयोनतृप्यतेसर्पिषेवाग्निरिद्धः ॥ संपश्येमंभोगचयंमहांतंसहास्माभिर्धृतराष्ट्रस्यराज्ञः ॥ ६ नाश्रेयानीश्वरोविग्रहाणांनाश्रेयान्वैगीतशब्दंशृणोति ॥ नाश्रेयान्वैसेवतेमाल्यगंधान्नचाप्यश्रेयाननुलेपनानि ॥ ७ ॥ नाश्रेयान्वैप्रावारान्संविवस्तेकथंत्व स्मान्संप्रणुदेत्कुरुभ्यः ॥ अत्रैवस्यादबुधस्यैवकामःप्रायःशरीरेहृदयंदुनोति ॥ ८ ॥ स्वयंराजाविषमस्थःपरेषुसामर्थ्यमन्विच्छतितन्नसाधु ॥ यथात्मनःपश्यतिवृ त्तमेवतथापरेषामपिसोभ्युपैति ॥ ९ ॥ आसन्नमग्निंतुनिदाघकालेगंभीरकक्षेगहनेविसृज्य ॥ यथाविवृद्धंवायुवशेनशोचेत्क्षेमंमुमुक्षुःशिशिरव्यपाये ॥ १० ॥ प्राप्तैश्वर्योधृतराष्ट्रोद्यराजालालप्यतेसंजयकस्यहेतोः ॥ प्रगृह्यदुर्बुद्धिमनार्जवेरतंपुत्रंमंदंमूढममंत्रिणंतु ॥ ११ ॥ अनाप्तवच्चाप्ततमस्यवाचःसुयोधनोविदुर स्यावमत्य ॥ सुतस्यराजाधृतराष्ट्रःप्रियैषीसंबुध्यमानोविशतेऽधर्ममेव ॥ १२ ॥ मेधाविनंह्यर्थकामंकुरूणांबहुश्रुतंवाग्मिनंशीलवंतम् ॥ सतंराजाधृतराष्ट्रःकुरु भ्योनसस्मारविदुरंपुत्रकाम्यात् ॥ १३ ॥ सि संविवस्तेपरिधत्ते अन्यथाअश्रेयांश्चेद्राजातर्हिअस्मान्कुरुभ्यःकथंसंप्रणुदेत्दूरीकुर्यात् शत्रूणांराज्याद्भ्रंशनंहिपुण्यवतामेवकर्मनाश्रेयसामिति भावः अत्रेति यद्यप्येवंतथापिअंतर्दाहकरोयंकामःअबुधस्यदुर्योधनादेरेवउचितोनबुधस्यास्मदादेरित्यर्थः शरीरेशरीरमध्येस्थितंहृदयंदुनोतिस्वेदयति ॥ ८ ॥ अबुधत्वमेवाह स्वयमिति विषमस्थःसंकट स्थःसन्परेषुकर्णादिषुआत्मनोवृत्तंअशक्तत्वंतथापरेषांकर्णादीनामपिसदुर्योधनोभ्युपैति ॥ ९ ॥ गंभीरकक्षेबहुतृणेगहनेवने क्षेमंशोचेत्ममसुखंनास्तीतिशोकंकुर्यात् मुमुक्षुःतस्माद्दाहादात्मानंमोचयितु मिच्छुःशिशिरव्यपायेवसंते तत्रापिनिदाघकालेदाहकालेमध्याह्ने ॥ १० ॥ लालप्यतेदीनवत्भाषते मंदंअभाग्यम् ॥ ११ ॥ विदुरस्यवाचोऽवमत्यसुतस्यप्रियैषीअधर्ममेवसंविशतेआश्रयते ॥ १२ ॥ कु रुभ्यःकुरूणांहितार्थं नसस्मारनादृतवान् पुत्रकाम्यात्पुत्रलोभात् ॥ १३ ॥

असौराजासुतस्यप्रियैषीधर्मकामौप्राजहात्त्यक्तवानितिद्वयोःसंबंधः ईर्षोःपरोत्कर्षासहिष्णोः संरंभिणःक्रोधिनः मन्युवशानुगस्यदैन्यंप्राप्तांकर्णादीनामनुगस्य दौर्हृदैःपापैःभावितस्यपूजितस्य ॥ १४ ॥ अनेयस्यअशिक्षणीयस्य अश्रेयसःअभाग्यस्य प्रपश्यमानःपश्यन्नपि ॥ १५ ॥ प्रशांसांविदुरेणसम्यगुक्तमितिस्तुतिंधार्तराष्ट्राद्विदुरोनलेभे ॥१६॥ १७ ॥ १८ ॥ १९ ॥ तस्मिन्लुब्धेशमःनउपलभ्यःयःम

॥ १९ ॥

मानघ्नस्यासौमानकामस्यचेर्षोःसंरंभिणश्चार्थधर्मातिगस्य॥दुर्भाषिणोमन्युवशानुगस्यकामात्मनोदौर्हृदैर्भावितस्य॥१४॥अनेयस्याश्रेयसोदीर्घमन्योर्मित्रद्रुहःसंजयपापबुद्धेः॥सुतस्यराजाधृतराष्ट्रःप्रियैषीप्रपश्यमानःप्राजहाद्धर्मकामौ॥ १५॥तदैवमेसंजयदीव्यतोभून्मतिःकुरूणामागतःस्यादभावः॥काव्यांवाचंविदुसेभाषमाणोनविंदतेयद्धार्तराष्ट्रात्प्रशंसाम्॥१६॥क्षत्तुर्यदानान्ववर्ततबुद्धिरुच्चैःकुरून्सूततदाभ्याजगाम॥यावत्प्रज्ञामन्ववर्ततततस्यतावत्तेषांराष्ट्रवृद्धिर्बभूव॥१७॥तदर्थलुब्धस्यनिबोधमेद्ययेमंत्रिणोधार्तराष्ट्रस्यसूत॥ दुःशासनःशकुनिःसूतपुत्रोगावल्गणेपश्यसंमोहमस्य॥ १८॥सोहंनपश्यामिपरीक्षमाणःकथंस्वस्तिस्यात्कुरुस्तंजयानाम्॥आत्तैश्वर्योधृतराष्ट्रःपरेभ्यःप्रव्राजितेविदुरेदीर्घदर्शी॥ १९॥ आशंसतेवैधृतराष्ट्रःसपुत्रोमहाराज्यमसपत्नंपृथिव्याम्॥तस्मिन्शमःकेवलंनोपलभ्यःसर्वस्वकंमद्भतेमन्यतेर्थम्॥२०॥यत्तत्कर्णोमन्यतेपारणीयंयुद्धेगृहीतायुधमर्जुनंवै॥आसंश्चयुद्धानिपुरामहांतिकयंकर्णोनाभवद्वीपएषाम्॥२१॥कर्णश्चजानातिसुयोधनश्चद्रोणश्चजानातिपितामहश्च॥अन्येचयेकुरवस्तत्रसंतिषथार्जुनान्नास्यपरोधनुर्धरः॥२२॥जानंत्येतत्कुरवःसर्वएवयेचाप्यन्येभूमिपालाःसमेताः॥दुर्योधनेराज्यमिहाभवंध्याअरिंदमेफाल्गुनेऽविद्यमाने॥२३॥तेनानुबंधंमन्यतेधार्तराष्ट्रःशक्यंहर्तुंपांडवानांममत्वम्॥किरीटिनातालमात्रायुधेनतद्वैदिनासंयुगंतत्रगत्वा॥ २४॥ गांडीवविस्फारितशब्दमाजावश्रृण्वानाधार्तराष्ट्राध्रियंते॥कृद्धंनचेदीक्षतेभीमसेनंसुयोधनोमन्यतेसिद्धमर्थम्॥ २५॥इंद्रोप्येतन्नोत्सहेत्तातहर्तुमैश्वर्यंनोजीवतिभीमसेने॥धनंजयेनकुलेचैवसूततथावीरेसहदेवेसहिष्णौ॥ २६॥ सचेदेतांप्रतिपद्येतबुद्धिंवृद्धोराजासहपुत्रेणसूत॥एवंरणेपांडवकोपदग्धाननश्येयुःसंजयधार्तराष्ट्राः॥ २७॥

द्वेतेममवधूनंप्रतिगमनेसतिसर्वैस्वकमेवार्थमन्यतेइतियोज्यम् ॥ २० ॥ पारणीयंजेतुंशक्यं युद्धानिगोपहादौआसन् द्वीपोद्वीपवत्युद्धप्रवाहेणउह्यमानस्याश्रयः ॥ २१ ॥ यथेतिगंधर्वतोबंधनप्राप्तिंसूचयति ॥ २२ ॥ जानंतीति अविद्यमानेइतिच्छेदः ॥ २३ ॥ अनुबंधंबध्नातीतिबंधोराज्यादिःतमनुसृत्यवर्तमानंपांडवानांममत्वंधार्तराष्ट्रोहर्तुंशक्यंमन्यते किंकृत्वा तेनकिरीटिनासहतन्नराज्येनिमित्तेसतिसंयुगंसंग्रामंगत्वाप्राप्य तालोहस्तचतुष्टयं तद्वैदिनाधनुर्विद्यावेदिना ॥ २४ ॥ म्रियंतेजीवंति ॥ २५ ॥ २६ ॥ एतांबुद्धिंराज्यस्यअपदानेनाशोस्तीत्येवंरूपाम् ॥ २७ ॥

॥ १ ॥

भूतपूर्वंभीमबंधनजतुगृहदाहादि॥२८॥इंद्रप्रस्थेइत्युपराज्यंममभवतु भारताभ्यंइतिहस्तिनापुरंसुयोधनस्यभवत्विति सूचितम् ॥ २९ ॥ इतिउद्योगप०नैलकंठीयेभारतभा०षड्विंशोऽध्यायः ॥२६॥ ॥७॥

महान्श्रावःश्रवणंयस्यमहाकीर्तीत्यर्थः पाठांतरेतुमहान्स्रावोगतिर्यस्य अतिचंचलमित्यर्थः माध्यनीनशः क्रोधेनधार्तराष्ट्रान्मानाशय ॥ १ ॥२॥ ३ ॥ प्रसजंतेस्पृशंति ॥ ४ ॥ गृध्नुःस्पृहावान् ॥ ५ ॥ कर्मणांअर्थकामाद्यर्थानांमध्ये॥६॥परंस्थानंपरलोकंमन्यमानेनमानयता वर्षपूगंवर्षगणम् तत्रत्यसुखेभ्यस्तदर्थंत्वयाआत्मापिदत्तः ॥ ७ ॥ सुखप्रियेभोगानपुत्रादींश्चसेवमानः योगाभ्यासेचित्तवृत्तिनिरोध

जानासित्वंक्लेशमस्मासुदत्तंत्वांपूजयन्संजयाहंक्षमेयम्॥यच्चास्माकंकौरवैर्भूतपूर्वंयानोदत्तिर्धार्तराष्ट्रेतदासीत्॥२८॥अद्यापितत्तत्रतथैववर्ततांशांतिंगमिष्यामियथात्वमात्थ ॥इंद्रप्रस्थेभवतुममैवराज्यंसुयोधनोयच्छतुभारताभ्यः॥ २९ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिसंजययानपर्वणियुधिष्ठिरवाक्येषड्विंशोऽध्यायः ॥ २६ ॥ ॥७॥ ॥ संजयउवाच ॥ ॥ धर्मनित्यापांडवतेविचेष्टालोकेश्रुताद्दृश्यतेचापिपार्थ ॥ महाश्रावंजीवितंचाप्यनित्यंसंपश्यत्वंपांडवमाव्यनीनशः॥१॥नचेद्भागंकुरवोन्यत्रयुद्धात्प्रयच्छेरंस्तुभ्यमजातशत्रो॥भैक्षचर्यामंधकवृष्णिराज्येश्रेयोमन्येनतुयुद्धेनराज्यम्॥ २॥ अल्पकालंजीवितंयन्मनुष्येमहास्रावंनित्यदुःखंचलंच॥ भूयश्चतद्यशसोनानुरूपंतस्मात्पापंपांडवमाकृथास्त्वम्॥३॥कामामनुष्यंप्रसजंतएतेधर्मस्ययेविघ्नमूलंनरेंद्र॥पूर्वंनरस्तान्मतिमान्प्रणिघ्नन्लोकेप्रशंसांलभतेऽनवद्याम्॥ ४॥ निबंधनीत्यर्थतृष्णेहपार्थतामिच्छतांबाध्यतेधर्मएव॥ धर्मंतुयःप्रवृणीतेसबुद्धःकामंगृध्नोहीयतेर्थानुरोधात्॥५॥धर्मंकृत्वाकर्मणांतातमुख्यंमहाप्रतापःसवितेवभाति॥हीनोहिधर्मेणमहीमपीमांलब्ध्वानरःसीदतिपापबुद्धिः॥६॥वेदोधीतश्चरितंब्रह्मचर्ययज्ञैरिष्टंब्राह्मणेभ्यश्चदत्तं॥परंस्थानंमन्यमानेनभूयआत्मादत्तोवर्षपूगंसुखेभ्यः॥ ७॥सुखप्रियेसेवमानोतिवेलंयोगाभ्यासेयोनकरोतिकर्म॥वित्तक्षयेहीनसुखोतिवेलंदुःखंशेतेकामवेगप्रणुन्नः॥८॥एवंपुनर्ब्रह्मचर्याप्रसक्तोहित्वाधर्मंयःप्रकरोत्यधर्मम्॥ अश्रद्दधत्परलोकायमूढोहित्वादेहंतप्यतेप्रेत्यमंदः॥९॥नकर्मणांविप्रणाशोस्त्यमुत्रपुण्यानांवाप्यथवापापकानाम्॥पूर्वंकर्तुर्गच्छतिपुण्यपापंपश्चात्त्वेनमनुयात्येवकर्ता॥ १०॥

मभ्यसितुंकर्मआसनप्राणायामादिकंनकरोति ॥ ८ ॥ ब्रह्मचर्येति ब्रह्मणिचर्याआत्मानुसंधानंतत्रअप्रसक्तःप्रकर्षेणअनासक्तःयोगाद्यावृत्तः धर्मंचयज्ञादिरूपंहित्वायःअधर्ममेवप्रकरोतिसंचिनोति ॥ ९ ॥ ननुधर्मेणपापमपनुदतीतिश्रुतेःकालांतरेअधर्मस्यनाशार्थंधर्ममप्यनुष्ठास्यामःकिंमुक्त्येत्याशंक्याह नकर्मणामिति कृतंकर्मभोगंविनाआत्मज्ञानंविनाबाधनंनश्यतीत्यर्थः नाभुक्तंक्षीयतेकर्म क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरेइत्यादिवाक्येभ्यः उदाहृतश्रुतिस्तुप्रायश्चित्तादिनापापनाशोभवतिसोपिअनैवंव्यवहार्यत्वमापादयतिननुपरलोकेपिपापास्पर्शायप्रभवतीत्येवंपरा ॥ १० ॥

अन्वाहार्येष्वित्यनेनश्रौतमिष्ट्यादिकंलक्ष्यते तत्रहिअन्वाहार्योदक्षिणात्वेनदीयते ॥ ११ ॥ कार्यंधर्मः प्रेत्यमृत्वा ॥ १२ ॥ परलोकेकर्मनास्तीत्याह जहातीति ॥ १३ ॥ एवंरूपमिति हृदयस्यप्रियेणका मेनईदृशंक्षयिष्णुइंद्रियप्रीतिमात्रहेतुकर्मफलंतत्अत्रअस्मिन्लोकेमावहनैववहेयं अत्रकर्मकुर्वन्कामवशादमुत्रफलंनप्रार्थयेतेत्यर्थः ततश्चकोलाभइत्यतआह सइति सःत्वंएवंनिष्कामकर्मकृत्क्रोधजं लोकंनरकंहर्षजंस्वर्गंचेत्युभौलोकौचिरायअपुनरावृत्तयेमाप्रहासीःमागच्छ ओहाङ्गतावित्यस्यरूपं तङभावआर्षः कर्मजंफलंत्यक्त्वापरेणवैराग्येणसंपन्नोमोक्षार्थंयोगाभ्यासमेवकुरुष्वकिंराज्येनबंधु नाशलभ्येनेत्यर्थः ॥ १४ ॥ एवंज्ञानेनकर्मणांअंतंनाशंगत्वाप्राप्य ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेऽर्जुनेतिभगवद्वचनात् बुद्धतत्त्वोपिकृतकृत्योपिसत्यादिकंमात्यज अश्वमेधादीनिकर्माण्यपिलोकसं

न्यायोपेतंब्राह्मणेभ्योथदत्तंश्रद्धापूतंगंधरसोपपन्नम्॥ अन्वाहार्येषूत्तमदक्षिणेषुतथारूपंकर्मविख्यायतेते ॥ ११॥ इहक्षेत्रेक्रियतेपार्थकार्यंनवैकिंचित्क्रियते प्रेत्यकार्यं॥ कृतंत्वयापारलौक्यंचकर्मपुण्यंमहत्सद्भिरतिप्रशस्तम्॥ १२॥ जहातिमृत्युंचजरांभयंचनक्षुत्पिपासेमनसोऽप्रियाणि ॥ नकर्तव्यंविद्यतेतत्रकिंचिद न्यत्रवैचेंद्रियप्रीणनाद्धि॥ १३॥ एवंरूपंकर्मफलंनरेंद्रमात्रावहंहृदयस्यप्रियेण॥ सक्रोधजंपांडवहर्षजंचलोकावुभौमाप्रहासीश्चिराय ॥ १४॥ अंतंगत्वाक र्मणांमाप्रजह्याःसत्यंदमंचार्जवमानृशंस्यं॥ अश्वमेधंराजसूयंतथेज्याःपापस्यांतंकर्मणोमापुनर्गाः॥ १५॥ तच्चेदेवंद्वेषरूपेणपार्थाःकरिष्यध्वंकर्मपापंचिरा य॥ निवसध्वंवर्षपूगान्वनेषुदुःखंवासंपांडवाधर्मएव॥ १६॥ अप्रव्रज्येमास्महित्वापुरस्तादात्माधीनंयद्बलंह्येतदासीत्॥ नित्यंचवश्याःसचिवास्तवेमेजनार्द नोयुयुधानश्चवीरः॥ १७॥ मत्स्योराजारुक्मरथःसपुत्रःप्रहारिभिःसहपुत्रैर्विराटः॥ राजानश्चयेविजिताःपुरस्तात्त्वामेवतेसंश्रयेयुःसमस्ताः॥ १८॥ महासहा यःप्रतपन्बलस्थःपुरस्कृतोवासुदेवार्जुनाभ्याम्॥ वरान्हनिष्यन्द्विषतोरंगमध्येव्यनेष्यथाधार्तराष्ट्रस्यदर्पम्॥ १९॥ बलंकस्माद्वर्धयित्वापरस्यनिजान्कस्मा त्कर्शयित्वासहायान्॥ निरुष्यकस्माद्वर्षपूगान्वनेषुयुयुत्ससेपांडवहीनकालम्॥ २०॥

यहार्थंकुरुपरंतुपापस्यकर्मणोंतंसमीपंपुनर्मागाः ज्ञानोत्तरकालंकृतमपिकर्मनज्ञानिनंस्पृशतीतिभावः तद्यथा पुष्करपलाशआपोनश्लिष्यंतएवमेवंविदिपापकंकर्मनश्लिष्यतइतिश्रुतेः ॥ १५ ॥ तच्चेदिति भोपार्थाःभोपांडवाःतत्पापंकर्मगोत्रवधरूपंद्वेषरूपेणचिरायप्रागेवचेत्करिष्यध्वंतर्हियद्वनेवर्षपूगान्दुःखंवासंनिवसध्वंतद्धर्मएवेतियत्तत्पदाध्याहारेणयोज्यं राज्यार्थंसर्वलोकनाशमिच्छतांभवतांदुर्योध नेनयोवनवासःकारितःसधर्मएवेत्यर्थः ॥ १६ ॥ ननुतदानींसहायाभावादस्माभिर्वनवासोंगीकृतोनदुर्योधनाज्ञयेत्याशंक्याह अप्रव्रज्येति इमाइमानिराज्यादीनि सुपांसुलुगितिसुपोडादेशः पुरस्तात्प्र व्रजनकालेएवहित्वा धाञोरूपं बलेनधृत्वाअप्रव्रज्यवनेप्रव्रजनमकृत्वैवआस्मभवेमवयं पांडवान्आत्मन्यंतर्भाव्यउत्तमपुरुषप्रयोगः यत्यतःपुरस्तादपिएतद्बलंआत्माधीनमेवासीत् ॥ १७ ॥ १८ ॥ ॥ १९ ॥ हीनकालंगतेकालेइत्यर्थः ॥ २० ॥

एवंपूर्वंयुद्धमकुर्वताइदानीमपितन्नकर्तव्यमित्युक्तंअथसर्वथापियुद्धंनकर्तव्यंजयपराजययोरव्यवस्थितत्वादित्याह अप्राज्ञइति मूढोऽधर्मज्ञोवायुध्यन्ऐश्वर्यंलभतेप्राज्ञोधर्मज्ञःअयुध्यन्दैवात्ऐश्वर्यात् भ्रश्यतीत्यर्थः ॥ २१ ॥ ग्रंथतात्पर्यमाह नेति संरंभात्कोपात् पूर्वमपिपापभयादेवत्वयानकृतंतर्हिइदानींप्रज्ञाविरुद्धंतत्किमर्थंचिकीर्षसीतिभावः ॥२२॥ अव्याधिजंकटुकंपित्तादिकंविनाप्यरोचकं य शोमुषंयशोहरं पेयंगिलनीयं मन्युंक्रोधं प्रशाम्यशांतोभव ॥ २३ ॥ पापेनुबध्नातितंतथाविधंपापस्यमूलंतंमन्युं यत्रभोगेषुनिमित्तेषु एतेनभीष्मादीनांगुरूणामपिवधोराज्यार्थिनस्त्वत्तोभविष्यतीतिद

अप्राज्ञोवापांडवयुध्यमानोऽधर्मज्ञोवाभूतिमथोभ्युपैति॥ प्रज्ञावान्वाबुध्यमानोपिधर्मंसंस्तंभाद्वासोपिभूतेरपैति॥ २१॥ नाधर्मेतेधीयतेपार्थबुद्धिर्नसंरंभा त्कर्मचकर्थपापम्॥ आत्थकिंतत्कारणंयस्यहेतोःप्रज्ञाविरुद्धंकर्मचिकीर्षसीदम्॥ २२॥ अव्याधिजंकटुकंशीर्षरोगियशोमुषंपापफलोदयंवा॥ सतांपेयंयन्न पिबंत्यसंतोमन्युंमहाराजपिबप्रशाम्य॥ २३॥ पापानुबंधंकोनुतंकामयेतक्षमैवतेज्यायसीनोतभोगाः॥ यत्रभीष्मःशांतनवोहतःस्याद्यत्रद्रोणःसहपुत्रोहतः स्यात्॥ २४॥ कृपःशल्यःसौमदत्तिर्विकर्णोविविंशतिःकर्णदुर्योधनौच॥ एतान्हत्वाकीदृशंतत्सुखंस्याद्यद्विंदेथास्तदनुब्रूहिपार्थ॥ २५॥ लब्ध्वापीमांपृथिवींसा गरांतांजरामृत्यूनैवहित्वंप्रजह्याः॥ प्रियाप्रियेसुखदुःखेचराजन्नेवंविद्वान्नैवयुद्धंकुरुत्वम्॥ २६॥ अमात्यानांयदिकामस्यहेतोरेवंयुक्तंकर्मचिकीर्षसित्वम् अपक्रमेःस्वंप्रदायैवतेषांमागास्त्वंवैदेवयानात्पथोद्य॥ २७॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिसंजययानपर्वणिसंजयवाक्येसप्तविंशोऽध्यायः॥ २७॥ युधिष्ठिरउवाच॥ ॥असंशयंसंजयसत्यमेतद्धर्मोवरःकर्मणांयत्त्वमात्थ॥ ज्ञात्वातुमांसंजयगर्हयेस्त्वंयदिधर्मंयद्यधर्मंचरेयम्॥ १॥ यत्राधर्मोधर्मरूपाणिध त्तेधर्मःकृत्स्नोदृश्यतेऽधर्मरूपः॥ बिभ्रद्धर्मोधर्मरूपंतथाचविद्वांसस्तंसंप्रपश्यंतिबुद्ध्या॥ २॥

शितम् ॥ २४ ॥ २५ ॥ २६ ॥ देवयानात्पथोर्थिरादिमार्गादपुनरावृत्तिफलात्गोत्रद्रोहेणमागाइत्यर्थः ॥ २७॥ ॥ इतिउद्योगप० नैलकंठीयेभारतभावदीपेसप्तविंशोऽध्यायः ॥ २७ ॥ ७ ॥ असंशयंयदि धर्मंचरेयंयदिवाअधर्मंतदुभयंज्ञात्वापरीक्ष्याधर्माचरणंउपलभ्यगर्हयेःनिंदस्व ॥ १ ॥ धर्माधर्मपरीक्षायांत्रैविध्यमाह यत्रेति यत्रपुरुषेदंभादिमतिअधर्मःअभिचारार्थंमंत्रजपादिःधर्मइत्येवान्येजानंति तथाप्रच्छन्नयोगिनिदत्तात्रेयादौधर्मोरागद्वेषादिशून्यतारूपोयोगधर्मोपिउन्मत्तवदाचरणादधर्मरूपइवदृश्यते यत्रवसिष्ठादौधर्मःधर्मरूपएव यद्यपिचांडालादौअधर्मोप्यधर्मरूपएवास्तितथापितस्यानू पादेयत्वात्त्रयमेवविचार्यं पाठांतरेऽधर्मेतिच्छेदः एतच्चत्वयापिविदुषामयिविचार्यमित्याशयः ॥ २ ॥

अत्रआद्ययोःप्रच्छन्नत्वात्चिरकालेनतत्त्वनिश्चयः अंत्येतुप्रत्यक्षलिंगेपिआपत्कालवशाद्धर्माधर्मयोर्व्यत्यासोजायतइत्याह एवमिति एतदेवरूपंलोकप्रत्यक्षलिंगंब्राह्मणस्यस्वाध्यायप्रवचनादि क्षत्रियस्यशौर्यादि वैश्यस्यकृष्यादि तत्तथैवयथोक्तमेव तथापिनित्यवृत्तीनित्यंवर्तेतेनौनित्यवृत्तीधर्माधर्मौतल्लिंगंभजेताम् अयंभावः क्षत्रलिंगंब्राह्मणवैश्ययोरापदिधर्मःअनापद्यधर्मः तथाचैकस्यैवलिंगस्य वर्णांतरेअवस्थाभेदाद्धर्मत्वमधर्मत्वंचनिस्यमिति तत्रापिविशेषमाह आद्यमिति आद्यंब्राह्मणलिंगंयाजनादियस्यास्तिब्राह्मणस्यतस्यैवतत्प्रमाणंअन्यत्रिचारि आपद्यपिक्षत्रियेणयाजनाध्यापनादिकंन कर्तव्यमित्यर्थः एवंविधंतंआपद्धर्मंशास्त्राग्निबोधबुध्यस्व ॥ ३ ॥ ननुकथंतर्हिएकचकायांभिक्षाटनंब्राह्मणस्यैवासाधारणत्वेनविहितंभवद्भिःकृतमित्याशंक्याह लुप्तायामिति प्रकृतिःजीविकाहेतुभूतंधनम् तच्चक्षत्रियस्यभूमिशस्त्रादिकम् वैश्यस्यधनपश्वादिकम् तस्मिन्सर्वात्मनानष्टेसतियेनकर्मसंध्योपासनादिकंनिष्पादयेत्ततत्भिक्षाटनादिकमपिपरीप्सेत्कर्तुमिच्छेत् अन्यथाजीविकायाअभावात्कर्मलोपःप्राणनाशश्चस्यादतोऽत्यंतापदितावान्विप्रधर्मोपीतरैरनुष्ठेयएव प्रकृतिस्थश्चेति आपदिआपद्धर्मे प्रकृतिस्थोपियथापद्धर्ममनुसरेत्सलोभाद्दर्पः आपत्स्थोपियदिप्राकृतंधर्ममनुसरेत्सजीवनलोपात्कु

एवंतथैवापदिलिंगमेतद्धर्माधर्मौनित्यवृत्तीभजेताम्॥आद्यंलिंगंयस्यतस्यप्रमाणमापद्धर्मंसंजयतंनिबोध॥ ३॥ लुप्तायांतुप्रकृतौयेनकर्मनिष्पादयेत्तत्परीप्सेद्विहीनः॥ प्रकृतिस्थश्चापदिवर्तमानउभौगत्यौभवतःसंजयैतौ॥४॥ अविनाशमिच्छतांब्राह्मणानांप्रायश्चित्तंविहितंयद्विधात्रा॥ संपश्येथाःकर्मसुवर्तमानान्विकर्मस्थान्संजयगर्हयेस्त्वम्॥५॥ मनीषिणांसत्त्वविच्छेदनायविधीयतेसत्सुवृत्तिःसदैव॥ अब्राह्मणाःसंतितुयेनवैद्यासर्वोत्संगंसाधुमन्येततेभ्यः॥६॥

टुर्बाहिसयाचगर्ह्यइत्यर्थः ॥ ४ ॥ अविनाशमिति यत्यस्माद्धेतोःविधात्राअविनाशोदृत्यंतरोपजीवनेनब्राह्मण्यस्यनाशोविनाशस्तदभावमिच्छतांब्राह्मणानांआपदुत्तीर्णानांप्रायश्चित्तंविहितम् तस्माद्धेतोरापदिअन्यस्यान्यधर्माश्रयणंप्रसक्तमेवेतिज्ञायते अतएवंएकचकायामस्माभिःकृतंभिक्षाटनंनानुचितमित्यर्थः एवमनापदिकर्मसुवर्तमानान्आपदिचविकर्मस्थान्संपश्येथाःसम्यगेवेदमितिपश्येथाः अन्यथातुआपदिकर्मस्थान्आत्मपरहिंस्रान्अनापदिविकर्मस्थांश्चातिलुब्धान्विगर्हयेस्त्वम् ॥ ५ ॥ किंच मनीषिणांमनसःनियहंनाशंकर्तुमिच्छताम् ईषगतिर्हिंसादर्शनेष्वित्यस्यरूपम् सत्त्वविच्छेदनायसत्त्वस्यबुद्धिसत्त्वस्यचिदात्मनासहएकलोलीभूतस्यविच्छेदनायमुंजेषीकान्यायेनपृथक्करणायसत्सुसतांगृहेषुवृत्तिर्जिर्त्तीविकाशास्त्रेविधीयते वेदानिमंलोकममुंचपरित्यज्यात्मनात्मानमन्विच्छेदितिश्रुत्यात्मान्वेषणायसर्वसंन्यासपूर्वकंभिक्षाचर्यविधानात् नब्राह्मीवृत्तिःकस्यापिनित्या येतुअब्राह्मणाअपिवैद्याःविद्यानिष्ठाःनभवंतितेषांभिक्षाचर्यस्याविधानात्तेभ्यःतेषामर्थेसर्वोत्संगंसर्वेषामुत्संगंसमीपंस्वधर्मसंयोगंआपदनापदोरुचितंसाधुमन्येत सर्वोच्छेदमितिपाठेतेभ्यस्तेषामर्थेभिक्षाचटनंसर्वधर्मोच्छेदायमन्येतेत्यर्थः ॥ ६ ॥

तदध्वानइति पित्रादयःयज्ञैषिणोयेतेसर्वेतदध्वानःसएवमयोक्तोऽध्वामार्गोयेषांतेतदध्वानोऽभूवन् हिप्रसिद्धं येचकर्मनकुर्युःसंन्यासिनइत्यर्थः तेसर्वेतदध्वानः अहमपिआस्तिकोस्मीतितोन्यंअध्वानंनमन्ये ॥७॥ एवंस्वस्थनीतिज्ञत्वप्रकाशनप्रसंगादापद्धर्मान्योगिधर्मांश्चोक्त्वाप्रकृतमनुसरति यत्किंचेति ॥८॥ धर्मेश्वरःधर्मफलस्यदाता ॥ ९ ॥ यदिसामविसृजन्त्यांतर्हिगर्ह्यःस्यां यदिवायुध्यमानःस्वधर्मंज

तदध्वानःपितरोयेचपूर्वेपितामहायेचतेभ्यःपरेन्ये॥ यज्ञैषिणोयेचहिकर्मकुर्युर्नान्यंततोनास्तिकोस्मीतिमन्ये ॥ ७ ॥ यत्किंचनेदंवित्तमस्यांपृथिव्यांयद्देवानांत्रिदशानांपरंयत्॥ प्राजापत्यंत्रिदिवंब्रह्मलोकंनाधर्मतःसंजयकामयेयं॥ ८ ॥ धर्मेश्वरःकुशलोनीतिमांश्चाप्युपासिताब्राह्मणानांमनीषी॥ नानाविधांश्चैवमहाबलांश्चराजन्यभोजाननुशास्तिकृष्णः॥ ९ ॥ यदित्यहंविसृजन्सामगर्ह्योनियुध्यमानोयदिजह्यांस्वधर्मं ॥ महायशाःकेशवस्तद्ब्रवीतुवासुदेवस्तूभयोरर्थकामः॥ १० ॥ शैनेयोयंचेदयश्चांधकाश्चवार्ष्णेयभोजाःकुकुराःसृंजयाश्च ॥ उपासीनावासुदेवस्यबुद्धिंनिगृह्यशत्रून्सुहृदोनंदयंति ॥ ११ ॥ कृष्यंधकात्युग्रसेनादयोवैकृष्णप्रणीताःसर्वएवेंद्रकल्पाः॥मनस्विनःसत्यपरायणाश्चमहाबलायादवाभोगवंतः॥ १२॥ काश्योवभ्रुःश्रियमुत्तमांगतोलब्ध्वाकृष्णंभ्रातरमीशितारम्॥यस्मैकामान्वर्षतिवासुदेवोग्रीष्मात्यये मेघइवप्रजाभ्यः॥ १३॥ईदृशोयंकेशवस्तातविद्वान्विद्वित्वेनंकर्मणांनिश्चयज्ञम्॥ प्रियश्चनःसाधुतमश्चकृष्णोनातिकामेवचनंकेशवस्य॥ १४॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिसंजययानपर्वणियुधिष्ठिरवाक्येअष्टाविंशोऽध्यायः॥ २८॥ ॥ ॥वासुदेवउवाच॥ अविनाशंसंजयपांडवानामिच्छाम्यहंभूतिमेषांप्रियंच॥ तथाराज्ञोधृतराष्ट्रस्यसूतसमाशंसेवद्दुपुत्रस्यवृद्धिं॥ १ ॥ कामोहिमेसंजयनित्यमेवनान्यद्भूयांतान्प्रतिशाम्यतेति॥ राज्ञश्चहिप्रियमेतच्छृणोमिमन्येचैतत्पांडवानांसमक्षम्॥ २॥सुदुष्करस्त्रशमोहिनूनंप्रदर्शितःसंजयपांडवेन॥यस्मिन्गृद्धोधृतराष्ट्रःसपुत्रःकस्मादेषांकलहोनावमूर्च्छेत्॥ ३॥नत्वंधर्मंविचरंसंजयेहमत्तश्चजानासियुधिष्ठिराच्च॥ अथोकस्मात्संजयपांडवस्यउत्साहिनःपूरयतःस्वकर्म॥ ४॥

शांतदागर्ह्यःस्यां ममतुद्वयमपीष्टमेवेतिभावः ॥ १० ॥ ११ ॥ कृष्णप्रणीताःकृष्णेनैवनीतिपथंनीताः ॥ १२ ॥ १३ ॥१४ ॥ इतिउद्योगप०नैलकंठीयेभारतभा०युधिष्ठिरवाक्ये अष्टाविंशोऽध्यायः ॥२८॥ ॥ १ ॥ शाम्यतेतिवचनादन्यत्तान्प्रतिनब्रूयां पांडवानांसमक्षंराज्ञोयुधिष्ठिराच्चएतदेवश्रृणोमि अहंचएतन्मन्येमानयामि ॥ २ ॥ तत्रराज्येनिमित्ते गृद्धःलिप्सावान् एवंसतिएषांकौरवाणांकस्माद्धेतोःकलहःनावमूर्च्छेत् ॥ ३ ॥ विचरंविचलितं पूरयतःपालयतः ॥ ४ ॥

यथाख्यातमावसतःकुटुंबेपुराकस्मात्साधुविलोपमात्थ॥अस्मिन्विधौवर्तमानेयथावदुच्चावचामतयोब्राह्मणानाम्॥५॥ कर्मणाद्विःसिद्धिमेकेपरत्रहित्वाकर्मविद्ययासिद्धिमेके॥नाभुंजानोभक्ष्यभोज्यस्यतृप्येद्विद्वानपीहविहितंब्राह्मणानाम्॥६॥यावैविद्याःसाधयंतीहकर्मतासांफलंविद्यतेनेतरासाम्॥तत्रेहवैदृष्टफलंतुकर्मपीत्वोदकंशाम्यतितृष्णयार्तः॥७॥ सोयंविधिर्विहितःकर्मणैवसंवर्ततेसंजयतत्रकर्म॥ तत्रयोन्यत्कर्मणःसाधुमन्येन्मोघंतस्यालपितंदुर्बलस्य॥८॥कर्मणामीभांतिदेवाःपरत्रकर्मणैवेहप्लवतेमातरिश्वा॥ अहोरात्रेविदधत्कर्मणैवअतंद्रितोनित्यमुदेतिसूर्यः॥९॥ मासार्धमासानथनक्षत्रयोगानतंद्रितश्चंद्रमाश्चाभ्युपैति॥ अतंद्रितोदहतेजातवेदाःसमिध्यमानःकर्मकुर्वन्प्रजाभ्यः॥ १०॥ अतंद्रिताभारमिमंमहांतंबिभर्तिदेवीपृथिवीबलेन॥अतंद्रिताःशीघ्रमपोवहंतिसंतर्पयंत्यःसर्वभूतानिनद्यः॥ ११॥ अतंद्रितोवर्षतिभूरितेजाःसन्नादयन्नंतरिक्षंदिशश्च॥ अतंद्रितोब्रह्मचर्यंचचारश्रेष्ठत्वमिच्छन्बलभिद्देवतानाम्॥१२॥ हित्वासुखंमनसश्चप्रियाणितेनशक्रःकर्मणाश्रैष्ठ्यमाप॥ सत्यंधर्मंपालयन्नप्रमत्तोदमंतितिक्षांसमतांप्रियंच॥ १३॥

देवतास्तावमन्वायत्तेतिच्छांदोग्यैसर्वभूतसंवेशनोद्रमनलिंगेनजगत्कारणतयानिश्चितस्यप्राणाख्यपरमात्मनोविद्यायाः प्रस्तावकर्मसाधकत्वंदृष्टम् तासांकर्मसाधकानांविद्यानांफलमस्तिनेतरासांस्वतंत्राणांअयंभावःगृहस्थःस्वात्मानमन्यांश्चपित्रादीस्तारयतियर्नीश्चपुष्णातियतिस्त्वात्मानमेवतारयतिनपित्रादीन्पोषणंचस्वस्यापिनकरोतिभैक्षोपजीवित्वादतोगार्हस्थ्यमेवश्रेष्ठमिति किंचनैष्कर्म्यदृष्टविरुद्धमपीत्याह तत्रेतिनष्कर्मतदभावतारतम्येविचारणीयेकर्मइहैवदृष्टफलम् ॥ ७ ॥ सोयंज्ञानविधिःकर्मणैवसहविहितः तत्रचअनुष्ठीयमानेकर्मउद्वर्ततेउच्छिद्यते कर्मसमवेतमेवज्ञानंसकलकर्मोच्छेदहेतुरित्यर्थः कर्मणोन्यत्संन्यासम् मन्येत्मन्यते ॥ ८ ॥ कर्मसमुच्चितंज्ञानंस्तौति कर्मणाभीभांतीत्यादिना ब्रह्मविद्याब्रह्मचर्यैकियांचनिषेवमाणाइत्युपसंहारात् ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

॥ १४ ॥ १५ ॥ १६ ॥ व्यायच्छसेनिग्रहंकरोषि ॥ १७ ॥ आम्नायेष्विति विद्याधर्मःशौर्यंचयुधिष्ठिरेपुष्कलमल्पीतिनायमन्येनशिक्षणीयोजेतुंवाक्यइत्यर्थः ॥१८॥ कौरवाणांअवधेनउपायम् राज्यप्राप्तावितिशेषः एषांएतैः भीमसेनेआर्येदत्तेअहिंसायांनिगृह्यपुण्यमेवकृतंस्यात् ॥ १९ ॥ पित्र्येकर्मणिक्षात्रधर्मेयुद्धे पूरयंतःपालयंतः ॥ २० ॥ शाम्यमेवशमःकार्यएवेतिमन्यसेतर्हिधर्मतंत्रंधर्मानुष्ठानं

एतानिसर्वाण्युपसेवमानःसदेवराज्यंमघवान्प्रापमुख्यम्॥बृहस्पतिर्ब्रह्मचर्यंचचारसमाहितःसंशितात्मायथावत्॥१४॥ हित्वासुखंप्रतिरुध्येंद्रियाणितेनदेवानामगमद्गौरवंसः॥ तथानक्षत्राणिकर्मणामुत्रभांतिरुद्रादित्यावसवोथापिविश्वे॥ १५॥ यमोराजावैश्रवणःकुबेरोगंधर्वयक्षाप्सरसश्चसूत॥ ब्रह्मविद्यांब्रह्मचर्यंक्रियांचनिषेवमाणाऋषयोमुत्रभांति॥१६॥जानन्निमंसर्वलोकस्यधर्मंविप्रेंद्राणांक्षत्रियाणांविशांच॥ सकस्मात्त्वंजानतांज्ञानवान्सन्व्यायच्छसेसंजयकौरवार्थे॥ १७॥ आम्नायेषुनित्यसंयोगमस्यतथाश्वमेधेराजसूयेचविद्धि॥ संयुज्यतेधनुषावर्मणाचहस्त्यश्वाद्यैरथशस्त्रैश्चभूयः॥१८॥तेचेदिमेकौरवाणामुपायमवगच्छेयुरवधेनैवपार्थाः॥ धर्मत्राणंपुण्यमेषांकृतंस्यादार्यंवर्त्तेभीमसेनंनिगृह्य ॥ १९ ॥ तेचेत्पित्र्येकर्मणिवर्तमानाआपद्येरन्दिष्टवशेनमृत्युम्॥ यथाशक्त्यापूरयंतःस्वकर्मतदप्येषांनिधनंस्यात्प्रशस्तम्॥ २० ॥ उताहोत्वंमन्यसेशाम्यमेवराज्ञांयुद्धेवर्ततेधर्मतंत्रम्॥ अयुद्धेवावर्ततेधर्मतंत्रंतथैवतेवाचमिमांशृणोमि॥ २१ ॥ चातुर्वर्ण्यस्यप्रथमंसंविभागमवेक्ष्यत्वंसंजयस्वंचकर्म॥ निशम्याथोपांडवानांचकर्मप्रशंसवानिंदवायामतिस्ते॥ २२ ॥ अधीयीतब्राह्मणोवैयजेतदद्यादीत्तीर्थमुख्यानिचैव॥अध्यापयेद्याजयेच्चापियाज्यान्प्रतिग्रहान्वाविहितान्प्रतीच्छेत्॥२३॥ तथाराजन्योरक्षणंवैप्रजानांकृत्वाधर्मेणाप्रमत्तोथदत्त्वा॥ यज्ञैरिष्ट्वासर्ववेदानधीत्यदारान्कृत्वापुण्यकृदावसेद्गृहान्॥२४॥सधर्मात्माधर्ममधीत्यपुण्यंयदिच्छेद्याव्रजतिब्रह्मलोकम्॥ वैश्योधीत्यकृषिगोरक्षपण्यैर्वित्तंचिन्वन्पालयन्प्रप्रमत्तः॥ २५॥ प्रियंकुर्वन्ब्राह्मणक्षत्रियाणांधर्मशीलःपुण्यकृदावसेद्गृहान्॥ परिचार्यावंदनंब्राह्मणानांनाधीयीतप्रतिषिद्धोस्ययज्ञः॥ नित्योत्थितोभृतयेऽतंद्रितःस्यादेवंस्मृतःशूद्रधर्मःपुराणः॥ २६॥

युद्धपक्षेस्तिउतअयुद्धपक्षे तयोर्मध्येयदेववक्ष्यसितथैवतेवाचंशृणोमिकरिष्यामीत्यर्थः ॥ २१ ॥ ननुक्षत्रधर्मलोपेपिगोब्रह्मवधोनकर्तव्यइत्याशंक्याह चातुर्वर्ण्यस्येत्यादिना ॥ २२ ॥ प्रतीच्छेत्प्रतिगृह्णीयात् ॥ २३ ॥ २४ ॥ सःक्षत्रियःअधीत्यप्राप्ययदिच्छयायस्यधर्मस्यइच्छयाबलेनब्रह्मलोकंगच्छति नोचेज्जनकादिवदिहैवकृतकृत्योभवतीत्यर्थः भोगमोक्षकरःक्षात्रोधर्मोदुस्त्यजइतिभावः ॥ २५ ॥ नाधीयीतवेदाध्ययनंकुर्यात् यज्ञःश्रौतःस्मार्तश्चयतिषिद्धः तस्माच्छूद्रोयज्ञेनवकृमइतिश्रुतेः ॥ २६ ॥

एतानिति यथासर्वाश्रमपालकत्वाद्गृहस्थस्यश्रेष्ठत्वंतथासर्ववर्णपालकत्वात्धर्मेणराज्यकरणमपिश्रेष्ठतममित्यर्थः ॥ २७ ॥ तस्मात्राज्ञःश्रेयानुपशास्ततरःअभिज्ञातःज्ञानतःधर्मतश्चयदिकश्चिद्दस्तिसतंयुधिष्ठिरंप्रजानाम् कर्मणिषष्ठी प्रजाःद्रष्टुंराज्यंप्रामुमित्यर्थः अनुशिष्यन्अनुशासितुमिच्छन्एतन्मदुक्तंधर्मजातंयुधिष्ठिरेस्तीतिबुध्येत् नचतस्मिन्नसाधुःयुधिष्ठिरेःसाधुरधर्मोनचास्तीत्यपिबुध्येत् यद्वाएवं सत्यपितस्मिन्ननुशास्तरिराजासाधुर्नइतिनअपितुसाधुरेव यदितेनइतोधिकंज्ञायतेउच्यतेचतर्हितस्यापिवचनंकरिष्यत्येवेत्यर्थः अनुशिष्यात्प्रजानांनचेद्गृध्येदितितस्मिन्नसाध्वितिपाठेश्रेयांश्चेत्द्रष्टुंधर्मंदर्शयितुंअनुशिष्यात्ननचेत्प्रजानांप्रजाःराज्यंनगृध्येदितिहेतोस्तस्मिन्युधिष्ठिरेसाध्वेववर्ततइतिशेषः ॥२८॥ धर्मतस्तुनृशंसत्वात्दुर्योधनोधार्मिकेणराज्ञावध्यएवेतिसूत्रयन्नाह यदेत्यादिनासार्द्धेन परभूतौपरै

एतान्राजापालयन्नप्रमत्तोनियोजयन्सर्ववर्णान्स्वधर्मे॥अकामात्मासमवृत्तिःप्रजासुनाधार्मिकाननुरुध्येतकामात् ॥२७॥ श्रेयांस्तस्माद्यदिविद्येतकश्चिद्भिज्ञातःसर्वधर्मोपपन्नः॥ सतंद्रष्टुमनुशिष्यन्प्रजानांनचेद्गृध्येदितितस्मिन्नसाधुः॥२८॥यदागृध्येत्परभूतौनृशंसोविधिप्रकोपाद्बलमाददानः॥ततोराज्ञामभवद्युद्धमेतत्तत्रजातंवर्मशस्त्रंधनुश्च॥ २९॥ इंद्रेणैतद्दस्युवधायकर्मउत्पादितंवर्मशस्त्रंधनुश्च ॥३०॥ तत्रपुण्यंदस्युवधेनलभ्यतेसोयंदोषःकुरुभिस्तीव्ररूपः॥ अधर्मज्ञैर्धर्ममबुध्यमानैःप्रादुर्भूतःसंजयसाधुतन्न ॥३१॥तत्रराजाधृताराष्ट्रःसपुत्रोधर्म्यंहरेत्पांडवानामकस्मात् ॥नावेक्षंतेराजधर्मंपुराणंतदन्वयाःकुरवःसर्वएव ॥३२॥ स्तेनोहरेद्यत्रधनंत्यदृष्टःप्रसह्यवायत्रहरेतदृष्टः॥ उभौगर्त्यौभवतःसंजयैतौकिंवैपृथक्कंधृतराष्ट्रस्यपुत्रे ॥३३॥ सोयंलोभान्मन्यतेधर्ममेतंयमिच्छतिक्रोधवशानुगामी ॥ भागःपुनःपांडवानांनिविष्टस्तंनःकस्मादाददीरन्परेवै ॥३४॥ अस्मिन्यदेयुध्यतांनोवधोपिश्लाघ्यःपित्र्यंपरराज्याद्विशिष्टम् ॥एतान्धर्मान्कौरवाणांपुराणानाचक्षीथाःसंजयराजमध्ये ॥३५॥ एतेमदान्मृत्युवशाभिपन्नाःसमानीताधार्तराष्ट्रेणमूढाः ॥इदंपुनःकर्मपापीयएवसभामध्येपश्यद्वृत्तं कुरूणां ॥ ३६ ॥ प्रियांभार्यांद्रौपदींपांडवानांयशस्विनींशीलवृत्तोपपन्नाम् ॥ यदुपैक्षंतकुरवोभीष्ममुख्याःकामानुगेनोपरुद्धांव्रजंतीम् ॥ ३७॥

श्वर्यैनृशंसश्चौरकल्पोराजाविधिप्रकोपात्दैवप्रातिकूल्यात्गृध्येत्ततोहेतोःराज्ञांपरस्परंयुद्धंसमभवत् अनेनयुद्धाख्यस्यकर्मणउत्पत्तिरुक्ता ॥ २९ ॥ कर्मयुद्धम् तत्रोत्पत्तिशिष्टंगुणत्रयमाह वर्मकवचम् शस्त्रंखड्गादिधनुश्चेति यतइंद्रेणदस्युवधायैतत्त्रयंउत्पादितमतएनैरेवधर्मोदस्युंदुर्योधनंयदिहन्यात्सएवधर्मइतिभावः ॥ ३० ॥ दुर्योधनेदस्युत्वंनिरूपयति तत्रेत्यादिना कुरुभिर्निमित्तभूतैरयंदोषःवंचनारूपःप्रादुर्भूतःपारदार्यदोषइवइंद्रात् ॥ ३१ ॥ धर्म्यंधर्मादागतंपित्र्यंराज्यम् तदन्वयास्ततदनुसारिणः ॥ ३२ ॥ पृथक्कंस्तेनादन्यत्वम् ॥ ३३ ॥ एतंछलेनराज्यापहारम् निविष्टःवनवासादूर्ध्वंराज्यंप्राप्तमितिकौरवेषुन्यासरूपेणस्थितः तंभागंनःअस्माकंपरेकस्मात्आददीरन्गृहीतवंतः ॥ ३४ ॥ पदेपदनीयेअवश्यप्राप्तेभागेनिमित्ते ॥ ३५ ॥३६ ॥ कामानुगेनरजसाउपरुद्धांगृहकर्मतोनिरुद्धाम् पाठांतरेरजसाउपरुद्धंयथास्यात्तथाव्रजंतीम् ॥ ३७ ॥

॥ २३॥

तंदुःशासनंयच्चवारयिष्यत्तदाममप्रियंअकरिष्यत् अस्यपुत्राणांचदुर्योधनादीनांप्रियंकृतमभविष्यत् दुःशासनस्यानिवारणान्मत्प्रियस्याकरणाच्चतत्पुत्राणांनाशोभविष्यतीतित्त्वोक्तिः ॥ ३८ ॥ प्रातिलोम्यात्अक्रमेणश्वशुराणांमध्येकृष्णांसभांनिनायेतिसंबंधः किंचित्करुणंव्यपेक्ष्यदीनंयथास्यात्तथाकिंचिदालोच्येत्यर्थः क्षत्तुरन्यंनाथंरक्षितारंनअवाप ॥ ३९ ॥ कार्पण्यात्दैन्यात् ॥ ४० ॥ पांडवस्य

तंचेत्तदातेसकुमारवद्धाअवारयिष्यन्कुरवःसमेताः॥ ममप्रियंधृतराष्ट्रोऽकरिष्यत्पुत्राणांचकृतमस्याभविष्यत् ॥ ३८॥ दुःशासनःप्रातिलोम्यान्निनायसभामध्येश्वशुराणांचकृष्णाम्॥ सातत्रनीताकरुणंव्यपेक्ष्यनान्यंक्षत्तुर्नाथमवापकिंचित्॥ ३९॥ कार्पण्यादेवसहितास्तत्रभूपानाशक्नुवन्प्रतिवक्तुंसभायाम्॥ एकःक्षत्ताधर्म्यमर्थंब्रुवाणोधर्मबुद्ध्याप्रत्युवाचाल्पबुद्धिम् ॥ ४०॥ अबुद्धात्वंधर्ममेतंसभायामयेच्छसेपांडवस्योपदेष्टुम् ॥ कृष्णात्वेतत्कर्मचकारशुद्धंसुदुष्करंतत्रसभांसमेत्य॥ ४१॥ येनरुद्धात्पांडवानुज्जहारतथात्मानंनौरिवसागरौघात्॥ यत्राब्रवीत्सूतपुत्रःसभायांकृष्णांस्थितांश्वशुराणांसमीपे॥ ४२॥ नतेगतिर्विद्यतेयाज्ञसेनिप्रपद्यदासीधार्तराष्ट्रस्यवेश्म॥ पराजितास्तेपतयोनसंतिपतिंचान्यंभाविनित्वंवृणीष्व ॥ ४३ ॥ योवीभत्सोर्हृदयेप्रोतआसीदस्थिच्छिंदन्मर्मघातीसुघोरः॥ कर्णाच्छरोवाङ्मयस्तिग्मतेजाःप्रतिष्ठितोहृदयेफाल्गुनस्य ॥ ४४ ॥ कृष्णाजिनानिपरिधित्समानान्दुःशासनःकटुकान्यभाषत्॥ एतेसर्वेषंढतिलाविनष्टाःक्षयंगतानरकंदीर्घकालम्॥४५॥ गांधारराजःशकुनिर्निकृत्यायदब्रवीद्द्यूतकालेसपार्थम्॥ पराजितोनंदनःकिंतवास्तिकृष्णयात्वंदीव्यवैयाज्ञसेन्या॥ ४६ ॥ जानासित्वंसंजयसर्वमेतद्द्यूतेवाक्यंगर्त्यमेवंयथोक्तम् ॥ स्वयंत्वहंप्रार्थयेतत्रगंतुंसमाधातुंकार्यमेतद्विपन्नम् ॥ ४७ ॥ अहापयित्वायदिपांडवार्थंशमंकुरूणामपिचेच्छकेयम् ॥ पुण्यंचमेस्याच्चरितंमहोदयंमुच्येरंश्चकुरवोमृत्युपाशात्॥ ४८॥ अपिमेवाचंभाषमाणस्यकाव्यांधर्मार्थसामामर्थवतीमहिंसाम्॥ अवेक्षेरन्धार्तराष्ट्राःसमक्षंमांचप्राभंकुरवःपूजयेयुः॥ ४९ ॥ अतोन्यथारथिनाफाल्गुनेनभीमेनचैवाहवदंशितेन ॥परासिक्तान्धार्तराष्ट्रांश्चविद्धिप्रदत्यमानान्कर्मणास्वेनपापान्॥ ५०॥ पराजितान्पांडवेयांस्तुवाचोरौद्रारूक्षाभाषतेधार्तराष्ट्रः ॥ गदाहस्तोभीमसेनोऽप्रमत्तोदुर्योधनंस्मारयिताहिकाले॥ ५१॥ सुयोधनोमन्युमयोमहाद्रुमःस्कंधःकर्णःशकुनिस्तस्यशाखा॥ दुःशासनःपुष्पफलेसमृद्धेमूलंराजाधृतराष्ट्रोमनीषी॥ ५२॥

धर्मंउपदेष्टुंइच्छसे हेसंजयेतिशेषः ॥ ४१ ॥ ४२ ॥ प्रपद्यगच्छ ॥ ४३ ॥ ४४ ॥ परिधित्समानान्परिधातुमिच्छतः॥ ४५ ॥ नंदनआनंदयिताकनिष्ठभ्राता ॥ ४६ ॥ विपन्नंनष्टंसमाधातुंसमीकर्तुं ॥४७॥ शकेयंशक्तश्चेत्स्याम् ॥ ४८ ॥ काव्यांशौक्रीम् नीतियुक्तामित्यर्थः ॥ ४९ ॥ परासिक्तान्निर्धूतान्संपदाहीनान् ॥ ५० ॥ रौद्राःमर्मच्छिदः रूक्षाःनिःस्नेहाः भाषतेद्यूतावसानेऽभाषत ॥ ५१ ॥ ५२ ॥

अहंईश्वरः ब्रह्मवेदब्राह्मणाश्च धार्तराष्ट्रोच्छेदेएकोधृतराष्ट्रएवशोच्योभवेत् पांडवोच्छेदेतुवयंचयोपिशोच्याभविष्यामइतिश्लोकद्वयस्यार्थः बहूनामुच्छेदोनभविष्यतीतितात्पर्यं ॥ ५३ ॥ ५४ ॥ ५५ ॥ लतेति पांडवाश्रयेणैवधार्तराष्ट्राणांजीवनंनान्ययेतिभावः ॥ ५६ ॥ ५७ ॥ ५८ ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेएकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ ७ ॥ ॥ अग्निषंगात्आवेशात् ॥

युधिष्ठिरोधर्ममयोमहाद्रुमःस्कंधोर्जुनोभीमसेनोस्यशाखा ॥ माद्रीपुत्रौपुष्पफलेसमृद्धेमूलंत्वहंब्रह्मचब्राह्मणाश्च ॥ वनंराजाधृतराष्ट्रःसपुत्रोव्याघ्रास्तवैसंजयपांडुपुत्राः ॥ ५३ ॥ मावनंछिंधिसव्याघ्रंमाव्याघ्रानीनशन्वनात् ॥ ५४ ॥ निर्वनोवध्यतेव्याघ्रोनिर्व्याघ्रंछिद्यतेवनम् ॥ तस्माद्व्याघ्रोवनंरक्षेद्वनंव्याघ्रंचपालयेत् ॥ ५५ ॥ लताधर्माधार्तराष्ट्राःशालाःसंजयपांडवाः ॥ नलतावर्धतेजातुमहाद्रुममनाश्रिता ॥ ५६ ॥ स्थिताःश्रुश्रूषितुंपार्थाःस्थितायोद्रुमरिंदमाः ॥ यत्कृत्यंधृतराष्ट्रस्यतत्करोतुनराधिपः ॥ ५७ ॥ स्थिताःशमेमहात्मानःपांडवाधर्मचारिणः ॥ योधाःसमर्थास्तद्विद्वन्नाचक्षीथायथातथम् ॥ ५८ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिसंजययानपर्वणिकृष्णवाक्येएकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ ७ ॥ ॥ संजयउवाच ॥ ॥ आमंत्रयेत्वांनरदेवदेवगच्छाम्यहंपांडवस्वस्तितेस्तु ॥ कच्चिन्नवाचाह्यजिनंहिकिंचिदुच्चारितंमेमनसोभिषंगात् ॥ १ ॥ जनार्दनंभीमसेनार्जुनौचमाद्रीसुतौसात्यकिंचेकितानम् ॥ आमंत्र्यगच्छामिशिवंसुखंवःसौम्येनमांपश्यतचक्षुषानृपाः ॥ २ ॥ ॥ युधिष्ठिरउवाच ॥ ॥ अनुज्ञातःसंजयस्वस्तिगच्छननःस्मरस्यप्रियंजातुविद्वन् ॥ विद्यश्चत्वांतेचवयंचसर्वेशुद्धात्मानंमध्यगतंसभास्थम् ॥ ३ ॥ आसोदूतःसंजयसुप्रियोसिकल्याणवाक्शीलवांस्तत्रमांश्च ॥ नमुद्येस्वंसंजयजातुमत्यानचक्रुद्धेरुच्यमानोदुरुक्तैः ॥ ४ ॥ नमर्मगांजातुवक्तासिरूक्षांनोपश्रुतिंकटुकांनोतमुक्ताम् ॥ धर्मारामामर्थवतीमहिंस्रामेतांवाचंतवजानीमसूत ॥ ५ ॥ त्वमेवनःप्रियतमोसिदूतइहागच्छेद्विदुरोवाद्वितीयः ॥ अभीक्ष्णदृष्टोसिपुराहिनस्त्वंधनंजयस्यात्मसमःसखासि ॥ ६ ॥ इतोगत्वासंजयक्षिप्रमेवउपातिष्ठेथाब्राह्मणान्येतदर्हाः ॥ विशुद्धवीर्याश्चरणोपपन्नाःकुलेजाताःसर्वधर्मोपपन्नाः ॥ ७ ॥ स्वाध्यायिनोब्राह्मणाभिक्षवश्चतपस्विनोयेचनित्यावनेषु ॥ अभिवाद्यावैमद्वचनेनवृद्धास्तेषांरेषांकुशलंवदेथाः ॥ ८ ॥ पुरोहितंधृतराष्ट्रस्यराज्ञस्तथाचार्यानृत्विजोयेचतस्य ॥ तैश्चत्वंतातसहितैर्यथार्हंसंगच्छेथाःकुशलनैवसूत ॥ ९ ॥ अश्रोत्रियायेचवसंतिवृद्धामनस्विनःशीलवंतोपपन्नाः ॥ आशंसंतोस्माकमनुस्मरंतोयथाशक्तिधर्ममात्रांचरंतः ॥ १० ॥

॥ २४ ॥

॥ १ ॥ २ ॥ ३ ॥ ४ ॥ उपश्रुतिंवार्तांरूक्षांन्नर्मगांचनोवक्तासि कटुकांनीरसांमुक्तांप्रकृतांकार्यहीनांवा ॥ ५ ॥ ६ ॥ चरणंब्रह्मचर्येणाध्ययनम् ॥ ७ ॥ ८ ॥ ९ ॥ अश्रोत्रियाःअत्रैवर्णिकाःशूद्रादयः वृद्धत्वाद्धर्ममात्रांधर्मलेशंचरंतः ॥ १० ॥

श्लाघस्वतुहिपूर्वं जघन्यंपश्चात्तेभ्यस्तेषांअनामयंपृच्छेः व्यवहारेणवाणिज्यादिनापालयंतःस्थानाधिकारिणः ॥ ११ ॥ चतुष्पात्मंत्रउपचारःप्रयोगःसंहारश्चेतिचत्वारःपादाअस्येतिअश्वम् ॥ १२ ॥ गंधर्वैतिसौंदर्यसंगीतंचतस्मिन्नुद्योतितम् ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ पांडवायोधनायपांडवैःसहयुद्धाय तथावंत्याइत्यपिपाठः ॥ २३ ॥ २४ ॥ २५ ॥ वंदारकंश्रेष्ठम् ॥ २७ ॥

श्लाघस्वमांकुशलिनंस्मतेभ्योत्यनामयंतातपृच्छेर्जघन्यम् ॥ येजीवंतिव्यवहारेणराष्ट्रेयेपालयंतोनिवसंतिराष्ट्रे ॥ ११ ॥ आचार्यइष्टोनयगोविधेयोवेदानधीष्वसन्ब्रह्मचर्यंचचार ॥ योस्रंचतुष्पात्पुनरेवचक्रेद्रोणःप्रसन्नोभिवाद्यस्त्वयासौ ॥ १२ ॥ अधीतविद्यश्चरणोपपन्नोयोस्रंचतुष्पात्पुनरेवचक्रे ॥ गंधर्वपुत्रप्रतिमंतरस्विनंतमश्वत्थामानंकुशलंस्मपृच्छेः ॥ १३ ॥ शारद्वंतस्यावसथंस्मगत्वामहारथस्यात्मविदांवरस्य ॥ त्वंमामभीक्ष्णंपरिकीर्तयन्वैकृपस्यपादौसंजयपाणिनास्पृशेः ॥ १४ ॥ यस्मिन्शौर्यमानृशंस्यंतपश्चप्रज्ञाशीलंश्रुतिसत्वेधृतिश्च ॥ पादौगृहीत्वाकुरुसत्तमस्यभीष्मस्यमांतन्निवेदयेथाः ॥ १५ ॥ प्रज्ञाचक्षुर्यःप्रणेताकुरूणांबहुश्रुतोवृद्धसेवीमनीषी ॥ तस्मैराज्ञेस्थविरायाभिवाद्यआचक्षीथाःसंजयमामरोगम् ॥ १६ ॥ ज्येष्ठःपुत्रोधृतराष्ट्रस्यमंदोमूर्खःशठःसंजयपापशीलः ॥ प्रशास्तावैपृथिवीयेनसर्वासुयोधनंकुशलंतातपृच्छेः ॥ १७ ॥ भ्राताकनीयानपितस्यमंदस्तथाशीलःसंजयसापिशश्वत् ॥ महेष्वासःशूरतमःकुरूणांदुःशासनःकुशलंतातवाच्यः ॥ १८ ॥ यस्यकामोवर्ततेनित्यमेवनान्यच्छमाद्भारतानामितिस्म ॥ सबाह्लिकानामृषभोमनीषीत्वयाभिवाद्यःसंजयसाधुशीलः ॥ १९ ॥ गुणैरनेकैःप्रवरैश्चयुक्तोविज्ञानवान्नैवचनिष्ठुरोयः ॥ स्नेहादमर्षंसहतेसदैवससोमदत्तःपूजनीयोमतोमे ॥ २० ॥ अर्हत्तमःकुरुषुसौमदत्तिःसनोभ्रातासंजयमत्सखाच ॥ महेष्वासोरथिनामुत्तमोर्हःसहामात्यःकुशलंतस्यपृच्छेः ॥ २१ ॥ येचैवान्येकुरुमुख्यायुवानःपुत्राःपौत्राभ्रातरश्चैवयेनः ॥ यंयमेषांमन्यसेयेनयोग्यंतत्तत्प्रोच्यानामयंसूतवाच्याः ॥ २२ ॥ येराजानःपांडवायोधनायसमानीताधार्तराष्ट्रेणकेचित् ॥ वशातयःशाल्वकाःकेकयाश्चतथांबष्ठायेत्रिगर्ताश्चमुख्याः ॥ २३ ॥ प्राच्योदीच्यादाक्षिणात्याश्चशूरास्तथाप्रतीच्याःपार्वतीयाश्चसर्वे ॥ अनृशंसाःशीलवृत्तोपपन्नास्तेषांसर्वेषांकुशलंसूतपृच्छेः ॥ २४ ॥ हस्त्यारोहारथिनःसादिनश्चपदातयश्चार्यसंघामहांतः ॥ आख्यायमांकुशलिनंस्मनित्यमनामयंपरिपृच्छेःसमग्रान् ॥ २५ ॥ तथाराज्ञोत्यर्थयुक्तानमात्यान्दौवारिकानूयेचसेनानंयंति ॥ आयव्ययंयेगणयंतिनित्यमर्थांश्चयेमहतश्चिंतयंति ॥ २६ ॥ वंदारकंकुरुमध्येष्वमूढंमहाप्रज्ञंसर्वधर्मोपपन्नम् ॥ नंतस्ययुद्धंरोचतेवैकदाचिद्वैश्यापुत्रंकुशलंतातपृच्छेः ॥ २७ ॥

निकर्तनेऽर्थापहारेसाध्ये प्रथमांतपाठेऽर्थापहर्ता छन्नोपधोगुप्तच्छलः॥२८॥२९॥मुंजतांधार्तराष्ट्राणाम् ॥३०॥३१॥ ३२॥ ३३॥ नइतिधार्तराष्ट्रान्अंतर्भाव्योक्तं तेषांभायांइत्यर्थः सुसंगुप्ताइतिकुशलप्रश्न प्रकारकथनम्॥३४॥३५॥३६॥३७॥लघुशीघ्रहारि वेशस्त्रियोवेश्याः॥३८॥३९॥ आनृशंस्यंवदमार्हतीत्यानृशंस्यः ॥ ४० ॥ ४१ ॥ शत्रून्धार्तराष्ट्रान्निगृह्णवःयुष्मान्भरिष्येपोषयिष्येइतिब्रूयाइतिशेषः

॥ २५ ॥

निकर्तनेदेवनेयोऽद्वितीयश्छन्नोपधःसाधुदेवीमतांक्षः॥योदुर्जयोदेवरथेनसंख्येसचित्रसेनःकुशलंतातवाच्यः॥ २८ ॥ गांधारराजःशकुनिःपार्वतीयोनिकर्तनीयोऽद्वितीयोऽक्षदेवी॥मानंकुर्वन्यार्तराष्ट्रस्यसूतमिथ्याबुद्धेःकुशलंतातपृच्छेः॥२९॥ यःपांडवानेकरथेनवीरःसंमुत्सहत्यप्रधृष्यान्विजेतुम्॥योमुह्यतांमोहयितादितीयोवैकर्तनःकुशलंतस्यपृच्छेः॥३०॥सएवभक्तःसगुरुःसभर्तासवैपितासचमातासुदृच्च॥ अगाधबुद्धिर्विदुरोदीर्घदर्शीसनोमंत्रीकुशलंतंसंपृच्छेः॥ ३१ ॥ वृद्धाःस्त्रियोयाश्चगुणोपपन्नाज्ञायंतेनःसंजयमातरस्ताः॥ताभिःसर्वाभिःसहिताभिःसमेत्यस्त्रीभिःसवृद्धाभिरभिवादंवदेथाः॥ ३२ ॥ कच्चित्पुत्राजीवपुत्राःसुसम्यग्वर्ततेवोवृत्तिमनृशंसरूपाः॥ इतिस्मोक्तासंजयब्रूहिपश्चादजातशत्रुःकुशलीसपुत्रः॥ ३३॥ यानोभार्याःसंजयवेत्थतत्रतासांसर्वासांकुशलंतातपृच्छेः॥सुसंगुप्ताःसुरभयोनवद्याःकच्चिद्गृहानावसथाप्रमत्ताः॥ ३४॥ कच्चिद्वृत्तिश्वशुरेषुभद्राःकल्याणीर्वर्तध्वमनृशंसरूपाम्॥यथाचवःस्युःपतयोऽनुकूलास्तथावृत्तिमात्मनःस्थापयध्वम् ॥३५॥ यानःस्नुषाःसंजयवेत्थतत्रप्राप्ताःकुलेभ्यश्चगुणोपपन्नाः॥ प्रजावत्योबूहिसमेत्यनाश्चयुधिष्ठिरोवोभ्यवदत्प्रसन्नः॥ ३६ ॥ कन्याःस्वजेथाःसदनेषुसंजयअनामयंमद्वचनेनपृष्ट्वा ॥ कल्याणावःसंतुपतयोनुकूलायूयंपतीनांभवतानुकूलाः॥ ३७॥ अलंकृतावस्त्रवत्यःसुगंधाअबीभत्साःसुखिताभोगवत्यः॥ लघुयासांदर्शनंवाकलध्वीवेशस्त्रियःकुशलंतातपृच्छेः ॥ ३८ ॥ दास्यःस्युर्यायेचदासाःकुरूणांतदाश्रयाबहवःकुब्जखंजाः॥ आख्यायमांकुशलिनंस्मतेभ्योप्यनामयंपरिपृच्छेर्जघन्यम्॥३९॥कच्चिद्वृत्तिर्वर्ततेवैपुराणींकच्चिद्भोगान्धार्तराष्ट्रोददाति॥अंगहीनान्रुपणान्वामनान्वायानानृशंस्योधृतराष्ट्रोबिभर्ति॥४०॥अंधांश्चसर्वान्स्थविरांस्तथैवहस्त्याजीवाबहवोयेत्रसंति॥ आख्यायमांकुशलिनंस्मतेभ्योप्यनामयंपरिपृच्छेर्जघन्यं॥४१ माभैष्टदुःखेनकुजीवितेननूनंकृतंपरलोकेषुपापम्॥ निगृह्यशत्रून्सुहृदोनुगृह्यवासोभिरन्नेनचवोभरिष्ये॥४२॥संत्येवमेब्राह्मणेभ्यःकृतानिभावीन्यथोनोबतवर्तयंति॥तान्यस्यामियुक्तरूपांस्तथैवतामेवसिद्धिंश्रावयेथानृपंतम्॥४३॥ ॥ ४२ ॥ संतीति मेमयाकृतानिवत्सरदेयानिनोवर्तयंतिनचालयंतित्वदीयाअधिकारिणःतान्यहंय

॥ २५ ॥

थायथावत्प्रयामितथैवतांसिद्धित्वद्वत्तंसम्यक्परिपालयामीतिदूतद्वारामांश्रावयेथाइतितंनृपंदुर्योधनंब्रूहीतिशेषः एतेनब्राह्मणवृत्तिषुपक्षपातोदुर्योधनेचकनिष्ठत्वादाज्ञाप्रतिपालनौचित्यंचदर्शितम् ॥४२

आत्मन्येवप्रयतंतेनतुकर्तुंशक्नुवंति ॥ ४४ ॥ ४५ ॥ ४६ ॥ नहीति धर्मबलेनैवजयोभविष्यतिनसहायैरित्यर्थः नित्यःअविनाशिफलः ॥ ४७ ॥४८ ॥ युक्तिःसंभावनाएतस्यार्थस्यनविद्यते शक्रपुरींइंद्रप्रस्थम् ॥ ४९ ॥ ॥ इतिउद्योगपर्वणिनैलकंठीयेभारतभावदीपेत्रिंशोऽध्यायः ॥ ३० ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ संतंसाधुम् असंतंदुष्टम् धाताईश्वरः ॥ १ ॥ शुक्रंबीजभूतंप्राचीनंकर्मउच्चरन्उद्गीपयन् ॥२॥

येचानायादुर्बलाःसर्वकालमात्मन्येवप्रयतंतेयमूढाः॥ तांश्चापित्वंरुपणान्सर्वथैवास्मद्वाक्यात्कुशलंतातपृच्छेः॥४४॥ येचाप्यन्येसंश्रिताधार्तराष्ट्रान्नानादिग्भ्योभ्यागताःसूतपुत्र॥ दृष्ट्वातांश्चैवार्हतश्चापिसर्वान्संपृच्छेथाःकुशलंचाव्ययंच ॥ ४५ ॥ एवंसर्वानागताभ्यागतांश्चराज्ञोदूतान्सर्वदिग्भ्योभ्युपेतान्॥ पृष्ट्वासर्वान्कुशलंतांश्चसूतपश्चादहंकुशलीतेषुवाच्यः॥ ४६॥ नहीदृशाःसंत्यपरेपृथिव्यांयेयोधकाधार्तराष्ट्रेणलब्धाः ॥ धर्मस्तुनित्योममधर्मएवमहाबलःशत्रुनिबर्हणाय॥४७॥इदंपुनर्वचनंधार्तराष्ट्रंसुयोधनंसंजयश्रावयेथाः॥यस्तेशरीरेहृदयंदुनोतिकामःकुरूनसपत्नोनुशिष्याम्॥४८॥नविद्यतेयुक्तिरेतस्यकाचिन्नैवंविधाःस्मामयथाप्रियंते ॥ ददस्वाशक्रपुरींममैवयुध्यस्वाभारतमुख्यवीर ॥ ४९ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिसंजययानपर्वणियुधिष्ठिरसंदेशे त्रिंशोऽध्यायः॥ ३० ॥ ॥ ७ ॥ ॥ युधिष्ठिरउवाच ॥ ॥ उतसंतमसंतंवाबालंवृद्धंचसंजय॥ उताबलंबलीयांसंधाताप्रकुरुतेवशे॥ १ ॥ उतबालायपांडित्यंपंडितायोतबालताम्॥ददातिसर्वमीशानःपुरस्ताच्छुक्रमुच्चरन्॥ २ ॥ बलंजिज्ञासमानस्यआचक्षीथायथातथम्॥ अथमंत्रंमंत्रयित्वायाथातथ्येनदृष्टवत्॥३॥गावल्गणेकुरून्गत्वाधृतराष्ट्रंमहाबलम्॥ अभिवाद्योपसंगृह्यततःपृच्छेरनामयम्॥४॥ ब्रूयाश्चैनंत्वमासीनंकुरुभिःपरिवारितम्॥तवैवराजन्वीर्येणसुखंजीवंतिपांडवाः॥५॥ तवप्रसादाद्बालास्तेप्राप्ताराज्यमरिंदम॥राज्येतान्स्थापयित्वाग्रतोपेक्षस्वविनश्यतः॥६॥ सर्वमप्येतदेकस्यनालंसंजयकस्यचित्॥तातसंहत्यजीवामोद्विषतांमावशंगमः॥७॥तथाभीष्मंशांतनवंभारतानांपितामहम्॥शिरसाभिवदेथास्त्वंममनामप्रकीर्तयन्॥८॥ अभिवाद्यचवक्तव्यस्ततोस्माकंपितामहः॥ भवताशांतनोर्वंशोनिमग्नःपुनरुद्धृतः॥ ९॥ सत्वंकुरुतथातातस्वमतेनपितामह॥यथाजीवंतितेपौत्राःप्रीतिमंतःपरस्परम्॥ १० ॥ तथैवविदुरंब्रूयाःकुरूणांमंत्रधारिणम्॥अयुद्धंसौम्यभाषस्वहितकामोयुधिष्ठिरे॥ ११॥अथदुर्योधनंब्रूयाराजपुत्रममर्षणम्॥ मध्येकुरूणांमासीनमनुनीयपुनःपुनः॥ १२॥ अपापांयदुपैक्षस्त्वंकृष्णामेतांसभागताम्॥ तदुःखमतितिक्षाममावधीष्मकुरूनिति॥ १३॥

॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ सर्वत्रब्रह्मांडम् संहत्यएकीभूय ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ अतितिक्षामक्षांतवंतोवयम् तत्रहेतुः मावधीष्मेति ॥ १३ ॥

॥ १४ ॥ १५ ॥ १६ ॥ गृद्धांलुब्धाम् ॥ १७ ॥ १८ ॥ अवसानंवसतिस्थानम् ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ ॥ इतिउद्योगपर्वणिनैलकंठीयेभारतभावदीपेएकत्रिंशोऽध्यायः ॥ ३१ ॥ ७ ॥

एवंपूर्वापरान्क्लेशानतितिक्षंतपांडवाः ॥ बलीयांसोपिसंतोयत्तत्सर्वंकुरवोविदुः ॥ १४ ॥ यन्नःप्रव्राजयेःसौम्यअजिनैःप्रतिवासितान् ॥ तद्दुःखमतितिक्षाम मावधीष्मकुरूनिति ॥ १५ ॥ यत्कुंतींसमतिक्रम्यकृष्णांकेशेष्वधर्षयत् ॥ दुःशासनस्तेनुमतेतच्चास्माभिरुपेक्षितम् ॥ १६ ॥ अथोचितंस्वकंभागंलभेमहिपरंतप ॥ निवर्तयपरद्रव्याद्बुद्धिंगृद्धांनरर्षभ ॥ १७ ॥ शांतिरेवंभवेद्राजन्प्रीतिश्चैवपरस्परम् ॥ राज्यैकदेशमपिनःप्रयच्छशममिच्छताम् ॥ १८ ॥ अविस्थलंवृकस्थलंमा कंदींवारणावतम् ॥ अवसानंभवत्वत्रकिंचिदेकंचपंचमम् ॥ १९ ॥ भ्रातॄणांदेहिपंचानांपंचग्रामान्सुयोधन ॥ शांतिर्नोस्तुमहाप्राज्ञज्ञातिभिःसहसंजय ॥ २० ॥ भ्राताभ्रातरमन्वेतुपितापुत्रेणयुज्यताम् ॥ स्मयमानाःसमायांतुपांचालाःकुरुभिःसह ॥ २१ ॥ अक्षतान्कुरुपांचालान्पश्येयमितिकामये ॥ सर्वेसुमनसस्तात शाम्यामभरतर्षभ ॥ २२ ॥ अलमेवशमायास्मितथायुद्धायसंजय ॥ धर्मार्थयोरलंचाहंमृदवेदारुणायच ॥ २३ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिसंजयया नपर्वणियुधिष्ठिरसंदेशेएकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ ७ ॥ ॥ वैशंपायनउवाच ॥ ॥ अनुज्ञातःपांडवेनप्रययौसंजयस्तदा ॥ शासनंधृतराष्ट्रस्यसर्वंकृत्वा महात्मनः ॥ १ ॥ संप्राप्यहास्तिनपुरंशीघ्रमेवप्रविश्यच ॥ अंतःपुरंसमास्थायद्वाःस्थंवचनमब्रवीत् ॥ २ ॥ आचक्ष्वधृतराष्ट्रायद्वाःस्थमांसमुपागतम् ॥ सकाशा त्पांडुपुत्राणांसंजयंमाचिरंकृथाः ॥ ३ ॥ जागर्तिचेदभिवदेस्त्वंहिद्वाःस्थप्रविशेयंविदितोभूमिपस्य ॥ निवेद्यमत्रात्ययिकंहिमेस्तिद्वाःस्थोथश्रुत्वानृपतिंजगाद ॥ ४ ॥ ॥ द्वाःस्थउवाच ॥ ॥ संजयोयंभूमिपतेनमस्तेदिदृक्षयाद्वारमुपागतस्ते ॥ प्राप्तोदूतःपांडवानांसकाशात्प्रशाधिराजन्किमयंकरोतु ॥ ५ ॥ ॥ धृतराष्ट्र उवाच ॥ ॥ आचक्ष्वमांकुशलिनंकल्पमस्मैप्रवेश्यतांस्वागतंसंजयाय ॥ नचाहमेतस्यभवाम्यकल्पःसमेकस्माद्वारितिष्ठेच्चसक्तः ॥ ६ ॥ ॥ वैशंपायनउवाच ततःप्रविश्यानुमतेनृपस्यमहद्वेश्मप्राज्ञशूरार्यगुप्तम् ॥ सिंहासनस्थंपार्थिवमाससादवैचित्रवीर्यंप्रांजलिःसूतपुत्रः ॥ ७ ॥ ॥ संजयउवाच ॥ ॥ संजयोहंभूमि पतेनमस्तेप्राप्तोस्मिगत्वानरदेवपांडवान् ॥ अभिवाद्यत्वांपांडुपुत्रोमनस्वीयुधिष्ठिरःकुशलंचान्वपृच्छत् ॥ ८ ॥ सतेपुत्रान्पृच्छतिप्रीयमाणःकच्चित्पुत्रैःप्रीयसेन प्तृभिश्च ॥ तथासुहृद्भिःसचिवैश्चराजन्येचापित्वामुपजीवंतितैश्च ॥ ९ ॥

अनुज्ञातःगच्छेत्युक्तः ॥ १ ॥ २ ॥ ३ ॥ आत्ययिकंआवश्यकम् ॥ ४ ॥ ५ ॥ कल्पंदृढम् अकल्पःदर्शनेअसमर्थःसक्तःनिरुद्धः ॥ ६ ॥ प्राज्ञाःशूराःआर्याःसाधवश्चतैर्गुप्तम् ॥ ७ ॥ ८ ॥ ना[illegible]तम्.

अजातशत्रुंसुखेनअभिनंद्यत्वांप्रतिवदामि कच्चिदिति ॥ १० ॥ तेतवअग्रेयत् आत्मनः पूर्वरूपमार्षं राज्यधनादिकंअभूत्तत्बुभूषतेप्राप्तुमिच्छतिअग्रेमनोभूदिति पाठेअनुद्यूतात्प्राक्यत्त्वयादत्तंतद्बुभूष तेइतिज्ञेयं निर्णिक्तौदोषमलहीनौधर्मार्थौकरोतीतिसतथा मनस्वीउदारः दृष्टिमान्क्रांतदर्शी ॥ ११ ॥ परोमुख्यः आनृशंस्यंदयाततःपरोऽमुख्यःवित्तचयात्जातइतिशेषःवित्तसाध्यःयज्ञदानादिः किंच तस्यबुद्धिःअनपार्थेनअपार्थेनिष्प्रयोजनेसप्रयोजनेसुखप्रिये संधिरार्षः नुनिश्चितंरुध्यतेअनुरुध्यते अन्नादिजंदेहपुष्टिसुखंपुत्रादिप्रियंचसपरोपकारार्थमेवानुरुध्यतेनकामकारेणेत्यर्थः पार्थइतिपाठे तस्यबुद्धिरित्युत्तराम्वयिइतीतिशेषः ॥ १२ ॥ परेणईश्वरेणप्रयुक्तःनियमंनिग्रहं मनुष्यात्मनुष्यकारात्दैवंऐश्वरंकर्मपरंश्रेष्ठंमन्ये ॥ १३ ॥ अवर्णरूपंअवर्णनीयरूपंअवाच्यमित्यर्थः यावत्परःउत्कृष्टः

धृतराष्ट्रउवाच ॥ ॥ अभिनंद्यत्वांतातवदामिसंजयअजातशत्रुंचसुखेनपार्थम् ॥ कच्चित्सराजाकुशलीसपुत्रःसहामात्यःसानुजःकौरवाणाम् ॥ १० ॥ संजय उवाच सहामात्यःकुशलीपांडुपुत्रोबुभूषतेयच्चतेऽग्रेत्वनोभूत् ॥ निर्णिक्तधर्मार्थकरोमनस्वीबहुश्रुतोदृष्टिमान्शीलवांश्च ॥ ११ ॥ परोधर्मात्पांडवस्यानृशंस्यंध र्मःपरोवित्तचयान्मतोस्य ॥ सुखप्रियेधर्महीनेऽनपार्थेनुरुध्यतेभारततस्यबुद्धिः ॥ १२ ॥ परप्रयुक्तःपुरुषोविचेष्टतेसूत्रप्रोतादारुमयीवयोषा ॥ इमंदृष्ट्वानियमं पांडवस्यमन्येपरंकर्मदैवंमनुष्यात् ॥ १३ ॥ इमंचदृष्ट्वातवकर्मदोषंपापोदर्कंघोरमवर्णरूपम् ॥ यावत्परःकामयतेतिवेलंतावन्नरोयंलभतेप्रशंसाम् ॥ १४ ॥ अजातशत्रुस्तुविहायपापंजीर्णांत्वचंसर्पइवासमर्थाम् ॥ विरोचतेऽहार्यवृत्तेनवीरोयुद्धिष्ठिरस्त्वयिपापंविसृज्य ॥ १५ ॥ हंतात्मनःकर्मनिबोधराजन्धर्मार्थयु क्तादार्यवृत्तादपेतम् ॥ उपक्रोशंचेहगतोसिराजन्भूयश्चपापंप्रसजेदमुत्र ॥ १६ ॥ सत्वमर्थंसंशयितंविनातैराशंससेपुत्रवशानुगोस्य ॥ अधर्मशब्दश्चमहान्पृ थिव्यांनेदंकर्मत्वत्समंभारताग्र्य ॥ १७ ॥ हीनप्रज्ञोदौष्कुलेयोनृशंसोदीर्घंवैरीक्षत्रविद्यास्वधीरः ॥ एवंधर्मानापदःसंश्रयेयुर्हीनवीर्योयश्चभवेदशिष्टः ॥ १८ ॥ कुलेजातोबलवान्योयशस्वीबहुश्रुतःसुखजीवीयतात्मा ॥ धर्माधर्मौग्रथितोयोबिभर्तिसह्यस्यदिष्टस्यवशादुपैति ॥ १९ ॥

शत्रुःकामयतेतिष्ठत्वयंकंचित्कालमितीच्छतितावदपरोनरःप्रशंसांलभते ॥ १४ ॥ जीर्णत्वादेवदेहेस्थातुमसमर्थां अहार्येणस्वाभाविकेनवृत्तेन योहिस्वस्वरूपेतिष्ठतितस्यपापंशत्रुष्वेवगच्छति तथाच श्रुतिः तस्यपुत्रादायमुपयंतिसुहृदःसाधुकृत्यांद्विषंतःपापकृत्यामिति ॥ १५ ॥ हंतआलोचनेसानुग्रहसंबोधनेवा उपक्रोशंनिंदां अमुत्रपरलोकेपापंदुःखंनरकमित्यर्थः ॥ १६ ॥ तैर्विनाएकाकिनासंश यितंदुर्लभमपिआशंससेप्राप्तुं अस्यतवमहान्पृथिव्यांअधर्मशब्दोऽकीर्तिर्भवेत् ॥ १७ ॥ एवंधर्मान्ईदृशधर्मयुक्तान्पुरुषान् ॥ १८ ॥ धर्माधर्मौसत्यानृते ग्रथितौसत्यंविनाऽनृतंनास्तिनिरधिष्ठानकभ्रमा संभवात् अनृतंदेहंविनाचसत्यंब्रह्मनप्रथतेअतउभयंयोधत्तेकेवलंबाह्यनिष्ठोनभवतिसहिसएवदिष्टस्यवशात्भाग्यवशात्अस्यकुलेजातत्वादिगुणजातस्य कर्मणिषष्ठी इदंगुणषट्कमुपैतिप्राप्नोतित्वंतुकुले जातोपिकेवलंअनृतोपजीवित्वात्गुणांतरहीनोसीतिभावः ॥ १९ ॥

अतएवसत्यामपिसंपदित्वयामौढ्यात्नृशंसंकृतमित्याह कथमिति मंत्रएवअभ्यःश्रेष्ठोयेषांतेमंत्राभ्याःभीष्मादयःतेषांधरोधर्ता तैरेवंउक्तरीत्यायूतंमाकुर्वित्युक्तःकथंनृशंसंकर्मपांडवप्रव्राजनंकुर्यान्नकथमपीत्यर्थः॥२०॥अमीकर्णादयःतेषांकुरुक्षयेकुरुक्षयनिमित्तंअयंराज्यंनदेयमितिनिश्चयःनियमेनउदपादिउत्पन्नः ॥२१॥ अकालिकंअकस्मादेवकुरवोनाभविष्यन्नष्टाःस्युश्चेत्तवपापेनकर्मणाप्रेरितो जातशत्रुःत्वयिपापंइच्छेत् नच्चेवंतर्हितस्यगोत्रवधदोषःस्यादित्याशंक्याह त्वयीति स्वनाशहेतुंअधर्मंकुर्वतित्वयिचोरेइवपापंनिंदांचविसृज्यराजानिष्पापोऽनिंद्यश्चस्यादित्यर्थः ॥२२॥ ईश्वराणांदेवानां विषयादन्यत्रकिं सर्वंदेवाधीनमित्यर्थः यत्रयतःपार्थोऽर्जुनःपरलोकंद्रष्टुंअत्यक्रामत्इमंलोकंसशरीरएवत्यक्तवान्सतादृशःनारदादिवदुभयलोकसंचारयोग्यत्वेनसाधूनांसंमतोप्रियदितथावनवासेनक्लेशस

कथंहिमंत्राभ्यधरोमनीषीधर्मार्थयोरापदिसंप्रणेता॥ एवमुक्ताःसर्वमंत्रैरहीनोनरोनृशंसंकर्मकुर्यादमूढः॥२०॥तवत्यमीमंत्रविदःसमेत्यसमासतैकर्मसुनित्ययुक्ताः॥तेषामयंबलवान्निश्चयश्चकुरुक्षयेनियमेनोदपादि॥ २१॥ अकालिकंकुरवोनाभविष्यन्पापेनचेत्पापमजातशत्रुः॥इच्छेज्जातुत्वयिपापंविसृज्य निंदाचेयंतवलोकेऽभविष्यत्॥ २२॥किमन्यत्रविषयादीश्वराणांयत्रपार्थःपरलोकंस्मद्रष्टुम्॥अत्यक्रामत्सतथासंमतःस्यान्नसंशयोनास्तिमनुष्यकारः॥२३॥ एतान्गुणान्कर्मकृतानवेक्ष्यभावाभावौवर्तमानावनित्यौ॥ बलिर्हिराजापारमविंदमानोनान्यत्कालात्कारणंतत्रमेने ॥२४॥ चक्षुःश्रोत्रेनासिकात्वक्चजिह्वाज्ञानस्यैतान्यायतनानिजंतोः ॥ तानिप्रीतान्येवतृष्णाक्षयांतेतान्यव्यथोदुःखहीनःप्रणुद्यात् ॥ २५॥ नत्वेवमन्येपुरुषस्यकर्मसंवर्ततेसुप्रयुक्तंयथावत् ॥ मातुःपितुःकर्मणाभिप्रसूतःसंवर्धतेविधिवद्भोजनेन ॥ २६॥ प्रियाप्रियेसुखदुःखेचराजन्निंदाप्रशंसेचभजंतएव ॥ परस्त्वेनंगर्हयतेपरार्धेप्रशंसतेसाधुवृत्तंतमेव॥ २७ ॥

हःस्यात्तदामनुष्यकारोनास्तीत्यस्मिन्नर्थेसंशयोन ॥ २३ ॥ एतानिति एतान्शौर्यादीन्गुणान्कर्मकृतान्कर्मानुसारेणवृद्धिह्रासयुक्तान्अवेक्ष्यअतएवभावाभावौऐश्वर्यानैश्वर्येअनित्यौआगमापायिनौ चअवेक्ष्यबलिराजापूर्वपूर्वकर्मकारणपारंअंतंअविंदमानःसन्कालात्ईश्वरादन्यत्कारणंअभ्युदयादिहेतुरन्यत्किंचिन्नास्तीतिमेने ॥ २४ ॥ अतःसर्वस्यदेवायत्तत्वात्तृष्णाक्षयेणैवइंद्रियप्रीतिःसंपादनीयाननुनानायत्नसाध्यतत्तद्विषयसमर्पणेनेत्याह चक्षुरिति ननुत्वत्त्वविषयालाभेतेषांकथंप्रीतिःस्यादित्याशंक्यतानिनिरोध्यान्येवेत्याह तानीति अन्यथःलाभालाभादौवैषम्यहीनः प्रणुद्यात्स्वस्वगोचरेभ्योनिवर्तयेत् ॥ २५ ॥ एतद्दूषयति नत्विति एवंप्राप्तेसतिअन्येआहुः तदेवाह पुरुषस्येति संवर्ततेसम्यक्फलवत्वर्तते तदेवाह मातुरिति कर्माभावेजन्मवृद्धीनस्यातामित्यर्थः पाठांतरेतेनैवस्यातामित्यर्थः ॥ २६ ॥ २७ ॥

किंच नोचेदिति इदंमयाउच्यमानंकर्मपांडवेभ्योराज्यांशप्रदानात्मकंतवनोचेत्संमतमितिशेषः तर्हितवापराधात्कृष्णवर्त्माग्निःकक्षंयथादहतिएवंकृष्णवर्त्माकृष्णएवमार्गइवसुखप्रापकोयस्यसकृष्णवर्त्मार्जुनःकुलंत्वदहेदित्याद्यत्त्यायोज्यम् ॥२८॥ श्लाघनःआत्मानंकृतार्थमन्वानःनागाःनगतवानसि ॥२९॥ अनात्मानांकर्णादीनां आत्मानंविदुरादीनां निग्रहात्दूरीकरणात् ॥३०॥ अवधूतस्तिरस्कृतःअत

सत्वांगर्हेभारतानांविरोधादंतोनूनंभवितायंप्रजानाम्॥ नोचेदिदंतवकर्मापराधात्कुरून्दहेत्कृष्णवर्त्मेवकक्षम्॥ २८ ॥ त्वमेवैकोजातुपुत्रस्यराजन्वशंगत्वासर्वलोकेनरेंद्र ॥ कामात्मनःश्लाघनोद्यूतकालेनागाःशमंपश्यविपाकमस्य॥ २९ ॥ अनात्मानांसंग्रहात्त्वंनरेंद्रतथात्मानांनिग्रहाच्चैवराजन् ॥ भूमिंरक्षीतांदुर्बलत्वादनंतामशक्तस्त्वंरक्षितुंकौरवेय ॥ ३० ॥ अनुज्ञातोरथवेगावधूतःश्रांतोऽभिपद्येशयनंनृसिंह ॥ प्रातःश्रोतारःकुरवःसभायामजातशत्रोर्वचनंसमेताः॥ ३१॥ धृतराष्ट्रउवाच ॥ अनुज्ञातोस्यावसथंपरेहिप्रपद्यस्वशयनंसूतपुत्र॥ प्रातः श्रोतारःकुरवःसभायामजातशत्रोर्वचनंत्वयोक्तम् ॥ ३२ ॥ इति श्रीमहाभारतेउद्योगपर्वणिसंजययानपर्वणिधृतराष्ट्रसंजयसंवादेद्वात्रिंशोऽध्यायः॥३२॥ ॥समाप्तंचेदंसंजययानपर्व॥ ॥७॥ ॥अतःपरंप्रजागरपर्व॥ वैशंपायनउवाच॥ ॥द्वाःस्थंप्राहमहाप्राज्ञोधृतराष्ट्रोमहीपतिः॥ विदुरंद्रष्टुमिच्छामितमिहानयमाचिरम्॥१॥ प्रहितोधृतराष्ट्रेणदूतःक्षत्तारमब्रवीत्॥ ईश्वरस्त्वांमहाराजोमहाप्राज्ञदिदृक्षति॥ २॥एवमुक्तस्तुविदुरःप्राप्यराजनिवेशनं ॥ अब्रवीद्धृतराष्ट्रायद्वाःस्थंमांप्रतिवेदय ॥ ३॥ द्वाःस्थउवाच ॥ विदुरोयमनुप्राप्तोराजेंद्रतवशासनात्॥ द्रष्टुमिच्छतितेपादौकिंकरोतुप्रशाधिमाम्॥ ४॥ ॥ धृतराष्ट्रउवाच॥ ॥प्रवेशयमहाप्रज्ञंविदुरंदीर्घदर्शिनम्॥ अहंहिविदुरस्यास्यनाकल्पोजातुदर्शने॥ ५॥ ॥द्वाःस्थउवाच॥ प्रविशांतःपुरंक्षत्तर्महाराजस्यधीमतः ॥ नहितेदर्शनेऽकल्पोजातुराजाब्रवीद्धिमाम् ॥ ६ ॥ वैशंपायनउवाच ॥ ततःप्रविश्यविदुरोधृतराष्ट्रनिवेशनम्॥ अब्रवीत्पांजलिर्वाक्यंचिंतयानंनराधिपम्॥७॥विदुरोहंमहाप्राज्ञसंप्राप्तस्तवशासनात्॥ यदिकिंचनकर्तव्यमयमस्मिप्रशाधिमाम्॥ ८॥ धृतराष्ट्रउवाच॥ ॥संजयोविदुरप्राप्तोगर्हयित्वाचमांगतः॥ अजातशत्रोःश्रोवाक्यंसभामध्येसवक्ष्यति॥ ९॥ तस्याद्यकुरुवीरस्यनविज्ञातंवचोमया॥तन्मेदहतिगात्राणितदकार्षीत्प्रजागरम्॥१०॥ जाग्रतोदत्यमानस्यश्रेयोयदनुपश्यसि॥ तंब्रूहित्वंहिनस्तातधर्मार्थकुशलोत्यसि॥ ११॥

एवश्रांतःप्रपद्येप्रामुपायाम्॥३१॥ आवसथंगृहं परेहिगच्छ प्रपद्यस्वसेवस्व ॥३२॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेद्वात्रिंशोऽध्यायः ॥ ३२॥ ॥७॥ ॥ १ ॥२ ॥ ३ ॥ ४ ॥ अकल्पोनकिंतुकल्पःसमर्थएव सर्वदाविदुरसंदर्शनंममअप्रत्याख्येयमित्यर्थः जातुकदाचित् अथवाकल्पःकल्पनासंशयइत्यर्थः ॥ ५॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ प्रजागरंनिद्रायाअभावम् ॥ १० ॥ ११ ॥

यतःयदाप्राप्तःसंजयस्तादारभ्येत्यर्थः प्रचिंताप्रकृष्टाचिंता ॥ १२ ॥ अभियुक्तमित्यर्धोपात्तएकःश्लोकोन्येचप्रजागरावेशभाजनानि ॥ १३ ॥ गृद्धान्लिप्सावान् ॥ १४ ॥ १५ ॥ क्वचित्पुस्तकांतरेस्थितस्य मूलस्यठिप्पणं प्रेष्यःप्रकर्षेणएषणीयःप्रार्थ्यइतियावत् तेत्वयाप्रेषितोवनमितिशेषः॥१॥विपरीतःराजलक्षणहीनः सर्वेषाद्विष्यः भागधेयेराज्यांशे अर्चिषांनेत्ररश्मीनांप्रक्षयात् नसंमतस्त्वंधर्मात्मापिसन्नि तिउपहासः अथवाभागधेयेनराज्यभागित्वेनहेतुनापिसंमतइत्यप्युपहासएव ॥२॥ आनृशंस्यात्क्रूरत्वाभावात् अनुक्रोशात्दयालुत्वात् तितिक्षतेयुधिष्ठिरइतिशेषः ॥ ३ ॥ एतेष्विति एतेषामधीनोभूत्वे त्यर्थः ॥४॥ एतेषुपांडित्यंनास्तीतिबक्तुंपंडितलक्षणान्याह आत्मज्ञानमित्यादिना आत्मज्ञानंशास्त्रीयापेक्षं समारंभःशक्त्यपेक्षः तितिक्षाधैराग्यापेक्षा धर्मनित्यताश्रद्धापेक्षा एतानिअयथाभूतानिमूढानपु

यतःप्राप्तःसंजयःपांडवेभ्योनमेयथावन्मनसःप्रशांतिः ॥ सर्वेंद्रियाण्यप्रकृतिंगतानिकिंवक्ष्यतीत्येवमेऽद्यप्रचिंता ॥ १२ ॥ ॥ विदुरउवाच ॥ ॥ अभियुक्तंब लवतादुर्बलंहीनसाधनम्॥तंतस्वंकामिनंचोरमाविशंतिप्रजागराः॥१३॥ कच्चिदेतैर्महादोषैर्नस्पृष्टोसिनराधिप॥कच्चिच्चपरवित्तेषुगृद्ध्यान्नपरितप्यसे॥१४॥ धृतराष्ट्रउवाच ॥ ॥ श्रोतुमिच्छामितेध्यर्म्यंपरंनैश्रेयसंवचः॥ अस्मिन्राजर्षिवंशेहित्वमेकःप्राज्ञसंमतः॥ १५॥ ॥(विदुरउवाच ॥ ॥ राजालक्षणसंपन्नस्त्रै लोक्यस्याधिपोभवेत्॥प्रेष्यस्तेप्रेषितश्चैवधृतराष्ट्रयुधिष्ठिरः॥१॥ विपरीततरश्चत्वंभागधेयेनसंमतः॥ अर्चिषांप्रक्षयाच्चैवधर्मात्माधर्मकोविदः॥ २॥आनृशं स्यादनुक्रोशाद्धर्मात्सत्यात्पराक्रमात्॥ गुरुत्वात्त्वयिसंप्रेक्ष्यबहून्क्लेशांस्तितिक्षते ॥३॥दुर्योधनेसौबलेचकर्णेदुःशासनेतथा॥ एतेष्वैश्वर्यमाधायकथंत्वंभूति मिच्छसि॥ ४॥ आत्मज्ञानंसमारंभस्तितिक्षाधर्मनित्यता॥ यमर्थान्नापकर्षंतिसवैपंडितउच्यते॥५॥)निषेवतेप्रशस्तानिनिंदितानिनसेवते॥अनास्तिकःश्र द्दधानएतत्पंडितलक्षणम्॥ १६॥ क्रोधोहर्षश्चदर्पश्चह्रीस्तंभोमान्यमानिता॥ यमर्थान्नापकर्षंतिसवैपंडितउच्यते ॥ १७॥ यस्यकृत्यंनजानंतिमंत्रंवामंत्रितं परे॥ कृतमेवास्यजानंतिसवैपंडितउच्यते॥ १८ ॥ यस्यकृत्यंनविघ्नंतिशीतमुष्णंभयंरतिः ॥ समृद्धिरसमृद्धिर्वासवैपंडितउच्यते॥ १९॥ यस्यसंसारिणीप्रज्ञा धर्मार्थावनुवर्तते॥ कामादर्थंवृणीतेयःसवैपंडितउच्यते॥ २०॥

रुषार्थात्भंशयंतिनतुपंडितानित्यर्थः ॥ ५ ॥ अनास्तिकःपरलोकास्तीतिजानन् श्रद्दधानःश्रद्धागुरुवेदवाक्यादिषुफलावश्यंभावनिश्चयस्तद्वान् ॥ १६ ॥ दर्पःपरावज्ञानं स्तंभःअसन्नतिः मान्यमानिता मान्यंमानार्हंआत्मानंमन्यतइतिमान्यमानीतस्यभावस्तत्ता ॥ १७ ॥ १८ ॥ १९ ॥ संसारिणीत्वभावतोऽनवस्थितापिकामात्ऐहिकसुखात्उभयलोकसुखावहंधर्ममर्थंवृणीतेसपंडितः कामोधर्मार्थापे क्षयानिकृष्टइत्यर्थः कामादिति यस्तुकामंत्यक्त्वाअर्थंवृणीतेसःअर्थार्थीमोक्षादेवसर्वंअर्थीवदतिज्ञानफलेमोक्षेकृत्स्नस्यार्थस्यांतर्भावात्सजनकादितुल्यःअतःपंडितउच्यते ॥ २० ॥

॥ २८ ॥

॥ २१ ॥ चिरंशृणोतिज्ञानदाढ्यार्थं असंपृष्टःयथावदृपृष्टः व्युपयुंक्तेवाग्व्यर्थंकरोति परार्थेविषयेप्रज्ञानंचिह्नम् ॥२२॥२३॥ निश्चित्यस्वयंसाध्यत्वं कर्मणःअंतर्ध्येनवसतिनोपरभर्तृकिंतुसमापयत्येव अवंध्यकालःसर्वदाप्रयोजनमेवकर्माचरन् ॥ २४ ॥ आर्याःशिष्टाःतद्योग्यकर्मणि भूतिरैश्वर्यंतत्प्राप्त्यर्थंकर्माणि ॥ २५॥२६ ॥ तत्त्वंविनाशित्वं भूतानांजातानामैश्वर्यादीनां योगोरचनाप्रकारः उपाय

यथाशक्तिचिकीर्षतियथाशक्तिचकुर्वते॥ नकिंचिदवमन्यतेनराःपंडितबुद्धयः॥ २१ ॥ क्षिप्रंविजानातिचिरंशृणोतिविज्ञायचार्थंभजतेनकामात् ॥ नासंपृ ष्टोव्युपयुंक्तेपरार्थेतत्प्रज्ञानंप्रथमंपंडितस्य॥ २२॥ नाप्राप्यमभिवांछंतिनष्टंनेच्छंतिशोचितुम्॥आपत्सुचनमुह्यंतिनराःपंडितबुद्धयः॥ २३॥ निश्चित्ययःप्र क्रमतेनांतर्वसतिकर्मणः॥अवंध्यकालोवश्यात्मासवैपंडितउच्यते॥२४॥ आर्यकर्मणिरज्यंतेभूतिकर्माणिकुर्वते॥हितंचनाभ्यसूयंतिपंडिताभरतर्षभ ॥२५॥ नहृष्यत्यात्मसंमानेनावमानेनतप्यते॥ गांगोह्रदइवाक्षोभ्योयःसपंडितउच्यते॥२६॥तत्त्वज्ञःसर्वभूतानांयोगज्ञःसर्वकर्मणाम्॥उपायज्ञोमनुष्याणांनरःपंडि तउच्यते॥ २७॥ प्रवक्तावाक्चित्रकथऊहवान्प्रतिभानवान्॥ आशुग्रंथस्यवक्ताचयःसपंडितउच्यते ॥ २८॥ श्रुतंप्रज्ञानुगंयस्यप्रज्ञाचैवश्रुतानुगा ॥ असं भिन्नार्यमर्यादःपंडिताख्यांलभेतसः॥ २९॥ अश्रुतश्चसमुन्नद्धोदरिद्रश्चमहामनाः॥ अर्थाश्चाकर्मणाप्रेप्सुर्मूढइत्युच्यतेबुधैः ॥ ३०॥ स्वमर्थंयःपरित्यज्यपरा र्थमनुतिष्ठति॥ मिथ्याचरतिमित्रार्थेयश्चमूढःसउच्यते॥ ३१॥ अकामान्कामयतियःकामयानान्परित्यजेत्॥ बलवंतंचयोद्वेष्टिंतमाहुर्मूढचेतसम्॥३२॥अ मित्रंकुरुतेमित्रंमित्रंद्वेष्टिहिनास्तिच॥ कर्मचारभतेदुष्टंतमाहुर्मूढचेतसम्॥३३॥संसारयतिकृत्यानिसर्वत्रविचिकित्सते॥ चिरंकरोतिक्षिप्रार्थेसमूढोभरतर्षभ ॥ ३४॥ श्राद्धंपित्र्यानदादितिदैवतानिनचार्चति॥ सुहृन्मित्रंनलभतेतमाहुर्मूढचेतसम्॥३५॥अनाहूतःप्रविशतिअपृष्टोबहुभाषते॥ अविश्वस्तेविश्वसिति मूढचेतानराधमः॥ ३६॥ परक्षिप्तिदोषेणवर्तमानःस्वयंतथा॥ यश्चकुप्यत्यनीशानःसचमूढतमोनरः॥ ३७॥ आत्मनोबलमज्ञायधर्मार्थपरिवर्जितम्॥अ लभ्यमिच्छन्नैष्कर्म्यान्मूढबुद्धिरिहोच्यते॥ ३८॥ अशिष्यंशास्तियोराजन्यश्चशून्यमुपासते॥ कदर्यंभजतेयश्चतमाहुर्मूढचेतसम्॥ ३९॥

स्तदर्थसामग्री मनुष्याणांमध्येसनरःपंडितः ॥२७॥ प्रवक्तावाक्अकुंठितवचनः चित्रकथोलोककथाभिज्ञः ऊहस्तर्कः प्रतिभानंतत्कालस्फूर्तिः ॥२८॥ प्रज्ञानुगंबुद्धिवश्यं श्रुतानुगाशास्त्रानुसारिणी ॥२९॥ अकर्मणाहीनकर्मणाभूतादिनेत्यर्थः तादृशोबुर्योधनः ॥ ३० ॥ स्वमर्थमिति तादृशःशकुनिः ॥ ३१ ॥ अकामान्त्वयिभक्तिहीनान्कर्णादीन् कामयानान्त्वयिभक्तिमतःपांडवान् बलवंतंयुधिष्ठिरं॥३२॥ दुष्टंजतुगृहदाहादि ॥ ३३ ॥ संसारयतिभृत्यादिद्वारापवर्तयति ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥नैष्कर्म्यात्अयत्नतः ॥ ३८ ॥ शून्यंराजदारादीन्अज्ञातंयथास्यात्तथाउपास्ते कदर्यंअदातारं ॥ ३९ ॥

असमुन्नद्धः अनुद्धतः ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ एकयेति बुद्धिर्बुद्धिमतेत्युपक्रमादेकयाबुद्ध्येतिव्याख्याद्वयेपिसमानं द्वेनीतौकार्याकार्ये अध्यात्मपक्षेनित्यानित्येविनिश्चित्यसम्यग्वगधार्य त्रीन्नीतौमित्रोदासीनशत्रून् पक्षेकामक्रोधलोभान् चतुर्भिःसामदानभेददंडैः मित्रंसाम्नैव दानभेदाभ्यामुदासीनं सर्वैःशत्रुंवशीकुरु पक्षेशमदमोपरमश्रद्धाभिःपंचपक्षद्वयेपिइंद्रियाणिजित्वा षड्विदित्वा संधिविग्रहादीन्ज्ञात्वा पक्षेअशनायापिपासाशोकंमोहंजरांमृत्युंच सप्तहित्वा स्त्रियोक्षामृगयापानंवाक्पारुष्यंचपंचमं महच्चदंडपारुष्यमर्थदूषणमेवचेतिसप्तहेयानि पक्षेपंचेंद्रियाणिबुद्धिमनसीचत्यक्त्वासुखीभव

अर्थंमहांतमासाद्यविद्यामैश्वर्यमेववा॥विचरत्यसमुन्नद्धोयःसपंडितउच्यते॥४०॥एकःसंपन्नमश्नातिवस्तेवासश्चशोभनम्॥योऽसंविभज्यभृत्येभ्यःकोनृशंसतरस्ततः॥४१॥एकःपापानिकुरुतेफलंभुंक्तेमहाजनः॥भोक्तारोविप्रमुच्यंतेकर्तादोषेणलिप्यते॥४२॥एकंहन्यान्नवाहन्यादिषुर्मुक्तोधनुष्मता॥बुद्धिर्बुद्धिमतोत्सृष्टाहन्याद्राष्ट्रंसराजकम्॥४३॥एकयाद्वेविनिश्चित्यत्रींश्चतुर्भिर्वशेकुरु॥पंचजित्वाविदित्वाषट्सप्तहित्वासुखीभव॥४४॥एकंविषरसोहंतिशस्त्रेणैकश्चवध्यते॥सराष्ट्रंसप्रजंहंतिराजानंमंत्रविप्लवः॥४५॥एकःस्वादुनभुंजीतएकश्चार्थान्नचिंतयेत्॥एकोनगच्छेदध्वानंनैकःसुप्तेषुजागृयात्॥४६॥एकमेवाद्वितीयंतद्यद्राजन्नावबुध्यसे॥सत्यंस्वर्गस्यसोपानंपारावारस्यनौरिव॥४७॥एकःक्षमावतांदोषोद्वितीयोनोपपद्यते॥यदेनंक्षमयायुक्तमशक्तंमन्यतेजनः॥४८॥सोस्यदोषोनमंतव्यःक्षमाहिपरमंबलम्॥क्षमागुणोह्यशक्तानांशक्तानांभूषणंक्षमा॥४९॥क्षमावशीकृतिर्लोकेक्षमयाकिंनसाध्यते॥शांतिखड्गःकरेयस्यकिंकरिष्यतिदुर्जनः॥५०॥अतृणेपतितोवह्निःस्वयमेवोपशाम्यति॥अक्षमावान्परंदोषैरात्मानंचैवयोजयेत्॥५१॥एकोधर्मःपरंश्रेयःक्षमैकाशांतिरुत्तमा॥विद्यैकापरमातृप्तिरहिंसैकासुखावहा॥५२॥द्वाविमौग्रसतेभूमिःसर्पोबिलशयानिव॥राजानंचाविरोद्धारंब्राह्मणंचाप्रवासिनम्॥५३॥द्वेकर्मणीनरःकुर्वन्नस्मिँल्लोकेविरोचते॥अब्रुवन्परुषंकिंचिदसतोनर्चयंस्तथा॥५४॥द्वाविमौपुरुषव्याघ्रपरप्रत्ययकारिणौ॥स्त्रियःकामितकामिन्योलोकःपूजितपूजकः॥५५॥द्वाविमौकंटकौतीक्ष्णौशरीरपरिशोषिणौ॥यश्चाधनःकामयतेयश्चकुप्यत्यनीश्वरः॥५६॥द्वावेवनविराजेतेविपरीतेनकर्मणा॥गृहस्थश्चनिरारंभःकार्यवांश्चैवभिक्षुकः॥५७॥

तथाचश्रुतिः यदापंचावतिष्ठंतेज्ञानानिमनसासह बुद्धिश्चनविचेष्टेततामाहुःपरमांगतिमिति पूर्वंइंद्रियाणांप्रत्याहारउक्तःइदानींतुप्रविलापनमितिभेदः॥४४॥४५॥४६॥सत्यंयथार्थभाषणं स्वर्गस्यपक्षे सत्यंब्रह्मस्वर्गोमोक्षः पारावारस्यसमुद्रस्य ॥४७॥४८॥४९॥५०॥५१॥ अहिंसेति पुत्राणांविग्रहेणकुलक्षयंमाकुर्वितिभावः ॥ ५२ ॥ द्वावित्यादिषुकिंचित्प्रकृतोपयोग्युच्यते किंचित्प्रसंगात्दृष्टांतार्थंचेतिज्ञेयं ॥५३॥ असतःशकुन्यादींस्त्वमर्चयसीतिभावः ॥५४॥ पूजितेति पुत्रेणपूजितंकर्णत्वमपिपूजयसीत्यर्थः॥५५॥अनीश्वरत्वंत्वत्पुत्रे ॥५६॥ निरारंभउदासीनस्त्वंपुत्रकलहनिवारणे ॥ ५७ ॥

प्रभुःपांडवः ॥ ५८ ॥ पात्रेधर्मे ॥ ५९ ॥ अप्रदातारंत्वत्पुत्रम् ॥६०॥ ६१ ॥ उपायाइतिछेदः युद्धंकनीयान् भेददानेमध्यमः सामउत्तमः अपायाइतिच्छेदेकाम्ययोगःकनीयान्काम्यधर्मोमध्यमःइहलोकलोभोऽधमःत्रयोन्यायाइतिपाठःस्पष्टार्थः ॥ ६२ ॥ यथावन्नियोजयेत् त्वयात्वधमाःकर्णादयउत्तमेमंत्रकार्येनियुज्यंतइतिभावः ॥ ६३ ॥ त्वयिसतित्वत्पुत्रोऽधनोऽतस्त्वमेवपांडवानांराज्यंदातुंप्रभुरसीत्यर्थः ॥ ६४ ॥ हरणादयस्त्रयोपिदोषाःकामादित्रयसहितास्त्वय्येवसंतीत्यर्थः ॥ ६५ ॥६६॥ शत्रोर्युधिष्ठिरस्य कृच्छ्राद्गोत्रवधात् ॥६७॥ भक्तादयःपांडवाःशरणंगृहं विषमेपिसंकटेपि तवतुतन्नास्तीत्य

द्वाविमौपुरुषौराजन्स्वर्गस्योपरितिष्ठतः॥प्रभुश्चक्षमयायुक्तोदरिद्रश्चप्रदानवान्॥५८॥न्यायागतस्यद्रव्यस्यबोद्धव्यौद्वावतिक्रमौ॥अपात्रेप्रतिपत्तिश्चपात्रेचाप्रतिपादनम्॥५९॥द्वावंभसिनिवेष्टव्यौगलेबध्वादृढांशिलाम्॥धनवंतमदातारंदरिद्रंचातपस्विनम्॥६०॥द्वाविमौपुरुषव्याघ्रसूर्यमंडलभेदिनौ॥परिव्राड्योगयुक्तश्चरणेचाभिमुखोहतः॥६१॥त्रयोपायामनुष्याणांश्रूयंतेभरतर्षभ॥कनीयान्मध्यमःश्रेष्ठइतिवेदविदोविदुः॥६२॥त्रिविधाःपुरुषाराजन्नुत्तमाधममध्यमाः॥नियोजयेद्यथावत्तांस्त्रिविधेष्वेवकर्मसु॥६३॥त्रयएवाधनाराजन्भार्यादासस्तथासुतः॥यत्तेसमधिगच्छंतियस्यतेतस्यतद्धनम्॥६४॥हरणंचपरस्वानांपरदाराभिमर्शनम्॥सुहृदश्चपरित्यागस्त्रयोदोषाःक्षयावहाः॥६५॥त्रिविधंनरकस्येदंद्वारंनाशनमात्मनः॥कामःक्रोधस्तथालोभस्तस्मादेतत्त्रयंत्यजेत्॥६६॥वरप्रदानंराज्यंचपुत्रजन्मचभारत॥शत्रोश्चमोक्षणंकृच्छ्रात्त्रीणिचैकंचतत्समम्॥६७॥भक्तंचभजमानंचतवास्मीतिचवादिनम्॥त्रीनेताञ्छरणंप्राप्तान्विषमेपिनसंत्यजेत्॥६८॥चत्वारिराज्ञातुमहाबलेनवर्ज्यान्याहुःपंडितस्तानिविद्यात्॥अल्पप्रज्ञैःसहमंत्रंनकुर्यान्नदीर्घसूत्रैरभसैश्चारणैश्च॥६९॥चत्वारितेतातगृहेवसंतुश्रियाभिजुष्टस्यगृहस्यधर्मे॥वृद्धोज्ञातिरवसन्नःकुलीनःसखादरिद्रोभगिनीचानपत्या॥७०॥चत्वार्याहमहाराजसाद्यस्कानिबृहस्पतिः॥पृच्छतेत्रिदशेंद्रायतानीमानिनिबोधमे॥७१॥देवतानांचसंकल्पमनुभावंचधीमताम्॥विनयंकृतविद्यानांविनाशंपापकर्मणाम्॥७२॥

र्थः ॥ ६८ ॥ दीर्घसूत्रैः क्षिप्रसाध्येकार्येचिरंकुर्वद्भिः रभसैःहर्षतरलैः अलसैरित्यपिपाठः चारणैःस्तावकैः अरणैरितिच्छेदोवा रणविरोधिभिर्द्यूताद्यासक्तैरित्यर्थः अशनैरितिपाठेबहुभोक्तृभिः॥६९॥ वृद्धः कुलधर्मानुपदिशति कुलीनःशिशून्आचारंग्राहयति सखाहितंवदति तादृशाभीष्मद्रोणविदुराः भगिनीधनंरक्षति तवगृहेसर्वेपिसंतिपरंतूपदेशंनगृह्णासीतिभावः ॥ ७० ॥ साद्यस्कानिसद्यःफलानि॥७१॥ देवताःस्वर्गभाजःस्वर्गपदार्थश्च यन्नदुःखेनसंभिन्नंनचग्रस्तमनंतरं अभिलाषोपनीतंचतत्सुखंस्वःपदास्पदमित्येवंरूपःअतस्तेसत्यसंकल्पाः धीमतामगस्त्यादीनामनुभावंसमुद्रपानादिप्रभावं तेपिदेवतुल्याइत्यर्थः विनयोपिगुरुप्रसादकरत्वेनसद्यःफलः विनाशहेतुकर्माप्रिचौर्यादिकंतच्चत्वय्येवास्ति तवतुसर्वंकर्ममानार्थमेवेतिभावः ॥ ७२ ॥

॥ ७३ ॥ अग्निवत्पित्रादयोपिपूज्याएवनास्कंदनीयाः तवपुत्रस्तुगुरुंयुधिष्ठिरंनपूजयतीतिभावः ॥७४॥ पितॄन्अग्निष्वात्तादीन्गोत्रप्रवर्तकानृषींश्च मनुष्यान्पित्रादीन् ज्येष्ठोभ्रातापितुःसमइतिपितृतुल्य स्त्वत्पुत्रस्ययुधिष्ठिरइतिभावः ॥ ७५ ॥ त्वात्वां उपजीव्याःगुरवः इहलोकेसाधितामित्रादयः इहपरलोकेजन्मांतरेवास्वंस्वंकार्यंकुर्वंतीत्यर्थः मित्रेषुपांडवेषुमैत्रीमाचरेतिभावः त्वंतुअंधत्वात्दुर्जनवचनप्र तारितः पांडवानांगुणान्नपश्यसीतिभावः ॥ ७६ ॥ दृतेश्चर्ममयाज्जलपात्रात् ॥ ७७ ॥ षडिति क्रोधोत्रतन्मूलकोद्वेषोग्राह्यः ॥ ७८ ॥ ७९ ॥ पांडवांनांअरक्षिताराजात्वंअन्येषामपित्याज्योभविष्यसीत्य

चत्वारिकर्माण्यभयंकराणिभयंप्रयच्छंत्ययथाकृतानि ॥मानाग्निहोत्रमुतमानमौनंमानेनाधीतमुतमानयज्ञः ॥७३॥ पंचाग्नयोमनुष्येणपरिचर्याःप्रयत्नतः ॥ पितामाताग्निरात्माचगुरुश्चभरतर्षभ॥७४॥पंचैवपूजयन्लोकेयशःप्राप्नोतिकेवलम् ॥ देवान्पितॄन्मनुष्यांश्चभिक्षूनतिथिपंचमान् ॥७५॥पंचत्वानुगमिष्यंति यत्रयत्रगमिष्यसि॥मित्राण्यमित्रामध्यस्थाउपजीव्योपजीविनः ॥ ७६ ॥ पंचेंद्रियस्यमर्त्यस्यछिद्रंचेदेकमिंद्रियम् ॥ ततोस्यस्रवतिप्रज्ञादृतेःपात्रादिवोदक म्॥७७॥षड्दोषाःपुरुषेणेहहातव्याभूतिमिच्छता॥निद्रातंद्रीभयंक्रोधआलस्यंदीर्घसूत्रता ॥७८॥ षडिमान्पुरुषोजह्याद्भिन्नांनावमिवार्णवे ॥अप्रवक्तारमा चार्यमनधीयानमृत्विजम् ॥ ७९ ॥ अरक्षितारंराजानंभार्यांचाप्रियवादिनीं ॥ ग्रामकामंचगोपालंवनकामंचनापितम् ॥ ८० ॥ षडेवतुगुणाःपुंसानहातव्याः कदाचन॥सत्यंदानमनालस्यमनसूयाक्षमाधृतिः॥८१॥अर्थागमोनित्यमरोगिताचप्रियाचभार्याप्रियवादिनीच ॥ वश्यश्चपुत्रोर्थकरीचविद्याषड्जीवलोक स्यसुखानिराजन् ॥८२॥षण्णामात्मनिनित्यानामैश्वर्यंयोधिगच्छति ॥ नसपापैःकुतोनर्थैर्युज्यतेविजितेंद्रियः ॥ ८३ ॥ षडिमेषट्सुजीवंतिसप्तमोनोपलभ्यते चौराःप्रमत्तेजीवंतिव्याधितेषुचिकित्सकाः ॥८४॥ प्रमदाःकामयानेषुयजमानेषुयाजकाः ॥ राजाविवदमानेषुनित्यंमूर्खेषुपंडिताः ॥ ८५ ॥ षडिमानिविनश्यं तिमुहूर्तमनवेक्षणात् ॥ गावःसेवाकृषिर्भार्याविद्यावृषलसंगतिः ॥ ८६ ॥ षडेतेह्यवमन्यंतेनित्यंपूर्वोपकारिणम् ॥ आचार्यंशिक्षिताःशिष्याःकृतदाराश्चमातर म् ॥८७॥नारींविगतकामास्तुकृतार्थाश्चप्रयोजकम् ॥ नावंनिस्तीर्णकांताराआतुराश्चचिकित्सकम् ॥ ८८ ॥

र्थः ॥ ८० ॥ दुर्योधनत्यागार्थंतवधृतिर्धैर्यंनास्तीतिभावः ॥ ८१ ॥ ८२ ॥ षण्णामिति आत्मनिचित्तेनित्यानांषण्णां कामक्रोधौशोकमोहौमदमानौ चषट्पदीत्युक्तानां ऐश्वर्यंवशित्वं त्वंतुराज्यकामःपा पैरनर्थैश्चयुक्तोसीतिभावः ॥ ८३ ॥ ८४ ॥ पंडिताःपांडवाः मूर्खेषुत्वत्पुत्रेषु राज्यंलप्स्यंत्येवेत्यर्थः ॥ ८५ ॥ वृषलःशूद्रः पुत्रस्नेहाक्रांतेनत्वयासद्विद्याऽनवेक्षणान्नाशिता अन्यथासत्यंनजह्याइतिभावः ॥ ॥ ८६ ॥ ८७ ॥ आतुराआरोग्येसतीतिशेषः त्वंतुकृत्स्नराज्यलाभेनकृतकृत्यत्वात्पांडवानवमन्यसे ॥ ८८ ॥

स्वप्रत्ययास्वानुकूलावृत्तिर्जीविका तवसत्संगोनास्तीत्यर्थः ॥ ८९ ॥ ईर्षुरिति त्वयितुईर्षुत्वं घृणादया तवतुवश्यःपुत्रोनास्तीतिभावः ॥ ९० ॥ ९१ ॥ वाक्पारुष्यंदंडपारुष्यंचपांडवेषुत्वत्पुत्रैःकृतम्॥९२॥ द्वेष्टिमनसानिष्टंचिंतयति विरुध्यतेकर्मणा ॥९३॥ अष्टसुचरमंत्वत्पुत्रेमैत्रेयस्यावमानतोभविष्यतीतिजानामीतिभावः ॥ ९४॥९५॥९६॥९७॥ जनसंसदिसभायांद्रौपद्याआनयनेनपूजापितवनष्टा॥९८॥ ॥९९॥नवेति श्रोत्रादिपंचकंमनोबुद्ध्यहंकाराःस्थूलशरीरंचेतिनवद्वाराणीवद्वाराणिविषयग्रहणमार्गायस्मिंस्तत् तिस्रःस्थूणाःस्तंभाइवविधारकायस्य तेचअविद्याकामःकर्मच वेश्मगृहंदेहद्वयात्मकं पंच

आरोग्यमानृण्यमविप्रवासःसद्भिर्मनुष्यैःसहसंप्रयोगः ॥ स्वप्रत्ययावृत्तिरभीतवासःषड्जीवलोकस्यसुखानिराजन् ॥ ८९ ॥ ईर्षुर्घृणीनसंतुष्टःक्रोधनोनित्य शंकितः ॥ परभाग्योपजीवीचषडेतेनित्यदुःखिताः ॥ ९० ॥ सप्तदोषाःसदाराज्ञाहातव्याव्यसनोदयाः ॥ प्रायशोयैर्विनश्यंतिकृतमूलाअपीश्वराः ॥ ९१ ॥ स्त्रियो क्षामृगयापानंवाक्पारुष्यंचपंचमम् ॥ महच्चदंडपारुष्यमर्थदूषणमेवच ॥ ९२ ॥ अष्टौपूर्वनिमित्तानिनरस्यविनशिष्यतः ॥ ब्राह्मणान्प्रथमंद्वेष्टिब्राह्मणैश्चविरु ध्यते ॥ ९३ ॥ ब्राह्मणस्वानिचादत्तेब्राह्मणांश्चजिघांसति ॥ रमतेनिंदयाचैषांप्रशंसांनाभिनंदति ॥ ९४ ॥ नैनान्स्मरतिकृत्येषुयाचितश्चाभ्यसूयति ॥ एतान्दो षान्नरःप्राज्ञोबुध्येद्बुध्वाविसर्जयेत् ॥ ९५ ॥ अष्टाविमानिहर्षस्यनवनीतानिभारत ॥ वर्तमानानिदृश्यंतेतान्येवस्वसुखान्यपि ॥ ९६ ॥ समागमश्चसखिभिर्म हांश्चैवधनागमः ॥ पुत्रेणचपरिष्वंगःसन्निपातश्चमैथुने ॥ ९७ ॥ समयेचप्रियालापःस्वयूथ्येषुसमुन्नतिः ॥ अभिप्रेतस्यलाभश्चपूजाचजनसंसदि ॥ ९८ ॥ अ ष्टौगुणाःपुरुषंदीपयंतिप्रज्ञाचकौल्यंचदमःश्रुतंच ॥ पराक्रमश्चाबहुभाषिताचदानंयथाशक्तिकृतज्ञताच ॥ ९९ ॥ नवद्वारमिदंवेश्मत्रिस्थूणंपंचसाक्षिकम् ॥ क्षे त्रज्ञाधिष्ठितंविद्वान्योवेदसपरःकविः ॥ १०० ॥ दशधर्मंनजानंतिधृतराष्ट्रनिबोधतान् ॥ मत्तःप्रमत्तउन्मत्तःश्रांतःक्रुद्धोबुभुक्षितः ॥ १०१ ॥ त्वरमाणश्चलुब्धश्च भीतःकामीचतेदश ॥ तस्मादेतेषुसर्वेषुनप्रसज्जेतपंडितः ॥ १०२ ॥ अत्रैवोदाहरंतीममितिहासंपुरातनम् ॥ पुत्रार्थमसुरेंद्रेणगीतंचैवसुधन्वना ॥ १०३ ॥ यःका ममन्यूप्रजहातिराजापात्रेप्रतिष्ठापयतेधनंच ॥ विशेषविच्छ्रुतवान्क्षिप्रकारीतंसर्वलोकःकुरुतेप्रमाणम् ॥ १०४ ॥ जानातिविश्वासयितुंमनुष्यान्विज्ञातदो षेषुदधातिदंडम् ॥ जानातिमात्रांचतथाक्षमांचतंतादृशंश्रीर्जुषतेसमग्रा ॥ १०५ ॥

साक्षिवदुदासीनाःशब्दादयोग्राह्यायस्मिन् पंचभूमिकमितिपाठेपंचभूमयःप्रचारस्थानानीतितएव पांचभौतिकमित्यर्वाचीनःपाठउपेक्ष्यः क्षेत्रज्ञेनचिदात्मनाअधिष्ठितमिदंक्षेत्रंतत्त्वेनयोविद्वान्वेदसपरःस र्वोत्कृष्टःकविर्ब्रह्मविदित्यर्थः ॥ १०० ॥ मत्तोमद्यादिना प्रमत्तोविषयांतरासक्त्यानवहितः उन्मत्तोधातुदोषात्एतेषांमध्येत्वंलुब्धोसीतिभावः ॥ १०१ ॥ १०२ ॥ १०३ ॥ काममन्यूकामक्रोधौ विशेष वित्तारतम्यज्ञः ॥ १०४ ॥ मात्रांअपराधानुसारेणदंडप्रमाणं ब्राह्मणादौअपराधस्यक्षमांचजानाति ॥ १०५ ॥

युक्तःछिद्रप्रेक्षणेऽवहितः ॥ १०६ ॥ धुरंधरःकार्यभारसहः ॥ १०७ ॥ १०८ ॥ संरंभेणक्रोधेन त्रिवर्गंधर्मकामार्थान् आकारितःआहूतः पाठांतरेमात्रार्थेअल्पार्थे ॥ १०९ ॥ प्रातिभाव्यंप्रतिकूलोभावःचि त्ताभिप्रायःतस्यभावःप्रातिभाव्यंविरोधं अत्याहअतिक्रम्यब्रवीति ॥ ११० ॥ १११ ॥ ११२ ॥ ११३ ॥ समयान्भाषाभेदान् बुभूषतेऐश्वर्यंप्राप्तुमिच्छति परावरज्ञःउत्तमाधमविवेकवान् ॥ ११४ ॥

सुदुर्बलंनावजानातिकंचिद्युक्तोरिपुंसेवतेबुद्धिपूर्वं ॥ नविग्रहंरोचयतेबलस्थैःकालेचयोविक्रमतेसधीरः ॥ १०६ ॥ प्राप्यापदंनव्यथतेकदाचिदुद्योगमन्विच्छ तिचाप्रमत्तः ॥ दुःखंचकालेसहतेमहात्माधुरंधरस्तस्यजिताःसपत्नाः ॥ १०७ ॥ अनर्थकंविप्रवासंगृहेभ्यःपापैःसंधिंपरदाराभिमर्शम् ॥ दंभंस्तैन्यंपैशुनंमद्यपा नंनसेवतेयश्चसुखीसदैव ॥ १०८ ॥ नसंरंभेणारभतेत्रिवर्गमाकारितःशंसतितत्वमेव ॥ नमित्रार्थेरोचयतेविवादंनापूजितःकुप्यतिचाप्यमूढः ॥ १०९ ॥ नयो भ्यसूयत्यनुकंपतेचनदुर्बलःप्रातिभाव्यंकरोति ॥ नात्याहकिंचित्क्षमतेविवादंसर्वत्रतादृग्लभतेप्रशंसाम् ॥ ११० ॥ योनोद्धतंकुरुतेजातुवेषंनपौरुषेणापिविक त्थतेन्यान् ॥ नमूर्च्छितःकटुकान्याहकिंचित्प्रियंसदातंकुरुतेजनोहि ॥ १११ ॥ नवैरमुद्दीपयतिप्रशांतंनदर्पमारोहतिनास्तमेति ॥ नदुर्गतोस्मीतिकरोत्यकार्यंत मार्यशीलंपरमाहुरार्याः ॥ ११२ ॥ नस्वेसुखेवैकुरुतेप्रहर्षंनान्यस्यदुःखेभवतिप्रहृष्टः ॥ दत्वानपश्चात्कुरुतेनतापंसकथ्यतेसत्पुरुषार्यशीलः ॥ ११३ ॥ देशाचा रान्समयान्जातिधर्मान्बुभूषतेयःसपरावरज्ञः ॥ सयत्रतत्राभिगतःसदैवमहाजनस्याधिपत्यंकरोति ॥ ११४ ॥ दंभंमोहंमत्सरंपापकृत्यंराजद्विष्टंपैशुनंपूगवै रम् ॥ मत्तोन्मत्तैर्दुर्जनैश्चापिवादंयःप्रज्ञावान्वर्जयेत्सप्रधानः ॥ ११५ ॥ दानंमोहंदैवतंमंगलानिप्रायश्चितान्विविधाँल्लोकवादान् ॥ एतानियःकुरुतेनैत्यकानि तस्योत्थानंदेवताराधयंति ॥ ११६ ॥ समैर्विवाहंकुरुतेनहीनैःसमैःसख्यंव्यवहारंकथांच ॥ गुणैर्विशिष्टांश्चपुरोदधातिविपश्चितस्तस्यनयाःसुनीताः ॥ ११७ ॥ मितंभुंक्तेसंविभज्याश्रितेभ्योमितंस्वपित्यमितंकर्मकृत्वा ॥ ददात्यमित्रेष्वपियाचितःसंस्तमात्मवंतंप्रजहत्यनर्थाः ॥ ११८ ॥ चिकीर्षितंविप्रकृतंचयस्यनान्ये जनाःकर्मजानंतिकिंचित् ॥ मंत्रेगुप्तेसम्यगनुष्ठितेचनाल्पोप्यस्यच्यवतेकश्चिदर्थः ॥ ११९ ॥ यःसर्वभूतप्रशमेनिविष्टःसत्योमृदुर्मानकृच्छुद्धभावः ॥ अतीव सज्ञायतेज्ञातिमध्येमहामणिर्जात्यइवप्रसन्नः ॥ १२० ॥ यआत्मनापत्रपतेभृशंनरःससर्वलोकस्यगुरुर्भवत्युत ॥ अनंततेजाःसुमनाःसमाहितःसतेजसासूर्य इवावभासते ॥ १२१ ॥

दंभंपरवंचनेच्छयाधर्मानुष्ठानं मोहंअनात्मन्यात्मबुद्धिं मत्सरंद्वेषं पापकृत्यंपापक्रियांअभिचारादिरूपां पूगवैरंबहुभिः सहवैरम् ॥ ११५ ॥ ११६ ॥ ११७ ॥ ११८ ॥ ११९ ॥ जात्यःअभिजातःउत्तमेआकरेजातः ॥ १२० ॥ आत्मनाअपत्रपते[illegible]रैरज्ञातेपिस्वव्यलीकेस्वयमेवलज्जते ॥ १२१ ॥

॥ १२२ ॥ तर्कणीयःशंक्यः ॥ १२३ ॥ इतिउद्योगप०नैलकंठीयेभारतभा०त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ ७ ॥ ॥ दह्यमानस्यचिंताग्निनेतिशेषः धर्मार्थयोःकुशलः मोक्षेस्यवक्तुमनधिकाराद्द्वयो रेवग्रहः ॥ १ ॥ अजातशत्रोःपथ्यं कुरूणांचश्रेयस्करम् ॥ २ ॥ पापाशंकीभाविदुःखादुद्विजन् पापंस्वकृतंपूर्वापराधंपश्यन् कवेहेसर्वज्ञ ॥ ३ ॥ ४ ॥ ५ ॥ मिथ्योपेतानिकपटद्यूतादीनि अनुपायैःअसदुपा

वनेजाताःशापदग्धस्यराज्ञःपांडोःपुत्राःपंचपंचेंद्रकल्पाः ॥ त्वयैवबालावर्धिताःशिक्षिताश्चतवादेशंपालयंत्यांबिकेय ॥ १२२ ॥ प्रदायैषामुचितंतातराज्यं सुखीपुत्रैःसहितोमोदमानः ॥ नदेवानांनापिचमानुषाणांभविष्यसित्वंतर्कणीयोनरेंद्र ॥ १२३ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिप्रजागरपर्वणिविदुरनी तिवाक्येत्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ ७ ॥ ॥ धृतराष्ट्रउवाच ॥ ॥ जाग्रतोदह्यमानस्ययत्कार्यमनुपश्यसि ॥ तद्ब्रूहित्वंहिनस्तातधर्मार्थकुशलोह्यसि ॥ १ ॥ त्वं मांयथावद्विदुरप्रशाधिप्रज्ञापूर्वंसर्वमजातशत्रोः ॥ यन्मन्यसेपथ्यमदीनसत्वश्रेयस्करंब्रूहितद्वैकुरूणाम् ॥ २ ॥ पापाशंकीपापमेवानुपश्यन्पृच्छामित्वांव्या कुलेनात्मनाहम् ॥ कवेतन्मेब्रूहिसर्वंयथावन्मनीषितंसर्वमजातशत्रोः ॥ ३ ॥ विदुरउवाच ॥ ॥ शुभंवायदिवापापंद्वेष्यंवायदिवाप्रियम् ॥ अपृष्टस्तस्यतद्ब्रूया द्यस्यनेच्छेत्पराभवम् ॥ ४ ॥ तस्माद्वक्ष्यामितेराजन्हितंयत्स्यात्कुरून्प्रति ॥ वचःश्रेयस्करंधर्म्यंब्रुवतस्तन्निबोधमे ॥ ५ ॥ मिथ्योपेतानिकर्माणिसिध्येयुर्या निभारत ॥ अनुपायप्रयुक्तानिमास्मतेषुमनःकृथाः ॥ ६ ॥ तथैवयोगविहितंयत्तुकर्मनसिध्यति ॥ उपाययुक्तंमेधावीनतत्रग्लपयेन्मनः ॥ ७ ॥ अनुबंधानपेक्षे तसानुबंधेषुकर्मसु ॥ संप्रधार्यचकुर्वीतनवेगेनसमाचरेत् ॥ ८ ॥ अनुबंधंचसंप्रेक्ष्यविपाकंचैवकर्मणाम् ॥ उत्थानमात्मनश्चैवधीरःकुर्वीतवानवा ॥ ९ ॥ यःप्र माणंनजानातिस्थानेवृद्धौतथाक्षये ॥ कोशेजनपदेदंडेनसराज्येवतिष्ठते ॥ १० ॥ यस्त्वेतानिप्रमाणानियथोक्तान्यनुपश्यति ॥ युक्तोधर्मार्थयोर्ज्ञानेसराज्यम धिगच्छति ॥ ११ ॥ नराज्यंप्राप्तमित्येववर्तितव्यमसांप्रतम् ॥ श्रियंह्यविनयोहंतिजरारूपमिवोत्तमम् ॥ १२ ॥ भक्ष्योत्तमप्रतिच्छन्नंमत्स्योबडिशमायसम् ॥ लोभाभिपातीग्रसतेनानुबंधमवेक्षते ॥ १३ ॥ यच्छक्यंग्रसितुंग्रस्यंग्रस्तंपरिणमेच्चयत् ॥ हितंचपरिणामेयत्तदाद्यंभूतिमिच्छता ॥ १४ ॥

यैःप्रयुक्तानिदुःखफलानीत्यर्थः ॥ ६ ॥ ७ ॥ अनुबंधान्प्रयोजनानि संप्रधार्यनिश्चित्य ॥ ८ ॥ विपाकःफलसिद्धावपिपरिपाकः उत्थानंउद्यमं वानवेतिसिद्धिपक्षेकुर्वीतनान्यथेत्यर्थः ॥ ९ ॥ प्रमाणं नि श्चयद्वारं स्थानादीनिसर्वदाविचार्याणीत्यर्थः स्थानेदुर्गादौ दंडेसेनायाम् ॥ १० ॥ एतानिस्थानादिज्ञापकानि प्रमाणानिलेख्यादीनि ॥ ११ ॥ असांप्रतंअयुक्तंयथास्यात्तथानवर्तितव्यम् ॥ १२ ॥ भक्ष्ये तिमुखेमिष्टमंतेमृत्युदंकर्मनकर्तव्यमित्यर्थः अनुबंधंपश्चाद्बंधनम् ॥ १३ ॥ आद्यंभक्षणीयम् ॥ १४ ॥

॥ १५ ॥ १६ ॥ १७ ॥ अंगारकारकोहिमूलतउत्कृत्यकाष्ठंदहंति अंगारइंगालः ॥ १८ ॥ १९ ॥ अनारभ्याः प्रबलैःसहवैरादयः अगताःकदाचिदप्यप्राप्ताः ॥ २० ॥ २१ ॥ लघुमूलान्अल्पोपायान् ॥ ॥ २२ ॥ चक्षुषाप्रीतिमयेन ॥ २३ ॥ सुपुष्पितःवाचाचक्षुषाचानुग्रहंदर्शयन्नपिअफलःस्यात्भृत्यंनधनेनवर्धयेत् ॥ सफलोपिसनदुरारुहःभृत्यवश्योनभवेत् अपक्वइति अंतर्बलहीनोपिबलवत्तांबहिःप्र

वनस्पतेरपक्वानिफलानिप्रचिनोतियः ॥ सनाप्नोतिरसंतेभ्योबीजंचास्यविनश्यति ॥ १५॥ यस्तुपक्वमुपादत्तेकालेपरिणतंफलम्॥ फलाद्रसंसलभतेबीजा च्चैवफलंपुनः॥ १६॥ यथामधुसमादत्तेरक्षन्पुष्पाणिषट्पदः॥ तद्वदर्थान्मनुष्येभ्यआदद्यादविहिंसया ॥ १७॥ पुष्पंपुष्पंविचिन्वीतमूलच्छेदंनकारयेत्॥ मा लाकारइवारामेंनयथांगारकारकः॥ १८॥ किन्नुमेस्यादिदंकृत्वाकिंन्नुमेस्यादकुर्वतः॥ इतिकर्माणिसंचिंत्यकुर्याद्वापुरुषोनवा ॥ १९ ॥ अनारभ्याभवंत्य र्थाःकेचिन्नित्यंतथाऽगताः॥कृतःपुरुषकारोहिभवेद्येषुनिरर्थकः॥ २० ॥ प्रसादोनिष्फलोयस्यक्रोधश्चापिनिरर्थकः ॥ नतंभर्तारमिच्छंतिषंढंपतिमिवस्त्रियः॥ ॥ २१ ॥ कांश्चिदर्थान्नरःप्राज्ञोलघुमूलान्महाफलान् ॥ क्षिप्रमारभतेकर्तुनविघ्नयतितादृशान् ॥ २२ ॥ ऋजुपश्यतियःसर्वंचक्षुषानुपिबन्निव ॥ आसीनम पितूष्णीकमनुरज्यंतितंप्रजाः॥ २३ ॥ सुपुष्पितःस्यादफलःफलितःस्यादुरारुहः ॥ अपक्वःपक्वसंकाशोनतुशीर्यंतकर्हिचित् ॥ २४ ॥ चक्षुषामनसावाचाकर्म णाचचतुर्विधं॥ प्रसादयतियोलोकंतंलोकोनुप्रसीदति॥२५॥ यस्मात्रस्यंतिभूतानिमृगव्याधान्मृगाइव ॥ सागरांतामपिमहींलब्ध्वासपरिहीयते॥२६॥ पि तृपैतामहंराज्यंप्राप्तवान्स्वेनकर्मणा॥ वायुरभ्रमिवासाद्यभ्रंशयत्यनयेस्थितः॥ २७ ॥ धर्ममाचरतोराज्ञःसद्भिश्चरितमादितः॥ वसुधावसुसंपूर्णावर्धतेभूति वर्धनी॥ २८॥ अथसंत्यजतोधर्ममधर्मंचानुतिष्ठतः॥ प्रतिसंवेष्टतेभूमिरग्नौचर्माहितंयथा ॥ २९॥ एएवयत्नःक्रियतेपरराष्ट्रविमर्दने॥ सएवयत्नःकर्तव्यःस्व राष्ट्रपरिपालने॥ ३० ॥ धर्मेणराज्यंविंदेतधर्मेणपरिपालयेत्॥ धर्ममूलांश्रियंप्राप्यनजहातिनहीयते॥ ३१ ॥ अप्युन्मत्तात्प्रलपतोबालाच्चपरिजल्पतः॥ स र्वतःसारमादद्यादश्मभ्यइवकांचनम्॥ ३२॥ सुव्याहृतानिसूक्तानिसुकृतानिततस्ततः॥ संचिन्वन्धीरआसीतशिलाहारीशिलंयथा॥ ३३॥

काशयेदेवेत्यर्थः ॥ २४ ॥ कर्मणादानेन लोकंभृत्यवर्गम् ॥ २५ ॥ २६ ॥ अनयेस्थितःअनीतिमान् ॥ २७ ॥ २८ ॥ प्रतिसंवेष्टतेसंकुचति बहुफलंनप्रयच्छतीत्यर्थः ॥ २९ ॥ ३० ॥ नजहातिश्रियम् ॥ ॥ ३२ ॥ सुव्याहृतानिपांडित्यवचनानि सूक्तानिशोभनतयाउक्तानिमातृपितृगुर्वादीनि सुकृतानितदुपदिष्टकर्माणि शिलंकणिशंवाऽर्जनम् उंच्छःकणशआदानंकणिशंवाऽर्जनंशिलमितियादवः ॥ त्वमपि अस्मदादिवाक्यात्सारंगृह्णीष्वेतिभावः ॥ ६३ ॥

॥ ३२ ॥

गंधेनेति पांडवबलंज्ञातुंचारान्नियुंक्ष्वेतिभावः ॥ ३४ ॥ भूयांसमितिश्लोकत्रयंतात्पर्यं पांडवान्प्रतित्वयानक्षीभवितव्यंतेनबलाधिष्ठात्रीदेवताइंद्रश्चत्वामनुग्रहीष्यतीति ॥ ३५ ॥ ३६ ॥३७ ॥ एतच्चमंत्रि भिःसहालोचनीयंसत्यंचसंरक्ष्यमित्याह पर्जन्येतित्रिभिः ॥ ३८ ॥ योगेनअभ्यासेन मृजयाउद्वर्तनेन ॥३९ ॥ अनुक्रमःव्यायामशिक्षादिः ॥ ४० ॥ प्रमाणंधर्मस्यकारणं नकुलमिति द्वयोर्वृत्तमाश्रयई र्ष्यात्यजेतिभावः ॥४१॥ ४२ ॥ अकालेइष्टसिद्धेःप्राक्भीतःस्यात् येनमाद्येत्लोभादिनातन्नपिबेत्नाश्रयेत् ॥४३॥ अभिजनःसहायःतवतुभयंदमश्चनास्तीत्यर्थः ॥ ४४ ॥ असंतइतिसार्धश्लोकोवाक्यं

गंधेनगावःपश्यंतिवेदैःपश्यंतिब्राह्मणाः॥ चारैःपश्यंतिराजानश्चक्षुर्भ्यामितरेजनाः॥ ३४॥ भूयांसंलभतेक्लेशंयागौर्भवतिदुर्दुहा॥अथयासुदुहाराजन्नैवतां वितुदंत्यपि॥ ३५॥ यदतप्तंप्रणमतिनतत्संतापयंत्यपि॥ यच्चस्वयंनतंदारुनतत्संतापयंत्यपि॥ ३६॥ एतयोपमयाधीरःसन्नमेतबलीयसे ॥ इंद्रायसप्रणमते नमतेयोबलीयसे॥ ३७॥ पर्जन्यनाथाःपशवोराजानोमंत्रिबांधवाः॥ पतयोबांधवाःस्त्रीणांब्राह्मणावेदबांधवाः॥ ३८॥ सत्येनरक्ष्यतेधर्मोविद्यायोगेनरक्ष्य ते॥ मृजयारक्ष्यतेरूपंकुलंवृत्तेनरक्ष्यते॥ ३९॥ मानेनरक्ष्यतेधान्यमश्वान्रक्षत्यनुक्रमः॥ अभीक्ष्णदर्शनंगाश्चस्त्रियोरक्ष्याःकुचेलतः॥ ४०॥ नकुलंवृत्तहीनस्य प्रमाणमितिमेमतिः॥ अंतेष्वपिहिजातानांवृत्तमेवविशिष्यते॥ ४१॥ यईर्षुःपरवित्तेषुरूपेवीर्येकुलान्वये॥ सुखसौभाग्यसत्कारेतस्यव्याधिरनंतकः॥ ४२॥ अकार्यकरणाद्भीतःकार्याणांचविवर्जनात्॥ अकालेमंत्रभेदाच्चयेनमाद्येन्नतत्पिबेत्॥ ४३ ॥ विद्यामदोधनमदस्तृतीयोभिजनोमदः ॥ मदाएतेऽवलिप्तानामेतएवसतांदमाः॥ ४४॥ असंतोभ्यर्थिताःसद्भिःक्वचित्कार्यंकदाचन॥तावन्नतस्यसुकृतंकिंचित्कार्यंकदाचन॥मन्यंतेसंतमात्मानमसंतमपिबिश्रुतम्॥४५॥ गतिरात्मवतांसंतःसंतएवसतांगतिः॥ असतांचगतिःसंतोनत्वसंतःसतांगतिः॥ ४६॥ जितासभावस्त्रवतामिष्टाशागोमताजिता॥अध्वाजितोयानवतासर्वं शीलवताजितम्॥४७॥ शीलंप्रधानंपुरुषेतद्यस्येहप्रणश्यति॥ नतस्यजीवितेनार्थोनधनेननबंधुभिः॥४८॥आढ्यानांमांसपरमंमध्यानांगोरसोत्तरम्॥ तैलो त्तरंदरिद्राणांभोजनंभरतर्षभ॥ ४९॥ संपन्नतरमेवान्नंदरिद्राभुंजतेसदा॥ क्षुत्स्वादुतांजनयतिसाचाढ्येषुसुदुर्लभा॥ ५०॥ प्रायेणश्रीमतांलोकेभोक्तुंशक्ति र्नविद्यते॥ जीर्यंत्यपिहिकाष्ठानिदरिद्राणांमहीपते॥ ५१॥

सद्भिरर्थिता असंतस्तत्कार्यमल्पमप्यकृत्वाअसंतमितिख्यातमप्यात्मानंसंतमभ्यंतइतितदर्थः किंचिदपितस्यकार्यंयावत्सुकृतंतावदेवमन्यंतइतियोजना ॥ ४५ ॥ गतिरिति पांडवाएवत्वामुपकरिष्यंति नतुत्वंतानितिभावः ॥ ४६ ॥ जितेति शीलंसंरक्ष्यंत्वयेतिद्वयोर्भावः ॥ ४७ ॥ ४८ ॥ आढ्यानामितित्रयस्यशीलवतस्तेदारिन्यप्राप्तिरपिश्रेयइतिभावः ॥ ४९ ॥ संपन्नंमिष्टम् ॥ ५० ॥ ५१ ॥

शीलाभावेसत्सुअवमानोमहान्क्लेशइत्याह अदत्तिरिति ॥ ५२ ॥ ऐश्वर्यमदःपापिष्ठोनिंदिततमेभ्यस्तेपानमदादयोमदाः ॥ ५३ ॥ इंद्रियार्थेषुशब्दादिषु यैर्हैःसूर्यादिभिःआकर्षोव्रतापनम् ॥ ५४ ॥ पंचवर्गःश्रोत्रादिगणःत्वमैश्वर्यमत्तोऽजितेंद्रियश्चावश्यमापदंप्राप्स्यसीतित्रयस्यभावः ॥ ५५ ॥ ५६ ॥ आत्मानंमनः अमात्यान्पुत्रादीन्द्वेष्यरूपेणशत्रुवत् मनएवप्रथमंजेतव्यंततोमात्यादीन्विजिगीषते ततूनमोघंननिष्फलंभवति ॥ ५७ ॥ त्वंत्वजितमनस्कतयापुत्रादिवशोनलक्ष्मीयोग्यइतित्रयाणांभावः ॥ ५८ ॥ एतदेवरथिरथादिरूपकंकल्पनयाआह रथइति ॥ ५९ ॥ व्यापादयितुंनाशयितुं अविधे

अदत्तिर्भयमंत्यानांमध्यानांमरणाद्भयम्॥उत्तमानांतुमर्त्यानामवमानात्परंभयम् ॥५२॥ ऐश्वर्यमदःपापिष्ठामदाःपानमदादयः ॥ ऐश्वर्यमदमत्तोहिनापतित्वाविबुध्यते॥५३॥इंद्रियैरिंद्रियार्थेषुवर्तमानैरनिग्रहैः॥ तैरयंताप्यतेलोकोनक्षत्राणिग्रहैरिव॥५४॥योजितःपंचवर्गेणसहजेनात्मकर्षिणा ॥ आपद्रस्तस्यवर्धतेशुक्लपक्षइवोडुराट् ॥ ५५॥ अविजित्यययथात्मानममात्यान्विजिगीषते ॥ अमित्रान्वाजितामात्यःसोवशःपरिहीयते ॥ ५६ ॥ आत्मानमेवप्रथमंद्वेष्यरूपेणयोजयेत्॥ततोमात्यानमित्रांश्चनमोघंविजिगीषते ॥ ५७ ॥ वश्येंद्रियंजितात्मानंधृतदंडंविकारिषु॥परीक्ष्यकारिणंधीरमत्यंतंश्रीर्निषेवते ॥ ५८ ॥ रथःशरीरंपुरुषस्यराजन्नात्मानियंतेंद्रियाण्यस्यचाश्वाः॥तैरप्रमत्तःकुशलीसदश्वैर्दांतैःसुखंयातिरथीवधीरः॥५९॥एतान्यनिगृहीतानिव्यापादयितुमप्यलम्॥अविधेयाइवादांताहयाःपथिकुसारथिं॥६०॥अनर्थमर्थतःपश्यन्नर्थैचैवाप्यनर्थतः॥ इंद्रियैरजितैर्बालःसुदुःखंमन्यतेसुखम् ॥६१॥ धर्मार्थौयःपरित्यज्यस्यादिंद्रियवशानुगः॥ श्रीप्राणधनदारेभ्यःक्षिप्रंसपरिहीयते ॥ ६२॥ अर्थानामीश्वरोयःस्यादिंद्रियाणामनीश्वरः ॥ इंद्रियाणामनैश्वर्यादैश्वर्याद्भ्रश्यतेहिसः ॥ ६३ ॥ आत्मनात्मानमन्विच्छेन्मनोबुद्धींद्रियैर्यतैः ॥ आत्मात्मेवात्मनोबंधुरात्मैवरिपुरात्मनः॥ ६४ ॥ बंधुरात्मात्मनस्तस्ययेनैवात्मात्मनाजितः॥ सएवनियतोबंधुः सएवनियतोरिपुः॥ ६५॥ क्षुद्राक्षेणेवजालेनझषावपिहितावुरू ॥ कामश्चराजन्क्रोधश्चतौप्रज्ञानंविलुंपतः॥ ६६ ॥

याःअवशाः ॥ ६० ॥ अर्थतोऽर्थहेतोः अनर्थतःअन्यायतः ॥ ६१ ॥ इंद्रियाणांवशइच्छातदनुसारीइंद्रियवशानुगः ॥ ६२ ॥६३ ॥ कृत्स्नस्योपदेशस्यफलमाह आत्मनेत्यर्धेन आत्मनाबुद्ध्याआत्मानंप्रत्यक्चैतन्यरूपंअन्विच्छेत् तत्रोपायमाह मनसःसंकल्पात्मकस्यबुद्धेश्चतन्मूलभूतायाःइंद्रियाणांचनिग्रहेणेत्यर्थः अत्रनतवसहायांतरापेक्षेत्याहात्मेति धीजयएवपुरुषार्थइत्यर्थः ॥ ६४॥ सएवधीरेवंजीवस्यबंधुःरिपुश्च ॥ ६५ ॥ द्वावपिमोहजालपिहितौ झषौमीनौउरूमहांतौ तत्रद्वितीयोन्यस्यजातिस्वभावाच्छ्रुरपिजालच्छेदार्थंमित्रत्वमापन्नोबंधुरपिभवति एवंधीश्चिदात्मनःसंसारप्रदत्वाच्छत्रुरपिमोहच्छेदार्थंतस्यमित्रमपिभवतीतिभावःक्षुद्राक्षेणसूक्ष्मछिद्रेण यद्वाउत्तरान्वय्येवायमर्थः कामक्रोधयोरावरकंप्रज्ञानंतौनाशयतः जालमिवमहामीनावित्यर्थः ॥ ६६ ॥

समवेक्ष्यअनुरुध्य संभारान्जयसाधनानि ॥ ६७ ॥ आभ्यंतरान्श्रोत्रादीन् मनोमयान्मनसोविकारभूतान् तथाचश्रुतिः मनसाह्येवपश्यतिमनसाशृणोतीति ॥ ६८ ॥ राजानोरावणादयः राज्यविभवैःऐश्वर्यविलासैःस्वकर्मभिःसीताहरणादिभिः ॥ ६९ ॥ ७० ॥ पंचइंद्रियाणि पंचप्रयोजनानिशब्दश्रवणादीनियेषांतान् उत्पततःउत्पथेनगच्छतः त्वंतुअजितचित्तत्वादुःसंगाच्चापद्रस्तोसीतिभावः ॥७१॥ अनायासःअचांचल्यम् ॥ ७२ ॥ तिनिक्षाद्वंद्वसहनशीलता वाक्गुप्ताअसंबद्धप्रलापाद्रक्षिता अंत्येषुनीचेषु त्वत्पुत्रेष्वार्जवादिकंगुप्तवाक्त्वंचनास्तीतिनैंऽत्याः ॥ ७३ ॥ आक्रोशोरूक्षभाषणं परिवादोनिंदा

समवेक्ष्येहधर्मार्थौसंभारान्योधिगच्छति ॥सवैसंभृतसंभारःसततंसुखमेधते ॥६७॥ यःपंचाभ्यंतरान्शत्रूनविजित्यमनोमयान्॥ जिगीषतिरिपूनन्यान्रिपवोभिभवंतितम्॥ ६८ ॥ दृश्यंतेहिमहात्मानोवध्यमानाःस्वकर्मभिः ॥ इंद्रियाणामनीशत्वाद्राजानोराज्यविभ्रमैः॥ ६९ ॥असंत्यागात्पापकृतामपापांस्तुल्योदंडःस्पृशतेमिश्रभावात्॥ शुष्केणार्द्रंदह्यतेमिश्रभावात्तस्मात्पापैःसहसंधिनकुर्यात्॥ ७० ॥ निजानुत्पततःशत्रून्पंचपंचप्रयोजनान्॥ योमोहान्ननिगृह्णातितमापद्रसतेनरम्॥७१॥अनसूयार्जवंशौचंसंतोषःप्रियवादिता॥दमःसत्यमनायासोनभवंतिदुरात्मनाम्॥७२॥ आत्मज्ञानमनायासस्तितिक्षाधर्मनित्यता वाक्चैवगुप्तादानंचनैतान्यंत्येषुभारत॥ ७३ ॥ आक्रोशपरिवादाभ्यांविहिंसंत्यबुधाबुधान् ॥ वक्तापापमुपादत्तेक्षममाणोविमुच्यते ॥ ७४ ॥ हिंसाबलमसाधूनांराज्ञांदंडविधिर्बलम् ॥ शुश्रूषातुबलंस्त्रीणांक्षमागुणवतांबलम् ॥ ७५॥ वाक्संयमोहिनृपतेसुदुष्करतमोमतः॥ अर्थवच्चविचित्रंचनशक्यंबहुभाषितुम्॥ ७६ ॥ अभ्यावहतिकल्याणंविविधंवाक्सुभाषिता ॥ सैवदुर्भाषिताराजन्ननर्थायोपपद्यते ॥ ७७॥ रोहतेसायकैर्विद्धंवनंपरशुनाहतम्॥ वाचादुरुक्तंबीभत्संनसंरोहतिवाक्क्षतम् ॥ ७८ ॥ कर्णिनालीकनाराचान्निर्हरंतिशरीरतः॥ वाक्शल्यस्तुननिर्हर्तुशक्योद्दद्दिशयोहिसः॥ ७९॥ वाक्सायकावदनान्निष्पतंतियैराहतःशोचतिरात्र्यहानि ॥ परस्यनामर्मसुतेपतंतितान्पंडितोनावसृजेत्परेभ्यः॥ ८० ॥ यस्मैदेवाःप्रयच्छंतिपुरुषायपराभवम्॥ बुद्धितस्यापकर्षंतिसोवाऽचीनानिपश्यति ॥ ८१ ॥ बुद्धौकलुषभूतायांविनाशेप्रत्युपस्थिते॥ अनयोनयसंकाशोदयान्नापसर्पति ॥८२॥ सेयंबुद्धिःपरीतातेपुत्राणांभरतर्षभ॥ पांडवानांविरोधेननचैनानवबुध्यसे॥८३॥ राजालक्षणसंपन्नस्त्रैलोक्यस्यापियोभवेत् ॥ शिष्यस्तेशासितासोस्तुधृतराष्ट्रयुधिष्ठिरः ॥ ८४॥

तयोर्वक्तात्वत्पुत्रःहिंस्रश्चातोनासौजयभाक् ॥ ७४ ॥ ७५ ॥ वाक्संयमोनियतंवचनं विचित्रंचमत्कारयुक्तम् ॥७६॥ ७७ ॥ बीभत्संनिंदितंयतोनसंरोहति ॥७८॥ कर्णीकर्णाकृतिफलकोबाणः नालीकःनलीकयाप्रक्षेप्योबाणः निर्हरंतिनिःसारयंति ॥ ७९ ॥ नामर्मसुकिंतुमर्मस्वेव सभायांद्रौपदीप्रतिदुर्वचनंवदतांत्वत्पुत्राणामपराधःक्षंतुमयोग्योस्तीतिभावः ॥ ८० ॥ अवाचीनानिनीचकर्माणि ॥ ८१ ॥ ॥ ८२ ॥ ८३ ॥ शिष्यस्तेत्वदाज्ञाकारी शासितापृथिव्याः ॥ ८४ ॥

भागधेयेराज्यांशेपुरस्कृतःमूर्धाभिषिक्तस्यपांडोःपुत्रास्तेराज्यार्हाः अतथाभूतस्यांधस्यतवपुत्रास्तेनराज्यार्हाइत्यर्थः ॥ ८५ ॥ अनुक्रोशात्दयालुत्वात् आनृशंस्यात्अक्रौर्यात् ॥ ८६ ॥ इतिउद्योगप० नैलकंठीयेभारतभा० विदुरवाक्येचतुस्त्रिंशोऽध्यायः ॥३४॥ ॥७॥ ॥ १ ॥ आर्जवंअवैषम्यम् ॥२॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ सुधन्वाब्राह्मणःपर्यंकंअधिरोहत्येवत्वंतुनीचोदैत्यःसन्किमर्थंतत्प्रत्याख्यानं

अतीवसर्वान्पुत्रांस्तेभागधेयपुरस्कृतः ॥ तेजसाप्रज्ञयाचैवयुक्तोधर्मार्थतत्त्ववित् ॥८५॥ अनुक्रोशादानृशंस्याद्योसौधर्मभृतांवरः ॥ गौरवात्तवराजेंद्रबहून्क्लेशांस्तितिक्षति ॥ ८६ ॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिप्रजागरपर्वणिविदुरनीतिवाक्येचतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥७॥ ॥धृतराष्ट्रउवाच ॥ ॥ब्रूहिभूयोमहाबुद्धेधर्मार्थसहितंवचः ॥ शृण्वतोनास्तिमेतृप्तिर्विचित्राणीहभाषसे ॥ १ ॥ ॥विदुरउवाच ॥ ॥ सर्वतीर्थेषुवास्नानंसर्वभूतेषुचार्जवम् ॥ उभेत्वेतेसमेस्यातामार्जवंवाविशिष्यते ॥ २ ॥ आर्जवंप्रतिपद्यस्वपुत्रेषुसततंविभो ॥ इहकीर्तिंपरांप्राप्यप्रेत्यस्वर्गमवाप्स्यसि ॥३ ॥ यावत्कीर्तिर्मनुष्यस्यपुण्यालोकेप्रगीयते ॥ तावत्सपुरुषव्याघ्रस्वर्गलोकेमहीयते ॥ ४॥ अत्राप्युदाहरंतीममितिहासंपुरातनम् ॥ विरोचनस्यसंवादंकेशिन्यर्थेसुधन्वना ॥ ५॥ स्वयंवरेस्थिताकन्याकेशिनीनामनामतः ॥ रूपेणाप्रतिमाराजन्विशिष्टपतिकाम्यया ॥ ६ ॥ विरोचनोथदैतेयस्तदातत्राजगामह ॥ प्राप्तुमिच्छंस्ततस्तत्रदैत्येंद्रंप्राहकेशिनी ॥ ७॥ केशिन्युवाच ॥ ॥ किंब्राह्मणाःस्विच्छ्रेयांसोदितिजाःस्विद्विरोचन ॥ अथकेनस्मपर्यंकंसुधन्वानाधिरोहति ॥ ८ ॥ ॥विरोचनउवाच ॥ ॥ प्राजापत्यास्तुवैश्रेष्ठावयंकेशिनिसत्तमाः ॥ अस्माकंखल्विमेलोकाःकेदेवाःकेद्विजातयः ॥ ९ ॥ ॥केशिन्युवाच ॥ ॥इहैवावांप्रतीक्षावउपस्थानेविरोचन ॥ सुधन्वाप्रातरागंतापश्येयंवांसमागतौ ॥ १० ॥ ॥ विरोचनउवाच ॥ ॥ तथाभद्रेकरिष्यामियथात्वंभीरुभाषसे ॥ सुधन्वानंचमांचैवप्रातर्द्रष्टासिसंगतौ ॥ ११ ॥ ॥ विदुरउवाच ॥ अतीतायांचशर्वर्यामुदितेसूर्यमंडले ॥ अथाजगामतंदेशंसुधन्वाराजसत्तम ॥ विरोचनोयत्रविभोकेशिन्यासहितःस्थितः ॥ १२ ॥ सुधन्वाचसमागच्छत्प्राह्लादिंकेशिनींतथा ॥ समागतंद्विजंदृष्ट्वाकेशिनीभरतर्षभ ॥ प्रत्युत्थायासनंतस्मैपाद्यमर्घ्यंददौपुनः ॥ १३ ॥ ॥ सुधन्वोवाच ॥ ॥ अन्वालभेहिरण्मयंप्राह्लादेतेवरासनम् ॥ एकत्वमुपसंपन्नोनत्वासेऽहंत्वयासह ॥ १४ ॥

करोषीतिभावः ॥८॥९॥ इहस्थाने उपस्थानेमामुपस्थातुं वांदैत्यब्राह्मणौअहंपश्येयम् ॥१०॥११॥ १२॥ समागच्छत् उभयोःसंमुखंअगच्छत् समागतंसंमुखंप्राप्तम् ॥१३॥ विरोचनेनसौवर्णेपीठेमयासहउपवेश्यतामितिप्रार्थितःसुधन्वाउवाच अन्वालभेस्पृशाम्येवहेप्राह्लादेएकत्वंत्वयासहसाम्यंउपसंपन्नश्चेत्भवेदहंगच्छेयमितिशेषः नतुत्वयासहएकासनेआसेउपविशामि ॥ १४ ॥

फलकंकाष्ठपीठं कूर्चं बृसीवर्तितदर्भमयंपीठंवा तवअर्हतेयोग्यंभवति ॥१५॥१६ ॥ उपासीतसेवते अधःस्थित्वेतिशेषः ॥ १७ ॥ प्रश्नंआवयोःकःश्रेष्ठइतिप्रश्नं येविदुस्तान्पृच्छाव ॥ १८ ॥ १९ ॥२० ॥ ॥२१॥२२॥सहनचरितंवैरात् ॥२३॥२४॥२५॥पीवरीपुष्टा कृतामधुपर्कार्थंउपकल्पिता ॥ २६ ॥ पथिष्विति प्रश्ननिर्णयेनैतत्प्राप्तमितिभावः ॥ २७ ॥ २८ ॥ २९ ॥ दुर्विवक्तादुष्टविवेककर्ताअन्याय्य

विरोचनउवाच ॥ तवार्हतेतुफलकंकूर्चंवाप्यथवाबृसी ॥ सुधन्वन्नत्वमर्होसिमयासहसमासनम् ॥ १५ ॥ ॥सुधन्वोवाच ॥ ॥ पितापुत्रौसहासीतांद्वौविप्रौक्षत्रियावपि ॥ वृद्धौवैश्यौचशूद्रौचनत्वन्यावितरेतरम् ॥१६॥ पिताहितेसमासीनमुपासीतैवमामधः ॥ बालःसुखैधितोगेहेनत्वंकिंचनबुध्यसे ॥१७॥ ॥ विरोचनउवाच ॥ ॥ हिरण्यंचगवाश्वंचयद्वित्तमसुरेषुनः ॥ सुधन्वन्विपणेतेनप्रश्नंपृच्छावयेविदुः ॥ १८ ॥ सुधन्वोवाच ॥ ॥ हिरण्यंचगवाश्वंचतवैवास्तुविरोचन ॥ प्राणयोस्तुपणंकृत्वाप्रश्नंपृच्छावयेविदुः ॥ १९ ॥ ॥विरोचनउवाच ॥ ॥ आवांकुत्रगमिष्यावःप्राणयोर्विपणेकृते ॥ नतुदेवेष्वहंस्यातानमनुष्येषुकर्हिचित् ॥ २० ॥ ॥सुधन्वोवाच ॥ ॥ पितरंतेगमिष्यावःप्राणयोर्विपणेकृते ॥ पुत्रस्यापिसहेतोर्हिप्रह्लादोनानृतंवदेत् ॥२१॥ ॥विदुरउवाच॥ ॥एवंकृतपणौक्रुद्धौतत्राभिजग्मतुस्तदा ॥ विरोचनसुधन्वानौप्रह्लादोयत्रतिष्ठति ॥ २२ ॥ ॥प्रह्लादउवाच ॥ ॥ इमौतौसंप्रदृश्येतेयाभ्यांनचरितंसह ॥ आशीविषाविवक्रुद्धावेकमार्गाविहागतौ ॥ २३ ॥ किंवैसहैवंचरथोनपुराचरथःसह ॥ विरोचनैतत्पृच्छामिकिंतेसख्यंसुधन्वना ॥ २४ ॥ ॥विरोचनउवाच॥ ॥ नमेसुधन्वनासख्यंप्राणयोर्विपणावहे ॥ प्रह्लादतत्त्वंपृच्छामिमाप्रश्नमनृतंवदेः ॥ २५ ॥ ॥ प्रह्लादउवाच ॥ ॥ उदकंमधुपर्कंवाप्यानयंतुसुधन्वने ॥ ब्रह्मन्नभ्यर्चनीयोसिश्वेतागौःपीवरीकृता ॥२६॥ सुधन्वोवाच ॥ उदकंमधुपर्कंचपथिष्वेवार्पितंमम ॥ प्रह्लादत्वंतुमेतथ्यंप्रश्नंप्रब्रूहिपृच्छतः ॥ किंब्राह्मणाःस्विच्छ्रेयांसउताहोस्विद्विरोचनः ॥ २७ ॥ ॥प्रह्लादउवाच ॥ ॥पुत्रएकोममब्रह्मंस्त्वंचसाक्षादिहास्थितः ॥ तयोर्विवदतोःप्रश्नंकथमस्मद्विधोवदेत् ॥ २८ ॥ ॥सुधन्वोवाच ॥ ॥गांप्रदद्यास्त्वौरसाययद्वान्यत्स्यात्प्रियंधनम् ॥ द्वयोर्विवदतोस्तथ्यंवाच्यंचमतिमंस्त्वया ॥ २९ ॥ ॥प्रह्लादउवाच ॥ ॥ अथयोनैवप्रब्रूयात्सत्यंवायदिवानृतम् ॥ एतत्सुधन्वन्पृच्छामिदुर्विवक्तास्मकिंवसेत् ॥ ३० ॥ ॥ सुधन्वोवाच ॥ ॥ यांरात्रिमधिविन्नास्त्रीयांचैवाक्षपराजितः ॥ यांचभारांभितप्तांगोदुर्विवक्तास्मतांवसेत् ॥३१॥ नगरेप्रतिरुद्धःसन्बहिर्द्वारेबुभुक्षितः ॥ अमित्रान्भूयसःपश्येद्यःसाक्षमनृतंवदेत् ॥३२॥ वक्तेत्यर्थः किंवसेत्किंदुःखंप्राप्नुयात् ॥ ३० ॥ अधिविन्नाकृतसपत्नीकास्त्रीतांरात्रिंवसेत्तद्वद्दुःखंप्राप्नुयात् ॥ ३१ ॥ नगरेइति शरणमलभमानःक्षुधार्तःशत्रुभिर्वेष्टितश्चयत्दुःखंलभतेसःअनृतसाक्ष्यवक्तापिलभेतेत्यर्थः ॥ ३२ ॥

पंचपूर्वजान्पश्चनृतेअजादिपश्चर्थमनृतेउक्तेसतिहंतिनाशयतिपरलोकात्ष्याबयति एवमुत्तरत्र ॥ ३३ ॥ भूमिंतुन्याकेशिनीतदर्थंअनृतंभूम्यनृतम् ॥ ३४ ॥ अंगिराःसुधन्वनःपिता त्वत्त्वत्तः ॥ ३५ ॥ ॥ ३६ ॥ ३७ ॥ पादप्रक्षालनंहरिद्रयापादधावनं कुमार्याःकेशिन्याः विवाहेदंपत्योःपरस्परंहरिद्रयापादधावनंकुर्वतीतिप्रसिद्धं अस्यैवभार्याकेशिनीभवत्वित्यर्थः ॥ ३८ ॥ प्रकृतेआख्यायिकोपयोगमाह तस्मादिति अब्रुवन्सत्यमितिशेषः ॥ ३९ ॥ तवदैवंप्रतिकूलंअधीतंचनिष्फलमित्याहत्रयेण नदेवाइति ॥ ४० ॥ ४१ ॥ छंदांसिवेदाः ॥ ४२ ॥ अंतरंवियोगं विवादंवैरप्रवर्तनं ज्ञातिभेदंकलहं

पंचपश्चनृतेहंतिदशहंतिगवानृते ॥ शतमश्वानृतेहंतिसहस्रंपुरुषानृते ॥ ३३ ॥ हंतिजातानजातांश्चहिरण्यार्थेऽनृतंवदन् ॥ सर्वंभूम्यनृतेहंतिमास्मभूम्यनृतंवदेः ॥ ३४ ॥ ॥ प्रह्लादउवाच ॥ ॥ मत्तःश्रेयानंगिरावैसुधन्वात्वद्विरोचन ॥ मातास्यश्रेयसीमातुस्तस्मात्त्वंतेनवैजितः ॥ ३५ ॥ विरोचनसुधन्वायंप्राणानामीश्वरस्तव ॥ सुधन्वन्पुनरिच्छामित्वयादत्तंविरोचनम् ॥ ३६ ॥ ॥ सुधन्वोवाच ॥ ॥ यद्धर्ममवृणीथास्त्वंनकामादनृतंवदीः ॥ पुनर्ददामितेपुत्रंतस्मात्प्रह्लाददुर्लभम् ॥ ३७ ॥ एषप्रह्लादपुत्रस्तेमयादत्तोविरोचनः ॥ पादप्रक्षालनंकुर्यात्कुमार्याःसन्निधौमम ॥ ३८ ॥ ॥ विदुरउवाच ॥ ॥ तस्माद्राजेंद्रभूम्यर्थेनानृतंवक्तुमर्हसि ॥ मागमःससुतामात्योनाशंपुत्रार्थमब्रुवन् ॥ ३९ ॥ नदेवादंडमादायरक्षंतिपशुपालवत् ॥ यंतुरक्षितुमिच्छंतिबुद्ध्यासंविभजंतितम् ॥ ४० ॥ यथाययाहिपुरुषःकल्याणेकुरुतेमनः ॥ तथातथास्यसर्वार्थाःसिध्यंतेनात्रसंशयः ॥ ४१ ॥ नैनंछंदांसिवृजिनात्तारयंतिमायाविनंमाययावर्तमानम् ॥ नीडंशकुंताइवजातपक्षाश्छंदांस्येनंप्रजहत्यंतकाले ॥ ४२ ॥ मद्यपानंकलहंपूगवैरंभार्यापत्योरंतरंज्ञातिभेदम् ॥ राजद्विष्टंस्त्रीपुंसयोर्विवादंवर्ज्यान्याहुर्यश्चपंथाःप्रदुष्टः ॥ ४३ ॥ सामुद्रिकंवणिजंचोरपूर्वंशलाकधूर्तंचचिकित्सकंच ॥ अरिंचमित्रंचकुशीलवंचनैतान्साक्ष्येत्वधिकुर्वीतसप्त ॥ ४४ ॥ मानाग्निहोत्रमुतमानमौनंमानेनाधीतमुतमानयज्ञः ॥ एतानिचत्वार्यभयंकराणिभयंप्रयच्छंत्ययथाकृतानि ॥ ४५ ॥ अगारदाहीगरदःकुंडाशीसोमविक्रयी ॥ पर्वकारश्चसूचीचमित्रध्रुक्पारदारिकः ॥ ४६ ॥

चतवप्रवृत्तिर्नयोग्येतिभावः ॥ ४३ ॥ सामुद्रिकंहस्तरेखादिपरीक्षकं वणिजंचोरपूर्वंपूर्वंचोरःपश्चाद्वणिग्भूतस्तं कूटतुलावंतंवा शलाकधूर्तंशलाकयापाशादिनाबाशकुनादिकमुक्त्वायोऽन्यानुवंचयतितं अरिंविपरीतसाक्ष्यभयात् मित्रंपरीक्षकाणामविश्वासात् कुशीलवंकुत्सितंशीलंवातिअनुसरतीतितं नर्तकीदासंविटोन्मत्तादिकंवा तवतुकूटद्यूतकारीशकुनिःकुशीलवएवप्रमाणम् ॥ ४४ ॥ सत्कर्मद्वारापितस्यसाधुत्वंनमंतव्यमित्याह मानेति मानःलोकेषुउत्कर्षःतदर्थान्यग्निहोत्रादीनिभयदानीत्यर्थः मौनंध्यानम् ॥ ४५ ॥ कुंडाशीभगभक्षः जीवतिभर्तरिजाराज्जातःकुंडस्तेननिमित्तेनाशितुंशीलः सोमविक्रयीप्रसिद्धः पर्वकारःशरकृत्आयुधमात्रकर्तेत्यर्थः सूचीसूचकोनक्षत्रादीनांपरदोषाणांचज्यौतिषिकःपिशुनोवा ॥ ४६ ॥

काकःकाकवत्क्षतोद्वर्तनेन दुःखितस्यापिदुःखप्रदः नास्तिकःपरलोकादिद्वेषी ॥ ४७ ॥ स्रुवप्रग्रहणःराजकीयवृत्तिबलेनसर्वेभ्योवणिग्भ्यः स्रुवेणधान्यादिकमादत्ते स्वोचीयाहकइतिभाषायांप्रसिद्धः ग्रामपुरोहितइत्यन्ये व्रात्यःअतीतोपनयनकालःपतितसावित्रीकोवा कीनाशःकर्षकः आत्मवान्समर्थोपियोरक्षेत्युक्तोहिंस्यात् एतेष्वायंद्वयंत्वत्पुत्रेषुदृष्टम् ॥ ४८ ॥ तृणोल्कयातृणज्वालया जातरूपंरूपवद्वस्तुज्ञायतेंऽधकारेसति भद्रोदृष्टःधर्मइतियावत् दृत्तेनशीलेनसोस्तिनास्तीतिज्ञायते व्यवहारेणअहिंसादिप्रधानेन कृच्छ्रेषुदुर्भिक्षादिसंकटेषु त्वत्पुत्रेषुधर्मःसाधुत्वंचनास्तीत्यर्थः ॥ ४९ ॥

भ्रूणहागुरुतल्पीचयश्चस्यात्पानपोद्विजः ॥ अतितीक्ष्णश्चकाकश्चनास्तिकोवेदनिंदकः ॥ ४७ ॥ स्रुवप्रग्रहणोव्रात्यःकीनाशश्चात्मवानपि ॥ रक्षेत्युक्तश्चयोहिंस्यात्सर्वेब्रह्महभिःसमाः ॥ ४८ ॥ तृणोल्कयाज्ञायतेजातरूपंवृत्तेनभद्रोव्यवहारेणसाधुः ॥ शूरोभयेष्वर्थकृच्छ्रेषुधीरःकृच्छ्रेष्वापत्सुसुहृदश्चारयश्च ॥ ४९ ॥ जरारूपंहरतिहिधैर्यमाशामृत्युःप्राणान्धर्मचर्यामसूया ॥ क्रोधःश्रियंशीलमनार्यसेवाह्रियंकामःसर्वमेवाभिमानः ॥ ५० ॥ श्रीर्मंगलात्प्रभवतिप्रागल्भ्यात्संप्रवर्धते ॥ दाक्ष्यात्तुकुरुतेमूलंसंयमात्प्रतितिष्ठति ॥ ५१ ॥ अष्टौगुणाःपुरुषंदीपयंतिप्रज्ञाचकौल्यंचदमःश्रुतंच ॥ पराक्रमश्चाबहुभाषिताचदानंयथाशक्तिकृतज्ञताच ॥ ५२ ॥ एतान्गुणांस्तातमहानुभावानेकोगुणःसंश्रयतेप्रसह्य ॥ राजायदासत्कुरुतेमनुष्यंसर्वान्गुणानेषगुणोविभाति ॥ ५३ ॥ अष्टौनृपेमानिमनुष्यलोकेस्वर्गस्यलोकस्यनिदर्शनानि ॥ चत्वार्येषामन्ववेतानिसद्भिश्चत्वारिचैषामनुयांतिसंतः ॥ ५४ ॥ यज्ञोदानमध्ययनंतपश्चचत्वार्येतान्यन्ववेतानिसद्भिः ॥ दमःसत्यमार्जवमानृशंस्यंचत्वार्येतान्यनुयांतिसंतः ॥ ५५ ॥ इज्याध्ययनदानानितपःसत्यंक्षमाघृणा ॥ अलोभइतिमार्गोयंधर्मस्याष्टविधःस्मृतः ॥ ५६ ॥ तत्रपूर्वचतुर्वर्गोदंभार्थमपिसेव्यते ॥ उत्तरश्चचतुर्वर्गोनामहात्मसुतिष्ठति ॥ ५७ ॥ नसासभायत्रनसंतिवृद्धानतेवृद्धायेनवदंतिधर्मं ॥ नासौधर्मोयत्रनसत्यमस्तिनतत्सत्यंयच्छलेनाभ्युपेतम् ॥ ५८ ॥ सत्यंरूपंश्रुतंविद्याकौल्यंशीलंबलंधनम् ॥ शौर्यंचचित्रभाष्यंचदशमेस्वर्गयोनयः ॥ ५९ ॥

जरेति त्वत्पुत्रेःभिमानदोषोस्ति ॥ ५० ॥ श्रीरिति दाक्ष्यंशीघ्रकारित्वं त्वयिसंयमाभावान्नश्रीःस्थास्यति ॥ ५१ ॥ अष्टाविति राज्ञापुरस्कृतंपुरुषंप्रज्ञादयोहृदादनुसरंतीतिश्लोकद्वयार्थः ॥ ५२ ॥ एषगुणोराजसत्कारः विभातिभासयति कर्णादिषुसत्कृतेषुआगंतुकाएतेगुणाःसंतिनस्वाभाविकाःअतस्तेनोपयोक्ष्यंतइतिभावः ॥ ५३ ॥ इमानिवक्ष्यमाणानि अन्ववेतानिनित्यसंबद्धानि अनुयांतियत्नेनभजंति ॥ ५४ ॥ ५५ ॥ ५६ ॥ तत्रेति असत्यपिदमादौदंभार्थंयज्ञादिसंभवात् ॥ ५७ ॥ ५८ ॥ रूपंविनयमुद्रा श्रुतंअध्ययनं विद्यादेवतायुपासनं चित्रभाष्यंयुक्तियुक्तंवचनंदशसंसर्गजागुणाइतिपाठेतथुक्तैःसहसंगेकृतेएतेजायंतेतेनसत्संगःकर्तव्यइतिभावः ॥ ५९ ॥

पापकीर्तिःकलंकित्वेनप्रसिद्धः ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ वंदशूकोमर्मच्छेत्ता निष्ठुरःअप्रियवाक् नचिरात्शीघ्रम् ॥ ६४ ॥ नक्रुच्छ्रं समस्तंपदंसुखवाची ॥६५॥ आगमयतिआनयति ॥६६॥वर्षा इत्यत्यंतसंयोगेद्वितीया ॥ ६७ ॥ ६८ ॥ गतपारंप्राप्ततत्त्वम् ॥ ६९ ॥ परिपाकसुखंकर्मत्वःपुत्रानकुर्वतेति अन्यायेनचसुखंलिप्संतितत्तुविपरीतमेवेत्याह धनेनेति ॥ ७० ॥ आत्मवतांजितचित्तानां प्रच्छन्नपा

पांकुर्वन्पापकीर्तिःपापमेवाश्नुतेफलम् ॥ पुण्यंकुर्वन्पुण्यकीर्तिःपुण्यमत्यंतमश्नुते ॥ ६० ॥ तस्मात्पापंनकुर्वीतपुरुषःशंसितव्रतः ॥ पापंप्रज्ञानाशयतिक्रियमा णंपुनःपुनः ॥ ६१ ॥ नष्टप्रज्ञःपापमेवनित्यमारभतेनरः ॥ पुण्यंप्रज्ञांवर्धयतिक्रियमाणंपुनःपुनः ॥ ६२ ॥ वृद्धप्रज्ञःपुण्यमेवनित्यमारभतेनरः ॥ पुण्यंकुर्वन्पुण्यकी र्तिःपुण्यंस्थानंस्मगच्छति ॥ तस्मात्पुण्यंनिषेवेतपुरुषःसुसमाहितः ॥ ६३ ॥ असूयकोदंदशूकोनिष्ठुरोवैरकृच्छठः ॥ सक्रुच्छ्रंमहदाप्नोतिनचिरात्पापमाचरन् ॥ ॥ ६४ ॥ अनसूयुःकृतप्रज्ञःशोभनान्याचरन्सदा ॥ नक्रुच्छ्रंमहदाप्नोतिसर्वत्रचविरोचते ॥ ६५ ॥ प्रज्ञामेवागमयतियःप्राज्ञेभ्यःसपंडितः ॥ प्राज्ञोह्यवाप्यध र्मार्थौशक्नोतिसुखमेधितुम् ॥ ६६ ॥ दिवसेनैवतत्कुर्याद्येनरात्रौसुखंवसेत् ॥ अष्टमासेनतत्कुर्याद्येनवर्षाःसुखंवसेत् ॥ ६७ ॥ पूर्ववयसितत्कुर्याद्येनवृद्धःसुखंव सेत् ॥ यावज्जीवेनतत्कुर्याद्येनप्रेत्यसुखंवसेत् ॥ ६८ ॥ जीर्णमन्नंप्रशंसंतिभार्यांचगतयौवनाम् ॥ शूरंविजितसंग्रामंगतपारंतपस्विनम् ॥ ६९ ॥ धनेनाधर्मल ब्धेनयच्छिद्रमपिधीयते ॥ असंवृतंतद्ध्रुवतिततोन्यदवदीर्यते ॥ ७० ॥ गुरुरात्मवतांशास्त्राशास्त्राराजादुरात्मनाम् ॥ अथप्रच्छन्नपापानांशास्त्रावैवस्वतोयमः ॥ ७१ ॥ ऋषीणांचनदीनांचकुलानांचमहात्मनाम् ॥ प्रभवोनाधिगंतव्यःस्त्रीणांदुश्चरितस्यच ॥ ७२ ॥ द्विजातिपूजाभिरतोदाताज्ञातिषुचार्जवी ॥ क्षत्रियःशील भाग्राजांश्चिरंपालयतेमहीम् ॥ ७३ ॥ सुवर्णपुष्पांपृथिवींचिन्वंतिपुरुषास्त्रयः ॥ शूरश्चकृतविद्यश्चयश्चजानातिसेवितुम् ॥ ७४ ॥ बुद्धिश्रेष्ठानिकर्माणिबाहुमध्या निभारत ॥ तानिजंघाजघन्यानिभारप्रत्यवराणिच ॥ ७५ ॥ दुर्योधनेथशकुनौमूढेदुःशासनेतथा ॥ कर्णेचैश्वर्यमाधायकथंत्वंभूतिमिच्छसि ॥ ७६ ॥ सर्वैर्गुणैरु पेतास्तुपांडवाभरतर्षभ ॥ पितृवत्त्वयिवर्ततेतेषुवर्तस्वपुत्रवत् ॥ ७७ ॥ ॥ इति० म० उद्योगप० प्रजागरपर्वणिविदुरहितवाक्येपंचत्रिंशोऽध्यायः ॥ ३५ ॥

पोदुर्योधनः ॥ ७१ ॥ प्रभवःमाहात्म्यं प्रभवोजन्ममूलेस्याज्जन्महेतौपराक्रमेइतिमेदिनी नाधिगंतव्यःनाधिगंतुंशक्योऽनंतत्वात् ॥ ७२ ॥ ज्ञातिषुअनार्जवीदुर्योधनः ॥ ७३ ॥ शूराःपांडवाःसर्वत्रसुवर्णभा जइतिभावः ॥ ७४ ॥ बुद्धिरेवयेषांफलसिद्धौसाधनंतानिबुद्धिश्रेष्ठानिप्रशस्ततमानिकर्माणि बाहुमध्यानिबाहुबलसाध्यानिमध्यानि जंघेतिगोपनीयत्वंलक्ष्यते तेनकपटसाध्यानिजघन्यानिनीचानि येषांसिद्धौत्वशिरसिभारःसंकटंपतितानिनीचतराणि ॥ ७५ ॥ तत्रांत्यद्वयंनंतादुर्योधनादयइतिमत्वाप्राह दुर्योधनेइति ॥ ७६ ॥ ७७ ॥ ॥ इतिउद्योगप० नै० भा० पंचत्रिंशोऽध्यायः ॥ ३५ ॥

अत्रैवेति ॥१॥ हंसरूपेणपरिव्राजकरूपेण ॥२॥ अनुमातुंलिंगेनज्ञातुं काव्यांविद्वल्लक्षणाभिधायिनीम् ॥ ३॥ मेमयासंश्रुतं गुरुभ्यइतिशेषः तदेवाह धृतिरिति धृतिःदुःखैरभिघातेपिअविकल्यं दमःसर्वेंद्रि यजयः सत्यधर्माःब्रह्मप्राप्तिकाधर्माःधारणाध्यानसमाधयःतेषामनुवृत्तिरविच्छेदः नैश्वर्यंथिचिज्जडयोरात्मांतःकरणयोरेकलोलीभावंविनीयतयोःपृथक्करणेनशिथिलीकृत्य प्रियाप्रियेसुखदुःखे आत्मसमं आत्मसाम्यं नयीतप्रापयेत् प्रियाप्रियधर्मिणोंतःकरणस्यात्मन्यध्यस्तस्यत्वाधिष्ठानेप्रलयेसतितयोरपितत्रैवलयइत्यर्थः यथारज्ज्वांरज्जुसर्पेलीनेसतिभीषणत्वादयोपितत्रैवलीयंतेतद्वत् ॥ ४ ॥ नाक्रोशेत्

विदुरउवाच ॥ ॥ अत्रैवोदाहरंतीममितिहासंपुरातनम् ॥ आत्रेयस्यचसंवादंसाध्यानांचेतिनःश्रुतम् ॥ १ ॥ चरंतंहंसरूपेणमहर्षिसंशितव्रतम् ॥ साध्यादेवाम हाप्राज्ञंपर्यपृच्छंतवैपुरा ॥ २ ॥ ॥ साध्याऊचुः ॥ ॥ साध्यादेवावयमेतेमहर्षेदृष्ट्वाभवंतंनशक्नुमोनुमातुम् ॥ श्रुतेनधीरोबुद्धिमांस्त्वंमतोनःकाव्यांवाचंवक्तुमर्हस्युदाराम् ॥ ३ ॥ ॥ हंसउवाच ॥ ॥ एतत्कार्यममराःसंश्रुतंमेधृतिःशमःसत्यधर्मानुवृत्तिः ॥ ग्रंथिंविनीयहृदयस्यसर्वंप्रियाप्रियेचात्मसमंनयीत ॥ ४ ॥ आक्रुश्य मानोनाक्रोशेन्मन्युरेवतितिक्षतः ॥ आक्रोष्टारंनिर्दहतिसुकृतंचास्यविंदति ॥ ५ ॥ नाक्रोशीस्यान्नावमानीपरस्यमित्रद्रोहीनोतनीचोपसेवी ॥ नचाभिमानीनच हीनवृत्तोरूक्षांवाचंरुषतींवर्जयीत ॥ ६ ॥ मर्माण्यस्थीनिहृदयंतथासून्रूक्षावाचोनिर्दहंतीहपुंसाम् ॥ तस्माद्वाचमुषतींरूक्षरूपांधर्मारामोनित्यशोवर्जयीत ॥ ॥ ७ ॥ अरुंतुदंपरुषंरूक्षवाचंवाक्कंटकैर्वितुदंतंमनुष्यान् ॥ विद्यादलक्ष्मीकृतमंजनानांमुखेनिबद्धांनिर्ऋतिंवैवहंतम् ॥ ८ ॥ परश्चेदेनमभिविध्येतबाणैर्भृशं सुतीक्ष्णैरनलार्कदीप्तैः ॥ सविध्यमानोप्यतिदह्यमानोविद्वाक्कविःसुकृतंमेदधाति ॥ ९ ॥ यदिसंतंसेवतियद्यसंतंतपस्विनंयदिवास्तेनमेव ॥ वासोयथारंगवशं प्रयातितथासतेषांवशमभ्युपैति ॥ १० ॥ ॥ अतिवादंनप्रवदेन्नवादयेद्योनाहतःप्रतिहन्यान्नघातयेत् ॥ हंतुंचयोनेच्छतिपापकंवैतस्मैदेवाःस्पृहयंत्यागताय ॥ ॥ ११ ॥ अव्याहृतंव्याहृताच्छ्रेयआहुःसत्यंवदेद्व्याहृतंतद्वितीयम् ॥ प्रियंवदेद्व्याहृतंतत्तृतीयंधर्म्यंवदेद्व्याहृतंतच्चतुर्थम् ॥ १२ ॥ यादृशैःसन्निविशतेयादृशांश्चोपसेवते ॥ यादृगिच्छेच्चभवितुंतादृग्भवतिपूरुषः ॥ १३ ॥

नशपेत् यतस्तितिक्षतोमन्युःक्रोधएवआक्रोष्टारंदहति ॥ ५ ॥ रुषतीरोषवती पाठांतरेउषतीदाहिकांवा ॥ ६ ॥ ७ ॥ निर्ऋतिंअलक्ष्मीमृत्युंवा ॥८॥ बाणैःवाग्बाणैः वधातिपुण्णाति ॥९॥ त्वत्पुत्रारूक्षवा चस्त्वमपितत्संगात्तादृशोभविष्यसीत्याह यदीति रंगस्यनीलादेर्वशंनीलताम् ॥१०॥अतिप्रोक्तोपिनवदेत्वाद्येद्वा अनाहतोनैवप्रतिहन्यात् आहतोपिपापकंहंतारंयदिहंतुंनेच्छेत्सदेवानामपिश्रेष्ठोभवती त्यर्थः ॥ ११ ॥ अव्याहृतंमौनं ततोपिश्रेयःसत्यवचनं सत्यमपिप्रियंचेत्ततोपिश्रेयः तदपिधर्मादनपेतंचेत्श्रेष्ठतममित्यर्थः ॥ १२ ॥ तस्मात्सत्संगएवत्वयापिकर्तव्यइत्याशयेनाह यादृशैरिति ॥ १३ ॥

यतोयतइति यथास्वमेवाशाद्विषयान्निवर्त्तस्तज्जेनदुःखेनमुच्यते एवंजापतिस्वामविषयजेन सुषुप्तौसमाधौचसर्वतोनिवृत्तोदुःखलेशमपिनभजतेऽतोनिवृत्तिरेवत्वयाकार्यैतिभावः ॥ १४ ॥ अस्यामवस्थायांपुरुषस्यत्वंकिंचिंदुःखादिकमस्तीत्याह नजीयतेचेति नानुजिगीषतेइतिपाठेनापुरुषः ॥ १५ ॥ भावंकल्याणं अभावेअकल्याणे ॥ १६ ॥ अनर्थकंमिथ्यानसांत्वयति ॥ १७ ॥ उपहतोगदयाघोषया त्रायांगंधर्वैस्ताडितः अभिशस्तःअभितःशस्त्रैर्विदीर्णः मन्युवशात्कोधवशात्नावर्त्ततेनक्रजुर्भवतियतःकृतघ्नः पांडवैस्तदामोचितोपितदुपकारंहत्येव एताःकलाःचित्तस्यवृत्तयःअधमस्यैव॥१८॥अधमल

यतोयतोनिवर्त्ततेततस्ततोविमुच्यते॥ निवर्तनाद्धिसर्वतोनवैत्तिदुःखमण्वपि॥ १४॥ नजीयतेचानुजिगीषतेन्यान्नवैरकृच्चाप्रतिघातकश्च॥ निंदाप्रशंसासु समस्वभावोनशोचतेहृष्यतिनैवचायम्॥ १५॥ भावमिच्छतिसर्वस्यनाभावेकुरुतेमनः॥सत्यवादीमृदुर्दांतोयःसउत्तमपूरुषः॥ १६॥ नानर्थकंसांत्वयतिप्रतिज्ञाययददातिच॥ रंध्रंपरस्यजानातियःसमध्यमपूरुषः॥ १७॥ दुःशासनस्तूपहतोभिशस्तोनावर्त्ततेमन्युवशात्कृतघ्नः॥ नकस्यचिन्मित्रमथोदुरात्माकलाश्चैता अधमस्येहपुंसः॥ १८॥ नश्रद्दधातिकल्याणंपरेभ्योप्यात्मशंकितः॥ निराकरोतिमित्राणियोवैसोधमपूरुषः॥ १९॥ उत्तमानेवसेवेतप्राप्तकालेतुमध्यमान्॥ अधमांस्तुनसेवेतयइच्छेद्भूतिमात्मनः॥ २०॥ प्राप्नोतिवैचित्तमसद्वलेननित्योत्थानात्प्रज्ञयापौरुषेण॥ नत्वेवसम्यग्लभतेप्रशंसांनवृत्तमाप्नोतिमहाकुलानाम् ॥ २१ ॥ ॥ धृतराष्ट्रउवाच॥ ॥ महाकुलेभ्यःस्पृहयंतिदेवाधर्मार्थनित्याश्चबहुश्रुताश्च ॥ पृच्छामित्वांविदुरप्रश्नमेतंभवंतिवैकानिमहाकुलानि॥ २२॥ विदुरउवाच॥ ॥तपोदमोब्रह्मवित्तंवितानाःपुण्याविवाहाःसततान्नदानम्॥ येष्वेवैतेसप्तगुणावसंतिसम्यग्वृत्तास्तानिमहाकुलानि॥ २३॥येषांनवृत्तंव्यथतेनयोनिश्चित्तप्रसादेनचरंतिधर्मम्॥येकीर्तिमिच्छंतिकुलेविशिष्टांत्यक्तानृतास्तानिमहाकुलानि॥ २४॥अनिज्ययाकुविवाहैर्वेदस्योत्सादनेनच॥ कुलान्यकुलतांयांतिधर्मस्यातिक्रमेणच॥ २५॥ देवद्रव्यविनाशेनब्रह्मस्वहरणेनच॥ कुलान्यकुलतांयांतिब्राह्मणातिक्रमेणच॥ २६॥ ब्राह्मणानांपरिभवात्परिवादाच्चभारत॥ कुलान्यकुलतांयांतिन्यासापहरणेनच॥ २७॥ कुलानिसमुपेतानिगोभिःपुरुषतोर्थतः॥ कुलसंख्यांनगच्छंतियानिहीनानिवृत्ततः॥ २८॥

क्षणमाह नेति परेभ्यःगुरुभ्यः आत्मन्येवशंकितःविश्वासहीनः ॥ १९ ॥ २० ॥ २१ ॥ महाकुलेभ्यइतिस्पृहेरीप्सितइतिकर्मणिचतुर्थी ॥ २२ ॥ तपःकृच्छ्रचांद्रायणादि दमःइंद्रियजयः ब्रह्मवित्तंब्राह्मणस्वधनंवेदाध्ययनंवेदाध्यापनंच वितानाःयज्ञकर्माणि सम्यग्वृत्ताश्चये तानि स्त्रीलिंगत्वंविधेयापेक्षया महाकुलानिविद्धि ॥ २३ ॥ नव्यथतेनचलति नयोनिःपित्रादयोपियेषांदोषेणनव्यथंतेकिंतुगुणैरेवतुष्यंति ॥ २४ ॥ २५ ॥ २६ ॥ परिभवात्ताडनात् परिवादात्निंदातः ॥ २७ ॥ गोभिर्वाग्भिर्विक्रयेत्यर्थः पुरुषतःसत्पुरुषैःअर्थतःधनैश्चकुलानिकुलसंख्यांकुलेषुगणनांसमुपेतानिभवंति ॥ २८ ॥

॥ ३७ ॥

वृत्ततःधर्मेण कर्षतिआहरंति ॥ २९ ॥३०॥ गोभिर्विक्रयाभिः ॥ ३१ ॥ नैरुतिकःकपटीवैरकृदादयःकुलघ्नाइत्यर्थः ॥ ३२ ॥ प्रसंगाद्वृत्तलक्षणमाह यश्चेति नइतिअस्मच्छब्दस्यादेशश्चतुर्थ्यननःसइतिपाठे नतस्येतिपाठेतुत्रयमेव निर्वपेत्कुर्यात् पितृनितिपाठेनोनिषेधार्थः ॥३३॥ नोच्छिद्यतेकिंत्वतिथीनुपगच्छंत्येव ॥ ३४ ॥ सत्कृतिंसत्कारंकर्तुंप्रवृत्तानितृणादीनि ॥३५॥ युक्ताःस्यंदनवदविकलाः ॥ ३६॥ प्रकृतमाह नतदिति तवतुशंकाकुलस्यमध्यपिमित्रत्वबुद्धिर्नास्तीतिभावः संगतानिसंबंधमात्राणि ॥३७॥ मूर्खस्यतुदुर्योधनादेःकुलशीलादिभिरसंबद्धोपिकर्णादिर्मित्रभावेनास्तीत्याशयेनाह यइति बंधुः

वृत्ततस्त्वविहीनानिकुलान्यल्पधनान्यपि॥कुलसंख्यांचगच्छंतिकर्षतिचमहद्यशः॥ २९॥ वृत्तंयत्नेनसंरक्षेद्वित्तमेतिचयातिच॥ अक्षीणोवित्ततःक्षीणोवृत्तत स्तुहतोहतः॥ ३०॥ गोभिःपशुभिरश्वैश्चकृष्याचस्तुसमृद्धया॥कुलानिनप्ररोहंतियानिहीनानिवृत्ततः॥ ३१॥ मानःकुलेवैरकृत्कश्चिदस्तुराजामात्योमापरस्वापहारी॥ मित्रद्रोहीनैरुतिकोनृतीवापूर्वाशीवापितृदेवातिथिभ्यः॥ ३२॥ यश्चनोब्राह्मणान्हन्याद्यश्चनोब्राह्मणान्द्विषेत्॥ननःससमितिंगच्छेद्यश्चनोनिर्वपेत्कषिम्॥ ३३॥तृणानिभूमिरुदकंवाक्चतुर्थीचसूनृता॥ सतामेतानिगेहेषुनोच्छिद्यंतेकदाचन॥३४॥ श्रद्धयापरयाराजन्नुपनीतानिसत्कृतिं॥ प्रवृत्तानिमहाप्राज्ञधर्मिणांपुण्यकर्मिणां॥ ३५॥ सूक्ष्मोपिभारंनृपतेस्यंदनोवैशक्तोवोढुंनतथान्येमहीजाः॥ एवंयुक्ताभारसहाभवंतिमहाकुलीनानतथान्येमनुष्याः॥३६॥ नतन्मित्रंयस्यकोपाद्बिभेतियद्वामित्रंशंकितेनोपचर्यं॥ यस्मिन्मित्रेपितरीवाश्वसीततद्वैमित्रंसंगतानीतराणि॥ ३७॥ यःकश्चिदप्यसंबद्धोमित्रभावेनवर्तते॥ सएवबंधुस्तन्मित्रंसागतिस्तत्परायणम्॥ ३८॥ चलचित्तस्यवैपुंसोवृद्धाननुपसेवतः॥ पारिप्लवमतेर्नित्यमध्रुवोमित्रसंग्रहः॥ ३९॥ चलचित्तमनात्मानमिंद्रियाणांवशानुगम्॥अर्थाःसमभिवर्तंतेहंसाःशुष्कंसरोयथा॥४०॥ अकस्मादेवकुप्यंतिप्रसीदंत्यनिमित्ततः॥ शीलमेतदसाधूनामभ्रंपारिप्लवंयथा॥ ४१॥ सत्कृताश्चकृतार्थाश्चमित्राणांनभवंतियेः॥ तान्मृतानपिकव्यादाःकृतघ्नान्नोपभुंजते॥४२॥ अचंयेदेवमित्राणिसतिवाऽसतिवाधने॥ नानर्थयन्प्रजानातिमित्राणांसारफल्गुतां॥४३॥ संतापाद्भ्रश्यतेरूपंसंतापाद्भ्रश्यतेबलम्॥संतापाद्भ्रश्यतेज्ञानंसंतापाह्याधिमृच्छति॥४४॥ अनवाप्यंचशोकेनशरीरंचोपतप्यते॥ अमित्राश्चप्रहृष्यंतिमास्मशोकेमनःकृथाः॥ ४५॥

संबंधी मित्रंउपकारकृत् ॥३८॥ पारिप्लवमतेःचलबुद्धेः ॥३९॥ समभिवर्तंतेसम्यगभितएववर्तंतेननुत्स्पृशंति समतिवर्तंतइत्यपिपठंति ॥४०॥ अभंभेघः ॥४१॥ मित्राणांहितायेतिशेषः॥ ४२॥ अनर्थयन्प्रार्थनाशून्यः लुब्धस्तुमित्राणांसारफल्गुत्वेनजानातीत्यतःसकार्यार्थीवणिक्तुल्योननुमित्रम् ॥ ४३ ॥ संतापात्इष्टवियोगात्शोकात् ॥४४॥ अनवाप्यंनप्राप्यं शोकेनशोकमात्रेण इष्टमितिशेषः ॥ ४५ ॥

दुःखादेरागमापायित्वादपिनशोकादिकंकर्तव्यमित्याह पुनरिति॥४६॥सर्वंपुरुषमात्रम्॥४७॥ यद्मनसासहश्रोत्रादीनिपंचसंवतेस्वार्थाद्व्रियतिततोविषयसेवनात् ॥४८॥तनुःशरीरंमभिव्यक्तिस्थानंकाष्ठंत
चरुद्धोनभिव्यक्तःशिखीअग्निस्तथायंराजाधर्मेणरुद्धः तनुनासूक्ष्मेणधर्मेणवारुद्धः ॥४९॥उद्विग्नंभीतंचलितंचअनुद्विग्नमभयमचलंचपदंपदनीयंप्राप्यंब्रह्म ॥५०॥तत्प्राप्तिसाधनान्येवाह नान्यत्रेति विद्या
ध्ययनजा तपःस्वधर्माचरणं त्वंतुलोभीतत्पदंप्रासुमनर्हइतिभावः शांतिंकल्याणम् ॥५१॥ बुद्ध्याआत्मज्ञानेनभयंसंसारं विंदतेमहत्सदुरुशास्त्रादिकंलभते ततोगुरुशुश्रूषयाज्ञानंग्रंथजं योगेनसर्वचित्तवृत्ति

पुनर्नरोम्रियतेजायतेचपुनर्नरोहीयतेवर्धतेच ॥ पुनर्नरोयाचतियाच्यतेचपुनर्नरःशोचतिशोच्यतेच ॥ ४६ ॥ सुखंचदुःखंचभवाभवौचलाभालाभौमरणंजी
वितंच ॥ पर्यायशःसर्वमेतेस्पृशंतितस्माद्धीरोनचत्रष्येन्नशोचेत् ॥४७॥ चलानिहीमानिपरिंद्रियाणितेषांयद्यद्धर्यतेयत्रयत्र ॥ ततस्ततःस्रवतेबुद्धिरस्यच्छिद्रो
दकुंभादिवनित्यमंभः ॥ ४८ ॥ ॥ धृतराष्ट्रउवाच ॥ ॥ तनुरुद्धःशिखीराजामिथ्योपचरितोमया ॥ मंदानांममपुत्राणांयुद्धेनांतंकरिष्यति ॥ ४९ ॥ नित्योद्विग्न
मिदंसर्वंनित्योद्विग्नमिदंमनः ॥ यत्तत्पदमनुद्विग्नंतन्मेवदमहामते ॥५०॥ ॥विदुरउवाच॥ ॥नान्यत्रविद्यातपसोर्नान्यत्रेंद्रियनिग्रहात्॥नान्यत्रलोभसंत्यागा
च्छांतिंपश्यामितेऽनघ ॥ ५१ ॥ बुद्ध्याभयंप्रणुदतितपसाविंदतेमहत् ॥ गुरुशुश्रूषयाज्ञानंशांतियोगेनविंदति ॥ ५२ ॥ अनाश्रितादानपुण्यंवेदपुण्यमनाश्रि
ताः ॥ रागद्वेषविनिर्मुक्ताविचरंतीहमोक्षिणः ॥ ५३ ॥ स्वधीतस्यसुयुद्धस्यसुकृतस्यचकर्मणः ॥ तपसश्चसुतप्तस्यतस्यांतेसुखमेधते ॥ ५४ ॥ स्वास्तीर्णानिशय
नानिप्रपन्नानवैभिन्नाजातुनिद्रांलभंते ॥ नस्त्रीषुराजन्रतिमाप्नुवंतिनमागधैःस्तूयमानानसूतैः ॥५५॥नवैभिन्नाजातुचरंतिधर्मंनवैसुखंप्राप्नुवंतीहभिन्नाः ॥
नवैभिन्नागौरवंप्राप्नुवंतिनवैभिन्नाःप्रशमंरोचयंति ॥ ५६ ॥ नवैतेषांस्वदतेपथ्यमुक्तंयोगक्षेमंकल्पतेनैवतेषाम् ॥ भिन्नानांवैमनुजेंद्रपरायणंनविद्यतेकिंचिद
न्यद्विनाशात् ॥ ५७ ॥ संपन्नंगोषुसंभाव्यंसंभाव्यंब्राह्मणेतपः ॥ संभाव्यंचापलंस्त्रीषुसंभाव्यंज्ञातितोभयम् ॥ ५८ ॥

निरोधेनशांतिम् ॥५२॥ शांतिप्राप्नौसर्वंतुच्छमित्याह अनाश्रिताइति दानजंपुण्यंतत्फलंस्वर्गादीत्यर्थः अनाश्रिताःनाश्रयंतेतुच्छत्वात्तस्य ॥ ५३ ॥ तस्यांतेस्वधीतादीनांकर्मणामंतेनाशेसुखंपरमानंदंविंदते
जगत्कारणदर्शनादेवसकलकर्मनाशेसतिअकारणंशुद्धंप्राप्नोतीत्यर्थः क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे परोहिरण्यगर्भोऽवरोनीचोयस्मात्कारणात्तस्मिन्दृष्टेसति ॥ ५४॥ तदन्यद्दुःखरूपमेवेत्याह स्वा
स्तीर्णानीति भिन्नाःभेददृष्टिमंतः द्वितीयाद्वैभयंभवतीतिश्रुतेरद्वैततत्त्वात्प्रच्युताइत्यर्थः [illegible]भिन्नाःज्ञातिभेदवंतः ॥५५॥ प्रशमंअक्रोधम् ॥ ५६ ॥ योगःअलब्धलाभः क्षेमंलब्धपरिपालनं तदुभयंनकल्प
तेनयुज्यते ॥ ५७ ॥ तदेवाह संपन्नमिति संपन्नंक्षीरादिसंपत्तिः ॥ ५८ ॥

तंतवःकुलतंतवःपांडवाःआप्यायिताःत्वयैवसंवर्धिताः पूर्वरूपमार्षं तनवःसूक्ष्माःबालाइत्यर्थः बहुलाःसमाःबहून्संवत्सरान् बहुत्वात्वंधूनामन्येषांचऋषीणांबहुत्वात्वनेआयासान्सहंतिअतःसतांउपमाभ
वंतिपांडवाइवसंतइतिलोकेवदंति अतःसत्तमाःपांडवास्त्वयानवंचनीयाइतिभावः ॥ ५९ ॥ अन्येतुज्ञातयोनपांडवतुल्याइत्याह धूमायंतेइति व्यपेतानिपृथग्भूतानि ॥ ६० ॥ ब्राह्मणादिसाहचर्यात्क्षात्र
योप्यत्रायुद्धार्थिनएवग्राह्याःनाहशांश्चपांडवान्जिघांसंतःपतिष्यंत्येवेत्यर्थः ॥ ६१ ॥ एकजःएकाकी प्रसह्यःशक्यः ॥ ६२ ॥६३॥ ६४ ॥६५॥ ६६॥ सधनतांऋतेविना अनातुरत्वात्ऋतेच भद्रंतेस्तुइत्या

तंतवोप्यायितानित्यंतनवोबहुलाःसमाः॥बहून्यहुत्वादायासान्सहंतीत्युपमासताम् ॥ ५९ ॥ धूमायंतेव्यपेतामिज्वलंतिसहितानिच ॥धृतराष्ट्रोल्मुकानीवज्ञा
तयोभरतर्षभ ॥ ६० ॥ ब्राह्मणेषुचयेशूराःस्त्रीषुज्ञातिषुगोषुच ॥ वंतादिवफलंपक्वंधृतराष्ट्रपतंतिते॥६१॥ महानप्येकजोदक्षोबलवान्सुप्रतिष्ठितः ॥प्रसह्यएव
वातेनसस्कंधोमर्दितुंक्षणात् ॥ ६२ ॥ अथयेसहिताद्दक्षाःसंघशःसुप्रतिष्ठिताः ॥ तेहिशीघ्रतमान्वातान्सहंतेन्योन्यसंश्रयात् ॥ ६३ ॥ एवंमनुष्यमप्येकंगुणैर
पिसमन्वितम् ॥ शक्यंद्विषंतोमन्यंतेवायुर्द्रुममिवैकजम् ॥ ६४ ॥ अन्योन्यसमुपष्टंभादन्योन्यापाश्रयेणच ॥ ज्ञातयःसंप्रवर्धंतेसरसीवोत्पलान्युत ॥ ६५ ॥ अव
ध्याब्राह्मणागावोज्ञातयःशिशवःस्त्रियः ॥ येषांचान्नानिभुंजीतयेचस्युःशरणागताः ॥ ६६ ॥ नमनुष्येगुणःकश्चिद्राजन्सधनताऋते ॥ अनातुरत्वाद्भद्रंतेऋतक
ल्याहिरोगिणः ॥ ६७ ॥ अव्याधिजंकटुकंशीर्षरोगिपापानुबंधंपरुषंतीक्ष्णमुष्णम् ॥सतांपेयंयन्नपिबंत्यसंतोमन्युंमहाराजपिबप्रशाम्य ॥ ६८ ॥ रोगार्दितानफ
लान्याद्रियंतेनवैलभंतेविषयेषुतत्त्वम् ॥ दुःखोपेतारोगिणोनित्यमेवनबुध्यंतेधनभोगान्नसौख्यम् ॥ ६९ ॥ पुरात्युत्कनाकरोस्त्वंवचोमेयूतेजितांद्रौपदींप्रेक्ष्यरा
जन् ॥ दुर्योधनंवारयेत्यक्षवत्यांकितवत्वंपंडितावर्जयंति ॥ ७० ॥ नतद्बलंयन्मृदुनाविरुध्यतेसूक्ष्मोधर्मस्तरसासवितव्यः ॥ प्रध्वंसिनीक्रूरसमाहिताश्रीर्मृदुर्दृ
ढागच्छतिपुत्रपौत्रान् ॥ ७१ ॥ धार्तराष्ट्राःपांडवान्पालयंतुपांडोःसुतास्त्वपुत्रांश्चपांतु ॥ एकारिमित्राःकुरवोत्येककार्याजीवंतुराजन्सुखिनःसमृद्धाः ॥ ७२ ॥

शीर्षवचनमाप्तत्वसूचनार्थम्॥६७॥धनवामनातुरश्चत्वंगुणीसन्शमंप्राप्नुहीत्याह अव्याधिजमिति कटुकंअरोचकं परुषंरूक्षं तीक्ष्णंछेदकं उष्णंदुःसहस्पर्शं पेयंगिलनीयं मन्युंदैन्यं मन्युर्दैन्येकरोकुधीतिको
शात् प्रशाम्यशांतिक्षमांप्राप्नुहि ॥ ६८॥ संतापाद्याधिमृच्छतीत्युक्तमतस्तौद्वावपिनिंदति फलानिपुष्पपश्वादीनि तत्त्वमिष्टानिष्टविवेकंपित्तोपहतरसनत्वात् एवंसर्वत्र भोगःक्रयादिसंगः धनादिजंसुखंलब्ध्व
मपिनबुध्यंते अतःसंतापंजागरादिद्वारारोगोत्पादकंत्यजेत्यर्थः ॥६९॥ कितवत्वंद्यूतप्रियत्वम् ॥ ७० ॥ मृदुनासहिष्णुना धर्मःदायविभागाख्यः क्रूरेत्वत्पुत्रेसमाहितामृदुनायुधिष्ठिरेणप्रौढासती॥७१॥७२॥

मेढीभूतःस्वयंनिर्व्यापारोपरितःसंचरमाणानांबलीवर्दानामिवपुत्राणांयथेष्टप्रचारनिरोधकः ॥७३॥ अंतरंभेदं स्थापययुद्धान्निवर्तयस्व ॥ ७४ ॥ ॥ इतिश्रीउद्योगप०नैलकंठीयेभारतभा०षट्त्रिंशोऽध्यायः ॥ ३६ ॥ सप्तदशेति ॥१ ॥ दानूनांमेघानांसमूहोदानवंतस्मिन् सुपांसुलुगितिसप्तम्यालुक्डादेशोवा इंद्रस्यधनुःवर्षासुदृश्यमानंअनाम्यंधूमज्योतिषोःसन्निपातरूपत्वात्नामयितुमयोग्यंनमतः नामयतः मरीचिनःमरीचिमतःसूर्यचंद्रादेः व्रीह्यादित्वान्मत्वर्थीयइनिः पादानूरश्मीन् आकाशहननादिकमकार्यंकुर्वतोतिमूढानित्यर्थः॥२॥अशिष्यंशासनानर्हंदुर्योधनादिंयःशास्ति तुष्येत् अल्पलाभेनेति शेषः द्विषंतंभजते स्वकार्यार्थमितिशेषः कार्यमेवाह भद्रमश्नुतइति शत्रुसेवयात्मीरक्षयाचयोभद्रमश्नुतेतौद्वौमूर्खावित्यर्थः यःकत्थतेकिंचित्कृत्वाश्लाघतेसःषष्ठोमूर्खः॥३॥अभिजातःकुलीनः॥४॥श्वशुरः

मेढीभूतःकौरवाणांत्वमद्यत्वव्याधीनंकुरुकुलमाजमीढ॥ पार्थान्बालान्वनवासप्रतप्तान्गोपायस्वस्वंयशस्तातरक्षन्॥ ७३॥संधत्स्वत्वंकौरवपांडुपुत्रैर्मातेंतरं रिपवःप्रार्थयंतु॥ सत्येस्थितास्तेनरदेवसर्वेदुर्योधनंस्थापयत्वंनरेंद्र॥ ७४॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिप्रजागरपर्वणिविदुरहितवाक्येषट्त्रिंशोऽध्यायः॥ ३६ ॥ ॥ ९ ॥ ॥विदुरउवाच॥ ॥सप्तदशेमान्राजेंद्रमनुःस्वायंभुवोब्रवीत्॥ वैचित्रवीर्यपुरुषानाकाशंमुष्टिभिर्ग्रतः ॥ १ ॥ दानवेंद्रस्यचधनुरनाम्यंनमतोब्रवीत्॥ अथोमरीचिनःपादानग्राह्यान्गृह्णतस्तथा॥२॥यश्चाशिष्यंशास्तिवैयश्चतुष्येद्यश्चातिवेलंभजतेद्विषंतम्॥स्त्रियश्चयोरक्षतिभद्रमश्नुतेयश्चायाच्यंयाचतेकत्थतेवा॥३॥ यश्चाभिजातःप्रकरोत्यकार्यंयश्चावलोबलिनानित्यवैरी॥ अश्रद्दधानायचयोब्रवीतियश्चाकाम्यंकामयतेनरेंद्र॥४॥ वध्वाऽवहासंश्वशुरोमन्यतेयोवध्वाऽवसन्नभयोमानकामः॥ परक्षेत्रेनिर्वपतियश्चबीजंस्त्रियंचयःपरिवदतेऽतिवेलम्॥५॥यश्चापिलब्ध्वानस्मरामीतिवादीदत्वाचयःकत्थतियाच्यमानः॥ यश्चासतःसत्त्वमुदानयीतएतान्नयंतिनिरयंपाशहस्ताः॥६॥यस्मिन्यथावर्ततेयोमनुष्यस्तस्मिंस्तथावर्तितव्यंसधर्मः॥ मायाचारोमायया वर्तितव्यःसाध्वाचारःसाधुनाप्रत्युपेयः॥ ७॥ जरारूपंहरतिहिधैर्यमाशामृत्युःप्राणान्धर्मचर्यामसूया॥ कामोक्रियंवृत्तमनार्यसेवाक्रोधःश्रियंसर्वमेवाभिमानः॥८॥ ॥धृतराष्ट्रउवाच॥ ॥शतायुरुक्तःपुरुषःसर्ववेदेषुवैयदा॥ नाप्नोत्यथचतत्सर्वमायुःकेनेहहेतुना॥ ९ ॥

सनृयोवध्वापुत्रभार्ययासहअवहासंपरिहासंतत्पित्रादिभिरिवमन्यतेसएकादशः वध्वात्नुषयाभूतयाअवसन्नभयोनष्टभयःवधूपित्रादिभिरापदित्रातोपितत्रैवमानंकामयतेयःसद्वादशोमूर्खः अन्येतुवध्वासहरतिंकुर्वन्नपिअभयोमानकामश्चेतिव्याचख्युः तद्विगीतत्वादुपेक्ष्यं परक्षेत्रइत्यनेनसंगृह्णीतंच ॥५॥ दत्वातीर्थेवाचादानंकृत्वाग्रहेयाचकेनयाच्यमानःसन्कत्थतेदानमकृत्वैवश्लाघतेअसतोदुष्टस्यसत्त्वं साधुत्वंअसतःमृषार्थस्यसत्त्वंसत्यत्वंवाउपानयीतसमर्थयतेससप्तदशोमूर्खः ॥ ६ ॥ यस्मिन्निति साधुषुपांडवेषुत्वयापिसाधुनाभवितव्यंइत्याशयः॥ ७ ॥ जरेति अभिमानंत्यजेतिभावः ॥ ८ ॥ अभिमानःसर्वहरइत्युक्तेःअभिमानवतांमत्पुत्राणांयदिस्वल्पमेवायुरस्तितर्हित्यक्तेप्यभिमानेनजीविष्यंति यदिबहुतर्हिसत्यपितस्मिन्नमरिष्यंतीत्याशयेनाह शतायुरिति ॥ ९ ॥

अत्यागःउत्कृष्टोऽपराधश्चौर्यादिर्गरदानादिर्वा अत्याशइतिपाठेबहुभोजित्वं आत्मविधित्सेतिपोषणार्थस्यधातोःसनिरूपं आत्मपोषणेच्छाशिश्नोदरपरायणतेत्यर्थः॥१०॥असयःखड्गाः भद्रमस्तुते एतेषां षण्णांत्यागेनतवपुत्राःशतायुषोभवंत्वित्यर्थः ॥११॥ वृषलीशूद्रा द्विजस्त्रैवर्णिकः पानपःमद्यपः ॥१२ ॥ आदेशकृत्पामणीः प्रेषकःद्विजान्दास्येनियोजयन् समेत्यसंसृज्य यदित्वत्पुत्राअतिमानादीन्त्यजंतितर्हितेषांपांडवदत्तिर्हंतॄणांसंगस्त्वयानकार्यइतिभावः ॥ १३ ॥ गृहीतवाक्यःविद्यावान् नयवित्नीतिज्ञः वदान्योदाता गृहीतवाग्योऽनपविद्धवाक्यइतिपाठेमितभाषी अनिरस्तगुरुवचनः ॥ १४ ॥

विदुरउवाच॥ ॥अतिमानोऽतिवादश्चतथाऽत्यागोनराधिप॥ क्रोधश्चात्मविधित्साचमित्रद्रोहश्चतानिषट्॥१०॥एतएवासयस्तीक्ष्णाःकृंतंत्यायूंषिदेहिनां॥ एतानिमानवान्प्रंतिनमृत्युर्भद्रमस्तुते॥ ११॥विश्वस्तस्यैतियोदारान्यश्चापिगुरुतल्पगः॥ वृषलीपतिर्द्विजोयश्चपानपश्चैवभारत॥ १२॥ आदेशकृद्वृत्तिहंताद्विजानांप्रेषकश्चयः॥ शरणागतहाचैवसर्वेब्रह्महणःसमाः॥एतैःसमेत्यकर्तव्यंप्रायश्चितमितिश्रुतिः॥ १३॥गृहीतवाक्योनयविद्वदान्यःशेषान्नभोक्तात्यविहिंसकश्च॥ नानर्थकृत्याकुलितःकृतज्ञःसत्योमृदुःस्वर्गमुपैतिविद्वान्॥ १४॥ सुलभाःपुरुषाराजन्सततंप्रियवादिनः॥ अप्रियस्यतुपथ्यस्यवक्ताश्रोताचदुर्लभः॥ १५॥ योहिधर्मसमाश्रित्यहित्वाभर्तुःप्रियाप्रिये॥ अप्रियाण्याहपथ्यानितेनराजासहायवान्॥ १६॥ त्यजेत्कुलार्थेपुरुषंग्रामस्यार्थेकुलंत्यजेत्॥ ग्रामंजनपदस्यार्थेआत्मार्थेपृथिवींत्यजेत्॥ १७॥ आपदर्थेधनंरक्षेद्दारान्रक्षेद्धनैरपि॥ आत्मानंसततंरक्षेद्दारैरपिधनैरपि॥ १८॥ द्यूतमेतत्पुराकल्पेदृष्टंवैरकरंनृणां॥ तस्मात्द्यूतंनसेवेतहास्यार्थमपिबुद्धिमान्॥ १९॥ उक्तंमयाद्यूतकालेपिराजन्नेदंयुक्तंवचनंप्रातिपेय॥ तदौषधंपथ्यमिवातुरस्यनरोचतेतववैचित्रवीर्य॥ २०॥ काकैरिमांश्चित्रबर्हान्मयूरान्पराजयेथाःपांडवान्धार्तराष्ट्रैः॥ हित्वार्सिहान्क्रोष्टुकान्गूहमानःप्राप्तेकालेशोचितात्वंनरेंद्र॥ २१॥ यस्तातनकुध्यतिसर्वकालंभृत्यस्यभक्तस्यहितेरतस्य॥ तस्मिन्भृत्याभर्तरिविश्वसंतिनचैनमापत्सुपरित्यजंति॥ २२॥ नभृत्यानांवृत्तिसंरोधनेनराज्यंधनंसंजिघृक्षेदपूर्वम्॥ त्यजंतित्येनंवंचितावैविरुद्धाःस्निग्धात्यमात्याःपरिहीनभोगाः॥ २३॥ कृत्यानिपूर्वंपरिसंख्यायसर्वाण्यायव्ययेचानुरूपांचवृत्तिम्॥ संगृह्णीयादनुरूपान्सहायान्सहायसाध्यानिहिदुष्कराणि॥ २४॥

॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ इदंद्यूतंनयुक्तमितिवचनंमयाउक्तमितिसंबंधः ॥ २० ॥ २१ ॥ भक्तस्यसेवांकुर्वतः ॥ २२ ॥ अपूर्वंपरकीयं स्निग्धाहिस्नेहवंतोपि ॥ २३ ॥ कृत्यानिपरिसंख्याय साध्यासाध्यनिश्चयंकृत्वा तथा वृत्तिंभृत्यजीविकांआयव्ययानुरूपांकृत्वेत्यर्थः दुष्कराणिपरराष्ट्रग्रहणादीनि ॥ २४ ॥

अनुकंप्योमादृशोवच्यनास्वीकारेणानुपास्यइतिप्रार्थयते॥२५॥प्रत्याहप्रत्याख्यानंकरोति प्रतिकूलंआज्ञाविरुद्धंवदतीतिप्रतिकूलवादी॥२६॥अस्तब्धंदर्पशून्यं अक्लीबंसामर्थ्यवंतं अदीर्घसूत्रंक्षिप्रकारिणं सानुक्रोशंसदयं श्लक्ष्णंमंजुलं अहार्यंअभेद्यं अरोगजातीयंरोगलेशशून्यं उदारंयुक्तियुक्तंमहार्थंचवाक्यंयस्यतं दूतंप्रेष्यम्॥२७॥विकालेसायंकालेपरस्यअविश्वस्तस्यगेहेनगच्छेत् प्रार्थयीतभोक्तुमितिशेषः ॥२८॥संसृष्टःबहुकर्तृकत्वेनमिश्रोमंत्रोयस्यत्वादृशस्यकर्णादिसहायबतोराज्ञोनिह्नवंमंत्रस्यअपहारंनगच्छेत्मादृशःतंमंत्रंनदूषयेत् तैःसर्वैःसहविरोधापत्तेरितिभावः त्वयिबहूनांशास्येअहंनाश्वसिमीतिन

अभिप्रायंयोविदित्वातुभर्तुःसर्वाणिकार्याणिकरोत्यतंद्री ॥ वक्ताहितानामनुरक्तआर्यःशक्तिज्ञआत्मेवहिसोनुकंप्यः॥२५॥वाक्यंतुयोनाद्रियतेऽनुशिष्टःप्रत्याहयश्चापिनियुज्यमानः॥ प्रज्ञाभिमानीप्रतिकूलवादीत्याज्यःसतादृक्त्वरयैवभृत्यः॥ २६॥ अस्तब्धमक्लीबमदीर्घसूत्रंसानुक्रोशंश्लक्ष्णमहार्यमन्यैः॥ अरोगजातीयमुदारवाक्यंदूतंवदंत्यष्टगुणोपपन्नम्॥२७॥नविश्वासाज्जातुपरस्यगेहेगच्छेन्नरश्चेतयानोविकाले॥नचत्वरेनिशितिष्ठेन्निगूढोनराजकाम्यांयोषितं प्रार्थयीत॥ २८॥ ननिह्नवंमंत्रगतस्यगच्छेत्संसृष्टमंत्रस्यकुसंगतस्य॥ नचब्रूयान्नाश्वसिमित्वयीतिसकारणंव्यपदेशंतुकुर्यात्॥ २९॥ घृणीराजापुंश्चलीराजभृत्यःपुत्रोभ्राताविधवाबालपुत्रा॥ सेनाजीवीचोद्धृतभूतिरेवव्यवहारेषुवर्जनीयाःस्युरेते॥ ३०॥ अष्टौगुणाःपुरुषंदीपयंतिप्रज्ञाचकौल्यंचश्रुतंदमश्च॥ पराक्रमश्चाबहुभाषिताचदानंयथाशक्तिकृतज्ञताच॥ ३१॥ एतान्गुणांस्तातमहानुभावानेकोगुणःसंश्रयतेप्रसह्य॥ राजायदासत्कुरुतेमनुष्यंसर्वान्गुणानेषगुणोबिभर्ति॥ ३२॥ गुणादशस्नानशीलंभजंतेबलंरूपंस्वरवर्णप्रशुद्धिः॥ स्पर्शश्चगंधश्चविशुद्धताचश्रीःसौकुमार्यंप्रवराश्चनार्यः॥ ३३॥ गुणाश्चषण्मितभुक्तंभजंतेआरोग्यमायुश्चबलंसुखंच॥ अनाविलंचास्यभवत्यपत्यंनचैनमाद्यूनइतिक्षिपंति॥३४॥ अकर्मशीलंचमहाशनंचलोकद्विष्टंबहुमायंनृशंसम्॥ अदेशकालज्ञमनिष्टवेषमेतान्गृहेनप्रतिवासयेत॥ ३५॥ कदर्यमाक्रोशकमश्रुतंचवनौकसंधूर्तममान्यमानिनम्॥ निष्ठूरिणंकृतवैरंकृतघ्नमेतान्भृशार्त्तोपिन जातुयाचेत्॥ ३६॥

ब्रूयात्किंतुममकिंचित्कार्यमस्तीति तथाव्यपदेशंव्याजंकृत्वातादृशान्मंत्रादपसरेदेवेत्यर्थः ॥२९॥ घृणीलज्जावान् सहियथोक्तंदंडंअधमर्णेषुपातयितुंनशक्तःक्रूरोयमितिलोकापवादभयात् उद्धृतभूतिःदूरीकृताधिकारः एतेव्यवहारेधनदानादौवर्जनीयाः द्रव्यनाशभयात् एतेभ्योनपाप्तंच अधमर्णोघृणीलज्जावांश्चेदतिमिर्बंधेनयाच्यमानःप्राणानेवजह्यात् एवमन्यत्रापूह्यं त्वमपिनाशभयात्पुत्रायराज्यंमादेहीतिभावः ॥३०॥३१॥ ३२॥ स्वरोध्वनिःतस्यप्रशुद्धिःमंजुलता वर्णाःकादयःतेषांप्रशुद्धिर्यथास्थानकरणंविस्पष्टमुच्चारणं स्पर्शःमृदुता सौकुमार्यंलावण्यम्॥३३॥मितभुक्तंमितभोजिनं आयूनोबहुभोजीतिक्षिपंतिनिंदंति ॥३४॥ अनिष्टवेषंक्षपणकादिवेषधरम् ॥३५॥ कदर्यंअदातारं आक्रोशकंगालयितारं अश्रुतंमूर्खं वनौकसंकैवर्तकं धूर्तंकितवं निष्ठूरिणंनिर्दयं हिंस्रंक्रूरवैरमन्येनस्वेनवा ॥ ३६॥

॥ ४० ॥

संक्लिष्टकर्माणमतिप्रमादंनित्यानृतंचाद्दढभक्तिकंच॥विसृष्टरागंपटुमानिनंचाप्येतान्नसेवेतनराधमान्षट्॥३७॥सहायबंधनात्यर्थाःसहायाश्चार्थबंधनाः॥ अन्योन्यबंधनावेतौविनान्योन्यंनसिध्यतः॥ ३८॥उत्पाद्यपुत्राननृणांश्चकृत्वावृत्तिंचतेभ्योनुविधायकांचित्॥ स्थानेकुमारीःप्रतिपाद्यसर्वाअरण्यसंस्थोथमुनिर्बुभूषेत्॥३९॥हितंयत्सर्वभूतानामात्मनश्चसुखावहम्॥ तत्कुर्यादीश्वरेत्येतन्मूलंसर्वार्थसिद्धये॥४०॥वृद्धिःप्रभावस्तेजश्चसत्वमुत्थानमेवच॥ व्यवसायश्चयस्यस्यात्तस्यावृत्तिर्भयंकुतः॥४१॥पश्यदोषान्पांडवैर्विग्रहेत्वंयत्रव्यथेयुरपिदेवाःसशक्राः॥ पुत्रैर्वैरंनित्यमुद्विग्नवासोयशःप्रणाशोद्विषतश्चहर्षः॥४२॥ भीष्मस्यकोपस्तवचैवेंद्रकल्पद्रोणस्यराज्ञश्चयुधिष्ठिरस्य॥ उत्सादयेल्लोकमिमंप्रदद्दःश्वेतोग्रहस्तिर्यगिवापतन्खे॥४३॥तवपुत्रशतंचैवकर्णःपंचचपांडवाः॥ पृथिवीमनुशासेयुरखिलांसागरांबराम्॥४४॥ धार्तराष्ट्रावनंराजन्व्याघ्राःपांडुसुतामताः॥ मावनंछिंधिसव्याघ्रंमाव्याघ्रानीनशन्वनात्॥४५॥नस्याद्वनम्हते व्याघ्रान्व्याघ्रानस्युर्कृतेवनम्॥ वनंहिरक्ष्यतेव्याघ्रैर्व्याघ्रान्रक्षतिकाननम्॥ ४६॥ नतथेच्छंतिकल्याणान्परेषांवेदितुंगुणान्॥ यथैषांज्ञातुमिच्छंतिनैर्गुण्यं पापचेतसः॥४७॥ अर्थसिद्धिंपरामिच्छन्धर्ममेवादितश्चरेत्॥ नहिधर्मादपैत्यर्थःस्वर्गलोकादिवामृतम्॥४८॥यस्यात्माविरतःपापात्कल्याणेचनिवेशितः॥ तेनसर्वमिदंबुद्धंप्रकृतिर्विकृतिश्चया॥४९॥योधर्ममर्थंकामंचयथाकालंनिषेवते॥ धर्मार्थकामसंयोगंसोऽमुत्रेहचविंदति॥५०॥ सन्नियच्छतियोवेगमुत्थितंक्रोधहर्षयोः॥ सश्रियोभाजनंराजन्यश्चापत्सुनमुह्यति॥५१॥ बलंपंचविधंनित्यंपुरुषाणांनिबोधमे॥ यत्तुबाहुबलंनामकनिष्ठंबलमुच्यते॥५२॥ अमात्यलाभोभद्रंतेद्वितीयंबलमुच्यते॥ तृतीयंधनलाभंतुबलमाहुर्मनीषिणः॥५३॥

अभिजातबलंकुलबलम् ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ औषधाद्याश्चिकित्सकाःनसंति तैरचिकित्स्यइत्यर्थः आथर्वणावेदमंत्राअपिकिंपुनर्भाषामंत्रादयः सुसिद्धाःअगदाःपारदादयः ॥ ५८ ॥ कुलपुत्रोज्ञातिः ॥ ५९ ॥ ६० ॥ ६१ ॥ कुलेजाताःपांडवाः ॥ ६२ ॥ शालाःमहावृक्षाः पांडवान्आश्रित्यसपुत्रोवर्धस्वेत्यर्थः ॥ ६३ ॥ त्वत्पुत्रान्निहत्यपांडवाअपिस्नेहान्नश्येयुरेवेतिभावः ॥ ६४ ॥

यत्तत्स्यसहजंराजन्पित्रपैतामहंबलम्॥ अभिजातबलंनामतच्चतुर्थंबलंस्मृतम्॥ ५४॥ येनत्वेतानिसर्वाणिसंगृहीतानिभारत॥ यद्बलानांबलंश्रेष्ठंतज्ज्ञाबलमुच्यते॥ ५५॥ महतेयोपकारायनरस्यप्रभवेन्नरः॥ तेनवैरंसमासज्यदूरस्थोस्मीतिनाश्वसेत्॥ ५६॥ स्त्रीषुराजसुसर्पेषुस्वाध्यायेप्रभुशत्रुषु॥ भोगेष्वायुषि विश्वासंकःप्राज्ञःकर्तुमर्हति॥ ५७॥ प्रज्ञाशरेणाभिहतस्यजंतोश्चिकित्सकाःसंतिनचौषधानि॥ नहोममंत्रानचमंगलानिनाथर्वणानाप्यगदाःसुसिद्धाः॥ ५८॥ सर्पश्चाग्निश्चसिंहश्चकुलपुत्रश्चभारत॥ नावज्ञेयामनुष्येणसर्वेत्येतेतितेजसः॥ ५९॥ अग्निस्तेजोमहल्लोकेगूढस्तिष्ठतिदारुषु॥ नचोपयुंक्तेतद्दारुयावन्नोद्दीप्यतेपरैः॥ ६०॥ सएवखलुदारुभ्योयदानिर्मथ्यदीप्यते॥ तद्दारुचवनंचान्यन्निर्दहत्याशुतेजसा॥ ६१॥ एवमेवकुलेजाताःपावकोपमतेजसः॥ क्षमावंतोनिराकाराःकाष्ठेग्निरिवशेरते॥ ६२॥ लताधर्मात्वंसपुत्रःशालाःपांडुसुतामताः॥ नलतावर्धतेजातुमहाद्रुममनाश्रिता॥ ६३॥ वनंराजंस्तवपुत्रोंबिकेयसिंहान्वनेपांडवांस्तातविद्धि॥ सिंहैर्विहीनंहिवनंविनश्येत्सिंहाविनश्येयुर्हकृतेवनेन॥ ६४॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिप्रजागरपर्वणिविदुरवाक्येसप्तत्रिंशोऽध्यायः॥ ३७॥ ॥ ७ ॥ ॥ विदुरउवाच ॥ ऊर्ध्वंप्राणात्युत्क्रामंतियूनःस्थविरआयति॥ प्रत्युत्थानाभिवादाभ्यांपुनस्तान्प्रतिपद्यते॥ १॥ पीठंदत्वासाधवेऽभ्यागतायआनीयापःपरिनिर्णिज्यपादौ॥ सुखंपृष्ट्वाप्रतिवेद्यात्मसंस्थांततोदद्यादन्नमवेक्ष्यधीरः॥ २॥ यस्योदकंमधुपर्कंचगांचनमंत्रवित्प्रतिगृह्णातिगेहे॥ लोभाद्भयादथकार्पण्यतोवातस्यानर्थंजीवितमाहुरार्याः॥ ३॥ चिकित्सकःशल्यकर्तावकीर्णीस्तेनःक्रूरोमद्यपोभ्रूणहाच॥ सेनाजीवीश्रुतिविक्रायकश्चभृशंप्रियोप्यतिथिर्नोदकार्हः॥ ४॥ अविक्रेयंलवणंपक्वमन्नंदधिक्षीरंमधुतैलंघृतंच॥ तिलामांसंफलमूलानिशाकंरक्तंवासःसर्वगंधागुडाश्च॥ ५॥

इतिश्रीउद्योगप० नैलकंठीयेभारतभावदीपेसप्तत्रिंशोऽध्यायः॥ ३७॥ ॥ ७ ॥ ॥ ऊर्ध्वमिति आयतिआगच्छति ॥ १ ॥ निर्णिज्यप्रक्षाल्य आत्मसंस्थांस्वस्थितिंप्रतिवेद्यनिवेद्य ॥ २ ॥ यस्य कदर्यस्य भयात्राज्यादिषुधनिकत्वप्रथाभयात् अदीयमानत्वादेवनप्रतिगृह्णातितस्यजीवितंअनर्थंव्यर्थम् ॥ ३ ॥ शल्यकर्ताकांडरुत् अवकीर्णीनष्टब्रह्मचर्यः नोदकार्हउदकमात्रानर्होपिअतिथिःभृशंप्रियःप्रियवज्जामात्रादिवदर्चनीयएवेत्यर्थः ॥ ४ ॥ श्रुतिविक्रायकप्रसंगादन्यदप्यविक्रेयंयोविक्रीणातिसोपिमान्यएवेतिविवक्षयाऽविक्रेयाण्याह अविक्रेयमिति ॥ ५ ॥

दोषवानप्यतिथिःपूज्यःकिमुतगुणवानितिवक्तुंद्वयानाह अरोषणइति गतसंधिविग्रहःस्नेहवैररहितः उदासीनवत्रागद्वेषादिराहित्यात् ॥ ६ ॥ चोद्यःविधेयःसावधानइत्यर्थः तापसोदरिद्रोप्यतिथिष्वप्रमत्तोभवेत्किंपुनर्भाग्यवानितिभावः॥ ७॥ दीर्घौबाहू बुद्ध्यादूरस्थमप्यादातुंशक्तइत्यर्थः हिंसतिहिनस्ति अतिथिभक्तादूरस्थाअपिपांडवानहेलनीयाइतिभावः ॥ ८ ॥ अविश्वस्तेभीमेनविश्वासःकार्यः ॥ ९ ॥

अरोषणोयःसमलोष्टाश्मकांचनःप्रहीणशोकोगतसंधिविग्रहः॥ निंदाप्रशंसोपरतःप्रियाप्रियेत्यजन्नुदासीनवदेषभिक्षुकः॥ ६॥ नीवारमूलेंगुदशाकवृत्तिःसुसंयतात्माग्निकार्येषुचोद्यः॥ वनेवसन्नतिथिष्वप्रमत्तोधुरंधरःपुण्यकृदेषतापसः॥ ७॥ अपकृत्यबुद्धिमतोदूरस्थोस्मीतिनाश्वसेत्॥ दीर्घौबुद्धिमतोबाहूभ्यांहिंसतिहिंसितः॥ ८॥ नविश्वसेदविश्वस्तेविश्वस्तेनातिविश्वसेत्॥ विश्वासाद्भयमुत्पन्नंमूलान्यपिनिकृंतति॥ ९॥ अनीर्षुर्गुप्तदारश्चसंविभागीप्रियंवदः॥ श्लक्ष्णोमधुरवाक्स्त्रीणांनचासांवशगोभवेत्॥ १०॥ पूजनीयामहाभागाःपुण्याश्चगृहदीप्तयः॥ स्त्रियःश्रियोगृहस्योक्तास्तस्माद्रक्ष्याविशेषतः॥ ११॥ पितुरंतःपुरंदद्यान्मातुर्दद्यान्महानसम्॥ गोषुचात्मसमंदद्यात्स्वयमेवकृषिंव्रजेत्॥ १२॥ भृत्यैर्वाणिज्यचारंचपुत्रैःसेवेतचद्विजान्॥ अद्भ्योग्निर्ब्रह्मतःक्षत्रमश्मनोलोहमुत्थितम्॥ १३॥ तेषांसर्वत्रगंतेजःस्वासुयोनिषुशाम्यति॥ नित्यंसंतःकुलेजाताःपावकोपमतेजसः॥ १४॥ क्षमावंतोनिराकाराःकाष्ठेग्निरिवशेरते॥ यस्यमंत्रंनजानंतिबाह्याश्चाभ्यंतराश्चये॥ १५॥ सराजासर्वतश्चक्षुश्चिरमैश्वर्यमश्नुते॥ करिष्यन्नप्रभाषेतकृतान्येवतुदर्शयेत्॥ १६॥ धर्मकामार्थकार्याणितथामंत्रोनभिद्यते॥ गिरिपृष्ठमुपारुह्यप्रासादंवारहोगतः॥ १७॥ अरण्येनिःशलाकेवात्रमंत्रोभिधीयते॥ नासुहृत्परमंमंत्रंभारतार्हतिवेदितुम्॥ १८॥ अपंडितोवापिसुहृत्पंडितोवाप्यनात्मवान्॥ नापरीक्ष्यमहीपालःकुर्यात्सचिवमात्मनः॥ १९॥ अमात्येष्वर्थलिप्साचमंत्ररक्षणमेवच॥ कृतानिसर्वकार्याणियस्यपारिषदाविदुः॥ २०॥ धर्मेचार्थेचकामेचसराजाराजसत्तमः॥ गूढमंत्रस्यनृपतेस्तस्यसिद्धिरसंशयम्॥ २१॥ अप्रशस्तानिकार्याणियोमोहादनुतिष्ठति॥ सतेषांविपरिभ्रंशाद्भ्रश्यतेजीवितादपि॥ २२॥

अनीर्षुरित्यादिसार्धश्लोकत्रयस्यगुप्तदाराःपांडवाःतेषांस्त्रीश्रीतुल्याद्रौपदीसापित्रात्वयारक्षणीयैवातस्तदतिक्रमात्तवभयमस्तीतितात्पर्यम् ॥ १० ॥ ११ ॥ १२ ॥ प्रसंगात्प्रकृतेनुपयुक्तानपिधर्मानाह अद्भ्यइति एतेषांचयथालाभंप्रकृतोपयोगित्वमप्यूह्यं अद्भ्यइत्यादिनामैत्रेयादीनांब्राह्मणानामवज्ञानकार्यैतिसूचितम्॥ १३॥ १४॥ १५॥ सर्वतश्चक्षुश्चारैःपरमंत्रंजानन् ॥ १६ ॥ १७ ॥ निःशलाकेतृणैरनाहते तत्रापिकश्चिद्धीनश्चेन्मंत्रभेदःसंभवेदितिभावः ॥ १८ ॥ अनात्मवान्चपलवाक् ॥ १९ ॥ पार्षदाःसभासदःकृतान्येवविदुःकिमुतान्ये ॥ २० ॥ २१ ॥ अप्रशस्तानिनिंद्यानि विपरिभ्रंशात्विपरीतत्वेनभ्रंशात् ॥ २२ ॥

॥२३॥ षाड्गुण्यंषण्णांसंधिविग्रहयानासनद्वैधीभावसमाश्रयाणांसमूहःनश्रुतोयेनसः॥२४॥षाड्गुण्याभिज्ञत्वेनविदितआत्मास्वरूपंयस्यतस्य स्थानंयथास्थितत्वावस्था अनवज्ञातंसत्कृतंशीलमस्य॥२५॥ नवेक्षिणइतिपाठेनवमिवादरेणईक्षितुंशीलमस्य आत्मनैवप्रत्ययोज्ञानंयस्यस्वयमेवज्ञातकोशस्य॥२६॥नाममात्रेणैवराजाभवेत् भोगांस्तुभृत्यैःसमानानेवभुंजीत ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१॥३२॥

कर्मणांतुप्रशस्तानामनुष्ठानंसुखावहम्॥ तेषामेवाननुष्ठानंपश्चात्तापकरंमतम्॥ २३ ॥ अनधीत्ययथावेदान्नविप्रःश्राद्धमर्हति ॥ एवमश्रुतषाड्गुण्योनमंत्रं श्रोतुमर्हति॥ २४॥ स्थानवद्दिक्षयज्ञस्यषाड्गुण्यविदितात्मनः ॥ अनवज्ञातशीलस्यस्वाधीनापृथिवीनृप॥ २५ ॥ अमोघक्रोधहर्षस्यस्वयंकृत्वान्ववेक्षिणः॥ आत्मप्रत्ययकोशस्यवसुदैववसुंधरा॥ २६ ॥ नाममात्रेणतुष्येतच्छत्रेणचमहीपतिः॥ भृत्येभ्योविसृजेदर्थान्नैकःसर्वहरोभवेत् ॥ २७ ॥ ब्राह्मणंब्राह्मणोवेदभर्तावेदस्त्रियंतथा॥ अमात्यंनृपतिर्वेदराजाराजानमेवच ॥ २८ ॥ नशत्रुर्वशमापन्नोमोक्तव्योवध्यतांगतः॥ न्यग्भूत्वापर्युपासीतवध्यंहन्याद्वलेसति॥ अहताद्भिभयंतस्माज्जायतेनचिरादिव॥ २९ ॥ दैवतेषुप्रयत्नेनराजसुब्राह्मणेषुच ॥ नियंतव्यःसदाक्रोधोवृद्धबालातुरेषुच॥ ३० ॥ निरर्थकलहंप्राज्ञोवर्जयेन्मूढसेवितम्॥ कीर्तिंचलभतेलोकेनचानर्थेनयुज्यते ॥ ३१ ॥ प्रसादोनिष्फलोयस्यक्रोधश्चापिनिरर्थकः॥ नतंभर्तारमिच्छंतिषंढंपतिमिवस्त्रियः॥ ३२ ॥ नबुद्धिधनलाभायनजाड्यमसमृद्धये॥ लोकपर्यायवृत्तांतंप्राज्ञोजानातिनेतरः ॥ ३३ ॥ विद्याशीलवयोवृद्धान्बुद्धिवृद्धांश्चभारत॥ धनाभिजातवृद्धांश्चनित्यंमूढोवमन्यते॥ ३४॥ अनार्यवृत्तमप्राज्ञमसूयकमधार्मिकम्॥ अनर्थाःक्षिप्रमायांतिवाग्दुष्टंक्रोधनंतथा ॥ ३५॥ अविसंवादनंदानंसमयस्याव्यतिक्रमः॥ आवर्तयंतिभूतानिसम्यक्प्रणिहिताचवाक्॥३६॥ अविसंवादकोदक्षःकृतज्ञोमतिमानृजुः॥ अपिसंक्षीणकोशोपिलभतेपरिवारणम्॥३७॥ धृतिःशमोदमःशौचंकारुण्यंवागनिष्ठुरा॥ मित्राणांचानभिद्रोहःसमैताःसमिधःश्रियः॥ ३८॥ असंविभागीदुष्टात्माकृतघ्नोनिरपत्रपः॥तादृङ्नराधिपोलोकेवर्जनीयोनराधिप ॥ ३९ ॥ नचरात्रौसुखंशेतेससर्पइववेश्मनि॥ यःकोपयतिनिर्दोषंसदोषोभ्यंतरंजनम्॥ ४० ॥ येषुदुष्टेषुदोषःस्याद्योगक्षेमस्यभारत ॥ सदाप्रसादनंतेषांदेवतानामिवाचरेत्॥ ४१ ॥

लोकस्यपर्यायःइहलोकपरलोकवत्त्वंतेनतद्विषयवृत्तांतंकर्मफलाधीनत्वस्वरूपंप्राज्ञोजानाति नतुबुद्ध्याधनंजाड्येनवादारिद्र्यंलभ्यतेसर्वत्रव्यभिचारदर्शनादितिभावः॥३३॥अभिजातःकुलीनः॥३४॥३५ अविसंवादनंवंचनाशून्यं समयस्यस्वपरकृतमर्यादायाः आवर्तयंतिशत्रूनपित्रीयान्कुर्वंति प्रणिहिताप्रयुक्ता ॥ ३६ ॥ परिवारणंपरिवारान्भृत्यमित्रादीन् ॥ ३७ ॥ समिधःउद्दीपिकाः ॥ ३८ ॥ असंविभागीपोष्येभ्योऽदत्वास्वयंभुंजानः ॥ ३९ ॥ ४० ॥ दुष्टेषुदूषितेषुवेतनाद्यतिक्रमात् ॥ ४१ ॥

॥ ४२ ॥

समासक्तानिहिताः संशयंगताःकदाचित्याप्याइत्यर्थः ॥ ४२ ॥ ४३ ॥ येमृत्याः विशेषाअधिक्यानि तेषुहिप्रदर्श्यमानेषुपरस्परंस्त्रीयानामेवकलहप्रसंगान्मुख्यप्रयोजनंनश्यतीतिभावः प्रसंगिनःप्रसंगःसंघर्षस्तत्कारिणः ॥ ४४ ॥ ४५ ॥ ४६॥४७॥ इत्युद्योग०नैलकंठीयेभारतभा०अष्टत्रिंशोऽध्यायः॥३८॥ ॥७॥ ॥ अनीश्वरोयमिति भवाभवेऐश्वर्यानैश्वर्ये दिष्टस्यदैवस्य वैदेवनतुमांदूषयेतिभावः धृतः

येर्थाःस्त्रीषुसमायुक्ताःप्रमत्तपतितेषुच॥ येचानार्येसमासक्ताःसर्वेतेसंशयंगताः॥४२॥ यत्रस्त्रीयत्रकितवोबालोयत्रानुशासिता॥ मज्जंतितेऽवशाराजन्नद्यामग्मप्लवाइव॥ ४३॥ प्रयोजनेषुयेसक्तानविशेषेषुभारत॥ तानहंपंडितान्मन्येविशेषाहिप्रसंगिनः ॥ ४४ ॥ यंप्रशंसंतिकितवायंप्रशंसंतिचारणाः॥ यंप्रशंसंतिबंधक्योनसजीवतिमानवः॥ ४५॥ हित्वातान्परमेष्वासान्पांडवान्मितौजसः॥ आहितंभारतैश्वर्यंत्वयादुर्योधनेमहत्॥४६॥ तंद्रक्ष्यसिपरिभ्रष्टंस्मात्त्वमचिरादिव॥ ऐश्वर्यमदसंमूढंबलिंलोकत्रयादिव॥४७॥ ॥ इतिश्रीम०उद्योग०प्रजागरप०विदुरवाक्येअष्टत्रिंशोध्यायः॥३८॥ ॥७॥ ॥ धृतराष्ट्रउवाच अनीश्वरोयंपुरुषोभवाभवेसूत्रप्रोतादारुमयीवयोषा॥ धात्रातुदिष्टस्यवशेकृतोयंतस्माद्वदत्वंश्रवणेधृतोहम्॥१॥ ॥ विदुरउवाच॥ ॥ अप्राप्तकालंवचनंबृहस्पतिरपिब्रुवन्॥ लभतेबुद्धवज्ञानमवमानंचभारत॥ २॥ प्रियोभवतिदानेनप्रियवादेनचापरः ॥ मंत्रमूलबलेनान्योयःप्रियःप्रियएवसः॥३॥ द्वेष्योनसाधुर्भवतिनमेधावीनपंडितः॥ प्रियंशुभानिकार्याणिद्वेष्येपापानिचैवह॥४॥उक्तंमयाजातमात्रेपिराजन्दुर्योधनंत्यजपुत्रंत्वमेकम्॥तस्यत्यागात्पुत्रशतस्यवृद्धिरस्यात्यागात्पुत्रशतस्यनाशः॥५॥नवृद्धिर्वृद्धुमंतव्यायावद्वृद्धिःक्षयमावहेत्॥क्षयोपिबद्धुमंतव्योयःक्षयोवृद्धिमावहेत्॥६॥नसक्षयोमहाराजयःक्षयोवृद्धिमावहेत्॥ क्षयःसत्विहमंतव्योयंलब्ध्वाबहुनाशयेत् ॥ ७॥ समृद्धागुणतःकेचिद्भवंतिधनतोपरे॥ धनवृद्धान्गुणैर्हीनान्धृतराष्ट्रविवर्जय॥८॥ ॥ धृतराष्ट्रउवाच॥ ॥ सर्वंत्वमायतीयुक्तंभाषसेप्राज्ञसंमतम्॥ नचोत्सहेसुतंत्यक्तुंयतोधर्मस्ततोजयः॥९॥ ॥विदुरउवाच॥ ॥अतीवगुणसंपन्नोनजातुविनयान्वितः॥सुसूक्ष्ममपिभूतानामुपमर्दमुपेक्षते॥ १०॥ परापवादनिरताःपरदुःखोदयेषुच ॥ परस्परविरोधेचयतंतेसततोत्थिताः ॥ ११ ॥ सदोपदर्शनंयेषांसंवासेसुमहद्भयम्॥ अर्थादानेमहान्दोषःप्रदानेचमहद्भयम्॥ १२॥

धृतिमान् ॥ १ ॥ बुद्ध्यवज्ञानंअवज्ञातबुद्धित्वम् ॥ २ ॥ मंत्रबलेनमूलबलेनचप्रियकृत्प्रियोभवति सचदानाद्यभावेपुनरप्रियोभवतिअहंतुनतथाऽनस्वयाप्राप्तकालेमदुक्तेःनादरोनकर्तव्यइतिभावः ॥ ३ ॥ द्वेष्येइति योयस्यद्वेष्यस्तस्मिन्तदृध्यासाधुत्वादिकंसदपिनास्तिप्रियत्वसदपितंदृध्याऽस्तीतिभावः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ आयतीयुक्तंउदर्कैहितम् ॥ ९ ॥ पुत्रंत्यक्तुमशक्तेनदुष्टाःशकुन्यादयोवात्याज्याइत्याशयेनाह अतीवेति कुलविनाशोनोपेक्षणीयइतिभावः ॥ १० ॥ ११ ॥ १२ ॥

॥ १३ ॥ सौहार्देमैत्रीहेतौनिवर्तमानेसतिप्रीतिःफलनिर्वृत्तिःसुखंचप्रणश्यति सनीचोऽपवादंयियतेतंक्षयेचयत्नमारभतेशांतिंचनगच्छतीतिद्वयोःसंबंधः ॥ १४ ॥ १५ ॥ संगतंसंबंधन॥१६॥निशम्यविचार्य ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ शुभार्थिनाऐश्वर्यलिप्सुना ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ दिग्धहस्तंविषाक्तबाणहस्तं सश्रीमान्एनस्तस्यज्ञातेरवसादजंपापंविंदति मृगवधजंपापंव्याध

येवैभेदनशीलास्तुसकामानिस्नपाःशठाः॥ येपापाइतिविख्याताःसंवासेपरिगर्हिताः ॥ १३॥ युक्ताश्चान्यैर्महादोषैर्येनरास्तान्विवर्जयेत्॥निवर्तमानेसौहार्दे प्रीतिर्नीचेप्रणश्यति॥ १४॥ याचैवफलनिर्वृत्तिःसौहृदेचैवयत्सुखम्॥ यततेचापवादाययत्नमारभतेक्षये॥ १५॥ अल्पेप्यपकृतेमोहान्नशांतिमधिगच्छति॥ तादृशैःसंगतंनीचैर्नृशंसैरकृतात्मभिः॥१६॥ निशम्यनिपुणंबुद्ध्याविद्वान्दूराद्विवर्जयेत् ॥ योज्ञातिमनुगृह्णातिदरिद्रंदीनमातुरम्॥ १७॥ सपुत्रपशुभिर्वृद्धिंश्रेयश्चानंत्यमश्नुते॥ ज्ञातयोवर्धनीयास्तैर्यइच्छंत्यात्मनःशुभम्॥१८॥ कुलवृद्धिंचराजेंद्रतस्मात्साधुसमाचर॥ श्रेयसायोक्ष्यतेराजन्कुर्वाणोज्ञातिसत्क्रियाम् ॥ १९॥ विगुणात्यपिसंरक्ष्याज्ञातयोभरतर्षभ॥ किंपुनर्गुणवंतस्तेत्वत्प्रसादाभिकांक्षिणः ॥ २० ॥ प्रसादंकुरुवीराणांपांडवानांविशांपते॥ दीयतांग्रामकाः केचित्तेषांवृत्त्यर्थमीश्वर॥ २१ ॥ एवंलोकेयशःप्राप्तंभविष्यतिनराधिप॥ वृद्धेनहित्वयाकार्यंपुत्राणांतातशासनम्॥ २२॥ मयाचापिहितंवाच्यंविद्धिमांत्वद्धितैषिणम्॥ ज्ञातिभिर्विग्रहस्तातनकर्तव्यःशुभार्थिना ॥ सुखानिसहभोज्यानिज्ञातिभिर्भरतर्षभ॥ २३॥ संभोजनंसंकथनंसंप्रीतिश्चपरस्परम्॥ ज्ञातिभिःसह कार्याणिनविरोधःकदाचन॥ २४॥ ज्ञातयस्तारयंतीहज्ञातयोमज्जयंतिच॥ सुवृत्तास्तारयंतीहदुर्वृत्तामज्जयंतिच॥ २५॥ सुवृत्तोभवराजेंद्रपांडवान्प्रतिमानद॥ अधर्षणीयःशत्रूणांतैर्वृतस्त्वंभविष्यसि॥ २६॥ श्रीमंतंज्ञातिमासाद्ययोज्ञातिरवसीदति ॥ दिग्धहस्तंमृगइवसएनस्तस्यविंदति॥ २७॥ पश्चादपिनरश्रेष्ठतवतापोभविष्यति॥ तान्वाहतान्सुतान्वापिश्रुत्वातदनुचिंतय॥ २८॥ येनखट्वांसमारूढःपरितप्येतकर्मणा॥ आदाववनतत्कुर्यादध्रुवेजीवितेसति॥ २९॥ नकश्चिन्नापनयतेपुमानन्यत्रभार्गवात्॥ शेषसंप्रतिपत्तिस्तुबुद्धिमत्स्वेवतिष्ठति॥ ३०॥ दुर्योधनेनयद्येतत्पापंतेषुपुराकृतम्॥ त्वयातत्कुलवृद्धेनप्रत्यानेयंनरेश्वर॥ ३१॥ तांस्त्वंपदेप्रतिष्ठाप्यलोकेविगतकल्मषः॥ भविष्यसिनरश्रेष्ठपूजनीयोमनीषिणाम्॥ ३२॥

इवेत्यर्थः ॥२७॥२८॥ खट्वांसमारूढश्चितागारंप्रविष्टःलोकेआगंतुंलज्जमानइत्यर्थः ॥ २९ ॥ नकश्चिदिति भार्गवात्शुक्रादन्यत्रनीतिशास्त्रकर्तारंशुक्रंविहायअन्यःकश्चिदपिनअपनयतेइतिनअपितुसर्वोप्यपनयतेअनीतिंकरोतिअतःयत्अतीतंतत्अतीतमेवशेषस्यतत्कालोचितस्यअर्थस्यप्रतिपत्तिःविचारःकर्तव्यइत्यर्थः ॥ ३०॥ तदेवाह दुर्योधनेनेति प्रत्यानेयंप्रतिकर्तव्यम् ॥ ३१ ॥ प्रतीकारमेवाह तानिति प्रतिष्ठाप्यराज्यांशदानेनस्थिरीकृत्य ॥ ३२ ॥

धीराणांउपदेष्टृणांसुव्याहृतानिवचनानि अध्यवस्यतिनिश्चयंकरोति उत्तमफलंकर्मारभतइत्यर्थः ॥ ३३ ॥ सुकुशलैरप्युपयुक्तंउपदिष्टंतत्ज्ञानंअसम्यगेवयतःउपलभ्यंज्ञेयंतेनअविदितंनज्ञातं विदितंज्ञातंवातत्नानुष्ठितं मदुक्तंत्वयिनिष्फलमेवेतिभावः ॥३४॥ यस्यश्येनादेःफलंब्रह्मवधादिपापोदयंपापहेतुःतत्फलंफलहेतुभूतंकर्मयोनारभतेसवर्धते ॥३५॥ अविमृश्यअविचार्यपापमेवानुवर्ततेसततंकरोति ॥३६॥पंकेनरके ॥३७॥अर्थसंततिःअर्थानामविच्छेदेनवृद्धिःतत्कामः मदंसुरापानजंचित्तवैक्लव्यं स्वप्नंनिद्रां अविज्ञानंपरकीयगुप्तचारादेरज्ञानं आत्मसंभवंआकारंनेत्रवक्त्रविकारादिकं तावतैवपरदूतानां

सुव्याहृतानिधीराणांफलतःपरिचिंत्ययः॥ अध्यवस्यतिकार्येषुचिरंयशसितिष्ठति॥ ३३॥ असम्यगुपयुक्तंहिज्ञानंसुकुशलैरपि॥ उपलभ्यंचाविदितंविदितं चाननुष्ठितम्॥३४॥ पापोदयफलंविद्वान्योनारभतिवर्धते॥ ३५॥ यस्तुपूर्वकृतंपापमविमृश्यानुवर्तते॥ ३६॥ अगाधपंकेदुर्मेधाविषमेविनिपात्यते॥ मंत्रभेदस्यपट्प्राज्ञोद्वाराणीमानिलक्षयेत्॥ ३७॥ अर्थसंततिकामश्चरक्षेदेतानिनित्यशः॥ मदंस्वप्नमविज्ञानमाकारंचात्मसंभवम्॥३८॥ दुष्टामात्येषुविश्रंभंदूताच्चाकुशलादपि॥ द्वाराण्येतानियोज्ञात्वासंवृणोतिसदानृप॥ ३९॥ त्रिवर्गाचरणेयुक्तःसशत्रूनधितिष्ठति॥ नवैश्रुतमविज्ञायवृद्धानुपसेव्यवा॥४०॥ धर्मार्थौवेदितुंशक्यौबृहस्पतिसमैरपि॥ नष्टंसमुद्रेपतितंनष्टंवाक्यमशृण्वति॥४१॥अनात्मनिश्रुतंनष्टंनष्टंहुतमनग्निकम्॥ मत्यापरीक्ष्यमेधावीबुद्ध्यासंपाद्यचासकृत्॥ ४२॥ श्रुत्वादृष्ट्वाथविज्ञायप्राज्ञैर्मैत्रींसमाचरेत्॥ अकीर्तिंविनयोहंतिहंत्यनर्थपराक्रमः॥ ४३॥ हंतिनित्यंक्षमाक्रोधमाचारोहंत्यलक्षणम्॥ परिच्छदेनक्षेत्रेणवेश्मनापरिचर्यया॥ ४४॥ परीक्षेतकुलंराजन्भोजनाच्छादनेनच॥ उपस्थितस्यकामस्यप्रतिवादोनविद्यते॥ ४५॥ अपिनिर्मुक्तदेहस्यकामरक्तस्यकिंपुनः॥ प्राज्ञोपसेविनंवैद्यंधार्मिकंप्रियदर्शनम्॥ ४६॥ मित्रवंतंसुवाक्यंचसुहृदंपरिपालयेत्॥ दुष्कुलीनःकुलीनोवामर्यादांयोनलंघयेत्॥ ४७॥ धर्मापेक्षीमृदुर्ह्रीमान्सकुलीनशताद्वरः॥ ययोश्चित्तेनवाचित्तंनिभृतंनिभृतेनवा॥ ४८॥ समेतिप्रज्ञयाप्राज्ञातयोर्मैत्रीनजीर्यति॥ दुर्बुद्धिमकृतप्रज्ञंछन्नंकूपंतृणैरिव॥ ४९॥ विवर्जयीतमेधावीतस्मिन्मैत्रीप्रणश्यति॥ अवलिप्तेषुमूर्खेषुरौद्रसाहसिकेषुच॥ ५०॥

त्रमुन्नयंति ॥२८॥ मंत्रभेदस्यद्वाराणिसंवृणोतिपिदधाति ॥३९॥ श्रुतंशास्त्रम्॥४०॥४१॥ मत्यामननेननयुक्तिभिरनुचिंतनेन जात्येतिपाठेकुलीनत्वेन बुद्ध्यात्वानुभवेन संपाद्यकार्ययोग्यतांनिश्चित्य ॥ ४२॥ श्रुत्वापरतः दृष्ट्वात्वयंआकृत्याज्ञात्वा विज्ञायपुनःपुनर्विशेषेणज्ञात्वाप्राज्ञतया ॥ ४३॥ परिच्छदःभोग्यवस्तुसामग्री क्षेत्रेणजन्मस्थानेन कुशमवातिषुप्रायेणविवेकाभावात् परिचर्ययाआचारेण ॥४४॥ ॥ ४५ ॥ वैद्यंविद्यावंतम् ॥ ४६ ॥ ४७ ॥ चित्तंज्ञानमात्रं निभृतंगूढाचारप्रवृत्तंमंत्रयंत्रादि प्रज्ञाविशेषतोर्थान्नयनक्षमता ॥ ४८ ॥ ४९ ॥ रौद्राःकोपनाःसाहसिकाःअविमृश्यकारिणस्तेषु ॥ ५० ॥

॥ ५१ ॥ इंद्रियाणांउत्सर्गोविषयेषुप्रवृत्तिः अनुत्सर्गोविषयेभ्योनिवृत्तिः सामृत्युतुल्यादुरनुष्ठेयेत्यर्थः ॥५२॥५३॥ आयुष्याणिआयुःकराणि अपनीतंअन्यायेननाशितम् ॥५४॥ आयत्यांआगामिनिकाले दुःखस्यप्रतीकारज्ञः तदात्वेवर्तमानेदृढनिश्चयः भोगंविनाप्राप्तस्यदुःखस्यनाशोनास्तीतिज्ञात्वातत्संबंधेपिनोत्तपति ॥५५॥५६॥ मंगलानांदधिदूर्वागवादीनांआलंभनंस्पर्शः योगःसहायसंपत् उत्थानंउ

तथैवापेतधर्मेषुनमैत्रीमाचरेद्बुधः॥ कृतज्ञंधार्मिकंसत्यमक्षुद्रंदृढभक्तिकम्॥५१॥ जितेंद्रियंस्थितंस्थित्यांमित्रमत्यागिचेष्यते॥ इंद्रियाणामनुत्सर्गोमृत्युना पिविशिष्यते॥५२॥ अत्यर्थंपुनरुत्सर्गःसादयेद्देवतानपि॥ मार्दवंसर्वभूतानामनसूयाक्षमाधृतिः॥५३॥ आयुष्याणिबुधाःप्राहुर्मित्राणांचाविमानना॥ अपनीतंसुनीतेनयोर्थंप्रत्यानिनीषते॥५४॥ मतिमास्थायसुदृढांतदकापुरुषव्रतम्॥ आयत्यांप्रतिकारज्ञस्तदात्वेदृढनिश्चयः॥५५॥ अतीतेकार्यशेषज्ञोनरो थैर्नप्रहीयते॥ कर्मणामनसावाचायदभीक्ष्णंनिषेवते॥५६॥ तदेवापहरत्येनंतस्मात्कल्याणमाचरेत्॥ मंगलालंभनंयोगःश्रुतमुत्थानमार्जवम्॥५७॥ भूति मेतानिकुर्वंतिसतांचाभीक्ष्णदर्शनम्॥ अनिर्वेदःश्रियोमूलंलाभस्यचशुभस्यच॥५८॥ महान्भवत्यनिर्विण्णःसुखंचानंत्यमश्नुते॥ नातःश्रीमत्तरंकिंचिदन्य त्पथ्यतमंमतम्॥५९॥प्रभविष्णोर्यथातातक्षमासर्वत्रसर्वदा॥क्षमेदशक्तःसर्वस्यशक्तिमान्धर्मकारणात्॥ अर्थानर्थौसमौयस्यतस्यनित्यंक्षमाहिता॥६०॥ यत्सुखंसेवमानोपिधर्मार्थाभ्यांनहीयते॥ कामंतदुपसेवेतनमूढव्रतमाचरेत्॥६१॥ दुःखार्तेषुप्रमत्तेषुनास्तिकेष्वलसेषुच॥ नश्रीर्वसत्यदांतेषुयेचोत्साहविव र्जिताः॥६२॥आर्जवेननरंयुक्तमार्जवात्सव्यपत्रपम्॥ अशक्तंमन्यमानास्तुधर्षयंतिकुबुद्धयः॥६३॥अत्यार्यमतिदातारमतिशूरमतिव्रतम्॥ प्रज्ञाभिमानिनं चैवश्रीर्भयान्नोपसर्पति॥६४॥ नचातिगुणवत्सेवानात्यंतंनिर्गुणेषुच॥ नैषागुणान्कामयतेनैर्गुण्यान्नानुरज्यते॥६५॥ उन्मत्तागौरिवांधाश्रीःक्वचिदेवाव तिष्ठते॥ अग्निहोत्रफलावेदाःशीलवृत्तफलंश्रुतम्॥६६॥रतिपुत्रफलानारीदत्तभुक्तफलंधनम्॥अधर्मोपार्जितैरर्थैर्यःकरोत्यौर्ध्वदेहिकम्॥६७॥नसतस्यफलं प्रेत्यभुंक्तेऽर्थस्यदुरागमात्॥ कांतारेवनदुर्गेषुरुद्धास्वापत्सुसंभ्रमे॥६८॥ उद्यतेषुशस्त्रेषुनास्तिसत्ववतांभयम्॥ उत्थानंसंयमोदाक्ष्यमप्रमादोधृतिःस्मृतिः ॥६९॥ समीक्ष्यचसमारंभोविद्धिमूलंभवस्यतु॥ तपोबलंतापसानांब्रह्मब्रह्मविदांबलम्॥७०॥

यमः॥ ५७॥ अनिर्वेदःउद्योगात्अनुपरमः॥ ५८॥ ५९॥ तस्यमध्यमस्ययोनशक्तःनाप्यशक्तस्तस्येत्यर्थः सर्वेषांक्षमाश्रेयस्करीत्यर्थः॥ ६०॥ मूढव्रतंआहारादौअतिनिर्बंधम्॥ ६१॥ अदांतेषुलि साहीनेषु॥ ६२॥ सव्यपत्रपंसलज्जम्॥ ६३॥ अत्यार्यंअत्यंतमकुटिलम्॥६४॥ ६५॥६६॥और्ध्वदेहिकंपरलोकसाधनंयज्ञदानादि॥६७॥६८॥संयमःइंद्रियाणांनियहः॥६९॥भवस्यऐश्वर्यस्य॥७०

॥७१॥ब्राह्मणकाम्याब्राह्मणस्यइच्छातदाज्ञयेत्यर्थः संदध्यात्कुर्यात्॥७२॥अन्योऽधर्मःकामात्इच्छयासाधुनाकर्मणा॥७३॥ स्त्रीधूर्तकेलिषांधूर्तैश्चेत्येकवद्भावः॥७४॥७५॥७६॥७७॥७८॥वाक्शल्यंदुर्व चनं अनाम्नायःअनभ्यासएवमलंयेषाम्॥७९॥बाह्लीकाः पंचानांसिंधुषष्ठानांनदीनांयत्रसंगमः बाह्लीकानामतेदेशाः विप्रवासःप्रवासः॥८०॥८१॥ स्वमेनशयनेन॥८२॥८३॥८४॥८५॥ यविंतस्त्वेषुपुंस्त्रेषु

हिंसाबलमसाधूनांक्षमागुणवतांबलम्॥ अशौतान्यव्रतघ्नानिआपोमूलंफलंपयः॥७१॥ हविर्ब्राह्मणकाम्याचगुरोर्वचनमौषधम्॥ नतत्परस्यसंदध्यात्प्रति कूलंयदात्मनः॥७२॥ संग्रहेणैषधर्मःस्यात्कामादन्यःप्रवर्तते॥ अक्रोधनजयेत्क्रोधमसाधुंसाधुनाजयेत्॥७३॥ जयेत्कदर्यंदानेनजयेत्सत्येनचानृतम्॥ स्त्री धूर्तकेऽलसेभीरौचंडेपुरुषमानिनि॥७४॥ चौरेकृतघ्नेविश्वासोनकार्योनचनास्तिके॥ अभिवादनशीलस्यनित्यंवृद्धोपसेविनः॥७५॥ चत्वारिसंप्रवर्धंतेकी र्तिरायुर्यशोबलम्॥ अतिक्लेशेनयेर्थास्युर्धर्मस्यातिक्रमेणवा॥७६॥ अरेर्वाप्रणिपातेनमास्मतेषुमनःकृथा॥ अविद्यःपुरुषःशोच्यःशोच्यंमैथुनमप्रजम्॥ ॥७७॥ निराहाराःप्रजाःशोच्याःशोच्यंराष्ट्रमराजकम्॥ अध्वाजरादेहवतांपर्वतानांजलंजरा॥७८॥ असंभोगोजरास्त्रीणांवाक्शल्यंमनसोजरा॥ अनाम्नाय मलावेदाब्राह्मणस्याव्रतंमलम्॥७९॥ मलंपृथिव्याबाह्लीकाःपुरुषस्यानृतंमलम्॥ कौतूहलमलासाध्वीविप्रवासमलाःस्त्रियः॥८०॥ सुवर्णस्यमलंरूप्यंरू प्यस्यापिमलंत्रपु॥ ज्ञेयंत्रपुमलंसीसंसीसस्यापिमलंमलम्॥८१॥ नस्वप्नेनजयेन्निद्रांनकामेनजयेत्स्त्रियः॥ नेंधनेनजयेदग्निंनपानेनसुरांजयेत्॥८२॥ य स्यदानजितंमित्रंशत्रवोयुधिनिर्जिताः॥ अन्नपानजितादाराःसफलंतस्यजीवितम्॥८३॥ सहस्रिणोपिजीवंतिजीवंतिशतिनस्तथा॥ धृतराष्ट्रविमुंचेच्छांन कथंचिन्नजीव्यते॥८४॥ यत्पृथिव्यांव्रीहियवंहिरण्यंपशवःस्त्रियः॥ नालमेकस्यतत्सर्वमितिपश्यन्नमुच्यति॥८५॥ राजन्भूयोब्रवीमित्वांपुत्रेषुसममाचर॥ समतायदितेराजन्स्वेषुपांडुसुतेषुवा॥८६॥ ॥इतिश्रीम०उ०प्रजागरपर्वणिविदुरवाक्येएकोनचत्वारिंशोऽध्यायः॥३९॥ ॥७॥ ॥विदुरउवाच॥ ॥योभ्यर्चितइति असज्जमानःअभिमानशून्यः शक्तिंअहापयित्वाअनतिक्रम्ययथाशक्तीत्यर्थः संतंसाधुंउपैतिलभते यतःप्रसन्नाःसंतःसाधवःसुखायअलंसुखंदातुंपर्याप्ताः॥१॥ अनपाकृष्टःपरैरपकर्षैरप्रापितोपि॥२॥समुत्कर्षःअनृतेनजयइत्यर्थः॥३॥

पांडवेषुचसममतास्तितर्हिसर्वेषुसममेवाचर यथाभागंराज्यंतेभ्योदेहीत्यर्थः॥८६॥ इतिउद्योगपं०नैलकंठीयेभारतभा०एकोनचत्वारिंशोऽध्यायः॥३९॥ ॥७॥योभ्यर्चितइति असज्जमानःअभिमानशून्यः शक्तिंअहापयित्वाअनतिक्रम्ययथाशक्तीत्यर्थः संतंसाधुंउपैतिलभते यतःप्रसन्नाःसंतःसाधवःसुखायअलंसुखंदातुंपर्याप्ताः॥१॥ अनपाकृष्टःपरैरपकर्षैरप्रापितोपि॥२॥समुत्कर्षःअनृतेनजयइत्यर्थः॥३॥

एकपदंसर्वात्मना ॥४॥ स्तब्धताऔद्धत्यं अभिमानःदर्पःतद्द्वन्द्वं अत्यागित्वंलुब्धता मदमोहौएकीकृत्यसप्त ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ आकर्षःविषादीनाम् ॥ ९ ॥ अजेनसहितःउक्षाअजोक्षा औदुंबरंताम्र मयंपात्रजातं उदुंबरंस्फटंतामेइतिविश्वः विषंलोहंमितिसर्वज्ञः स्वर्णनाभःशालग्रामःदक्षिणावर्तःशंखइतिनारायणः ॥ १० ॥ धन्यानिमंगलावहानि ॥११॥ सर्वपरंसर्वेभ्यःपुण्यहेतुभ्यःपरंउत्कृष्टं महावि

असूयैकपदंमृत्युरतिवादःश्रियोवधः॥ अशुश्रूषात्वराश्लाघाविद्यायाःशत्रवस्त्रयः॥४॥आलस्यंमदमोहौचचापलंगोष्ठिरेवच॥ स्तब्धताचाभिमानित्वंतथा त्यागित्वमेवच॥५॥एतेवैसप्तदोषाःस्युःसदाविद्यार्थिनांमताः॥ सुखार्थिनःकुतोविद्यानास्तिविद्यार्थिनःसुखम्॥६॥ सुखार्थीवात्यजेद्विद्यांविद्यार्थीवात्यजे त्सुखम्॥ नाग्निस्तप्यतिकाष्ठानांनापगानांमहोदधिः॥ नांतकःसर्वभूतानांनपुंसांवामलोचना॥७॥ आशाधृतिंहंतिसमृद्धिमंतकःक्रोधःश्रियंहंतियशःकदर्य ता॥अपालनंहंतिपशूंश्चराजन्नेकःकुद्धोब्राह्मणोहंतिराष्ट्रम्॥८॥अजाश्वकांस्यंरजतंचनित्यंमध्वाकर्षःशकुनिःश्रोत्रियश्च॥ दद्धोज्ञातिरवसन्नःकुलीनएतानि. तेसंतुगृहेसदैव॥९॥ अजोक्षाचंदनंवीणाआदर्शोमधुसर्पिषी॥ विषमौदुंबरंशंखःस्वर्णनाभोथरोचना॥१०॥ गृहेस्थापयितव्यानिधन्यानिमनुरब्रवीत्॥ दे वब्राह्मणपूजार्थमतिथीनांचभारत॥११॥ इदंत्वांसर्वपरंब्रवीमिपुण्यंपदंतातमहाविशिष्टम्॥ नजातुकामान्नभयान्नलोभाद्धर्मंजह्याज्जीवितस्यापिहेतोः ॥१२॥ नित्योधर्मःसुखदुःखेत्वनित्येजीवोनित्योहेतुरस्यत्वनित्यः॥ त्यक्त्वाऽनित्यंप्रतितिष्ठस्वनित्येसंतुष्यत्वंतोषपरोहिलाभः॥ १३॥ महाबलान्यस्यमहानुभा वान्प्रशास्यभूमिंधनधान्यपूर्णाम्॥ राज्यानिहित्वाविपुलांश्चभोगान्गतान्नरेंद्रान्वशमंतकस्य॥१४॥ मृतंपुत्रंदुःखपुष्टंमनुष्याउत्क्षिप्यराजन्स्वगृहान्निर्हरं ति॥ तंमुक्तकेशाःकरुणंरुदंतिचितामध्येकाष्ठमिवक्षिपंति॥१५॥ अन्योधनंप्रेतगतस्यभुंक्तेवयांसिचाग्निश्चशरीरधातून्॥ द्वाभ्यामयंसहगच्छत्यमुत्रपुण्येन पापेनचवेष्ट्यमानः॥ १६॥ उत्सृज्यविनिवर्ततेज्ञातयःसुहृदःसुताः॥ अपुष्पानफलान्वृक्षान्यथातातपतत्रिणः॥ १७॥ अग्नौप्रास्तंतुपुरुषंकर्मान्वेतिस्वयंकृ तम्॥ तस्मात्तुपुरुषोयत्नाद्धर्मंसंचिनुयाच्छनैः॥ १८॥ अस्माल्लोकादूर्ध्वममुष्यचाधोमहत्तमस्तिष्ठतित्वंधकारम्॥ तद्वैमहामोहनमिंद्रियाणांबुध्यस्वमात्वांप्र लभेतराजन्॥ १९॥

शिष्टंमहेनउत्सवेनअविशिष्टंसमानंमांगलिकमित्यर्थः ॥ १२ ॥ अस्यजीवत्वस्यहेतुरविद्या अनित्यंसुखदुःखेअविद्यांच नित्येधर्मेनिरवद्येआत्मनिचप्रतितिष्ठस्वनिष्ठांकुरु संतुष्यसंतोषंप्रामुहि तोषःपरउत्कृ ष्टःयस्मिन्लाभे ॥ १३ ॥ १४ ॥ गृहात्निर्हरंतिदूरीकुर्वंति ॥ १५ ॥ १६ ॥ उत्सृज्यमृतस्यदेहंत्यक्त्वा ॥ १७ ॥ १८ ॥ अस्माल्लोकादूर्ध्वंस्वर्गे अमुष्यअमुष्मात्स्वर्गात् चात्अस्माच्च अधःपाताले महत्त मःतमोगुणप्रधानैःपुरुषैःप्राप्यंस्थानं अंधकारंअप्रकाशं तत्अंधंतमःअंधतामिस्राख्यंनरकंबुध्यस्व मात्वांरागांधंप्रलभेतस्मरेत् ॥ १९ ॥

प्रतिपत्तुंज्ञातुंशक्ष्यसिचेदितिसंबंधः ॥ २० ॥ आत्माजीवोनदीपुण्यंधर्मएवतीर्थंयस्यां सत्यंब्रह्मतस्मादुदयोयस्याः तस्यांस्नातःनिष्णातःप्रत्यवपेमग्नइत्यर्थः पूयतेशुध्यतिकःपुण्यकर्मा पुण्यमपिकिं नित्यम लोभएव वैराग्यान्नपरंपुण्यमित्यर्थः ॥ २१ ॥ नदीसंसारनदीं जन्मदुर्गाणिसंतर मोक्षार्थंयतस्वेत्यर्थः ॥२२॥ २३ ॥ धृत्येति कामंअशनायांचधैर्येणजित्वाशिश्नोदरंदोषात्रक्षेत् सम्यग्दृष्ट्वावस्तूनामादा नेनदृष्टपूतेस्थलेपदन्यासेनचपाणिपादंचक्षुषारक्षेत् चक्षुःश्रोत्रेमनसैवपरुष्यादिभ्यःकुशब्देभ्यश्चव्यावर्तनेनरक्षेत् मनोवाचंचकर्मणासंयमनेनरक्षेत्॥२४॥नित्योदकीनित्ययथाकालंस्नानाचमनपरः॥२५

इदंवचःशक्ष्यसिचेद्यथावन्निशम्यसर्वंप्रतिपत्तुमेव॥ यशःपरंप्राप्स्यसिजीवलोकेभयंनचामुत्रनचेहतेऽस्ति ॥ २० ॥ आत्मानदीभारतपुण्यतीर्थासत्योदया धृतिकूलादयोर्मिः॥ तस्यांस्नातःपूयतेपुण्यकर्मापुण्योत्यात्मानित्यमलोभएव॥२१॥ कामक्रोधग्राहवतींपंचेंद्रियजलांनदीम्॥नावंधृतिमयींकृत्वाजन्मदुर्गा णिसंतर॥२२॥ प्रज्ञावद्भिंधर्मवद्भिंस्ववंधुंविद्यावद्भिंवयसाचापिवृद्धम्॥ कार्याकार्येपूजयित्वाप्रसाद्यःसंपृच्छेन्नसमुत्पेल्कदाचित्॥ २३॥ धृत्याशिश्नोदरंरक्षे त्पाणिपादंचचक्षुषा॥ चक्षुःश्रोत्रेचमनसामनोवाचंचकर्मणा॥ २४॥ नित्योदकीनित्ययज्ञोपवीतीनित्यस्वाध्यायीपतितान्नवर्जी॥ सत्यंब्रुवन्गुरवेकर्मकुर्व न्नब्राह्मणश्च्यवतेब्रह्मलोकात्॥२५॥ अधीत्यवेदान्परिसंस्तीर्यचाग्नीनिष्ट्वायज्ञैःपालयित्वाप्रजाश्च॥गोब्राह्मणार्थेशस्त्रपूतांतरात्माहतःसंग्रामेक्षत्रियःस्वर्गमे ति॥ २६॥ वैश्योधीत्यब्राह्मणान्क्षत्रियांश्चधनैःकालेसंविभज्याश्रितांश्च॥ त्रेतापूतंधूममाघ्रायपुण्यंप्रेत्यस्वर्गेदिव्यसुखानिभुंक्ते॥२७॥ ब्रह्मक्षत्रंवैश्यवर्णंच शूद्रःक्रमेणैतान्यायतःपूजयानः॥ तुष्टेष्वेतेष्वव्यथोदग्धपापस्त्यक्त्वादेहंस्वर्गसुखानिभुंक्ते॥ २८॥ चातुर्वर्ण्यस्यैषधर्मस्तवोक्तोहेतुंचानुब्रुवतोमेनिबोध॥ क्षा त्राद्धर्माद्धीयतेपांडुपुत्रस्तंत्वंराजन्राजधर्मेनियुंक्ष्व॥ २९॥ ॥ धृतराष्ट्रउवाच॥ ॥ एवमेतद्यथात्वंमामनुशाससिनित्यदा॥ ममापिचमतिःसौम्यभवत्येवं यथात्थमाम्॥३०॥सातुबुद्धिःकृताप्येवंपांडवान्प्रतिमेसदा॥ दुर्योधनंसमासाद्यपुनर्विपरिवर्तते॥३१॥ नदिष्टमभ्यतिक्रांतुंशक्यंभूतेनकेनचित्॥ दिष्टमेवधु वंमन्येपौरुषंतुनिरर्थकम्॥३२॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिप्र०प०विदुरवाक्येचत्वारिंशोऽध्यायः॥४०॥समाप्तमिदंप्रजागरपर्व॥५॥

परिसंस्तीर्याग्नीनपरिस्तरणैः एतेनाग्निहोत्रमुपलक्षयतीतिनारायणः परिसंस्तीर्यवितत्यस्वेस्वेस्थानेआधायेत्यर्थः ततोयज्ञैरिष्ट्वाशस्त्रपूतःअंतरात्माचित्तंयस्यगोब्राह्मणार्थेमृतइत्यर्थः संग्रामेहतोवाक्षत्रियः ॥ २६ ॥ अधीत्यवेदंशास्त्रमितिशेषः त्रेताअग्नित्रयंतस्याःपूतंधूमंआघ्राय पुण्यंपावनं प्रेत्यमृत्वा ॥२७॥ २८ ॥ क्षात्राद्धर्मात्पृथिवीपालनरूपात्राज्यादितियावत् राजधर्मेराज्ये ॥ २९ ॥ मांअनुशास सिअनुशास्सि ॥ ३० ॥ ३१ ॥ ३२ ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेचत्वारिंशोऽध्यायः ॥ ४० ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥

एवंब्रह्मविद्याधिकारिविशेषणीभूतासाधनसंपत्तिःसम्यगुपपादिता तत्रकचित्कचित्प्रसंगात्प्रयतोयतोनिवर्ततइत्यादिनासंक्षेपेणब्रह्मविद्यासूचितांविस्तरेणश्रोतुकामोधृतराष्ट्रउवाच अनुक्तमिति तेत्वया॥१ मृत्युःजन्ममरणप्रवाहात्मकःसंसारः ॥ २ ॥ तेतुभ्यं गुह्यान्गोप्यान्योगकलादीन् प्रकाशान्शमादीन् हृदयसंश्रयान्धर्मान्प्रवक्ष्यति ॥३॥ वर्णाश्रमकर्ममुक्तंध्यब्रह्मविद्यांनोपदिशेदित्याख्यायिकामुखेनाह किंत्वमित्यादिना सनातनापरनामासनत्सुजातः॥४॥५॥६॥७॥८॥विधिदृष्टेनशास्त्रावगतेनकर्मणामधुपर्कादिना॥९॥१०॥ विद्याप्राप्तिफलमाह यंश्रुत्वेति ॥ ११ ॥ विषहेरन्बाधेरन् अमर्षःअसहिष्णुता

अथसनत्सुजातपर्व॥

॥ धृतराष्ट्रउवाच॥ ॥ अनुक्तंयदितेकिंचिद्वाचाविदुरवियते ॥ तन्मेशुश्रूषतोब्रूहिविचिन्वाणिहिभाषसे॥ १ ॥ ॥ विदुरउवाच॥ ॥ धृतराष्ट्रकुमारोवैयःपुराणःसनातनः॥ सनत्सुजातःप्रोवाचमृत्युर्नास्तीतिभारत॥ २॥ सतेगुह्यान्प्रकाशांश्चसर्वान्हृदयसंश्रयान्॥ प्रवक्ष्यतिमहाराजसर्वबुद्धिमतांवरः॥ ३॥ ॥ धृतराष्ट्रउवाच॥ ॥ किंत्वंनवेदतद्ब्रूयोयन्मेब्रूयात्सनातनः॥ त्वमेवविदुरब्रूहिप्रज्ञाशेषोस्तिचेत्तव॥४॥ ॥ विदुरउवाच॥ ॥ शूद्रयोनावहंजातोनातोन्यद्वक्तुमुत्सहे॥ कुमारस्यतुयाबुद्धिर्वेदतांशाश्वतीमहम्॥५॥ब्राह्मींहियोनिमापन्नःसुगुह्यमपियोवदेत्॥ नतेनगर्त्योदेवानांतस्मादेतद्ब्रवीमिते॥६॥ धृतराष्ट्रउवाच॥ ॥ ब्रवीहिविदुरत्वंमेपुराणंतंसनातनम्॥ कथमेतेनदेहेनस्यादिहैवसमागमः॥७॥ ॥ वैशंपायनउवाच॥ ॥ चिंतयामासविदुरस्तमृषिंशंसितव्रतम्॥ सचतच्चिंतितंज्ञात्वादर्शयामासभारत॥८॥ सचैनंप्रतिजग्राहविधिदृष्टेनकर्मणा॥ सुखोपविष्टंविश्रांतमथैनंविदुरोब्रवीत्॥ ९॥ भगवन्संशयःकश्चिद्धृतराष्ट्रस्यमानसः॥ योनशक्योमयावक्तुंत्वमस्मैवक्तुमर्हसि ॥ १० ॥ यंश्रुत्वाऽयंमनुष्येंद्रःसर्वदुःखातिगोभवेत्॥ लाभालाभौप्रियद्वेष्यौययैनंनजरांतकौ॥ ११॥ विषहेरन्भयामर्षौक्षुत्पिपासेमदाद्भवौ॥ अरतिश्चैवतंद्रीचकामक्रोधौक्षयोदयौ॥ १२ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिसनत्सुजातीयपर्वणिविदुरकृतसनत्सुजातप्रार्थनेएकचत्वारिंशोऽध्यायः॥४१॥ ॥ ७ ॥ ॥ वैशंपायनउवाच॥ ॥ ततोराजाधृतराष्ट्रोमनीषीसंपूज्यवाक्यंविदुरेरितंतत्॥ सनत्सुजातंरहितेमहात्मापप्रच्छबुद्धिंपरमांबुभूषन्॥ १॥

उद्भवउत्कृष्टैश्वर्यं क्षयोदयौतयोर्हेतुभूतेपापपुण्येच ॥ १२ ॥ ॥ इतिउद्योग॰नैलकंठीयेभारतभा॰ एकचत्वारिंशोऽध्यायः॥४१॥ ॥७॥ ॥ उद्योगपर्वणिसनत्सुजातीयेभाष्यकारादिभिर्व्याख्यातान्संप्रतितनपुस्तकेषुचस्थितान्पाठान्श्लोकांश्चगुणोपसंहारन्यायेनैकीकृत्यव्याख्यायतेततोराजेति मनीषी शास्त्रसंस्कृतमनीषावान् रहितेएकांते परमांबुद्धिंपरविद्यांअथपराययातदक्षरमधिगम्यतइतिश्रुतिप्रसिद्धांपप्रच्छ एतेनविषयोदर्शितः प्रयोजनंदर्शयति महात्मावुभूषन्निति परंब्रह्मभवितुमिच्छन् ब्रह्मवेदब्रह्मैवभवतीतिब्रह्मज्ञानस्य ब्रह्मभावफलकत्वश्रवणात् विदुरेरितंवाक्यं सनत्सुजातःप्रोवाचमृत्युर्नास्तीति भारतेतिमृत्युशब्दितस्यबंधस्याभावंश्रुत्वाप्रतिपूज्यासंगत्वात्कपटवतोपिममपापात्भयंनास्तीतिसंतो पंप्राप्य तेनज्ञानस्यसर्व [illegible] त्वंदर्शितं यथोक्तं हत्वापिसइमांल्लोकान्नहंतिननिबध्यतइति ॥१

प्रश्नमेवाह सनत्सुजातेति मृत्युरितिध्रुवंजन्ममृतस्यचेतिसाहचर्याज्जन्ममरणप्रवाहरूपोबंधउच्यते सनास्तीतिनवप्रकर्षेणवादंपूर्वोक्तंविदुरादीनांमुखात्शृणोमि हेसनत्सुजातसनत्सर्वदासुभुजातंजन्ममयस्य नित्यकुमारत्वेनजरामरणविवर्जितेत्यर्थः श्रुतिश्चैतदाह ननिरोधोनचोत्पत्तिर्नबद्धोनचसाधकः नमुमुक्षुर्नवैमुक्तइत्येषापरमार्थतेति नुतथाअमृत्यवेमृत्योरभावाय एकशतंवर्षाणिमघवान्प्रजापतौब्रह्मचर्यमुवासेतिबंधनिवृत्स्यर्थोयत्नश्चश्रूयते नह्यसतोनित्यनिवृत्तस्यनिवृत्स्यर्थंयत्नोयुज्यते तदनयोःपक्षयोःकतरत्मतंसत्यंतद्ब्रूहीतिशेषः॥२॥ यत्कर्मणाब्रह्मचर्येणमृत्युर्नास्तीतितेनसत्यस्यबंधस्यसाधनेननाशइतिअपृच्छःपृष्टवानसि यच्चापरंमृत्युःस्वरूपतएवनास्तीत्यपृच्छः एतत्एतयोःपक्षयोःपरस्परविरुद्धत्वंभाविशंकिथाःमांमंस्थाः अमृत्युःकर्मणाकेचिदितिपाठेकर्मसाध्यंअमृतत्वंउतज्ञानसाध्यमितिपक्षद्वयोपन्यासः तयोश्चकर्मसमुच्चयपक्षाश्रयेणविरोधभावंमन्वानोभाविशंकिथाइतिब्रवीतीत्यर्थः॥३॥अविरोधमेवाह उभेइति एतस्यएकस्यैवपुंसोऽवस्थाभेदेनउभेअपिसत्येएव हेक्षत्रियविद्धि अविद्यावस्थायांबंधःसत्यःकर्मनाशश्च विद्यावतांतुरजूरगवत्कालत्रयेपिनास्ति मोहाद्व्यासमानस्यतुज्ञानमात्रेणनिवृत्तिर्भवतीतिभावः आद्यप्रदत्तेइतिपाठेउभेअपिमतेअनादिनीनित्येइत्यर्थः सिद्धांतमाह मोहादिति निर्मोहानांतुनास्त्येवमृत्युरित्यर्थः मोहंविद्वणोति प्रमादमिति आत्मतत्त्वानवेक्षणंप्रमादः मूलाज्ञानमितियावत् तदेवमृत्युः मृत्युर्वैतमइतिश्रुतेः अप्रमादंअवहितांसम्यगवेक्षणंज्ञानमितियावत् ज्ञानंसम्यगवेक्ष

धृतराष्ट्रउवाच॥ ॥सनत्सुजातयदिदंशृणोमिनमृत्युरस्तीतितवप्रवादम्॥देवासुरात्याचरन्ब्रह्मचर्यंमृत्यवेतत्कतरन्नुसत्यं॥२॥ ॥सनत्सुजातउवाच॥ ॥अपृच्छःकर्मणायच्चमृत्युर्नास्तीतिचापरम्॥शृणुमेब्रुवतोराजन्यथैतन्माविशंकिथाः॥३॥उभेसत्येक्षत्रियैतस्यविद्धिमोहान्मृत्युःसंमतोयंकवीनां॥प्रमादंवैमृत्युमहंब्रवीमितथाऽप्रमादममृतत्वंब्रवीमि॥४॥ प्रमादाद्वैअसुराःपराभवन्नप्रमादाद्ब्रह्मभूताभवंति॥ नैवमृत्युर्व्याघ्रइवात्तिजंतून्नत्यस्यरूपमुपलभ्यतेहि॥५॥ यमंत्वेकेमृत्युमतोन्यमाहुरात्मावसन्नमृतंब्रह्मचर्यम्॥ पितृलोकेराज्यमनुशास्तिदेवःशिवःशिवानामशिवोऽशिवानाम्॥६॥

णमितिस्मृतेः अमृतत्वंअमृतत्वहेतुः ॥ ४ ॥ प्रमादात्अज्ञानात् असुराःअसुषुरममाणाःकामक्रोधाद्यासुरवृत्तिभिराक्रांताःपराभवन्मृत्युवशाअभूवन् तथाअप्रमादात्ज्ञानात् ब्रह्मभूताःपूर्वंब्रह्मैवसंतःअविद्ययाऽब्रह्मत्वमात्मनोमन्यमानाःविद्ययापुनर्ब्रह्मैवभवंति ब्रह्मैवसन्ब्रह्माप्येतीतिश्रुतेः सुराश्चेतिपाठेसुराःशमदमादिमंतःब्रह्मभूताःब्रह्मभावंगताइत्यर्थः मृत्युरज्ञानंजंतून्अत्तिसंसारसंकटेपातयतिनतुव्याघ्रइवदृश्यते कार्यमेवास्यदृश्यतेनस्वरूपमित्यर्थः हियतःअस्यरूपंनिरीक्ष्यमाणमपिनउपलभ्यते नहिरज्जूरगोपादानमज्ञानमुरगवद्दृष्टुंशक्यमित्यर्थः॥ ५ ॥ ननुयदिमृत्योःरूपंनोपलभ्यतेतर्हिंतत्सत्त्वेकिंप्रमाणमतआह यममिति अतःअज्ञानाख्यान्मृत्योरभ्यंयमसंज्ञंएकेमूढाःमृत्युमाहुः अथसत्यवतःकायात्पाशबद्धंवशंगतं अंगुष्ठमात्रंपुरुषंनिश्चकर्षयमोबलादिति अस्यव्यतिरेकमुखेनआत्मनिकल्पितत्वमाह आत्मावसन्नमिति आत्मनिप्रतीच्येवावसन्लीनं तेनरज्जूरगादिवत्यमादिकमपिआत्मनिकल्पितमेवेत्यर्थः आत्मावासमितिपाठेआत्माश्रयमित्यर्थः यमप्रशमोपायमाहामृतमिति ब्रह्मचर्यंब्रह्मणिचर्या आत्मानुसंधानंनिरस्ताखिलकल्पनाजालंअमृतंमोक्षहेतुः योगिनांयमभयंनास्तीत्यर्थः नतस्यरोगोनजरानमृत्युरितिश्रुतेः ननुकल्पितस्ययमस्यमृगजलादेरिवार्थक्रियाकारित्वंनयुक्तमतआह पितृलोकइति यादृशोयक्षस्तादृशोबलिरितिन्यायेनआत्मनिकल्पितगरुडभावस्यविषनिवर्तकत्ववत्तत्राप्यर्थक्रियाकारित्वमस्तीतिभावः अथयुक्तिमाह शिवइति शीतोष्णादिवदेकस्मिन्सत्यस्यविरुद्धधर्मद्वयस्यासंभवात्तत्स्मिन्नेवशिवत्वाशिवत्वेरज्जुसर्पदंडादिवत्कल्पितेइत्यर्थः ॥ ६ ॥

अस्येति अस्ययमस्यआदेशादाज्ञातःक्रोधादिरूपोमृत्युर्मरणहेतुर्निःसरतिउद्भवति अत्रयथाऽज्ञानाभिमानिनीदेवतायमःएवंक्रोधार्थभिमानिन्योपिदेवताःयमस्यदासभूताःसंतीत्यधिदैवमर्थः अध्यात्मंतु अज्ञानादेवक्रोधादयउद्भवंतितोभियतइत्यर्थः ननुयत्रात्मावासमज्ञानंतर्हितत्आत्मनःपृथक्सिद्धमपृथक्सिद्धंवा अंत्येमुक्तानामपिपुनर्बंधापत्तिः आद्येसांख्यप्रकृतिवत्तदनाशापत्तिरित्याशंक्यमृत्युंविशिनष्टि नराणांअहंगतेनैवविमार्गान्चरन्तिजीवानांयोहंकारस्तेनसहगतंगमनंअहंकारसाहित्यंतेनविमार्गान्अनात्मगान्मार्गान्चरन्विषयान्भुंजानइत्यर्थः मुक्तौअज्ञानाश्रयस्यअहमर्थस्यचिदाभास स्यनष्टत्वात्नशुद्धादात्मनःसकाशादज्ञानंपुनरुदेतिनापिपृथगवतिष्ठतइत्यतआह नचेतिदानीमपिसूक्ष्मस्याहमर्थस्यसत्त्वाभकश्चित्ज्ञानंविनाआत्मयोगंउपैति स्वरूपंप्रामोतीत्यर्थःअतोऽहंकारनाशात्पाक्आत्मनःक्रोधादिरूपस्यमृत्योरुदयोयुज्यतएवेत्यर्थः आस्यादेषइतिपाठेआस्तेस्मिन्नित्यास्यमज्ञानस्याधिष्ठानंअहंकारस्तस्मान्निःसरतइतिपूर्ववत्॥७॥आत्मयो गाभावेदोषमाह तेइति तेनराःमोहिताःक्रोधादिभिरितिशेषः तद्वशेक्रोधादिरूपस्यमृत्योर्वशेवर्तमानाःसंतःइतोऽस्माल्लोकात्प्रेताःगताःसंतःतत्रयमलोके पुनरित्यसकृद्गमनसूचनार्थं पतंतिगच्छंतिनरकादावि तिशेषः ततस्तान्गतान्अनुदेवाइंद्रियाणिप्लवंतेतंत्रैवगच्छंतितमुक्तामंतंप्राणोनूक्तामतिप्राणमनूक्तामंतंसर्वेप्राणाअनूक्तामंतीतिश्रुतेःमृड्प्राणत्यागेइत्यनुशासनाच्चमृत्युज्ञानंमरणसंज्ञामपिलभतेअयंभावः:

अस्यादेशान्निःसरतेनराणांक्रोधःप्रमादोलोभरूपश्चमृत्युः॥ अहंगतेनैवचरन्विमार्गान्नचात्मनोयोगमुपैतिकश्चित्॥७॥ तेमोहितास्तद्वशेवर्तमानाइतःप्रेतास्तत्रपुनःपतंति॥ततस्तान्देवाअनुविप्लवंतेअतोमृत्युमरणाख्यामुपैति॥८॥ कर्मोदयेकर्मफलानुरागास्तत्रानुतेयांतिनतरंतिमृत्युम्॥सदर्थयोगानवगमात्समंतात्प्रवर्ततेभोगयोगेनदेही॥९॥तद्वैमहामोहनमिंद्रियाणांमिथ्यार्थयोगस्यगतिर्हिनित्या॥ मिथ्यार्थयोगाभिहतांतरात्मास्मरन्पुरास्तेविषयान्समंतात्॥१०॥ अभिध्यावैप्रथमंहंतिलोकान्कामक्रोधावनुगृह्याशुपश्चात्॥ एतेबालान्मृत्यवेप्रापयंतिधीरास्तुधैर्येणतरंतिमृत्युम्॥ ११ ॥

मृत्युरत्यंतविस्मृतिरितिस्मृतेरज्ञानंप्रत्यगानंदविस्मारकत्वेनयमश्चप्रत्यक्चेनगृहीतस्यदेहस्यचविस्मारकत्वेनसाम्यात्द्वयमपिमृत्युशब्दितं तथाचमुख्योमृत्युरज्ञानंगौणोयमइति ॥८॥ननुप्राङ्मरणान्मृत्युग्रस्तयं मृतस्यतुकृतकृत्यतैवास्तीत्याशंक्याह कर्मोदयइति भोगप्रदस्यकर्मणउदयेसतिकर्मफलभोगेऽनुरागोयेषांतेतथाभूताःतत्रस्वर्गादौअनुयांतिभोगवासनयापूर्वदेहंत्यक्त्वागच्छंतिअतोमृत्युंनतरंति देहनाशमा त्रेणनमुच्यंतइत्यर्थः तथाचश्रुतिः येयंप्रेतेविचिकित्सामनुष्येऽस्तीत्येकेनायमस्तीतिचैकेइतिमृतस्यास्तित्वनास्तित्वेउपक्षिप्य योनिमन्येप्रपद्यंतेशरीरत्वायदेहिनः स्थाणुमन्येनुसंयंतियथाकर्मयथाश्रुतमि तिअस्तीत्येवोपलब्धव्यइतिचास्तित्वंदेहांतरप्राप्तिंचाह अत्रहेतुः सदर्थेति सत्ब्रह्मतत्प्राप्त्यर्थोयोगः सदर्थयोगः यमाद्यष्टांगोपेतः तस्यानवगमादलाभात्समंतात्ऊर्ध्वाधस्तिर्यग्योनिषुभोगयोगेनभोगलि षयादेहीदेहाभिमानीप्रवर्तते ॥ ९ ॥ भोगमेवनिंदति तद्वाइति यत्अस्यपुंसःमिथ्याभूतेषुअर्थेषुशब्दादिविषयेषुयोगोरागस्तदर्थंगतिःप्रवृत्तिःनित्यास्वाभाविकीतदेवइंद्रियाणांमहामोहनंअर्थानांमिथ्यात्वं संकल्पकृतत्वात् यदाहाक्षपादः दोषनिमित्तंरूपादयोविषयाःसंकल्पकृताइति दोषोरागादिः मिथ्यार्थयोगेनविषयसंगेनअभिहतांतरात्माव्यथितचित्तःसन्विषयान्स्मरन्स्मरणपूर्वकंउपास्ते हेतौशतृप्रत्य यः स्मरणमेवविषयोपासनाहेतुरतस्तेषांविस्मरणमेवकर्तव्यमित्यर्थः ॥ १० ॥ तत्स्मरणेदोषमाह अभिध्येति अभिध्याविषयस्मरणंप्रथमं ततःकामस्तत्प्राप्त्यभिलाषः केनचिन्निमित्तेनतत्प्रतिहतौक्रोधः एतेअभिध्यादयःएवंक्रमेणबालान्अजितचित्तान्मृत्यवेमोहायप्रापयंति येतुधीराःजितचित्ताःनिष्कामास्तेमृत्युंतरंति पाठांतरेधर्मयोगाभ्यासंचरंति ॥ ११ ॥

सइति सःमृत्युतरणकामःयोगीवाअभिध्यायन्आत्मानंचिंतयन्उत्पतितान्कामानेवनिहन्यात् हननोपायमाह अनादेरणतुच्छत्वबुद्ध्यापथिपतिततृणवत्तूलादीन्प्राप्तानपिअप्रतिबुद्ध्यमानःअचिंतयन् य एवंविद्वान्भूत्वाकामान्निहंतिएनंपुरुषंमृत्युरज्ञानंमृत्युरिवयमइवनात्तिनयसते निष्कामस्यमृत्युभयंनास्तीत्यर्थः॥ १२॥सकामंनिंदति कामानुसारीति विषयार्थीविषयमनुविनश्यति यथोक्तं कुरंगमातंगपतं गशृंगमीनाहताःपंचभिरेवपंचेति फलितमाह कामानिति विषयांस्यत्कारजोदुःखरूपंयत्किंचित्सर्वंधुनुतेनाशयति॥ १३॥विपक्षेदोषमाह तमइति अयंकामःभूतानांतमःअज्ञानंतत्कार्यकरत्वात् यतःअप्रका शोनास्तिप्रकाशोविषयविवेकोयस्मिन्सतथा अतएवनरकवद्दुःखदः एतदेवाह मुह्यंतइति यथामुह्यंतोमदिरामत्ताः गृह्यंतइतिपाठेपहगृहीताः पथिगच्छंतःश्वभ्रवत्गर्तयुक्तंदेशंधावंति तथाकामिनःसंसारेव र्तमानाःसुखंसुखप्रदंभार्यादिंप्रतिधावंतीत्यर्थः॥ १४॥ अमूढवत्तेः कामेनानभिभूतचित्तस्यपुंसस्तृणमयव्याघ्रवत्मृत्युर्यमःकिंकुर्यान्नकिमपीत्यर्थः यस्मादेवंतस्मात्अस्यकामस्यआयुःजीवनंमूलाज्ञानंनि र्णुदन्अपनेष्यन्अन्यत्किंचित्काम्यमानंरुद्रादिकंअमन्यमानःअगणयन्नाधीयीतनस्मरेत् तुच्छत्वबुद्ध्याविषयविस्मरणमेवकाममूलोच्छेदहेतुरित्यर्थः यदाहवसिष्ठः भमस्यजागतस्यास्यजातस्याकाश

सोभिध्यायन्नुत्पतितान्निहन्यादनादरेणाप्रतिबुद्ध्यमानः॥ नैनंमृत्युर्मृत्युरिवात्तिभूत्वाएवंविद्वान्योविनिहंतिकामान्॥ १२॥ कामानुसारीपुरुषःकाममनुविनश्यति॥ कामान्व्युदस्यधुनुतेयत्किंचित्पुरुषोरजः॥ १३॥ तमोऽप्रकाशोभूतानांनरकोयंप्रदृश्यते॥ मुह्यंतइवधावंतिगच्छंतःश्वभ्रवत्सुखम्॥ १४॥ अमूढवृत्तेःपुरुषस्येहकुर्यात्किंवैमृत्युस्तार्णइवास्यव्याघ्रः॥ अमन्यमानःक्षत्रियत्किंचिदन्यन्नाधीयीतनिर्णुदन्निवास्यचायुः॥ १५॥ सक्रोधलोभौमोहवानंतरात्मा सर्वैमृत्युस्त्वच्छरीरेयएषः॥ एवंमृत्युंजायमानंविदित्वाज्ञानेतिष्ठन्नबिभेतीहमृत्योः॥ विनश्यतेविषयेतस्यमृत्युर्मृत्योर्यथाविषयंप्राप्यमर्त्यः॥ १६॥ ॥ धृतराष्ट्रउवाच॥ ॥यानेवाद्वुरिज्ययासाधुलोकान्द्विजातीनांपुण्यतमान्सनातनात्॥ तेषांपरार्थंकथयंतीहवेदाएतद्विद्वान्नोपैतिकथंनुकर्म॥ १७॥

वर्णवत् अपुनःस्मरणंमन्येसाधोविस्मरणंवरं तथापितवनस्थास्थंसर्वंविस्मरणादृतेइतिच॥ १५॥ यमंत्वेकेइत्यत्रआत्मावसन्नमितियमोप्यात्मनिकल्पितइत्युक्तंतद्याचष्टे सक्रोधलोभाविति यस्त्वच्छरीरेए षःअहंप्रत्ययविषयःअंतरात्माबाह्यात्मानंशरीरमपेक्ष्यआंतरःचिदचिद्ग्रंथिरूपोजीवःसमोहवान्अतस्मिंस्तद्बुद्धिर्मोहःअनात्मनिदेहादावात्मबुद्धिर्विपर्ययरूपंज्ञानंतद्वान्क्रोधलोभभृत्युरूपोभवति शुकन लिकान्यायेनस्वयंबंधहीनोपिअज्ञानात्त्वात्मानंबद्धंमन्यतेतेनकामादिवशोभवतीत्यर्थः उपसंहरति एवमिति जायमानं मोहादितिशेषः मोहविरोधिनिज्ञानेनिष्ठन्निष्ठावान्ययमान्नबिभेति तत्रदृष्टांतः विष येगोचरेतस्यज्ञानत्वमृत्युर्बंधःविनश्यते मृत्योर्यमस्य मर्त्यःदेहः अज्ञानकृतोबंधोज्ञानेनैवनश्यतिनकर्मणेतिप्रघट्टकार्थः॥ १६॥ अत्रशंकते यानिति साधुइज्ययासत्तेपासनेनअश्वमेधादिनाकर्मणापुण्यतमान् इंद्रलोकापेक्षयापुण्यान्सनातनान्नित्यवद्व्यवहारापेक्षयानित्यान्लोकान्सत्यलोकाख्यान्द्विहवेदेआहुःवेदविदः तेषांलोकानांपरार्थंपरार्थत्वंमोक्षप्रापकत्वंवेदाःकथयंति एतत्कर्मणांक्रममुक्तिहेतुत्वंविद्वान् जानन्कर्मकथंनुनउपैतिनशरणीकरोति कर्मभिरेवमोक्षसिद्धौकिंज्ञानेनेतिभावः ॥ १७ ॥

समाधत्ते एवमिति अविद्वान्एवंत्वदुक्तक्रमेणतत्रमोक्षपदेउपयाति तथैवअर्थजातंभोगमोक्षाख्यंप्रयोजनसामान्यंवेदाःवदंति तथाअनीहोनिष्कामःपरात्मापरंअनात्मानंदेहादिकंअविद्ययाआत्मत्वेनगृह्ण
न्जीवःपरंनिर्गुणात्मानंआयातिआभिमुख्येनप्राप्नोति निष्कामस्तत्तदुपाध्याकारतांत्यक्त्वानिष्कलेनरूपेणावतिष्ठतइत्यर्थः अन्यथातुसएवजीवःमार्गेणसुषुम्नानाड्यामार्गान्नूतन्लोकप्रापकान्निहत्यनिर
स्यब्रह्मलोकद्वारापरंप्रयाति तयोर्ध्वमायन्नमृत्वमेतीतिश्रुतेः तथाचबृहदारण्यके तद्यथापेशस्कारीपेशसोमात्रामुपादायान्यन्नवतरंकल्याणतरंरूपंकुरुतेएवमेवेदंशरीरंनिहत्यविद्यांगमयित्वान्यन्नवतरंक
ल्याणतरंरूपंकुरुतेपित्र्यंवागांधर्वंवादैवंवाप्राजापत्यंवाब्राह्मंवेतितुकामयमानोऽथाकामयमानोयोऽकामोनिष्कामआप्तकामःस्यान्नतस्यप्राणाउत्क्रामंत्यत्रैवसमवनीयंतइतिकामयमानस्यअस्माद्देहादुत्क्रां
तस्यदेहंमरणेनासद्रूपत्वंनयतःस्वर्णकारदृष्टांतेनपित्र्यगांधर्वादिरूपांतरकर्तृत्वमुक्त्वानिष्कामस्यपूर्णब्रह्मभावंगतस्यउत्क्रांतिर्निषिध्यते ॥ १८ ॥ ननुजीवःपरंप्राप्नोतिचेदन्यस्यान्यालाभाःयोगात्परएवजीवत्वं

सनत्सुजातउवाच एवंत्यविद्वानुपयातितत्रतत्रार्थजातंचवदंतिवेदाः ॥
अनीहआयातिपरंपरात्माप्रयातिमार्गेणनिहत्यमार्गान् ॥ १८ ॥
धृतराष्ट्रउवाच कोसौनियुंक्तेतमजंपुराणंसचेदिदंसर्वमनुक्रमेण ॥
किंवास्यकार्यमथवासुखंचतन्मेविद्वन्ब्रूहिसर्वंयथावत् ॥ १९ ॥

प्राप्नोतीत्युक्तंभवति तच्चायुक्तं अनियोज्यब्रह्मात्मत्वात्परस्येत्याशंकते कोसाविति तंपरमात्मानंअजंजन्मादिहीनंपुराणंपुरापिनवमित्यनेनपरिणामित्वंनिरस्तं तादृशंपरंकोसौनियुंक्तेयन्नियोगादयंदुःखादि
भाग्भवति नियोजकांतरसत्वेतस्याप्यन्यस्तस्याप्यन्यइतिपरानवस्थेतिभावः ननुपरएवनियोजकांतरंविनाइदंसर्वंचेतनाचेतनंविश्वंतस्तस्मात्देवानुप्राविशदितिश्रुतेःक्रमेणभवतीतिशंकते सचेदिति एतदूष
यति किंवेति अस्यपरस्यावाप्तकामतयानिष्कामस्यकिंवाकार्यंकर्तव्यमस्तिनकिमपीत्यर्थः प्रयोजनमनुद्दिश्यनमंदोपिप्रवर्ततइतिन्यायेनप्रयोजनंविनापरेप्रवृत्तिर्नसंभवतीत्यर्थः ननुलोकवत्तुलीलाकैवल्य
मितिन्यायेनलोकेनिश्चयोजनापिचतुरंगादिकीडादृश्यतेतद्वत्परस्यापिलीलैवजगत्सृष्टिप्रवेशादिकमित्याशंक्याहाथवेति चतुरंगादिकीडापिसुखार्थमेवक्रियतेनचपरस्यसुखलिप्सास्तिनचस्वात्मानंस्वय
मेवसंकटेपातयतःसुखंवास्तीतिनपरस्यस्वतःसृष्टौप्रवृत्तिःसंभवतिनापितेनसहजीवस्याभेदःसंभवति जीवपरयोर्भेदेतुजीवादृष्टानुरोधेनराजवत्परोजीवभोगार्थंसृष्ट्यादौप्रवर्ततेस्वकृतमर्यादापरिपालनार्थं
चेतियुज्यतेऽतःनतयोरभेदःसंभवतीत्यर्थः ॥ १९ ॥

उत्तरमाह दोषइति विभेदयोगेविशेषेणभेदोयथोस्तौविभेदौविभिन्नौतथायोगेअभेदेनऐक्येमहान्दोषः अन्यस्यान्यात्मत्वासंभवात् अतोजीवपरयोस्तात्विकोभेदोनयुक्तइत्यर्थः किंतर्हिअनादियोगेन न
अत्युंशीलमस्येत्यनादिर्भोग्यवर्गःस्थूलसूक्ष्मदेहद्वयात्मकानिक्षेत्राणितैःसहयोगेनसंबंधेनपुंसःपरस्मात्सकाशात्नित्याःजीवाःघटाकाशजलचंद्रादिन्यायेनभवंति तथातेनऔपाधिकेन भेदेनास्यआधिक्यं
किंचिदपिनअपैति नहिजलचंद्रेकंपमानेमुख्यश्चंद्रःकंपते नापिघटाकाशेचलतिमुख्येआकाशेचलनंसंभाव्यते तथाचश्रुतयः एकएवतुभूतात्माभूतेभूतेप्रकाशते एकधाबहुधाचैवदृश्यतेजलचंद्रवत् यथा
स्वयंज्योतिरात्माविवस्वानपोभिन्नाबहुधैकोनुगच्छन् उपाधिनाक्रियतेभेदरूपोदेवःक्षेत्रेष्वेवमजोयमात्मा घटसंवृतमाकाशंनीयमानेयथाघटे घटोनीयेतनाकाशंतद्वज्जीवोनभोपमइत्याद्याऔपाधिकंजी
वपरयोर्भेदंदर्शयंति एकधेतिईश्वररूपेण बहुधेतिजीवरूपेण एकएवशुद्धःजलाशयतरंगचंद्रन्यायेनप्रकाशतइत्याद्यश्रुतेरर्थः एवंचजीवेशभेदप्रयुक्तःसर्वोपिव्यवहारःसेत्स्यतिनचपरांतरकल्पनावतरतीतिसि
द्धं कथंभूतेनअनादियोगाख्येनक्षेत्रसंबंधेन अनादियोगेनअनादिनाअविद्यूल्येनाज्ञानेनहेतुनायोगःसंबंधोस्यसोनादियोगस्तेनभवंति जन्मादिभाजइतिशेषः पुंसःपुमांसः अज्ञानयोगोत्थःक्षेत्रयोगइत्यर्थः
॥ २० ॥ जीवेशयोर्भेदेनिरस्यप्रपंचस्यापिपरमेश्वरात्पृथक्सत्वंबारयति यएतद्वेति वाशब्दउपमार्थे यइतिपुंस्त्वंविधेयापेक्षया एतत्परिदृश्यमानंजगत्यज्जगदिवभातिसनित्योऽविकारीभगवान्सर्वैश्वर्यसंपन्नः

सनत्सुजातउवाच ॥ ॥ दोषोमहानत्रविभेदयोगेत्यनादियोगेनभवंतिनित्याः ॥ तथास्यनाधिक्यमपैतिकिंचिदनादियोगेनभवंतिपुंसः ॥ २० ॥ यएतद्वाभग
वान्सनित्योविकारयोगेनकरोतिविश्वम् ॥ तथाचतच्छक्तिरितिस्ममन्यतेतथार्थयोगेचभवंतिवेदाः ॥ २१ ॥ ॥ धृतराष्ट्रउवाच ॥ ॥ येस्मिन्धर्मान्नाचरंतीहकेचित्तथाधर्मान्केचिदिहाचरंति ॥ धर्मःपापेनप्रतिहन्यतेस्विदुताहोधर्मःप्रतिहंतिपापम् ॥ २२ ॥

परमात्मैव वाशब्दोमिथ्यात्वद्योतकः तथाहि यच्चहिद्वैतमिवभवतितदितरद्वैतंपश्यति अहमश्वस्त्वमेगजमिवाद्राक्षमितिवेदेलोकेचमिथ्यार्थानुवादेदृशब्दःप्रयुज्यते श्रुतिश्चइदंसर्वंयदयमात्माब्रह्मैवेदंविश्वं
सर्वंखल्विदंब्रह्मेत्याद्याप्रपंचस्यब्रह्मान्यत्वमाह विकारोनूनंमायातद्योगेनविश्वंकरोतित्यभेदजालवन्नुकनककुंडलवज्जगद्ब्रह्मणोःपरमार्थतोविकारविकारीभावोस्ति ब्रह्मणोप्यनित्यत्वापत्तेरित्यर्थः ननुनि
त्यंपरिणामिचप्रधानंस्वतंत्रमेवजडस्यजगतोजडमेवकारणमस्तु सादृश्यात् नतुचेतनंवैलक्षण्यादित्याशंक्याह तथाचतच्छक्तिरिति तथाचतेनैवप्रकारेणस्वात्मनित्यमवज्जगदवभासयंतीतस्यपरमात्मनःश
क्तिस्तदनन्यास्तीतिवेदोपिमन्यतेस्मतथाचश्रूयते देवात्मशक्तिस्वगुणैर्निगूढामितिपरास्यशक्तिर्विविधैवश्रूयतइतिच ननुभोग्यत्वात्शक्तिःआत्मनःस्वं भोक्तृत्वादात्मातत्स्वामी तथाचतयोर्भेदइत्याशंक्याह
तथार्थेति शक्तिर्हिनशक्तिमतःपृथग्दृष्टा वह्नेरिवदहनप्रकाशनशक्तिःवेदाअपिबहुस्यांप्रजायेयेतिसच्चत्यच्चाभवदित्यादयः चकाराल्लोकेशक्तिग्रहोपितादृशार्थयोगेशक्तिशक्तिमतोरभेदेनसंबंधेप्रमाणंभव
तीत्यर्थः ॥ २१ ॥ एवंजीवेशयोरभेदाज्जगतोमिथ्यात्वाज्जगज्जन्मादिनिमित्तेभूतायाःप्रकृतेर्ब्रह्मानन्यत्वाच्चब्रह्माद्वैतंसिद्धं तेनमृत्युर्नास्तीतिपक्षःस्थिरः येषांचमतेकर्मणामृत्युनाशस्तेषामपिकर्ममुक्तिप्रणाड्या
कर्मणामोक्षहेतुत्वंचस्थितं येकेचित्तुअस्मिन्मोक्षेनिमित्तेधर्मान्अग्निहोत्रादीनिकर्माणिनाचरंतिकिंतुमोक्षार्थंसंन्यासमेवकुर्वंति येकेचित्कर्ममुक्त्यर्थंकर्माण्येवउपासनासहितानिकुर्वंतियेपांतुतादृशोमहा
धर्मोनास्तिकिंतुअल्पएवाग्निहोत्रादिर्नित्यानुष्ठानात्मकोस्तितेषामपिसधर्मःपापेनरागादिदोषेणहन्यतेउतधर्मएवपापंहंतीतिप्रश्नार्थः ॥ २२ ॥

उत्तरमाह उभयमिति तत्रमोक्षेउभयंसंन्यासःसोपासनंकर्मचउपयुज्यते तथाधर्मस्यफलंस्वर्गःचित्तशुद्धिर्वा इतरस्यअधर्मस्यपापस्यनित्यकर्मत्यागस्यवाफलंनरकःउपयुज्यतइति ॥२३॥ इदमेवसंग्रहवाक्यंविवृणोति तस्मिन्स्थितावितिद्वाभ्यां उभयंसंन्यासःसोपासनंकर्मच तस्मिन्मोक्षेस्वस्वरूपेस्थितौस्थितिनिमित्तंनित्यंअविचलं वाशब्दएवार्थः तयोर्विशेषमाह ज्ञानेनेति संन्यासपूर्वकेणज्ञानेनब्रह्मविद्यया सिद्धंनित्यनिर्वृत्तंब्रह्मप्रतिहंतिअनृतजडदुःखादिप्रातिकूल्येनसच्चिदानंदात्मकंगच्छतिप्राप्नोति हंतेरत्रगत्यर्थत्वंज्ञेयं तथासोपासनेनकर्मणाअन्यथासिद्धाद्विपरीतंसाध्यंपुण्यंप्रशस्तंदेवतादिभावंउपैति यतःदेहीदेहाभिमानीभवति तथागतंतेनप्रकारेणस्थितंसिद्धंनरदेहाभिमानजंपापमपिकदाचित्उपैति देवभावंप्राप्तोपिकदाचिन्मुच्यतेऽन्यथाजयविजयादिवत्ततोभ्रश्यत्यपीतिज्ञानमेवश्रेष्ठमितिभावः ॥२४॥ फलंधर्मस्यैवेतरस्यचेत्युत्तरार्धंविवृणोति गत्वेति उभयंपुण्यंस्यपापस्यचफलंस्वर्गनरकाख्यंतच्चअस्थिरंक्षयिष्णुगत्वाप्राप्यपुनरस्मिन्लोकेकर्मणापूर्वसंस्कारानुगुणेनतत्तद्योग्युचितेनयुज्यतेयोगंप्राप्नोति कर्मकृत्वातत्फलंभुक्त्वापुनःकर्मैवकुरुतेतेनकर्मपाशान्नमुच्यतेइत्यर्थः यद्यप्येवंतथापिसचापिकर्मयोगीकर्मणाधर्मेणधर्मरूपेणपापंप्रणुदतिदूरीकरोतिविद्वान् मूढस्तुकर्मणःफलंस्वर्गपश्वादिकमेवेच्छतीतिभावः

सनत्सुजातउवाच॥ ॥उभयमेवतत्रोपयुज्यतेफलंधर्मस्यैवेतरस्यच॥ २३॥ तस्मिन्स्थितौवाप्युभयंहिनित्यज्ञानेनविद्वान्प्रतिहंतिसिद्धम्॥तथान्यथापुण्यमुपैतिदेहीतथागतंपापमुपैतिसिद्धम्॥ २४॥ गत्वोभयंकर्मणायुज्यतेस्थिरंशुभस्यपापस्यसचापिकर्मणा॥ धर्मेणपापंप्रणुदतीहविद्वान्धर्मोबलीयानितितस्यसिद्धिः॥२५॥ ॥धृतराष्ट्रउवाच॥ ॥यानिहाहुःस्वस्यधर्मस्यलोकान्द्विजातीनांपुण्यकृतांसनातनान्॥ तेषांक्रमान्कथयततोपिचान्यन्नैतद्विद्वन्वेत्तुमिच्छामिकर्म॥ २६॥ ॥सनत्सुजातउवाच॥ ॥येषांव्रतेथविस्पर्धाबलेबलवतामिव॥ तेब्राह्मणाइतःप्रेत्यब्रह्मलोकप्रकाशकाः॥ २७॥

अतोहेतोर्धर्मोबलीयान्नत्वधर्मः इतिहेतोस्तस्यधर्मंकुर्वतःसिद्धिःकालेनरागादिदोषनाशद्वारामोक्षोप्यस्तीत्यर्थः विद्धीतिपाठेसिद्धिमितिशेषः ॥ २५॥ काम्योधर्मःपापंचबंधहेतुर्नित्यधर्मजंचपुण्यंमोक्षहेतुरितिमन्वानःपृच्छति यानिहाहुरिति अपामसोममम्रुताअभूम अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति यस्यैतेऽष्टाचत्वारिंशत्संस्काराःसब्रह्मणःसायुज्यंसलोकतांगच्छतीत्याद्याःश्रुतयःस्मृतयश्चपुण्यकृतांद्विजातीनांस्वधर्मस्यफलभूतान्सनातनान्नित्यान्लोकान्आहुः तेषांक्रमान्धर्मतारतम्येनउच्चनीचभावंकथय ततोपिचान्यान्निरतिशयान्प्रत्यगानंदरूपान् बहुत्वंपूजायां मोक्षसुखंचकथय एतत्स्वधर्मादन्यत्स्वाभाविकप्रवृत्तिविषयभूतंनिषिद्धंकाम्यंचकर्मवेदितुंनइच्छामि एतेनस्वस्यवैराग्यंदर्शितं प्रकृतेचतदुपयोगोस्तीतिज्ञेयं ॥ २६॥ उत्तरमाह येषामिति व्रतेयमनियमादिरूपेविस्पर्द्धाअहमन्येभ्योऽधिकंयमादीन्साधयिष्यामिअहमन्येभ्यइतिसंघर्षः विश्वामित्रादिवत्तपस्यभिनिवेशइतियावत् बलवतांमल्लादीनामिव तेयोगिनः ब्राह्मणाःसगुणब्रह्मविदइतोदेहात्प्रेत्यगत्वाब्रह्मलोकेतेजस्विनःपूज्याभवंतिततोमुक्तिंचब्रह्मणासहप्राप्नुवंति तथाचस्मर्यते ब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे परस्यांतेकृतात्मानःप्रविशंतिपरंपदमिति ॥ २७॥

सर्वधर्मश्रेष्ठस्ययोगधर्मस्यफलमुक्त्वाइज्यादिधर्मस्यफलमाह येषामिति अहमेवयज्ञादीन्सर्वोत्कर्षेणानुतिष्ठेयमितियेषामाग्रहःतेषांतत्यज्ञादिकंज्ञानस्यसाधनंविविदिषोत्पादनद्वाराभवतितथाचश्रुतिःतमेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदानेनतपसानाशकेनेति त्रिविष्टपंदेवलोकंनतुसत्यलोकं विविदिषाद्यर्थमपिकर्मानुतिष्ठतांआनुषंगिकंस्वर्गफलमपिभवतीत्यर्थः यदाहापस्तंबः तद्यथाम्रेफलार्थंनिर्मितेछायागंधइत्यनूत्पद्येतेएवंधर्मंचर्यमाणमर्थाअनूत्पद्यंतइति ॥ २८॥ येतुअकरणेप्रत्यवायंमत्वाधर्मार्थमेवधर्ममनुतिष्ठंतिनज्ञानार्थंनापिस्वर्गार्थंतानाह तस्येति तस्यधर्मस्यसमाचारंसम्यगनुष्ठानंवेदविदोवैदिकत्वाभिमानिनोजनाःसम्यगित्याहुः नतुततःकिंचिदैहिकमामुष्मिकंवाफलंकामयंते एनंजनंएनान्जनान्भूयिष्ठंअत्यंतंनमन्येतनमानयेत् किंचित्तुमानयेदेवेत्यर्थः तमेवविशिनष्टि बाह्यंआत्मनिवर्णाश्रमवयोवस्थाभिमानित्वात्बहिर्मुखं वैदिकत्वान्निष्कामत्वाच्चआभ्यंतरं यतःअकामहतस्यश्रोत्रियस्यकामोपमर्दतारतम्येनहिरण्यगर्भादर्वाचीनानांमानुषादीनामानंदगणनायांउत्तरोत्तरशतगुणितायां सएकइंद्रस्यानंदःसएकःप्रजापतेरानंदइतिप्रतिपर्यायंश्रोत्रियस्यचाकामहतस्येतिआनंदोत्कर्षःश्रूयते ॥२९॥ एवंयोगिनामात्मविविदिषूणांनिष्कामवर्णाश्रमाभिमानिनांचधर्मःउत्तममध्यमाधमभावेनप्रोक्तः

येषांधर्मेचविस्पर्धातेषांतज्ज्ञानसाधनम्॥तेब्राह्मणाइतोमुक्ताःस्वर्गंयांतित्रिविष्टपम्॥ २८॥ तस्यसम्यक्समाचारमाहुर्वेदविदोजनाः॥ नैनंमन्येतभूयिष्ठंबाह्यमाभ्यंतरंजनम्॥२९॥यत्रमन्येतभूयिष्ठंप्रावृषीवतृणोलपं॥अन्नंपानंब्राह्मणस्यतज्जीवेन्नानुसंज्वरेत्॥३०॥यत्राकथयमानस्यप्रयच्छत्यशिवंभयं॥अतिरिक्तमिवाकुर्वन्सश्रेयान्नेतरोजनः॥३१॥ योवाकथयमानस्यह्यात्मानंनानुसंज्वरेत्॥ ब्रह्मस्वंनोपभुंजीततदन्नंसंमतंसताम्॥ ३२॥ यथास्वंवांतमश्नातिश्वावैनित्यमभूतये॥एवंतेवांतमश्नंतिस्ववीर्यस्योपसेवनात्॥ ३३॥ नित्यमज्ञातचर्यामेइतिमन्येतब्राह्मणः॥ ज्ञातीनांतुवसन्मध्येतंविदुर्ब्राह्मणंबुधाः॥ ३४॥

संप्रतिअहिंसाप्रधानान्योगिधर्मानाह यत्रमन्येतेति यत्रगृहेऽन्नंपानंचब्राह्मणस्यसंन्यासिनःभूयिष्ठमस्तीतिमन्येतजानीयात्तत्गृहंप्राप्यजीवेत्प्राणयात्रांकुर्यात् नक्षीणवृत्तिंगृहस्थंपीडयेदितिभावः प्रावृषिवर्षाकालेतृणंचउलपःउच्छ्रिततरंतृणं उलपोनस्त्रीगुल्मिन्यांनातृणांतरेइतिमेदिनी तृणोदकमितिपाठांतरं नानुसंज्वरेत्क्षुद्बाधयाआत्मानंनपीडयेदित्यर्थः॥३०॥यत्रदेशेअकथयमानस्यस्वमाहात्म्यंअप्रकाशयतःअशिवममंगलंभयंप्रयच्छति सप्तम्यंतमिदं भयप्रदेपिदेशेस्थित्वासत्यपिसामर्थ्येतत्रत्यजनमध्येआत्मानंस्वविद्यादिनाअतिरिक्तमधिकमिवअकुर्वन्स्वोत्कर्षमप्रकाशयन्योजनोभवतिसश्रेयान्प्रशस्ततरः परपीडांमानंचत्यजेदितिश्लोकद्वयार्थः॥३१॥ईदृशेनकस्यान्नंभोक्तव्यंतमाह यइति यःपुमान्आत्मानंकथयमानस्यस्वप्रौढिंदर्शयतोनरस्योपरिनानुसंज्वरेत्परोत्कर्षंदृष्ट्वानसंतप्येत् तथाब्रह्मस्वंयतिश्चब्रह्मचारीचपक्वान्नस्वामिनावुभावितिस्मृतेर्यत्यादिभ्योऽदत्वायद्भोजनंतद्ब्रह्मस्वभोजनंअकुर्वंश्चयोभवतितदन्नंतस्यान्नंसतांसंमतं असूयारहितस्यश्रद्धापूर्वकंप्रयच्छतएवान्नंभोज्यमित्यर्थः॥ ३२॥ श्वाशुनकः तेसंन्यासिनः स्ववीर्यस्यस्वपांडित्यस्यउपजीवनात्पांडित्यादिकंप्रकाश्यभिक्षामिच्छन्यतिर्वांताशीभवतीत्यर्थः ॥ ३३॥ यःब्राह्मणःब्रह्मवित्ज्ञातीनांमध्येवसन्नपिज्ञातयोमेममनित्यंअज्ञाताचर्यायाभिस्ताअज्ञातचर्याःसंतुइतिमन्येतज्ञातयोमेयोगगतिंमाज्ञासिषुरितियस्यप्रच्छन्नतेजसोमतिःतंब्राह्मणंब्रह्मिष्ठंबुधाःतल्लक्षणज्ञाःविदुः॥ ३४॥

ईदृशीचर्यांविनाअनंतरंउपाधिकृतव्यवधानशून्यंआत्मानंप्रत्यंचंनिर्लिंगंअनुमानागम्यंअचलंव्यापक शुद्धंअसंगंसर्वद्वैतविवर्जितंसजातीयविजातीयस्वगतभेदशून्यंहंतुंगंतुं हेतुर्गत्यर्थत्वमत्रज्ञेयं ज्ञातुमित्यर्थः कोऽर्हतिनकोपीत्यर्थः ॥ ३५ ॥ तस्मादब्राह्मणस्यापिक्षत्रियादेरीदृक्कर्यावतः कर्मणिषष्ठी क्षत्रियमपिब्रह्मस्वप्रकाशेनआवसतिअधिरूढंभवतियेनसोप्यात्मनोब्रह्मभावंपश्यतीतिसार्धश्लोकोवाक्यं पाठांतरंतुसुगमम् ॥ ३६ ॥ आत्माज्ञानेदोषमाह यइति अन्यथाआत्मत्वेनभासमानाद्देहादेर्विपरीतंसंतं अन्यथाकर्त्रादिरूपं शेषंस्पष्टम् ॥ ३७ ॥ आत्मतत्त्वप्रतिपत्त्युपायमाह अश्रांतइति अश्रांतःश्रमहीनः यतः अनादाताआदानशून्यःनिष्परिग्रहइत्यर्थः अतएवसंमतःशिष्टानां निरुपद्रवश्चस्वयंभवति तथाशिष्टोपिशिष्टवन्स्यात्शिष्टत्वंनप्रकाशयेत् पाठांतरेअशिष्टवत्यथेष्टाचरणकृन्स्यात्किंतुशिष्टएववैदिकमर्यादापरिपालनपरएवस्यात् कविःक्रांतदर्शी ॥ ३८ ॥ मानुषेवित्तेचक्षुर्पाद्यधनदारादिरूपेविषयेअनाढ्याःदरिद्राःसर्वसंगत्यागिनइत्यर्थः दैवेवित्तेश्रोत्रपाद्यपारलौकिकेधर्मादौआढ्याःसंपन्नाःतथाकृतौईश्वरोपासनायां सकृतुंकुर्वीतित्युपासनायामपिकृतुशब्दप्रयोगदर्शनात् वैराग्यपूर्वककर्मोपासनानुष्ठानपरानिर्गयाभवंतीत्यर्थः तनुंस्वरूपम् ॥ ३९ ॥ सर्वकृतुभ्योब्रह्मज्ञानमेवश्रेष्ठमित्याह

कोह्यनंतरमात्मानंब्राह्मणोर्हतुमर्हति ॥ निर्लिंगमचलंशुद्धंसर्वद्वैतविवर्जितम्॥ ३५॥तस्माद्विक्षत्रियस्यापिब्रह्मावसतिपश्यति ॥३६॥योन्यथासंतमात्मानमन्यथाप्रतिपद्यते॥किंतेननकृतंपापंचोरेणात्मापहारिणा॥३७॥ अश्रांतःस्यादनादातासंमतोनिरुपद्रवः॥ शिष्टोनशिष्टवत्स्याद्वाब्राह्मणोब्रह्मवित्कविः॥३८॥ अनाढ्यामानुषेवित्तेआढ्यादैवेतथाकृतौ ॥ तेदुर्धर्षादुष्प्रकंप्यास्तान्विद्याद्ब्राह्मणस्तनुम्॥ ३९ ॥ सर्वान्स्विष्टकृतोदेवान्विद्याद्यइहकश्चन ॥ नसमानोब्राह्मणस्यतस्मिन्प्रयततेस्वयम्॥४०॥यमप्रयतमानंतुमानयंतिसमानिंतः॥नमान्यमानोमन्येतनमान्यमभिसंज्वरेत्॥ ४१ ॥ लोकःस्वभावतृत्तिर्हिनिमेषोन्मेषवत्सदा॥ विद्वांसोमानयंतीहइतिमन्येतमानितः॥ ४२॥ अधर्मनिपुणामूढालोकेमायाविशारदाः॥नमान्यंमानयिष्यंतिमान्यानामवमानिनः॥ ४३ ॥ नवैमानंचमौनंचसहितौवसतःसदा ॥ अयंहिलोकोमानस्यअसौमौनस्यतद्विदुः॥ ४४॥

सर्वानिति स्विष्टंशोभनंइष्टंदिव्यरूपंयत्पानादिकंयेयागेनप्रीताःसंतोयजमानायकुर्वंतितेस्विष्टकृतोदेवाःतान्सर्वान्योश्वमेधांतसकलक्रतुकर्तावेदसाक्षात्कुर्यात्सोपिब्राह्मणस्यब्रह्मविदःसमानोनभवति तत्रहेतुःतस्मिन्निति यतःतस्मिन्स्विष्टेनिमित्तेस्वयंप्रयततेयत्नवान्भवति अयंभावः स्विष्टक्रियासाध्यत्वादनित्यफलंब्रह्मतुस्वतःसिद्धमेवाभिव्यज्यतइतिनज्ञानफलभूतोमोक्षोपिस्वतःसिद्धत्वान्नित्यइतिनस्विष्टंब्रह्मज्ञानसममिति ॥ ४० ॥ यमिति यंअप्रयतमानंनिरारंभयादृशंमानयंतिदेवादयःसएवब्रह्मात्मवित्मानितोभवति यंतुयज्ञादिकर्तायमितिमानयंतिसदेवानांपशुरमानितएव तथाचश्रुतिः अथयोन्यांदेवतामुपास्तेऽन्योसावन्योहमस्मीतिनसवेदयथापशुरेवसदेवानामिति उपास्तेयज्ञादिनातर्पयति ततोहेतोःआत्मानमन्यैर्मान्यमानमपिमान्यंनमन्येत नापिअभिसंज्वरेत् अवमानेसतीतिशेषः नकारोभिन्नक्रमः ॥ ४१ ॥ लोकःस्वभावादेवमांमानयतिनतुमयिमानयोग्यतास्तीतिमत्वादर्पेणप्रामुयादित्याह लोकइति ॥ ४२ ॥ येनमानयंतितेपिपशुवन्निर्विवेकत्वादुपेक्ष्याएवनतुदंडनीयाइत्याह अधर्मेति ॥ ४३ ॥ नवाइति मानं क्षीवत्वमार्ष मुनेःकर्ममौनंयोगिचर्या मानार्थिनांपरलोकोदुःसंपादः परलोकार्थिनांमौनिनांचइहलोकोदुःसंपादइतिभावः ॥ ४४ ॥

श्रीरिति धनाभिजनैश्वर्यरूपालक्ष्मीःसुखस्यमानरूपस्यसंवासोधिष्ठानंतथापिसापरिपंथिनीचोरतुल्यापरलोकस्यनाशिनीयोगिनांतुसुतरामनिष्टकरीत्यर्थः ब्राह्मीब्राह्मणस्ययोग्याश्रीःऋग्यजुःसामात्मिकाऋचःसामानियजूंषि साहिश्रीरमृतासतामितिश्रुतेः प्रज्ञाहीनेनऋगादीनारहस्यंनप्राप्नुयादित्यर्थः॥४५॥तस्यब्राह्मसुखस्यद्वाराणिप्राप्तिसाधनानि दुराधराणिदुःसंरक्ष्याणि सत्यंयथार्थभाषणं आर्जवंअवकता क्रीःलोकापवादभयं दमइंद्रियनिग्रहः शौचंमृज्जलाभ्यांबाह्यं आंतरंतुमनःशुद्धिः विद्यावेदशास्त्राधिगमः ययेति एतेषुसत्सुअनादिवासनयाआगतोपिमोहोयथाबन्धप्रभवति षण्मानमोहप्रतिबंधकानीतिपाठेस्पष्टोर्थः ॥४६॥ ॥ इतिउद्योगपर्वणिनीलकंठीयेभारतभावदीपेद्विचत्वारिंशोध्यायः ॥४२॥ ॥७॥ ॥ पूर्वाध्यायांतेमौनंब्राह्मीश्रीःसत्यादिषट्कंचमोहात्मकस्यमृत्योःप्रतिरोधकानीत्युक्तान्येवप्रश्नपूर्वकंविवरीतुमध्यायांतरमारभते कस्यैषमौनइत्यादि न्यासपूर्वकंक्वीक्रियमाणोमुनेर्धर्मोमौनसंज्ञःकस्यप्रयोजनस्यार्थेइत्येकःप्रश्नःलोकप्रसिद्धेर्वाक्यनियमोवा अमौनंचमौनंचनिर्विशथाब्राह्मणइतिश्रौतप्रसिद्धेरमौनशब्दिनात्पांडित्याद्व्यावहारिकात्पारमार्थिकाच्छ्रवणमननाख्यात्द्वयादन्यत्तत्समनियतंनिदिध्यासनंवामौनशब्दिनं तयोर्मध्येःत्रकतरन्मौनशब्दाभिधेयमितिद्वितीयः तस्यचभावंस्वलक्षणंब्रूहीतितृतीयः तेनमौनेनविद्वान्मौनंमनःप्राणेंद्रियक्रियाणांनिरवशेषेणोपरमंनिर्विकल्पंपदमितियावत् तदुतअपियातीतिचतुर्थः कथंवाकेनप्रकारेणमौनमाचरंतीतिपंचमःप्रश्नः ॥१॥पंचानामपिप्रश्नानामेकंवाक्यंतात्पर्यं

श्रीःसुखस्येहसंवासःसाचापिपरिपंथिनी॥ ब्राह्मीसुदुर्लभाश्रीर्हिप्रज्ञाहीनेनक्षत्रिय॥ ४५॥ द्वाराणितस्येहवदंतिसंतोबहुप्रकाराणिदुराधराणि ॥ सत्यार्जवेक्रीर्दमशौचविद्यायथानमोहप्रतिबोधनानि॥४६॥॥ इतिश्रीमहाभारतेउद्योगपर्वणिसनत्सुजातपर्वणिद्विचत्वारिंशोऽध्यायः॥४२॥ ॥७॥ ॥ धृतराष्ट्रउवाच॥ ॥कस्यैषमौनःकतरन्नुमौनंप्रब्रूहिविद्वन्निहमौनभावम्॥ मौनेनविद्वानुतयातिमौनंकथंमुनेमौनमिहाचरंति॥१॥ ॥सनत्सुजातउवाच॥ ॥यतोनवेदामनसासहैनमनुप्रविशंतिततोयमौनम्॥ यत्रोत्थितोवेदशब्दस्तथायंसतन्मयत्वेनविभातिराजन्॥ २॥

नांतरेणोत्तरमाह यतइति यस्माद्धेतोःएनंप्रत्यगात्मानंमनसासहवेदानअनुप्रविशंति यतोवाचोनिवर्तंतेअप्राप्यमनसासहेतिवाक्यमनसातीतत्वश्रुतेः ततोहेतोः मौनमिति एतन्नामेत्यर्थः एतेनवाङ्मनसातीतपदप्राप्तिर्मौनस्यप्रयोजनं तच्चवागादिवाह्येंद्रियनिग्रहरूपंमनोनिग्रहरूपं तेनचकर्मद्वाप्राप्यंतरप्रपंचयोरभानंतेनचाभानेनप्राप्यंवाङ्मनसातीतपदमितिप्रश्नचतुष्टयस्योत्तरमुक्तंभवति पंचमप्रश्नस्योत्तरमाह यत्रोत्थितइति यत्रअधिष्ठानेभूमब्रह्मात्मनिवेदशब्दस्तथाअयमितिलौकिकशब्दश्चउत्थितःक्षेत्रेअंकुरइवसमुद्रेतरंगइवचाविर्भूतःसभूतात्मातन्मयत्वेनशब्दमयत्वेनविभातिप्रकाशते हेराजन् अयंभावः वेदशब्देनवेदस्यसारतरःप्रणवः भूरित्येवऋग्वेदादजायतभुवइतियजुर्वेदात्स्वरितिसामवेदात्तानिशुक्राण्यभ्यतपत्तेभ्योभितप्तेभ्यस्त्रयोवर्णाअजायंताकारउकारोमकारइतिनानेकधासमभरत्तदेतदोमितिब्रह्मचब्राह्मणात् तस्यचप्रणवस्यओमित्येतदक्षरमिदंसर्वमितिसार्वात्म्यश्रुतेस्तन्माघ्राणांचअकारोकारमकाराणांकमात्स्थूलसूक्ष्मकारणप्रपंचवाचकानांवाच्यवाचकयोरभेदात्पूर्वपूर्वस्यउत्तरोत्तरत्रप्रविलापनंगुरूक्तयुक्त्याक्रियमाणेस्थूलस्यजगतःसूक्ष्मेलवणोदकन्यायेनप्रविलयोभवति तथासूक्ष्मस्यकारणेकारणस्यतुरीयेर्धमात्रावाच्येऽमात्राख्येशिवमद्वैतंचतुर्थमन्यंतइतिश्रुतेर्गलित्वाखिलद्वैतभानेवाङ्मनसातीतेप्रविलयोभवति अतःप्रणवाख्यशब्दमयत्वेनतद्द्वारावाङ्मनसातीतंवस्तुभातीतियुक्तमिति ॥ २ ॥

ननुयदिवेदशब्दमयत्वेनतद्द्वारावाङ्मनसातीतंपदंभातितज्ज्ञानाच्चयथैषीकातूलमग्नौप्रोतंप्रदूयेतैवंहास्यसर्वेपाप्मानःप्रदूयंतइतिश्रुतेःसर्वपापनाशश्चभवतितर्हिमौनहीनस्यापिऋगाद्यभ्यासेनतदुभयंभविष्य
तीत्याशंकते ऋचइति ॥ ३ ॥ अविचक्षणंवाङ्मनसनिग्रहासमर्थम् ॥ ४ ॥ छंदांसिवेदाः वृजिनात्पापात् ननुअथागमोयांयांदेवतांनिराहतस्यास्तस्यास्ताद्भाव्यमनुभवतीतिवचनात्यंयंवापिस्मरन्भावमिति
स्मृतेश्चनित्याभ्यासादंतकालेयद्दैवत्यंमंत्रंस्मरतितद्देवताताद्भाव्यमस्यभविष्यतीतिकिंवाङ्मनसनिग्रहरूपेणमौनेनेत्याशंक्याह नीडमिति मौनाभावेंऽतकालेछंदांस्येवनस्फुरंतीत्यर्थः ॥ ५ ॥ धर्मस्वाभाविकं
शमोदमस्तपःशौचंक्षांतिरार्जवमेवच ज्ञानंविज्ञानमास्तिक्यंब्रह्मकर्मस्वभावजमितिगीतासूक्तंविना प्रलापः ऋग्यजुःसामभिःपूतोब्रह्मलोकेमहीयते यावतीर्वैदेवतास्ताःसर्वावेदविदिब्राह्मणेवसंतीतिब्राह्म
णानांमाहात्म्यप्रख्यापकोऽनर्थकोवाक्यसंदर्भःप्रवृत्तइतिशेषः सनातनोऽनादिः ॥ ६ ॥ उत्तरमाह तस्येति अस्यमहतोभूतस्यनिःश्वसितमेतद्यदृग्वेदोयजुर्वेदःसामवेदइत्यादिश्रुतेर्यस्यप्रलापोयंवेदशास्त्रादिप्रपं
चस्तस्यैवपरमात्मनःस्वयंअव्याकृतस्यनामरूपात्मनाऽव्याकृतस्यस्वरूपंइदंजगद्भाति नामादिविशेषरूपैरितीत्थंभावेतृतीया नामरूपात्मकोयोविशेषस्तदात्मकस्वरूपस्येत्यर्थः तथाचश्रुतिः तद्धेदंतर्ह्यव्या

धृतराष्ट्रउवाच ॥ ॥ ऋचोयजूंषियोवेदसामवेदंचवेदयः ॥ पापानिकुर्वन्पापेनलिप्यतेकिंनलिप्यते ॥ ३ ॥ ॥ सनत्सुजातउवाच ॥ ॥ नैनंसामान्यृचोवापिनय
जूंष्यविचक्षणम् ॥ त्रायंतेकर्मणःपापान्नतेमिथ्याब्रवीम्यहम् ॥ ४ ॥ नच्छंदांसिवृजिनात्तारयंतिमायाविनंमाययावर्तमानम् ॥ नीडंशकुंताइवजातपक्षाश्छंदां
स्यैनंप्रजहत्यंतकाले ॥ ५ ॥ ॥ धृतराष्ट्रउवाच ॥ ॥ नचेद्वेदाविनाधर्मंत्रातुंशक्ताविचक्षण ॥ अथकस्मात्प्रलापोयंब्राह्मणानांसनातनः ॥ ६ ॥ ॥ सनत्सुजातउवाच
तस्यैवनामादिविशेषरूपैरिदंजगद्भातिमहानुभाव ॥ निर्दिश्यसम्यक्प्रवदंतिवेदास्तद्विश्ववैरूप्यमुदाहरंति ॥ ७ ॥ तदर्थमुक्तंतपएतदिज्याताभ्यामसौपुण्यमुपै
तिविद्वान् ॥ पुण्येनपापंविनिहत्यपश्चात्संजायतेज्ञानविदीपितात्मा ॥ ८ ॥

कृतमासीत्तन्नामरूपाभ्यामेवव्याक्रियतासौनामायमिदंरूपइतीति हेमहानुभाव निर्दिश्यद्वेवावब्रह्मणोरूपेमूर्तंचैवामूर्तंचेत्यादिनाकृत्स्नंदृश्यमदृश्यंचविश्वंब्रह्मरूपत्वेननिर्दिश्यब्रह्मैवेदमितिसम्यक्प्रवदंतीत्य
ध्यारोपप्रसंगेअपवादप्रसंगेचतत्ब्रह्मविश्वस्मान्मूर्तामूर्तात्विरूपमेववैरूप्यंविलक्षणंउदाहरंतिवेदाएवअथातआदेशोनेतिनेतिनह्येतस्मादन्यत्परमस्तीतिनेतीत्यादयः अत्रनेतिनेतीतिनञ्द्वयेनप्रकृतेमूर्तामूर्ते
निषिध्यशून्यशेषत्वेप्रसक्तेएतस्मादात्मनोऽन्यत्परंकार्यंकारणंवाऽतिरिक्तंनास्तीतिहेतोर्नेतीत्युच्यतेनतुशून्यमवशेष्यतइतिश्रुत्यैवब्रह्मणोविश्ववैरूप्यमुक्तं ततश्चयत्प्रभवत्वेनवेदोमान्यस्तंवेदोक्तमार्गाननुष्ठाने
नावजानतोवेदाध्ययनमपिनिष्फलंभवति भगवदाज्ञाभंगदोषादितिभावः श्रूयतेच नतस्यवाच्यपिभागोअस्तीति देहाद्यात्मबुद्ध्यापरमात्मानास्तीतिमत्वातंत्यजतःवेदोच्चारणमात्रसंभवेपिफलांशोनास्ती
तिश्रुत्यर्थः ॥ ७ ॥ तदर्थमिति यत्विश्वस्माद्विलक्षणंब्रह्मप्रोक्तंतदर्थंतत्प्राप्त्यर्थंएतत्प्रसिद्धंतपःकृच्छ्रचांद्रायणादिध्यानधारणादिचउक्तंतपसाब्रह्मविजिज्ञासस्वेतिश्रुत्याप्रोक्तं तथाएषाइज्यायागादिरपि
तदर्थमेव तत्रक्रममाह ताभ्यामिति इज्यातपोभ्यांपुण्योत्पत्तिःपुण्येनपापनाशःनिष्पापस्तुज्ञानेनब्रह्माकारयाचेतोवृत्त्याविदीपितात्माप्रकाशितात्मतत्त्वोभवति एतेनइज्यातपसोःसाक्षान्मोक्षहेतुत्वनिरस
नेनज्ञानकर्मसमुच्चयपक्षोनिर्मूलोवेदितव्यः ॥ ८ ॥

किमात्मतत्त्वप्रकाशेनेत्यतआह ज्ञानेनचात्मानमुपैतीति आत्मलाभान्नपरंविद्यते आत्मानंचेद्विजानीयादयमस्मीतिपूरुषः किमिच्छन्कस्यकामायशरीरमनुसंज्वरेदित्यादिशास्त्रादात्मप्राप्तिरेवपरमपुरुषार्थ
इतिभावः विपक्षेदोषमाह अथेति अथेतिपक्षांतरेअन्यथाआत्मज्ञानाभावेनानात्मनिपुरुषार्थत्वबुद्ध्यावर्गफलानुकांक्षीभवति वृक्तेआत्मानंस्वस्वविषयोपहारमुखेनावृणोतीतिवर्गइंद्रियगणस्तस्यप्रियंफलं
विषयसुखंतदाकांक्षीसन्अस्मिन्लोकेकृतंयत्पुण्यंपापंवातत्सर्वंपरिगृह्य तंविद्याकर्मणीसमन्वारभेतेपूर्वप्रज्ञाचेतिश्रुतेः तंउत्क्रामंतमितिश्रुतिपदस्यार्थः अमुत्रस्वर्गेनरकेवातत्फलंसुखंदुःखंवाभुंक्ते ततःपुनरिमं
मार्गंलोकंकर्मशेषेणउपैति तस्मिन्यावत्संपातमुषित्वाथैनमेवाध्वानंपुनर्निवर्तंते तस्माल्लोकात्परैत्यस्मैलोकायकर्मणइत्यादिश्रुतिभ्यः संपतत्यनेनेतिसंपातःकर्म ॥ ९ ॥ नन्वेवंतर्हिस्वाध्यायप्रवचनेएवेतिनाको
मौद्गल्यःतद्धितपस्तद्धितपइत्यादरेणाध्ययनाध्यापनयोर्मुख्यतपस्त्वश्रवणादस्तितयोरपिमोक्षहेतुत्वंतत्कथमुच्यतेनच्छंदांसिवृजिनात्तारयंतीतिमत्वाविद्वदविद्वत्तपसोर्भेदमाह अस्मिन्निति अविदुषांतपसः

ज्ञानेनचात्मानमुपैतिविद्वानथान्यथावर्गफलानुकांक्षी ॥ अस्मिन्कृतंतत्परिगृह्यसर्वममुत्रभुंक्तेपुनरेतिमार्गम् ॥ ९ ॥ अस्मिँल्लोकेतपस्तप्तंफलमन्यत्रभुज्य
ते ॥ ब्राह्मणानामिमेलोकाधात्वेतपसितिष्ठताम् ॥ १० ॥ ॥ धृतराष्ट्रउवाच ॥ ॥ कथंसमृद्धमसमृद्धंतपोभवतिकेवलम् ॥ सनत्सुजाततद्ब्रूहियथाविद्यामतद्वयं
॥ ११ ॥ ॥ सनत्सुजातउवाच ॥ ॥ निष्कल्मषंतपस्त्वेतत्केवलंपरिचक्षते ॥ एतत्समृद्धमप्यृद्धंतपोभवतिकेवलम् ॥ १२ ॥ तपोमूलमिदंसर्वंयन्मांपृच्छसिक्षत्रि
य ॥ तपसावेदविद्वांसःपरंत्वमृतमाप्नुयुः ॥ १३ ॥ ॥ धृतराष्ट्रउवाच ॥ ॥ कल्मषंतपसोब्रूहिश्रुतंनिष्कल्मषंतपः ॥ सनत्सुजातयेनेदंविद्यांगुह्यंसनातनम् ॥ १४ ॥
॥ सनत्सुजातउवाच ॥ ॥ क्रोधादयोद्वादशयस्यदोषास्तथानृशंसानिदशत्रिराजन् ॥ धर्मादयोद्वादशैतेपितॄणांशास्त्रेगुणायेविदिताद्विजानाम् ॥ १५ ॥

फलंआमुष्मिकं विदुषांब्राह्मणानांतुइमेएवलोकाःफलदाः ज्ञानंदृष्टफलमित्यर्थः कीदृशानां धात्वेतपसितिष्ठतां धात्वेधातव्ये कृत्यार्थेतवैकेन्केन्यत्वनइतिधात्रस्त्वन् अवश्यकर्तव्येइत्यर्थः तच्चशमोदमस्त
पःशौचमितिप्रागेवोक्तं वृद्धेतपसीतिपाठेस्पष्टोर्थः ॥ १० ॥ समृद्धंविदुषःअसमृद्धंअविदुषश्चएकमेवतपःकेवलंशुद्धंसत्कथंद्वैविध्यंप्राप्नोतीतिपृच्छति कथमिति ॥ ११ ॥ उत्तरमाह निष्कल्मषमिति कल्मषं
कामःश्रद्धादिराहित्यंचतद्रहितंतपःकेवलंकैवल्यसाधनत्वात्केवलमित्युच्यते तदेवश्रद्धाद्युपेतमपिसकामंचेत्समृद्धमित्युच्यते यत्तुकेवलंदंभार्थमेवक्रियतेतदृद्धं तथाचश्रुतौ यदेवविद्ययाकरोतिश्रद्धयोप
निषदातदेववीर्यवत्तरंभवतीतितरप्प्रत्ययश्रुतेर्विद्याहीनस्यापितपसोवीर्यवत्त्वावगमादृद्धत्वंगम्यते ॥ १२ ॥ तपएवप्रशंसति तपइति इदंसर्वंभोग्यंतपोमूलंतपःप्राप्यं परंअमृतंमुक्तिं ॥ १३ ॥ ननुनिष्कल्म
षंतपः श्रुतंतत्रकिंतत्किल्बिषंयद्रहितेनतपसासनातनंगुह्यंब्रह्मविद्यांजानीयामितिपृच्छति कल्मषमिति ॥ १४ ॥ तदेवाह क्रोधादयइति क्रोधादिगणोद्वादशकः दशत्रित्रयोदशेत्यर्थः तावान्नृशंसवर्गश्च
तपसःकल्मषं धर्मादिगणविरुद्धत्वात् तद्रहितधर्माद्युपेतंतुतपोनिष्कल्मषंमोक्षहेतुरित्यर्थः पितॄणांवंशकर्तॄणांमन्वादीनां आततानाइत्यपिपाठः ॥ १५ ॥

क्रोधःइच्छाप्रतीघातोत्थआक्रोशताडनादिहेतुर्मनस्तापः १ कामःस्त्र्यभिलाषः २ लोभोधनव्ययभीरुत्वं ३ मोहःकृत्याकृत्यविवेकराहित्यं ४ विधित्सासत्यप्युत्तरोत्तरलाभेपिपासाख्याअतृप्तिः धेट्पाने इत्यस्यरूपं ५ अकृपानिर्दयत्वं ६ असूयापरगुणेषुदोषदर्शनं ७ मानआत्मनिपूज्यताबुद्धिः ८ शोकइष्टार्थनाशेसतिमनोवैक्लव्यं ९ स्पृहाभोग्यवर्गेष्वादरः १० ईर्ष्यापरोत्कर्षासहिष्णुत्वं ११ जुगुप्सापरनिंदाबीभत्सतावा १२ मनुष्याणांयोगिनामयोगिनांचैतेदोषाःसर्वेषामपिवर्ज्याइत्यर्थः ॥ १६ ॥ एतेषांमध्येएकैकोपिमनुष्यंनाशयितुंसमर्थःकिंतुकतिपयसमुदायःसर्वसमुदायोवेत्याह एकैकइति अंतरं छिद्रं ॥ १७ ॥ त्रयोदशनृशंसानिहिंस्राण्याहद्वाभ्यां विकत्थनइति विकत्थनःपरगुणाक्षेपेणस्वगुणोत्कर्षाभिधानशीलः १ स्पृहयालुःअतियत्नपूर्वकंपरस्त्र्यादिभोगेच्छावान् २ मनस्वीगर्वाधिक्यात्पराव माननशीलः ३ बिभ्रत्कोपंनिमित्तंविनापिसदाकोपपरः ४ चपलःमित्रभावादिष्वस्थिरः ५ अरक्षणःशक्तौसत्यांस्वीकृतस्त्र्यादेःपालनमकुर्वन् ६ एतान्षट्पापधर्मान्पापाःपापिनोनराःकुर्वते केते येसु दुर्गेमहासंकटेइहपरत्रवाउपस्थितेनोत्रसंतःत्रासंअकुर्वंतः एकमिदंपदं सुप्सुपेतिसमासः एतेषडत्यंतंहिंस्राइत्यर्थः ॥ १८ ॥ संभोगःस्त्रीसंगादिस्तद्विषयासंवित्संमतिस्तदेवपुरुषार्थइतियाबुद्धिस्तयाविषमोदु

क्रोधःकामोलोभमोहौविधित्साऽकृपाऽसूयेमानशोकौस्पृहाच ॥ ईर्ष्याजुगुप्साचमनुष्यदोषावर्ज्याःसदाद्वादशैतेनराणां ॥ १६ ॥ एकैकःपर्युपास्तेहमनुष्यान्मनुजर्षभ ॥ लिप्समानोंतरंतेषांमृगाणामिवलुब्धकः ॥ १७ ॥ विकत्थनःस्पृहयालुर्मनस्वीबिभ्रत्कोपंचपलोऽरक्षणश्च ॥ एतान्पापाःषण्नराःपापधर्मान्प्रकुर्वतेनोत्रसंतःसुदुर्गे ॥ १८ ॥ संभोगसंविद्विषमोऽतिमानीदत्तानुतापीकृपणोबलीयान् ॥ वर्गप्रशंसीवनितासुद्वेष्टाएतेपरेसप्तनृशंसवर्गाः ॥ १९ ॥ धर्मश्चसत्यंचदमस्तपश्चअमात्सर्यंह्रीस्तितिक्षानसूया ॥ यज्ञश्चदानंचधृतिःश्रुतंचव्रतानिवैद्वादशब्राह्मणस्य ॥ २० ॥ यस्त्वेतेभ्यःप्रभवेद्द्वादशभ्यःसर्वामपीमांपृथिवींसशिष्यात् ॥ त्रिभिर्द्वाभ्यामेकतोवार्थितोयस्तस्यस्वमस्तीतिसवेदितव्यः ॥ २१ ॥ दमस्त्यागोऽप्रमादश्चएतेष्वमृतमाहितम् ॥ तानिसत्यमुखान्याहुर्ब्राह्मणायेमनीषिणः ॥ २२ ॥

र्व्यवस्थितः १ अतिमानीअत्यंतंदर्पवान् २ पाठांतरेसंभोगसंवित्भोगेबुद्धिमान् द्विषद्वैषमेधमानोवर्धयन् दत्तानुतापीदानंकृत्वापिलोभवशात्ममधनंनष्टमितिसंतापवान् ३ कृपणःप्राणांतेपिवित्तव्ययमसहमानः ४ बलीयान्अतिशयेनबलिमान् पूर्वराजेभ्योप्यधिकंप्रजानांसकाशात्बलिंगृह्णन्नित्यर्थः ५ वर्गप्रशंसीवर्गोवृजिनंपराभिभवस्तत्प्रशंसनशीलः ६ अन्येषांदुःखेनसुखीत्यर्थः वनितासुपरिणीतासु द्वेष्टा ७ एतेसप्तनृशंसाःपूर्वेचषट्एवंत्रयोदश ॥ १९ ॥ गुणानाह धर्मइति धर्मोवर्णाश्रमनियतःसंध्योपासनादिः १ सत्यंहिंसावर्जंयथार्थभाषणं २ दमःजिह्वोपस्थादिनिग्रहः ३ तपःकृच्छ्रचांद्रायणादि ४ अमात्सर्यंमत्सरःपरगुणासहिष्णुत्वंतदभावः ५ ह्रीर्लज्जा ६ तितिक्षासत्यपिक्रोधनिमित्तेतदनुत्पादः ७ अनसूयापरगुणेषुदोषाविष्करणमसूयातदभावः ८ यज्ञोज्योतिष्टोमादिः ९ दानंबहिर्वेदिसंविभागः १० धृतिःअत्यंतापद्यपिव्रतादेरत्यागः ११ श्रुतंअर्थग्रहणसहितंवेदाध्ययनं १२ ब्राह्मणस्यब्रह्मप्राप्तुमिच्छोः ॥ २० ॥ यस्त्विति सर्वगुणाढ्योब्रह्मवित्सत्यकामादिगुणभाक्भवति यस्तमात्मानमनुविद्य विजानातिससर्वांश्चलोकानाप्नोतिसर्वांश्चकामानितिश्रुतेः एतेषांमध्येत्रिभिर्द्वाभ्यांएकतोवाअर्थितःअर्थःवित्तंसंजातमस्यसतथा स्वदैवंवित्तं ॥ २१ ॥ दमःजितेंद्रियत्वं त्यागःकर्मणामीश्वरेऽर्पणं अप्रमादस्तत्त्वानुसंधानं अमृतंमुक्तिः सत्यमुखानिसत्यप्रधानान्येवएतानिफलानिभवंतीत्यर्थः ॥ २२ ॥

अष्टादशदोषत्यागादष्टादशगुणत्वंदमस्याह दमइति कृतेकर्मणिवैदिकेप्रतिकूलंअश्रद्धाआलस्यादिच अकृतेउपवासव्रतादौप्रतिकूलंक्षुधाजिह्वालौल्यादिइदंद्वयमेकोदोषः १ अनृताऽभ्यसूयेप्रसिद्धे ३ कामःस्त्र्यभिलाषः ४ अर्थोधनार्जनार्थेऽतियत्नः ५ स्पृहाधनाद्यभिलाषः ॥ ६ ॥ २३ ॥ पैशुन्यंपरदोषसूचकत्वं ११ परितापःअतिदुःखित्वं १४ अरतिःसत्क्रियानभिलाषः १५ ॥ २४ ॥ अपस्मारःकर्तव्यविस्मरणं १६ अतिवादःपराक्रोशः १७ संभावनामहत्त्वबुद्धिः ॥ १८ ॥ २५ ॥ मदइति येषांविपर्ययादमगुणत्वेनउक्तास्तएवकृताकृतप्रतिकूलादयोष्टादश तथावक्ष्यमाणस्यषड्विधत्यागस्यचविपर्ययाः षट् तेचलक्ष्मीप्राप्तौहर्षः १ अप्रियेजातेव्यथा २ स्वीयेषुयाच्ञा ३ पात्रेष्वप्रदानं ४ सत्यधिकारेइष्टापूर्तयोरकरणं ५ कामस्यात्यागःप्रमादश्च ६ एतेचतुर्विंशतिर्मददोषाः ॥ २६ ॥ श्रेयान्प्रशस्ततरःतृतीयोवक्ष्यमाणःकामत्यागःतस्मिन्कामत्यागेकृतेसतिभिन्नंभेदः भावेनिष्ठा द्वैतमितियावत् सएवदुःखं द्वितीयाद्वैभयंभवति यत्रान्यत्पश्यत्यन्यच्छृणोतितदल्पंअथयदल्पंतद्दुःखमित्यादिश्रुतिभ्यः कामत्या-

दमोह्यष्टादशगुणःप्रतिकूलंकृताकृते ॥ अनृतंचाभ्यसूयाचकामार्थौचतथास्पृहा ॥ २३ ॥ क्रोधःशोकस्तथातृष्णालोभःपैशुन्यमेवच ॥ मत्सरश्चविहिंसाचपरितापस्तथाऽरतिः ॥ २४ ॥ अपस्मारश्चातिवादस्तथासंभावनात्मनि ॥ एतैर्विमुक्तोदोषैर्यःसदांतःसद्भिरुच्यते ॥ २५ ॥ मदोष्टादशदोषःस्यात्त्यागोभवतिषड्विधः ॥ विपर्ययाःस्मृताएतेमददोषाउदाहृताः ॥ २६ ॥ श्रेयांस्तुषड्विधस्त्यागस्तृतीयोदुष्करोभवेत् ॥ तेनदुःखंतरत्येवभिन्नंतस्मिन्जितंकृते ॥ २७ ॥ श्रेयांस्तुषड्विधस्त्यागःश्रियंप्राप्यनहृष्यति ॥ इष्टापूर्तेद्वितीयंस्यान्नित्यवैराग्ययोगतः ॥ २८ ॥ कामत्यागश्चराजेंद्रसतृतीयइतिस्मृतः ॥ अप्यवाच्यंवदंत्येतंसतृतीयोगुणःस्मृतः ॥ ॥ २९ ॥ त्यक्तैर्द्रव्यैर्यद्भवतिनोपयुक्तैश्चकामतः ॥ नचद्रव्यैस्तद्भवतिनोपयुक्तैश्चकामतः ॥ ३० ॥ नचकर्मस्वसिद्धेषुदुःखंतेनचनग्लपेत् ॥ सर्वैरेवगुणैर्युक्तोद्रव्यवानपियोभवेत् ॥ ३१ ॥ अप्रियेचसमुत्पन्नेव्यथांजातुनगच्छति ॥ इष्टान्पुत्रांश्चदारांश्चनयाचेतकदाचन ॥ ३२ ॥ अर्हतेयाचमानायप्रदेयंतच्छुभंभवेत् ॥ अप्रमादीभवेदेतैःसचाप्यष्टगुणोभवेत् ॥ ३३ ॥

गादेवसर्वदुःखनिवृत्तिरूपोमोक्षःसिद्धः तथाचश्रुतिः यदासर्वेप्रमुच्यंतेकामायेस्यहृदिस्थिताः अथमर्त्योमृतोभवत्यत्रब्रह्मसमश्नुतइति ॥ २७ ॥ त्यागमेवाह श्रेयानिति श्रियंलक्ष्मींविद्यांच नहृष्यतिनदृप्यति १ इष्टंयागहोमादि आपूर्तंतडागारामादि २ ॥ २८ ॥ कामत्यागस्यपराकाष्ठामाह अपीति अवाच्यंनिर्वृत्तिकत्वात् तथाचोदाहृतं यदासर्वेप्रमुच्यंतेइति ॥ २९ ॥ त्यक्तैरिति द्रव्यैःस्त्र्यादिभिस्त्यक्तैरेवयत्निष्कामत्वंभवतितत्कामपूर्वकंउपभुक्तैर्नभवति यथोक्तं नजातुकामःकामानामुपभोगेनशाम्यतीति निष्कामत्वंबहुभिर्लब्धैरपिद्रव्यैर्नभवतिनाप्युपयुक्तैःकाम्यद्वाराव्ययीकृतैरित्यर्थः ३ ॥ ३० ॥ न दुःखंकुर्यादितिशेषः तेनचदुःखेननग्लपेत्ग्लानिंनप्राप्नुयात् गुणैःकीर्त्यादिभिः ॥ ३१ ॥ अप्रियेकीर्तिवित्तनाशादिप्रभवेसमुत्पन्नेपियोव्यथांनगच्छतिसचतुर्थस्त्यागइत्यर्थः ४ पंचमंत्यागमयाच्ञारूपमाह इष्टानिति ५ ॥ ३२ ॥ षष्ठमाह अर्हतइति अर्हतेयोग्याय ६ षड्विधत्यागफलमाह अप्रमादीति सचअप्रमादश्च ॥ ३३ ॥

सत्यंयथार्थवचनं १ ध्यानंमूर्तेरीश्वरस्यात्मनोवाऽनुसंधानं २ समाधानंसंप्रज्ञातासंप्रज्ञातभेदेनद्विविधःसमाधिः ३ चोद्यंतर्कःयेनसमाधिफलेसार्वकाम्यादौदोषमुन्नयंति ४ वैराग्यमुपरमः ५ अस्तेयंपरस्वापहरणाभावः ६ ब्रह्मचर्यंस्त्रीसंगराहित्यं ७ असंपहोनिष्परिग्रहतः ८ ॥ ३४ ॥ उक्तमनुवदत्यप्रमादप्रतियोगिनंप्रमादंवक्तुं एवमिति ॥ ३५ ॥ पंचभ्यइंद्रियेभ्यःषष्ठान्मनसश्चस्वस्वविषयेरागद्वेषोत्थाःपट्प्रमादाः अतीतेनष्टपुत्रशोकादिजःसप्तमः अनागतेपुत्रकामस्यतदभावेयःक्लेशःसोष्टमःप्रमादः एतेभ्यःप्रमादेभ्योमुक्त्युपेतोमुक्तिप्राप्तःसुखीभवेत्॥३६॥इदमत्यागाप्रमादानुक्तानेषांसत्यमुखत्वंप्रागुक्तंविद्वणो ति सत्यात्मेति सत्येआत्माचित्तंयस्यसतथा तान्इदमत्यागाप्रमादान् ॥ ३७ ॥ दोषनिवृत्त्यैवतपःसिद्धिर्धात्राकृतेत्याह निवृत्तेनैवेति ॥ ३८ ॥ प्रश्नव्याख्यानमुपसंहरति दोषैरिति ॥ ३९ ॥ ४० ॥ एवं

सत्यंध्यानंसमाधानंचोद्यंवैराग्यमेवच ॥ अस्तेयंब्रह्मचर्यंचतथाऽसंग्रहमेवच ॥ ३४ ॥ एवंदोषामदस्योक्तास्तान्दोषान्परिवर्जयेत् ॥ तथात्यागोऽप्रमादश्चस चाप्यष्टगुणोमतः ॥ ३५ ॥ अष्टौदोषाःप्रमादस्यतान्दोषान्परिवर्जयेत् ॥ इंद्रियेभ्यश्चपंचभ्योमनसश्चैवभारत ॥ अतीतांनागतेभ्यश्चमुक्त्युपेतःसुखीभवेत् ॥ ३६ ॥ सत्यात्माभवराजेंद्रसत्येलोकाःप्रतिष्ठिताः ॥ तांस्तुसत्यमुखानाहुःसत्येत्यमृतमाहितम् ॥ ३७ ॥ निवृत्तेनैवदोषेणतपोव्रतमिहाचरेत् ॥ एतद्धातकृतंवृत्तं सत्यमेवसतांव्रतम् ॥ ३८ ॥ दोषैरेतैर्विमुक्तस्तुगुणैरेतैःसमन्वितः ॥ एतत्समृद्धमत्यर्थंतपोभवतिकेवलम् ॥ ३९ ॥ यन्मांपृच्छसिराजेंद्रसंक्षेपात्प्रब्रवीमिते ॥ एतत्पाप हरंपुण्यंजन्ममृत्युजरापहम् ॥ ४० ॥ ॥ धृतराष्ट्रउवाच ॥ ॥ आख्यानपंचमैर्वेदैर्भूयिष्ठंकथ्यतेजनः ॥ तथाचान्येचतुर्वेदास्त्रिवेदाश्चतथापरे ॥ ४१ ॥

वियासाधनान्यधिगम्यअध्ययनगृहीताद्वेदादधिगतवेद्यानामनेकत्वंमन्वानः किंतद्वेद्यंश्रेष्ठमितिपृच्छति आख्यानेति आख्यानंइतिहासपुराणादिपंचमंयेषुतैर्वेदैःसर्वैरवल्विदंब्रह्मब्रह्मवेदंविश्वंपुरुषएवेदंसर्व मित्यादिभिर्भूयिष्ठंनामादिप्रपंचादधिकनमंभूमाख्यंपरंब्रह्मतदेवजनःस्थावरजंगमरूपंजगदितिकथ्यते अन्येशाखिनःपुनश्चतुर्वेदाःचत्वारिवेदयंतितेतथा चत्वारःपुरुषाइति बाह्यःशरीरपुरुषश्छंदःपुरुषो वेदपुरुषोमहापुरुषइति छंदोगायऋग्यादिनियताक्षरपादंतच्चयजुःसाम्नोरप्युपलक्षणं वेदःकर्मचोदनात्मकंब्राह्मणं तथात्रिवेदाःत्रीनृक्षरमक्षरमुत्तमंचेतिपुरुषंवेदयंतेत्रिवेदाः क्षरंप्रधानं अमृताक्षरंहक्षरात्माना वीशतेदेवएकइति अमृतोजीवःकूटस्थःसोऽक्षरं मुलोपआर्षः ईशतेईष्टे क्षरःसर्वाणिभूतानिकूटस्थोऽक्षरउच्यते उत्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतइति ॥ ४१ ॥

तथाद्विवेदाः द्वेब्रह्मणीवेदितव्येशब्दब्रह्मपरंचयदितिवाच्यवाचकयोरभेदेनशब्दब्रह्मशब्देनात्रकृत्स्नोनामरूपात्मकःप्रपंचउच्यते परंचतदतीतमितिद्वयमपिवेद्यत्वेनवदंति एकवेदाः एकधैवानुद्रष्टव्यंनेहना नास्तिकिंचनेत्यादयएकमेववेद्यंवेदयंति अनृचश्चकृच्यतेस्मूयतेइतिऋक्ईश्वरःसपृथक्तेननास्तियेषांतेऽनृचःब्रह्माद्वैतवादिनः एकवेदानांव्युत्थानकालेद्वैतमस्तिसमाधौतुबाधितंतद्भवति अनृचांतुअवस्था द्वयेपिद्वैताभावस्तुल्यइतिभेदः एतेषांषण्णांमध्येसकतरःकतमःयमहंवेदजानीयां द्विजंब्राह्मणंब्रह्मविदमित्यर्थः अत्रभूयिष्ठंजनइतिप्रथमःसविशेषाद्वैतपक्षः द्वितीयोनिरीश्वरपक्षःसांख्यानांमीमांसकानांच त्रिवेदास्तुपातंजलाजीवेशजगतांभेदंवदंतः द्विवेदास्त्वौडुलोमाःकार्यात्मनाभेदंकारणात्मनाऽभेदंचसत्यमेववदंतः यथाकटकमुकुटाद्यात्मनाभेदोपिसत्यःकनकात्मनाऽभेदोपिसत्यएवेति एकवेदानामपिकिं चिद्बाधयोग्यंसत्त्वासत्त्वाभ्यामनिर्वचनीयंद्वैतमस्त्येवव्यावहारिकंप्रातिभासिकात्सर्वोबाध्यात्रज्जूरगादेर्विलक्षणंयावन्मोक्षमबाध्यं अनृचांतुदृष्टिसृष्टिवादिनांयथारज्ज्वामुरगःस्वकृचकल्पितएवमात्मनि जायत्स्वमौसमसत्ताकौइतिभेदः तत्राध्यारोपापवादाभ्यांनिष्प्रपंचंप्रपंच्यतइतिन्यायेनआद्यपक्षचतुष्टयंव्यवहारस्यपारमार्थिकत्वपरमध्यारोपदृष्ट्योपन्यस्तं अंत्यःपक्षोपवाददृष्ट्याव्यवहारापलापेन एक वेदपक्षस्तुव्यामिश्रदृष्ट्याःनिर्वचनीयारूपया एवमेवदृष्टित्रयमाश्रित्यशास्त्रमपिप्रवृत्तं आत्मकृतेःपरिणामादिति अध्यारोपकालेपरिणामदृष्टिःसूचिता ब्रह्मैवकनककुंडलन्यायेनजगदाकारेणपरिणतं त थाचश्रुतिः तदात्मानंस्वयमकुरुत सत्यंचानृतंचसत्यमभवत् सत्यंव्यावहारिकंजापद्रज्वादि अनृतंप्रातिभासिकंस्वप्नरज्जूरगादि एतदुभयात्मकंसत्यंकालत्रयाबाध्यंब्रह्मैवप्राप्तमितिश्रुत्यर्थः तथाआत्मनिवै

द्विवेदाश्चैकवेदाश्चाप्यनृचश्चतथापरे ॥ तेषांतुकतरःसस्याद्यमहंवेदवैद्विजम् ॥ ४२ ॥

वंविचित्राश्चहीतित्वमकालेआत्मनिजायत्कालेमायेंद्रजालमरीचिकोदकादयोहिप्रसिद्धतराःसृष्टयोभवंति विचित्राश्चताः नचताःनसंतीतिवक्तुंशक्यं अनुभूयमानत्वात् नाप्रिसंतीति ज्ञानेनसद्योबाधात् एवंब्रह्मण्यपिविचित्राऽनिर्वचनीयासृष्टिरस्तीतिसूत्रार्थः तथाचास्यजगतोऽनिर्वचनीयत्वंश्रुतिराह कोअद्धावेदकइहप्रवोचत्कुतआजाताकुतइयंविसृष्टिरिति तंकोपिनवेदनकोपिप्रावोचदितिश्रुत्यर्थः सेयं व्यामिश्रदृष्टिः अपवाददृष्टिस्तुआहचतन्मात्रमितिसूचिता सयथासैंधवखिल्यउदकेप्रास्तउदकमेवानुविलीयेत सयथासैंधवघनोऽनंतरोऽबाह्यःकृत्स्नोरसघनएवंवाअरेयमात्माकृत्स्नःप्रज्ञानघनइतिश्रुत्या चदर्शिता यथाजलेप्रास्तःसैंधवखिल्यःस्वोपादानंउदकंजलेलीनमनुस्वयमपिलीयते अन्यथाकरकालयेइवजलेपरिमाणाधिक्यंस्यात् अतःसःअंतरंकारणंबाह्यंघनीभावःनदुभयवर्जितःकेवलरसतन्मा त्रात्मनाजलेऽभिन्यक्तोदृश्यते एवमयंप्रपंचःकार्यकारणोभयस्वरूपहीनःसमाधौकेवलप्रज्ञानघनोभिन्यज्यतेइतिश्रुत्यर्थः अनेनदृष्टित्रयेणजनबोधार्थंशास्त्रंप्रवृत्तं यथोक्तंसंक्षेपशारीरके आरोपदृष्टिर पवादकदृष्टिरेवंव्यामिश्रदृष्टिरितिदृष्टिविभागमेनं संगृह्यसूत्रकृदयंपुरुषंमुमुक्षुंसम्यक्प्रबोधयितुमुत्सहतेक्रमेणेत्यादिना श्रुतिवचांसिमुनिस्मरणानिचत्रयविशारदगीरपिसर्वशः त्रयमपेक्ष्यदृशांत्रितयंविना नहिघटामुपयांतिकदाचनेत्यंतेन ॥ ४२ ॥

एवमनेकेषुपक्षेषूपस्थापितेषुसिद्धांतमाह एकस्येति ब्रह्मैवएकंवेद्यंतच्चसत्यंकालत्रयेप्यबाध्यंतस्यअज्ञानात्बहूनिवेद्यानिउपास्यानिअब्रह्मभूतानिकृतानिकल्पितानिवेदेसत्यप्रतिपत्त्यर्थं तेषामब्रह्मत्वंवेदए वाह तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासतइति तस्मिंश्चसत्येब्रह्मणिकश्चिदेवअवस्थितः ब्रह्मलाभोऽतिदुर्घटइत्यर्थः श्रुतिरप्यज्ञानकार्यत्वंजगतआह तुच्छेनाभ्वपिहितंयदासीत् तमसस्तन्महिनाजायतैकमिति तुच्छेनरज्जूरगादिवदध्यस्तेनमिथ्याभूतेनतमसाआभुसर्वव्यापकंब्रह्मअपिहितंआच्छादितंयत्आसीत्तत्एकमेवसत्तमसःअज्ञानस्य तपसइतिपाठेआलोचनस्यसंकल्पमात्रस्यमहिनामाहात्म्येनअजायत प्रपंचाकारेणआविर्बभूव यथारज्जुरज्ञानावृतासर्पाकारेणाविर्भवतितद्वदितिश्रुत्यर्थः ॥ ४३ ॥ एवमिति सत्यंप्रत्यगद्वयानंदंवेद्यंअज्ञात्वाबाह्यसुखलोभात्एतद्दानादिकंकर्तुंप्रवर्ततइत्यर्थः ॥४४॥ सत्यादिति त थाभवेत्परमानंदात्प्रच्युतस्यक्षुद्रानंदविषयोभिलाषोभवेत् ततश्चासौयज्ञोज्योतिष्टोमादिःप्रतायेतसंतन्यते सत्यस्यवेदवचनस्यज्योतिष्टोमेनस्वर्गकामोयजेतेत्यादेःअवधारणात्प्रामाण्यनिश्चयात् संकल्पो वितथोभवेदितिपाठेसत्यज्ञस्यैवसत्यसंकल्पत्वंअन्यस्यतुसंकल्पोवंध्यइत्यर्थः सनञ्पाठेयज्ञोपिसत्यस्यानवधारणादापरोक्ष्येणअनिश्चयादेवप्रवर्तते ज्ञातेतुसत्येएतद्बुद्धाबुद्धिमान्स्यात्कृतकृत्यश्चभारतेति

सनत्सुजातउवाच॥ ॥एकस्यवेदस्याज्ञानाद्वेदास्तेबहवःकृताः॥सत्यस्यैकस्यराजेंद्रसत्येकश्चिदवस्थितः॥ ४३ ॥ एवंवेदमविज्ञायप्राज्ञोहमितिमन्यते॥ दा नमध्ययनंयज्ञोलोभादेतत्प्रवर्तते॥ ४४ ॥ सत्यात्प्रच्यवमानानांसंकल्पश्चतथाभवेत्॥ ततोयज्ञःप्रतायेतसत्यस्यैवावधारणात्॥ ४५ ॥मनसान्यस्यभवतिवा चान्यस्याथकर्मणा॥ संकल्पसिद्धःपुरुषःसंकल्पानधितिष्ठति॥ ४६ ॥अनैभृत्येनचैतस्यदीक्षितव्रतमाचरेत्॥नामैतद्धातुनिर्वृत्तंसत्यमेवसतांपरम्॥ ४७॥ज्ञा नंवैनामप्रत्यक्षंपरोक्षंजायतेतपः॥ विद्याद्बहुपठंतंतुद्विजंवैबहुपाठिनम्॥ ४८ ॥ तस्मात्क्षत्रियमामंस्थाजल्पितेनैववैद्विजम्॥ यएवसत्यान्नापैतिसज्ञेयोब्रा ह्मणस्त्वया॥ ४९ ॥

कृतकृत्यत्वमेवस्मर्यते ॥ ४५ ॥ मनसेति यज्ञइत्यनुकृष्यते अन्यस्यएकस्ययज्ञोमनसादेवताध्यानादिरूपोभवति वाचाब्रह्मयज्ञजपादिरूपोयज्ञोभवति कर्मणाप्रसिद्धोज्योतिष्टोमादिः एतेषांपूर्वःपूर्वोज्या यान् संकल्पसिद्धःसत्यसंकल्पः संकल्पानांकल्पनीयपदार्थानांब्रह्मलोकादीनामधिष्ठाताभवतिब्रह्मवित् तचाचश्रुतिः आप्नोतिस्वाराज्यं आप्नोतिमनसस्पतिं वाक्पतिश्चक्षुष्पतिः श्रोत्रपतिर्विज्ञानपतिरिति स्वराजोभावःस्वाराज्यंब्रह्मैश्वर्यम्॥ ४६ ॥ तस्यसंकल्पस्यअनैभृत्येनअदार्ढ्येन आत्माज्ञानाद्वंध्यसंकल्पत्वेसतीत्यर्थः दीक्षितव्रतंमुष्टीकरणवाग्यमनादिकंकुर्यात् एतन्नामदीक्षितइतितद्दीक्षव्रतादेशेइत्यने नधातुनानिष्ठाप्रत्ययांतेननिष्पन्नं कर्मजःसंस्कारआगंतुकोविनाशीचेत्यर्थः सतांतुसत्यमेवपरंब्रह्मैवश्रेष्ठं अकृतकत्वेनाविनाशित्वात् ॥ ४७ ॥ एतदेवस्पष्टयति ज्ञानमिति प्रत्यक्षंशोकमोहनिवृत्तिरूपंज्ञान फलंप्रत्यक्षमित्यर्थः तपःकायिकंवाचिकंमानसिकंच तत्परोक्षंआमुष्मिकफलप्रदमित्यर्थः विद्यादित्यर्धेनपरोक्षज्ञानस्यव्यावृत्तिरिहउच्यते ॥ ४८ ॥ उक्तमेवोपसंहरति तस्मादिति जल्पितेनैवकेवलाध्य यनेनैवसत्यात्प्रत्यगद्वयानंदात् तथाचश्रुतिः योवाएतदक्षरंगार्गिविदित्वास्माल्लोकात्प्रैतिसब्राह्मणइत्यपरोक्षज्ञानिनोब्राह्मणत्वमुक्त्वाऽर्थादितरस्याब्राह्मणत्वंदर्शयति ॥ ४९ ॥

नन्वेवमध्ययनयागादेर्वैयर्थ्यंस्यादित्याशंक्येष्टापत्तिमाह छंदांसीति एषउपनिषत्प्रसिद्धःअथर्वामहामुनिर्महर्षिसंघोयानिपुराजगौतान्येवच्छंदांसिउपनिषद्रूपाणि नामनिश्चितं छादयंतिहवाएनंछंदांसिपा पात्कर्मणइतिश्रुत्याछंदःशब्दनिर्वचनात् प्लवाह्येतेअदृढायज्ञरूपाइतिअथर्वणोपनिषदियज्ञानांपापाद्रक्षितुमसामर्थ्यदर्शनात्ब्रह्मविद्यार्थानांछंदसांमुख्यंछंदस्त्वंकर्मार्थानांतुगौणमितिभावः किंच उतअपि येपिअधीतवेदाःसोपनिषत्कंवेदंपाठतोर्थतश्चअधीतवंतस्तेपिनच्छंदोविदः यतःवेदवेद्यस्यऔपनिषदस्यपुरुषस्यतत्त्वंयाथात्म्यंनविदुःनजानंति अधेन्वाचरतिमाययैषवाचंशुश्रुवाँअफलामपुष्पामिति पुष्पं हिफलंवाचःसत्यमितिश्रुतिश्चैतदाह सत्यंपरंब्रह्म॥५०॥ छंदांसिनामेति द्विपदांमनुष्याणांमध्येवरिष्ठ तत्रसत्येब्रह्मणिविषयेछंदांसिवेदाःस्वच्छंदयोगेनस्वातंत्र्यसंबंधेनैवभवंति कर्मकांडार्थज्ञानवत्ब्रह्मकांडा र्थज्ञानंनमध्येऽनुष्ठानांतरमपेक्षते तथाहि तद्धैतत्पश्यन्नृषिर्वामदेवःप्रतिपेदेहंमनुरभवंसूर्यश्चेतिश्रुत्यादर्शनसार्वात्म्ययोर्मध्येतिष्ठन्गायतीत्यादौतिष्ठतिगायत्योर्मध्येइवकार्यांतरंवार्यते तेनचज्ञातेनसत्येन चका रएवकारार्थे तेनैवेत्यर्थः छंदोविदोभवंतिनकर्ममात्रज्ञानेन तान्छंदोज्ञान्अधीत्यप्राप्यआर्याःवेदस्यवेद्यंवेदनीयंब्रह्मनगताइतिनअपितुगताःप्राप्ताएवेत्यर्थः एतेनतद्विज्ञानार्थंसगुरुमेवाभिगच्छेदित्यस्याःश्रु तेरर्थोदर्शितः॥५१॥तथापिब्रह्मणोदुर्ज्ञेयत्वमाह नेति वेदानांरहस्यवेदिताज्ञाताकश्चिन्नास्ति कश्चित्तुएतान्वेदान्रहस्यप्रतिपादकान्चित्तशुद्ध्यतिशयाद्बुध्यते योव्युत्थितस्तत्त्वमसिवाक्यार्थानुसंधातावावेदा

छंदांसिनामक्षत्रियतान्यथर्वापुराजगौमहर्षिसंघएषः॥ छंदोविदस्तेयउतनाधीतवेदानवेदवेद्यस्यविदुर्हितत्त्वम्॥५०॥ छंदांसिनामद्विपदांवरिष्ठस्वच्छंदयो गेनभवंतितत्र॥ छंदोविदस्तेनचतानधीत्यगतानवेदस्यनवेद्यमार्याः॥ ५१ ॥ नवेदानांवेदिताकश्चिदस्तिकश्चित्त्वेतान्बुद्ध्यतेवापिराजन्॥ योवेदवेदान्नसवेद वेद्यंसत्येस्थितोयस्तुसवेदवेद्यम्॥ ५२ ॥ नवेदानांवेदिताकश्चिदस्तिवेद्येनवेदंनविदुर्नवेद्यम्॥ योवेदवेदंसचवेदवेद्यंयोवेदवेद्यंनसवेदसत्यम्॥ ५३ ॥ योवेद वेदान्सचवेदवेद्यंनतंविदुर्वेदविदोनवेदाः॥ तथापिवेदेनविदंतिवेदंयेब्राह्मणावेदविदोभवंति॥ ५४ ॥

न्वेदससविकल्पकःनिर्विकल्पकंवेद्यं सर्ववृत्तिलयेप्रकाशमानंब्रह्मनवेदकिंतुसत्येसर्ववृत्तिबाधावधिभूतेप्रत्यक्चैतन्येस्थितएवनिर्विकल्पकंसुखंवेद॥५२॥इममेवार्थंभंग्यंतरेणाह नेति वेदानांवेद्यानामहंका रादीनामचेतनानांमध्येकश्चिद्वेदितानास्ति अतोहेतोःवेद्येनचेतसावेदंवेदबोध्यमात्मानंनविदुः नापिवेद्यंअनात्मानमपिनविदुःआत्माऽनात्माचनजडस्यविषयावित्यर्थः ननुजडयाधीवृत्त्याआत्माज्ञायतएव दृश्यतेत्वग्र्ययाबुद्ध्येतिश्रुतेरित्याशंक्याह वेदंआत्मानंयोवेदसएववेद्यमानात्मानंसर्वंवेद आत्मप्रभवत्वात्सर्वस्य यस्तुबहिर्मुखःवेद्यंअनात्मानंवेदससत्यंब्रह्मनवेद तथाचश्रुतीभवतः आत्मनोवाअरेदर्शनेनश्र वणेनमत्याविज्ञानेनेदंसर्वंविदितं परांचिखानिव्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्यतिनांतरात्मन्निति व्यतृणत्हिंसितवान्॥५३॥ किंच यश्चिदात्मासर्वेषांप्रत्यक्त्वेनप्रसिद्धः वेदान्वेदयंतितेवेदाःतान्प्रमाणानि वेदसएववेद्यंप्रमेयमपिवेदनतुतानिवेद्यंविदुःजडत्वात् तंचप्राणस्यप्राणमुतचक्षुषश्चक्षुःश्रोत्रस्यश्रोत्रंमनसोयेमनोविदुरितिप्राणादीनांप्रवर्तकत्वेनप्रसिद्धंवेदाःप्रमाणानिवेदविदःप्रमातारश्चनविदुः यतोवाचो निवर्तंतेअप्राप्यमनसासहेतितस्यवाङ्मनसातीतत्वश्रुतेः यद्यप्येवंतथापिवेदंवेदितारमात्मानंवेदेनैवप्रमाणेनअहंब्रह्मास्मीत्यादिनाविदंतिजानंति केते येब्राह्मणाःवेदविदोवेदपाठतोऽर्थतोऽनुष्ठानतश्चविदंतिते वेदविदः अध्ययनयज्ञादिनासंस्कृतचित्ताएववाक्यादात्मानंलक्षणयाजानंतिनत्वन्येइत्यर्थः ॥ ५४ ॥

इदमेवदृष्टांतेनप्रतिपादयति धामांशेति धामतेजःतन्मयाःअंशायस्यसतेजोमयोऽर्थाच्चंद्रःतस्यभागःकलाप्रतिपद्गतातस्यसंवेदनेज्ञापनेयथाचयथैवहिप्रसिद्धंमहीरुहस्यशाखाउपादीयते तथाहितथैववेदा परमात्मनःसंवेदनेऽर्थेपरमपुरुषार्थरूपेसत्येसर्वथाप्यबाध्येवेदाःउपादीयंतइतिआमनंति तंत्वौपनिषदंपुरुषंपृच्छामीत्यौपनिषदत्वविशेषणात् वाचामगोचरत्वश्रुतेश्चसोयंदेवदत्तइत्यादिवाक्यवत्तत्त्वम स्यादिवाक्यमपिलक्षणयास्वार्थंप्रमापयत्येवेत्यर्थः॥५५॥ एवंगुरूपसदनपूर्वकंवाक्यार्थप्रतिपत्त्युपायमुक्त्वागुरुलक्षणान्याह अभीति ब्राह्मणंब्रह्मविदंलक्षणतोभिजानामि लक्षणमेवाह व्याख्यातारंउपक्र मोपसंहारैकरूप्यादिषड्विधतात्पर्यलिंगानुसारेणवाक्यार्थवर्णनकुशलं विचक्षणंश्रुतार्थस्ययुक्तिभिरनुचिंतनेसमर्थं निदिध्यासनपरिपाकेनापरोक्षसाक्षात्कारबलात्यश्छिन्नविचिकित्सोनिःसंशयःसन्पर स्यापिसर्वसंशयान्व्याचष्टेविवृणोति अत्रस्वरूपव्याक्रियैवपराक्रियेतिन्यायेनसंशयान्दूरीकरोतीत्यर्थः॥५६॥परीष्यतेस्मिन्निति पर्येषणंअन्वेषणस्थानंप्राचीनंप्राग्दिक्स्थंनापिदक्षिणादिदिक्स्थंनापिअ दिशंदिग्विहीनंअंतर्हृदयइत्यर्थः॥५७॥एतदेवाह तस्येति प्रत्यर्थिषुआत्मात्वेनप्रथमानेष्वनात्मसुपंचसुकोशेषुपर्येषणमन्वेषणंगच्छेत्कुर्यादित्यर्थः कथंचनेत्यव्यक्तमालंबनंक्लेशसाध्यमितिसूचयति अव्य

धामांशभागस्यतथाहिवेदायथाचशाखाहिमहीरुहस्य॥ संवेदनेचैवयथामनंतितस्मिन्हिसत्येपरमात्मनोर्थे॥५५॥ अभिजानामिब्राह्मणंव्याख्यातारंविच क्षणम्॥ यश्छिन्नविचिकित्सःसव्याचष्टेसर्वसंशयान्॥५६॥ नास्यपर्येषणंगच्छेत्प्राचीनंनोतदक्षिणम्॥ नार्वाचीनंकुतस्तिर्यङ्नादिशंतुकथंचन॥५७॥ तस्य पर्येषणंगच्छेत्प्रत्यर्थिषुकथंचन॥ अविचिन्वन्निमंवेदेतपःपश्यतितंप्रभुम्॥५८॥ तूष्णींभूतउपासीतनचेष्टेन्मनसापिच॥ उपावर्तस्वतद्ब्रह्मअंतरात्मनिविश्रु तम्॥५९॥ मौनान्नसमुनिर्भवतिनारण्यवसनान्मुनिः॥ स्वलक्षणंतुयोवेदसमुनिःश्रेष्ठउच्यते॥६०॥ सर्वार्थानांव्याकरणाद्वैयाकरणउच्यते॥ तन्मूलतोव्या करणंव्याकरोतीतितत्तथा॥६१॥ प्रत्यक्षदर्शीलोकानांसर्वदर्शीभवेन्नरः॥ सत्येवैब्राह्मणस्तिष्ठंस्तद्विद्वान्सर्वविद्भवेत्॥६२॥

क्ताहिगतिर्दुःखंदेहवद्भिरवाप्यतइतिस्मृतेः वेदेइमंआत्मानंअविचिन्वन्वेदांतन्यायानप्यचिंतयन्नित्यर्थः तपःतपस्वीआलोचनवान्ध्यायीतंप्रभुंपश्यतितंपश्यतिनिष्कलंध्यायमानइतिश्रुतेः॥५८॥तूष्णींभूतइ त्यनेनवागादिबाह्येंद्रियव्यापारोपरमउक्तः मनसापिनचेष्टेत्नचेष्टेतेत्यनेनमानसव्यापारोपरमउक्तः अंतरात्मनिहार्दाकाशेविश्रुतंवेदेप्रख्यातंतद्वाचामगोचरंब्रह्मउपावर्तस्वउपागच्छ॥५९॥मौनात्ध्यानमा त्रान्नमुनिर्भवतिनापिअरण्यवासात्संन्यासमात्रात् किंतर्हियःस्वलक्षणंस्वस्यप्रत्यगात्मनोलक्षणंजगज्जन्मादिहेतुत्वंसच्चिदानंदात्मकत्वंचयोवेदजानातिसश्रेष्ठः संन्यासिभ्योयोगिभ्यश्चज्ञानीश्रेष्ठइत्यर्थः ॥ ६० ॥ सर्वार्थानांव्याकरणात्प्रकटीकरणात्सर्वज्ञत्वादयंज्ञानीवैयाकरणइत्युच्यते तच्चव्याकरणंकेचिद्योगजधर्मप्रत्यासत्त्यावदंतितन्निराचष्टे मूलतइति आत्मज्ञानाद्धिसर्वविज्ञानंश्रूयतेनप्रधानज्ञा नात्अन्यतोवा मूलतइतिल्यब्लोपेपंचमी मूलंकारणंब्रह्मप्राप्येत्यर्थः तत्रव्याकर्तापरमात्मैव तन्नामरूपाभ्यामेवव्याक्रियत नामरूपेव्याकरवाणीतिश्रुतिभ्यामित्याह व्याकरोतीति श्रौतव्युत्पत्तिप्रदर्शन मेतत्॥ ६१ ॥ सार्वज्ञ्यमपिब्रह्मविदामनौपचारिकमित्याह प्रत्यक्षेति सत्येतिष्ठन्नतुवृत्त्यंतरेदेहाद्याकारे ब्राह्मणःब्रह्मवित् तद्विद्वान्ब्रह्मविद्वानितिब्राह्मणपदव्युत्पत्तिप्रदर्शनम्॥ ६२ ॥

अध्यायार्थमुपसंहरति धर्मादिष्विति धर्मश्चसत्यंचदमस्तपश्चेत्यादिषुद्वादशसुस्थितः तथासत्यादिरूपेअष्टविधेअप्रमादेचस्थितः एवंसाधनवान्वेदेषुपूर्वोक्तेषुआरोपदृष्टिव्यामिश्रदृष्ट्यपवाददृष्टिरूपेषुआ नुपूर्व्येणसोपानारोहणन्यायेनपरमेपदेस्थितोहमेतत्स्वानुभवसिद्धंबुद्ध्यास्वतःस्नेहवत्यातेतुभ्यंब्रवीमि सोपानक्रमस्तुनृसिंहतापनीयेश्रूयते ओतानुज्ञाअनुज्ञाऽविकल्पैरिति अस्यार्थः ओतत्वंकारणव्याप्तिः कार्येयद्वन्मृदोघटे सर्वंब्रह्मेतितन्निष्ठाजानतेपरिणामतः १ कार्यत्वासमसत्त्वंयत्कारणेसमुदीरितं तदनुज्ञातृशब्दार्थोमरौवारिविवर्तनं २ एतन्निष्ठास्ततोभूत्वाजगन्मिथ्येतिजानते अनुज्ञायांजगत्तुच्छंशशशृं गादिवन्मतं ३ एवंसोपानरीत्यैवभूमित्रितयलंघनात् अविकल्पंपरंयत्तदहंब्रह्मास्मिनिर्भयमिति॥ ६३ ॥ ॥इतिउद्योगप०नैलकंठीयेभारतभा०त्रिचत्वारिंशोऽध्यायः॥ ४३ ॥ ॥ ७ ॥ ॥ एवंआत्म ज्ञानमार्गंश्रुत्वातस्यांतरंगसाधनंयोगंश्रोतुंपृच्छति सनत्सुजातेति परांउक्तादपिअत्युत्कृष्टांब्राह्मींब्रह्मप्रापिकांवाचंउपनिषदंवदसेजानीषे भासनोपसंभाषाज्ञानेतितङ् विश्वंरूप्यतेप्रकाशतेस्यां यांज्ञातवतो ऽन्यत्ज्ञातव्यंनावशिष्यतइत्यर्थः कामेनकाम्यमानेनविषयेणपरांदूरीभूतांविषयवार्ताहीनामित्यर्थः अतएवसुदुर्लभांकथांकथनीयांप्रब्रूहि हेकुमारइदंमेममवाक्यंत्वांप्रतिप्रार्थनारूपंवचनं अवधेहीतिशे

धर्मादिषुस्थितोप्येवंक्षत्रियब्रह्मपश्यति॥ वेदानांचानुपूर्व्येणएतद्बुद्ध्याब्रवीमिते॥६३॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिसनत्सुजातपर्वणिसनत्सुजातवा क्येत्रिचत्वारिंशोऽध्यायः॥४३॥ ॥७॥ ॥धृतराष्ट्रउवाच॥ ॥सनत्सुजातयामिमांपरांत्वंब्राह्मींवाचंवदसेविश्वरूपाम्॥ परांहिकामेनसुदुर्लभांकथांप्रब्रूहि मेवाक्यमिदंकुमार॥१॥ ॥सनत्सुजातउवाच॥ ॥नैतद्ब्रह्मत्वरमाणेनलभ्यंयन्मांपृच्छन्नतिहृष्यस्यतीव॥ बुद्धौविलीनेमनसिप्रचिंत्याविद्याहिसाब्रह्मचर्ये णलभ्या॥२॥ ॥धृतराष्ट्रउवाच॥ ॥अत्यंतविद्यामितियत्सनातनींब्रवीषित्वंब्रह्मचर्येणसिद्धाम्॥अनारभ्यांवसतीहकार्यकालेकथंब्राह्मण्यममृतत्वंलभेत ॥३॥ ॥सनत्सुजातउवाच॥ ॥ अव्यक्तविद्यामभिधास्येपुराणींबुद्ध्याचतेषांब्रह्मचर्येणसिद्धाम्॥ यांप्राप्यैनंमर्त्यलोकंत्यजंतियावैविद्यागुरुवृद्धेषुनित्या ॥४॥धृतराष्ट्रउवाच॥ ॥ब्रह्मचर्येणयाविद्याशक्यावेदितुमंजसा॥तत्कथंब्रह्मचर्यंस्यादेतद्ब्रह्मन्ब्रवीहिमे॥५॥

षः॥ १ ॥ब्रह्मविद्यायाःदुर्लभत्वंदर्शयन्सनत्सुजातउवाच नैतदिति हृष्यसिअहंब्रह्मविद्याधिकार्यस्मीतिदृप्यसि पाठांतरेअभिषंगेणनिर्बंधेन विद्यालक्षणमाह बुद्धाविति सर्वेषामिंद्रियाणांनिरोधेनमनो मात्रमनुपरतंसंकल्पाद्यात्मकंतिष्ठति तस्मिन्नपिअहंब्रह्मास्मीतिनिश्चयस्वभावायांबुद्धौविलीनेसति प्रचिंत्याप्रगतंचिंत्यंयस्यांसानिरुद्धसर्ववृत्तिकाकाचिदवस्थाविद्येत्युच्यते साचब्रह्मचर्येणगुरुकुलवासेन लभ्या॥ २ ॥अत्यंतेअंतस्त्रिविधपरिच्छेदःतमतिक्रांतंअत्यंतंब्रह्मतद्विषयांविद्यां सनातनींनित्यसिद्धां प्रत्यगात्मनोनित्यापरोक्षत्वात् यत्साक्षादपरोक्षाद्ब्रह्मेतिश्रुतेः सिद्धांअभिव्यज्यमानां तत्रहेतुः अनार भ्यांकर्मवदारंभायोग्यां याचकार्यकालेइहआत्मन्येववसति नित्यसिद्धत्वात् एवंसतिब्राह्मण्यंब्राह्मणस्ययोग्यंअमृतत्वंकथंलभेत नहिलब्धलाभार्थंयत्नोपेक्ष्यइतिब्रह्मचर्याद्यनुष्ठानाक्षेपः॥ ३ ॥ अत्रो त्तरमाह अव्यक्तेति बुद्ध्याख्योपाधिसंबंधजनितकालुष्यादविविक्ततयानव्यक्तमव्यक्तंब्रह्मतस्यविद्यां अयंभावः यद्यपिब्रह्मनित्यापरोक्षंआत्मत्वात्तथापिअशनायाद्यतीतस्यतस्यविविक्तस्यपरोक्षत्वा त्तदापरोक्ष्याययत्नोयुक्तइति॥ ४ ॥ अंजसाआर्जवेन॥ ५॥

आचार्येति योनिःस्थानं योनिष्टइंद्रनिषदेअकारि स्वेयोनौनिषदतंसरूपाइत्यादौदर्शनात् गर्भेभूत्वातस्यनिष्कपटसेवयाअंतरंगत्वंप्राप्येत्यर्थः शास्त्रकाराःशास्त्रकर्तृत्वंब्रह्मण्येवस्तुतंमहतोभूतस्यनिःश्वसित मेतदृग्वेदइत्यादिना गुरोरनुग्रहादिहैवब्रह्मभावंप्राप्नुवंतीत्यर्थः परमंअपुनरावृत्तिं योगंब्रह्मणासहऐक्यंयांति ॥ ६ ॥ अस्मिन्निति येजितकामाःब्राह्मींस्थितिंप्राप्नुयेचद्वंद्वसहाःतेदेहादात्मानंनिर्हरंतिपृथक्कुर्व ति सत्वसंस्थाःसत्वगुणभाजः श्रुतिश्च तंस्वाच्छरीरात्यदृहेन्मुंजादिवइषीकांधैर्येणेति प्रदृहेत्पृथक्कुर्यात् ॥ ७ ॥ आचार्यःशास्ताउपदेष्टायस्यांसाजातिर्जन्म यथाब्राह्मणस्यसावित्रीप्राप्तासाविद्वंद्वितीयंज न्मएवंआचार्यात्परब्रह्मविद्याप्राप्त्यापितस्यजन्मांतरंभवति तच्चमोक्षहेतुत्वात्पुण्यत्वादिगुणसंयुक्तं ॥ ८ ॥ आचार्यमाहात्म्यप्रख्यापकंमंत्रंपठति यःप्रावृणोतीति यःआचार्यःवर्णान्ब्राह्मणादीन्अवितथे नवितथमनृतमनात्माजडंतदन्येनसत्येनचिदात्मनाप्रकर्षेणआवृणोतिसवाच्याभ्यंतरंवासयति द्वैतोत्थभयनिवारणेनपालयतीत्यर्थः कृतंब्रह्मकुर्वन्वाचाआविष्कुर्वन् तस्यफलमाह अमृतंसंप्रयच्छन्निति

सनत्सुजातउवाच॥ ॥आचार्ययोनिमिहयेप्रविश्यभूत्वागर्भेब्रह्मचर्यंचरंति॥इहैवतेशास्त्रकाराभवंतिप्रहायदेहंपरमंयांतियोगम् ॥६॥ अस्मिँल्लोकेवैजयंती हकामान्ब्राह्मींस्थितिंत्यनुतितिक्षमाणाः ॥तआत्मानंनिर्हरंतीहदेहान्मुंजादिषीकामिवसत्वसंस्थाः ॥ ७ ॥शरीरमेतौकुरुतःपितामाताचभारत॥आचार्यशा स्तायाजातिःसापुण्यासाऽजराऽमरा॥८ ॥यःप्रावृणोत्यवितथेनवर्णान्तंकुर्वन्नमृतंसंप्रयच्छन् ॥तंमन्येतपितरंमातरंचतस्मैनद्रुह्येत्कृतमस्यजानन्॥९॥गु रुंशिष्योनित्यमभिवादयीतस्वाध्यायमिच्छेच्छुचिरप्रमत्तः॥ माननंकुर्यान्नादधीतरोषमेषप्रथमोब्रह्मचर्यस्यपादः॥१० ॥ शिष्यवृत्तिक्रमेणैवविद्यामाप्नोति यःशुचिः॥ ब्रह्मचर्यव्रतस्यास्यप्रथमःपादउच्यते ॥११॥ आचार्यस्यप्रियंकुर्यात्प्राणैरपिधनैरपि॥ कर्मणामनसावाचाद्वितीयःपादउच्यते॥ १२॥ समागुरौय थावृत्तिर्गुरुपत्न्यांतथाचरेत्॥ तत्पुत्रेचतथाकुर्वन्द्वितीयःपादउच्यते॥१३॥आचार्येणात्मकृतंविजानन्ज्ञात्वाचार्थंभावितोस्मीत्यनेन॥यन्मन्यतेतंप्रतिदृष्टवु द्धिःसवैतृतीयोब्रह्मचर्यस्यपादः॥ १४॥ नाचार्यस्यानपाकृत्यप्रवासंप्राज्ञःकुर्वीतनैतदहंकरोमि॥ इतीवमन्येतनभाषयेतसवैचतुर्थोब्रह्मचर्यस्यपादः॥ १५॥

अमृतंमोक्षं कृतंतत्कृतमुपकारं ॥ ९॥ शुचिःस्नानादिनाभावशुद्धाच अप्रमत्तःगुरुशूषायांसावधानः माननंकुर्यात् तुच्छमपिकार्यंशिशूनांशौचादिकंतदपिकर्तव्यमेवेत्यर्थः अत्यंतंश्रमेपिरोषंनादधीतन विदध्यात् ॥ १० ॥ शिष्यवृत्तिःसायंप्रातर्भिक्षणेनजीवनं तेनैवैकमेणनतुगुर्वन्नोपजीवनेनेत्यर्थः ॥ ११ ॥ द्वाभ्यांश्लोकाभ्यांब्रह्मचर्यस्यप्रथमंपादमुक्त्वाद्वाभ्यांद्वितीयंपादमाह आचार्यस्येति ॥ १२ ॥ ॥ १३ ॥प्राप्तविद्योविद्यासुखेनतृप्यन्नाचार्यंयत्अल्पंतंमानयतिसब्रह्मचर्यस्यतृतीयःपादइत्याह आचार्येणेति आत्मकृतंस्वस्मैउपकृतंविद्यादानेनतस्यचअर्थंप्रयोजनंदुःखनिवृत्तिमानंदावाप्तिंचज्ञात्वा ऽनुभूयअनेनाचार्येणभाविनोवर्धितोस्मीतिजानन्यन्मन्यते ॥ १४ ॥ अनपाकृत्यविद्यायानिष्क्रयार्थंऋणमर्थदानेनअपरिहृत्य प्रवासंगुरुगृहादन्यत्राश्रमांतरेस्थितिंनकुर्वीत एतत्गुरवेअर्थप्रदानमहंकरो मीतिनैवमन्येतमनसानचभाषयेत स्वार्थेणिच् वदेतवाचा ॥ १५ ॥

चतुष्पाद्ब्रह्मचर्येणलभ्यांचतुष्पदीविद्यामाह कालेनेति कालेनबुद्धिपरिपाकेन उत्साहयोगेनबुद्धिवैभवेन शास्त्रेणसहाध्यायिभिर्विचारेण क्रमस्तुनविवक्षितः उक्तंच आचार्यात्पादमादत्तेपादंशिष्यःस्व मेधया कालेनपादमादत्तेपादंसब्रह्मचारिभिरिति ॥ १६ ॥ धर्मादयइति यस्यब्रह्मचर्यस्यरूपंस्वरूपभूताइत्यर्थः अन्यानिचांगानिआसनप्राणजयादीनि बलंयोगेनित्योयुक्तः ब्रह्मार्थोवेदार्थःकर्मब्रह्म णीतयोर्योगेनअधिगमेनब्रह्मचर्यंफलतीत्यर्थः॥१७॥एवमिति अहंकरोमीत्यभिमानंविनातत्प्रकाशकंवचनंचविनागुर्वर्थार्थंप्रदत्तः सःआचार्यःवृत्तिंजीविकांएतिप्राप्नोति वृत्तिर्वर्तनं शिष्यस्येतिशेषः॥१८ वसन् ब्रह्मचर्येइतिशेषः सर्वतःसर्वैःप्रकारैःवर्धतिवर्धते वर्षति धनैरितिशेषः ॥१९॥२०॥२१॥ आकांक्ष्येति रसभेदःपारदगुटिकाविशेषश्चिंतामणिसंज्ञस्तांचिंतितवस्तुप्रदंअर्थयंतेतेषांरसभेदार्थिनांयथाआ

कालेनपादंलभतेतथार्थंततश्चपादंगुरुयोगतश्च ॥उत्साहयोगेनचपादमृच्छेच्छास्त्रेणपादंचततोभियाति ॥ १६ ॥धर्मादयोह्यादृशयस्यरूपमन्यानिचांगानि तथाबलंच ॥ अचार्ययोगेफलतीतिचाहुर्ब्रह्मार्थयोगेनचब्रह्मचर्यम् ॥१७॥ एवंप्रवृत्तोयदुपालभेतवैधनमाचार्यायतदनुप्रयच्छेत्॥ सतांवृत्तिंबहुगुणामेवमे तिगुरोःपुत्रेभवतिचवृत्तिरेषा॥ १८ ॥एवंवसन्सर्वतोवर्धतीहबहून्पुत्रान्लभतेचप्रतिष्ठाम्॥ वर्षंतिचास्मैप्रदिशोदिशश्चवसत्यस्मिन्ब्रह्मचर्येजनाश्च ॥ १९॥ एतेनब्रह्मचर्येणदेवादेवत्वमाप्नुवन्॥ ऋषयश्चमहाभागाब्रह्मलोकंमनीषिणः ॥ २० ॥ गंधर्वाणामनेनैवरूपमप्सरसामभूत् ॥ एतेनब्रह्मचर्येणसूर्योप्यङ्गाय जायते ॥ २१ ॥ आकांक्ष्यार्थस्यसंयोगाद्रसभेदार्थिनामिव ॥एवंत्येतेसमाज्ञायतादृग्भावंगताइमे ॥२२॥ यआश्रयेत्पावयेच्चापिराजन्सर्वंशरीरंतपसातप्य मानः ॥एतेनवैबाल्यमभ्येतिविद्वान्मृत्युंतथासजयत्यंतकाले॥ २३॥ अंतवतःक्षत्रियतेजयंतिलोकान्जनाःकर्मणानिर्मलेन ॥ ब्रह्मैवविद्वांस्तेनचाभ्येतिसर्वं नान्यःपंथाअयनायविद्यते ॥ २४॥

कांक्ष्यस्यलिप्सितस्यार्थस्यसंयोगःप्राप्तिस्तथायादृक्भावोभवतिएवमेवएतेदेवादयःसमाज्ञायब्रह्मचर्यमुपेत्यतादृग्भावंसत्यसंकल्पत्वाच्चिंतितवस्तुप्रदत्वंगताः ॥ २२ ॥ यइति सर्वंचतुष्पाद्ब्रह्मचर्यंयआश्र येत्शरीरंचपावयेत् बाल्यंरागद्वेषादिराहित्यंवेदांतार्थानांयुक्तिपूर्वकमनुचिंतनेननित्यत्वनिश्चयंवा अंतकालेइत्यनेनयावज्जीवंउक्तप्रकारेबाल्येतिष्ठेदितिदर्शितं यथोक्तं शक्नोतीहैवयःसोढुंप्राक्शरीरविमोक्ष णात् कामक्रोधोद्भवंवेगंसयुक्तःससुखीनरइति ॥ २३ ॥ अंतेति तेअविद्वांसःअंतवतःअनित्यांल्लोकान्कर्मणाजयंति विद्वांस्तुब्रह्मैवसार्वात्म्यान्सर्वंतेनज्ञातेनब्रह्मणाअभ्येतिअतस्तस्यकर्मप्राप्यंकिंचित्फलं नावतिष्ठतेइत्यर्थः अतःज्ञानादन्यःपंथाःअयनायमोक्षायनविद्यते ज्ञानादेवतुकैवल्यमित्यवधारणात् ॥ २४ ॥

नान्यःपंथाअयनायविद्यतइतिश्रुत्वा तूष्णींभूतउपासीतनचेष्टेन्मनसापिच उपावर्तस्वतद्ब्रह्मअंतरात्मनिविश्रुतमितिप्रागुक्तप्रकारेणआत्मानमनुसंदधानस्तमनवाप्यनानावर्णान्नाडीमार्गात्अंतर्हृदयेपश्यन्पृच्छति आभातीति सद्ब्रह्मणोरूपंयोविद्वानत्रहृदयेपश्यतिसशुक्लादिरूपमिवअनवस्थितरूपंब्रह्मपश्यति अतःकथंरूपंकीदृक्रूपंतदक्षरंव्यापकंअमृतमविनाशिपदंपदनीयंतद्ब्रूहीतिशेषः काद्रवंकुत्सितःपरपीडकःद्रवोगतिर्यस्यसकाद्रवोधूमःतद्वर्णंकाद्रवं कद्रुपिंगलंतद्वर्णं श्रूयंतेचब्रह्ममार्गेरूपाणि तस्मिन्शुक्लमुतनीलमाहुःपिंगलंहरितंलोहितंच एषपंथाब्रह्मणाहानुवित्तस्तेनैतिब्रह्मवित्पुण्यकृत्तैजसश्चेति॥२५॥ उत्तरमाह आभातीति ब्रह्ममार्गेयद्यपिशुक्लादिरूपाणिभांतितथापियत्ब्रह्मणोरूपंतत्पृथिव्यादिषुनास्ति अशब्दमस्पर्शमरूपमव्ययंतथाऽरसंनित्यमगंधवच्चयदितितत्रशब्दादीनांनिषेधात् तेषांचशब्दादिमत्त्वात्रूपांतराणितुब्रह्मप्राप्तिचिह्नानिनतुब्रह्मरूपाणि तथाचश्रुतिः नीहारधूमार्कानिलाऽनलानांखद्योतविद्युत्स्फटिकशशीनां एतानिरूपाणिपुरःसराणिब्रह्मण्यभिव्यक्तिकराणियोगेइति समुद्रेसंसारसागरेएनंपरमात्मानंसलिलंसलिलोपलक्षितःपंचभूतात्मकोदेहःनबिभर्ति जीवानामिवब्रह्मणउपाधिजंदुःखंनास्तीत्यर्थः यद्वा सामुद्रेजलेएतद्रूपंनास्तीत्यर्थः ॥ २६ ॥ नतारकास्वितिरूपादिराहित्यस्यैवप्रपंचः

धृतराष्ट्रउवाच॥ ॥आभातिशुक्लमिवलोहितमिवाथोकृष्णमथांजनंकाद्रवंवा॥सद्ब्रह्मणःपश्यतियोत्रविद्वान्कथंरूपंतदमृतमक्षरंपदम्॥२५॥ ॥सनत्सुजातउवाच॥ ॥आभातिशुक्लमिवलोहितमिवाथोकृष्णमायसमर्कवर्णम्॥नपृथिव्यांतिष्ठतिनांतरिक्षेनैतत्समुद्रेसलिलंबिभर्ति॥२६॥ नतारकासुनचविद्युदाश्रितंनचाभ्रेषुदृश्यतेरूपमस्य॥ नचापिवायौनचदेवतासुनैतच्चंद्रेदृश्यतेनोतसूर्ये॥२७॥नैवर्क्षुतन्नयजुष्षुनाप्यथर्वसुनदृश्यतेवैविमलेषुसामसु॥रथंतरेबार्हद्रथेवापिराजन्महाव्रतेनैवदृश्येद्ध्रुवंतत्॥२८॥अपारणीयंतमसःपरस्तात्तदंतकोप्येतिविनाशकाले॥ अणीयोरूपंक्षुरधारयासमंमहच्चरूपंतद्वैपर्वतेभ्यः॥२९॥ साप्रतिष्ठातदमृतंलोकास्तद्ब्रह्मतद्यशः॥भूतानिजज्ञिरेतस्मात्प्रलयंयांतितत्रहि॥३०॥

॥२७॥ नामरूपात्मकेप्रपंचेसतितद्रहितत्वंब्रह्मणोवक्तुंरूपप्रपंचादन्यत्वमुक्त्वानामप्रपंचादप्यन्यत्वमाह नैवर्क्षुतदित्यादिना तदित्यनेनअर्थात्ब्रह्मणोनामनिर्दिश्यते विमलेषुवैश्वानरसामादिषु रथंतरबार्हद्रथेचपृष्ठ्यसामनी महाव्रतेयज्ञविशेषेपिनैवतद्दृश्येत्पश्येत् कर्मभिरपितद्दर्शनंनप्राप्यतेइत्यर्थः नास्त्यकृतःकृतेनेतिश्रुतेः अकृतःमोक्षःकृतेनकर्मणानास्तीतिश्रुत्यर्थः यतःतत्ध्रुवंनित्यं ॥ २८ ॥ अपारणीयं अनतिक्रमणीयं अहेयत्वात् तमसःअज्ञानरूपादुपाधेःपरस्तात्पराचीनं अंतकःकालःतत्ब्रह्मअप्येतिगच्छति प्रलयांतेकालोपितत्रलीयतइत्यर्थः अणीयइतिदुर्लक्ष्यं क्षुरधारयासममितिअत्यंतावहितेनग्राह्यं महच्चपर्वतेभ्यइतिउपलक्षणंसर्वस्य सर्वस्मादपिमहदित्यर्थः ॥ २९ ॥ प्रतिष्ठाअधिष्ठानं अमृतंनिर्विकारं विकारोहिविकारांतरमापद्यमानोमृतउच्यते लोक्यंतइतिलोकादृश्यमात्रं ब्रह्मबृहत् यशोरमणीयमपितदेव तस्यनाममहद्यशइतिहिश्रुतेः तस्मादुपादानात्कनकात्कुंडलादीनीवभूतानिजातानि यतःतत्रैवप्रलयंमृदिघटइवयांति एतेनब्रह्मणोजगत्कारणत्वमुक्तं तथाचश्रुतिः यतोवाइमानिभूतानिजायंते येनजातानिजीवंति यत्प्रयंत्यभिसंविशंतीति तद्विजिज्ञासस्व तद्ब्रह्मेति ॥ ३० ॥

अनामयंनिर्द्वैतं उद्यतंजगदाकारेणउद्गतंमहद्यशःपरंव्यापकं आकाशादिभ्योपिमहदित्यर्थः वाचइतिषष्ठीतृतीयार्थे कवयःविकारंवाचैवास्तीतिवदंतिनस्वरूपेणास्तीत्यर्थः तथाचश्रुतिः वाचारंभणंविकारोनामधेयमितिवागालंबनत्वंविकारस्याह यस्मिन्निदंजगत्प्रतिष्ठितंरज्ज्वामुरगवल्लीनंतद्येविदुस्तेअमृताःमुक्ताभवंति ॥ ३१ ॥ ॥इतिउद्योगप० नैलकंठीयेभारतभा० चतुश्चत्वारिंशोध्यायः॥ ४४ ॥ ॥ ७ ॥ समाप्ताज्ञानप्रधानायोगोपसर्जनाब्रह्मविद्या इदानींयोगप्रधानांज्ञानोपसर्जनांतांवक्तुमध्यायद्वयमारभ्यते यत्रपूर्वंचित्तवृत्तिनिरोधेनत्वंपदार्थंज्ञात्वापश्चाद्वेदांतश्रवणादिनातस्यब्रह्मत्वंनिश्चीयतेसाआद्या यत्रतुश्रवणादिनापूर्वंपारोक्ष्येणप्रतीचोब्रह्मभावंनिश्चित्यपश्चान्निदिध्यासनेनसःअपरोक्षीक्रियतेसाद्वितीया क्रमद्वयेपिफलैक्यात्साधनजातमप्येकरूपमेवेतिदर्शयितुंप्रागुक्तानेवहेयान्दोषान्उपादेयान्गु

अनामयंतन्महदुद्यतंयशोवाचोविकारंकवयोवदंति॥यस्मिन्जगत्सर्वमिदंप्रतिष्ठितंयेतद्विदुरमृतास्तेभवंति॥३१॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिसनत्सुजातपर्वणिसनत्सुजातवाक्येचतुश्चत्वारिंशोध्यायः॥४४॥ ॥७॥ ॥सनत्सुजातउवाच ॥शोकःक्रोधश्चलोभश्चकामोमानःपरासुता॥ईर्ष्यामोहोविधित्साचकृपाऽसूयाजुगुप्सुता॥१॥ द्वादशैतेमहादोषामनुष्यप्राणनाशनाः॥एकैकमेतेराजेंद्रमनुष्यान्पर्युपासते॥ यैराविष्टोनरःपापंमूढसंज्ञोव्यवस्यति॥२॥ स्पृहयालुरुग्रःपरुषोवावदान्यःक्रोधंबिभ्रन्मनसावैविकत्थी॥नृशंसधर्माःषडिमेजनावैप्राप्याप्यर्थंनोतसभाजयंते॥३॥ संभोगसंविद्विषमोतिमानीदत्त्वाविकत्थीकृपणोदुर्बलश्च॥बहुप्रशंसीवनिताद्विट्सदैवसप्तैवोक्ताःपापशीलानृशंसाः॥४॥ धर्मश्चसत्यंचतपोदमश्चअमात्सर्यंह्रीस्तितिक्षानसूया॥दानंश्रुतंचैवधृतिःक्षमाचमहाव्रताद्वादशब्राह्मणस्य॥५॥ योनैतेभ्यःप्रच्यवेद्द्वादशभ्यःसर्वामपीमांपृथिवींसशिष्यात्॥त्रिभिर्द्वाभ्यामेकतोवार्थितोयोनास्यस्वमस्तीतिचवेदितव्यं॥६॥दमस्त्यागोथाप्रमादइत्येतेष्वमृतंस्थितम्॥एतानिब्रह्ममुख्यानांब्राह्मणानांमनीषिणाम्॥७॥सद्वाऽसद्वापरीवादोब्राह्मणस्यनशस्यतेनरकप्रतिष्ठास्तेस्युर्यएवंकुर्वतेजनाः॥८॥ मदोष्टादशदोषःसस्यात्पुरायोऽप्रकीर्तितः॥लोकद्वेष्यंप्रातिकूल्यमभ्यसूयामृषावचः॥९॥

णांश्चदर्शयतिशोकःक्रोधश्चेत्यादिना तत्रक्रोधादयःप्राग्व्याख्याताएवतथापिक्वचित्विशेषोदृश्यतेसएवव्याख्यायते लोभःस्पृहा मोहःप्रज्ञायाअभावः अत्रापिलोभइतिपाठेपिसएवार्थः लुभविमोहनइतिधात्वर्थानुगमात् परासुतानिद्रापरत्वं कृपात्रस्नेहः ॥ १ ॥ पापंपापफलंकर्म व्यवस्यतिआरभते मूढसंज्ञःमूढबुद्धिः ॥ २ ॥ उग्रःनिर्दयः परुषःरूक्षवाक् वदान्योबहुभाषी नसभाजयंतेपरंनमानयंति ॥ ३ ॥ बहुप्रशंसीआत्मस्तुतिपरः ॥ ४ ॥ महाव्रतामहाव्रतानि सुपांसुलुगितिसुपोडादेशश्छांदसः ॥ ५ ॥ नास्यस्वंस्वीयंकिमपिनास्ति धर्मादिष्वेकैकस्मिन्नपिपक्षपातेसतितदर्थंसर्वंत्यजतीत्यर्थः ॥ ६ ॥ ब्रह्मैवमुख्यंप्राप्यंयेषांतेषाम् ॥ ७ ॥ परीवादःपरदोषकीर्तनं सत्यथार्थभूतं असत्आरोपितम् ॥ ८ ॥ अप्रकीर्तितइति दमविरोधिनएवप्रातिकूल्यादयोमददोषत्वेनसूचिताअपिशृंगग्राहिकयाप्रकर्षेणविधिमुखेननप्रोक्ताइत्यर्थः लोकद्वेष्यंपारदार्यादि प्रातिकूल्यंधर्मादौविघ्नाचरणं अभ्यसूयागुणिषुदोषारोपः ॥ ९ ॥

कामःस्त्र्यभिलाषः पारतंत्र्यंमद्यादिवशत्वं पैशुनंराजद्वारादौपरदोषसूचनं अर्थहानिःनष्टनर्तकवेश्यादिपुरंदंडनवावित्तनाशः विवादोवैरम् ॥१०॥ मोदोहर्षःदर्पहेतुःहृष्टोदृप्यतीत्यापस्तंबोक्तेः अतिवादोनिर्मर्यादंवचनं संज्ञानाशःकार्याकार्यविवेकराहित्यं अभ्यसूयितानैरंतर्येणपरद्रोहशीलता एतन्मदवत्त्वंविगर्हितंनैदितसद्भिः सद्दाहीत्यापत्कालेपिनाश्रयणीयमितिसूचितम् ॥११॥ सुहृदांप्रियेसतिहर्षःअप्रियेसतिव्यथेतिद्वौसौहृदगुणौ तृतीयमाह स्यादिति सुहितमितिपाठेसुतरांहितंइष्टंपुष्टिकरं देयंदातारं भव्यगेयेतिवत्कर्तरिकृत्यः योदातारंअयाच्यमपिपुत्रादिकंमुख्यंकर्मभूतंयाचतेसअभ्यर्थितःप्रार्थितोदाता तस्मैइष्टादीन्अर्हति दातुमितिशेषः सार्धश्लोकोवाक्यम्॥१२॥चतुर्थमाह त्यक्तेति यस्मैसर्वस्वंदत्तंतस्यगृहेकामात्मयायमुपकृतइतिबुद्धितःनसंवसेत् तेनकदाचिदनादृतःसन्सौहार्दभंगंकुर्यादितिभावः पंचममाह भुंक्तेकर्मेति स्वकर्मार्जितमेवधनंभुंक्तेननुमित्रायार्जितं अन्यथाकालेनहेलनांप्राप्यसौहृदभंगोमाभूदिति षष्ठमाह स्वाशिषंबाधतेचस्वस्यश्रेयोपिमित्रहितार्थेनाशयतीत्यर्थः पाठांतरेस्वासितंस्व

कामक्रोधौपारतंत्र्यंपरिवादोथपैशुनम्॥अर्थहानिर्विवादश्चमात्सर्यंप्राणपीडनम्॥१०॥ईर्ष्यामोदोतिवादश्चसंज्ञानाशोभ्यसूयिता॥ तस्मात्प्राज्ञोनमाद्येत सदात्येतद्विगर्हितम्॥११॥सौहृदेवैषद्रुणावेदितव्याःप्रियेहृष्यंत्यप्रियेचव्यथंते॥ स्यादात्मनःसुचिरंयाचतेयोददात्ययाच्यमपिदेयंखलुस्यात्॥इष्टान्पुत्रान्विभवान्स्वांश्चदारानभ्यर्थितश्चार्हतिशुद्धभावः॥॥१२॥त्यक्तद्रव्यःसंवसेन्नेहकामाद्भुंक्तेकर्मस्वाशिषंबाधतेच॥१३॥ द्रव्यवान्गुणवानेवंत्यागीभवतिसात्त्विकः पंचभूतानिपंचभ्योनिवर्तयतितादृशः॥१४॥एतत्समृद्धमप्यूर्ध्वंतपोभवतिकेवलम्॥सत्त्वात्प्रच्यवमानानांसंकल्पेनसमाहितम्॥१५॥यतोयज्ञाःप्रवर्धंतेसत्यस्यैवावरोधनात्॥ मनसान्यस्यभवतिवाचान्यस्याथकर्मणा॥१६॥

स्थानंराज्यादिकंआस्तेस्मिन्नितिव्युत्पत्त्याज्ञेयं स्वाशिवमितिपाठेस्वस्यआसमंतात्शिवंश्रेयस्करमित्यर्थः ॥ १३ ॥ द्रव्यवान्गृहस्थःएवंउक्तरीत्यागुणवान्त्यागीदातासात्त्विकःसत्त्वप्रधानश्चयोभवति तादृशःपुरुषःपंचभ्यःशब्दादिभ्यःपंचभूतानिश्रोत्रादाकारेणपरिणतानिइंद्रियाणिनिवर्तयति ॥ १४ ॥ एतत्स्ववियेभ्यइंद्रियाणांनिवर्तनंसमृद्धंपुष्कलमपिकेवलंतपएवऊर्ध्वंऊर्ध्वगतिप्रदंभवतिनज्ञानवदिहैवकृतकृत्यतामापादयतीत्यर्थः केषामित्यतआह सत्त्वादिति येसत्त्वात्धैर्यात्च्यवंते तीव्रवैराग्याभावात् तेषांचसंकल्पेनब्राह्मलौकिकान्दिव्यान्भोगान्भोक्ष्येइत्येवंरूपेणसमाहितंसंभूतंतपोभवतितेषामेवोर्ध्वगतिर्भवतीत्यर्थः ॥ १५ ॥ यतःसंकल्पात्यज्ञाःप्रवर्धंते तस्यैवसत्यस्यसंकल्पस्यावधारणात् संकल्पादेवास्यपितरःसमुत्तिष्ठंतीतिश्रुतेर्योगीसत्यसंकल्पोभवति अन्यस्यएकस्ययज्ञःमनसैवभवति सत्यसंकल्पत्वात् तथाश्रुपाख्यायतेत्रितोनाममुनिर्भात्राकूपेपातितःसन्तत्रैवमनसाकृत्स्नंयज्ञंचकारेति त्रितःकूपेवहितोदेवान्हवतऊतयेइतिमंत्रवर्णाच्चैतद्गम्यते अवहितोध्यायन् हवतेआह्वयति ऊतयेरक्षंतत्यै अन्यस्यमध्यमस्यवाचैवब्रह्मयज्ञजपादिनायज्ञोभवति अन्यस्यप्राकृतस्यकर्मणाआज्यपशुपुरोडाशीयादिप्रधानयाकियया ॥ १६ ॥

संकल्पेति सगुणब्रह्मवेदनात्सत्यसंकल्पंपुरुषंअसंकल्पश्चिदात्माऽधितिष्ठतिभृत्यमिवराजा ननुअतएवचानन्याधिपतिरितिविदुषःसत्यसंकल्पत्वादेवअनन्याधिपतित्वंकथंसूत्रितं ईश्वरांतराभिप्रायेणेतिगृहाण तथाचश्रुतिः तस्यहनदेवाश्चनाभूत्याईशतआत्माह्येषांसभवतीति देवाश्चनदेवाअपिहप्रसिद्धंतत्यब्रह्मविदःअभूत्यैअनैश्वर्यायनईशतेनसमर्थाभवंति तत्रहेतुः आत्माहीति इतिश्रुत्यर्थः किंचअन्यद्पिमेमत्तःशृणु तदेवाह ब्राह्मणस्यनिर्गुणब्रह्मविदःसंकल्पविशेषेणअसंकल्पोधितिष्ठति सगुणोपासकापेक्षयानिर्गुणविदितत्यसंकल्पत्वादिकमतिशयेनाविर्भवतीत्यर्थः ॥ १७ ॥ एतद्योगशास्त्रंअध्यापयेत्शिष्यान् याहयेत् यतःयशस्यंयशसेब्रह्मणेतत्प्राप्तेहितं इतोन्यत्शास्त्रंवाचोविकाराएव एतच्चकवयोवदंति योगेयोगिनिदधीनंसर्वमित्यर्थः येतत्तंयोगंविदुः शेषंस्पष्टं ॥ १८ ॥ कर्मणासत्यंब्रह्मनजयेत्तूनप्रामुयात् यत्जुहुयात्यत्यजेद्वाएतेनहोमयागात्मकेनकर्मणाबालःअविद्वान्अमृत्युंमोक्षंनजयतिनप्राप्नोति रतिंआनंदं लभतिलभते ॥ १९ ॥ तूष्णीमित्यर्धेव्याख्यातः स्तुत्याप्रीतिर्निंदयारोषंचवर्जयेत् ॥ २० ॥ अत्रेति हेक्षत्रियवेदेषुपूर्वोक्तदृष्टिभेदेषुआनुपूर्व्येणआरोपव्यामिश्रापवादक्रमेणतिष्ठन्अत्रैवब्रह्मपश्यतिआविर्शतितादात्म्यंचमहाकाशघटाकाशन्यायेनउपाधिविलयात्मामोतिनस्माद्दृष्टार्थानंतफलाच

संकल्पसिद्धंपुरुषमसंकल्पोधितिष्ठति ॥ ब्राह्मणस्यविशेषेणकिंचान्यदपिमेशृणु ॥ १७॥ अध्यापयेन्महदेतद्यशस्यंवाचोविकाराःकवयोवदंति॥अस्मिन्योगे सर्वमिदंप्रतिष्ठितंयेतद्विदुरमृतास्तेभवंति ॥ १८ ॥ नकर्मणासुकृतेनैवराजन्सत्यंजयेज्जुहुयाद्वायजेद्वा ॥ नैतेनबालोऽमृत्युमभ्येतिराजन्रतिंचासौनलभत्यंतकाले ॥ १९ ॥ तूष्णीमेकउपासीतचेष्टेतमनसापिन ॥ तथासंस्तुतिर्निंदाभ्यांप्रीतिरोषौविवर्जयेत् ॥ २० ॥ अत्रैवतिष्ठन्क्षत्रियब्रह्माविशतिपश्यति॥वेदेषुचानुपूर्व्येणएतद्विद्वन्ब्रवीमिते ॥ २१ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिसनत्सुजातपर्वणिसनत्सुजातवाक्येपंचचत्वारिंशोऽध्यायः ॥ ४५ ॥ ॥ ७ ॥ ॥ ७ ॥

सनत्सुजातउवाच ॥ ॥यत्तच्छुक्रंमहज्ज्योतिर्दीप्यमानंमहद्यशः ॥ तद्देदेवाउपासंतेतस्मात्सूर्योविराजते ॥ योगिनस्तंप्रपश्यंतिभगवंतंसनातनम् ॥ १ ॥

ब्रह्मविद्याऽदृष्टार्थात्विनाशिफलात्कर्मणःश्रेयसीतिज्ञात्वाज्ञानार्थमेवयतेतेतितुभ्यंब्रवीमि॥२१॥ ॥इतिउद्योग॰नैलकंठीयेभारतभा॰पंचचत्वारिंशोऽध्यायः॥४५॥ ॥७॥ ॥पूर्वाध्यायेनमनसापिनचेष्टेतेत्युक्तंतन्मनसश्चेष्टाराहित्येसतिमहताब्रह्मचर्यादियत्नेनशून्यशेषतैवसाधिताभवतीत्याशंक्यशून्यवदेवनिर्धर्मकंशून्यभावस्यापिप्रकाशकंसद्ब्रह्मप्रत्यगभिन्नत्वेनज्ञेयमस्तीत्यस्मिन्नर्थेमंत्रानुदाहरतियोगिप्रत्यक्षंचपुनःपुनःप्रमाणत्वेनोपन्यस्यति यत्तच्छुक्रमित्यादिनाऽध्यायेन यत्तच्छुक्रंबीजमिववीजंविश्वोत्पत्त्यादिमूलकारणंसर्वचेष्टाप्रवर्तकंआनंदरूपं महत्वृत्तिरूपोपाधिशून्यं ज्योतिर्ज्ञप्तिमात्रं दीप्यमानंसूर्यादिरूपेण महद्यशोनामकं तदेवदेवाइंद्रियाणिउपासतेअनुसरंति तस्मादेवमूलकारणात्सूर्योजगत्प्रसवधर्मामायोपाधिरीश्वरोविराजते तथाचश्रुतयः आनंदाद्ध्येवखल्विमानिभूतानिजायंते आनंदेनजातानिजीवंति आनंदंप्रयंत्यभिसंविशंतीति कोह्येवान्यात्कःप्राण्यात् यदेषआकाशआनंदोनस्यात् येनसूर्यस्तपतितेजसेद्धः नतस्येशेकश्चनतस्यनामहद्यशः नप्राणेननापानेनमर्त्योजीवतिकश्चन इतरेणतुजीवंतियस्मिन्नेतावुपाश्रितौ प्राणस्यप्राणमुतचक्षुषश्चक्षुरित्यादयः तंपरमात्मानंयोगिनःचित्तवृत्तिनिरोधेनभगवंतंसर्वैश्वर्यवंतंसंप्रज्ञाते असंप्रज्ञातेतुसनातनंअखंडैकरसं पश्यंतीतिसर्वत्रज्ञेयं योगेनैवंतं परमात्मानंपश्येन्नान्यथा यथाह्यदक्षः स्वसंवेद्यंहितद्बलकुमारीस्त्रीसुखंयथा अयोगीनैवजानातिजात्यंधोहियथाघटमिति ॥ १ ॥

अस्यैवमंत्रस्यविवरणार्थाउत्तरेमंत्राः शुक्रात्आनंदात् तंप्राप्येत्यर्थः ब्रह्मजगतोबृंहकंपरमव्योमाख्यंअव्याकृतंवाऽवस्तुसदपिचैतन्यप्रतिबिंबंप्राप्यप्रभवतिजगज्जन्मादिकार्येसमर्थंभवति तेनैवचवर्धते अ तस्तच्छुक्रंज्योतिषांसूर्यादीनांमध्येऽतःस्थित्वातपतिप्रकाशते तथाचगीता यदादित्यगतंतेजोजगद्भासयतेऽखिलं यच्चंद्रमसियच्चाग्नौतत्तेजोविद्धिमामकमिति अतश्चअन्येनाप्रकाशितंस्वयंज्योतिरित्यर्थः ता पनंसूर्यादीनामपिभयप्रदं भीषास्माद्वातःपवते भीषोदेतिसूर्यः भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावतिपंचमइतिश्रुतेः ॥ २ ॥ अपइति सलिलस्यसलिलमिवसलिलंएकरसंब्रह्मसलिलएकोद्रष्टाऽद्वैतोभवतीतिश्रु तिप्रसिद्धं तस्यमध्येस्थिताभ्योऽद्भ्यःअबुपलक्षितेभ्यःपंचमहाभूतेभ्यःसकाशाद्यत्पन्नाःअपःपांचभौतिकंदेहंअंतरिक्षेहृदयाकाशेशिश्रियातेश्रयतेः कौ उर्मौदेवौचिद्रूपत्वेनद्योतमानौजीवेश्वरौसुभिप्रलय योःकर्मणतंद्रावंतौनाभ्यामन्यःअतंद्रितःनिर्मायःसवितुःजगत्कारणस्यविवस्वान् वसआच्छादने वस्वान्आच्छादनवान्तद्विपरीतोऽविवस्वान्अपरिच्छिन्नसंविद्रूपःसंततमनुदिनानस्तमितप्रकाशःसर्वाधिष्ठा नभूतःउर्मौजीवेश्वरौपृथिवींदिवंचबिभर्ति आसप्रीचीःसविषूचीर्वसानाविनिपाठेसंःशुकसंज्ञःशुद्धआत्मा कीदृशौउर्मीदेवौ सप्रीचीःविषूचीश्चआवसानौदिशःउपदिशश्चपठद्वद्वसानौ दिगंतपर्यंतंविस्तीर्णा

शुक्राद्ब्रह्मप्रभवतिब्रह्मशुक्रेणवर्धते ॥ तच्छुक्रंज्योतिषांमध्येऽतप्तंतपतितापनम्॥योगिनस्तं० ॥२॥अपोयअग्रःसलिलस्यमध्येउर्मौदेवौशिश्रियातेऽतरिक्षे ॥ अतंद्रितःसवितुर्विवस्वानुर्मौबिभर्तिपृथिवींदिवंच ॥ योगिनस्तंप्रपश्यंतिभगवं० ॥३॥उर्मौचदेवौपृथिवींदिवंचदिशःशुक्रोभुवनंबिभर्ति॥तस्माद्दिशःसरि तश्चस्रवंतितस्मात्समुद्राविहितामहांताः॥ योगिनस्तं० ॥४॥ चक्रेरथस्यतिष्ठतोऽध्रुवस्याव्ययकर्मणः॥ केतुमंतंवहंत्यश्वास्तंदिव्यमजरंदिवि ॥ योगिनस्तं० ॥५॥नसादृश्येतिष्ठतिरूपमस्यनचक्षुषापश्यतिकश्चिदेनं॥ मनीषयाथोमनसाऽदाचयएनंविदुरमृतास्तेभवंति ॥ योगिनस्तंप्रपश्यंतिभगवंतंसनातनम्॥६॥

वित्यर्थः व्यवहिताश्चेतिलोंदसंक्रियोपसर्गयोर्व्यवधानं शेषंप्राग्वदेव ॥ ३ ॥ एतदेवाह उर्माविति देवौजीवेश्वरौपृथिव्यादिकंभुवनंब्रह्मांडंशुक्रोबिभर्ति तस्मात्सर्वोत्पत्तिमाह तस्मादिति महान्दुरधिगमों ऽतोयेषांतेमहांताः समुद्राःकामाः कामंसमुद्रमाविशेतिमंत्रलिंगात् ॥ ४ ॥ चक्रेइति रथस्यशरीरस्य रथःस्यंदनेदेहयोरितिविश्वः अध्रुवस्यविनाशिनोऽप्यव्ययंअविनाशिकर्मयस्यतस्यअव्ययकर्मणः च केचकवच्चालकेप्राक्कर्मणिनिमित्तेसतितिष्ठंतःकर्माधीनाइत्यर्थः अश्वाःइंद्रियाणिशरीररथंविषयदेशंप्रतिनयंतःकेतुमंतंप्रज्ञावंतंजीवं किज्ञानेऽस्मात्तुतंपरमात्मानंप्रतिवहंति वहंतिर्द्विकर्मा वश्यैरिंद्रिया श्वैर्देहरथेयोजितैःजीवःपरमात्मतांनीयते अन्यथाशरीरेनष्टेपितल्कृतंकर्मनक्षीयतेऽतःशरीरांतरेणसएवबध्यते दिव्यंअलौकिकंअहंप्रत्ययविषयादन्यमशनायाद्यतीतमित्यर्थः अजरमितिसर्वविकारप्रति षेधः दिविहार्दाकाशे ॥ ५॥ अस्यरूपंआकृतिःसादृश्येनतिष्ठति अनुपमस्वरूपमित्यर्थः नचक्षुषेतिसर्वेंद्रियगोचरत्वंनिषिध्यते अशब्दमस्पर्शमरूपमव्ययमितिरूपादिहीनत्वश्रुतेः मनीषयामननसोनिपूर्वेण मनसासूक्ष्मेणमनसैवानुद्रष्टव्यमितितस्यकरणत्वश्रुतेः ऋदाऋदुपलक्षितेदेशेनिगृहीतेनमनसायेएनंविदुःतेअमृताःमुक्ताभवंति ॥ ६ ॥

तदवेदनेसंसारानुच्छेदमाह द्वादशेति द्वादशसंख्याःपूगाःसमुदायायस्यांतांद्वादशपूगांतेच चित्तादिपूगःस्मरणादिपूगःश्रोत्रादिपूगःश्रवणादिपूगः वागादिपूगोवचनादिपूगःशब्दादिपुगोवियदादिपूगः १ प्रा णादिपूगःश्वसनादिपूगःसंस्कारपूगःसुकृतादिपूगः एतैर्महापूगवैरविद्यानद्यामधश्चोपरिचैतिजीवः २ तादृशीनित्यप्रवाहवतीसरितमविद्याख्यांपिबंतस्तत्कृतैरिष्टैःपुत्रपश्वादिभिर्लब्धैस्तृप्यंतःदेवैश्चक्षुरादीना मनुग्राहकैःसूर्यादिभिस्तत्तद्विषयदर्शनद्वारेऽनेकसंस्कारसंततिंसंतन्वानैःरक्षितादेवरक्षितां तेजीवाःतस्याअविद्यानद्याःमधुपुत्रपश्वादिकंमधुरंफलंईक्षंतःपश्यंतस्तछिसयाइहशुक्राख्येधिष्ठानेभासमानां घोरांमहाभयंकरांसंचरंतिऊर्ध्वाधोमार्गेषुपुनःपुनरावर्ततइत्यर्थः इहयत्राधिष्ठानेसंचरंतिंपरमेश्वरंयोगिनःपश्यंति ॥७॥ ननुइहकृतस्यकर्मणःकृत्स्नस्यअमुत्रैवभोगात्कर्मशेषाभावेकुतःपुनरावृत्तिःकिंतुमु क्तिरेवभवतीत्याशंक्याह तदर्धेति तत्मधुकर्मफलंअर्धमासंअर्धमासश्चंद्रोयस्मिन्भोग्यत्वेनतत्अर्धमासंभवति तथाहि तेषांसोमोराजान्नंतंदेवाभक्षयंतीतिश्रुत्याऽमुत्रगत्वादेवभावंप्राप्याइष्टादिकारिणः सोमस्थममृतंपिबंतीतिदर्शितं तथाचभ्रमरोजीवःइतस्ततोभ्रमणशीलःअमुत्रसोमरूपमर्धकर्मफलंभुंक्तेशेषेणात्रावर्ततइत्यर्थः संचिंत्येत्यनेनआमुष्मिकफलभोगानंतरंऐहिकफलभोगवासनाप्यस्तीतिसूचि

द्वादशपूगांसरितंपिबंतोदेवरक्षितां॥ मध्वीक्षंतश्चेततस्याःसंचरंतीहघोराम्॥योगिनस्तंप्रप०॥ ७॥ तदर्धमासंपिबतिसंचिंत्यभ्रमरोमधु॥ईशानःसर्वभूतेषुह विर्भूतमकल्पयत्॥ योगिनस्तं० ॥८॥ हिरण्यपर्णमश्वत्थमग्निपद्यत्यपक्षकाः॥ तेतत्रपक्षिणोभूत्वाप्रपतंतियथादिशम्॥योगिनस्तंप्रपश्यंतिभगवंत० ॥९॥

तं द्विविधंहिकर्म किंचिदामुष्मिकफलंकिंचिदैहिकफलं तत्रैकंभुक्त्वाइतरार्थमत्रावतरतीतिश्लिष्टं श्रुतिश्च यावत्संपातमुषित्वाऽथैतमेवाध्वानंपुनर्निवर्ततेतद्यइहरमणीयचरणाअभ्याशोहतेरमणीयांयोनि मापद्यंतेकपूयचरणाःकपूयांयोनिमापद्यंतइत्याह संपातःकर्म चरणंकर्मशेषः अभ्याशोहशीघ्रमेवेतिश्रुतिपदानामर्थः यएवंविधोजीवःसएवईशानःअंतर्यामीसर्वभूतेषुतिष्ठति सएवचहविर्भूतंहविर्भिःसि द्धंयज्ञंचकल्पितवान् वेदस्यवैदिकमार्गस्यचप्रवर्तकइत्यर्थः एतेनत्वंपदार्थस्यतत्पदार्थाभेदउक्तः योयज्ञंअकल्पयत्तंयोगिनःपश्यंति ॥ ८ ॥ ननुईश्वरस्यजीवभावेकिंकारणमतआह हिरण्येति हिरण्या निहरणशीलानिआपातरमणीयत्वात्पर्णानीवपर्णानिअवयवाःस्त्रीपुत्रादयोयस्यतंहिरण्यपर्णंअश्वत्थंनश्वोपितिष्ठतीत्यश्वत्थोनश्वरःअविद्यादृक्षःतमग्निपद्यप्राप्यअपक्षकाःनसंतिपक्षाःउत्क्रमणहेतवउपा धयःप्राणरूपायेषांतेचिदात्मानःतत्रअविद्यायांपक्षिणोभूत्वाप्राणाद्युपाधिप्राप्याउत्क्रमणयोग्याभूत्वायथादिशंयथावासनंप्रपतंतितासुनासुयोनिष्वित्यर्थात् बहुवचनंऔपाधिकरूपभेदापेक्षया श्रूयतेच प्राणोपाधिकमुत्क्रमणंचिदात्मनःप्रश्नोपनिषदि षोडशकलंपुरुषंप्रस्तुत्यसईक्षांचक्रेकस्मिन्वहमुत्क्रांतेउत्क्रांतोभविष्यामिकस्मिन्वाप्रतिष्ठितेप्रतिष्ठास्यामीतिसप्राणमसृजतेति ॥ ९ ॥

एवंईश्वरस्यापिजीवत्वेउपाधिसंबंधएवकारणमित्युक्तं तत्रकिंउपाधिभिःकृत्स्नंब्रह्मउपाधीयतेउतब्रह्मणोंऽशाएवोपधीयंते आद्येजीवबहुत्वानुपपत्तिः अंत्येब्रह्मणोनिष्कलत्वानुपपत्तिः अंशस्यांशित्वा योगाज्जीवेशयोरभेदानुपपत्तिश्चेत्याशंक्याह पूर्णादिति पूर्णात्व्यापकात्चिदाकाशात्पूर्णानिचित्प्रतिबिंबभूतानिजीवरूपाणिउद्धरंतिपृथक्कुर्वंति प्राणादयउपाधिदर्पणाः ननुउपाधीनांपृथक्सत्त्वेपूर्णस्य पूर्णत्वमेवव्याहन्येतेत्याशंक्याह पूर्णादिति पूर्णानिप्राणादीनिपूर्णादेवचक्रिरेकृतानि अयंभावः घटाकाशन्यायेनोपाध्युपधेययोःपरस्परपरिच्छेदकत्वेन्यतरस्यापिपूर्णत्वंनयुज्यतेऽतउपाधिरप्यध्यस्तएव तथाचाधिष्ठानाध्यस्तयोर्विषमसत्ताकत्वान्नपरस्परपरिच्छेदकत्वंकिंत्वितरेतरतिरोधायकत्वमेवास्तीतिस्वस्वप्रतीतिकालेद्वयोरपिपूर्णत्वं प्रतियोगिनस्तदानीमदर्शनात् कल्पितउपाधिर्जीवेश्वरभेदेहेतुरित्य र्थः यदातुपूर्णानिप्राणादीनिब्रह्मण्यध्यस्तानिततःसकाशात्हरंतिसम्यगवेक्षणेनदूरीकुर्वंतिरज्जुतइवसर्पंतदाजीवेशभेदनिमित्तस्योपाधेरभावात्पूर्णंब्रह्मैवावशिष्यते यथोक्तंविष्णुपुराणे विभेदजनकेऽज्ञाने नाशमात्यंतिकंगते आत्मनोब्रह्मणाभेदमसंतंकःकरिष्यतीति एवंचअंशांशित्वरूपेणजीवेशयोर्भेदानुपगमादनुपचरितस्तयोरभेदप्रतिपादकस्तत्त्वमस्यहंब्रह्मास्म्ययमात्माब्रह्मेत्यादिरागमइतिसिद्धं यत्पूर्णं शिष्यतेतंभगवंतंयोगिनःपश्यंति॥१०॥तस्मात्पूर्णात् वायुरितिपंचानामपिभूतानामुपलक्षणं तस्माद्वाएतस्मादात्मनआकाशःसंभूतः आकाशाद्वायुः वायोरग्निः अग्नरापः अद्भ्यःपृथिवीतिततएवसर्वभूतोद्भव

पूर्णात्पूर्णान्युद्धरंतिपूर्णात्पूर्णानिचक्रिरे॥ हरंतिपूर्णात्पूर्णानिपूर्णमेवावशिष्यते॥योगिनस्तंप्रपश्यंतिभगवंतंसनातनम्॥१०॥तस्माद्वैवायुरायातस्तस्मिंश्चप्र यतःसदा॥ तस्मादग्निश्चसोमश्चतस्मिंश्चप्राणआततः॥ ११॥ सर्वमेवततोविद्यात्तत्तद्वक्तुंनशक्नुमः॥ योगि०॥ १२॥ अपानंगिरतिप्राणःप्राणंगिरतिचंद्र माः॥ आदित्योगिरतेचंद्रमादित्यंगिरतेपरः॥ योगि०॥१३॥ एकंपादंनोत्क्षिपतिसलिलाद्धंसउच्चरन्॥ तंचेत्संततमूर्ध्वायनमृत्युर्नामृतंभवेत्॥योगि०॥१४॥

श्रुतेः प्रयतःनिगृहीतः एतेनतत्रैवलयंदर्शयतातदुपादानकत्वंभूतानामुक्तं अग्निर्भोक्ता सोमोभोज्यं प्राणइतिदेहेंद्रियादिसंघातग्रहणम्॥११॥ इदंसर्वंततएवआततंतस्माज्जातं तत्आत्मत्वेनप्रसिद्धं तत्तच्छ ब्दवाच्यं तदितिवाएतस्यमहतोभूतस्यनामभवतीतिश्रुतिप्रसिद्धेः वक्तुंनशक्नुमः वाचामगोचरंतंयोगिनःपश्यंति॥१२॥इदानींतद्दर्शनाभ्युपायंयोगंसंक्षेपेणाह अपानमिति गिरतिउपसंहरतिस्वात्मनियोगशा स्त्रोक्तरीत्या पार्ष्णिनागुदमापीड्यदंतैर्दंतानसंस्पृशन् दृढासनोऽपानवायुमुन्नयेच्चशनैःशनैः तंप्राणेनैकतांनीत्वास्थिरंकृत्वाहृदंबरे चेतोमात्रेणतिष्ठेतत्तच्चबुद्धौविलापयेत् चंद्रमाअत्रमनः आदित्योबुद्धिःपरः परमात्मा एवंयआदित्यंगिरतितंयोगिनःपश्यंति ॥ १३ ॥ ननुनित्यापरोक्षंब्रह्मयत्साक्षदपरोक्षादितिश्रुतेः अतःकिंयोगेनेत्याशंक्याह एकमिति हंसइवहंसःपरमात्माशरीरवृक्षमारूढोपितेनअसंबद्धःसच तुष्पात् सोयमात्माचतुष्पादितिश्रुतेः चतुर्णांपादानांजाग्रत्स्वप्नसुषुप्ततुरीयाख्यानांमध्येएकंपादंतुरीयंनोत्क्षिपतिनप्रकाशयति कीदृशः सलिलात्निर्विशेषात्अतिगंभीरात्उच्चरन्उपर्येवपादत्रयेणचरन्तं तुरीयंपादंशिवमद्वैतंचतुर्थंमन्यंतेसआत्मासविज्ञेयइतिश्रुतिप्रसिद्धं ऊर्ध्वायउपरितनायपादत्रयायविश्वतैजसप्राज्ञाख्यायतेषांचालनायेत्यर्थः संततंव्याप्तं तुरीयंत्रिषुसंततमित्युक्तेः नहिचैतन्यानुबंधंविना विश्वादयःस्वकार्येप्रभवंतितंचेत्पश्यतितदामृत्युरमृतंचअज्ञानकृतंद्वयंसतिज्ञानेकालत्रयेपिनास्तीत्यर्थः यद्यपिनित्यापरोक्षंब्रह्मतथापिउपाधिविशिष्टेनैवरूपेणपरोक्षंनतुततोनिष्कृष्टरूपेणातस्तदापरोक्ष्या ययोगोपेक्षितइत्यर्थः सततमृत्विजमितिपाठेऋत्विग्वत्पादत्रयक्रियानिमित्तमित्यर्थः ॥ १४ ॥

अंगुष्ठेति अंगुष्ठमात्रेहृदयेप्रतिष्ठितत्वादंगुष्ठमात्रः एतेनहृदयपुंडरीकंध्यानस्थलमुपदिष्टंभवति पुरुषःपूर्णःअंतरात्माबाह्यात्मभ्योन्नमयादिभ्यःपंचभ्यआंतरः लिंगस्यपंचप्राणमनोबुद्धिदशेंद्रियात्मकस्यलिं गशरीरस्यसंबंधेननित्यंसयातिइहलोकपरलोकौजाग्रत्स्वप्नौवागच्छति तंईशंयमयितारं ईड्यंस्तुत्यं अनुकल्पंउपाधिमनुसर्वकार्येषुसमर्थं आद्यंमूलकारणंविराजमानंप्रत्यक्चैतन्यरूपेणप्रकाशमानमपिमू ढाःनपश्यंति तंयोगिनःपश्यंति॥१५॥ नन्वंगुष्ठमात्रस्यहृदयेस्थितस्यहृदयतापेनतापप्राप्तिरपिस्यात्तथाचतापस्वभावस्यकुतोमुक्तिरित्याशंक्यतस्यकदाचिदपितापोनास्तीत्याह असाधनाइति मानुषेषुसंघा ताभिमानिषुजीवेषुकेचिदसाधनाःशमादिहीनाःकेचित्ससाधनास्तद्युक्तावाभवंतु तत्स्थंएतद्ब्रह्मसमानंनिर्विकारं असंगोह्ययंपुरुषइत्यसंगत्वश्रुतेः एवंमुक्तबद्धयोरपीत्याह समानमिति कस्तर्हिमुक्तेषुविशेष इत्यतआह मुक्ताइति तत्रतेषुमध्येमुक्ताःमध्वःमधुनःब्रह्मरसस्यउत्संउत्कर्षंपरांकाष्ठांसमापुःसंप्राप्ताः अयंभावः अवस्थांतरगतस्यदुःखस्यावस्थांतरेऽदर्शनादुपाधिधर्मएवदुःखंभ्रांत्याउपहितेपिभातिस्फटि केइवजपाकुसुमलौहित्यंसर्वात्मनाउपाधित्यागात्तुमुक्तानांनदुःखस्पर्शोऽस्तीतितेनिरतिशयानंदभाजइति यएवंसमानस्तंयोगिनःपश्यंति ॥ १६ ॥ एवंब्रह्मप्राप्तौसर्वफलावाप्तिंकृतकृत्यतांचाह उभाविति उभौलोकौआत्मलोकंअनात्मलोकंचविद्ययाब्रह्माकारयाअंतःकरणवृत्त्याअहमेवेदंसर्वोस्मीतिसार्वात्म्याकारयाचवृत्त्याव्याप्यप्रकाश्यज्ञात्वायातिप्रारब्धकर्मावष्टब्धदेहःसन्संचरतिविद्वान् यदैवंतदाअ

अंगुष्ठमात्रःपुरुषोंतरात्मालिंगस्ययोगेनसयातिनित्यम्॥तमीशमीड्यमनुकल्पमाद्यंपश्यंतिमूढानविराजमानं॥योगिनस्तं०॥ १५॥ असाधनावापिससाध नावासमानमेतद्दृश्यतेमानुषेषु॥ समानमेतदमृतस्येतरस्यमुक्तास्तत्रमध्वउत्संसमापुः॥ योगिनस्तं०॥ १६॥ उभौलोकेविद्ययाव्याप्ययातितदाहुतंचाहुतम ग्निहोत्रम्॥ मातेब्राह्मीलघुतामादधीतप्रज्ञानंस्यान्नामधीरालभंते॥ योगिनस्तंप्रपश्यं०॥ १७॥ एवंरूपोमहात्मासपावकंपुरुषोगिरन्॥ योवैतंपुरुषंवेदतस्ये हार्थोनरिष्यते॥ योगिनस्तं०॥१८॥ यःसहस्रंसहस्राणांपक्षान्संतत्यसंपतेत्॥मध्यमेमध्यआगच्छेदपिचेत्स्यान्मनोजवः॥ योगिनस्तंप्रपश्यं०॥ १९॥

हुतमप्यग्निहोत्रंअस्यहुतमेवभवति ज्ञानेसर्वाणिकर्मफलान्यंतर्भवंतीत्यर्थः अतःब्राह्मीवाक्तेतवअहंमहानस्मीतिवदतःलघुतांनीचत्वंमादधीतमाकरोतु अहंदासोस्मीतिमाब्रूहीत्यर्थः तंचेद्वयुरतिवाद्यसीत्य तिवाद्यस्मीतिब्रूयान्नापह्नुवीतेतिश्रुत्यैवब्रह्मविदामतिवादित्वदोषोनास्तीतिप्रदर्शितं प्रज्ञानमितिअस्यनामैवस्यात्प्रज्ञानंब्रह्मेतिब्रह्मविद्ब्रह्मैवेतिचश्रुतिभ्यां ब्रह्मणाविद्वद्रूपेणस्वमाहात्म्यंनगोपनीयमधिकारि ष्वेव प्राकृतेषुतुगोपनीयमेव तथाचरेतवैयोगीसतांधर्ममदूषयन् जनायथावमन्येरन्गच्छेयुर्नैवसंगतमिति एतच्चप्रज्ञानमितिनामधीराःध्यानवंतएवलभंते यस्यनामप्रज्ञानंतंयोगिनःपश्यंति॥१७॥एवंरूपोवा ङ्मनसातीतोजगज्जन्मादियोनिर्निर्विकारोयोगैकगम्योयज्ज्ञानान्महापूज्यत्वंलभ्यतेकर्मलोपदोषश्चनास्तिसएवंरूपःपरमात्मापावकंभोक्तारंजीवंगिरन्आत्मनिसंहरन्पुरुषंपूर्णंतंयोवेदतस्यअर्थःपुरुषार्थो मोक्षोनरिष्यतेनहिंस्यते कर्मफलवत्ज्ञानफलंनानित्यमित्यर्थः यस्यज्ञानादर्थनाशोनास्तितंयोगिनःपश्यंति॥१८॥नकेवलंमोक्षएवज्ञानतःस्यात्अपितुसर्वंदूरस्थमपिआत्मन्यंतर्भूतमेवास्तीत्याह यइति दश लक्षाणिअनंतान्वापक्षान्कृत्वायोदूरेगच्छेत्सोपिमध्येशरीरांतःमध्यमेमध्यस्थेहृदयस्थेपरमेश्वरेआगच्छेदेव विप्रकृष्टमप्यर्थंहार्दाकाशेयोगिनःपश्यंतीत्यर्थः एतच्चातीतानागतादेरप्युपलक्षणं तथाचहार्दा काशंप्रकृत्यश्रूयते यच्चास्येहास्तियच्चनास्तिसर्वंतदत्रगत्वाविंदतइति यत्रदूरस्थोप्यस्तितंयोगिनःपश्यंति ॥ १९ ॥

एवंविधस्यात्मनोदर्शनार्थंयोगानुगुणानिसाधनांतराण्याह नेति चक्षुराद्यग्राह्यंएनंशुद्धचित्ताएवचित्तेनगृह्णंतीतिपूर्वार्धार्थः किंच यदायंहितःजगन्मित्रंमनीषीमनोनिग्रहशीलश्चभवतितथामनसाचपुत्रादीनांनाशेसत्यपिनतप्यतेतदैवचित्तशुद्धिर्जातेतिज्ञेयं एवंज्ञात्वायेप्रव्रजेयुःविक्षेपहेतून्गृहादींस्त्यजेयुस्तेसंन्यासिनःअमृताभवंतीति तंअमृतंयोगिनःपश्यंति ॥२०॥ संन्यासंकृत्वापिवंचकानांसंगतिर्नकर्तव्येत्याह गूहंतीति मर्त्याःकौलिकाःस्वशिक्षयास्वेषांगुरूणांशिक्षयास्वेनवृत्तेनवाबहिर्दृष्टीनांरमणीयेनचदंभरूपेणगह्वराणिपापानिमद्यमांसपरस्त्रीसेवनादीनिगूहंतिछादयंति यथासर्पाःखलाःपरमुद्वेजयंतोपिबिलादौनिलीयआत्मानंगूहंतितद्वत् तेषुबाह्यतोरमणीयेषुतेषांसमीपेविमूढाःजनाःमुह्यंति एतदेवाह यथाऽध्वानंमार्गमनतिक्रम्यशिष्टानांलोकदृष्टमाचारमत्यजतःभयायनरकायप्रापयितुंतान्मोहयंतेमद्यमांसाद्यशुचिव्रतोपदेशेनप्रतारयंति अतःसम्यक्परीक्षितैःसहैवसंगतिर्यल्लाभायकर्तव्यातंयोगिनःपश्यंति ॥ २१ ॥ एवंसर्वकर्मास्पर्शिनांयोगिनामपिदुःसंगत्यागमावश्यकतयोक्त्वाजीवन्मुक्तानांतेषामनुभवमनुवदति नाहमिति अहंसदाकालत्रयेपिअसत्कृतःअसतादेहेंद्रियादिनातादात्म्याध्यासेनतद्वत्कृतःसुखदुःखजरामरणादिधर्मवान्कृतःअसत्कृतःनस्यांनभवेयंदेहादीनामसत्त्वादेवेत्यर्थः अतएवदेहवियोग

नदर्शनेतिष्ठतिरूपमस्यपश्यंतिचैनंसुविशुद्धसत्त्वाः॥ हितोमनीषीमनसानतप्यतेयेप्रव्रजेयुरमृतास्तेभवंति॥ योगिनस्तं०॥ २०॥ गूहंतिसर्पाइवगह्वराणिस्वशिक्षयास्वेनवृत्तेनमर्त्याः॥ तेषुप्रमुह्यंतिजनाविमूढायथाध्वानंमोहयंतेभयाय॥ योगिनस्तं०॥ २१॥ नाहंसदाऽसत्कृतःस्यांनमृत्युर्नचामृत्युरमृतंमेकुतःस्यात्॥ सत्यानृतेसत्यसमानबंधेसतश्चयोनिरसतश्चैकएव॥ योगिनस्तं०॥ २२॥ नसाधुनानोतअसाधुनावाऽसमानमेतद्दृश्यतेमानुषेषु॥ समानमेतदमृतस्यविद्यादेवंयुक्तोमधुतद्वैपरीप्सेत्॥ योगिनस्तं०॥ २३॥

रूपोमृत्युरपिनास्तिनापिअमृत्युस्तद्विरोधीजन्मलाभःजन्ममरणप्रवाहरूपस्यमृत्युसंज्ञितस्यबंधस्याभावात् अमृतंमोक्षोपिममकुतःनकुतश्चिदित्यर्थः तत्रहेतुः सत्यंघटादिअमृतंरज्जूरगादितेउभेअपिसत्यसमानबंधेसत्यंअबाधितंसमानंसर्वदासर्वदेशेषुचैकरूपंब्रह्मतदेवबंधोनिग्रहस्थानंययोस्तेतथा सर्वंजगद्ब्रह्माधीनमित्यर्थः सतःकार्यस्यअसतःकारणस्यचयोनिःउत्पत्तिप्रलयस्थानंअहंएकएवतंमांयोगिनःपश्यंति तथाचश्रुतिः ननिरोधोनचोत्पत्तिर्नबद्धोनचसाधकः नमुमुक्षुर्नवैमुक्तइत्येषापरमार्थतेतिसृष्ट्यादिकंसर्वंमय्येवकल्पितमित्याह ॥२२॥ सनसाधुनाकर्मणाभूयान्नोएवासाधुनाकनीयानितिश्रुतिसिद्धंकर्मास्पर्शंब्रह्मविद्याफलमाह नसाधुनेति असाधनावापिससाधनावेत्यत्रब्रह्मणःअसंगत्वमुक्तंइहतुब्रह्मविदःपापास्पर्शउच्यते एतद्ब्रह्मचिद्रूपंब्रह्मसाधुनाकर्मणासमानंउत्कृष्टंनभवति उतअपिअसाधुनाकर्मणाऽसमानंअपकृष्टंचनभवति मानुषेषुदेहाभिमानिषुतुएतत्दृश्यतएवउच्चावचंकर्मफलंनतथाब्रह्मविदीत्यर्थः अत्रहेतुः समानमिति एतद्ब्रह्मचिद्रूपंब्रह्मअमृतस्यकैवल्यस्यसमानंयथाकैवल्येसर्ववादिसंमतपुण्यपापयोरस्पर्शएवंब्रह्मविद्यपीत्यर्थः अतएवंपूर्वोक्तप्रकारेणयुक्तोयोगवान्तन्मधुब्रह्म बह्विति पाठेपिसएवार्थः निरवधिकस्यबहुत्वस्यतत्रैवपर्यवसानात् परीप्सेत्सर्वप्रकारेणप्राप्तुमिच्छेत् तमेवचयोगिनःपश्यंति ॥ २३ ॥

नास्येति अस्यआत्मविदःअतिवादाःनिंदावचनानिहृदयंनतापयंति अथवामयानाधीतंमयानहुतमित्यादिकमपि अस्यमनइतिपूर्वान्वयि श्रूयतेचनैनंकृताकृतेतपतइति एतंहवावनतपति किमहंसाधुनाकरवं किमहंपापमकरवमितिच ब्राह्मीब्रह्मसंबंधिनीयंविद्याअस्मैपुरुषायलघुशीघ्रंतांप्रज्ञां यामधिकृत्यस्मरति प्रज्ञाप्रासादमारुह्यह्यशोच्यःशोचतोजनान् भूमिष्ठानिवशैलस्थःसर्वान्प्राज्ञोनुपश्यतीति तांप्रज्ञामृतंभराख्यांआदधीतसमर्पयेत् आत्मवित्सर्वविद्भवतीत्यर्थः तांकां यांप्रज्ञांधीराःध्यानवंतोनामनिश्चितंलभंतेनान्ये एतेनशोकमोहनिवृत्तिःसर्वज्ञत्वंचब्रह्मविद्याफलमुक्तंभवति यंनतापयंतितंविद्वदभिन्नंपरमेश्वरयोगिनःपश्यंति ॥ २४ ॥ एवमनेनप्रकारेणयःसर्वभूतेषुसद्रूपेणअनुस्यूतमात्मानंगुरूक्तिमनुपश्यतिध्यानेनसाक्षात्करोतिसःअन्यत्रदारादौअन्यत्रकर्मादौयुक्तेषुपुरुषांतरेषुसत्सुकिंशोचतिनैवशोचतिकिंतुतएवशोचंतीत्यर्थः॥ २५ ॥ उदकंपीयतेस्मिन्नित्युदपानेकासारादौतृषार्तस्ययावताजलेनस्नानपानादिसिद्धिस्तावतैवसर्वेषुवेदेषुआत्मज्ञस्यध्यायिनइष्टसिद्धिः अतोग्रंथभारवहनंवृथैवकिंतु

नास्यातिवादाहृदयंतापयंतिनानधीतंनाहुतमग्निहोत्रम्॥ मनोब्राह्मीलघुतामादधीतप्रज्ञांचास्मैनामधीरालभंते॥ योगिनस्तंप्रपश्यंतिभगवंतंस०॥ २४॥ एवंयःसर्वभूतेषुआत्मानमनुपश्यति॥ अन्यत्रान्यत्रयुक्तेषुकिंसशोचेत्ततःपरम्॥ २५॥ यथोदपानेमहतिसर्वतःसंप्लुतोदके॥ एवंसर्वेषुवेदेषुआत्मानमनुजानतः॥ २६॥ अंगुष्ठमात्रःपुरुषोमहात्मानदृश्यतेसौहृदिसंनिविष्टः॥ अजश्चरोदिवारात्रमतंद्रितश्चसतंमत्वाकविरास्तेप्रसन्नः॥ २७॥ अहमेवस्मृतोमातापितापुत्रोस्म्यहंपुनः॥ आत्माहमपिसर्वस्ययच्चनास्तियदस्तिच॥ २८॥ पितामहोस्मिस्थविरःपितापुत्रश्चभारत॥ ममैवयूयमात्मस्थानमेयूयंनवोवयम्॥ २९॥ आत्मैवस्थानंममजन्मचात्माओतप्रोतोहमजरप्रतिष्ठः॥ अजश्चरोदिवारात्रमतंद्रितोहंमांविज्ञायकविरास्तेप्रसन्नः॥ ३०॥

तदंतर्गतंस्वोपयुक्तंसारमात्रंगुरुवाक्याद्गृहीत्वायोगेनकृतकृत्योभवेदित्यर्थः ॥ २६ ॥ अंगुष्ठेति उपाधितोल्पपरिमाणोपिस्वतोमहात्माव्यापकःनदृश्यतेरूपादिहीनत्वात् अजोजन्मादिशून्यः दिवारात्रंचरतीतिचरः जगन्नियमनेनित्योद्युक्तइत्यर्थः सःअधिकारीतंआत्मानंमत्वाज्ञात्वाकविःक्रांतदर्शीआस्तेकर्मभ्यउपरतोभवतिकृतकृत्यत्वात् अतएवप्रसन्नःउपाधिकृतकालुष्यत्यागान्निर्मलः ॥ २७ ॥ अथेदानींब्रह्मविदात्मनोब्रह्मभावंवामदेववदपरोक्षीकुर्वन्स्वस्यसार्वात्म्यंस्तौति अहमेवेति नास्तिअतीतानागतं अस्तिवर्तमानं सर्वेषामंतरात्माचाहमेवास्मि ॥ २८ ॥ पितामहइति एवमात्मनिसर्वमारोप्यअपवदति नमेयूयंनवोवयमिति यद्यपिरज्ज्वामुरगआरोपितस्तथापितयोर्नकश्चित्संबंधोस्ति अधिष्ठानव्यतिरेकेणाध्यस्तस्यासत्त्वात् एवंप्रत्यगात्मजगतोरप्यसंबंधोद्रष्टव्यः॥२९॥ अहमेवमुमुक्षूणांज्ञेयइत्याह आत्मैवेति ममस्थानंअधिष्ठानंआत्मैव स्वेमहिम्निप्रतिष्ठितइतिश्रुतेः अतएवममजन्मजननहेतुरपिआत्मैव अजत्वादेवअहंकार्येओतःप्रोतश्चतिर्यगूर्ध्वंचपटेतंतवइवानुस्यूतोस्मि अजराअप्रच्युतस्वभावाप्रतिष्ठाअधिष्ठानत्वंयस्यसतथा अजश्चरइतिपादोव्याख्यातः मांसर्वेषांभूतानामंतरात्मानंसर्वेश्वरंसर्वकर्तारंविज्ञायकविःप्रसन्नआस्ते ॥ ३० ॥

प्रकरणार्थमुपसंहरति अणोरिति अणोरप्यणुतरोदुर्ज्ञेयः नत्वणुतरपरिमाणवान् अस्थूलमनण्वह्रस्वमदीर्घमितिब्रह्मणिचतुर्विधपरिमाणनिषेधात् एतेननिर्गुणंरूपमुक्तं सुमनाःशोभनंमनोदिव्यंचक्षुर्माया ख्यंअनीतादिसर्वप्रकाशकंयस्य मनोस्यैदैवंचक्षुरितिश्रुतेः ससुमनाः एतेनसगुणंरूपमुक्तं सर्वभूतेषुजाग्रतिअंतर्यामिरूपेणजागर्ति शपोऽलुगार्षःगुणाभावश्च पितरंअर्थाद्धियइदांनींजरायुजादीनांच सर्व भूतेषुसर्वदेहेषुपुष्करेहृदयपुंडरीकेनिहितंस्थितंविदुर्ब्रह्मणाजानंति एवंगुणविशिष्टंप्रत्यगात्मानंहृदयेविचिंतनेनसाक्षात्कृत्यकृतकृत्योभवतीत्यर्थः ॥ ३१ ॥ ॥ इतिश्रीमत्पदवाक्यप्रमाणज्ञमर्यादाधुरंधरच

अणोरणीयान्सुमनाःसर्वभूतेषुजाग्रति॥पितरंसर्वभूतेषुपुष्करेनिहितंविदुः॥ ३१ ॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिसनत्सुजातपर्वणिषट्चत्वारिंशोऽध्यायः॥ ४६ ॥ ॥समाप्तमिदंसनत्सुजातपर्व॥ ॥ ७ ॥ ॥अथयानसंधिपर्व॥ ॥वैशंपायनउवाच॥ एवंसनत्सुजातेनविदुरेणचधीमता॥सार्धकथयतोरात्रिःसाव्यतीतायशर्वरी॥ १ ॥तस्यांरजन्यांव्युष्टायांराजानःसर्वएवते॥सभामाविविशुर्दृष्टाःसूतस्योपदिदृक्षया॥ २ ॥ शुश्रूषमाणाःपार्थानांवाचोधर्मार्थसंहिताः॥धृतराष्ट्रमुखाःसर्वेययूराजसभांशुभाम्॥ ३ ॥सुधावदातांविस्तीर्णांकनकाजिरभूषितां॥ चंद्रप्रभांसुरुचिरांसिक्तांचंदनवारिणा॥ ४ ॥रुचिरैरासनैःस्तीर्णाकांचनैर्दारवैरपि॥ अश्मसारमयैर्दांतैःस्वास्तीर्णैःसोत्तरच्छदैः॥ ५ ॥ भीष्मोद्रोणःकृपःशल्यःकृतवर्माजयद्रथः ॥ अश्वत्थामाविकर्णश्चसोमदत्तश्चबाह्लिकः॥ ६ ॥विदुरश्चमहाप्राज्ञोयुयुत्सुश्चमहारथः॥सर्वेचसहिताःशूराःपार्थिवाभरतर्षभ॥७॥धृतराष्ट्रंपुरस्कृत्यविविशुस्तांसभांशुभाम्॥दुःशासनश्चित्रसेनःशकुनिश्चापिसौबलः॥८॥दुर्मुखोदुःसहःकर्णउलूकोथविविंशतिः॥ कुरुराजंपुरस्कृत्यदुर्योधनममर्षणम् ॥ ९ ॥विविशुस्तांसभांराजन्सुराःशक्रसदोयथा॥आविशद्भिस्तदाराजन्शूरैःपरिघबाहुभिः॥ १० ॥शुशुभेसासभाराजन्सिंहैरिवगिरेर्गुहा ॥तेप्रविश्यमहेष्वासाःसभांसर्वेमहौजसः॥ ११ ॥ आसनानिविचित्राणिभेजिरेसूर्यवर्चसः॥आसनस्थेषुसर्वेषुतेषुराजसुभारत॥ १२॥द्वाःस्थानिवेदयामाससूतपुत्रमुपस्थितम्॥अयंसरथआयातियोऽयासीत्पांडवान्प्रति॥ ॥ १३॥ दूतोनस्तूर्णमायातःसैंधवैःसाधुवाहिभिः॥ उपेयायसतुक्षिप्रंरथात्स्कंधकुंडली॥प्रविवेशसभांपूर्णांमहीपालैर्महात्मभिः॥ १४ ॥ ॥संजयउवाच॥ प्राप्तोस्मिपांडवान्गत्वातंविजानीतकौरवाः॥ यथावयःकुरून्सर्वान्प्रतिनंदंतिपांडवाः॥ १५॥

तुर्धरवंशावतंसश्रीगोविंदसूरिसूनोःश्रीनीलकंठस्यकृतौ उद्योगप० भारतभा० षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ ॥ ७ ॥ ॥ प्रासंगिकमध्यात्मंसमाप्यप्रस्तुतांकथामेवानुसंधत्ते एवंसनत्सुजातेनेत्यादिना कथयतः कथामितिशेषः ॥ १ ॥ सूतस्यसंजयस्य ॥ २ ॥ ३ ॥ कनकमयेनअजिरेणअंगनेनभूषितां ॥ ४ ॥ अश्मसारमयैःरत्नखचितैः ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ उपेयायउपाजगाम प्रस्कंधउत्तीर्य ॥ १४ ॥ यथावयःवयसोऽनुरूपं ॥ १५ ॥

॥६२॥

॥ १६ ॥ १७ ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेसप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ ॥ ७ ॥ ॥ पृच्छामीति ॥ १ ॥ २ ॥ अन्वग्रस्तइत्यनुशब्दस्यअवोचदित्यनेनसंबंधः व्यवहिताश्चेतिधानूपसर्गयोश्छांदसंव्यवहितत्वं विद्वानजानन् उपह्वरेसमीपे कुरूणांमध्येधार्तराष्ट्रंब्रूयाइत्यन्वयोवोचदितिसंबंधः ॥ ३ ॥ ४ ॥ पांडवायोधनायपांडवैःसहयुद्धाय ॥ ५ ॥ ६ ॥ ७ ॥ कर्मपापं अनिर्विष्टंअनु

अभिवादयंतिवृद्धांश्चवयस्यांश्चवयस्यवत्॥ यूनश्चाभ्यवदन्यार्थाःप्रतिपूज्ययथावयः॥ १६ ॥यथाहंधृतराष्ट्रेणशिष्टःपूर्वमितोगतः॥ अब्रुवंपांडवान्गत्वात न्निबोधतपार्थिवाः॥१७॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणियानसंधिप०संजयप्रत्यागमनेसप्तचत्वारिंशोऽध्यायः॥४७॥ ॥७॥ ॥ धृतराष्ट्रउवाच॥पृच्छामित्वांसंजयराजमध्येकिमब्रवीद्वाक्यमदीनसत्वः॥ धनंजयस्तातयुधांप्रणेतादुरात्मनांजीवितच्छिन्महात्मा॥ १ ॥ ॥ संजयउवाच॥ ॥दुर्योधनोवाचमिमांशृणोतुयदब्रवीदर्जुनोयोत्स्यमानः॥ युधिष्ठिरस्यानुमतेमहात्माधनंजयःशृण्वतःकेशवस्य॥ २॥ अन्वग्रस्तोबाह्वीर्यैर्विदानउपह्वरेवासुदेवस्यधीरः॥ अवोचन्मांयोत्स्यमानःकिरीटीमध्येब्रूयाधार्तराष्ट्रंकुरूणाम्॥ ३॥ संशृण्वतस्तस्यदुर्भाषिणंवैदुरात्मनःसूतपुत्रस्यसूत॥ योयोद्धुमाशंसतिमांसदैवमंदप्रज्ञःकालपक्वोऽतिमूढः॥ ४॥ येवैराजानःपांडवायोधनायसमानीताःशृण्वतांचापितेषाम्॥ यथासमग्रंवचनंमयोक्तंसहामात्यंश्रावयेथानृपंतत्॥५॥ यथानूनंदेवराजस्यदेवाःशुश्रूषंतेवज्रहस्तस्यसर्वे॥ तथाशृण्वन्पांडवाःसृंजयाश्चकिरीटिनावाचमुक्तांसमर्थाम्॥६॥इत्यब्रवीदर्जुनोयोत्स्यमानोगांडीवधन्वालोहितपद्मनेत्रः॥ नचेद्राज्यंमुंचतिधार्तराष्ट्रोयुधिष्ठिरस्याजमीढस्यराज्ञः॥ ७॥ अस्तिनूनंकर्मकृतंपुरस्तादनिर्विष्टंपापकंधार्तराष्ट्रैः॥ येषांयुद्धंभीमसेनार्जुनाभ्यांतथाश्विभ्यांवासुदेवेनचैव॥ ८॥शैनेयेनध्रुवमात्तायुधेनधृष्टद्युम्नेनाथशिखंडिनाच॥युधिष्ठिरेणेंद्रकल्पेनचैवयोपध्यानान्निर्दहेद्दांदिवंच॥ ९ ॥ तैश्चेद्योद्धुमन्यतेधार्तराष्ट्रोनिर्वृत्तोर्थःसकलःपांडवानाम्॥ मातत्कार्षीःपांडवस्यार्थहेतोरुपैहियुद्धंयदिमन्यसेत्वम्॥ १०॥ यांतांवनेदुःखशय्यामवात्सीत्प्रव्राजितःपांडवोधर्मचारी॥आप्नोतुतांदुःखतरामनर्थामंत्यांशय्यांधार्तराष्ट्रःपरासुः॥११॥ क्रियाज्ञानेनतपसादमेनशौर्येणायोधर्मगुप्त्याधनेन॥अन्यायवृत्तिःकुरुपांडवेयानध्यातिष्ठद्धार्तराष्ट्रोदुरात्मा॥ १२॥

पशुक्तं अश्विभ्यांअश्विपुत्राभ्याम् ॥ ८ ॥ अपध्यानात्अपकारचिंतनमात्रात् गांपृथ्वीं ॥ ९ ॥ निर्वृत्तःसिद्धः सकलइत्ययुद्धपक्षेऽर्धस्यैवार्थस्यलाभोभवेत्संचानभिमतइतिसूचितं तत्तूराज्यार्धदानंमाकार्षीः पांडवस्यअर्थहेतोःहितार्थम् ॥ १० ॥ दुःखशय्यांदुःखवासं अंत्यांशय्यायुद्धेमरणंप्राप्तःसन् ॥ ११ ॥ त्वंएतावत्कुर्वित्याह क्रियेति यान्लोकान्अन्यायवृत्तिर्धार्तराष्ट्रोध्यतिष्ठत्तान्क्रीप्रभृतिभिर्गुणैरुपलक्षितेपांडवेअनुरक्तान्कुरु दुर्योधनेनद्वेष्टप्रजानामस्मद्भिमुखीकरणंत्वत्कार्यंनतुतेनसहअस्माकंसंधानमितिभावः ॥ १२ ॥

मायया कपटेन उपधीयते उपस्थाप्यते तेमायोपधाः छलवादाः तान् मायोपधः आतोधातोरितिद्वितीयाबहुवचनेपरेआलोपः प्रतिपन्नः प्राप्तः प्रणिपातादिभिरुपेतः सत्यं ब्रुवंश्च अतिवेलं क्लिश्यमानोपितितिक्षमाणएवास्तेइतिशेषः ॥ १३ ॥ क्रोधअवस्रष्टाउत्सृक्ष्यति उद्वृत्तंक्रोधाक्रांतंचेतोयस्यसःउद्वृत्तचेताः जन्मनासुवृत्तचेताअपिसन् अन्वतप्स्यत्शोचिष्यति आर्षोलकारव्यत्ययः ॥ १४ ॥ कृष्णवर्त्मादाहेन कृष्णीकृतभूभागइतिप्राज्ञः वस्तुतस्तुअग्निहोत्रेवस्त्रादिसमरूपोग्निःश्रूयतेयदग्निमुद्धरतीत्यनुवाके तत्रकृष्णवर्त्मेत्यन्वर्थसंज्ञातोधूमायनरौद्रोग्निरुच्यते ज्वलितइतिकिंचित्प्रदीप्तः समिद्धइतिसर्वशोदीप्तःदग्धा धक्ष्यति ॥ १५ ॥ १६ ॥ दर्शितंसन्नद्धं स्वालक्षणंस्त्रीयानामपिअलक्षणंनास्तिलक्षणंसम्यगवलोकनंयस्यतंस्वालक्षणं रणेआवेशवशात्त्वेरपिदुर्दर्शमित्यर्थः यतःअंतकसन्निकाशं वचनस्यवचनम् ॥

मायोपधःप्रणिपातार्जवाभ्यांतपोदमाभ्यांधर्मगुप्त्याबलेन ॥ सत्यंब्रुवन्प्रतिपन्नोनृपोनस्तितिक्षमाणःक्लिश्यमानोतिवेलम् ॥ १३ ॥ यदाज्येष्ठःपांडवःसंशितात्माक्रोधंयत्तंवर्षपूगान्सुघोरम् ॥ अवस्रष्टाकुरुपूद्वृत्तचेतास्तदायुद्धंधार्तराष्ट्रोन्वतप्स्यत् ॥ १४ ॥ कृष्णवर्त्मेवज्वलितःसमिद्धोयथादहेत्कक्षमग्निर्निदाघे ॥ एवं दग्धाधार्तराष्ट्रस्यसेनांयुधिष्ठिरःक्रोधदीप्तोन्ववेक्ष्य ॥ १५ ॥ यदाद्रष्टाभीमसेनंरथस्थंगदाहस्तंक्रोधविषंवमंतम् ॥ अमर्षणंपांडवंभीमवेगंतदायुद्धंधार्तराष्ट्रोन्वतप्स्यत् ॥ १६ ॥ सेनाग्रगंदर्शितंभीमसेनंस्वालक्षणंवीरहणंपरेषाम् ॥ घ्नंतंचमूमंतकसन्निकाशंतदास्मर्तावचनस्यातिमानी ॥ १७ ॥ यदाद्रष्टाभीमसेननागान् निपातितान्गिरिकूटप्रकाशान् ॥ कुंभैरिवास्रग्वमतोभिन्नकुंभांस्तदायुद्धंधार्तराष्ट्रोन्वतप्स्यत् ॥ १८ ॥ महासिंहोगावइवप्रविश्यगदापाणिर्धार्तराष्ट्रानुपेत्य ॥ यदाभीमोभीमरूपोनिहंतातदायुद्धंधार्तराष्ट्रोन्वतप्स्यत् ॥ १९ ॥ महाभयेवीतभयःकृतास्त्रःसमागमेशत्रुबलावमर्दी ॥ सकृद्रथेनाप्रतिमान्रथौघान्पदातिसंघान्मदयाभिनिघ्नन् ॥ २० ॥ शैक्ष्येननागांस्तरसाविगृह्णन्यदाछेत्ताधार्तराष्ट्रस्यसैन्यम् ॥ छिंदन्वनंपरशुनेवशूरस्तदायुद्धंधार्तराष्ट्रोन्वतप्स्यत् ॥ २१ ॥ तृणप्रायं ज्वलनेनेवदग्धंग्रामंयथाधार्तराष्ट्रान्समीक्ष्य ॥ पक्वंसस्यंवैद्युतेनेवदग्धंपरासिक्तंविपुलंस्वबलौघम् ॥ २२ ॥ हतप्रवीरंविमुखंभयार्तंपराङ्मुखंप्रायशोऽधृष्टयोधम् ॥ शस्त्रार्चिषाभीमसेनेनदग्धंतदायुद्धंधार्तराष्ट्रोन्वतप्स्यत् ॥ २३ ॥ उपासंगानाचरेद्दक्षिणेनवरांगानांनकुलश्चित्रयोधी ॥ यदारथाग्र्योरथिनःप्रचेतातदायुद्धंधार्तराष्ट्रोन्वतप्स्यत् ॥ २४ ॥

॥ १७ ॥ १८ ॥ गाःवःइवेतिछेदः वःयुष्मान्गाइव ॥ १९ ॥ २० ॥ शैक्ष्येनशिक्ष्यसदृशेनपाशेननागान्विगृह्णन्वैपरीत्येनगृह्णन् गलेपादेवापाशंदत्वाम्रतवत्सवत्कर्षन्निति अर्थः अन्येतुविग्रह्णन्नितिपाठांतरंकल्पयित्वाशैक्ष्येनखड्गेनेतिव्याचख्युः ॥ २१ ॥ तृणप्रायंतृणगृहमयंग्रामं परासिक्तंदूरेनिरस्तम् ॥ २२ ॥ अधृष्टयोधंअपगल्भयोधम् ॥ २३ ॥ उपेति वरांगानांशिरसांउपासंगान्उच्चयान् दक्षिणेनकुशलेनअनायासेनेतियावत् आचरेत्कुर्यात् रथिनःयोधान्प्रचेताकूटीकरिष्यति पाठांतरेउपासंगेननिषंगेणदक्षिणभागस्थेनशतात्परंआचरन्नूतत्रत्यैः शताधिकैःशरैर्युध्यन्वामहस्तेनापिशरप्रक्षेपस्यअभ्यस्तत्वात् दुःखशय्यामशेतेत्युत्तरस्मादपकृष्यते अतएवदुःखाद्रथिनःप्रचेतेतिपूर्ववत् ॥ २४ ॥

दुःखशय्यांअशेतेत्युत्तरंतांयदास्मरिष्यतीतिशेषः अतएवदुःखात्रथिनःप्रचेतेतिपूर्वस्मादनुकृष्यते ॥ २५ ॥ हेपार्थिवआयोधनाययुद्धायसमादिष्टाः सैन्यंतावकंदृष्ट्वा तानितिशेषः ॥ २६ ॥ शिशून्द्रौपदीपुत्रान्प्रतिविध्यादीन् आद्रवंतःआद्रवतः ॥ २७ ॥ गतोद्वाहंअपगतोहृत्तगतिंअनुकूलगतिमित्यर्थः अकूजनोनिःशब्दोःक्षोयस्यतं सुवर्णस्यतारोदीर्घतंतुःतं अतिवेगादलातचक्रवत्सुवर्णरेखातुल्यमित्यर्थः

सुखोचितोदुःखशय्यांवनेषुदीर्घंकालंनकुलोयामशेत ॥ आशीविषःक्रुद्धइवोद्वमन्विषंतदायुद्धंधार्तराष्ट्रोन्वतप्स्यत् ॥ २५ ॥ त्यक्तात्मानःपार्थिवायोधनायसमादिष्टाधर्मराजेनसूत ॥ रथैःशुभ्रैःसैन्यमभिद्रवंतोदृष्ट्वापश्चात्तप्स्यतेधार्तराष्ट्रः ॥ २६ ॥ शिशून्कुतास्त्रानशिशुप्रकाशान्यदाद्रष्टाकौरवःपंचशूरान् ॥ त्यक्ताप्राणान्कौरवानाद्रवंतस्तदायुद्धंधार्तराष्ट्रोन्वतप्स्यत् ॥ २७ ॥ यदागतोद्वाहमकूजनाक्षंसुवर्णतारंरथमाततायी ॥ दांतैर्युक्तंसहदेवोधिरूढःशिरांसिराज्ञांक्षेप्स्यतेमार्गणौघैः ॥ २८ ॥ महाभयेसंप्रवृत्तेरथस्थंविवर्तमानंसमरेकृतास्त्रम् ॥ सर्वादिशःसंपतंतंसमीक्ष्यतदायुद्धंधार्तराष्ट्रोन्वतप्स्यत् ॥ २९ ॥ क्षीनिषेवोनिपुणःसत्यवादीमहाबलःसर्वधर्मोपपन्नः ॥ गांधारिमार्छत्सुमुलेक्षिप्रकारीक्षेमाजनान्सहदेवस्तरस्वी ॥ ३० ॥ यदाद्रष्टाद्रौपदेयान्महेषून्शूरान्कृतास्त्रान्रथयुद्धकोविदान् ॥ आशीविषान्घोरविषानिवायतस्तदायुद्धंधार्तराष्ट्रोन्वतप्स्यत् ॥ ३१ ॥ यदाभिमन्युःपरवीरघातीशरैःपरान्मेघइवाभिवर्षन् ॥ विगाहिताकृष्णसमःकृतास्त्रस्तदायुद्धंधार्तराष्ट्रोन्वतप्स्यत् ॥ ३२ ॥ यदाद्रष्टाबालमबालवीर्यंद्विषच्चमूंमृत्युमिवोत्पतंतम् ॥ सौभद्रमिंद्रप्रतिमंकृतास्त्रंतदायुद्धंधार्तराष्ट्रोन्वतप्स्यत् ॥ ३३ ॥ प्रभद्रकाःशीघ्रतरायुवानोविशारदाःसिंहसमानवीर्याः ॥ यदाक्षेप्तारोधार्तराष्ट्रान्ससैन्यांस्तदायुद्धंधार्तराष्ट्रोन्वतप्स्यत् ॥ ३४ ॥ वृद्धौविराट्द्रुपदौमहारथौपृथक्चमूभ्यामभिवर्तमानौ ॥ यदाद्रष्टारौधार्तराष्ट्रान्ससैन्यांस्तदायुद्धंधार्तराष्ट्रोन्वतप्स्यत् ॥ ३५ ॥ यदाकृतास्त्रोद्रुपदःप्रचिन्वन्शिरांसियूनांसमरेरथस्थः ॥ क्रुद्धःशरैश्छेत्स्यतिचापमुक्तैस्तदायुद्धंधार्तराष्ट्रोन्वतप्स्यत् ॥ ३६ ॥ यदाविराट्ःपरवीरघातीममत्तरेशत्रुचमूंप्रवेष्टा ॥ मत्स्यैःसार्धमनृशंसरूपैस्तदायुद्धंधार्तराष्ट्रोन्वतप्स्यत् ॥ ३७ ॥ ज्येष्ठंमात्स्यमनृशंसार्यरूपंविराटपुत्ररथिनंपुरस्तात् ॥ यदाद्रष्टादंशितंपांडवार्थेतदायुद्धंधार्तराष्ट्रोन्वतप्स्यत् ॥ ३८ ॥ रणेहतेकौरवाणांप्रवीरेशिखंडिनासत्तमेशांतनूजे ॥ नजातुनःशत्रवोधारयेयुरसंशयंसत्यमेतद्ब्रवीमि ॥ ३९ ॥ यदाशिखंडीरथिनःप्रचिन्वन्भीष्मंरथेनाभियातावरूथी ॥ दिव्यैर्हयैरवमृद्नन्रथौघांस्तदायुद्धंधार्तराष्ट्रोन्वतप्स्यत् ॥ ४० ॥

दांतैःविनीतैःअश्वैरित्यर्थात् ॥ २८ ॥ विवर्तमानंविविधैर्मंडलैर्वर्तमानंचरंतम् ॥ २९ ॥ गांधारिशकुनिंआर्च्छत्नगच्छन् ॥ ३० ॥ आयतःआगच्छतः ॥ ३१ ॥ विगाहिताअभिभविष्यति ॥ ३२ ॥ ३३ ॥ क्षेप्तारःक्षेप्स्यंति ॥ ३४ ॥ ३५ ॥ ३६ ॥ ममत्तरेमृशंमथ्नातीतिममत् यङ्लुगंतात्क्विपूतत्तस्तरप् बलवत्तरे ममर्दितिनिपातोबलवद्वाचकोवा संग्रामेइत्यर्थः सहोत्तरइत्याधुनिकाःपठंति ॥ ३७ ॥ ३८ ॥ शांतनूजे धैर्यमार्षं धारयेयुःजीवेयुः ॥ ३९ ॥ वरूथीरथगुप्तिमान् ॥ ४० ॥

॥ ४१ ॥ ४२॥४३॥ इदंचेतिसन्निहितंयुद्धमूलमुच्यते राज्यंचमाद्रणीष्वमाप्रार्थयत्वइतिब्रूयाः दुर्योधनंप्रतीत्यर्थात् यतःवयंयुद्धेऽद्वितीयंसहायंसात्यकिंप्रद्रणीमद्दतवंतः तस्मिन्नद्दतेतुकदाचित्तवजयो पिसंभाव्येतेतिभावः ॥ ४४ ॥ ४५ ॥ ४६ ॥ अस्मात् ल्यब्लोपेपंचमी एनंप्राप्यसंचेष्टतेइतस्ततोभ्रमंति ॥ ४७ ॥ ४८ ॥ चित्रःविस्मयकृत् सूक्ष्मःदुर्लक्ष्यः श्लक्ष्णइतिपाठेरमणीयः शूराणामुत्साहकरत्वात्

यदाद्रष्टास्तंजयानामनीकेधृष्टद्युम्नंप्रमुखेरोचमानम् ॥ अस्त्रंयस्मैगुह्यमुवाचधीमान्द्रोणस्तदातप्स्यतिधार्तराष्ट्रः॥४१॥यदाससेनापतिरप्रमेयःपराद्दन्निषु
भिर्धार्तराष्ट्रान् ॥ द्रोणंरणेशत्रुसहोभियातातदायुद्धंधार्तराष्ट्रोन्वतप्स्यत् ॥ ४२ ॥ क्षीमान्मनीषीबलवान्मनस्वीसलक्ष्मीवान्सोमकानांप्रबर्हः ॥ नजातुतंशत्रवो
न्येसहेरन्येषांसस्यादग्रणीर्दृष्णिसिंहः॥४३॥ इदंचब्रूयामाद्रणीष्वतिलोकेयुद्धेऽद्वितीयंसचिवंरथस्यम् ॥ शिनेर्नप्तारंप्रद्रणीमसात्यकिंमहाबलंवीतभयंकृता
स्त्रम् ॥ ४४ ॥ महोरस्कोदीर्घबाहुःप्रमाथीयुद्धेऽद्वितीयःपरमास्त्रवेदी ॥ शिनेर्नप्तातालमात्रायुधोयंमहारथोवीतभयःकृतास्त्रः॥४५॥ यदाशिनीनामधिपोमयो
क्तःशरैःपरान्मेघइवप्रवर्षन् ॥ प्रच्छादयिष्यत्यरिहायोधमुख्यांस्तदायुद्धंधार्तराष्ट्रोन्वतप्स्यत् ॥ ४६ ॥ यदाधृतिंकुरुतेयोत्स्यमानःसदीर्घबाहुर्दृढधन्वामहात्मा ॥
सिंहस्येवगंधमाघ्रायगावःसंचेष्टंतशत्रवोस्माद्रणाग्रे ॥ ४७ ॥ सदीर्घबाहुर्दृढधन्वामहात्माभिद्यादरीन्सिंहरेत्सर्वलोकान् ॥ अस्त्रेकृतीनिपुणःक्षिप्रहस्तोदिवि
स्थितःसूर्यइवाभिभाति॥४८॥ चित्रःसूक्ष्मःसुकृतोयादवस्यअस्त्रेयोगोदृष्णिसिंहस्यभूयान् ॥ यथाविधंयोगमाहुःप्रशस्तंसर्वैर्गुणैःसात्यकिस्तैरुपेतः॥४९॥
हिरण्मयंश्वेतहयैश्चतुर्भिर्यदायुक्तंस्यंदनंमाधवस्य ॥ द्रष्टायुद्धेसात्यकेर्धार्तराष्ट्रस्तदातप्स्यत्यकृतात्मासमंदः॥५०॥ यदारथंहेममणिप्रकाशंश्वेताश्वयुक्तंवान
रकेतुमुग्रम् ॥ दृष्ट्वाममाप्यास्थितंकेशवेनतदातप्स्यत्यकृतात्मासमंदः ॥ ५१ ॥ यदामौर्व्यास्तलनिष्पेषमुग्रंमहाशब्दंवज्रनिष्पेषतुल्यम् ॥ विधूयमानस्यमहा
रणेमयासगांडिवस्यश्रोष्यतिमंदबुद्धिः॥५२॥ तदामूढोधृतराष्ट्रस्यपुत्रस्तमायुद्धेदुर्मतिर्दुःसहायः ॥ दृष्ट्वासैन्यंबाणवर्षांधकारेप्रभज्यंतंगोकुलवद्रणाग्रे॥५३॥
बलाहकादुच्चरतःसुभीमान्विद्युत्स्फुलिंगानिवघोररूपान् ॥ सहस्रघ्नान्द्विषतांसंगरेषुअस्थिच्छिदोमर्मभिदःसुपुंखान् ॥५४॥यदाद्रष्टाज्यामुखाद्बाणसंघान्गां
डीवमुक्तानापततःशिताग्रान्॥हयान्गजान्वर्मिणश्चाददानांस्तदायुद्धंधार्तराष्ट्रोन्वतप्स्यत्॥५५॥ यदामंदःपरबाणान्विमुक्तान्ममेषुभिर्क्रियमाणान्प्रतीपम्॥
तिर्यग्विध्यच्छिद्यमानान्पृषत्कैस्तदायुद्धंधार्तराष्ट्रोन्वतप्स्यत् ॥ ५६ ॥

सुकृतःसुशिक्षितः अस्त्रयोगोऽस्त्रलाभः दृष्णिसिंहस्यकृष्णस्ययथाविधंयादृक्प्रकारंयोगमाहुःतैःसर्वैर्गुणैःसात्यकिरुपेतः ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ सुपुंखान्यदाद्रष्टेतिद्वयोःसंबंधः ॥ ५४ ॥
आददानान्प्रसमानान् ॥ ५५ ॥ तिर्यक्विध्यविद्धा पृषत्कैश्छिद्यमानान्यदाद्रष्टेतिपूर्वेणान्वयः ॥ ५६ ॥

विपाठाःविस्तृतबाणाः प्रचेतारःराशीकरिष्यंति ॥ ५७ ॥ ५८ ॥ असंप्राप्तानस्वपथंअसंप्राप्तान् अस्वदृष्टेवनस्थतइत्यर्थः युद्धेकर्मअकुर्वतः भयेनवैक्लव्यात् ॥ ५९ ॥ आर्ततां[illegible]विच्छिन्नधाराःइषवोयस्य
प्रणोत्स्यामिदूरीकरिष्यामि ॥ ६० ॥ रजोध्वस्तंरजसाव्याकुलीभूयरथादिभ्यःपतितं प्रकृत्तंछिन्नम् ॥६१॥कांदिग्भूतंभयेनपलायितं श्रांतपत्रंश्रांतवाहनम् ॥६२॥ प्रजापतेःकर्मयथेति यथावाजपेयेप्र

यदाविपाठामद्भुजविप्रमुक्ताद्विजाःफलानीवमहीरुहाग्रात् ॥ प्रचेतारउत्तमांगानियूनांतदायुद्धंधार्तराष्ट्रोन्वतप्स्यत् ॥ ५७॥ यदाद्रष्टापततःस्यंदनेभ्योमहाग
जेभ्योश्वगतान्सुयोधनान् ॥ शरैर्हतान्पातितांश्चैवरंगेतदायुद्धंधार्तराष्ट्रोन्वतप्स्यत् ॥ ५८ ॥ असंप्राप्तानस्वपथंपरस्ययदाद्रष्टानश्यतोधार्तराष्ट्रान् ॥ अकुर्वतःक
र्मयुद्धेसमंतात्तदायुद्धंधार्तराष्ट्रोन्वतप्स्यत् ॥ ५९ ॥ पदातिसंघान्रथसंघान्समंताद्व्याक्षाननःकालइवाततेषु ॥ प्रणोत्स्यामिज्वलितैर्बाणवर्षैःशत्रूंस्तदातप्स्य
तिमंदबुद्धिः॥ ६० ॥ सर्वादिशःसंपततारथेनरजोध्वस्तंगांडिवेनप्रकृत्तम्॥यदाद्रष्टास्वबलंसंप्रमूढंतदापश्चात्तप्स्यतिमंदबुद्धिः॥६१॥ कांदिग्भूतंछिन्नगात्रंवि
संज्ञंदुर्योधनोद्रक्ष्यतिसर्वसैन्यम्॥हताश्ववीराय्यनरेंद्रनागंपिपासितंश्रांतपत्रंभयार्तम्॥६२॥ आर्तस्वरंहन्यमानंहतंचविकीर्णकेशास्थिकपालसंघम् ॥ प्रजा
पतेःकर्मयथार्थनिष्ठितंतदाद्रष्ट्वातप्स्यतिमंदबुद्धिः॥६३॥यदारथेगांडिवंवासुदेवंदिव्यंशंखंपांचजन्यंहयांश्च ॥तूणावक्षय्यौदेवदत्तंचमांचद्दष्ट्वायुद्धेधार्तराष्ट्रो
न्वतप्स्यत् ॥ ६४ ॥ उद्वर्तयन्दस्युसंघान्समेतान्प्रवर्तयन्युगमन्यद्युगांते ॥ यदाधक्ष्यान्यग्निवल्कौरवेयांस्तदातप्तायृतराष्ट्रःसपुत्रः ॥ ६५ ॥ सभ्रातावैसहसैन्यः
सभृत्याभ्रष्टैश्वर्यःक्रोधवशोल्पचेताः॥दर्पस्यांतेनिहतोवेपमानःपश्चान्मंदस्तप्स्यतिधार्तराष्ट्रः॥६६॥ पूर्वाह्णेमांकृतजप्यंकदाचिद्विप्रःप्रोवाचोदकांतेमनोज्ञम् ॥
कर्तव्यंतद्दुष्करंकर्मपार्थयोद्धव्यंतेशत्रुभिःसव्यसाचिन् ॥६७॥ इंद्रोवातेहरिवान्वज्रहस्तःपुरस्ताद्यातुसमरेरीन्विनिघ्नन् ॥ सुग्रीवयुक्तेनरथेनवातेपश्चात्कृष्णोर
क्षतुवासुदेवः ॥ ६८ ॥ वव्रेचाहंवज्रहस्तान्महेंद्रादस्मिन्युद्धेवासुदेवंसहायम् ॥ समेलब्धोदस्युवधायकृष्णोमन्येचैतद्विहितंदैवतैर्मे ॥ ६९ ॥ अयुध्यमानोमनसा
पियस्यजयंकृष्णःपुरुषस्याभिनंदेत् ॥ एवंसर्वान्सव्यतीयादमित्रान्सेंद्रान्देवान्मानुषेनास्तिचिंता ॥ ७० ॥

जापतिदैवत्याःसप्तदशपशवोविशस्यंतेतद्दद्दहूनामिहापिविशसनंकृतंतेनबीभत्सत्वंलक्ष्यते अर्थःस्वर्गोराज्यंचनदर्थेनिष्ठितंसंजातनिश्चयम् ॥ ६३ ॥ देवदत्तंअर्जुनस्यशंखम् ॥६४॥ दस्युसंघान् न्यायतःप्रदेय
स्यराज्यस्याप्रदानाद्दस्यवोधार्तराष्ट्राः यथाकथाचपरप्रतिपद्दमभिमन्यतेस्तेनोभवतीतिस्मृतेः युगांतेशमूणांसंहारेजातेसतिअन्ययुगंधर्मप्रधानंकालंप्रवर्तयन् राजाकालस्यकारणमितिस्मृतेः ॥ ६५ ॥ दर्प
स्यअंतेनाशे ॥ ६६ ॥ उदकांतेसंध्यावंदनाचमनांते ॥ ६७ ॥ पुरस्तात्इंद्रोरक्षतुइत्यपकृष्यते ॥ ६८ ॥ ६९ ॥ ७० ॥

सागरंसगरैर्वर्धितं सलिलस्यमहोदधिंजलसमुद्रं अप्रमेयंअनंतत्वात् ॥७१॥ तलेनचपेटिकया शिलोच्चयमितिकाठिन्यप्रदर्शनार्थंविशेषणं श्वेतंकैलासं बलवंदाश्रितत्वमनेनसूचितम् ॥७२॥७३॥७४॥ सुदर्शननामराजाननग्रजितःपुत्रैर्बद्धंमुमोच देवतानांललामंरत्नभूतंदेवैरपिशिरसाधार्यमित्यर्थः ॥७५॥ कपाटेनवक्षस्ताडाघातेन दंतकूरेसंघामे अन्येतुकपाटेनिजघानेतिपाठंप्रकल्प्यकपाटेनगरेणेवंदंतकूरेचे

सबाहुभ्यांसागरमुत्तितीर्षेन्महोदधिंसलिलस्याप्रमेयम्॥ तेजस्विनंकृष्णमत्यंतशूरंयुद्धेनयोवासुदेवंजिगीषेत्॥७१॥ गिरिंयइच्छेत्तुतलेनभेत्तुंशिलोच्चयंश्वेतमतिप्रमाणम्॥ तस्यैवपाणिःसनखोविशीर्येन्नचापिकिंचित्सगिरेस्तुकुर्यात्॥७२॥ अग्निंसमिद्धंशमयेद्भुजाभ्यांचंद्रंचसूर्यंचनिवारयेत॥ हरेद्वानामस्तंप्रसह्ययुद्धेनयोवासुदेवंजिगीषेत्॥७३॥ योरुक्मिणीमेकरथेनभोजानुत्साद्यराज्ञःसमरेप्रसह्य॥ उवाहभार्यांयशसाज्वलंतींयस्यांजज्ञेरौक्मिणेयोमहात्मा॥ ७४॥ अयंगांधारांस्तरसासंप्रमथ्यजित्वापुत्रान्नग्रजितःसमग्रान्॥ बद्धंमुमोचविनदंतंप्रसह्यसुदर्शनंवैदेवतानांललामम्॥७५॥ अयंकपाटेनजघानपांडुंतथाकलिंगान्दंतकूरेममर्द॥ अनेनदग्धावर्षपूगान्विनाथावाराणसीनगरीसंबभूव॥ ७६॥ अयंस्मयुद्धेमन्यतेन्यैरजेयंतमेकलव्यंनामनिषादराजम्॥वेगेनैवशैलमभिहत्यजंघःशेतेसकृष्णेनहतःपरासुः॥७७॥ ततोग्रसेनस्यसुतंसुदुर्दृष्यंधकानांमध्यगतंसभास्थम्॥ अपातयद्वलदेवद्वितीयोहत्वाददौचोग्रसेनायराज्यम्॥७८॥ अयंसौभंयोधयामासखस्थंविभीषणंमायययाशाल्वराजम्॥ सौभद्वारिप्रत्यगृह्णाच्छतघ्नींदोर्भ्यांकएनंविषहेतमर्त्यः॥७९॥ प्राग्ज्योतिषंनामवभूवदुर्गंपुरंघोरमसुराणामसह्यम्॥ महाबलोनरकस्तत्रभौमोजहारादित्यामणिकुंडलेशुभे॥८०॥ नतंदेवाःसहशक्रेणशेकुःसमागतायुधिमृत्योरभीताः॥ दृष्ट्वाचतंविक्रमंकेशवस्यबलंतथैवास्त्रमवारणीयम्॥८१॥ जानंतोस्यप्रकृतिंकेशवस्यन्ययोजयन्दस्युवधायकृष्णम्॥ सतत्कर्मप्रतिशुश्रावदुष्करमैश्वर्यवान्सिद्धिपुरासुदेवः॥८२॥ निर्मोचनेषट्सहस्राणिहत्वासंछिद्यपाशान्सहसाक्षुरांतान्॥ मुरंहत्वाविनिहत्यौघरक्षोनिर्मोचनंचापिजगामवीरः॥८३॥तत्रैवतेनास्यबभूवयुद्धंमहाबलेनातिबलस्यविष्णोः॥ शेतेसकृष्णेनहतःपरासुर्वातेनेवमथितःकर्णिकारः॥८४॥

तिव्याचख्युः अनाथासंबभूवेतियोज्यम्॥७६॥ अयंकृष्णःतंयुद्धेमन्यतेयुद्धार्थंप्रार्थयतेसर्वंदैवसःइदानींतेनैवकृष्णेनहतःशेते यथाजंघोदैत्यःशैलंवेगेनअभिहत्यशैलाघातात्स्वयंकृतात्हतःशेतेतद्वत्॥७७॥ ततोग्रसेनस्येतिसंधिरार्षः तथेतिवापाठः॥७८॥ खस्थंखेचरं विभीषणंनिर्भयं शतघ्नींशक्तिंशाल्वेनक्षिप्तांदोर्भ्यांपाणिभ्यांकंदुकवत्प्रत्यगृह्णात् ॥७९॥ भौमोभूमिपुत्रः ॥८०॥ शेकुर्जेतुमितिशेषः ॥८१॥ प्रकृतिंस्वभावंदस्युहननशीलतां प्रतिशुश्रावअंगीचकार सिद्धिषुकार्यसिद्धिषूपस्थितासुऐश्वर्यवान्सामर्थ्यवान् ॥८२॥ निर्मोचनेनगरे क्षुरांतान्तीक्ष्णधारान्लोहमयानित्यर्थः ओघसंज्ञंरक्षः ॥८३॥८४॥

॥६५॥

॥८५॥वराणिवरान्अददद्दत्तवंतः क्रमःगतिः ॥८६॥ ८७॥ तर्कयतेवद्धुंयतते ॥ ८८॥ प्रसह्यपर्यागतंहठात्मामन्यतेवांछति अस्मासुमित्रभेदंप्रार्थयतेइत्यर्थः तेनचपांडवानांकृष्णेममत्वंअस्मदीयत्वंहर्तुं शक्यमितिमन्यतेतत्तत्रकुरुक्षेत्रेसंयुगंगत्वाप्राप्यवेदिताज्ञास्यति ॥ ८९॥ ९०॥९१॥९२॥ साधुकृतंसत्कर्मनास्ति निष्फलत्वात् वृथैवधर्मइत्यर्थः ॥ ९३॥ नचेदिति यदिकर्मबद्धःपुरुषोनस्यात्यदिवा

आदृत्यकृष्णोमणिकुंडलेतेहृत्वाचभौमंनरकंमुरंच॥ श्रियाकृतोयशसाचैवविद्वान्प्रत्याजगामाप्रतिमप्रभावः॥८५॥ अस्मैवराण्यददंस्तत्रदेवादृष्ट्वाभीमं कर्मकृतंरणेतत्॥ श्रमश्चतेयुध्यमानस्यनस्यादाकाशेचाप्युचतेक्रमःस्यात्॥८६॥शस्त्राणिगात्रेनचतेक्रमेरन्नित्येवकृष्णश्चततःकृतार्थः॥ एवंरूपेवासुदेवेऽप्रमेयेमहाबलेगुणसंपत्सदैव॥८७॥ तमसत्यंविष्णुमनंतवीर्यमाशंसतेधार्तराष्ट्रोविजेतुं॥ सदात्यनंतर्कयतेदुरात्मातच्चाप्ययंसहतेस्मान्समोक्ष्य॥८८॥ पर्यागतंममकृष्णस्यचैवयोमन्यतेकलहंसंप्रसह्य॥ शक्यंहर्तुंपांडवानांममत्वंतद्वेदितासंयुगंतत्रगत्वा॥८९॥ नमस्कृत्वाशांतनवायराज्ञेद्रोणायाथोसहपुत्रायचैव॥ शारद्वतायाप्रतिद्वंद्विनेचयोत्स्याम्यहंराज्यमभीप्समानः॥ ९०॥ धर्मेणामंनिधनंतस्यमन्येयोयोत्स्यतेपांडवैःपापबुद्धिः॥ मिथ्याग्लहेनिर्जितावैनृशंसैःसंवत्सरान्द्वादशराजपुत्राः॥ ९१॥ वासःकृच्छ्रोविहितश्चाप्यरण्यदीर्घंकालंचैकमज्ञातवर्षम्॥ तेहिकस्माज्जीवतांपांडवानांनंदिष्यंतेधार्तराष्ट्राःपदस्थाः॥ ९२॥ तेचेदस्मान्युध्यमानान्जयेयुर्देवैर्महेंद्रप्रमुखैःसहायैः॥ धर्मादधर्मश्चरितोगरीयांस्ततोधुवंनास्तिकृतंचसाधु॥ ९३॥ नचेदिमंपुरुषंकर्मबद्धंनचेदस्मान्मन्यतेसौविशिष्टान्॥ आशंसेहंवासुदेवद्वितीयोदुर्योधनंसानुबंधंनिहंतुम्॥९४॥नचेदिदंकर्मनरेंद्रवंध्यंनचेद्भवेत्सुकृतंनिष्फलंवा॥ इदंचतच्चाभिसमीक्ष्यनूनंपराजयोधार्तराष्ट्रस्यसाधुः॥ ९५॥ प्रत्यक्षंवःकुरवोयद्ब्रवीमियुध्यमानाधार्तराष्ट्रानसंति॥ अन्यत्रयुद्धात्कुरवोयदिस्युर्नयुद्धेवैशेषइहास्तिकश्चित्॥ ९६॥ हत्वात्वहंधार्तराष्ट्रान्सकर्णान्त्राज्यंकुरूणामवजेतासमग्रम्॥ यद्वःकार्यंतत्कुरुध्वंयथास्वमिष्टान्दारानात्मभोगान्भजध्वम्॥ ९७॥ अप्येवंनोब्राह्मणाःसंतिवृद्धाबहुश्रुताःशीलवंतःकुलीनाः॥ सांवत्सराज्योतिषिचाभियुक्तानक्षत्रयोगेषुचनिश्चयज्ञाः॥ ९८॥ उच्चावचंदैवयुक्तंरहस्यंदिव्याःप्रश्नामृगचक्रामुहूर्ताः॥ क्षयंमहांतंकुरुसृंजयानांनिवेदयंतेपांडवानांजयंच॥ ९९॥

वयंतेभ्यःश्रेष्ठाःनस्यामतर्हितस्यैवजयोभविष्यतीत्यर्थः॥ ९४॥ इदंराज्यस्याप्रदानंइदानींतनं तच्चराज्यात्निःसारणंतदानींतनंअभिसमीक्ष्यआलोच्य पापवशात्सराजयएवतस्येत्यर्थः॥९५॥९६॥९७॥ ॥ ९८॥ दिव्याअनागतार्थज्ञापकाः मृगचक्राःचक्राणिसर्वतोभद्रादीनिशैवागमप्रसिद्धानिमृगयंतेकिंनृक्षत्रंकेनपहेणविद्धमितिविचारयंतिसदसत्फलकथनार्थंतेचक्रमृगाः पूर्वनिपातआर्षः मृगाणिमार्गितानिचक्राणियैस्तेइतिवा ॥ ९९॥

संशयंयुद्धेजयपराजयविषयेनपश्यति यतःअपरोक्षविद्यःदिव्यदृष्ट्याऽतीतानागतादिकंपश्यन् ॥ १०० ॥ पुराणीयोगप्रभाववती नव्यथतेनतिरस्कृता ॥ १०१ ॥ १०२ ॥ १०३ ॥ १०४ ॥ १०५ ॥

यथाहिनोमन्यतेऽजातशत्रुःसंसिद्धार्थोद्विषतांनिग्रहाय ॥ जनार्दनश्चाप्यपरोक्षविद्योनसंशयंपश्यतिदृष्णिसिंहः ॥ १०० ॥ अहंतथैनंखलुभाविरूपंपश्यामिबुद्ध्यास्वयमप्रमत्तः ॥ दृष्टिश्चमेनव्यथतेपुराणीसंयुध्यमानाधार्तराष्ट्रानसंति ॥ १०१ ॥ अनालब्धंजृंभतिगांडिवंधनुरनाहताकंपतिमेधनुर्ज्या ॥ बाणाश्चमेतूणमुखाद्विस्रत्यमुहुर्मुहुर्गंतुमुशंतिचैव ॥ १०२ ॥ खड्गःकोशान्निःसरतिप्रसन्नोहित्वेवजीर्णामुरगस्त्वचंस्वाम् ॥ ध्वजेवाचोरौद्ररूपाभवंतिकदारथोयोक्ष्यतेतेकिरीटिन् ॥ १०३ ॥ गोमायुसंघाश्चनदंतिरात्रौरक्षांस्यथोनिष्पतंत्यंतरिक्षात् ॥ मृगाःश्मगालाःशितिकंठाश्चकाकागृध्राबकाश्चैवतरक्षवश्च ॥ १०४ ॥ सुवर्णपत्राश्चपतंतिपश्चाद्दृष्ट्वारथंश्वेतहयप्रयुक्तम् ॥ अहंत्वेकःपार्थिवान्सर्वयोधान्शरान्वर्षन्मृत्युलोकंनयेयम् ॥ १०५ ॥ समाददानःपृथगस्त्रमार्गान्यथाग्निरिद्धोगहनंनिदाघे ॥ स्थूणाकर्णंपाशुपतंमहास्त्रंब्राह्मंचास्त्रंयच्चशक्रोप्यदान्मे ॥ १०६ ॥ वधेधृतोवेगवतःप्रमुंचन्नाहंप्रजाःकिंचिदिहावशिष्ये ॥ शांतिंलप्स्येपरमोत्प्येषभावःस्थिरोममबूहिगावल्गणेतान् ॥ १०७ ॥ येवैजय्याःसमरेसूतलब्ध्वादेवानपींद्रप्रमुखान्समेतान् ॥ तैर्मन्यतेकलहंसंप्रसह्यसधार्तराष्ट्रःपश्यतमोहमस्य ॥ १०८ ॥ वृद्धोभीष्मःशांतनवःकृपश्चद्रोणःसपुत्रोविदुरश्चधीमान् ॥ एतेसर्वेयद्वदंतेतदस्तुआयुष्मंतःकुरवःसंतुसर्वे ॥ १०९ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणियानसंधिपर्वणिअर्जुनवाक्यनिवेदनेऽष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥ ७ ॥ ॥ वैशंपायनउवाच ॥ ॥ समवेतेषुसर्वेषुतेषुराजसुभारत ॥ दुर्योधनमिदंवाक्यंभीष्मःशांतनवोब्रवीत् ॥ १ ॥ बृहस्पतिश्चोशनाचब्रह्माणंपर्युपस्थितौ ॥ मरुतश्चसहेंद्रेणवसवश्चाग्निनासह ॥ २ ॥ आदित्याश्चैवसाध्याश्चयेचसप्तर्षयोदिवि ॥ विश्वावसुश्चगंधर्वःशुभाश्चाप्सरसांगणाः ॥ ३ ॥ नमस्कृत्योपजग्मुस्तेलोकवृद्धंपितामहम् ॥ परिवार्यचविश्वेशंपर्यासतदिवौकसः ॥ ४ ॥ तेषांमनश्चतेजश्चाप्याददानाविवौजसा ॥ पूर्वदेवौव्यतिक्रांतौनरनारायणावृषी ॥ ५ ॥ बृहस्पतिस्तुपप्रच्छब्रह्माणंकविमाविति ॥ भवंतंनोपतिष्ठेतेतौनःशंसपितामह ॥ ६ ॥ ब्रह्मोवाच ॥ यावेतौपृथिवींद्यांचभासयंतौतपस्विनौ ॥ ज्वलंतौरोचमानौचव्याप्यातीतौमहाबलौ ॥ ७ ॥ नरनारायणावेतौलोकाल्लोकंसमास्थितौ ॥ ऊर्जितौस्वेनतपसा महासत्वपराक्रमौ ॥ ८ ॥ ॥ १०६ ॥ वधेधृतःवधार्थंसज्जः वेगवतःबाणान् ॥ १०७ ॥ विजयःकर्मयेषांतेवैजय्याः देवानपिलब्ध्वाविजयवंतएवेत्यर्थः ॥ १०८ ॥ १०९ ॥ इतिउद्योगप० नैलकंठीयेभारतभावदीपेअष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥ ७ ॥ ॥ समवेतेष्विति ॥ १ ॥ २ ॥ ३ ॥ पर्यासतपरिवार्यतस्थुः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ लोकात्मानुषात् लोकंब्राह्मम् ॥ ८ ॥

॥ ६६ ॥

॥ ९ ॥ १० ॥ अयाचतइंद्रः ॥ ११ ॥ सप्तसंसाहाय्यम् ॥ १२ ॥ १३ ॥ १४ ॥ भ्रातेअस्थिरेपिरथे लक्ष्यात्नव्यथैतीत्याश्वर्यम् ॥ १५ ॥ आरुजत्पीडितवान् ॥ १६ ॥ १७ ॥ भूयसोबहून् ॥ १८ ॥ १९ ॥ सत्त्वंबुद्धिसत्वं एकए

एतौहिकर्मणालोकंनंदयामासतुर्ध्रुवम् ॥ द्विधाभूतौमहाप्राज्ञौविद्धिब्रह्मन्परंतपौ ॥ असुराणांविनाशायदेवगंधर्वपूजितौ ॥ ९ ॥ ॥ वैशंपायनउवाच ॥ जगामशक्रस्तच्छ्रुत्वायत्रतौतेपतुस्तपः ॥ सार्धंदेवगणैःसर्वैर्बृहस्पतिपुरोगमैः ॥ १० ॥ तदादेवासुरेयुद्धेभयेजातेदिवौकसाम् ॥ अयाचतमहात्मानौनरनारायणौवरम् ॥ ११ ॥ तावब्रूतांवृणीष्वेतितदाभरतसत्तम ॥ अथैतावब्रवीच्छक्रःसत्वंनःक्रियतामिति ॥ १२ ॥ ततस्तौशक्रमब्रूतांकरिष्यावोयदिच्छसि ॥ ताभ्यांचसहितःशक्रोविजिग्येदैत्यदानवान् ॥ १३ ॥ नरइंद्रस्यसंग्रामेहत्वाशत्रूम्परंतपः ॥ पौलोमान्कालखंजांश्चसहस्राणिशतानिच ॥ १४ ॥ एषभ्रांतिरथेतिष्ठन्भल्लेनापाहरच्छिरः ॥ जंभस्यग्रसमानस्यतदात्यर्जुनआहवे ॥ १५ ॥ एषपारेसमुद्रस्यहिरण्यपुरमारुजत् ॥ जित्वाषष्टिंसहस्राणिनिवातकवचान्रणे ॥ १६ ॥ एषदेवान्सहेंद्रेणजित्वापरपुरंजयः ॥ अनर्पयन्महाबाहुरर्जुनोजातवेदसम् ॥ १७ ॥ नारायणस्तथैवात्रभूयसोन्यान्जघानह ॥ एवमेतौमहावीर्यौतौपश्यतसमागतौ ॥ १८ ॥ वासुदेवार्जुनौवीरौसमवेतौमहारथौ ॥ नरनारायणौदेवौपूर्वदेवाविति श्रुतिः ॥ १९ ॥ अजेयौमानुषेलोकेसेंद्रैरपिसुरासुरैः ॥ एषनारायणःकृष्णःफाल्गुनश्चनरःस्मृतः ॥ नारायणोनरश्चैवसत्त्वमेकंद्विधाकृतम् ॥ २० ॥ एतौहिकर्मणालोकानश्नुवातेऽक्षयान्ध्रुवान् ॥ तत्रतत्रैवजायेतेयुद्धकालेपुनःपुनः ॥ ॥ २१ ॥ तस्मात्कर्मैवकर्तव्यमितिहोवाचनारदः ॥ एतद्विसर्वमाचष्टदृष्णिचक्रस्यवेदवित् ॥ २२ ॥ शंखचक्रगदाहस्तंयदाद्रक्ष्यसिकेशवम् ॥ पर्याददानंचास्त्राणिभीमधन्वानमर्जुनम् ॥ २३ ॥ सनातनौमहात्मानौकृष्णावेकरथेस्थितौ ॥ दुर्योधनतदातातस्मर्तासिवचनंमम ॥ २४ ॥ नोचेदयमभावःस्यात्कुरूणांप्रत्युपस्थितः ॥ अर्थाच्चतातधर्माच्चतवबुद्धिरुपप्लुता ॥ २५ ॥ नचेद्धहीष्यसेवाक्यंश्रोतासिसुबहून्हतान् ॥ तवैवहिमतंसर्वेकुरवःपर्युपासते ॥ २६ ॥ त्रयाणामेवचमतंतत्वमेकोनुमन्यसे ॥ रामेणचैवशप्तस्यकर्णस्यभरतर्षभ ॥ २७ ॥ दुर्जातेःसूतपुत्रस्यशकुनेःसौबलस्यच ॥ तथाक्षुद्रस्यपापस्यभ्रातुर्दुःशासनस्यच ॥ २८ ॥ ॥ कर्णउवाच ॥ ॥ नैवमायुष्मतावाच्यंयन्मामात्थपितामह ॥ क्षत्रधर्मेस्थितोत्यस्मिस्वधर्मादनपेयिवान् ॥ २९ ॥ किंचान्यन्मयिदुर्वृत्तंयेनमांपरिगर्हसे ॥ न हिमेवृजिनंकिंचिद्धार्तराष्ट्राविदुःक्वचित् ॥ ३० ॥ नाचरंवृजिनंकिंचिद्धार्तराष्ट्रस्यनित्यशः ॥ अहंहिपांडवान्सर्वान्हनिष्यामिरणेस्थितान् ॥ ३१ ॥

वदेवोयोगप्रभावाद्रूपद्वयेनवर्ततेइत्यर्थः ॥ २० ॥ अश्नुवातेव्यामृतः ॥ २१ ॥ कर्मयुद्धंकर्तव्यं तयोरितिशेषः आचष्टआख्यातवान्नारदएव ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥

सहिराज्येइति अस्यवचनंमयानकर्तव्यंकिंतुराज्ञएवेतिभावः ॥३२॥३३॥ कलापिषोडशांशोपि॥३४॥३५॥३६॥३७॥३८॥३९॥ क्रियतेयद्यदा दृषायतेदृषवन्नदति ॥४०॥ ४१॥४२॥४३॥४४॥४५॥

प्राग्विरुद्धैःशमंसद्भिःकथंवाक्रियतेपुनः॥ राज्ञोहिधृतराष्ट्रस्यसर्वंकार्यंप्रियंमया॥ तथादुर्योधनस्यापिसहिराज्येसमाहितः॥ ३२॥ ॥ वैशंपायनउवाच॥ ॥ कर्णस्यतुवचःश्रुत्वाभीष्मःशांतनवःपुनः॥ धृतराष्ट्रंमहाराजसंभाष्येदंवचोब्रवीत्॥ ३३॥ यदयंकत्थतेनित्यंहंताहंपांडवानिति॥ नायंकलापिसंपूर्णापांडवानां महात्मनाम्॥ ३४॥ अनयोर्योयमागंतापुत्राणांतेदुरात्मनाम्॥ तदस्यकर्मजानीहिसूतपुत्रस्यदुर्मतेः॥ ३५॥ एतमाश्रित्यपुत्रस्तेमंदबुद्धिःसुयोधनः॥ अवामन्य तताञ्वीरान्देवपुत्रानरिंदमान्॥ ३६॥ किंचाप्येतेनतत्कर्मकृतपूर्वंसुदुष्करम्॥ तैर्यथापांडवैःसर्वैरेकेनकृतंपुरा॥ ३७॥ दृष्ट्वाविराटनगरेभ्रातरंनिहतंप्रियम्॥ ध नंजयेनविक्रम्यकिमनेनतदाकृतम्॥ ३८॥ सहिताह्किुरून्सर्वानभियातोधनंजयः॥ प्रमथ्यचाच्छिनद्दासःकिमयंप्रोषितस्तदा॥ ३९॥ गंधर्वैर्घोषयात्रायांक्रिय तेयत्सुतस्तव॥ क्तनदासूतपुत्रोभूद्यइदानींदृषायते॥ ४०॥ ननुतत्रापिभीमेनपार्थेनचमहात्मना॥ यमाभ्यामेवसंगम्यगंधर्वास्तेपराजिताः॥ ४१॥ एतान्यस्यमृषो क्तानिबहूनिभरतर्षभ॥ विकत्थनस्यभद्रंतेसदाधर्मार्थलोपिनः॥ ४२॥ भीष्मस्यतुवचःश्रुत्वाभारद्वाजोमहामनाः॥ धृतराष्ट्रमुवाचेदंराजमध्येभिपूजयन्॥ ४३॥ यदाहभरतश्रेष्ठोभीष्मस्तत्क्रियतांनृप॥ नकाममर्थलिप्सूनांवचनंकर्तुमर्हसि॥ ४४॥ पुरायुद्धात्साधुमन्येपांडवैःसहसंगतम्॥ यद्वाक्यमर्जुनेनोक्तंसंजयेननिवे दितम्॥ ४५॥ सर्वंतदपिजानामिकरिष्यतिचपांडवः॥ नत्यस्यत्रिषुलोकेषुसदृशोस्तिधनुर्धरः॥ ४६॥ अनादृत्यतुतद्वाक्यमर्थवद्द्रोणभीष्मयोः॥ ततःससंजयंराजा पर्यपृच्छतपांडवान्॥ ४७॥ तदैवकुरवःसर्वेनिराशाजीवितेभवन्॥ भीष्मद्रोणौयदाराजानसम्यगनुभाषते॥ ४८॥ ॥इ०उ०यानसं०भीष्मद्रोणवाक्येऊनपंचा शत्तमोऽध्यायः॥ ४९॥ ॥७॥ ॥ धृतराष्ट्रउवाच॥ ॥ किमसौपांडवोराजाधर्मपुत्रोभ्यभाषत॥ श्रुत्वेहबहुलाःसेनाःप्रीत्यर्थंनःसमागताः॥ १॥ किमसौचेष्टतेसूत योत्स्यमानोयुधिष्ठिरः॥ केवास्यभ्रातृपुत्राणांपश्यंत्याज्ञेप्सवोमुखं॥ २॥ केस्विदेनंवारयंतियुद्धाच्छाम्येतिवापुनः॥ निकृत्याकोपितंमैदैर्धर्मज्ञंधर्मचारिणं॥ ३॥ संजयउवाच॥ ॥ राज्ञोमुखमुदीक्षंतेपांचालाःपांडवैःसह॥ युधिष्ठिरस्यभद्रंतेससर्वाननुशास्तिच॥ ४॥ पृथग्भूताःपांडवानांपांचालानांरथव्रजाः॥ आयांत मभिनंदंतिकुंतीपुत्रंयुधिष्ठिरम्॥ ५॥ नभःसूर्यमिवोद्यंतंकौंतेयंदीप्ततेजसम्॥ पांचालाःप्रतिनंदंतितेजोराशिमिवोदितं॥ ६॥ आगोपालाविपालाश्चनंदमानायु धिष्ठिरम्॥ पांचालाःकेकयामत्स्याःप्रतिनंदंतिपांडवम्॥ ७॥ ॥४६॥४७॥४८॥ इ०उ०ते०भा० ऊनपंचाशत्तमोऽध्यायः ॥४९॥ ॥७॥ किमसाविति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५॥ ६॥ ७॥

॥८॥येनसहायेनअस्मानालक्ष्यअभ्ययुंजतसंनद्धाअभूवन् ॥९॥ कुरवःसंसीदंत्यस्यांसभायाम्॥ १०॥११॥१२॥१३॥१४॥१५॥वस्ते वःयुष्मान्तेपांडवाः ॥१६॥१७॥१८॥१९॥२०॥२१॥ सिंधुराजोज

ब्राह्मण्योराजपुत्र्यश्वविशांदुहितरश्चयाः॥ क्रीडंत्योभिसमायांतिपार्थंसन्नद्धमीक्षितुम्॥ ८॥ ॥धृतराष्ट्रउवाच॥ ॥संजयाचक्ष्वयेनास्मान्पांडवाअभ्ययुंजत॥ धृष्टद्युम्नस्यसैन्येनसोमकानांवलेनच ॥ ९ ॥ ॥वैशंपायनउवाच॥ ॥गावल्गणिस्तुतत्पृष्टःसभायांकुरुसंसदि ॥ निःश्वस्यसुभृशंदीर्घमुद्वःसंचिंतयन्निव ॥ ॥ १० ॥ तत्रानिमित्ततोदैवात्सूतंकश्मलमाविशत्॥ तदाचचक्षेविदुरःसभायांराजसंसदि॥ ११॥ संजयोयंमहाराजमूर्छितःपतितोभुवि॥ वाचंनस्पृजतेकां चिद्धीनप्रज्ञोल्पचेतनः॥ १२॥ ॥धृतराष्ट्रउवाच॥ ॥ अपश्यत्संजयोनूनंकुंतीपुत्रान्महारथान्॥ तैरस्यपुरुषव्याघ्रैर्भृशमुद्वेजितंमनः॥ १३॥ ॥वैशंपायनउ वाच॥ ॥ संजयश्चेतनांलब्ध्वाप्रत्याश्वस्येदमब्रवीत्॥ धृतराष्ट्रंमहाराजसभायांकुरुसंसदि॥ १४॥ ॥संजयउवाच॥ ॥दृष्टवानस्मिराजेंद्रकुंतीपुत्रान्महार थान्॥ मत्स्यराजगृहावासनिरोधेनावकर्शितान्॥ १५॥ शृणुयैर्हिमहाराजपांडवाअभ्ययुंजत॥ धृष्टद्युम्नेनवीरेणयुद्धेवस्तेभ्ययुंजत॥ १६॥ योनैवरोषान्नभ यान्नलोभान्नार्थकारणात्॥ नहेतुवादाद्धर्मात्मासत्यंजह्यात्कदाचन॥ १७॥ यःप्रमाणंमहाराजधर्मेधर्मभृतांवरः॥ अजातशत्रुणातेनपांडवाअभ्ययुंजत॥ ॥१८॥ यस्यबाहुबलेतुल्यःपृथिव्यांनास्तिकश्चन॥ योवैसर्वान्महीपालान्वशेचक्रेधनुर्धरः॥ यःकाशीनंगमगधान्कलिंगांश्चयुधाजयत्॥ १९॥तेनवोभीमसेने नपांडवाअभ्ययुंजत॥ यस्यवीर्येणसहसाचत्वारोभुविपांडवाः॥ २०॥ निःस्रत्यजतुगेहाद्वैहिडिंबात्पुरुषादकात्॥ यश्चैषामभवद्द्वीपःकुंतीपुत्रोदकोदरः॥ २१॥ याज्ञसेनीमथोयत्रसिंधुराजोपकृष्टवान्॥ तत्रैषामभवद्द्वीपःकुंतीपुत्रोदकोदरः॥ २२॥ यश्चतान्संगतान्सर्वान्पांडवान्वारणावते॥ दृत्यतोमोचयामाससतेनव स्तेभ्ययुंजत॥ २३॥ कृष्णायांचरताप्रीतियेनक्रोधवशाहताः॥ प्रविश्यविषमंघोरंपर्वतंगंधमादनम्॥ २४॥ यस्यनागायुतैर्वीर्यंभुजयोःसारमर्पितम्॥ तेनवो भीमसेनेनपांडवाअभ्ययुंजत॥ २५॥ कृष्णाद्वितीयोविक्रम्यतुष्ट्यर्थंजातवेदसः॥ अजयद्यःपुरावीरोयुध्यमानंपुरंदरम्॥ २६॥ यःससाक्षान्महादेवंगिरिशंशूलपा णिनम्॥ तोषयामाससयुद्धेनदेवदेवमुमापतिम्॥ २७॥ यश्चसर्वान्वशेचक्रेलोकपालान्धनुर्धरः॥ तेनवोविजयेनाजौपांडवाअभ्ययुंजत॥ २८॥ यःप्रतीचींदिशं चक्रेवशेम्लेच्छगणायुताम्॥ सतत्रनकुलोयोद्धाचित्रयोधीव्यवस्थितः॥ २९॥ तेनवोदर्शनीयेनवीरेणातिधनुर्भृता॥ माद्रीपुत्रेणकौरव्यपांडवाअभ्ययुंजत ॥३०॥ यःकाशीनंगमगधान्कलिंगांश्चयुधाजयत्॥ तेनवःसहदेवेनपांडवाअभ्ययुंजत॥ ३१॥ यद्रथः॥ २२॥ २३॥ २४॥ २५॥ २६॥ २७॥ विजयेनअर्जुनेन ॥ २८॥ २९॥ ३० ॥ ३१॥

॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ करकर्षेणकरकर्षसंज्ञेनभ्रात्रा ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ॥ इतिउद्योगप०

यस्यवीर्येणसदृशाश्चत्वारोभुविमानवाः॥ अश्वत्थामाधृष्टकेतूरुक्रमीप्रद्युम्नएवच ॥३२॥ तेनवःसहदेवेनयुद्धंराजन्महात्ययम्॥ यवीयसानृवीरेणमाद्रीनंदिक
रेणच॥ ३३॥ तपश्चचारयाघोरंकाशिकन्यापुरासती॥ भीष्मस्यवधमिच्छंतीप्रेत्यापिभरतर्षभ॥ ३४॥ पांचालस्यसुताजज्ञेदेवाच्चसपुनःपुमान्॥ स्त्रीपुंसोःपु
रुषव्याघ्रयःसवेदगुणागुणान्॥ ३५॥ यःकलिंगान्समापेदेपांचाल्योयुद्धदुर्मदः॥ शिखंडिनावःकुरवःकृतास्त्रेणाभ्ययुंजत॥ ३६॥ यंयक्षःपुरुपंचकेभीष्मस्य
निधनेच्छया॥ महेष्वासेनरौद्रेणपांडवाअभ्ययुंजत॥ ३७॥ महेष्वासाराजपुत्राभ्रातरःपंचकेकयाः॥ आमुक्तकवचाःशूरास्तैश्चवस्तेभ्ययुंजत॥ ३८॥ योदीर्घ
बाहुःक्षिप्रास्त्रोधृतिमान्सत्यविक्रमः॥ तेनवोवृष्णिवीरेणयुयुधानेनसंगरः॥ ३९॥ यआसीच्छरणंकालेपांडवानांमहात्मनाम्॥ रणेतेनविराटेनभवितावःस
मागमः॥ ४०॥ यःसकाशिपतीराजावाराणस्यांमहारथः॥ सतेषामभवद्योद्धातेनवस्तेभ्ययुंजत॥ ४१॥ शिशुभिर्दुर्जयैःसंख्येद्रौपदेयैर्महात्मभिः॥ आशीवि
षसमस्पर्शैःपांडवाअभ्ययुंजत॥ ४२॥ यःकृष्णसदृशोवीर्येयुधिष्ठिरसमोदमे॥ तेनाभिमन्युनासंख्येपांडवाअभ्ययुंजत॥ ४३॥ यश्चैवाप्रतिमोवीर्येधृष्टकेतु
र्महायशाः॥ दुःसहःसमरेक्रुद्धःशैशुपालिर्महारथः॥ ४४॥ तेनवश्चेदिराजेनपांडवाअभ्ययुंजत॥ अक्षौहिण्यापरिवृतःपांडवान्योभिसंश्रितः॥ ४५॥ यःसं
श्रयःपांडवानांदेवानामिववासवः॥ तेनवोवासुदेवेनपांडवाअभ्ययुंजत॥ ४६॥ तथाचेदिपतेर्भ्रातराशरभोभरतर्षभ॥ करकर्षेणसहितस्ताभ्यांवस्तेभ्ययुंज
त॥ ४७॥ जारासंधिःसहदेवोजयत्सेनश्चतावुभौ॥ युद्धेप्रतिरथेवीरौपांडवार्थेव्यवस्थितौ॥ ४८॥ द्रुपदश्चमहातेजाबलेनमहताऽऽवृतः॥ त्यक्तात्मापांडवार्थाय
योत्स्यमानोव्यवस्थितः॥ ४९॥ एतेचान्येचबहवःप्राच्योदीच्यामहीक्षितः॥ शतशोयानुपाश्रित्यधर्मराजोव्यवस्थितः॥ ५०॥ ॥ इतिश्रीमहाभारतेउद्योगपर्व
णियानसंधिपर्वणिसंजयवाक्येपंचाशत्तमोऽध्यायः॥ ५०॥ ॥ ७॥ ॥ धृतराष्ट्रउवाच॥ ॥ सर्वएतेमहोत्साहायेत्वयापरिकीर्तिताः॥ एकतस्त्वेवतेसर्वे
समेताभीमएकतः॥ १॥ भीमसेनाद्भिमेभूयोभयंसंजायतेमहत्॥ क्रुद्धादमर्षणात्तातव्याघ्रादिवमहारुरोः॥ २॥ जागर्मिरात्रयःसर्वादीर्घमुष्णंचनिःश्वस
न्॥ भीतोऽकोदरात्तातसिंहात्यशुरिवापरः॥ ३॥ नहितस्यमहाबाहोःशक्रप्रतिमतेजसः॥ सैन्येस्मिन्प्रतिपश्यामियएनंविषहेद्युधि॥ ४॥

॥ ६८ ॥

नैलकंठीयेभारतभावदीपेपंचाशत्तमोऽध्यायः॥ ५०॥ ॥ ७॥ ॥ ५॥ ॥ सर्वेइति॥ १॥ महारुरोःमहाभृगस्य॥ २॥ ३॥ ४॥

अनर्महासीनर्महत्योपहासःतदन्योहासः सत्यमेवकृत्वाशत्रूनुपहसतीत्यर्थः॥ ५॥ ६॥ उरुग्राहःमहानिबंधस्तेनगृहीतानांवशीकृतानाम्॥ ७॥ ८॥ ९॥ रभसःवेगवान्॥ १०॥ ११॥ १२॥ १३॥
॥ १४॥ १५॥ १६॥ १७॥ संहतेकोधेनग्रथितेभ्रुवौयस्यसंहतभ्रूः॥ १८॥ १९॥ २०॥ इतीति पुरापुराणंनिकटेऽतिदृढमितिवार्थः पुरापुराणेऽतिदृढेइतिमेदिनी पुराभाविपुराणयोः प्रबंधेनिकटेतीतइति

अमर्षणश्चकौंतियोदृढवैरश्चपांडवः॥ अनर्महासीसोन्मादस्तिर्यक्प्रेक्षीमहास्वनः॥ ५॥ महावेगोमहोत्साहोमहाबाहुर्महाबलः॥ मंदानांममपुत्राणांयुद्धेनांतं
करिष्यति॥ ६॥ उरुग्राहगृहीतानांगदांविभ्रद्दृकोदरः॥ कुरूणामृषभोयुद्धेदंडपाणिरिवांतकः॥ ७॥ अष्टास्रिमायसींघोरांगदांकांचनभूषणाम्॥ मनसाहंप्रप
श्यामिब्रह्मदंडमिवोद्यतम्॥ ८॥ यथामृगाणांयूथेषुसिंहोजातबलश्चरेत्॥ मामकेषुतथाभीमोबलेषुविचरिष्यति॥ ९॥ सर्वेषांममपुत्राणांसएकःक्रूरविक्रमः॥
बद्धाशीविप्रतीपश्चबाल्येपिरभसःसदा॥ १०॥ उद्वपतेमेहृदयंयेमेदुर्योधनादयः॥ बाल्येपितेनयुध्यंतोवारणेनेवमर्दिताः॥ ११॥ तस्यवीर्येणसंक्लिष्टानित्य
मेवसुताममः॥ सएवहेतुर्भेदस्यभीमोभीमपराक्रमः॥ १२॥ ग्रसमानमनीकानिनरवारणवाजिनाम्॥ पश्यामीवाग्रतोभीमंक्रोधमूर्छितमाहवे॥ १३॥ अस्त्रे
द्रोणार्जुनसमंवायुवेगसमंजवे॥ महेश्वरसमंक्रोधेकोहन्याद्भीममाहवे॥ १४॥ संजयाचक्ष्वमेशूरंभीमसेनममर्षणम्॥ अतिलाभंतुमन्येहंयत्तेनरिपुघातिना
॥ १५॥ तदैवनहताःसर्वेपुत्राममममनस्विना॥ येनभीमबलायक्षाराक्षसाश्चपुराहताः॥ १६॥ कथंतस्यरणेवेगंमानुषःप्रसहिष्यति॥ नसजातुवशेतस्थौमम
बाल्येपिसंजय॥ १७॥ किंपुनर्ममदुष्पुत्रैःक्लिष्टःसंप्रतिपांडवः॥ निष्पुरोरोषणोत्यर्थंभज्येतापिनसंनमेत्॥ तिर्यक्प्रेक्षीसंहतभ्रूःकथंशाम्येद्वृकोदरः॥ १८॥ शूर
स्तथाऽप्रतिबलोगौरस्तालइवोन्नतः॥ प्रमाणतोभीमसेनःप्रादेशेनाधिकोर्जुनात्॥ १९॥ जवेनवाजिनोत्येतिबलेनात्येतिकुंजरान्॥ अव्यक्तजल्पीमध्वक्षोमध्य
मःपांडवोबली॥ २०॥ इतिबाल्येश्रुतःपूर्वंमयाव्यासमुखात्पुरा॥ रूपतोवीर्यतश्चैवयाथातथ्येनपांडवः॥ २१॥ आयसेनसदंडेनरथान्नागान्नरान्हयान्॥ ह
निष्यतिरणेक्रुद्धोरौद्रःक्रूरपराक्रमः॥ २२॥ अमर्षीनित्यसंरब्धोभीमःप्रहरतांवरः॥ मयातातप्रतीपानिकुर्वन्पूर्वंविमानितः॥ २३॥ निष्कर्णामायसींस्थूलां
सुपार्श्वांकांचनींगदाम्॥ शतघ्नींशतनिर्ह्रादांकथंशक्ष्यंतिमेसुताः॥ २४॥ अपारमप्लवागाधंसमुद्रंशरवेधनम्॥ भीमसेनमयंदुर्गंतातमंदास्तितीर्षवः॥ २५॥ क्रो
शतोमेनशृण्वंतिबालाःपंडितमानिनः॥ विषमंनहिमन्यंतेप्रपातंमधुदर्शिनः॥ २६॥ संयुगंयेगमिष्यंतिनररूपेणमृत्युना॥ नियतंचोदिताधात्रासिंहेनेवमहा
मृगाः॥ २७॥ विश्वलोचनः॥ २१॥ २२॥ २३॥ निष्कर्णांअवक्रांतिर्यग्भावहीनां शतनिर्ह्रादांमहाशब्दवतीं॥ २४॥ २५॥ २६॥ २७॥

शैक्यांशिक्यस्थां अधःपतनेननभूमिविदारणशंकयाशिक्येस्थापिताम् ॥ २८ ॥ ११ ॥ ३० ॥ ३१ ॥ वीथींरथमार्गम् ॥ ३२ ॥ ३३ ॥ ३४ ॥ अनूपानूपंजलदेशस्थितान् ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥

शैक्यांतातचतुष्किष्कुंषडस्रिममितौजसम्॥प्रहिणोद्दुःखसंस्पर्शांकथंशस्यंतिमेसुताः॥२८॥गदांग्रामयतस्तस्यभिंदतोहस्तिमस्तकान्॥स्रक्किणीलेलिहानस्य बाष्पमुत्सृजतोमुहुः॥२९॥उद्दिश्यनागान्पततःकुर्वतोभैरवान्रवान्॥प्रतीपंपततोमत्तान्कुंजरान्प्रतिगर्जतः॥३०॥ विगाह्यरथमार्गेपुवरानुद्दिश्यनिघ्नतः॥ अग्नेःप्रज्वलितस्येवअपिमुच्येतमेप्रजा॥३१॥वीथींकुर्वन्महाबाहुर्द्रावयन्ममवाहिनीं॥नृत्यन्निवगदापाणिर्युगांतंदर्शयिष्यति॥३२॥प्रभिन्नइवमातंगःप्र भंजन्पुष्पितान्द्रुमान्॥प्रवेक्ष्यतिरणेसेनांपुत्राणांमेवृकोदरः॥३३॥कुर्वन्रथान्विपुरुषान्विसारथिहयध्वजान्॥आरुजन्पुरुषव्याघ्रोरथिनःसादिनस्तथा॥३४ गंगावेगइवानूपांस्तीरजान्विविधान्द्रुमान्॥प्रभंक्ष्यतिरणेसेनांपुत्राणांममसंजय॥३५॥दिशोनूनंगमिष्यंतिभीमसेनभयार्दिताः॥ममपुत्राश्चभृत्याश्चराजा नश्चैवसंजय॥३६॥येनराजामहावीर्यःप्रविश्यांतःपुरंपुरा॥वासुदेवसहायेनजरासंधोनिपातितः॥३७॥कृत्स्नेयंपृथिवीदेवीजरासंधेनधीमता॥मागधेंद्रेणव लिनावशेकृत्वाप्रतापिता॥३८॥भीष्मप्रतापात्कुरवोनयेनांधकवृष्णयः॥यन्नतस्यवशेजग्मुःकेवलंदैवमेवतत्॥३९॥सगत्वापांडुपुत्रेणतरसाबाहुशालिना॥ अनायुधेनवीरेणनिहतःकिंततोधिकम्॥४०॥दीर्घकालसमासक्तविषमाशीविषोयथा॥समोक्ष्यतिरणेतेजःपुत्रेषुममसंजय॥४१॥महेंद्रइववज्रेणदानवा न्देवसत्तमः॥भीमसेनोगदापाणिःसूदयिष्यतिमेसुतान्॥४२॥अविषह्यमनावार्यंतीव्रवेगपराक्रमम्॥पश्यामीवातिताम्राक्षमापतंतंवृकोदरम्॥४३॥अगद स्याप्यधनुषोविरथस्यविवर्मणः॥बाहुभ्यांयुध्यमानस्यकस्तिष्ठेदग्रतःपुमान्॥४४॥भीष्मोद्रोणश्चविप्रोयंकृपःशारद्वतस्तथा॥जानंत्येतेयथैवाहंवीर्यज्ञस्त स्यधीमतः॥४५॥आर्यव्रतंतुजानंतःसंगरांतंविधित्सवः॥सेनामुखेषुस्थास्यंतिमामकानांनरर्षभाः॥४६॥बलीयःसर्वतोदिष्टंपुरुषस्यविशेषतः॥पश्यन्नपिज यंतेषांननियच्छामियत्सुतान्॥४७॥तेपुराणंमहेष्वासामार्गमैंद्रंसमास्थिताः॥त्यक्ष्यंतितुमुलेप्राणान्रक्षंतःपार्थिवंयशः॥४८॥यथैषांमामकास्तातततथैषां पांडवाअपि॥पौत्राभीष्मस्यशिष्याश्चद्रोणस्यचकृपस्यच॥४९॥येत्वस्मदाश्रयंकिंचिद्दत्तमिष्टंचसंजय॥तस्यापचितिमार्यत्वात्कर्तारःस्थविरास्तयः॥५०॥

॥ ६९ ॥

॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ अगदस्यगदाहीनस्य ॥ ४४ ॥ ४५ ॥ संगरेअंतंस्वस्यनाशं स्थास्यंतिभीष्मादयः ॥ ४६ ॥ ४७ ॥ ऐंद्रंमार्गस्वर्गमार्गम् ॥ ४८ ॥ ४९ ॥ अपचितिंनिष्कृतिं॥ ५० ॥

॥ ५१ ॥ विकृष्टंउच्चैरुक्तम् ॥ ५२ ॥ एतत्भाविदुःखंअतिबलंज्ञानेनअनिवार्यम् ॥ ५३ ॥ निर्मुक्ताःजीवन्मुक्ताः ॥ ५४ ॥ ५५ ॥ क्षमंशक्यं उत्तरंउत्तरकार्यंप्रतीकारः ॥ ५६ ॥ ५७ ॥ पर्यायधर्मःविप रीतधर्मः प्रधिर्नेमिः अस्यकालवशस्य तृतीयार्थेषष्ठी ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेएकपंचाशत्तमोऽध्यायः ॥ ५१ ॥ ॥ ७ ॥ ॥ यस्येति सधनंज

आददानस्यशस्त्रंहिक्षत्रधर्मपरीप्सतः॥निधनंक्षत्रियस्याजौवरमेवाहुरुत्तमम्॥५१॥सवैशोचामिसर्वान्वैयेयुयुत्संतिपांडवैः॥विकृष्टंविदुरेणादौतदेतद्भय मागतम्॥५२॥नतुमन्येविघातायज्ञानंदुःखस्यसंजय॥भवत्यतिबलंह्येतज्ज्ञानस्याप्युपघातकम्॥५३॥ऋषयोत्यपिनिर्मुक्ताःपश्यंतोलोकसंग्रहान्॥ सुखैर्भवंतिसुखिनस्तथादुःखेनदुःखिताः॥५४॥किंपुनर्मोहमासक्तस्तत्रतत्रसहस्रधा॥पुत्रेषुराज्यदारेषुपौत्रेष्वपिचबंधुषु॥५५॥संशयेतुमहत्यस्मिन्किंनु मेक्षममुत्तरम्॥विनाशंत्वेवपश्यामिकुरूणामनुचिंतयन्॥५६॥द्यूतप्रमुखमाभातिकुरूणांव्यसनंमहत्॥मंदनैश्वर्यकामेनलोभात्पापमिदंकृतम्॥५७॥ मन्येपर्यायधर्मोयंकालस्यात्यंतगामिनः॥चक्रेप्रधिरिवासक्तोनास्यशक्यंपलायितुम्॥५८॥किंनुकुर्याःकथंकुर्याःकनुगच्छामिसंजय॥एतेनस्यंतिकुरवो मंदाःकालवशंगताः॥५९॥अवशोहंतदातातपुत्राणांनिहतेशते॥श्रोष्यामिनिनदंस्त्रीणांकथंमांमरणंस्पृशेत्॥६०॥यथानिदाघेज्वलनःसमिद्धोदहेत्क क्षंवायुनाचोद्यमानः॥गदाहस्तःपांडवोवैतथैवहंतामदीयान्सहितोर्जुनेन॥६१॥ ॥इतिश्रीम०उद्योगप०यानसंधिपर्वणिधृतराष्ट्रवाक्येएकपंचाशत्तमोऽध्या यः॥६१॥ ॥धृतराष्ट्रउवाच॥ ॥यस्यवैनानृतावाचःकदाचिदनुशुश्रुम॥त्रैलोक्यमपितस्यस्याद्योद्वायस्यधनंजयः॥१॥ तस्यैवचनपश्यामियुधिगांडी वधन्वनः॥ अनिशंचिंतयानोपियःप्रतीयाद्रथेनतम्॥२॥अस्यतःकर्णिनालीकान्मार्गणान्हृदयच्छिदः॥प्रत्येतानसमःकश्चिद्युधिगांडीवधन्वनः॥३॥द्रो णकर्णौप्रतीयातांयदिवीरौनरर्षभौ॥कृतास्त्रौबलिनांश्रेष्ठौसमरेष्वपराजितौ॥४॥महान्स्यात्संशयोलोकेनत्वस्तिविजयोमम॥घृणीकर्णःप्रमादीचआचा र्यःस्थविरोगुरुः॥५॥समर्थोबलवान्पार्थोदृढधन्वाजितक्लमः॥भवेत्सुतुमुलंयुद्धंसर्वशोप्यपराजयः॥६॥सर्वेत्यस्त्रविदःशूराःसर्वेप्राप्तामहद्यशः॥अपिस र्वामरैश्चर्यंत्यजेयुर्नपुनर्जयम्॥७॥वधेनूनंभवेच्छांतिस्तयोर्वाफाल्गुनस्यच॥नतुहंतार्जुनस्यास्तिजेताचास्यनविद्यते॥८॥

यःयस्ययोद्धेतितच्छब्दाध्याहारेणपूरणीयम् ॥ १ ॥ तस्यतंप्रतियोद्धारंनपश्यामियएनंप्रतीयादित्यध्याहृत्ययोज्यम् ॥ २ ॥ ३ ॥ ४ ॥ घृणीकृपावान्भीमादिषु प्रमादीअंतेवियांनस्मरिष्यतीतिभावः ॥ ॥ ५ ॥ अपराजयस्तेषामितिशेषः ॥ ६ ॥ ७ ॥ तयोःकर्णद्रोणयोर्वधेअस्मदीयानांशांतिःफाल्गुनस्यवधेतुपरेषामित्यर्थः ॥ ८ ॥

॥ ९ ॥ त्रयस्त्रिंशत्समाःवर्षाणि अतीताइत्यर्थः संधिरार्षः ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ अस्ताःक्षिप्ताः ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ कुरूणांप्रकारान्छेदभेदपलायनादीनावसथेगृ

मन्युस्तस्यकथंशाम्येन्मंदान्प्रतियउत्थितः॥ अन्येप्यस्त्राणिजानंतिजीयंतेचजयंतिच॥ ९ ॥ एकांतविजयस्त्वेवश्रूयतेफाल्गुनस्यह ॥ त्रयस्त्रिंशत्समाहूयखां
डवेग्निमतर्पयत्॥ १० ॥ जिगायचसुरान्सर्वान्नास्यविद्मःपराजयम् ॥ यस्ययंताहृषीकेशःशीलवृत्तसमोयुधि ॥ ११ ॥ ध्रुवस्तस्यजयस्तातयथेंद्रस्यजयस्त
था॥ कृष्णावेकरथेयत्तावधिज्यंगांडिवंधनुः॥ १२ ॥ युगपत्त्रीणितेजांसिसमेतान्यनुशुश्रुम॥ नैवास्तिनोधनुस्तादृक्नयोद्धानचसारथिः॥ १३॥ तच्चमंदान
जानंतिदुर्योधनवशानुगाः॥ शेषयेदशनिर्दीप्तोविपतन्मूर्ध्निसंजय॥ १४॥ नतुशेषंशरास्तातकुर्युरस्ताःकिरीटिना ॥ अपिचास्यन्निवाभातिनिघ्नन्निवधनंज
यः॥ १५॥ उद्धरन्निवकायेभ्यःशिरांसिशरवृष्टिभिः॥ अपिबाणमयंतेजःप्रदीप्तमिवसर्वतः॥ १६॥ गांडीवोत्थंदहेताजौपुत्राणांममवाहिनीम्॥ अपिसारथघोषे
णभयार्तासव्यसाचिनः॥ १७॥ वित्रस्ताबहुधासेनाभारतीप्रतिभातिमे ॥ यथाकक्षंमहानग्निःप्रदहेत्सर्वतश्चरन् ॥ महार्चिरनिलोद्धूतस्तद्वद्धक्ष्यतिमामकान्
॥ १८ ॥ यदोद्वमन्निशितान्बाणसंघांस्तानाततायीसमरेकिरीटी॥ सृष्टोंतकःसर्वहरोविधात्रायथाभवेत्तद्वदपारणीयः॥ १९॥ यदाह्यभीक्ष्णंसुबहून्प्रकारान्
श्रोतास्मितानावसथेकुरूणाम्॥ तेषांसमंताच्चतथारणाग्रेक्षयःकिलायंभरतानुपैति॥ २०॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणियानसंधिपर्वणिधृतराष्ट्रवा
क्येद्विपंचाशत्तमोऽध्यायः॥ ५२॥ ॥ छ॥ ॥ धृतराष्ट्रउवाच॥ ॥ यथैवपांडवाःसर्वेपराक्रांताजिगीषवः॥ तथैवाभिसरास्तेषांत्यक्तात्मानोजयेधृताः॥ १॥ त्व
मेवहिपराक्रांतानाचक्षीथाःपरान्मम॥ पंचालान्केकयान्मत्स्यान्मागधान्वत्सभूमिपान्॥ २॥ यश्चसेंद्रानिमाँल्लोकानिच्छन्कुर्याद्वशेबली ॥ सस्रष्टाजगतःकृ
ष्णःपांडवानांजयेधृतः॥ ३॥ समस्तामर्जुनाद्विद्यांसात्यकिःक्षिप्रमाप्तवान्॥ शैनेयःसमरेस्थाताबीजवत्प्रवपन्शरान्॥ ४ ॥ धृष्टद्युम्नश्चपांचाल्यःक्रूरकर्माम
हारथः॥ मामकेषुरणंकर्ताबलेषुपरमास्त्रवित्॥ ५॥ युधिष्ठिरस्यचक्रोधादर्जुनस्यचविक्रमात्॥ यमाभ्यांभीमसेनाच्चभयंमेतातजायते॥ ६॥ अमानुषंमनुष्ये
द्रैर्जालंविततमंतरा॥ नमेसैन्यास्तरिष्यंतिततःक्रोशामिसंजय॥ ७॥ दर्शनीयोमनस्वीचलक्ष्मीवान्ब्रह्मवर्चसी॥ मेधावीसुकृतप्रज्ञोधर्मात्मापांडुनंदनः॥ ८ ॥

हेश्रोतास्मिश्रोष्यामि ॥ २० ॥ ॥ इतिउद्योगप० नैलकंठीयेभारतभावदीपेद्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥ ॥ छ ॥ ॥ यथैवेति अभिसराःपुरोगाः ॥ १ ॥ २ ॥ जगतःस्रष्टाकृष्णः ॥ ३ ॥ ४ ॥
॥ ५ ॥ ६ ॥ जालंअस्त्रं अंतरासैन्यमध्ये ॥ ७ ॥ ८ ॥

युद्धयोजकैःयुद्धोद्योगिभिः ॥ ९ ॥ नैभृत्येनमंत्रगुप्त्या ॥ १० ॥ ११ ॥ तंअभिमुखःपतिष्यति ॥ १२ ॥ तनुरुच्चइतिपाठेपितनुःराज्यापहारादल्पः स्वतस्तुउच्चएव शिखीवह्निरिववह्निः ॥ १३ ॥ १४ ॥
॥ १५ ॥ क्लिश्यमानानां कर्मणिषष्ठी अस्मान्नउपेक्षेत मामेवअधर्मेणकलहस्यकारणंउद्दिश्यजुगुप्सतिनिंदतिसकथंप्रार्थितःसन्कलहंकरिष्यतीतिभावः ॥ १६ ॥ ॥ इतिउद्योगप० नैलकंठीयेभारतभाव

मित्रामात्यैःसुसंपन्नःसंपन्नोयुद्धयोजकैः॥ भ्रातृभिःश्वशुरैर्वीरैरुपपन्नोमहारथैः॥ ९॥ धृत्याचपुरुषव्याघ्रोनैभृत्येनचपांडवः॥ अनृशंसोवदान्यश्चह्रीमान्सत्य
पराक्रमः॥ १०॥ बहुश्रुतःकृतात्माचवृद्धसेवीजितेंद्रियः॥ तंसर्वगुणसंपन्नंसमिद्धमिवपावकम्॥ ११॥ तपंतमभिकोमंदःपतिष्यतिपतंगवत्॥ पांडवाग्निमना
वार्यंमुमूर्षुर्नष्टचेतनः॥ १२॥ तनुरुद्धःशिखीराजामिथ्योपचरितोमया ॥ मंदानांममपुत्राणांयुद्धेनांतंकरिष्यति॥ १३ ॥ तैरयुद्धंसाधुमन्येकुरवस्तन्निबोधत॥
युद्धेविनाशःकृत्स्नस्यकुलस्यभविताध्रुवं॥ १४॥ एषामपरमाबुद्धिर्ययाशाम्यतिमेमनः॥ यदित्वयुद्धमिष्टंवोवयंशांत्यैयतामहे ॥ १५॥ नतुनःक्लिश्यमानाना
मुपेक्षेतयुधिष्ठिरः॥ जुगुप्सतिह्यधर्मेणमामेवोद्दिश्यकारणं॥ १६॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणियानसंधिपर्वणिधृतराष्ट्रवाक्येत्रिपंचाशत्तमोऽध्यायः
॥ ५३॥ ॥ छ॥ ॥ संजयउवाच॥ ॥ एवमेतन्महाराजयथावदसिभारत॥ युद्धेविनाशःक्षत्रस्यगांडीवेनप्रदृश्यते॥ १॥ इदंतुनाभिजानामितवधीरस्य
नित्यशः॥ यत्पुत्रवशमागच्छेस्तत्त्वज्ञःसव्यसाचिनः॥ २॥ नैषकालोमहाराजतवशश्वत्कृतागसः॥ त्वयाह्येवादितःपार्थानिकृताभरतर्षभ ॥ ३ ॥ पिताश्रेष्ठः
सुहृद्यश्चसम्यक्प्रणिहितात्मवान्॥ आस्थेयंहिहितंतेननद्रोग्धागुरुरुच्यते॥ ४॥ इदंजितमिदंलब्धमितिश्रुत्वापराजितान्॥ द्यूतकालेमहाराजस्मयसेस्मकुमा
रवत्॥ ५॥ परुषाण्युच्यमानांश्चपुरापार्थानुपेक्षसे॥ कृत्स्नंराज्यंजयंतीतिप्रपातंनानुपश्यसि॥ ६ ॥ पित्र्यंराज्यंमहाराजकुरवस्तेसजांगलाः॥ अथवीरैर्जिता
मुर्वीमखिलांप्रत्यपद्यथाः ॥ ७ ॥ बाहुवीर्यार्जिताभूमिस्तवपार्थैर्निवेदिता॥ मयेदंकृतमित्येवमन्यसेराजसत्तम॥ ८॥ ग्रस्तान्गंधर्वराजेनमज्जतोह्यप्लवेंभ
सि॥ आनिनायपुनःपार्थःपुत्रांस्तेराजसत्तम॥ ९॥ कुमारवच्चस्मयसेद्यूतेविनिकृतेषुयत्॥ पांडवेषुवनेराजन्प्रव्रजत्सुपुनःपुनः॥ १०॥ प्रवर्षतःशरव्रातानर्जुन
स्यशितान्बहून्॥ अप्यर्णवाविशुष्येयुःकिंपुनर्मांसयोनयः॥ ११॥ अस्यतांफाल्गुनःश्रेष्ठोगांडीवंधनुषांवरं॥ केशवःसर्वभूतानामायुधानांसुदर्शनं॥ १२॥

दीपेत्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥ ॥ छ ॥ ॥ छ ॥ ॥ एवमिति ॥ १ ॥ २ ॥ एषकालःएषाकलनाबुद्धिस्तवनैवस्थास्यति ॥ ३ ॥ प्रणिहितात्मवान्सावधानचित्तः ॥ ४ ॥ स्मयसे
तुष्यसे ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ अस्यतांबाणान्क्षिपतांमध्ये ॥ १२ ॥

वानरोरोचमानश्चकेतुःकेतुमतांवरः॥एवमेतानिसरथोबहून्श्वेतहयोरणे ॥ १३॥ क्षपयिष्यतिनोराजन्कालचक्रमिवोद्यतम्॥ तस्याद्यवसुधाराजन्निखिला भरतर्षभ ॥ १४ ॥ यस्यभीमार्जुनौयोधौसराजाराजसत्तम॥ तथाभीमहतप्रायांमज्जंतींतववाहिनीम्॥१५॥ दुर्योधनमुखादृष्ट्वाक्षयंयास्यंतिकौरवाः॥नभी मार्जुनयोर्भीतालप्स्यंतेविजयंविभो॥ १६॥ तवपुत्रामहाराजराजानश्चानुसारिणः॥ मत्स्यास्त्वामद्यनार्चंतिपंचालाश्चसकेकयाः ॥ १७॥ शाल्वेयाःशूरसे नाश्चसर्वेत्वामवजानते॥ पार्थत्येतेगताःसर्वेवीर्यज्ञास्तस्यधीमतः॥ १८ ॥ भक्त्यात्यस्यविरुध्यंतेतवपुत्रैःसदैवते ॥ अनर्हानेवतुवधेधर्मयुक्तान्विकर्मणा ॥ ॥ १९ ॥ योऽक्लेशयत्पांडुपुत्रान्योविद्वेष्यधुनापिवै ॥ सर्वोपायैर्नियंतव्यःसानुगःपापपूरुषः॥ २० ॥ तवपुत्रोमहाराजनानुशोचितुमर्हसि ॥ द्यूतकालेमयाचो क्तंविदुरेणचधीमता॥ २१ ॥ यदिदंतेविलपितंपांडवान्प्रतिभारत॥ अनीशेनैवराजेंद्रसर्वमेतन्निरर्थकम्॥ २२॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणियानसं धिपर्वणिसंजयवाक्येचतुःपंचाशत्तमोऽध्यायः॥ ५४॥ ॥ ७ ॥ ॥ दुर्योधनउवाच ॥ ॥ नभेतव्यंमहाराजनशोच्याभवतावयम्॥ समर्थाःस्मपराञ्जे तुंबलिनःसमरेविभो॥ १ ॥ वनेप्रव्राजितान्पार्थान्यदायान्मधुसूदनः॥ महताबलचक्रेणपरराष्ट्रावमर्दिना॥ २॥ केकयाधृष्टकेतुश्चधृष्टद्युम्नश्चपार्षतः॥राजान श्चान्वयुःपार्थान्बहवोन्येनुयायिनः॥ ३ ॥ इंद्रप्रस्थस्यचादूरात्समाजग्मुर्महारथाः॥ व्यगर्हयंश्चसंगम्यभवंतंकुरुभिःसह॥४॥ तेयुधिष्ठिरमासीनमजिनैःप्रति वासितम्॥ कृष्णप्रधानाःसंहत्यपर्युपासंतभारत॥ ५॥ प्रत्यादानंचराज्यस्यकार्यमूचुर्नराधिपाः॥ भवतःसानुबंधस्यसमुच्छेदंचिकीर्षवः॥६॥श्रुत्वाचैवंमयो क्तास्तुभीष्मद्रोणकृपास्तदा॥ ज्ञातिक्षयभयाद्राजन्भीतेनभरतर्षभ ॥७॥ ततःस्थास्यंतिसमयेपांडवाइतिमेमतिः॥ समुच्छेदंहिनःकृत्स्नंवासुदेवश्चिकीर्षति॥ ॥ ८ ॥ ऋतेचविदुरात्सर्वेयूयंवध्यामताममा॥ धृतराष्ट्रस्तुधर्मज्ञोनवध्यःकुरुसत्तमः॥ ९ ॥ समुच्छेदंचकृत्स्नंनःकृत्वातातजनार्दनः॥ एकराज्यंकुरूणांस्मचिकी र्षतियुधिष्ठिरे॥ १० ॥ तत्रकिंप्राप्तकालंनःप्रणिपातःपलायनम्॥ प्राणान्वासंपरित्यज्यप्रतियुध्यामहेपरान्॥ ११ ॥ प्रतियुद्धेतुनियतःस्यादस्माकंपराजयः॥यु धिष्ठिरस्यसर्वेहिपार्थिवावशवर्तिनः॥ १२ ॥ विरक्तराष्ट्राश्चवयंमित्राणिकुपितानिनः॥ धिक्कृताःपार्थिवैःसर्वैःस्वजनेनचसर्वशः॥१३॥

॥७१॥

नभेतव्यमिति॥१॥यदाऽयात्आगतस्तदाभीष्मद्रोणकृपाःमयाउक्ताइतिषष्ठेनान्वयः ॥२॥३॥४ ॥५॥ ६ ॥७ ॥८ ॥ ममममसंबंधिनः॥९॥१०॥प्रणिपातोवासंध्यर्थः पलायनंवालज्जया ॥११॥१२॥१३॥

प्रणिपातेदोषोवंशक्षयकृतोनास्तिकिंतुसंधिरेवभवतितथापिममयुद्धमेवरोचतेइत्याशयेनाह पितरमिति ॥ १४ ॥ हेनरोत्तमधृतराष्ट्रतवपुत्रैःअस्माभिः ॥ १५ ॥ प्रतिकरिष्यंतिप्रतियातयिष्यंति ॥१६॥त तइतिपूर्ववृत्तांतकथनम् ॥ १७ ॥ नःअस्माभिःपरेचेत्यद्यपिअभिद्रुग्धाःद्रोहविषयंनीताःतथापिनभेतव्यम् ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥२३ ॥ २४ ॥ समानीताःमयेतिशेषः ॥२५ ॥२६॥ प

प्रणिपातेनदोषोस्तिसंधिर्नःशाश्वतीःसमाः॥ पितरंत्वेवशोचामिप्रज्ञानेत्रंजनाधिपम्॥१४॥ मत्कृतेदुःखमापन्नंक्लेशंप्राप्तमनंतकम्॥ कृतंहितवपुत्रैश्चपरेषा मवरोधनम्॥ मत्प्रियार्थंपुरैवैतद्विदितंतेनरोत्तम॥ १५॥ तेराज्ञोधृतराष्ट्रस्यसामात्यस्यमहारथाः॥ वैरंप्रतिकरिष्यंतिकुलोच्छेदेनपांडवाः १६॥ ततोद्रोणोब्र वीद्भीष्मःकृपोद्रौणिश्चभारत॥ मत्वामांमहतींचिंतामास्थितंव्यथितेंद्रियम् ॥ १७॥ अभिद्रुग्धाःपरेचेन्नोनभेतव्यंपरंतप॥ असमर्थाःपरेजेतुमस्मान्युधिस मास्थितान्॥ १८॥ एकैकशःसमर्थास्मोविजेतुंसर्वपार्थिवान्॥ आगच्छंतुविनेष्यामोदर्पमेषांशितैःशरैः॥ १९॥ पुरैकेनहिभीष्मेणविजिताःसर्वपार्थिवाः॥ मृतेपितर्यतिक्रुद्धोरथेनैकेनभारत॥ २०॥ जघानसुबहूंस्तेषांसंरब्धःकुरुसत्तमः॥ ततस्तेशरणंजग्मुर्देवव्रतमिमंभयात्॥२१॥सभीष्मःसुसमर्थोयमस्माभिः सहितोरणे॥ परान्विजेतुंतस्मात्तेव्येतुभीर्भरतर्षभ॥ २२॥ इत्येषांनिश्चयोत्यासीत्तत्कालेऽमिततेजसाम्॥ पुरापरेषांपृथिवीकृत्स्नासीद्वशवर्तिनी॥ २३॥ अ स्मान्पुनरमीनाद्यसमर्थाजेतुमाहवे॥छिन्नपक्षाःपरेत्यद्यवीर्यहीनाश्चपांडवाः॥२४॥अस्मत्संस्थाचपृथिवीवर्ततेभरतर्षभ॥एकार्थाःसुखदुःखेषुसमानीताश्च पार्थिवाः॥ २५॥ अप्यग्निंप्रविशेयुस्तेसमुद्रंवापरंतप॥ मदर्थंपार्थिवाःसर्वेतद्विद्धिकुरुसत्तम॥ २६॥ उन्मत्तमिवचापित्वांप्रहसंतीहदुःखितम्॥ विलपंतंबहु विधंभीतंपरविकत्थने॥ २७॥ एषांत्येकैकशोराज्ञांसमर्थःपांडवान्प्रति ॥ आत्मानंमन्यतेसर्वोव्येतुतेभयमागतम्॥ २८॥ जेतुंसमग्रांसेनांमेवासवोपिनश क्नुयात्॥ हंतुमक्षय्यरूपेयंब्रह्मणोपिस्वयंप्रभुवः॥ २९॥ युधिष्ठिरःपुरंहित्वापंचग्रामान्सयाचति॥ भीतोहिमामकात्सैन्यात्प्रभावाच्चैवमेविभो॥ ३०॥ समर्थम न्यसेयच्चकुंतीपुत्रंवृकोदरम्॥ तन्मिथ्यानहिमेकृत्स्नंप्रभावंवेत्सिभारत॥ ३१॥ मत्समोहिगदायुद्धेपृथिव्यांनास्तिकश्चन॥ नासीत्कश्चिदतिक्रांतोभवितानच कश्चन॥ ३२॥ युक्तोदुःखोषितश्चाहंविद्यापारगतस्तथा॥ तस्मान्नभीमान्नान्येभ्योभयंमेविद्यतेक्वचित्॥३३॥ दुर्योधनसमोनास्तिगदायामितिनिश्चयः॥सं कर्षणस्यभद्रंतेयत्तदैनमुपावसम्॥ ३४॥

रविकत्थनेपरेषांगुणाख्याने ॥ २७॥ २८॥ ब्रह्मणोपिअक्षय्यरूपाहंतुमशक्या ॥ २९॥ ३०॥ ३१॥ ३२ ॥ युक्तोऽभियोगवान् दुःखोषितःगुरुकुले ॥ ३३ ॥ उपावसंशिष्यत्वेनपर्यचरम् ॥ ३४ ॥

॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ पार्थिवीपृथ्वीसंबंधिनीपार्थिवानांराज्ञांवा ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥

युद्धेसंकर्षणसमोबलेनाभ्यधिकोभुवि ॥ गदाप्रहारंभीमोमेनजातुविषहेद्युधि ॥ ३५ ॥ एकंप्रहारंयंदद्यांभीमायरुषितोनृप ॥ सएवैनंनयेद्घोरःक्षिप्रंवैवस्वतक्षयम् ॥ ३६ ॥ इच्छेयंचगदाहस्तंराजन्द्रष्टुंवृकोदरम् ॥ सुचिरंप्रार्थितोह्येषममनित्यंमनोरथः ॥ ३७ ॥ गदयानिहतोह्याजौमयापार्थोवृकोदरः ॥ विशीर्णगात्रःपृथिवींपरासुःप्रपतिष्यति ॥ ३८ ॥ गदाप्रहाराभिहतोहिमवानपिपर्वतः ॥ सकृन्मयाविदीर्येतगिरिःशतसहस्रधा ॥ ३९ ॥ सचाप्येतद्विजानातिवासुदेवार्जुनौतथा ॥ दुर्योधनसमोनास्तिगदायामितिनिश्चयः ॥ ४० ॥ तन्नेवृकोदरमयंभयंव्येतुमहाहवे ॥ व्यपनेष्याम्यहंह्येनंमाराजन्विमनाभव ॥ ४१ ॥ तस्मिन्मयाहतेक्षिप्रमर्जुनंबहवोरथाः ॥ तुल्यरूपाविशिष्टाश्चक्षेप्स्यंतिभरतर्षभ ॥ ४२ ॥ भीष्मोद्रोणःकृपोद्रौणिःकर्णोभूरिश्रवास्तथा ॥ प्राग्ज्योतिषाधिपःशल्यःसिंधुराजोजयद्रथः ॥ ४३ ॥ एकैकएषांशक्तस्तुहंतुंभारतपांडवान् ॥ समेतास्तुक्षणेनैतान्नेष्यंतियमसादनम् ॥ समग्रापार्थिवीसेनापार्थमेकंधनंजयम् ॥ ४४ ॥ कस्मादशक्तानिर्जेतुमितिहेतुर्नविद्यते ॥ शरव्रातैस्तुभीष्मेणशतशोनिचितोवशः ॥ ४५ ॥ द्रोणद्रौणिकृपैश्चैवगंतापार्थोयमक्षयम् ॥ पितामहोपिगांगेयःशांतनोरधिभारत ॥ ४६ ॥ ब्रह्मर्षिसदृशोजज्ञेदेवैरपिसुदुःसहः ॥ नहंताविद्यतेचापिराजन्भीष्मस्यकश्चन ॥ ४७ ॥ पित्रात्युक्तःप्रसन्नेननाकामस्त्वंमरिष्यसि ॥ ब्रह्मर्षेश्चभरद्वाजाद्द्रोणोद्रोण्यामजायत ॥ ४८ ॥ द्रोणाज्ज्ञेमहाराजद्रौणिश्चपरमास्त्रवित् ॥ कृपश्चाचार्यमुख्योयंमहर्षेर्गौतमादपि ॥ ४९ ॥ शरस्तंबोद्भवःश्रीमानवध्यइतिमेमतिः ॥ अयोनिजास्त्रयोत्त्येतेपितामातामहोमम ॥ ५० ॥ अश्वत्थाम्नोमहाराजसचशूरःस्थितोमम ॥ सर्वएतेमहाराजदेवकल्पामहारथाः ॥ ५१ ॥ शक्तास्त्रापिव्यथांकुर्युःसंयुगेभरतर्षभ ॥ नैतेषामर्जुनःशक्तएकैकंप्रतिवीक्षितुम् ॥ ५२ ॥ सहितास्तुनरव्याघ्राहनिष्यंतिधनंजयम् ॥ भीष्मद्रोणकृपाणांचतुल्यःकर्णोमतोमम ॥ ५३ ॥ अनुज्ञातश्चरामेणमत्समोसीतिभारत ॥ कुंडलेरुचिरेचास्यांकर्णस्यसहजेशुभे ॥ ५४ ॥ तेशच्यर्थमहेंद्रेणयाचितःसपरंतपः ॥ अमोघयामहाराजशक्त्यापरमभीमया ॥ ५५ ॥ तस्यशक्त्योपगूढस्यकस्माज्जीवेद्धनंजयः ॥ विजयोमेध्रुवंराजन्फलंपाणाविवाहितम् ॥ ५६ ॥ अभिव्यक्तःपरेषांचकृत्स्नोभुविपराजयः ॥ अङ्गात्येकेनभीष्मोयंप्रयुतंहंतिभारत ॥ ५७ ॥ तत्समाश्वमहेष्वासाद्रोणद्रौणिकृपाअपि ॥ संशप्तकानांवृंदानिक्षत्रियाणांपरंतप ॥ ५८ ॥

शक्त्यामूल्यभूतया तेकुंडलेयाचितः ॥ ५५ ॥ तस्य पुरतइतिशेषः ॥ ५६ ॥ ५७ ॥ ५८ ॥

॥ ७२ ॥

तंअर्जुनम् ॥ ५९ ॥ तेभ्यःपांडवेभ्यः ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ त्रिगुणतस्त्रयंशेनहीनं त्रिगुणाभ्यंशेनाधिका ॥ ६६ ॥ ६७ ॥ ६८ ॥ विवित्सुःविज्ञातुमिच्छुःप्राप्तकालानिकर्माणि ॥ ६९ ॥

इतिउद्योगप० नैलकंठीयेभारतभावदीपेपंचपंचाशत्तमोऽध्यायः ॥ ५५ ॥ ॥ ७ ॥ अक्षौहिणीरिति ॥ १ ॥ २ ॥ मंत्रंअस्त्रप्रयोजकंजिज्ञासमानःपरीक्षितुमिच्छन् ॥ ३ ॥ ४ ॥ तथाअवैमीतिच्छेदः

अर्जुनंवयमस्मान्वानिहन्यात्कपिकेतनः ॥ तंचालमितिमन्यंतेसव्यसाचिवधेधृताः ॥ ५९ ॥ पार्थिवाःसभवांस्तेभ्योत्यकस्माज्जयतेकथम् ॥ भीमसेनेचनिहतेकोन्योयुध्येतभारत ॥ ६० ॥ परेषांतन्ममाचक्ष्वयदिवेत्थपरंतप ॥ पंचतेभ्रातरःसर्वेधृष्टद्युम्नोथसात्यकिः ॥ ६१ ॥ परेषांसमयेराजन्योधाःसारंबलंमतम् ॥ अस्माकंतुविशिष्टायेभीष्मद्रोणकृपादयः ॥ ६२ ॥ द्रौणिर्विकर्तनःकर्णःसोमदत्तोथबाह्लिकः ॥ प्राग्ज्योतिषाधिपःशल्यआवंत्यौचजयद्रथः ॥ ६३ ॥ दुःशासनोदुर्मुखश्चदुःसहश्चविशांपते ॥ श्रुतायुश्चित्रसेनश्चपुरुमित्रोविविंशतिः ॥ ६४ ॥ शलोभूरिश्रवाश्चैवविकर्णश्चतवात्मजः ॥ अक्षौहिण्योहिमेराजन्दशैकाचसमाहृताः ॥ ६५ ॥ न्यूनाःपरेषांसमैवकस्मान्मेस्यात्पराजयः ॥ बलंत्रिगुणतोहीनंयोध्यंप्राहबृहस्पतिः ॥ परेभ्यस्त्रिगुणाचेयंममराजन्नवाहिनी ॥ ६६ ॥ गुणहीनंपरेषांचबहुपश्यामिभारत ॥ गुणोदयंबहुगुणमात्मनश्चविशांपते ॥ ६७ ॥ एतत्सर्वंसमाज्ञायबलाग्र्यंममभारत ॥ न्यूनतांपांडवानांचनमोहंगंतुमर्हसि ॥ ६८ ॥ इत्युक्तासंजयंभूयःपर्यपृच्छतभारत ॥ विवित्सुःप्राप्तकालानिज्ञात्वापरपुरंजयः ॥ ६९ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणियानसंधिपर्वणिदुर्योधनवाक्येपंचपंचाशत्तमोऽध्यायः ॥ ५५ ॥ ॥ ७ ॥ ॥ दुर्योधनउवाच ॥ ॥ अक्षौहिणीःसमग्रलब्ध्वाराजभिःसहसंजय ॥ किंस्विदिच्छतिकौंतेययुद्धप्रेप्सुर्युधिष्ठिरः ॥ १ ॥ संजयउवाच ॥ ॥ अतीवमुदितोराजन्युद्धप्रेप्सुर्युधिष्ठिरः ॥ भीमसेनार्जुनौचोभौयमावपिनबिभ्यतः ॥ २ ॥ रथंतुदिव्यंकौंतेयःसर्वाविभ्राजयन्दिशः ॥ मंत्रंजिज्ञासमानःसन्बीभत्सुःसमयोजयत् ॥ ३ ॥ तमपश्यामसन्नद्धंमेघंविद्युद्युतंयथा ॥ समंतात्समभिध्यायल्ष्यमाणोभ्यभाषत ॥ ४ ॥ पूर्वरूपमिदंपश्यवयंजेष्यामसंजय ॥ बीभत्सुर्मायथोवाचतथाऽवैम्यहमप्युत ॥ ५ ॥ ॥ दुर्योधनउवाच ॥ प्रशंसस्यभिनंदंस्त्वान्पार्थानक्षपराजितान् ॥ अर्जुनस्यरथेब्रूहिकथमश्वाःकथंध्वजाः ॥ ६ ॥ ॥ संजयउवाच ॥ ॥ भौमनःसहशक्रेणबहुचित्रंविशांपते ॥ रूपाणिकल्पयामासत्वष्टाधातासदाविभो ॥ ७ ॥ ध्वजेहितस्मिन्रूपाणिचक्रुस्तेदेवमायया ॥ महाधनानिदिव्यानिमहांतिचलघूनिच ॥ ८ ॥ भीमसेनानुरोधायहनूमान्मारुतात्मजः ॥ आत्मप्रतिकृतिंतस्मिन्ध्वजआरोपयिष्यति ॥ ९ ॥

॥ ५ ॥ ६ ॥ भौमनोविश्वकर्मा धाताप्रजापतिः ॥ ७ ॥ तेत्वष्टृशक्रधातारःरूपाणिचक्रुः ॥ ८ ॥ ९ ॥

रुरोधस्वतेजसेतिशेषः ॥ १० ॥ ११ ॥ भारोरथेरोधःद्वारादौ द्वेयःरथिनभवेत् ॥ १२ ॥ यत्तत्अश्वानांशतंहतंपुनःपुनःकतिपयाश्वहननेपिदिव्यंप्रभावात्शतंपूर्यते यतःपुरस्ताद्वरम् ॥ १३ ॥ तथाअ
मराःराज्ञोदंतवर्णाःश्वेताःरथेयुक्ताअश्वाःभांति ऋक्षप्रख्याःसप्तर्षिनुल्यतेजसः ऋक्षाइतिहस्मवैपुरासप्तऋषीनाचक्षतइतिशतपथश्रुतेः पाठांतरेऋक्ष्योनृगजेदः ॥ १४ ॥ १५ ॥ १६ ॥ देवदत्ताःचित्ररथेनद

सर्वादिशोयोजनमात्रमंतरंसतिर्यगूर्ध्वंचरुरोधवैध्वजः ॥ नसंसज्जत्यसौतरुभिःसंवृतोपितथाहिमायाविहिताभौमनेन ॥ १० ॥ यथाकाशेशक्रधनुःप्रकाश
तेनचैकवर्णनचवेद्मिकिंनुतत् ॥ तथाध्वजोविहितोभौमनेनबद्धाकारंदृश्यतेरूपमस्य ॥ ११ ॥ यथाग्निधूमोदिवमेतिरुद्धावर्णान्बिभ्रत्तैजसांश्चित्ररूपान् ॥ त
थाध्वजोविहितोभौमनेननचेद्धारोभवितानोतरोधः ॥ १२ ॥ श्वेतास्तस्मिन्वातवेगाःसदश्वादिव्यायुक्ताश्चित्ररथेनदत्ताः ॥ भुव्यंतरिक्षेदिविवानरेंद्रयेषांगति
र्हीयतेनात्रसर्वा ॥ शतंयत्तत्तूर्यतेनित्यकालंहतंहतंदंतवरंपुरस्तात् ॥ १३ ॥ तथाराज्ञोदंतवर्णाबृहंतोरथेयुक्ताभांतिनद्दीर्यतुल्याः ॥ ऋक्षप्रख्याभीमसेनस्यवाहा
रथेवायोस्तुल्यवेगाबभूवुः ॥ १४ ॥ कल्माषांगास्तित्तिरिचित्रपृष्ठाभ्रात्रादत्ताःप्रीयताफाल्गुनेन ॥ भ्रातुर्वीरस्यस्वैस्तुरंगैर्विशिष्टामुदायुक्ताःसहदेवंवहंति ॥ १५ ॥
माद्रीपुत्रंनकुलंत्वाजमीढमहेंद्रदत्ताहरयोवाजिमुख्याः ॥ समावायोर्बलवंतस्तरस्विनोवहंतिवीरंदत्रशत्रुंयथेंद्रम् ॥ १६ ॥ तुल्याश्चैभिर्वयसाविक्रमेणमहाजवा
श्चित्ररूपाःसदश्वाः ॥ सौभद्रादीन्द्रौपदेयान्कुमारान्वहंत्यश्वादेवदत्तावृहंतः ॥ १७ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणियानसंधिपर्वणिसंजयवाक्येषट्पं
चाशत्तमोऽध्यायः ॥ ५६ ॥ ॥ ७ ॥ ॥ धृतराष्ट्रउवाच ॥ ॥ कांस्तत्रसंजयापश्यःप्रीत्यर्थेनसमागतान् ॥ येयोत्स्यंतेपांडवार्थेपुत्रस्यममवाहिनीम् ॥ १ ॥ ॥ सं
जयउवाच ॥ ॥ मुख्यमंधकवृष्णीनामपश्यंकृष्णमागतम् ॥ चेकितानंचतत्रैवयुयुधानंचसात्यकिम् ॥ २ ॥ पृथगक्षौहिणीभ्यांतुपांडवानभिसंश्रितौ ॥ महारथौस
मास्यातावुभौपुरुषमानिनौ ॥ ३ ॥ अक्षौहिण्याःपांचाल्योदशभिस्तनयैर्वृतः ॥ सत्यजित्प्रमुखैर्वीरैर्धृष्टद्युम्नपुरोगमैः ॥ ४ ॥ द्रुपदोवर्धयन्मानंशिखंडिपरिपालि
तः ॥ उपायात्सर्वसैन्यानांप्रतिच्छाद्यतदावपुः ॥ ५ ॥ विराटःसहपुत्राभ्यांशंखेनैवोत्तरेणच ॥ सूर्यदत्तादिभिर्वीरैर्मंदिराक्षपुरोगमैः ॥ ६ ॥ सहितःपृथिवीपालो
भ्रातृभिस्तनयैस्तथा ॥ अक्षौहिण्यैवसैन्यानांवृतःपार्थसमाश्रितः ॥ ७ ॥ जारासंधिर्मागधश्चधृष्टकेतुश्चचेदिराट् ॥ पृथक्पृथगनुप्रायौपृथगक्षौहिणीवृतौ ॥
॥ ८ ॥ केकयाभ्रातरःपंचसर्वेलोहितकध्वजाः ॥ अक्षौहिणीपरिवृताःपांडवानभिसंश्रिताः ॥ ९ ॥

त्ताः ॥ १७ ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेषट्पंचाशत्तमोऽध्यायः ॥ ५६ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ कांस्तत्रेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ समाह्वानेनतत्तन्नामाख्यानेन ॥ २४ ॥ अकालिकंकालविलंबंविना ॥ २५ ॥ २६ ॥ प्रेक्षिताः

एतानेतावतस्तत्रतानपश्यंसमागतान् ॥ येपांडवार्थेयोत्स्यंतिधार्तराष्ट्रस्यवाहिनीम् ॥ १० ॥ योवेदमानुषंज्यूहंदैवंगांधर्वमासुरम् ॥ सतत्रसेनाप्रमुखेधृष्टद्युम्नो
महारथः ॥ ११ ॥ भीष्मःशांतनवोराजन्भागःकृष्णःशिखंडिनः ॥ तंविराटानुसंयातासार्धंमत्स्यैःप्रहारिभिः ॥ १२ ॥ ज्येष्ठस्यपांडुपुत्रस्यभागोमद्राधिपोबली ॥ तौतु
तत्राब्रुवन्केचिद्विषमौनोमताविति ॥ १३ ॥ दुर्योधनःसहसुतःसार्धंभ्रातृशतेनच ॥ प्राच्याश्चदाक्षिणात्याश्चभीमसेनस्यभागतः ॥ १४ ॥ अर्जुनस्यतुभागेनक
र्णोवैकर्तनोमतः ॥ अश्वत्थामाविकर्णश्चसैंधवश्चजयद्रथः ॥ १५ ॥ अशक्याश्चैवयेकेचित्पृथिव्यांशूरमानिनः ॥ सर्वांस्तानर्जुनःपार्थःकल्पयामासभागतः
॥ १६ ॥ महेष्वासाराजपुत्राभ्रातरःपंचकेकयाः ॥ केकयानेवभागेनकृत्वायोत्स्यंतिसंयुगे ॥ १७ ॥ तेषामेवकृतोभागोमालवाःशाल्वकास्तथा ॥ त्रिगर्तानां
चवैमुख्यौयौतौसंशप्तकाविति ॥ १८ ॥ दुर्योधनसुताःसर्वेतथादुःशासनस्यच ॥ सौभद्रेणकृतोभागोराजाचैववृहद्बलः ॥ १९ ॥ द्रौपदेयामहेष्वासाःसुवर्णविकृ
तध्वजाः ॥ धृष्टद्युम्नमुखाद्रोणमभियास्यंतिभारत ॥ २० ॥ चेकितानःसोमदत्तद्वैरथेयोद्रुमिच्छति ॥ भोजंतुकृतवर्माणंयुयुधानोयुयुत्सति ॥ २१ ॥ सहदेवस्तु
माद्रेयःशूरःसंकंदनोयुधि ॥ स्वमंशंकल्पयामासश्यालंतेसुबलात्मजम् ॥ २२ ॥ उलूकंचैवकैतव्येचसारस्वतागणाः ॥ नकुलःकल्पयामासभागंमाद्रवतीसुतः
॥ २३ ॥ येचान्येपार्थिवाराजन्प्रत्युद्यास्यंतिसंगरे ॥ समाह्वानेनतांश्चापिपांडुपुत्राअकल्पयन् ॥ २४ ॥ एवमेषामनीकानिप्रविभक्तानिभागशः ॥ यत्तेकार्यं
सपुत्रस्यक्रियतांतदकालिकम् ॥ २५ ॥ ॥ धृतराष्ट्रउवाच ॥ ॥ नसंतिसर्वेपुत्रामेमूढादुर्यूतदेविनः ॥ येषांयुद्धंबलवताभीमेनरणमूर्धनि ॥ २६ ॥ राजानःपार्थि
वाःसर्वेप्रोक्षिताःकालधर्मणा ॥ गांडीवाग्निप्रवेक्ष्यंतिपतंगाइवपावकम् ॥ २७ ॥ विद्युतांवाहिनींमन्येकृतवैरैर्महात्मभिः ॥ तांरणेकेऽनुयास्यंतिप्रभग्नांपांडवैर्यु
धि ॥ २८ ॥ सर्वेत्यतिरथाःशूराःकीर्तिमंतःप्रतापिनः ॥ सूर्यपावकयोस्तुल्यास्तेजसासमितिंजयाः ॥ २९ ॥ येषांयुधिष्ठिरोनेतागोप्ताचमधुसूदनः ॥ योधौचपां
डवौवीरौसव्यसाचिवृकोदरौ ॥ ३० ॥ नकुलःसहदेवश्चधृष्टद्युम्नश्चपार्षतः ॥ सात्यकिर्द्रुपदश्चैवधृष्टकेतुश्चसानुजः ॥ ३१ ॥ उत्तमौजाश्चपांचाल्योयुधामन्युश्च
दुर्जयः ॥ शिखंडीक्षत्रदेवश्चतथावैराटिरुत्तरः ॥ ३२ ॥ काशयश्चेदयश्चैवमत्स्याःसर्वेचसृंजयाः ॥ विराटपुत्रावभ्रुश्चपांचालाश्चप्रभद्रकाः ॥ ३३ ॥

पशुवत्वधार्थंसंस्कृताः कालधर्मणायजमानेनवा ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥

॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ऐणेयान्हरिणशावान् तंतुनापाशेन ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥

येषामिंद्रोप्यकामानांनहरेत्पृथिवीमिमाम्॥ वीराणांरणधीराणांयेभिंयुःपर्वतानपि ॥३४॥तान्सर्वगुणसंपन्नानमनुष्यप्रतापिनः॥क्रोशतोममदुष्पुत्रोयोद्धुमिच्छतिसंजय ॥३५॥ ॥ दुर्योधनउवाच॥ ॥ उभौस्वएकजातीयौतथोभौभूमिगोचरौ॥ अथकस्मात्पांडवानामेकतोमन्यसेंजयम् ॥३६॥ पितामहंचद्रोणंचकृपंकर्णंचदुर्जयम्॥ जयद्रथंसोमदत्तमश्वत्थामानमेवच ॥३७॥ सुतेजसोमहेष्वासानिंद्रोपिसहितोऽमरैः॥ अशक्तःसमरेजेतुंकिंपुनस्तातपांडवाः॥३८॥ सर्वेचपृथिवीपालामदर्थेतातपांडवान्॥ आर्याःशस्त्रभृतःशूराःसमर्थाःप्रतिबाधितुम्॥३९॥नमामकान्पांडवास्तेसमर्थाःप्रतिवीक्षितुम्॥ पराक्रांतोत्यहंपांडून्सपुत्रान्योद्धुमाहवे॥४०॥मत्प्रियंपार्थिवाःसर्वेयेचिकीर्षतिभारत॥ तेतानावारयिष्यंतिऐणेयानिवतंतुना॥४१॥महतारथवंशेनशरजालैश्चमामकैः॥अभिद्रुताभविष्यंतिपांचालाःपांडवैःसह॥ ४२॥ ॥ धृतराष्ट्रउवाच॥ ॥ उन्मत्तइवमेपुत्रोविलपत्येषसंजय॥ नहिशक्तोरणेजेतुंधर्मराजंयुधिष्ठिरम्॥ ४३॥ जानातिहियथाभीष्मःपांडवानांयशस्विनाम्॥बलवत्तांसपुत्राणांधर्मज्ञानांमहात्मनाम्॥४४॥यतोनारोचयदयंविग्रहंतैर्महात्मभिः॥किंतुसंजयमेब्रूहिपुनस्तेषांविचेष्टितम्॥४५॥कस्तांस्तरस्विनोभूयःसंदीपयतिपांडवान्॥ अर्चिष्मतोमहेष्वासान्हविषापावकानिव॥४६॥ ॥संजयउवाच॥ ॥ धृष्टद्युम्नःसदैवैतान्संदीपयतिभारत॥ युध्यध्वमितिमाभैष्टयुद्धाद्धरतसत्तमाः॥४७॥ येकेचित्पार्थिवास्तत्रधार्तराष्ट्रेणसंगताः॥ युद्धेसमागमिष्यंतितुमुलेशस्त्रसंकुले॥४८॥ तान्सर्वानाहवेक्रुद्धान्सानुबंधान्समागतान्॥ अहमेकःसमादास्येतिमिर्मत्स्यानिवोदकात्॥४९॥भीष्मंद्रोणंकृपंकर्णंद्रौणिंशल्यंसुयोधनम्॥एतांश्चापिनिरोत्स्यामिवेलेवमकरालयम्॥५०॥ तथाब्रुवंतंधर्मात्माप्राहराजायुधिष्ठिरः॥ तवधैर्यंचवीर्यंचपांचालाःपांडवैःसह॥५१॥ सर्वेसमधिरूढाःस्मसंग्रामान्नःसमुद्धर॥ जानामित्वांमहाबाहोक्षत्रधर्मेव्यवस्थितम्॥५२॥समर्थमेकंपर्याप्तंकौरवाणांविनिग्रहे॥पुरस्तादुपयातानांकौरवाणांयुयुत्सताम्॥५३॥भवतायद्विधातव्यंतन्नःश्रेयःपरंतप॥ संग्रामादपयातानांभग्नानांशरणैषिणाम्॥५४॥ पौरुषंदर्शयन्शूरोयस्तिष्ठेदग्रतःपुमान्॥ क्रीणीयात्तंसहस्रेणइतिनीतिमतांमतम्॥५५॥ सत्वंशूरश्चवीरश्चविक्रांतश्चनरर्षभ॥ भयार्तानांपरित्रातासंयुगेषुनसंशयः॥५६॥ एवंब्रुवतिकौंतेयेधर्मात्मनियुधिष्ठिरे॥ धृष्टद्युम्नउवाचेदंमांवचोगतसाध्वसम्॥ सर्वान्जनपदान्सूतयोधादुर्योधनस्यये॥५७॥ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥

शरद्वतःआयुष्मतः विरुद्धलक्षणयागतायुषइत्यर्थः ॥ ५८ ॥ ५९ ॥ दद्धंददत ॥ ६० ॥ ६१ ॥ रुद्धंकुरुध्वम् ॥६२॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभा०सप्तपंचाशत्तमोध्यायः ॥ ५७ ॥ ॥७॥

सबाह्लिकान्कुरून्ब्रूयाःप्रातिपेयान्शरद्वतः॥ सूतपुत्रंतथाद्रोणंसहपुत्रंजयद्रथम्॥५८॥दुःशासनंविकर्णंचतथादुर्योधनंनृपम्॥भीष्मंचब्रूहिगत्वात्वभाशुगच्छचमाचिरम्॥५९॥युधिष्ठिरःसाधुनैवाभ्युपेयोमावोऽवधीदर्जुनोदेवगुप्तः॥राज्यंदद्धंधर्मराजस्यतूर्णंयाचध्वंवैपांडवंलोकवीरम्॥६०॥ नैतादृशोहियोधोस्तिपृथिव्यामिहकश्चन ॥ यथाविधःसव्यसाचीपांडवःसत्यविक्रमः॥ ६१ ॥ देवैर्हिसंभृतोदिव्योरथोगांडीवधन्वनः ॥ नसजेयोमनुष्येणमास्मरुद्धंमनोयुधि ॥ ६२ ॥ इतिश्रीमहाभारतेउद्योगपर्वणियानसंधिपर्वणिसंजयवाक्येसप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥ ॥ ७ ॥ ॥ धृतराष्ट्रउवाच ॥ ॥ क्षत्रतेजाब्रह्मचारीकौमारादपिपांडवः॥ तेनसंयुगमेष्यंतिमंदाविलपतोमम ॥ १ ॥ दुर्योधनमिवर्तस्वयुद्धाद्धरतसत्तम॥ नहियुद्धंप्रशंसंतिसर्वावस्थमरिंदम ॥ २ ॥ अलमर्धपृथिव्यास्तेसहामात्यस्यजीवितुम्॥ प्रयच्छपांडुपुत्राणांयथोचितमरिंदम ॥३॥एतद्धिकुरवःसर्वेमन्यंतेधर्मसंहितम्॥ यत्त्वंप्रशांतिमन्येथाःपांडुपुत्रैर्महात्मभिः ॥ ४ अंगेमांसमवेक्षस्वपुत्रस्वामेववाहिनीम्॥ जातएषतवाभावस्त्वंतुमोहान्नबुध्यसे ॥ ५ ॥ नत्वहंयुद्धमिच्छामिनेतदिच्छतिवाह्लिकः॥ नचभीष्मोनचद्रोणोनाश्वत्थामानसंजयः॥ ६ ॥ नसोमदत्तोनशलोनकृपोयुद्धमिच्छति॥ सत्यव्रतःपुरुमित्रोजयोभूरिश्रवास्तथा ॥ ७ ॥ येषुसंप्रतितिष्ठेयुःकुरवःपीडिताःपरैः तेयुद्धंनाभिनंदंतितत्तुभ्यंतातरोचताम्॥८॥ नत्वंकरोषिकामेनकर्णःकारयितातव॥ दुःशासनश्चपापात्माशकुनिश्चापिसौबलः॥९॥ ॥दुर्योधनउवाच॥ नाहंभवतिनद्रोणेनाश्वत्थाग्निनसंजये॥ नभीष्मेनचकांबोजेनकृपेनचवाह्लिके॥ १० ॥ सत्यव्रतेपुरुमित्रेभूरिश्रवसिवापुनः॥ अन्येषुवातावकेषुभारंकृत्वासमाह्वयम्॥ ११ ॥ अहंचतातकर्णश्चरणयज्ञंवितत्यवै॥ युधिष्ठिरंपशुंकृत्वादीक्षितौभरतर्षभ॥ १२ ॥ रथोवेदीस्रुवःखड्गोगदास्रुक्कवचंसदः॥चातुर्होत्रंचधुर्यामेशरादर्भाहविर्यशः॥ १३ ॥ आत्मयज्ञेननृपतेइष्ट्वावैवस्वतंरणे॥ विजित्यचसमेष्यावोहतामित्रौश्रियावृतौ॥ १४॥ अहंचतातकर्णश्चभ्रातादुःशासनश्चमे॥ एतेवयंहनिष्यामःपांडवान्समरेत्रयः॥ १५॥

क्षत्रेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ जातएषतवाभावइत्यत्रशमएवमहच्छ्रेयइत्याधुनिकःपाठः तराभ्यावइतिपाठेतराणामश्वादीनांवेगवतांवाहनानामभ्यावःसर्वतःखादनं कंडूरोगाद्युपद्रवइतियावत् अवक्षरणगतिकांतीत्यादेःखादनार्थात्घञ् आस्रावइतिपाठेआस्रावःक्षतं यानेषूपद्रवःपराजयलक्षणमितिभावः ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ चातुर्होत्रंचतुर्णांहोतॄणांऋत्विजांकर्म ॥ १३ ॥ १४ ॥ १५ ॥

॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ रुरूणामिवेत्यत्रकुरूणांलाटभाषया अजानामितिपाठोयुक्तः पक्षेकुरूणांमध्येवरान्वरान्व्याघ्राइवेतियोजना ॥ २० ॥ भारतीसेनास्त्रीरूपकेणनिर्दिष्टा ॥ २१ ॥ धनं

अहंहिपांडवान्हत्वाप्रशास्तापृथिवीमिमाम्॥मांवाहत्वापांडुपुत्राभोक्तारःपृथिवीमिमाम्॥१६॥त्यक्तंमेजीवितंराज्यंधनंसर्वंचपार्थिव॥नजातुपांडवैःसार्धं वसेयमहमच्युत॥१७॥यावद्धिसूच्यास्तीक्ष्णायाविध्येदग्रेणमारिष॥ तावदप्यपरित्याज्यंभूमेर्नःपांडवान्प्रति॥१८॥ ॥ धृतराष्ट्रउवाच॥ ॥ सर्वान्वस्तात शोचामित्यक्तोदुर्योधनोमया॥येमंदमनुयास्यध्वंयांतंवैवस्वतक्षयम्॥१९॥रुरूणामिवयूथेषुव्याघ्राःप्रहरतांवराः॥वरान्वरान्हनिष्यंतिसमेतायुधिपांडवाः ॥२०॥प्रतीपमिवमेभातियुयुधानेनभारती॥व्यस्तासीमंतिनीग्रस्ताप्रमृष्टादीर्घबाहुना॥२१॥संपूर्णंपूरयन्भूयोधनंपार्थस्यमाधवः॥शैनेयःसमरेस्थाता बीजवत्प्रवपन्शरान्॥२२॥सेनामुखेप्रयुद्धानांभीमसेनोभविष्यति॥तंसर्वेसंश्रयिष्यंतिप्राकारमकुतोभयम्॥२३॥यदाद्रक्ष्यसिभीमेनकुंजरान्विनिपातिता न्॥विशीर्णदंतान्गिर्याभान्भिन्नकुंभान्सशोणितान्॥२४॥तानभिप्रेक्ष्यसंग्रामेविशीर्णानिवपर्वतान्॥भीतोभीमस्यसंस्पर्शात्स्मर्तासिवचनस्यमे॥२५ निर्दग्धंभीमसेनेनसैन्यंरथहयद्विपम्॥गतिमग्नेरिवप्रेक्ष्यस्मर्तासिवचनस्यमे॥२६॥महद्वोभयमागामिनचेच्छाम्यथपांडवैः॥गदयाभीमसेनेनहताःशममु पैष्यथ॥२७॥महावनमिवच्छिन्नंयदाद्रक्ष्यसिपातितम्॥बलंकुरूणांभीमेनतदास्मर्तासिमेवचः॥ ॥२८॥ ॥वैशंपायनउवाच॥ ॥ एतावदुक्त्वाराजातुस र्वांस्तान्पृथिवीपतीन्॥अनुभाष्यमहाराजपुनःपप्रच्छसंजयम्॥२९॥ इतिश्रीमहाभारतेउद्योगपर्वणियानसंधिपर्वणिधृतराष्ट्रवाक्येऽष्टपंचाशत्तमोऽध्या यः॥५८॥धृतराष्ट्रउवाच॥ ॥यदब्रूतांमहात्मानौवासुदेवधनंजयौ॥तन्मेब्रूहिमहाप्राज्ञशुश्रूषेवचनंतव॥१॥ संजयउवाच॥शृणुराजन्यथादृष्टौमयाकृ ष्णधनंजयौ॥ऊचतुश्चापियद्वीरौतत्तेवक्ष्यामिभारत॥२॥पादांगुलीरभिप्रेक्षन्प्रयतोहंकृतांजलिः॥शुद्धांतंप्राविशंराजन्नाख्यातुंनरदेवयोः॥३॥नैवाभिमन्यु र्नयमौतंदेशमभियांतिवै॥यत्रकृष्णौचकृष्णाचसत्यभामाचभामिनी॥४॥उभौमध्वासवक्षीबावुभौचंदनरूषितौ॥स्रग्विणौवरवस्त्रौतौदिव्याभरणभूषितौ ॥५॥नैकरत्नविचित्रंतुकांचनंमहदासनम्॥विविधास्तरणाकीर्णंयत्रासातामरिंदमौ॥६॥अर्जुनोत्संगगौपादौकेशवस्योपलक्षये॥अर्जुनस्यचकृष्णा यांसत्यायांचमहात्मनः॥७॥

बलम्॥२२॥प्राकारमिवभीमंसंश्रयिष्यंति॥२३॥२४॥२५॥२६॥२७॥ ॥२८॥२९॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेअष्टपंचाशत्तमोऽध्यायः॥५८॥ ॥७॥ यदब्रूतामिति॥१॥२॥३॥४॥५॥आसातामुपविष्टौ॥६॥७॥

॥ ८ ॥ ९ ॥ १० ॥ द्रोणभीष्माभ्यांद्रोणभीष्मयोः ॥ ११ ॥ मानसःसंकल्पःसेत्स्यते ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ ऋणमिति वस्त्रापहरणकालेगोविंदेति

कांचनंपादपीठंतुपार्थोमेप्रादिशत्तदा॥तदहंप्राणिनास्पृष्ट्वाततोभूमावुपाविशम्॥८॥ऊर्ध्वरेखातलौपादौपार्थस्यशुभलक्षणौ॥पादपीठादपहृतौतत्रापश्य महंशुभौ॥९॥श्यामौबृहंतौतरुणौशालस्कंधाविवोद्गतौ॥एकासनगतौदृष्ट्वाभयंमांमहदाविशत्॥१०॥इंद्रविष्णुसमावेतौमंदात्मानावबुध्यते॥संश्रया द्द्रोणभीष्माभ्यांकर्णस्यचविकत्थनात्॥११॥निदेशस्थाविमौयस्यमानसस्तस्यसेत्स्यते॥संकल्पोधर्मराजस्यनिश्चयोमेतदाभवत्॥१२॥सत्कृतश्चान्नपा नाभ्यामासीनोलब्धसत्क्रियः॥अंजलिंमूर्ध्निसंधायतौसंदेशमचोदयम्॥१३॥धनुर्गुणकिणांकेनपाणिनाशुभलक्षणम्॥पादमानमयन्पार्थःकेशवंसमचोद यत्॥१४॥इंद्रकेतुरिवोत्थायसर्वाभरणभूषितः॥इंद्रवीर्योपमःकृष्णःसंविष्टोमाभ्यभाषत॥१५॥वाचंसवदताश्रेष्ठोह्लादिनींवचनक्षमाम्॥त्रासिनींधार्तराष्ट्रा णांमृदुपूर्वांसुदारुणाम्॥१६॥वाचंतांवचनार्हस्यशिक्षाक्षरसमन्विताम्॥अश्रौषमहमिष्टार्थांपश्चाद्धृदयहारिणीम्॥१७॥ ॥वासुदेवउवाच॥संजयेदंवचो ब्रूयाधृतराष्ट्रंमनीषिणम्॥कुरुमुख्यस्यभीष्मस्यद्रोणस्यापिचशृण्वतः॥१८॥आवयोर्वचनात्सूतज्येष्ठानप्यभिवादयन्॥यवीयसश्चकुशलंपश्चात्पृष्ट्वैवमुत्तरं ॥१९॥यजध्वंविविधैर्यज्ञैर्विप्रेभ्योदत्तदक्षिणाः॥पुत्रैर्दारैश्चमोदध्वंमहद्वोभयमागतम्॥२०॥अर्थांस्त्यजतपात्रेभ्यःसुतान्प्राप्नुतकामजान्॥प्रियंप्रियेभ्य श्चरतराजाहित्वरतेजये॥२१॥ऋणमेतत्प्रवृद्धंमेहृदयान्नापसर्पति॥यद्गोविंदेतिचुक्रोशकृष्णामांदूरवासिनम्॥२२॥तेजोमयंदुराधर्षंगांडीवंयस्यकार्मुकम् मद्द्वितीयेनतेनेहवैरंवःसव्यसाचिना॥२३॥मद्द्वितीयंपुनःपार्थंकःप्रार्थयितुमिच्छति॥योनकालपरीतोवाप्यपिसाक्षात्पुरंदरः॥२४॥बाहुभ्यामुद्वहेद्भूमिंदहेत्क्रु द्धइमाःप्रजाः॥पातयेत्त्रिदिवाद्देवान्योर्जुनंसमरेजयेत्॥२५॥देवासुरमनुष्येषुयक्षगंधर्वभोगिषु॥नतंपश्याम्यहंयुद्धेपांडवंयोभ्ययाद्रणे॥२६॥यत्तद्विरा टनगरेश्रूयतेमहदद्भुतम्॥एकस्यचबहूनांचपर्याप्तंतन्निदर्शनम्॥२७॥एकेनपांडुपुत्रेणविराटनगरेयदा॥भग्नाःपलायतदिशःपर्याप्तंतन्निदर्शनम्॥२८॥बलंवी र्यंचतेजश्चशीघ्रतालघुहस्तता॥अविषादश्चधैर्यंचपार्थान्नान्यत्रविद्यते॥२९॥

चुक्रोशतद्वस्त्रप्रदानमात्रेणतस्याक्रोशस्यऋणंनपरिहृतंकिंतुकौरवाणामुच्छेदंविनातत्हृदयान्नापसर्पतीत्यर्थः॥२२॥२३॥२४॥२५॥२६॥२७॥२८॥ बलंशारीरं वीर्यंमानसोत्साहः तेजःशौ र्यं शीघ्रताशीघ्रंकार्यावबोधःलघुहस्ततावेगेनबाणप्रक्षेप्तृता॥२९॥

॥ २० ॥ २१ ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेएकोनषष्टितमोऽध्यायः ॥ ५९ ॥ ॥ ७ ॥ ॥ संजयस्येति ॥ १ ॥ २ ॥ ३ ॥ वचसएवगुणान्दोषांश्चनिश्चित्यस्वेषांपरेषांचबलाबलंनिश्चि

इत्यब्रवीद्धृषीकेशःपार्थमुद्धर्षयन्गिरा ॥ गर्जन्समयवर्षीवगगनेपाकशासनः ॥ २० ॥ केशवस्यवचःश्रुत्वाकिरीटीश्वेतवाहनः ॥ अर्जुनस्तन्महद्वाक्यमब्रवीद्रो
महर्षणम् ॥ २१ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणियानसंधिपर्वणिसंजयेनश्रीकृष्णवाक्यकथनेएकोनषष्टितमोऽध्यायः ॥ ५९ ॥ ॥ ७ ॥ ॥ वैशंपायनउ
वाच ॥ ॥ संजयस्यवचःश्रुत्वाप्रज्ञाचक्षुर्जनेश्वरः ॥ ततःसंख्यातुमारेभेतद्वचोगुणदोषतः ॥ १ ॥ प्रसंख्यायचसौक्ष्म्येणगुणदोषान्विचक्षणः ॥ यथावन्मतितत्त्वेन
जयकामःसुतान्प्रति ॥ २ ॥ बलाबलंविनिश्चित्ययाथातथ्येनबुद्धिमान् ॥ शक्तिंसंख्यातुमारेभेतदावैमनुजाधिपः ॥ ३ ॥ देवमानुषयोःशक्त्यातेजसाचैवपांड
वान् ॥ कुरून्शक्त्याल्पतरयादुर्योधनमथाब्रवीत् ॥ ४ ॥ दुर्योधनेयंचिंतामेशश्वन्नव्युपशाम्यति ॥ सत्यंह्येतदहंमन्येप्रत्यक्षंनानुमानतः ॥ ५ ॥ आत्मजेषुपरंस्ने
हंसर्वभूतानिकुर्वते ॥ प्रियाणिचैषांकुर्वंतियथाशक्तिहितानिच ॥ ६ ॥ एवमेवोपकर्तृणांप्रायशोलक्षयामहे ॥ इच्छंतिबहुलंसंतःप्रतिकर्तुंमहत्प्रियम् ॥ ७ ॥ अग्निःसा
चिव्यकर्तास्यात्खांडवेतत्कृतंस्मरन् ॥ अर्जुनस्यापिभीमेस्मिन्कुरुपांडुसमागमे ॥ ८ ॥ जातिगृद्ध्याभिपन्नाश्चपांडवानामनेकशः ॥ धर्मादयःसमेष्यंतिसमा
हूतादिवौकसः ॥ ९ ॥ भीष्मद्रोणकृपादीनांभयादशनिसन्निभम् ॥ रिरक्षिषंतःसंरंभंगमिष्यंतीतिमेमतिः ॥ १० ॥ तेदेवैःसहिताःपार्थानशक्याःप्रतिवीक्षितुम् ॥
मानुषेणनरव्याघ्रावीर्यवंतोह्यपारगाः ॥ ११ ॥ दुरासदंयस्यदिव्यंगांडीवंधनुरुत्तमम् ॥ दारुणौचाक्षयौदिव्यौशरपूर्णौमहेषुधी ॥ १२ ॥ वानरश्चध्वजेदिव्योनिः
संगोधूमवद्गतिः ॥ रथश्चचतुरंतायांयस्यनास्तिसमःक्षितौ ॥ १३ ॥ महामेघनिभश्चापिनिर्घोषःश्रूयतेजनैः ॥ महाशनिसमःशब्दःशात्रवाणांभयंकरः ॥ १४ ॥
यंचातिमानुषंवीर्येकृत्स्नोलोकोव्यवस्यति ॥ देवानामपिजेतारंयंविदुःपार्थिवारणे ॥ १५ ॥ शतानिपंचचैवेषून्योगृह्णन्नैवदृश्यते ॥ निमेषांतरमात्रेणमुंचन्दू
रंचपातयन् ॥ १६ ॥ यमाहभीष्मोद्रोणश्चकृपोद्रौणिस्तथैवच ॥ मद्रराजस्तथाशल्योमध्यस्थायेचमानवाः ॥ १७ ॥ युद्धायावस्थितंपार्थंपार्थिवैरतिमानुषैः ॥
अशक्यंरथशार्दूलंपराजेतुमरिंदमम् ॥ १८ ॥ क्षिपत्येकेनवेगेनपंचबाणशतानियः ॥ सदृशंबाहुवीर्येणकार्तवीर्यस्यपांडवम् ॥ १९ ॥

त्याह देवेति पांडवेषुदैवंमानुषंचबलमस्तिअस्माकंतुकेवलंमानुषमेवास्तीत्यर्थः शक्त्या परिच्छिद्येतिशेषः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ दैवंबलाधिक्यंपांडवेषुदर्शयति अग्निरिति भीमेभयंकरे ॥ ८ ॥ जा
तिगृद्ध्याजन्मग्रहणाद्धेतोःयुधिष्ठिरादीनांपितरोधर्मादयोपितेषांसहायाःसंति ॥ ९ ॥ रिरक्षिषंतःरक्षितुमिच्छंतः संरंभंक्रोधम् ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥

॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेषष्टितमोऽध्यायः ॥ ६० ॥ ॥ ७ ॥ ॥ पितुरिति ॥ १ ॥ २ ॥ अकामेति कामद्वेषयोरसंयोगात् ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ दैवे
ष्विति एतेवेदवादयःदैवेषुभावेषुशमदमादिषुशश्वदपेक्षकाअपेक्षमाणाःनतुआसुरेषुभावेषुकामक्रोधादिषु तस्माद्देवाःपांडवानांसाहाय्यंनकरिष्यंतीतिभावः ॥ ७ ॥ अथेति दैवप्रामाण्यात्वेदप्रामाण्यात्

तमर्जुनंमहेष्वासंमहेंद्रोपेंद्रविक्रमम् ॥ निघ्नंतमिवपश्यामिविमर्देस्मिन्महाहवे ॥ २० ॥ इत्येवंचिंतयन्कृत्स्नमहोरात्राणिभारत ॥ अनिद्रोनिःसुखश्चास्मिकुरू
णांशमचिंतया ॥ २१ ॥ क्षयोदयोयंसुमहान्कुरूणांप्रत्युपस्थितः ॥ अस्यचैकलहस्यांतःशमादन्योनविद्यते ॥ २२ ॥ शमोमेरोचतेनित्यंपार्थैस्तातनविग्रहः ॥ कुरु
भ्योहिसदामन्येपांडवान्शक्तिमत्तरान् ॥ २३ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणियानसंधिपर्वणिधृतराष्ट्रविवेचनेषष्टितमोऽध्यायः ॥ ६० ॥ ॥ ७ ॥ ॥
वैशंपायनउवाच ॥ ॥ पितुरेतद्वचःश्रुत्वाधार्तराष्ट्रोत्यमर्षणः ॥ आधायविपुलंक्रोधंपुनरेवेदमब्रवीत् ॥ १ ॥ अशक्यादेवसचिवाःपार्थास्युरितियद्भवान् ॥ मन्य
तेतद्भयंव्येतुभवतोराजसत्तम ॥ २ ॥ अकामद्वेषसंयोगाल्लोभाद्वोहाच्चभारत ॥ उपेक्षयाचभावानांदेवादेवत्वमाप्नुवन् ॥ ३ ॥ इतिद्वैपायनोव्यासोनारदश्चम
हातपाः ॥ जामदग्न्यश्चरामोनःकथामकथयत्पुरा ॥ ४ ॥ नैवमानुषवद्देवाःप्रवर्तंतेकदाचन ॥ कामात्क्रोधात्तथालोभाद्द्वेषाच्चभरतर्षभ ॥ ५ ॥ यदाह्यग्निश्चवा
युश्चधर्मइंद्रोश्विनावपि ॥ कामयोगात्प्रवर्तंरन्पार्थादुःखमाप्नुयुः ॥ ६ ॥ तस्मान्नभवतार्चिताकार्यैषास्यात्कथंचन ॥ दैवेष्वपेक्षकाह्येतेशश्वद्भावेषुभारत ॥ ७ ॥
अथचेत्कामसंयोगाद्द्वेषोलोभश्चलक्ष्यते ॥ देवेषुदैवप्रामाण्यान्नैषांतद्विक्रमिष्यति ॥ ८ ॥ मयाभिमंत्रितःशश्वज्ज्ञातवेदाःप्रशाम्यति ॥ दिधक्षुःसकलाँल्लोकान्प
रिक्षिप्यसमंततः ॥ ९ ॥ यद्वापरमकंतेजोयेनयुक्तादिवौकसः ॥ ममाप्यनुपमंभूयोदेवेभ्योविद्धिभारत ॥ १० ॥ विदीर्यमाणांवसुधांगिरीणांशिखराणिच ॥
लोकस्यपश्यतोराजन्स्थापयाम्यभिमंत्रणात् ॥ ११ ॥ चेतनाचेतनस्यास्यजंगमस्थावरस्यच ॥ विनाशायसमुत्पन्नमहंघोरंमहास्वनम् ॥ १२ ॥ अश्मवर्षंचवा
युंचशमयामीहनित्यशः ॥ जगतःपश्यतोभीक्ष्णंभूतानामनुकंपया ॥ १३ ॥ स्तंभितास्वप्सुगच्छंतिमयारथपदातयः ॥ देवासुराणांभावानामहमेकःप्रवर्तिता
॥ १४ ॥ अक्षौहिणीभिर्यान्देशान्यामिकार्येणकेनचित् ॥ तत्राश्वामेप्रवर्तंतेयत्रयत्राभिकामये ॥ १५ ॥ भयानकानिविषयेष्वालादीनिनसंतिमे ॥ मंत्रगु
प्तानिभूतानिनहिंसंतिभयंकराः ॥ १६ ॥ निकामवर्षीपर्जन्योराजन्विषयवासिनाम् ॥ धर्मिष्ठाश्चप्रजाःसर्वाईतयश्चनसंतिमे ॥ १७ ॥

कामादिमताकृतमपिनिष्फलंभविष्यतीत्यर्थः ॥ ८ ॥ दैवंबलमप्यस्तीत्याह मयाभीति ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥

॥ १८ ॥ मद्विषःमच्छत्रून् ॥ १९ ॥ २० ॥ अभिध्यामिचिंतयामि ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ इतीति इतिएवंबुर्योधनोक्तंधृतराष्ट्रःसंजयंप्रतिउक्तवान्प्राप्तकालंपूर्वप्रस्तुतंअर्जुनमाहात्म्यमेवअपृच्छत् इदंमत्पुत्रस्यबलंज्ञात्वापांडवबलंचत्वंब्रूहीत्यर्थः युयुत्सोः वेश्यापुत्रस्यपांडवेष्वनुरक्तस्यकार्याणिज्ञात्वा एतेषांसर्वेषांविनाशेनतस्यैवराज्यलाभरूपाणिकार्याणिअविष्यंती

अश्विनावथवाग्न्यौमरुद्भिःसहदंशवा ॥ धर्मश्चैवमयाद्दिष्टान्नोत्सहंतेभिरक्षितुम्॥१८॥यदित्येतेसमर्थाःस्युर्मद्विषन्नातुमंजसा ॥ नस्मत्रयोदशसमाःपार्था दुःखमवाप्नुयुः॥ १९ ॥ नैवदेवानगंधर्वानासुरानचराक्षसाः॥ शक्तास्त्रातुंमयाद्दिष्टंसत्यमेतद्ब्रवीमिते ॥२०॥ यदभिध्याम्यहंशश्वच्छुभंवायदिवाशुभम् ॥ नैत द्विपन्नपूर्वंममित्रेष्वरिषुचोभयोः ॥ २१ ॥ भविष्यतीदमितिवायद्ब्रवीमिपरंतप ॥ नान्यथाभूतपूर्वंचसत्यवागितिमांविदुः॥ २२॥ लोकसाक्षिकमेतन्मेमाहा त्म्यंदिक्षुविश्रुतं ॥ आश्वासनार्थंभवतःप्रोक्तंनश्लाघयानृप ॥ २३ ॥ नत्वहंश्लाघनोराजन्भूतपूर्वःकदाचन॥ असदाचरितंह्येतद्यदात्मानंप्रशंसति ॥ २४॥ पांडवांश्चैवमत्स्यांश्चपांचालान्केकयैःसह ॥ सात्यकिंवासुदेवंचश्रोतासिविजितान्मया ॥ २५ ॥ सरितःसागरंप्राप्ययथानश्यंतिसर्वशः॥ तथैवतेविनंक्ष्यंति मामासाद्यसहान्वयाः॥ २६॥ परावुद्धिःपरंतेजोवीर्यंचपरमंमम ॥ पराविद्यापरोयोगोममतेभ्योविशिष्यते ॥ २७॥ पितामहश्चद्रोणश्चकृपःशल्यःशलस्तथा अस्त्रेषुयत्प्रजानंतिसर्वंतन्मयिविद्यते ॥ २८ ॥ इत्युक्तासंजयंभूयःपर्यपृच्छतभारत ॥ ज्ञात्वायुयुत्सोःकार्याणिप्राप्तकालमरिंदमः॥ २९ ॥ इतिश्रीमहाभारतेउ द्योगपर्वणियानसंधिपर्वणिदुर्योधनवाक्येएकषष्टितमोऽध्यायः॥६१ ॥ ॥७॥ ॥वैशंपायनउवाच ॥ तथातुपृच्छंतमतीवपार्थंवैचित्रवीर्यंतमचिंतयित्वा॥ उवाचकर्णोधृतराष्ट्रपुत्रंप्रहर्षयन्संसदिकौरवाणां॥१॥मिथ्याप्रतिज्ञायमयायदस्त्रंरामात्कृतंब्रह्ममयंपुरस्तात्॥ विज्ञायतेनास्मितदैवमुक्तस्तेनांतकालेप्रतिभा स्यतीति॥२॥महापराधेत्यपियन्नतेनमहर्षिणाहंगुरुणाचशप्तः॥शक्तःप्रदग्धुंत्यपितिग्मतेजाःससागरामप्यवनिंमहर्षिः॥३॥प्रसादितंत्यस्यमयामनोभूच्छुश्रू षयास्वेनचपौरुषेण ॥ तदस्तिचास्त्रंममसावशेषंतस्मात्समर्थोस्मिममैषभारः ॥ ४ ॥ निमेषमात्रात्तृपेःप्रसादमवाप्यपांचालकरूषमत्स्यान् ॥ निहत्यपार्था न्सहपुत्रपौत्रैर्लोकानहंशस्त्रजितान्प्रपत्स्ये॥५॥पितामहस्तिष्ठतुतेसमीपेद्रोणश्चसर्वेचनरेंद्रमुख्याः॥यथाप्रधानेनबलेनगत्वापार्थान्हनिष्यामिममैषभारः॥६॥

तिज्ञात्वेत्यर्थः ॥ २९ ॥ ॥ इतिउद्योगप॰नैलकंठीयेभारतभावदीपेएकषष्टितमोऽध्यायः ॥ ६१ ॥ ॥७॥ तथेति पार्थंपृच्छंतंवैचित्रवीर्यंअचिंतयित्वेतिसंबंधः ॥ १ ॥ हेस्तेनअंतकालेप्रतिभाअस्त्रस्मृतिः अस्यतिक्षिपतित्वांत्यक्ष्यतीत्यर्थः ॥ २ ॥ ३ सावशेषंममआयुरस्तिअतोंतकालस्यानुपस्थितत्वात्तदस्त्रंममास्तीतिअहंसमर्थोस्मि अर्जुनंजेतुमित्यर्थः ॥ ४ ॥ प्रपत्स्येप्रापयिष्ये ॥ ५ ॥ ६ ॥

॥ ७७ ॥

प्रधानेत्वयिहतेसतिसर्वेहताःस्युरतआत्मानंगोपायेत्युपहासः ॥ ७ ॥ आत्मामनोनियंतुंयुक्तः अर्जुनद्वेषादुपरमःकर्तव्यस्तस्यदुर्जयत्वंज्ञात्वेतिभावः ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ मांकृतविजयंसभा यांद्रक्ष्यति अयंभावः यद्यहंयोत्स्येतर्हिएतस्यजीवनंभविष्यतितन्माभूदतोऽयंनिःसारोम्रियतामिति ॥ १३॥ १४ ॥ सत्यप्रतिज्ञःपूर्वंआदावेवयोत्स्यइत्युक्ताइदानींमयिसतिनयोत्स्यइतिवदतिमज्जीवनप

एवंब्रुवंतंतमुवाचभीष्मःकिंकत्थसेकालपरीतबुद्धे ॥ नकर्णजानासियथाप्रधानेहतेहताःस्युर्धृतराष्ट्रपुत्राः॥७॥ यत्खांडवंदाहयताकृतंहिकृष्णद्वितीयेनधनंजये न॥ श्रुत्वैवतत्कर्मनियंतुमात्मायुक्तस्त्वयावैसहबांधवेन ॥ ८ ॥ यांचापिशक्तिंत्रिदशाधिपस्तेददौमहात्माभगवान्महेंद्रः॥ भस्मीकृतांतांसमरेविशीर्णांचकाह तांद्रक्ष्यसिकेशवेन॥९॥ यस्तेशरःसर्पमुखोविभातिसदाभ्यमाल्यैर्महितःप्रयत्नात्॥ सपांडुपुत्राभिहतःशरौघैःसहत्वयायास्यतिकर्णनाशम्॥१०॥बाणस्यभौ मस्यचकर्णहंताकिरीटिनंरक्षतिवासुदेवः॥ यस्त्वादृशानांचवरीयसांचहंतारिपूणांतुमुलेप्रगाढे॥ ११॥ ॥कर्णउवाच॥ ॥असंशयंदृष्णिपतिर्यथोक्तस्तथा चभूयांश्चततोमहात्मा॥ अहंयदुक्तःपरुषंतुकिंचित्पितामहस्तस्यफलंभृणोतु॥१२॥न्यस्यामिशस्त्राणिनजातुसंख्येपितामहोद्रक्ष्यतिमांसभायाम्॥त्वयिप्रशां तेतुममप्रभावंद्रक्ष्यंतिसर्वेभुविभूमिपालाः॥ १३॥ ॥वैशंपायनउवाच ॥ ॥ इत्येवमुक्तासमहाधनुष्मान्हित्वासभांस्वंभवनंजगाम॥ भीष्मस्तुदुर्योधनमे वराजन्मध्येकुरूणांप्रहसन्नुवाच॥ १४॥ सत्यप्रतिज्ञःकिलसूतपुत्रस्तथासभारंविषहेतकस्मात्॥ व्यूहंप्रतिव्यूह्यशिरांसिभित्त्वालोकक्षयंपश्यतभीमसेनात् ॥ १५॥ आवंत्यकालिंगजयद्रथेषुचेदिध्वजेतिष्ठतिबाह्लिकेच॥ अहंहनिष्यामिसदापरेषांसहस्रशश्चायुतशश्चयोधान्॥ १६॥ यदैवरामेभगवत्यनिंद्येब्रह्म ब्रुवाणःकृतवांस्तदस्त्रम्॥ तदैवधर्मश्चतपश्चनष्टंवैकर्तनस्याधमपूरुषस्य॥ १७॥ ॥वैशंपायनउवाच॥ ॥तथोक्तवाक्येनृपतौद्रभीष्मेनिक्षिप्यशस्त्राणिगतेच कर्णे॥ वैचित्रवीर्यस्यसुतोल्पबुद्धिर्दुर्योधनःशांतनवंबभाषे ॥ १८ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणियानसंधिपर्वणिकर्णभीष्मवाक्येद्विषष्टितमोऽध्या यः॥ ६२॥ ॥७॥ ॥दुर्योधनउवाच॥ ॥ सदृशानांमनुष्येषुसर्वेषांतुल्यजन्मनाम्॥ कथमेकांततस्तेषांपार्थानांमन्यसेजयम्॥ १॥ वयंचतेपितुल्यावैवी र्येणचपराक्रमैः॥ समेनवयसाचैवप्रातिभेनश्रुतेनच॥२॥ अस्त्रेणयोधयुग्याचशीघ्रत्वेकौशलेतथा॥सर्वेस्मसमजातीयाःसर्वेमानुषयोनयः॥३॥ पितामहवि जानीषेपार्थेषुविजयंकथम्॥ नाहंभवतिनद्रोणेनकृपेनचबाह्लिके॥ ४॥

यैंतंत्वत्क्षयमुपेक्षतेसकथंमित्रमितिभावः ॥ १५ ॥ १६ ॥ ब्रह्मब्रुवाणःब्राह्मणोहमितिवदन् ॥ १७ ॥ १८ ॥ इतिउद्योगप॰नैलकंठीयेभारतभावदीपेद्विषष्टितमोऽध्यायः ॥ ६२ ॥ ॥७॥ ॥ सदृशा नामिति ॥ १ ॥ प्रातिभेनसमयस्फूर्त्या ॥ २ ॥ योधयुग्याशूरसमूह्यायुजेरौणादिकःकिःकुत्वमार्षम् ॥ ३ ॥ ४ ॥

॥ ५ ॥ ६ ॥ तरित्रानौरक्षकाःकर्णधारादयःतद्रहितान्जलंयथापरिहरतिआवर्तेपातयति अतरित्रानितिपाठेअरित्रंकेनिपातननौचालनदंडस्तद्रहितानित्यर्थः तद्वत्मामकास्तान्रणेबाहुभ्यांपरिहरिष्यंति ॥७॥८॥अदांतोयंकुलक्षयंकरिष्यतीतिवक्ष्यन्दममेवप्रशंसन्विदुरउवाच हेहेति किंतन्निःश्रेयसंकल्याणंब्राह्मणस्यब्रह्मजिज्ञासोःदमएवसनातनोऽनादिर्मुख्योधर्मः ॥ ९ ॥ तस्यपुंसःदानंक्षमासिद्धिर्मोक्षश्च उपपद्यते कस्य यस्यदमःदानादीन्अनुवर्तते दांतःसन्ययोदानादिकंकरोतिसदानफलंक्षमांसिद्धिंचप्राप्नोतीत्यर्थः ॥१०॥ विंदतेलभतेदमेन महद्ब्रह्म ॥११॥ १२ ॥ समुदयःउदयहेतुः ॥१३॥ तान्येवाह क्षमा

अन्येषुचनरेंद्रेषुपराक्रम्यसमारभे ॥ अहंवैकर्तनःकर्णोभ्रातादुःशासनश्चमे ॥ ५ ॥ पांडवान्समरेपंचहनिष्यामःशितैःशरैः॥ ततोराजन्महायज्ञैर्विविधैर्भूरिदक्षिणैः॥ ६ ॥ ब्राह्मणांस्तर्पयिष्यामिगोभिरश्वैर्धनेनच॥ यदापरिकरिष्यंतिऐणेयानिवतंतुना ॥ अतरित्रानिवजलेबाहुभिर्मामकारणे॥ ७॥ पश्यंतस्तेपरांस्तत्ररथनागसमाकुलान्॥ तदादर्पविमोक्ष्यंतिपांडवाःसचकेशवः ॥८॥ ॥ विदुरउवाच॥ ॥ इहनिःश्रेयसंप्राहुर्वृद्धानिश्चितदर्शिनः॥ ब्राह्मणस्यविशेषेणदमोधर्मःसनातनः॥ ९॥ तस्यदानंक्षमासिद्धिर्यथावदुपपद्यते॥ दमोदानंतपोज्ञानमधीतंचानुवर्तते ॥ १० ॥ दमस्तेजोवर्धयतिपवित्रंदमउत्तमम्॥ विपाप्माबृहतेजास्तुपुरुषोविंदतेमहत्॥ ११॥ क्रव्याद्भ्यइवभूतानामदांतेभ्यःसदाभयम्॥ येषांचप्रतिषेधार्थंक्षत्रंसृष्टंस्वयंभुवा ॥ १२॥ आश्रमेषुचतुर्ष्वाहुर्दममेवोत्तमंव्रतम्॥ तस्यलिंगंप्रवक्ष्यामियेषांसमुदयोदमः॥ १३॥ क्षमाधृतिरहिंसाचसमतासत्यमार्जवम्॥ इंद्रियाभिजयोधैर्यमार्दवंह्रीरचापलम्॥ १४॥ अकार्पण्यमसंरंभःसंतोषःश्रद्दधानता॥ एतानियस्यराजेंद्रसदांतःपुरुषःस्मृतः॥ १५॥ कामोलोभश्चदर्पश्चमन्युर्निद्राविकत्थनम्॥ मानर्ईर्ष्याचशोकश्चनैतद्दांतेनिषेवते॥ अजिह्मंमशठंशुद्धमेतद्दांतस्यलक्षणम्॥ १६॥ अलोलुपस्तथाऽल्पेच्छुःकामानामविचिंतिता॥ समुद्रकल्पःपुरुषःसदांतःपरिकीर्तितः॥ १७॥ सुवृत्तःशीलसंपन्नःप्रसन्नात्मात्मविद्बुधः॥ प्राप्येहलोकेसंमानंसुगतिंप्रेत्यगच्छति ॥ १८ ॥ अभयंयस्यभूतेभ्यःसर्वेषामभयंयतः॥ सवैपरिणतप्रज्ञःप्रख्यातोमनुजोत्तमः॥ १९॥ सर्वभूतहितोमैत्रस्तस्मान्नोद्विजतेजनः॥ समुद्रइवगंभीरःप्रज्ञातृप्तःप्रशाम्यति॥ २०॥

परेभ्यस्ताडनादिप्राप्तावपिसंतापानुदयः धृतिःकामादिभिरननुतप्तता अहिंसावाङ्मनःशरीरैःपरस्यपीडायाअकरणं समताशत्रुमित्रादौतुल्यत्वं सत्यंयथार्थभाषणं आर्जवमकौटिल्यं इंद्रियाणांजयः धैर्यं अत्यंतापद्यपिमनसोऽवैक्लव्यं मार्दवंप्रियवादिता ह्रीरकार्यान्निवृत्तिः अचापलंस्थैर्यंवाङ्मनःकायानांएतेदांतानां गुणाः॥१४॥१५॥ कामइति कामादिमत्वादयमदांतइत्यर्थः अजिह्ममकुटिलं अशठंशुशीलं शुद्धंमनसा॥१६॥अलोलुपःआशाहीनः कामानांत्वयादीनांअविचिंतितध्यानमकुर्वन् समुद्रकल्पःगंभीराशयः॥१७॥प्रसन्नात्माशुद्धचित्तः अतएवात्मवित् बुधःज्ञातज्ञेयः प्रेत्यमृत्वा ॥१८॥१९॥२०॥

कर्मणेति दैवदत्तैर्भोगैःसदाचारेणचयेयुक्तास्तेदांतास्तएवचमोदंते ॥ २१ ॥ नैष्कर्म्यंवाङ्मनःशरीराणांसर्वात्मनाअप्रवृत्तिःनिर्विकल्पकावस्था तत्रहेतुः ज्ञानतृप्तःश्रवणमननजेनापरोक्षज्ञानेनतृप्तःरागद्वेषशून्यः तत्रापिहेतुः जितेंद्रियःकालाकांक्षीसर्वत्रममताशून्यःब्रह्मभूयायब्रह्मभावायकल्पतेयोग्योभवति ॥ २२ ॥ ब्रह्मभूयफलमाह शकुनीनामिति नतस्यप्राणाउत्क्रामंत्यत्रैवसमवनीयतेब्रह्मैवसन्ब्र

कर्मणाचरितंपूर्वंसद्भिराचरितंचयत्॥ तदेवास्थायमोदंतेदांताःशमपरायणाः॥ २१ ॥ नैष्कर्म्यंवासमास्थायज्ञानतृप्तोजितेंद्रियः॥ कालाकांक्षीचरँल्लोकेब्रह्मभूयायकल्पते॥ २२॥ शकुनीनामिवाकाशेपदंनैवोपलभ्यते॥ एवंप्रज्ञानतृप्तस्यमुनेर्वर्त्मनदृश्यते ॥ २३ ॥ उत्सृज्यैवगृहान्यस्तुमोक्षमेवाभिमन्यते॥ लोकास्तेजोमयास्तस्यकल्पंतेशाश्वतादिवि॥ २४॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणियानसंधिपर्वणिविदुरवाक्येत्रिषष्टितमोऽध्यायः॥ ६३॥ ॥ ७ ॥ विदुरउवाच॥ ॥शकुनीनामिहार्थायपाशंभूमावयोजयत्॥ कश्चिच्छाकुनिकस्तातपूर्वंषामितिशुश्रुम॥ १॥ तस्मिंस्तौशकुनौबद्धौयुगपत्सहचारिणौ॥तावुपादायतंपाशंजग्मतुःखचराबुभौ॥ २॥ तौविहायसमाक्रांतौदृष्ट्वाशाकुनिकस्तदा॥ अन्वधावदनिर्विण्णोयेनयेनस्मगच्छतः॥ ३॥ तथातमनुधावंतंमृगयुंशकुनार्थिनम्॥ आश्रमस्थोमुनिःकश्चिद्ददर्शाथकृताह्निकः॥ ४॥ तावंतरिक्षगौशीघ्रमनुयांतंमहीचरम्॥ श्लोकेनानेनकौरव्यपप्रच्छसमुनिस्तदा॥ ५॥ विचित्रमिदमाश्चर्यंमृगहन्प्रतिभातिमे॥ प्लवमानौहिखचरौपदातिरनुधावसि॥ ६॥ ॥शाकुनिकउवाच॥ ॥पाशमेकमुभावेतौसहितौहरतोमम॥ यत्रवैविवदिष्येतेतत्रमेवशमेष्यतः॥ ७॥ ॥विदुरउवाच॥ ॥तौविवादमनुप्राप्तौशकुनौमृत्युसंधितौ॥ विगृह्यचसुदुर्बुद्धीपृथिव्यांसंनिपेततुः॥ ८॥ तौयुध्यमानौसंरब्धौमृत्युपाशवशानुगौ॥ उपसृत्यापरिज्ञातोजग्राहमृगहातदा॥ ९॥ एवंयेज्ञातयोर्थेषुमिथोगच्छंतिविग्रहम्॥ तेऽमित्रवशमायांतिशकुनाविवविग्रहात्॥ १०॥संभोजनंसंकथनंसंप्रश्नोयसमागमः॥ एतानिज्ञातिकार्याणिनविरोधःकदाचन ॥ ११ ॥ येस्मकालेसुमनसःसर्वेवद्धानुपासते॥ सिंहगुप्तमिवारण्यमप्रधृष्याभवंतिते॥ १२॥ येर्थसंततमासाद्यदीनाइवसमासते॥ श्रियंतेसंप्रयच्छंतिद्विषद्भ्योभरतर्षभ॥ १३॥

ह्मप्येतीतिश्रुतेर्ब्रह्मविदोऽनुपास्यंरूपंगतस्यगगनवद्विश्वव्यापिनोगत्यभावात्सर्वगणामिवतस्यमार्गोनदृश्यते ॥ २३ ॥ केवलसंन्यासाक्रममुक्तिस्थानमाह उत्सृज्येति मोक्षंमोक्षाश्रमं शाश्वताःपुनरावृत्तिशून्याः॥ २४॥ ॥ इतिउद्योग०नैलकंठीयेभारतभा०त्रिषष्टितमोऽध्यायः॥ ६३॥ ॥ॐ॥ ॥ दमस्यश्रैष्ठ्यंप्रतिपाद्यादांतयोःकलहंकुर्वतोद्वयोरपिनाशइतिप्रतिपादयन्नाख्यायिकामुखेनाह शकुनीनामिति पूर्वेषांमुखात्॥ १॥ २॥ विहायसंव्योम॥ ३॥ ४॥ ५॥ ६॥ ७॥ ८॥ ९॥ अमित्रेतिच्छेदः॥ १०॥ ११॥ १२॥ १३॥

॥ १४ ॥ १५ ॥ विद्याजंभकवार्तिकाः विद्यामंत्रयंत्रादिरूपा जंभकौषधिसाधनानिनद्वानांप्रियाः विद्याजंभकैर्वार्तिकाः ॥ १६ ॥ कुंजभूतैःसर्वतोलताभिःपरिवृतं ॥ १७ ॥ पीतकामाक्षिकंसुवर्णमाक्षिकंधातुविशेषः ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ तवदृश्यतांत्वयाद्रष्टव्यंबलमितिशेषःयोवीरःकर्णादिः ॥ २५ ॥ २६ ॥ युध्यतोरन्यतरस्यनाशोपित्वन्नाशएवेतिभावः ॥ २७ ॥

धूमायंतेव्यपेतानिज्वलंतिसहितानिच ॥ धृतराष्ट्रोल्मुकानीवज्ञातयोभरतर्षभ॥ १४॥इदमन्यत्प्रवक्ष्यामियथादृष्टंगिरौमया ॥ श्रुत्वातदपिकौरव्ययथाश्रेयस्तथाकुरु॥ १५॥ वयंकिरातैःसहितागच्छामोगिरिमुत्तरम् ॥ ब्राह्मणैर्दैवकल्पैश्चविद्याजंभकवार्तिकैः॥१६॥ कुंजभूतंगिरिंसर्वमभितोगंधमादनम् ॥ दीप्यमानौषधिगणंसिद्धगंधर्वसेवितम् ॥ १७॥ तत्रापश्यामवैसर्वेमधुपीतकमाक्षिकम् ॥ मरुप्रपातेविषमेनिविष्टंकुंजसंमितम् ॥१८॥ आशीविषैरत्यमाणंकुबेरदयितंभृशम् ॥ यत्प्राप्यपुरुषोमर्त्योप्यमरत्वंनियच्छति ॥ १९॥ अचक्षुर्लभतेचक्षुर्दद्दोभवतिवैयुवा ॥ इतितेकथयंतिस्मब्राह्मणाजंभसाधकाः॥२०॥ततःकिरातास्तद्दृष्ट्वाप्रार्थयंतोमहीपते ॥ विनेशुर्विषमेतस्मिन्ससर्पेगिरिगह्वरे॥२१॥तथैवतवपुत्रोयंपृथिवीमेकइच्छति ॥ मधुपश्यतिसंमोहात्पतंतंनानुपश्यति॥२२॥ दुर्योधनोयोद्रुमनाःसमरेसव्यसाचिना ॥ नचपश्यामितेजोस्यविक्रमंवातथाविधम् ॥ २३ ॥एकेनरथमास्थायपृथिवीयेननिर्जिता ॥ भीष्मद्रोणप्रभृतयःसंत्रस्ताःसाधुयायिनः॥२४॥ विराटनगरेभग्नाःकिंनुतत्रतवदृश्यताम् ॥ प्रतीक्षमाणोयोवीरःक्षमतेवीक्षितंतव ॥ २५॥ द्रुपदोमत्स्यराजश्चसंक्रुद्धश्चधनंजयः ॥ नशेषयेयुःसमरेवायुयुक्ताइवाग्नयः॥ २६॥ अंकेकुरुष्वराजानंधृतराष्ट्रयुधिष्ठिरम् ॥ युध्यतोर्हिद्वयोर्युद्धेनैकांतेनभवेज्जयः॥ २७॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणियानसंधिपर्वणिविदुरवाक्येचतुःषष्टितमोऽध्यायः॥ ६४ ॥ ॥५॥ ॥ धृतराष्ट्रउवाच ॥ ॥ दुर्योधनविजानीहियत्त्वांवक्ष्यामिपुत्रक॥ उत्पथंमन्यसेमार्गमनभिज्ञइवाध्वगः॥ १ ॥ पंचानांपांडुपुत्राणांयत्तेजःप्रजिहीर्षसि ॥ पंचानामिवभूतानांमहतांलोकधारिणाम्॥२॥ युधिष्ठिरंहिकौंतेयंपरंधर्ममिहास्थितम् परांगतिमसंप्रेत्यनत्वंजेतुमिहार्हसि ॥ ३ ॥ भीमसेनंचकौंतेयंयस्यनास्तिसमोबले ॥ रणांतकंतर्जयसेमहावातमिवद्रुमः॥ ४॥ सर्वशस्त्रभृतांश्रेष्ठंमेरुशिखरिणामिव ॥ युधिगांडीवधन्वानंकोनुयुध्येतबुद्धिमान्॥ ५॥ धृष्टद्युम्नश्चपांचाल्यःकमिवाद्यनशातयेत् ॥ शत्रुमध्येशरान्मुंचन्देवराडशनीमिव ॥ ६॥

इतिउद्योगपर्वणिनैलकंठीयेभारतभावदीपेचतुःषष्टितमोऽध्यायः ॥ ६४ ॥ ॥७॥ ॥ दुर्योधनेति उत्पथंअमार्गमेवमार्गंमन्यसे ॥ १ ॥२॥ परांगतिंमरणं असंप्रेत्यअप्राप्यमरिष्यस्येवेत्यर्थः ॥ ॥ ३ ॥ ४ ॥ ५ ॥ नशातयेत्नच्छियात्॥ ६ ॥ ॥७९॥

॥ ७ ॥ प्रतिमानेनतुल्यत्वेन ॥ ८ ॥ ९ ॥ १० ॥ भीष्मंतितिक्षस्वतद्वाक्यंगृहाणेत्यर्थः ॥ ११ ॥ १२ ॥ १३ ॥१४॥१५॥ दत्त्याराज्यार्धदानेन प्रतिपादयसंभावय ॥ १६ ॥ ॥इतिउद्योगप०नैलकंठीयेभारत

सात्यकिश्चापिदुर्धर्षःसंमतोंधकवृष्णिषु ॥ ध्वंसयिष्यतितेसेनांपांडवेयहितेरतः॥ ७॥ यःपुनःप्रतिमानेनत्रीन्लोकानतिरिच्यते ॥ तंकृष्णंपुंडरीकाक्षंकोनुयुध्येतबुद्धिमान्॥ ८॥ एकतोत्यस्यदाराश्चज्ञातयश्चसबांधवाः॥ आत्माचपृथिवीचेयमेकतश्चधनंजयः॥ ९॥ वासुदेवोपिदुर्धर्षोयतात्मायत्रपांडवः॥ अविषह्यंपृथिव्यापितद्वलंयत्रकेशवः॥ १०॥तिष्ठतातसतांवाक्येसुहृदामर्थवादिनाम्॥ दृढंशांतनवंभीष्मंतितिक्षस्वपितामहम्॥ ११॥मांचब्रुवाणंशुश्रूषकुरूणामर्थदर्शिनम्॥ द्रोणंकृपंविकर्णंचमहाराजंचबाह्लिकम्॥ १२॥एतेह्यपियथैवाहंमंतुमर्हसितांस्तथा ॥ सर्वेधर्मविदोह्येतेतुल्यस्नेहाश्चभारत॥ १३॥यत्तद्विराटनगरेसहभ्रातृभिरग्रतः॥ उत्सृज्यगाःसुसंत्रस्तंबलंतेसमशीर्यत ॥ १४॥ यच्चैवनगरेतस्मिन्श्रूयतेमहदद्भुतम् ॥ एकस्यचबहूनांचपर्याप्तंतन्निदर्शनम्॥ १५॥अर्जुनस्तत्तथाकार्षीत्किंपुनःसर्वएवते ॥ सभ्रातॄनभिजानीहिवृत्त्यातंप्रतिपादय॥ १६॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणियानसंधिपर्वणिधृतराष्ट्रवाक्येपंचषष्टितमोऽध्यायः॥६५॥ ॥५॥ ॥ वैशंपायनउवाच ॥ ॥एवमुक्तामहाप्राज्ञोधृतराष्ट्रःसुयोधनम्॥ पुनरेवमहाभागःसंजयंपर्यपृच्छत ॥ १॥ ब्रूहिसंजययच्छेषंवासुदेवादनंतरम्॥ यदर्जुनउवाचत्वांपरंकौतूहलंहिमे॥२॥ ॥ संजयउवाच ॥ ॥वासुदेववचःश्रुत्वाकुंतीपुत्रोधनंजयः॥ उवाचकालेदुर्धर्षोवासुदेवस्यशृण्वतः॥३॥पितामहंशांतनवंधृतराष्ट्रंचसंजय ॥ द्रोणंकृपंचकर्णंचमहाराजंचबाह्लिकम्॥४॥द्वौणिंचसोमदत्तंचशकुनिंचापिसौबलम्॥ दुःशासनंशलंचैवपुरुमित्रंविविंशतिम्॥५॥विकर्णंचित्रसेनंचजयत्सेनंचपार्थिवम्॥ विंदानुविंदावावंत्यौदुर्मुखंचापिकौरवम्॥६॥सैंधवंदुःसहंचैवभूरिश्रवसमेवच॥ भगदत्तंचराजानंजलसंधंचपार्थिवम्॥७॥येचाप्यन्येपार्थिवास्तत्रयोद्धुंसमागताःकौरवाणांप्रियार्थम्॥ मुमूर्षवःपांडवाग्नौप्रदीप्तेसमानीताधार्तराष्ट्रेणहोतुम्॥८॥यथान्यायंकौशलंवंदनंचसमागतामद्वचनेनवाच्याः॥ इदंब्रूयाःसंजयराजमध्येसुयोधनंपापकृतांनिधानम्॥९॥अमर्षणंदुर्मतिंराजपुत्रंपापात्मानंधार्तराष्ट्रंसुलुब्धम्॥ सर्वंममैतद्वचनंसमग्रंसहामात्यंसंजयश्रावयेथाः॥१०॥एवंप्रतिष्ठाप्यधनंजयोमांततोर्थवद्धर्मवच्चापिवाक्यम्॥ प्रोवाचेदंवासुदेवंसमीक्ष्यपार्थोधीमाँल्लोहितांतायताक्षः॥११॥ यथाश्रुतंतेवदतोमहात्मनोमधुप्रवीरस्यवचःसमाहितम्॥ तथैववाच्यंभवताहिमद्वचःसमागतेषुक्षितिपेषुसर्वशः॥ १२॥

भाव०पंचषष्टितमोऽध्यायः॥ ६५ ॥ ॥७॥ ॥ एवमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ लोहितंतिआयतेचअक्षिणीयस्यसलोहितांतायताक्षः ॥ ११ ॥ ॥ १२ ॥

शराणांमिथःसन्निपातजोग्निस्तस्यधूमोयस्मिन् यज्ञेइतिशेषः रथध्वनिरेवमंत्रस्थाने धनुःस्रुवेणअस्त्रबलेनप्रसरतिशास्त्रबलेनेवयज्ञः ॥ १३ ॥ १४ ॥ चतुर्भुजमिति संजयस्यापियोगिदृश्यंभगवतश्चतुर्भुजंरूपंसदादृष्टिगोचरमासीदित्यनुमीयते ॥ १५ ॥ ॥इतिउद्योगप॰नैलकंठीयेभारतभावदीपेषट्षष्टितमोऽध्यायः ॥ ६६ ॥ ॥७॥ ॥दुर्योधनेइति ॥ १ ॥ २ ॥ परेषांतटस्थानां ॥ ३ ॥ ४ ॥युध्यमाना

शराग्निधूमेरथनेमिनादितेधनुःस्रुवेणास्त्रबलप्रसारिणा ॥ यथानहोमःक्रियतेमहान्मधेसमेत्यसर्वेप्रयतध्वमादृताः ॥ १३ ॥ नचेत्प्रयच्छध्वममित्रघातिनोयुधिष्ठिरस्यांशमभीप्सितंस्वकम् ॥ नयामिवःसाश्वपदातिकुंजरान्दिशंपितॄणामशिवांशितैःशरैः ॥ १४ ॥ ततोहमामंश्यतदाधनंजयंचतुर्भुजंचैवनमस्यसत्वरः ॥ जवेनसंप्राप्तइहामरद्युतेतवांतिकंप्रापयितुंवचोमहत् ॥ १५ ॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणियानसंधिपर्वणिसंजयवाक्येषट्षष्टितमोऽध्यायः ॥ ६६ ॥

॥वैशंपायनउवाच॥ ॥दुर्योधनेधार्तराष्ट्रेतद्वचोनाभिनंदति ॥ तूष्णींभूतेषुसर्वेषुससमुत्तस्थुर्नरर्षभाः ॥ १ ॥ उत्थितेषुमहाराजपृथिव्यांसर्वराजसु ॥ रहितेसंजयंराजापरिप्रष्टुंप्रचक्रमे ॥ २ ॥ आशंसमानोविजयंतेषांपुत्रवशानुगः ॥ आत्मनश्चपरेषांचपांडवानांचनिश्चयम् ॥ ३ ॥ ॥धृतराष्ट्रउवाच॥ ॥गावल्गणेब्रूहिनःसारफल्गुस्वसेनायांयावदिहास्तिकिंचित् ॥ त्वंपांडवानांनिपुणंवेत्थसर्वंकिमेषांज्यायःकिमुतेषांकनीयः ॥ ४ ॥ त्वमेतयोःसारवित्सर्वदर्शीधर्मार्थयोर्निपुणोनिश्चयज्ञः ॥ समेपृष्टःसंजयब्रूहिसर्वंयुध्यमानाःकतरेस्मिन्नसंति ॥ ५ ॥ ॥संजयउवाच॥ ॥नत्वांब्रूयांरहितेजातुकिंचिदसूयाहित्वांप्रविशेतराजन् ॥ आनयस्वपितरंमह्यंतंगांधारींचमहिषीमाजमीढ ॥ ६ ॥ तौतेऽसूयांविनयेतांनरेंद्रधर्मज्ञौतौनिपुणौनिश्चयज्ञौ ॥ तयोस्तुत्वांसन्निधौतद्वदेयंकृत्स्नंमतंकेशवपार्थयोर्यत् ॥ ७ ॥

वैशंपायनउवाच॥ ॥इत्युक्तेनचगांधारीव्यासश्चात्राजगामह ॥ आनीतौविदुरेणेहसभांशीघ्रंप्रवेशितौ ॥ ८ ॥ ततस्तन्मतमाज्ञायसंजयस्यात्मजस्यच ॥ अभ्युपेत्यमहाप्राज्ञःकृष्णद्वैपायनोब्रवीत् ॥ ९ ॥ ॥व्यासउवाच॥ ॥संपृच्छतेधृतराष्ट्रायसंजयआचक्ष्वसर्वंयावदेषोनुयुंक्ते ॥ सर्वंयावद्वेत्थतस्मिन्यथावद्याथातथ्यंवासुदेवेर्जुनेच ॥ १० ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणियानसंधिपर्वणिव्यासगांधार्यागमनेसप्तषष्टितमोऽध्यायः ॥ ६७ ॥ ॥७॥ ॥संजयउवाच॥

अर्जुनोवासुदेवश्चधन्विनौपरमार्चितौ ॥ कामादन्यत्रसंभूतौसर्वभावायसंमितौ ॥ १ ॥

नसंति उदासीनाइत्यर्थः ॥ ५ ॥ असूयामयिदोषदृष्टिः पितरंव्यासं ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ अनुयुंक्तेपृच्छति ॥ १० ॥ ॥इतिउद्योगप॰नैलकंठीयेभारतभा॰सप्तषष्टितमोऽध्यायः ॥ ६७ ॥ ॥७॥

अर्जुनइति कामादितिकामपूर्वकंकर्मोच्यते अकर्मजंतयोर्जन्मलोकानुग्रहार्थंसूर्यवदाविर्भावमात्रमित्यर्थः सर्वभावायब्रह्मभावाय संमितौतुल्यौ उभावपिसाक्षाद्ब्रह्मरूपावित्यर्थः ॥ १ ॥

व्यामांतरंप्रसारितयोर्हस्तयोर्यावान्विस्तारःपंचहस्तमितःतावत्अंतरंमध्यप्रमाणंयस्यतद्व्यामांतरं यथामुक्तंयथायथारूपंयावत्यावत्प्रमाणंचिंतितंतावत्प्रमाणंभूत्वायत्मुक्तंभवति मायययादुर्लक्ष्यरूपेणेत्यर्थः ॥ २ सापद्भवंसंहारं अतएवपांडवानांसुसंमतं ॥ ३ ॥ ४ ॥ मनसैवसंकल्पमात्रेण विशिष्टात्माश्रेष्ठरूपः वशीऐश्वर्यवान् ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ विचेष्टयतिचालयति यतोभूतात्मासर्वेषांभूतानामंतरात्मा ॥ १० ॥ सत्रंमिषं सत्रमाच्छादनेयज्ञेसदादानेचकैतवेइतिविश्वः संमोहयन्आत्मनोजगत्कर्तृत्वेपिअकर्तृत्वंदर्शयन् ॥ ११ ॥ कालचक्रंसंवत्सरात्मकं जगच्चक्रंजगतोजन्मस्थितिलयप्रवाहं युगचक्रंकर्मचक्रं कृतं यत्रधर्मश्चतुष्पात् त्रेतायांत्रिपाद्धर्मएकपादधर्मः द्वापरेऽर्धधर्मोऽर्धमधर्मः कलौत्रिपात्पापंएकपाद्धर्मइति तदिदंकर्मचक्रंपुनःपुनर्जन्ममरणयोर्हेतुभूतंपुनःकर्मपुनःसंसारःपुनःकर्मेत्येवंरूपं आत्मयोगेनचैत

व्यामांतरंसमास्थाययथामुक्तंमनस्विनः ॥ चक्रंतद्वासुदेवस्यमाययावर्ततेविभो ॥ २ ॥ सापद्भवंकौरवेषुपांडवानांसुसंमतम् ॥ सारासारबलंज्ञातुंतेजःपुंजावभासितम् ॥ ३ ॥ नरकंशंबरंचैवकंसंचैद्यंचमाधवः ॥ जितवान्घोरसंकाशान्क्रीडन्निवमहाबलः ॥ ४ ॥ पृथिवींचांतरिक्षंचद्यांचैवपुरुषोत्तमः ॥ मनसैवविशिष्टात्मानयत्यात्मवशंवशी ॥ ५ ॥ भूयोभूयोहियद्राजन्पृच्छसेपांडवान्प्रति ॥ सारासारबलंज्ञातुंतत्समासेनमेशृणु ॥ ६ ॥ एकतोवाजगत्कृत्स्नमेकतोवाजनार्दनः ॥ सारतोजगतःकृत्स्नादतिरिक्तोजनार्दनः ॥ ७ ॥ भस्मकुर्याज्जगदिदंमनसैवजनार्दनः ॥ नतुकृत्स्नंजगच्छक्तंभस्मकर्तुंजनार्दनम् ॥ ८ ॥ यतःसत्यंयतोधर्मोयतोह्रीरार्जवंयतः ॥ ततोभवतिगोविंदोयतःकृष्णस्ततोजयः ॥ ९ ॥ पृथिवींचांतरिक्षंचदिवंचपुरुषोत्तमः ॥ विचेष्टयतिभूतात्माक्रीडन्निवजनार्दनः ॥ १० ॥ सकृत्वापांडवान्सत्रेलोकंसंमोहयन्निव ॥ अधर्मनिरतान्मूढान्दग्धुमिच्छतितेसुतान् ॥ ११ ॥ कालचक्रंजगच्चक्रंयुगचक्रंचकेशवः ॥ आत्मयोगेनभगवान्परिवर्तयतेनिशम् ॥ १२ ॥ कालस्यचहिमृत्योश्चजंगमस्थावरस्यच ॥ ईशतेभगवानेकःसत्यमेतद्ब्रवीमिते ॥ १३ ॥ ईशन्नपिमहायोगीसर्वस्यजगतोहरिः ॥ कर्माण्यारभतेकर्तुंकीनाशइववर्धनः ॥ १४ ॥ तेनवंचयतेलोकान्मायायोगेनकेशवः ॥ येतमेवप्रपद्यंतेनतेमुह्यंतिमानवाः ॥ १५ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणियानसंधिपर्वणिसंजयवाक्येऽष्टषष्टितमोऽध्यायः ॥ ६८ ॥ ॥७॥ ॥धृतराष्ट्रउवाच॥ ॥कथंत्वंमाधववेत्थसर्वंलोकमहेश्वरम् ॥ कथमेनंनवेदाहंतन्ममाचक्ष्वसंजय ॥ १ ॥ ॥संजयउवाच॥ ॥शृणुराजन्नतेविद्यामविद्यानहीयते ॥ विद्याहीनस्तपोध्वस्तोनाभिजानातिकेशवम् ॥ २ ॥

न्यसंबंधेन नहिसंवत्सरादिकंकेवलजडाश्रयंभवितुमर्हति सर्वस्यचिदेकप्रकाश्यत्वात् ॥ १२ ॥ कालःआयुःपरिच्छेदकर्त्रीदेवता मृत्युर्देहप्राणयोर्वियोगकर्त्री ईशतेईष्टे ॥ १३ ॥ ईशन्नपिईशानोपि शपोऽनुरूपरस्मैपदंचार्षं कीनाशःकर्षकः वर्धनःधान्यादिवृद्धिकृत् यद्वा कीनाशोयमः वर्धनःदेहादेश्छेत्ता ॥ १४ ॥ तेनरानमुह्यंति ॥ १५ ॥ ॥ इतिउद्योगप॰नैलकंठीयेभारतभा॰अष्टषष्टितमोऽध्यायः ॥ ६८ ॥

कथंकेनप्रकारेण कानिज्ञानसाधनानि कानिवाज्ञानप्रतिबंधकानीतिप्रश्नार्थः ॥ १ ॥ विद्यातत्त्वंमस्यादिवाक्यजंज्ञानंतेनहीनोयःसतमोध्वस्तस्तमसास्वस्वरूपात्निर्विषयानंदमात्रात्च्युतः ॥ २ ॥

विद्ययातमोविरोधिन्या त्रियुगंत्रीणिस्थूलसूक्ष्मकारणशरीराणियुज्यंतेरज्जूरगवत्संबध्यंतेयस्मिन्अधिष्ठानभूतेत्रियुगं अज्ञानकल्पितस्यावस्थात्रयस्यविषयाबाधेसतिनिरुपाधिप्रत्यगात्मरूपंज्ञायतइत्यर्थः कर्तारंविश्वस्यनिमित्तकारणं अकृतंकर्मभिरसाध्यंनित्यसिद्धत्वात् भूतानांवियदादीनांप्रभवंउत्पत्तिस्थानं अप्ययोलयस्थानं॥३॥ भक्तिःआराध्यत्वेनज्ञानं तच्चकीदृशं किंभेदेनराजवत्तटस्थतयाभगवान्ध्येयउतप्रत्यगात्मत्वेनेतिभावः॥४॥ मायांपुत्रकलत्राद्याकारेणपरिणतामविद्यांनसेवे दृथाधर्मंभगवद्दर्पणंबिनानचरामि शुद्धभावंमनसःकामक्रोधादिराहित्येननैर्मल्यंगतःप्राप्नुभक्त्याध्यानेन शास्त्रात् तत्त्वमसीत्यागमात् जनार्दनंजगद्गुरुंआधिष्ठानंज्ञानमात्रव्यवहितंब्रह्म नास्मिंससारीब्रह्मैवास्मीतितत्त्वालोचनात्मकेनज्ञानेनैवंप्राप्यते नायंसपौरज्जुरेवेयमितिवत् नतुकीटभृंगन्यायेनभावनादित्यर्थः ॥ ५ ॥

विद्ययातातजानामित्रियुगंमधुसूदनम्॥कर्तारमकृतंदेवंभूतानांप्रभवाप्ययम्॥ ३ ॥ ॥धृतराष्ट्रउवाच॥ ॥गावल्गणेऽत्रकाभक्तिर्यातेनित्याजनार्दने॥यया त्वमभिजानासित्रियुगंमधुसूदनम्॥ ४॥ ॥संजयउवाच॥ ॥मायांनसेवेभद्रंतेनदृथाधर्ममाचरे॥शुद्धभावंगतोभक्त्याशास्त्राद्वह्मिजनार्दनम्॥५॥ ॥धृत राष्ट्रउवाच॥ ॥दुर्योधनदृषीकेशंप्रपद्यस्वजनार्दनम्॥आनोनःसंजयस्तातशरणंगच्छकेशवं॥६॥ ॥दुर्योधनउवाच॥ ॥भगवान्देवकीपुत्रोलोकांश्चेन्निह निष्यति॥प्रवदन्नर्जुनेसख्यंनाहंगच्छेऽद्यकेशवम्॥७॥ ॥धृतराष्ट्रउवाच॥ ॥अवाग्गांधारिपुत्रस्लेगच्छत्येषसुदुर्मतिः॥ईर्षुर्दुरात्मामानीचश्रेयसांवचनातिगः ॥८॥ ॥गांधार्युवाच॥ ॥ऐश्वर्यकामदुष्टात्मन्दृद्धानांशासनातिग ॥ऐश्वर्यजीवितेहित्वापितरंमांचबालिश॥ ९ ॥ वर्धयन्दुर्हृदांप्रीतिंमांचशोकेनवर्धय न्॥निहतोभीमसेनेनस्मर्तासिवचनंपितुः॥ १० ॥ ॥व्यासउवाच॥ ॥प्रियोसिराजन्कृष्णस्यधृतराष्ट्रनिबोधमे॥ यस्यतेसंजयोदूतोयस्त्वांश्रेयसियोक्ष्यते ॥११॥जानात्येषदृषीकेशंपुराणंयच्चवैपरम्॥शुश्रूषमाणमैकाग्र्यमोक्ष्यतेमहतोभयात्॥१२॥वैचित्रवीर्यपुरुषाःक्रोधहर्षसमादृताः॥सिताबद्धविधैःपाशैर्येन तुष्टाःस्वकैर्धनैः॥ १३॥यमस्यवशमायांतिकाममूढाःपुनःपुनः॥ अंधनेत्रायथैवांधानीयमानाःस्वकर्मभिः॥१४॥एषएकायनःपंथायेनयांतिमनीषिणः॥तंदृ ष्ट्वान्मृत्युमत्येतिमहांस्तत्रनसज्जति॥ १५॥ ॥धृतराष्ट्रउवाच॥ ॥अंगसंजयमेशंसपंथानमकुतोभयम्॥येनगत्वादृषीकेशंप्राप्नुयांसिद्धिमुत्तमाम्॥ १६॥

॥ ६ ॥ अर्जुनेविशुद्धेकामक्रोधादिमलशून्येसख्यंवदन्भगवानस्ति अथकामायाकांतदशायां नाहंगच्छेनप्राप्नुयां आसुरोभावोनमयात्यंतंकुशक्योऽतोनमेतत्प्राप्तिसंभावनापीत्यर्थः॥ ७ ॥ अवाक्अधो नरकमित्यर्थः श्रेयसांसाधूनांवचनातिगःउपदेशावमानी ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ ऐकाग्र्यंशुश्रूषमाणंसेवमानंत्वांमोक्ष्यतेमोचयिष्यति॥ १२ ॥ सिताःबद्धाः पाशैःकामादिभिः॥ १३ ॥ अंधोनेतायेषांतेअंधनेत्राः ॥ १४ ॥ एषःज्ञानमार्गः एकायनःएकस्यब्रह्मणःप्रापकः तंदृष्ट्वातंमार्गंज्ञात्वा मृत्युंससारंअत्येतिअतिक्रम्यगच्छति अभ्येतीतिपाठेआत्मत्वेनमृत्युरप्येनंप्रविशतीत्यर्थः तथाचश्रुतिः तस्यहनदेवाश्चनाभूत्याईशतआत्मात्वेषांसभवतीति देवाश्चनदेवाअपि तत्रसंसारेमहान्नसज्जतिसक्तोनभवति ॥ १५ ॥ सिद्धिंमोक्षम् ॥ १६॥

॥८१॥

अकृतात्माअजितमनाः कृतात्मानंनित्यसिद्धंप्रत्यगात्मानं आत्मनःस्वस्यइंद्रियनिग्रहादन्यत्रइंद्रियनिग्रहंविनाक्रियायागादिरूपउपायःप्राप्युपायोनास्ति ॥ १७ ॥ इंद्रियाणांअप्रमादतःअवहितनयाकामत्यागः अप्रमादःअविहिंसेतिच्छेदः ज्ञानस्ययोनिःकारणम्॥१८॥माच्यवतुनस्त्वात्प्रच्युतामाभूत् यतस्ततःसर्वेभ्यआंतरेभ्योबाह्येभ्यश्चविषयेभ्योनियच्छनिगृह्णीच्च ॥ ११ ॥ इंद्रियाणांसमनस्कानांधारणंनियहणम्॥२०॥आगमाधिगमात्शास्त्रयुक्त्योर्लाभात् योगात्चित्तवृत्तिनिरोधात् वशीईश्वरः तत्त्वेस्वयाथात्म्येविषये प्रसीदतिज्ञानदानेनअनुगृह्णाति॥२१॥ ॥इ०उ०नै०भा०ऊनसप्ततितमोऽध्यायः६९॥ ॥७॥ ॥भूयइति नाम्नांकर्मणांचअर्थवित्भूत्वा ॥ १ ॥ यावदभिजानेतावत् वदामीतिशेषः वस्तुतस्तुसःअप्रमेयोवाचामगोचरः ॥ २ ॥ वस्तेआच्छादयतिमाययाआवृणोतीतिवावस्यतिस्तभ्नातिभुवनमितिवावसत्यस्मिन्भुवनमितिवावासुःसचासौदेवोद्योतमानश्चवासुदेवः वसंतिदेवाअस्मिन्नितिवा करणपामस्योद्भवप्रलयस्थानमित्यर्थःबृहत्त्वाद्व्यापकत्वात् वेवेष्टिव्याप्नोतिसर्वमितिविष्णुः॥३॥

संजयउवाच॥ ॥नाकृतात्माकृतात्मानंजातुविद्याज्जनार्दनम्॥ आत्मनस्तुक्रियोपायोनान्यत्रेंद्रियनिग्रहात्॥१७॥इंद्रियाणामुदीर्णानांकामत्यागोऽप्रमादतः॥ अप्रमादोऽविहिंसाचज्ञानयोनिरसंशयम्॥ १८॥इंद्रियाणांयमेयत्तांभवराजन्नतंद्रितः॥बुद्धिश्चतेमाच्यवतुनियच्छेनांयतस्ततः॥ १९॥एतज्ज्ञानंविदुर्विप्राध्रुवमिंद्रियधारणम्॥एतज्ज्ञानंचपंथाश्चयेनयांतिमनीषिणः॥२०॥अप्राप्यःकेशवोराजन्निंद्रियैरजितैर्नृभिः॥आगमाधिगमाद्योगाद्दृशीतत्त्वेप्रसीदति॥ २१॥ ॥इति०म०उ०यानसं०संजयवाक्येऊनसप्ततितमोऽध्यायः॥६९॥ ॥७॥ ॥धृतराष्ट्रउवाच॥ ॥भूयोमेपुंडरीकाक्षंसंजयाचक्ष्वपृच्छतः॥ नामकर्मार्थवित्तातप्राप्नुयांपुरुषोत्तमम्॥१॥ ॥संजयउवाच॥ ॥श्रुतंमेवासुदेवस्यनामनिर्वचनंशुभम्॥यावत्तत्राभिजानेहमप्रमेयोहिकेशवः॥ २॥वस नात्सर्वभूतानांवसुत्वाद्देवयोनितः॥वासुदेवस्ततोवेद्योबृहत्त्वाद्विष्णुरुच्यते॥३॥मौनाद्ध्यानाच्चयोगाच्चविद्धिभारतमाधवम्॥सर्वतत्त्वमयत्वाच्चमधुहामधुसूदनः॥४॥कृषिर्भूवाचकःशब्दोणश्चनिर्वृतिवाचकः॥ विष्णुस्तद्भावयोगाच्चकृष्णोभवतिसात्वतः॥५॥पुंडरीकंपरंधामनित्यमक्षयमव्ययम्॥तद्भावात्पुंडरीकाक्षोदस्युत्रासाज्जनार्दनः॥६॥

मौनात्ध्यानाच्चयोगाच्चेति माधीदत्तिःतांत्वस्यउपाधिभूतांमौनादिभिःधवयतिदूरीकरोतीतिमाधवः मौनंमुनेःकर्ममननंशास्त्रतोयुक्तिश्चतत्त्वालोचनं ध्याननिश्चितेतत्त्वेचेतसःप्रणिधानं योगस्तस्यैवचेतसोनिरोधः मधुसूदनोमधोर्दैत्यस्यनाशकःश्रीकृष्णः सर्वाणिचतुर्विंशतिसंख्यानितत्त्वानितन्मयत्वात्ततप्रधानत्वात्मधुहा मधूनिपृथिव्यादीनिहंतिसंहरतिगच्छंतिवाएनमितिमधुहा इयंपृथिवीसर्वेषांभूतानांमध्वस्यैपृथिव्यैसर्वाणिभूतानिमध्वितिश्रुत्यापृथिव्यादितत्त्वजातस्यमधुशब्देनैवनिर्देशात्॥४॥कृषिःकर्षत्यात्मनिसर्वंसंहरतीतिकृषिःसर्वप्रपंचबाधावधिभूतंसत्तामात्रं भूवाचकःभवतीतिभूःसत्तातद्वाचकःकृषिरितिशब्दः णश्चनिर्वृतिःसुखंविष्णुस्तद्भावयोर्धात्वर्थयोर्योगात्कृष्णःसन्मात्रानंदरूपोभवतीत्यर्थः ॥५॥ पुंडरीकंश्वेतपद्मंतत्सदृशंपुंडरीकमिवपुंडरीकंहृदयकमलंधामवासस्थानंतत्रसन्नपिअक्षोनक्षीयतेहन्यतेवेतिपुंडरीकाक्षः तथाचश्रुतिर्नास्यजरयैतज्जीर्यतिनवधेनास्यहन्यतइतिहृत्पद्मवदोषैर्जरानाशादिभिःपरमात्मनोऽस्पृष्टत्वमाह दस्युत्रासात् जनंदस्युजनंअर्दयतिपीडयतीतिजनार्दनइत्यर्थः॥६॥

सत्त्वमबाधितत्त्वमस्यास्तीतिसत्वतः तप्पर्वमरुद्भ्यामितिस्मृतोमत्वर्थीयस्तप्प्रत्ययोबाहुलकात्सत्त्वशब्दादपिबोध्यः अत्रसत्त्वेनअत्याज्यःसत्त्वंचयस्यअत्याज्यंससत्त्वतः सत्त्वतएवसात्त्वतः राक्षसवायसादि वत्स्वार्थेतद्धितः आर्षंवेदस्तेनभातीत्यार्षभऔपनिषदःपुरुषः उपनिषद्वेद्यत्वाद्योगात्वृषभेक्षणः तथाचायंयोगः वृषंधर्मंभासयतीतिवृषभोवेदस्तदेवईक्षणंचक्षुरिवज्ञापकं यस्यसःवृषभेक्षणइति॥७॥नजाय तइत्यजः अनीकजित्सेनाजित्कृष्णः देवानांइंद्रियाणांमध्येस्वप्रकाशत्वात् ऋगतावित्यस्मादुत्पूर्वात्अप् उत्उत्कर्षेणऋच्छतिप्रकाशतइतिउदरः दमोस्यास्तीतिदामः दामश्चासावुदरश्चेतिदामोदरः दामा दितिपाठेदमएवदामस्तस्मात् ॥८॥ हर्षादिति हृष्यत्यनेनेतिहृषीकंवृत्तिसुखं सुखंस्वरूपानंदः ईशईशनवान्अतोहृषीकेशः॥९॥ अधोनक्षीयतेजातुइतिविग्रहवाक्येउत्तरपदावयवलोपेनअधोक्षजःसततो

यतःसत्वान्नच्यवतेयच्चसत्वान्नहीयते॥ सत्त्वतःसात्त्वतस्तस्मादार्षभाद्वृषभेक्षणः॥७॥ नजायतेजनित्रायमजस्तस्मादनीकजित्॥ देवानांस्वप्रकाशत्वाद्दमा द्दामोदरोविभुः॥८॥ हर्षात्सुखात्सुखैश्वर्याद्धृषीकेशत्वमश्नुते॥ बाहुभ्यांरोदसीबिभ्रन्महाबाहुरितिस्मृतः॥९॥ अधोनक्षीयतेजातुयस्मात्तस्मादधोक्षजः॥ नराणामयनाच्चापिततोनारायणःस्मृतः॥ १०॥ पूरणात्सदनाच्चापिततोसौपुरुषोत्तमः॥ असतश्चसतश्चैवसर्वस्यप्रभवाप्ययात्॥ ११॥ सर्वस्यचसदाज्ञा नात्सर्वमेतंप्रचक्षते॥ सत्येप्रतिष्ठितःकृष्णःसत्यमत्रप्रतिष्ठितम्॥१२॥ सत्यात्सत्यंतुगोविंदस्तस्मात्सत्योपिनामतः॥ विष्णुर्विक्रमणाद्देवोजयनाज्जिष्णुरुच्यते ॥१३॥ शाश्वतत्वादनंतश्चगोविंदोवेदनाद्गवाम्॥ अतत्त्वंकुरुतेतत्त्वंतेनमोहयतेप्रजाः॥१४॥ एवंविधोधर्मनित्योभगवान्मधुसूदनः॥ आगंताहिमहाबाहुरा नृशंस्यार्थमच्युतः॥१५॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणियानसंधिपर्वणिसंजयवाक्येसप्ततितमोऽध्यायः॥७०॥ ॥छ॥ ॥धृतराष्ट्रउवाच॥ चक्षुष्मतांवैस्पृहयामिसंजयद्रक्ष्यंतियेवासुदेवंसमीपे॥ बिभ्राजमानंवपुषापरेणप्रकाशयंतंप्रदिशोदिशश्च॥१॥ ईरयंतंभारतींभारतानामभ्यर्चनीयांशंक रींसृंजयानाम्॥ बुभूषद्भिर्ग्रहणीयामनिंद्यांपरासूनामग्रहणीयरूपाम्॥२॥ समुद्यंतंसात्त्वतमेकवीरंप्रणेतारमृषभंयादवानाम्॥ निहंतारंक्षोभणंशात्रवाणांमुं चंतंचद्विषतांवैयशांसि॥३॥

र्ध्वरूपःसंसारधर्मेणास्पृष्टइत्यर्थः॥ १०॥ पूरयतीतिपुरुः सीदंत्यस्मिन्निति सः तस्मात्पुरुषःसचासावुत्तमश्चपुरुषोत्तमः असतःकारणस्यसतःकार्यस्यप्रभवाप्ययात्उत्पत्तिप्रलयस्थानत्वात्॥ ११॥ सत्ये धर्मे॥ १२॥ सत्यात्धर्मात्तत्फलात्ब्रह्मलोकावधेरपिसत्यंअबाधितंअतःसत्योपिनामतः विशेषेणस्तौतिविस्रवतेगच्छतीतिविष्णुरित्यर्थः एवंजयतीतिजिष्णुः॥ १३॥ शाश्वतत्वात्शश्वद्भवत्वात् गवांइं द्रियाणांवेदनात्लाभात्प्रकाशाद्वागोविंदः अतत्त्वंमिथ्याभूतंजगत्तत्त्वंसत्यमिवस्वीयसत्तास्फूर्तिप्रदानेनकरोतितेनहेतुनालोकान्मोहयति॥ १४॥ धर्मेनित्यंसंनिधानात्धर्मनित्यःआगंताआगमिष्यतिआ नृशंस्यार्थंकुरूणांक्षयोमाभूदितिकृपांकर्तुम्॥१५॥ इ०उ०नै०भा०सप्ततितमोऽध्यायः॥७०॥ ॥छ॥ ॥चक्षुष्मतांभाग्यायस्पृहयामि धन्याश्चक्षुष्मंतइत्यर्थः चक्षुष्मतांज्ञानवतांवा परेणचिन्मात्रेणवपुषा स्वरूपेण॥१॥भारतानांपांडवानांभारतींवाचंईरयंतंअस्मत्सभायांकथयंतं शंकरींकल्याणकरीं बुभूषद्भिःऐश्वर्यमिच्छद्भिः परासूनांमृतानाम्॥२॥उद्यंतंप्रकटीभवंतं देहरूपेणेत्यर्थात् शाश्वतंनित्यम्॥ ३॥

वरेण्यंवरणीयं॥ ४॥ ऋषिमुख्यंनारायणं विपश्चितंआत्मज्ञं यतीनांसंन्यासिनांकलशमिवकलशंकरग्राह्यं समुद्रंयोगमुद्रयोपेतं अरिष्टःअहिंसितःनेमिःपादोयस्यसःअरिष्टनेमिरितिप्राञ्चः अरिष्टनेमि र्नामतः अहिंसितमर्यादः नेमिरिवनेमिर्मर्यादा गरुडंजातितः सुपर्णंशोभनपक्षं हरिंहर्तारं॥ ५॥ आदिःकारणं शुक्रस्यकर्मजन्यस्यबीजभूतस्यपुण्यादेःधातारंप्रतिभूरूपं परेषांविराडादीनांपरंश्रेष्ठं॥ ६॥

द्रष्टारोहिकुरवस्तंसमेतामहात्मानंशत्रुहणंवरेण्यम्॥ ब्रुवंतंवाचमनृशंसरूपांवृष्णिश्रेष्ठंमोहयंतंमदीयान्॥४॥ ऋषिंसनातनतमंविपश्चितंवाचःसमुद्रंकलशं यतीनाम्॥ अरिष्टनेमिंगरुडंसुपर्णंहरिंप्रजानांभुवनस्यधाम॥५॥ सहस्रशीर्षंपुरुषंपुराणमनादिमध्यांतमनंतकीर्तिम्॥ शुक्रस्यधातारमजंचनित्यंपरंपरेषां शरणंप्रपद्ये॥६॥ त्रैलोक्यनिर्माणकरंजनित्रंदेवासुराणामथनागरक्षसाम्॥ नराधिपानांविदुषांप्रधानमिंद्रानुजंतंशरणंप्रपद्ये॥७॥ इति०उ०यानसं० धृतराष्ट्रवाक्येएकसप्ततितमोऽध्यायः॥७१॥ ॥समाप्तंचयानसंधिपर्व॥ ॥छ॥ ॥अथभगवद्यानपर्व॥ ॥वैशंपायनउवाच॥ ॥संजयेप्रतियातेतुधर्म राजोयुधिष्ठिरः॥ अभ्यभाषतदाशार्हमृषभंसर्वसात्त्वताम्॥१॥ अयंसकालःसंप्राप्तोमित्राणांमित्रवत्सल॥ नचत्वदन्यंपश्यामियोनआपत्सुतारयेत्॥२॥ त्वांहिमाधवमाश्रित्यनिर्भयामोघदर्पितम्॥ धार्तराष्ट्रंसहामात्यंस्वयंसमनुयुंक्ष्महे॥३॥ यथाहिसर्वास्वापत्सुपासिवृष्णीनरिंदम॥ तथातेपांडवारक्ष्याःपाह्य स्मान्महतोभयात्॥४॥ ॥श्रीभगवानुवाच॥ ॥अयमस्मिमहाबाहोब्रूहियत्तेविवक्षितम्॥ करिष्यामिहितत्सर्वंयत्त्वंवक्ष्यसिभारत॥५॥ ॥युधिष्ठिरउ वाच॥ ॥श्रुतंतेधार्तराष्ट्रस्यसपुत्रस्यचिकीर्षितम्॥ एतद्धिसकलंकृष्णसंजयोमांयदब्रवीत्॥६॥ तन्मतंधृतराष्ट्रस्यसोस्यात्माविवृतांतरः॥ यथोक्तंदूतआच ष्टेवध्यःस्यादन्यथाब्रुवन्॥७॥ अप्रदानेनराज्यस्यशांतिमस्मासुमार्गति॥ लुब्धःपापेनमनसाचरन्नसममात्मनः॥८॥ यत्तद्द्वादशवर्षाणिवनेषुह्युषितावय म्॥ छद्मनाशरदंचैकांधृतराष्ट्रस्यशासनात्॥९॥ स्थातानःसमयेतस्मिन्धृतराष्ट्रइतिप्रभो॥ नाहास्मसमयंकृष्णतद्धिनोब्राह्मणाविदुः॥१०॥ गृद्धोराजाधृ तराष्ट्रःस्वधर्मंनानुपश्यति॥ वश्यत्वात्पुत्रगृद्धित्वान्मंदस्यान्वेतिशासनम्॥११॥ सुयोधनमतेतिष्ठन्राजास्मासुजनार्दन॥ मिथ्याचरतिलुब्धःसन्चरन्हि प्रियमात्मनः॥१२॥ इतोदुःखतरंकिंनुयदहंमातरंततः॥ संविधातुंनशक्नोमिमित्राणांवाजनार्दन॥१३॥

निर्माणंरचना जनित्रंजनयितारं॥ ७॥ ॥इतिश्रीमहाभारतेउ०नैलकंठीयेभारतभाव०एकसप्ततितमोऽध्यायः॥ ७१॥ ॥छ॥ ॥संजयेइति॥ १॥२॥ मोघंदर्पितंयस्य अनुयुंक्ष्महेप्रार्थयामहे॥३॥ ॥४॥ ५॥ ६ विवृतांतरःप्रकाशितभावः॥ ७॥ ८॥ छद्मनाअज्ञातचर्यया॥९॥ स्थातास्थास्यति नःअस्माकं तस्मिन्चतुर्दशेवर्षेस्वंराज्यंगृह्णीतेत्यस्मिन् नअहास्मनत्यक्तवंतोवयं॥ १०॥ ११॥१२॥ मातरंसंविधातुं सम्यक्पोषयितुं ततःतत्रस्थामित्यर्थःमित्राणां कर्मणिषष्ठी मातुरितिपाठेअंततोऽन्येषांवणिक्प्रभृतीनांनागरिकाणांपरित्यागेपि मातरंमित्राणिचविदुरादीनिसंविधातुमितिप्राग्वत्॥ १३॥

काशिभिःराजभिः नाथेननाथवता भवदनुग्रहात्शक्तेनापीत्यर्थः ॥१४॥ अवसीयतेसंस्थीयतेस्मिन्नित्यवसानं यावज्जीवनंवासस्थानं॥१५॥ नःअस्माकंकृतेभरताःभरतवंश्याभीष्मादयःमानशन्मानश्यं तु ॥ १६ ॥ तानपिभरतानपि ॥१७॥ कुलेइतिद्वाभ्यां गर्वजादोषसंततिरुक्ता ॥१८॥१९॥ द्विजाःअर्थिनः ॥२०॥ प्रेतसत्वात्प्रगतबुद्धेर्मृतादित्यर्थः॥२१॥२२॥धर्मंधर्मकारणं सर्वंयज्ञदानादि येअधनास्ते

काशिभिश्चेदिपांचालैर्मत्स्यैश्चमधुसूदन॥ भवताचैवनाथेनपंचग्रामावृतामया॥१४॥अविस्थलंवृकस्थलंमाकंदीवारणावतम्॥ अवसानंचगोविंदकिंचि देवात्रपंचमम्॥ १५॥ पंचनस्तातदीयंतांग्रामावानगराणिवा॥ वसेमसहितायेषुमाचनोभरतानशन्॥ १६ ॥ नचतानपिदुष्टात्माधार्तराष्ट्रोनुमन्यते॥स्वाम्य मात्मनिमत्वासावतोदुःखतरंनुकिम्॥ १७॥ कुलेजातस्यवृद्धस्यपरवित्तेषुगृध्यतः॥ लोभःप्रज्ञानमाहंतिप्रज्ञाहंतिहताह्रियम्॥ १८॥ ह्रीर्हताबाधतेधर्मंधर्मो हंतिहतःश्रियम्॥ श्रीर्हतापुरुषंहंतिपुरुषस्याधनंवधः॥ १९॥ अधनाद्विनिवर्तंतेज्ञातयःसुहृदोद्विजाः॥ अपुष्पादफलाद्वृक्षाद्यथाकृष्णपतत्रिणः॥ २० ॥ एत च्चमरणंतातयन्मत्तःपतितादिव॥ ज्ञातयोविनिवर्तंतेप्रेतसत्वादिवासवः॥ २१॥ नातःपापीयसींकांचिदवस्थांशंबरोब्रवीत्॥ यत्रनैवाद्यनप्रातर्भोजनंप्रतिदृ श्यते॥ २२॥ धनमाहुःपरंधर्मंधनेसर्वंप्रतिष्ठितम्॥ जीवंतिधनिनोलोकेमृतायेत्वधनानराः॥ २३॥ येधनादपकर्षंतिनरंस्वबलमास्थिताः॥ तेधर्ममर्थंकामं चप्रमथ्नंतिनरंचतम्॥२४॥ एतामवस्थांप्राप्यैकेमरणंवव्रिरेजनाः॥ ग्रामायैकेवनायैकेनाशायैकेप्रवव्रजुः॥ २५॥ उन्मादमेकेपुष्यंतियांत्यन्येद्विषतांवशम्॥ दास्यमेकेचगच्छंतिपरेषामर्थहेतुना॥ २६॥ आपदेवास्यमरणात्पुरुषस्यगरीयसी॥ श्रियोविनाशस्तद्ध्यस्यनिमित्तंधर्मकामयोः॥ २७॥ यदस्यधर्म्यंमरणं शाश्वतंलोकवर्त्मतत्॥ समंतात्सर्वभूतानांनतदत्येतिकश्चन॥२८॥नतथाबाध्यतेकृष्णप्रकृत्यानिर्धनोजनः॥ यथाभद्रांश्रियंप्राप्यतयाहीनःसुखैधितः॥ २९॥ सतदात्मापराधेनसंप्राप्तोव्यसनंमहत्॥ सेंद्रान्गर्हयतेदेवान्नात्मानंचकथंचन॥ ३० ॥नचास्यसर्वशास्त्राणिप्रभवंतिनिबर्हणे॥ सोभिक्रुध्यतिभृत्यानांसुहृ दश्चाभ्यसूयति॥ ३१॥ तत्तदामन्युरेवैतिसभूयःसंप्रमुह्यति॥ समोहवशमापन्नःक्रूरंकर्मनिषेवते॥ ३२॥ पापकर्मतयाचैवसंकरंतेनपुष्यति॥ संकरोनरका यैवसाकाष्ठापापकर्मणाम्॥ ३३॥

मृताएव ॥ २३ ॥ २४ ॥ एतांनिर्धनताख्यां एकेनागरिकाःग्रामायकुग्रामवासार्थं वनायास्मदादयः नाशायमरणाय ॥ २५ ॥ २६ ॥ आपत्पदार्थमाह श्रियोविनाशइति तद्धिश्रीर्हि ॥ २७ ॥ ध र्म्यंदेहस्वभावात्प्राप्तंननुदारिद्र्याद्यपराधजं मरणंतच्छाश्वतंअनिमित्तमित्यर्थः समंतात्सर्वत्र अपरिहार्यमितिशेषः नात्येतिनातिक्रामति ॥ २८ ॥ २९ ॥ तदासंपत्काले आत्मापराधेनचित्तदोषेणरागा दिनानात्मानंचेत्यस्यनचात्मानमित्यर्थः ॥ ३० ॥ अस्यव्यसनस्यनिबर्हणेनाशनिमित्तं ॥ ३१ ॥ तत्तदा सर्वदेत्यर्थः मन्युः क्रोधः सतद्वानेवेत्यर्थः मुह्यतिकार्याकार्येनजानाति ॥ ३२ ॥ ३३ ॥

एवंश्रियायुक्तानांनरकप्राप्तिमुक्त्वातेषामुद्धारोपायमाह तस्येति तस्यश्रीमतः अविद्यायानिद्राणस्यप्रज्ञाविवेकःसएवप्रबोधोजागरणं यतःप्रज्ञाचक्षुःपुमान्तरिष्यति अविद्यामितिशेषः ॥ ३४ ॥ तरणेक्रम माह प्रज्ञेति धर्मं करोतीतिशेषः तस्यधर्मस्यह्रीरकार्यकरणान्निवृत्तिहेतुश्चेतोवृत्तिविशेषः ह्रीहीनेनकृतोधर्मोप्यधर्मएवेतिभावः ॥ ३५ ॥ ३६ ॥ ३७ ॥ अह्रीकः तिर्यक्स्थावरतुल्योनमनुष्यइत्यर्थः ॥ ३८ ॥ ३९ ॥ इदंह्रीमत्त्वंतेत्वयामयिदृष्टम् ॥४०॥ अत्रश्रीनिमित्तंनःअस्माकं ॥ ४१ ॥ प्रथमःकल्पःमुख्यःपक्षः समभूताःनिर्वैरत्वंगताः ॥ ४२ ॥ रौद्रकर्मरौद्रकर्मणां सुपांसुलुगितिसप्तम्याश्चलुक्

नचेत्प्रबुध्यतेकृष्णनरकायैवगच्छति॥ तस्यप्रबोधःप्रज्ञैवप्रज्ञाचक्षुस्तरिष्यति॥ ३४॥ प्रज्ञालाभेहिपुरुषःशास्त्राण्येवान्ववेक्षते॥शास्त्रनिष्ठःपुनर्धर्मंतस्यह्रीरंग मुत्तमम्॥ ३५॥ ह्रीमान्हिपापंप्रद्वेष्टितस्यश्रीरभिवर्धते॥ श्रीमान्सयावद्भवतितावद्भवतिपूरुषः॥ ३६॥ धर्मनित्यःप्रशांतात्माकार्ययोगवहःसदा॥नाधर्मेकु रुतेबुद्धिंनचपापेप्रवर्तते॥ ३७॥ अह्रीकोवाविमूढोवानैवस्त्रीनपुनःपुमान्॥ नास्याधिकारोधर्मेस्तियथाशूद्रस्तथैवसः॥ ३८॥ ह्रीमानवतिदेवांश्चपितॄनात्मा नमेवच॥ तेनामृतत्वंव्रजतिसाकाष्ठापुण्यकर्मणाम्॥ ३९॥ तदिदंमयितेदृष्टंप्रत्यक्षंमधुसूदन॥ यथाराज्यात्परिभ्रष्टोवसामिवसतीरिमाः॥ ४०॥ तेवयंनश्रि यंहातुमलंन्यायेनकेनचित्॥ अत्रनोयतमानानांवधश्चेदपिसाधुतत्॥ ४१॥ तत्रनःप्रथमःकल्पोयद्वयंतेचमाधव॥ प्रशांताःशमभूताश्चश्रियंतामश्नुवीमहि ॥ ४२ ॥ तत्रैषापरमाकाष्ठारौद्रकर्मक्षयोदया॥ यद्वयंकौरवान्हत्वातानिराष्ट्राण्यवाप्नुमः॥ ४३॥ येपुनस्युरसंबद्धाअनार्याःकृष्णशत्रवः॥तेषामप्यवधःका र्यःकिंपुनर्येस्युरीदृशाः॥ ४४॥ ज्ञातयश्चैवभूयिष्ठाःसहायागुरवश्चनः॥ तेषांवधोतिपापीयान्किंनुयुद्धेस्तिशोभनम्॥ ४५॥ पापःक्षत्रियधर्मोयंवयंचक्षत्रबं धवः॥ सनःस्वधर्मोऽधर्मोवावृत्तिरन्याविगर्हिता॥ ४६॥ शूद्रःकरोतिशुश्रूषांवैश्यावैपण्यजीविकाः॥ वयंवधेनजीवामःकपालंब्राह्मणैर्वृतम्॥४७॥क्षत्रियाः क्षत्रियंहंतिमत्स्योमत्स्येनजीवति॥ श्वाश्वानंहंतिदाशार्हपश्यधर्मोयथागतः॥ ४८॥ युद्धेकृष्णकलिर्नित्यंप्राणाःसीदंतिसंयुगे॥ बलंतुनीतिमाधाययुध्येजय पराजयौ॥४९॥ नात्मच्छंदेनभूतानांजीवितंमरणंतथा॥ नाप्यकालेसुखंप्राप्यंदुःखंवापियदूत्तम॥ ५०॥ एकोह्यपिबहून्हंतिघ्नंत्येकंबहवोप्युत॥ शूरंकापुरु षोहंतिअयशस्वीयशस्विनम्॥ ५१॥

क्षयोदयाक्षयपूर्वकउदयोयस्यांसा रौद्रकर्मणांपरमाकाष्ठेतिसंबंधः ॥ ४३ ॥ असंबद्धाःअबांधवाः अवधःवधविरुद्धंपालनं ईदृशाइतिबांधवाआर्याअशत्रवश्चयेतेषामवधःकार्यइतिकिमाश्चर्यमित्यर्थः ॥४४॥तदेवाह ज्ञातयइति भूयिष्ठाःअतिमहांतः ॥ ४५ ॥ ४६ ॥ कपालंभिक्षापात्रम् ॥४७॥ यथायेनप्रकारेणआगतःकुलपरंपरयाप्राप्तस्तंपश्येतियोजना ॥४८॥ बलमिति नीतिमेवबलंकृत्वायुध्येयो त्स्येजयपराजयौतुआत्मच्छंदेनस्वेच्छयानभवतःतथातद्वत्भूतानांजीवितंमरणंचस्वेच्छयानस्तः ॥ ४९ ॥ ५० ॥ ५१ ॥

पराजयभयाद्यपयानेपलायनेपिअपचयःक्षयव्ययौचदृष्टौभवतएव अपचयोदीनता क्षयोमरणं तत्रहेतुः व्ययःद्रव्यादेर्नाशः ॥ ५२ ॥ ५३ ॥ विजयोप्यजयःपराजयएवदृष्टजननाशादित्याह यस्येति ॥५४॥ दयितंपुत्रादि हेअंग बलहीनस्यजातिबलहीनस्य ॥५५॥५६ ॥ यवीयान्कनिष्ठः अनुशयःपश्चात्तापः ॥५७ ॥ अनुबंधोदोषोत्पादःसचपापःकष्टप्रदः शेषःशत्रोः शेषत्वस्य ॥५८॥५९॥६०॥ अ

जयोनैवोभयोर्दृष्टोनोभयोश्चपराजयः॥ तथैवापचयोदृष्टोव्यपयानेक्षयव्ययौ॥ ५२॥ सर्वथाद्विजिनंयुद्धंकोघ्नन्नप्रतिहन्यते ॥ हतस्यचदृपीकेशसमोजयप
राजयौ॥५३॥पराजयश्चमरणान्मन्येनैवविशिष्यते॥यस्यस्याद्विजयःकृष्णतस्याप्यपचयोध्रुवम्॥५४॥ अंततोदयितंघ्नंतिकेचिदप्यपरेजनाः॥तस्यांगबलही
नस्यपुत्रान्भ्रातॄनपश्यतः॥ ५५॥ निर्वेदोजीवितेकृष्णसर्वतश्चोपजायते॥ येत्येवधीराक्षीमंतआर्याःकरुणवेदिनः॥ ५६ ॥तएवयुद्धेहन्यंतेयवीयान्मुच्यतेज
नः॥ हत्वाप्यनुशयोनित्यंपरानपिजनार्दन॥ ५७ ॥ अनुबंधश्चपापोत्रशेषश्चाप्यवशिष्यते॥ शेषोहिबलमासाद्यनशेषमनुशेषयेत्॥ ५८ ॥ सर्वोच्छेदेचयतते
वैरस्यांतविधित्सया॥ जयोवैरंप्रसृजतिदुःखमास्तेपराजितः॥५९॥ सुखंप्रशांतःस्वपितिहित्वाजयपराजयौ॥जातवैरश्चपुरुषोदुःखंस्वपितिनित्यदा॥६०॥अ
निर्दृत्तेनमनसाससर्पइववेश्मनि॥ उत्सादयतियःसर्वयशसासविमुच्यते॥६१॥ अकीर्तिसर्वभूतेषुशाश्वतींसनियच्छति॥नहिवैराणिशाम्यंतिदीर्घकालधृता
न्यपि॥६२॥ आख्यातारश्चविद्यंतेपुमांश्चेद्विद्यतेकुले॥नचापिवैरंवैरेणकेशवव्युपशाम्यति॥ ६३॥हविषाग्निर्यथाकृष्णभूयएवाभिवर्धते॥अतोन्यथानास्ति
शांतिर्नित्यमंतरमंततः॥६४॥अंतरंलिप्समानानामयंदोषोनिरंतरः॥पौरुषेयोहिबलवानाधिर्हृदयबाधनः॥तस्यत्यागेनवाशांतिर्मरणेनापिवाभवेत्॥६५॥
अथवामूलघातेनद्विषतांमधुसूदन॥ फलनिर्वृत्तिरिद्धास्यान्नृशंसतरंभवेत्॥ ६६॥ यातुत्यागेनशांतिःस्यात्तद्दृतेवधएवसः॥ संशयाच्चसमुच्छेदाद्विषतामा
त्मनस्तथा॥६७॥ नचत्यक्तुंतदिच्छामोनचेच्छामःकुलक्षयम्॥ अत्रयाप्रणिपातेनशांतिःसैवगरीयसी॥६८॥

निर्वृत्तेनअस्वस्थेन ॥६१॥६२॥६३॥ अतइति यतःअंतरंछिद्रंनित्यंअपरिहार्यंअतोहेतोःअंततोऽन्यथास्वस्यशत्रोर्वानाशंविनाशांतिर्नास्ति ॥ ६४ ॥ अयंदोषःनाशाख्यः अंततइत्येतद्व्याचष्टे पौरुषेयइति
सार्धेन॥६५॥द्विषतांमूलघातेनफलनिर्वृत्तिःनिष्कंटकराज्यप्राप्तिःइद्धाप्रदीप्तास्यात्तावताचकृशंसतरंनभवेत्तृशंसंतुभवेदेवेत्यर्थः अतःशमएवश्रेयानितिभावः॥६६॥ त्यागेन राज्यस्येतिशेषः तद्दृतेराज्यंवि
नाद्विषतांसंशयात्किंराज्यवश्छिद्रेप्रहरिष्यंतिउतउपेक्षांकरिष्यंतीत्येवंरूपात् आत्मनःभद्दश्रीकस्यसद्यःसमुच्छेदात् नाशसंभवात् अतोराज्यत्यागेनयुक्तइतिभावः ॥ ६७ ॥ सिद्धांतमाह नचेति ॥ ६८॥

सर्वथासामदानभेदैःराज्यार्थंयतमानानां युद्धंप्रसिद्धं अवश्यंकर्तव्यमित्यर्थः ननुअपराक्रमःक्लीबत्वं युक्तइतिशेषः ॥ ६९॥ दारुणंयुद्धं तच्छुनामिवनिंद्यमित्यर्थः ॥ ७० ॥ दृष्टांतंविवृणोति लांगूलेति अ
ग्रलांगूलेनध्वजउपमीयते क्ष्वेडाध्वनिकौटिल्यंपरस्परछिद्रान्वेषणंच प्रतिवाचःपरस्परनिंदास्वप्रशंसाच विवर्तनंभूमौलुंठनं दंतदर्शनंमुखस्यव्यादानेन आरावःभषणं पक्षेसिंहनादः ॥ ७१ ॥ ७२ ॥ सर्व

सर्वथायतमानानामयुद्धमभिकांक्षताम्॥ सांत्वेप्रतिहतेयुद्धंप्रसिद्धंनापराक्रमः ॥६९॥ प्रतिघातेनसांत्वस्यदारुणंसंप्रवर्तते॥तच्छुनामिवसंपातेपंडितैरुप
लक्षितम्॥७०॥ लांगूलचालनंक्ष्वेडाप्रतिवाचोविवर्तनम्॥ दंतदर्शनमारावस्ततोयुद्धंप्रवर्तते॥ ७१॥ तत्रयोबलवान्कृष्णजित्वासोत्तितदामिषम्॥एवमे
वमनुष्येषुविशेषोनास्तिकश्चन॥ ७२॥ सर्वथात्वेतदुचितंदुर्बलेषुबलीयसाम्॥ अनादरोविरोधश्चप्रणिपातीहिदुर्बलः॥७३॥ पितराजाचवद्धश्चसर्वथामा
नमर्हति॥ तस्मान्मान्यश्चपूज्यश्चवृतराष्ट्रोजनार्दन॥ ७४॥ पुत्रस्नेहश्चबलवान्धृतराष्ट्रस्यमाधव॥ सपुत्रवशमापन्नःप्रणिपातंप्रहास्यति॥ ७५॥ तत्रकिमन्य
सेकृष्णप्राप्तकालमनंतरम्॥ कथमर्थाच्चधर्माच्चनहीयेमहिमाधव॥ ७६॥ ईदृशेत्यर्थकृच्छ्रेस्मिन्कमन्यंमधुसूदन॥ उपसंप्रष्टुमर्हामित्वामृतेपुरुषोत्तम॥७७॥
प्रियश्चप्रियकामश्चगतिज्ञःसर्वकर्मणाम्॥ कोहिकृष्णास्तिनस्त्वादृक्सर्वनिश्चयवित्सुहृत्॥७८॥ ॥वैशंपायनउवाच॥ ॥एवमुक्तःप्रत्युवाचधर्मराजंजना
र्दनः॥ उभयोरेववामर्थेयास्यामिकुरुसंसदम्॥७९॥ शमंतत्रलभेयंचेद्युष्मदर्थमहापयन्॥ पुण्यंमेसुमहाराजंश्चरितंस्यान्महाफलम्॥८०॥मोचयेयंमृत्युपा
शात्संरब्धान्कुरुसृंजयान्॥ पांडवान्धार्तराष्ट्रांश्चसर्वाचपृथिवीमिमाम्॥८१॥ ॥युधिष्ठिरउवाच॥ ॥नमंमैतन्मतंकृष्णयत्त्वंयायाःकुरून्प्रति॥सुयोधनःसू
क्ष्ममपिनकरिष्यतितेवचः॥ ८२॥ समेतंपार्थिवंक्षत्रंद्रुर्योधनवशानुगम्॥ तेषांमध्यावतरणंतवकृष्णनरोचये॥८३॥ नहिनःप्रीणयेद्व्यंनदेवत्वंकुतःसुखम्॥
नचसर्वामरैश्चर्यंतवद्रोहेणमाधव॥ ८४॥ ॥श्रीभगवानुवाच॥ ॥जानाम्येतांमहाराजधार्तराष्ट्रस्यपापताम्॥ अवाच्यास्तुभविष्यामःसर्वलोकेमहीक्षि
ताम्॥ ८५॥ नचापिममपर्याप्ताःसहिताःसर्वपार्थिवाः॥ क्रुद्धस्यसंयुगेस्थातुंसिंहस्येवेतरेमृगाः॥ ८६॥ अथचेत्तेप्रवर्तेतमयिकिंचिदसांप्रतम्॥ निर्दहेयंकुरू
न्सर्वानितिमेधीयतेमतिः॥ ८७॥ नजातुगमनंपार्थभवेत्तत्रनिरर्थकम्॥ अर्थप्राप्तिःकदाचित्स्यादंततोवाप्यबाच्यता॥ ८८॥

येति अनादरेराज्यस्याप्राप्तिः युद्धेकुलक्षयः प्रणिपातेतुदौर्बल्यप्रसिद्धिः ॥ ७३ ॥ अंत्यःपक्षोपिनसेत्स्यतीत्याह पितेतिद्वाभ्याम् ॥ ७४ ॥ प्रहास्यतिनस्वीकरिष्यति ॥ ७५ ॥ ७६ ॥ ७७ ॥७८ ॥ ७९ ॥
॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ तेत्वत्संबंधिनिमयिचेत्कुरुकर्तासाग्रतंअयुक्तंवधबंधादिप्रवर्तेत तदानिर्दहेयंकुरूनित्यन्वयः ॥ ८७ ॥ ८८ ॥

॥ ८९ ॥ कृत्वन्गत्वा तथावदेतिशेषः ॥ ९० ॥ ९१॥ ९२॥ यदीति अधर्मेणसांत्वनोराज्यार्धार्हाणांपंचग्रामदानेन अधर्मेणइतरत्द्यूतेनैवराज्यप्रत्यादानं बृहदश्वादक्षहृदयस्यप्राप्तित्वात् यद्यद्धर्मेणेतिसत्यं वेतिचपाठेत्वकृतस्यधर्मसंयुक्तत्वमहिंसाप्राधान्येनबोध्यम् ॥९३॥ ॥इतिउद्योगप०नैलकंठीयेभारतभावदीपेद्विसप्ततितमोऽध्यायः ॥ ७२॥ ॥ ७ ॥ ॥संजयस्येति ॥ १ ॥ २ ॥ नैष्ठिककर्मयावज्जीवं

युधिष्ठिरउवाच ॥ ॥ यत्तुभ्यंरोचतेकृष्णस्वस्तिप्राप्नुहिकौरवान्॥कृतार्थस्त्वस्तिमंतत्वांद्रक्ष्यामिपुनरागतम्॥८९॥ विष्वक्सेनकुरून्गत्वाभरतान्शमयन्प्रभो॥
यथासर्वेसुमनसःसहस्यामसुचेतसः॥९०॥भ्राताचासिसखाचासिबीभत्सोर्ममचप्रियः॥ सौहृदेनाविशंक्यासिस्वस्तिप्राप्नुहिभूतये॥९१॥अस्मान्वेत्थपरान्वेत्थवेत्थार्थान्वेत्थभाषितुम्॥यद्यदस्मद्धितंकृष्णतत्तद्वाच्यःसुयोधनः॥ ९२॥ यद्यधर्मेणसंयुक्तमुपपद्येद्धितंवचः॥ तत्तत्केशवभाषेथाःसांत्ववायदिवेतरत्॥
॥ ९३ ॥इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणियुधिष्ठिरकृतकृष्णप्रेरणेद्विसप्ततितमोऽध्यायः॥ ७२ ॥ ॥ ७ ॥ ॥श्रीभगवानुवाच॥ ॥संजयस्यश्रुतंवाक्यंभवतश्चश्रुतंमया॥ सर्वेजानाम्यभिप्रायंतेषांचभवतश्चयः॥१॥ तवधर्माश्रितावुद्धिर्लेषावैराश्रयामतिः॥ यदयुद्धेनलभ्येततत्तेबहुमतंभवेत्॥२॥
नचैवंनैष्ठिकंकर्मक्षत्रियस्यविशांपते॥ आहुराश्रमिणःसर्वेनभैक्षंक्षत्रियश्चरेत्॥ ३॥ जयोवधोवासंग्रामेधात्रादिष्टःसनातनः॥ स्वधर्मःक्षत्रियस्यैषकार्पण्यं नप्रशस्यते॥४॥नहिकार्पण्यमास्थायशक्यावृत्तिर्युधिष्ठिर॥ विक्रमस्वमहाबाहोजहिशत्रून्परंतप॥५॥ अतिगृद्धाःकृतस्नेहादीर्घकालंसहोषिताः॥कृतमित्राःकृतबलाधार्तराष्ट्राःपरंतप॥६॥ नपर्यायोस्तियत्साम्यंत्वयिकुर्युर्विशांपते॥ बलवत्तांहिमन्यंतेभीष्मद्रोणकृपादिभिः॥७॥ यावच्चमार्दवेनैतान्राजन्नुपचरिष्यसि॥
तावदेतेहरिष्यंतितवराज्यमरिंदम॥८॥ नानुक्रोशान्नकार्पण्यान्नचधर्मार्थकारणात्॥अलंकर्तुंधार्तराष्ट्रास्तवकाममरिंदम॥९॥एतदेवनिमित्तंतेपांडवास्नुयथात्वयि॥नान्वतप्यंतकौपीनंतावत्कृत्वापिदुष्करम्॥१०॥पितामहस्यद्रोणस्यविदुरस्यचधीमतः॥ब्राह्मणानांचसाधूनांराज्ञश्चनगरस्यच॥११॥पश्यतांकुरुमुख्यानांसर्वेषामेवतत्त्वतः॥ दानशीलंमृदुंदांतंधर्मशीलमनुव्रतम्॥१२॥ यत्त्वामुपधिनाराजन्द्यूतेवंचितवांस्तदा॥ नचापत्रपतेतेननृशंसःस्वेनकर्मणा॥१३॥

ब्रह्मचर्यपारिव्राज्यंच विहितमितिशेषः ॥ ३ ॥ कार्पण्यंग्रामपंचकंदेहीतिदीनवचनम् ॥४ ॥ वृत्तिःजीविकाकर्तुमितिशेषः ॥ ५ ॥ अतिगृद्धाःअत्यंतलुब्धाः ॥ ६ ॥ पर्यायउपायः यत्येन बलवत्तां स्वस्येतिशेषः ॥ ७ ॥ ८ ॥ अनुक्रोशात्भवत्सुकृपातः कार्पण्यात्स्वस्यैदन्यात् अलंकर्तुंपूर्णंकर्तुंनसमर्थाः ॥ ९ ॥ निमित्तंअशमेकारणं हेपांडवत्वयिकौपीनंधारयतिसतितेकौरवाःनान्वतप्यंतपश्चात्तापंनकृतवंतः तावत्वनवासादि ॥ १० ॥ पितामहादीननादृत्यउपधिनाछलेनत्वांद्यूतेवंचितवानितिसार्धद्वयसंबंधः ॥ ११ ॥ १२ ॥ १३ ॥

॥ १४ ॥ अतुदत्पीडितवान् ॥ १५ ॥ १६ ॥प्रकृतिंपंचतां मयिमत्समीपेनष्टाप्रकृतिःशौर्यादिरूपःस्वभावोयेषां ॥ १७ ॥ १८ ॥ गौरिवसर्वभोग्येत्युपहासोगौर्गौरिति ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥
॥ २३ ॥ २४ ॥ २५॥ ईषत्कार्यःअनायाससाध्यः प्रस्कुंदेनचक्राकारयावेदिकया कुंदश्चक्रभमेमेघइतिविश्वः पारस्करादित्वात्सुट् प्रस्कंदेनेतिपाठेमध्यमशिफयेतिप्राज्ञः ॥ २६ ॥ २७ ॥ २८ ॥ द्वि

तथाशीलसमाचारेराजन्माप्रणयंकृथाः॥ वध्यास्तेसर्वलोकस्यकिंपुनस्तवभारत॥१४॥ वाग्भिस्त्वप्रतिरूपाभिरतुदत्त्वांसहानुजम्॥ श्लाघमानःप्रहृष्टःसन्भ्रातृभिःसहभाषते॥१५॥ एतावत्पांडवानांहिनास्तिकिंचिदिहस्वकम्॥ नामधेयंचगोत्रंचतदप्येषांनशिष्यते॥१६॥ कालेनमहताचैषांभविष्यतिपराभवः॥
प्रकृतिंतेभजिष्यंतिनष्टप्रकृतयोमयि॥ १७॥ दुःशासनेनपापेनतदाद्यूतेप्रवर्तिते॥ अनाथवत्तदादेवीद्रौपदीसुदुरात्मना॥ १८॥ आकृष्यकेशेरुदतीसभायां राजसंसदि॥ भीष्मद्रोणप्रमुखतोगौरितिव्याहृतामुहुः॥ १९॥ भवतावारिताःसर्वेभ्रातरोभीमविक्रमाः॥ धर्मपाशनिबद्धाश्चनकिंचित्प्रतिपेदिरे॥ २०॥ एताश्चान्याश्चपरुषावाचःससमुदीरयन्॥ श्लाघतेज्ञातिमध्येस्मत्वयिप्रव्रजितेवनम्॥२१॥ येतत्रासन्समानीतास्तेदृष्ट्वात्वामनागसम्॥ अश्रुकंठारुदंतश्चसभायामासतेसदा॥२२॥ नचैनमभ्यनंदंस्तेराजानोब्राह्मणैःसह॥ सर्वेदुर्योधनंतत्रनिंदंतिस्मसभासदः॥२३॥ कुलीनस्यचयानिंदावधोवामित्रकर्शन॥ महागुणोवधोराजन्नतुनिंदाकुजीविका॥ २४॥ तदैवनिहतोराजन्यदैवनिरपत्रपः॥ निंदितश्चमहाराजपृथिव्यांसर्वराजभिः॥ २५॥ ईषत्कार्योवधस्तस्ययस्य चारित्रमीदृशम्॥ प्रस्कुंदेनप्रतिस्तब्धश्छिन्नमूलइवद्रुमः॥२६॥वध्यःसर्पइवानार्यःसर्वलोकस्यदुर्मतिः॥ जत्येनंत्वममित्रघ्नमाराजन्विचिकित्सिथाः॥२७॥
सर्वथात्वत्क्षमंचैतद्योचतेचममानघ॥ यत्त्वंपितरिभीष्मेचप्रणिपातंसमाचरेः॥२८॥ अहंतुसर्वलोकस्यगत्वाच्छेत्स्यामिसंशयम्॥ येषामस्तिद्विधाभावोराजन्दुर्योधनंप्रति॥ २९॥ मध्येराज्ञामहंतत्रप्रातिपौरुषिकान्गुणान्॥ तवसंकीर्तयिष्यामियेचतस्यव्यतिक्रमाः॥ ३०॥ ब्रुवतस्तत्रमेवाक्यंधर्मार्थसहितंहितम्॥
निशम्यपार्थिवाःसर्वेनानाजनपदेश्वराः॥ ३१॥ त्वयिसंप्रतिपत्स्यंतेधर्मात्मासत्यवागिति॥ तस्मिंश्चाधिगमिष्यंतियथालोभादवर्तत॥ ३२॥ गर्हयिष्यामिचैवैनंपौरजानपदेष्वपि॥ वृद्धबालानुपादायचातुर्वर्ण्येसमागते॥ ३३॥ शमंवैयाचमानस्त्वंनाधर्मंतत्रलप्स्यसे॥ कुरून्विगर्हयिष्यंतिधृतराष्ट्रंचपार्थिवाः॥ ३४॥ तस्मिन्लोकपरित्यक्तेकिंकार्यमवशिष्यते॥ हतेदुर्योधनेराजन्यदन्यत्क्रियतामिति॥ ३५॥

धाभावःअयंसाधुरसाधुर्वेतिसंशयः॥ २९॥ प्रातिपौरुषिकान्सर्वपुरुषसाधारणान्॥ ३०॥ ३१॥ ३२॥ ३३॥ ३४॥ हतेनिगतयानेष्टप्राये॥ ३५॥

यात्वागत्वा ॥ ३६ ॥ निशम्यआलोच्य॥३७॥३८॥३९॥ चेदिहांतकोनुप्राप्तोनोस्यात्तर्हिएतन्नस्यादितिशेषः यंत्रंगोलकोत्क्षेपणं कवचा कवचानिवर्माणि सुपांसुलुगितिसुपोडादेशः नांतपाठेपुंस्त्वमार्ष प्रतिपादयित्वासज्जीकृत्य ॥ ४० ॥ ४१॥४२॥ ॥इतिउद्योगप०नैलकंठीयेभारतभावदीपेत्रिसप्ततितमोऽध्यायः ॥ ७३ ॥ ॥७॥ ॥यथेति शांतिबाधकंभयंतेषांमाकुर्वित्याह तथेति ॥ १ ॥

यात्वाचाहंकुरून्सर्वान्युष्मदर्थमहापयन्॥ यतिष्येप्रशमंकर्तुंलक्षयिष्येचचेष्टितम्॥३६॥ कौरवाणांप्रवृत्तिंचगत्वायुद्धाधिकारिकाम्॥ निशम्यविनिवर्तिष्ये जयायतवभारत ॥३७॥ सर्वथायुद्धमेवाहमाशंसामिपरैःसह॥ निमित्तानिहिसर्वाणितथाप्रादुर्भवंतिमे ॥३८॥ मृगाःशकुंनाश्चवदंतिघोरंहस्त्यश्वमुख्येषुनि शामुखेषु ॥ घोराणिरूपाणितथैवचाग्निर्वर्णान्बहून्पुष्यतिघोररूपान्॥ ३९ ॥ मनुष्यलोकक्षयकृत्सुघोरोनोचेदनुप्राप्तइहांतकःस्यात्॥ शस्त्राणियंत्रंकवचार थांश्चनागान्हयांश्चप्रतिपादयित्वा॥ ४०॥ योधाश्चसर्वेकृतनिश्चयास्तेभवंतुहस्त्यश्वरथेषुयत्ताः॥ सांग्रामिकंतेयदुपार्जनीयंसर्वंसमग्रंकुरुतन्नरेंद्र ॥४१॥ दु र्योधनोनत्यलमद्यदातुंजीवंस्तवैतन्नृपतेकथंचित्॥ यत्तेपुरस्तादभवत्समृद्धंद्यूतेहृतंपांडवमुख्यराज्यम्॥४२॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यान पर्वणिकृष्णवाक्येत्रिसप्ततितमोऽध्यायः॥ ७३ ॥ ॥७॥ ॥भीमउवाच॥ ॥यथायथैवशांतिःस्यात्कुरूणांमधुसूदन॥ तथातथैवभाषेथामास्मयुद्धेनभी षयेः॥ १ ॥ अमर्षीजातसंरंभःश्रेयोद्वेषीमहामनाः॥ नोग्रंदुर्योधनोवाच्यःसाम्नैवैनंसमाचरेः॥ २ ॥ प्रकृत्यापापंसत्वश्चतुल्यचेतास्तुदस्युभिः॥ ऐश्वर्यमदमत्त श्चकृतवैरश्चपांडवैः॥ ३ ॥ अदीर्घदर्शीनिष्ठूरीक्षेप्ताक्रूरपराक्रमः॥ दीर्घमन्युरनेयश्चपापात्मानिकृतिप्रियः॥४॥ म्रियेतापिनभज्येतनैवजह्यात्स्वकंमतम्॥ता दृशेनशमःकृष्णमन्येपरमदुष्करः॥ ५॥ सुहृदामप्यवाचीनस्यक्तधर्माप्रियानृतः॥ प्रतिहंत्येवसुहृदांवाचश्चैवमनांसिच॥ ६॥ समन्युवशमापन्नःस्वभावंदु ष्टमास्थितः॥ स्वभावात्पापमभ्येतिहृणैश्छन्नइवोरगः॥ ७॥ दुर्योधनोहियत्सेनःसर्वथाविदितस्तव॥ यच्छीलोयत्स्वभावश्चयद्बलोयत्पराक्रमः॥ ८॥ पुराप्र सन्नाःकुरवःसहपुत्रास्तथावयम्॥ इंद्रज्येष्ठाइवाभूममोदमानाःसबांधवाः॥९॥ दुर्योधनस्यक्रोधेनभरतामधुसूदन॥ धक्ष्यंतेशिशिरापायेवनानीवहुताशनैः ॥ १० ॥ अष्टादशेमेराजानःप्रख्यातामधुसूदन ॥ येसमुच्चिच्छिदुर्ज्ञातीन्सुहृदश्चसबांधवान्॥ ११ ॥

॥८६॥

महामनाःस्तब्धःसमाचरेःप्रागपिसमाहितवानसि ॥ २ ॥ ३ ॥ निष्ठूरीनिष्ठुरवाक् क्षेप्तानिंदकः अनेयःशिक्षयितुमयोग्यः ॥ ४ ॥ ५ ॥ अवाचीनोविपरीतः ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ज्ञातीन्सगोत्रा न् सुहृदःमित्राणि बांधवान्श्यालश्वशुरादीन् ॥ ११ ॥

पर्यायकालेधर्मांतकाले ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ कामानुबंधबहुलंबाहुल्येनतस्यचित्तानुसारि ॥ १९ ॥ २० ॥ अनेयःकुलक्षयकृतोदोषः ॥ २१ ॥ २२ ॥ प्रशंसति शम

असुराणांसमृद्धानांज्वलतामिवतेजसा॥ पर्यायकालेधर्मस्यप्राप्तेकलिरजायत ॥१२॥ हैहयानांमुदावर्तोनीपानांजनमेजयः॥बहुलस्तालजंघानांकृमीणा मुद्धतोवसुः॥१३॥अजबिंदुःसुवीराणांसुराष्ट्राणांरुषर्धिकः॥ अर्कजश्चबलीहानांचीनानांधौतमूलकः॥ १४॥हयग्रीवोविदेहानांवरयुश्चमहौजसाम्॥ बाहुः सुंदरवंशानांदीप्ताक्षाणांपुरूरवाः॥ १५ ॥ सहजश्चेदिमत्स्यानांप्रवीराणांदृषध्वजः ॥ धारणश्चंद्रवत्सानांमुकुटानांविगाहनः॥ १६ ॥ शमश्चनंदिवेगानामि त्येतेकुलपांसनाः॥ युगांतेकृष्णसंभूताःकुलेकुपुरुषाधमाः॥ १७ ॥ अप्ययंनःकुरूणांस्याद्युगांतेकालसंभृतः ॥ दुर्योधनःकुलांगारोजघन्यःपापपूरुषः ॥ १८॥ तस्मान्मृदुशनैर्ब्रूयाधर्मार्थसहितंहितम्॥कामानुबद्धंबहुलंनोग्रमुग्रपराक्रम॥ १९॥अपिदुर्योधनंकृष्णसर्वेवयमधश्वराः॥ नीचैर्भूत्वानुयास्यामोमास्मनोभ रतानशन्॥ २० ॥ अप्युदासीनवृत्तिःस्याद्यथानःकुरुभिःसह ॥ वासुदेवतथाकार्यंनकुर्याननयःस्वशेत्॥ २१ ॥ वाच्यःपितामहोद्वाद्येचकृष्णसभासदः ॥ भ्रा तृणामस्तुसौभ्रात्रंधार्तराष्ट्रःप्रशाम्यताम्॥ २२॥ अहमेतद्ब्रवीम्येवंराजाचैवप्रशंसति॥ अर्जुनोनैवयुद्धार्थीभूयसीहिदयार्जुने॥ २३॥ ॥इतिश्रीमहाभारतेउ द्योगपर्वणिभगवद्यानपर्वणिभीमवाक्येचतुःसप्ततितमोऽध्यायः॥ ७४॥ ॥७॥ ॥वैशंपायनउवाच॥ ॥एतच्छ्रुत्वामहाबाहुःकेशवःप्रहसन्निव॥अभूतपू र्वंभीमस्यमार्दवोपहितंवचः॥ १ ॥गिरेरिवलघुत्वंतच्छीतत्वमिवपावके॥ मत्वारामानुजःशौरिःशार्ङ्गधन्वाव्रकोदरम्॥ २॥ सतेजयंस्तदावाग्मिर्मातरिश्वेवपा वकं॥उवाचभीममासीनंकृपयाभिपरिप्लुतम्॥३॥ ॥श्रीभगवानुवाच॥ ॥त्वमन्यदाभीमसेनयुद्धमेवप्रशंससि॥वधाभिनंदिनःक्रूरान्धार्तराष्ट्रान्निमर्दिषुः ॥ ४॥ नचस्वपिषिजागर्षिन्युब्जःशेषेपरंतप॥ घोरामशांतांरुषतींसदावाचंप्रभाषसे॥ ५॥ निःश्वसन्निवनिर्वृत्तेनसंतप्तःस्वेनमन्युना॥ अप्रशांतमनाभीमसधूम इवपावकः॥ ६॥ एकांतेनिःश्वसन्शेषेभारार्तइवदुर्बलः॥ अपित्वांकेचिदुन्मत्तंमन्यंतेतद्विदोजनाः॥ ७॥ आरुज्यवृक्षान्निर्मूलान्गजःपरिरुजन्निव॥निघ्नन्प द्भिःक्षितिंभीमनिष्टनन्परिधावसि॥ ८॥ नास्मिन्जनेनरमसेरहःक्षिपसिपांडव॥ नान्यंनिशिदिवाचापिकदाचिद्भिनंदसि॥ ९॥

मेवेतिशेषः ॥ २३ ॥ ॥ इतिउद्योगपर्वणिनैलकंठीयेभारतभावदीपेचतुःसप्ततितमोऽध्यायः॥ ७४ ॥ ॥७॥ ॥ एतदिति ॥ १ ॥ २ ॥ ३ ॥४॥ रुषतींरोषवतीम् ॥५॥ अग्निवत्अग्निनेव ॥ ६ ॥ ७ ॥ आरुज्यभंक्त्वा ॥ ८ ॥ अस्मिन्वने जनेनब्राह्मणसमूहेन क्षिपसिनयसि कालमितिशेषः ॥ ९ ॥

॥ १० ॥ ११ ॥ शुकंतेजःनिर्मुक्तोस्तंगतः ध्रुवंनिश्चलंपुनःपर्यतिमेरुंपुनःपुनःप्रदक्षिणीकरोति ॥ १२ ॥ नियमेनहंताअस्मीतिशेषः ॥ १३ ॥ १४ ॥ १५ ॥ निमित्तानिमहिषारोहणवामनेत्रस्फुरणादीनि स्वे

अकस्मात्स्मयमानश्चरहस्यास्सेरुदन्निव ॥ जान्वोर्मूर्धानमाधायचिरमास्सेप्रमीलितः ॥ १० ॥ भ्रुकुटिंचपुनःकुर्वन्नोष्ठौचविदशन्निव ॥ अभीक्ष्णंदृश्यसेभीम सर्वंतन्मन्युकारितम् ॥ ११ ॥ यथापुरस्तात्सवितादृश्यतेशुक्रमुच्चरन् ॥ यथाचपश्चान्निर्मुक्तोधुवंपर्यतिरश्मिवान् ॥ १२ ॥ तथासत्यंब्रवीम्येतन्नास्तित्स्यव्यतिक्रमः ॥ हंताहंगदयाभ्येत्यदुर्योधनममर्षणम् ॥ १३ ॥ इतिस्मम्ध्येभ्रातॄणांसत्येनालभसेगदाम् ॥ तस्यतेप्रशमेबुद्धिर्धियतेद्यपरंतप ॥ १४ ॥ अहोयुद्धाभिकांक्षाणांयुद्धकालउपस्थिते ॥ चेतांसिविप्रतीपानियन्त्वांभीर्भीमर्विदति ॥ १५ ॥ अहोपार्थनिमित्तानिविपरीतानिपश्यसि ॥ स्वप्नांतेजागरांतेचतस्मात्प्रशममिच्छसि ॥ १६ ॥ अहोनाशंससेकिंचित्पुंस्त्वंक्लीबइवात्मनि ॥ कश्मलेनाभिपन्नोसितेनतेविकृतंमनः ॥ १७ ॥ उद्वेपतेतेहृदयंमनस्तेप्रतिसीदति ॥ ऊरुस्तंभगृहीतोसितस्मात्प्रशममिच्छसि ॥ १८ ॥ अनित्यंकिलमर्त्यस्यपार्थचित्तंचलाचलम् ॥ वातवेगप्रचलिताश्वत्थलाप्रलोलमेरिव ॥ १९ ॥ तवैषाविकृताबुद्धिर्गवांवागिव मानुषी ॥ मनांसिपांडुपुत्राणांमज्जयत्यप्लवानिव ॥ २० ॥ इदंमेमहदाश्चर्यंपर्वतस्येवसर्पणम् ॥ यदीदृशंप्रभाषेथाभीमसेनासमंवचः ॥ २१ ॥ सदृष्ट्वास्वानिकर्माणिकुलेजन्मचभारत ॥ उत्तिष्ठस्वविषादंमाकृथावीरस्थिरोभव ॥ २२ ॥ नचैतदनुरूपंतेयत्तेग्लानिरिदंम ॥ यदोजसानलभतेक्षत्रियोनतदद्भुते ॥ २३ ॥

इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिभीमोत्तेजकश्रीकृष्णवाक्येपंचसप्ततितमोऽध्यायः ॥ ७५ ॥ ॥ ७ ॥ ॥ वैशंपायनउवाच ॥ तथोक्तोवासुदेवेननित्यमन्युरमर्षणः ॥ सदश्ववत्समाधावद्भाषेतदनंतरम् ॥ १ ॥ ॥ भीमसेनउवाच ॥ ॥ अन्यथामांचिकीर्षंतमन्यथामन्यसेऽच्युत ॥ प्रणीतभावमत्यर्थंयुधिसत्यपराक्रमम् ॥ २ ॥ वेत्सिदाशार्हसत्यंमेदीर्घकालंसहोषितः ॥ उतबामांनजानासिप्लवन्हृदइवाप्लवे ॥ ३ ॥ तस्मादनभिरूपाभिर्वाग्भिर्मांत्वंसमर्छसि ॥ कथंहिभीमसेनंमांजानन्कश्चनमाधव ॥ ४ ॥ ब्रूयादप्रतिरूपाणियथामांवक्तुमर्हसि ॥ तस्मादिदंप्रवक्ष्यामिवचनंदारुणिनंदन ॥ ५ ॥ आत्मनःपौरुषंचैवबलंचनसमंपरैः ॥ सर्वथानार्यकर्मैतत्प्रशंसास्वयमात्मनः ॥ ६ ॥ अतिवादापविद्धस्तुवक्ष्यामिबलमात्मनः ॥ पश्येमेरोदसीकृष्णयथोरासन्निमाःप्रजाः ॥ ७ ॥

मांतेस्वप्ने जागरांतेजागरे ॥ १६ ॥ १७ ॥ १८ ॥ अष्ठीलाफलांतर्गंथिः साचशाल्मलेःकेवलंतूलमयीभवति ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेपंचसप्ततितमोऽध्यायः ॥ ७५ ॥ ॥ ७ ॥ ॥ तथोक्तइति समाधावत्नीव्रवेगंयथास्यात्तथा ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ रोदसीद्यावाभूमी ॥ ७ ॥

॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ संबाधेसंकीर्णे ॥ १४ ॥ वैशसेविशसनवति ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेषट्सप्ततितमोऽध्यायः ॥ ७६ ॥ ॥ ७ ॥

भावमिति विवक्षयात्वयास्वरूपंवक्तव्यमितीच्छया प्रागेवतस्यज्ञातत्वात् ॥ १ ॥ वेदवेद्मि ॥ २ ॥ ३ ॥ ४ ॥ कुतस्तर्हिमांनिंदितवानसीत्याशंक्याह जिज्ञासंतइति देवमानुषयोर्धर्मस्यपर्यायमितिसंबंधः

अचलेचाप्रतिष्ठेचाप्यनंतेसर्वमातरौ ॥ यदिमेसहसाक्रुद्धेसमेयातांशिलेइव ॥ ८ ॥ अहमेतेनिगृह्णीयांबाहुभ्यांसचराचरे ॥ पश्यैतदंतरंबाह्वोर्महापरिघयोरिव ॥ ९ ॥ यएतत्प्राप्यमुच्येतनतंपश्यामिपूरुषम् ॥ हिमवांश्चसमुद्रश्चवज्रीवाबलभित्स्वयम् ॥ १० ॥ मयाभिपन्नंत्रायेरन्बलमास्थायनत्रयः ॥ युद्धार्हान्क्षत्रियान्सर्वान्पांडवेष्वाततायिनः ॥ ११ ॥ अधःपादतलेनैतानधिष्ठास्यामिभूतले ॥ नहित्वंनाभिजानासिममविक्रममच्युत ॥ १२ ॥ यथामयाविनिर्जित्यराजानोवशगाःकृताः ॥ अथचेन्मांनजानासिसूर्यस्येवोद्यतःप्रभाम् ॥ १३ ॥ विगाढेयुधिसंबाधेवेत्स्यसेमांजनार्दन ॥ परुषैराक्षिपसिकिंव्रणंपूतिमिवोन्नयन् ॥ १४ ॥ यथामतिब्रवीम्येतद्विद्धिमामधिकंततः ॥ द्रष्टासियुधिसंबाधेप्रवृत्तेवैशसेऽहनि ॥ १५ ॥ मयाप्रणुन्नान्मातंगान्रथिनःसादिनस्तथा ॥ तथानरानभिक्रुद्धंनिघ्नंतंक्षत्रियर्षभान् ॥ १६ ॥ द्रष्टामांत्वंचलोकश्चविकर्षंतंवरान्वरान् ॥ नमेसीदंतिमज्जानोनममोद्वेपतेमनः ॥ १७ ॥ सर्वलोकादभिक्रुद्धान्नभयंविद्यतेमम ॥ किंतुसौहृदमेवैतत्कृपयामधुसूदन ॥ सर्वांस्तितिक्षेसंक्लेशान्मास्मनोभरतानशन् ॥ १८ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिभीमसेनवाक्येषट्सप्ततितमोऽध्यायः ॥ ७६ ॥ ॥ ७ ॥ ॥ श्रीभगवानुवाच ॥ ॥ भावंजिज्ञासमानोहंप्रणयादिदमब्रुवम् ॥ नचाक्षेपान्नपांडित्यान्नक्रोधान्नविवक्षया ॥ १ ॥ वेदाहंतवमाहात्म्यमुततेवेदयद्बलम् ॥ उततेवेदकर्माणिनत्वांपरीभवाम्यहम् ॥ २ ॥ यथाचात्मनिकल्याणंसंभावयसिपांडव ॥ सहस्रगुणमप्येतत्त्वयिसंभावयाम्यहम् ॥ ३ ॥ यादृशेचकुलेजन्मसर्वराजाभिपूजिते ॥ बंधुभिश्चसुहृद्भिश्चभीमत्वमसितादृशः ॥ ४ ॥ जिज्ञासंतोहिधर्मस्यसंदिग्धस्यहकोदर ॥ पर्यायंनाध्यवस्यंतिदेवमानुषयोर्जनाः ॥ ५ ॥ सएवहेतुर्भूत्वाहिपुरुषस्यार्थसिद्धिषु ॥ विनाशेपिसएवास्यसंदिग्धंकर्मपौरुषम् ॥ ६ ॥ अन्यथापरिदृष्टानिकविभिर्दोषदर्शिभिः ॥ अन्यथापरिवर्ततेवेगाइवनभस्वतः ॥ ७ ॥

देवधर्मस्यभाविनःपुण्यपापफलस्यपर्यायंपर्यंतंदैवज्ञादेःसकाशाज्जिज्ञासंतोज्ञातुमिच्छंतोपिनाध्यवस्यंतिननिश्चिन्वंति कदाचिद्दैवज्ञाद्युक्तावपिविसंवाददर्शनात् तथामानुषधर्मस्यपुरुषकारस्यपर्यायंबलाबलनिर्णयंइतिपूर्ववत् शूरस्यापिकदाचित्क्लीबत्वदृष्टेरितिभावः ॥ ५ ॥ सएवधर्मएव संदिग्धंसंदिग्धफलं ॥ ६ ॥ परिदृष्टानिकर्तव्यत्वेननिश्चितानिकार्याणि ॥ ७ ॥

सुनीतंसम्यगनुष्ठितम् विरुध्यतेनिष्फलंक्रियते ॥८॥ अकृतंभोगायानारब्धंकर्मपुण्यादिकमागामिदुःखंदैवज्ञादिभिरुपदिष्टतयानिश्चितसद्भावंपौरुषेणविहन्यते तेनकाम्यकर्मणामपिफलवत्त्वमस्त्येवेतिसिद्धं यद्वा अकृतंकालस्वभावजंकर्मअनुभूयमानंशीतोष्णादितत्पौरुषेणप्रावरणादिसंपादनेननिवार्यतइत्यर्थः ॥ ९ ॥ यदन्यदिति दिष्टःफलभोगायआज्ञप्तःभावःसत्तायस्यतत् दिष्टभावंप्रारब्धकर्म पंचम्यर्थे षष्ठी प्रारब्धादन्यदित्यर्थः पुरुषस्यपुरुषेणसंचितंयत्स्वयंकृतंकर्मतस्मादनुपरोधोजन्मांतरेनिरोधोनास्ति तत्रज्ञानेनप्रायश्चित्तेनवासंचितपापानांनाशेलक्षणंज्ञापकंश्रुतिस्मृतिजातंविद्यते क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे धर्मेणपापमपनुदति ज्ञानाग्निःसर्वकर्माणिभस्मात्कुरुतेतथेति (भावःप्रारब्धकर्म) यद्वा अकृतात्दैवात्शीतादेरन्यत्स्वयंकृतंदैवंदेहांतःकरणसंतापहेतुःतस्मादपिउपरोधोत्रैवनास्ति य

सुमंत्रितंसुनीतंचन्यायतश्चोपपादितम् ॥ कृतंमानुष्यकंकर्मदैवेनापिविरुध्यते ॥ ८ ॥ दैवमप्यकृतंकर्मपौरुषेणविहन्यते ॥ शीतमुष्णंतथावर्षंक्षुत्पिपासेचभारत ॥ ९ ॥ यदन्यद्दिष्टभावस्यपुरुषस्यस्वयंकृतम् ॥ तस्मादनुपरोधश्चविद्यतेतत्रलक्षणम् ॥ १० ॥ लोकस्यनान्यतोवृत्तिःपांडवान्यत्रकर्मणः ॥ एवंबुद्धिःप्रवर्तेतफलंस्यादुभयान्वये ॥ ११ ॥ यएवंकृतबुद्धिःसकर्मस्वेवप्रवर्तते ॥ नासिद्धौव्यथतेतस्यनसिद्धौहर्षमश्नुते ॥ १२ ॥ तत्रेयमनुमात्रामेभीमसेनविवक्षिता ॥ नैकांतसिद्धिर्वक्तव्याशत्रुभिःसहसंयुगे ॥ १३ ॥ नातिप्रहीणरश्मिःस्यात्तथाभावविपर्यये ॥ विषादमर्छेद्ग्लानिंवाप्येतमर्थंब्रवीमिते ॥ १४ ॥ श्वोभूतेधृतराष्ट्रस्यसमीपंप्राप्यपांडव ॥ यतिष्येप्रशमंकर्तुंयुष्मदर्थमहापयन् ॥ १५ ॥ शमंचेत्तेकरिष्यंतिततोऽनंतंयशोमम ॥ भवतांचकृतःकामस्तेषांचश्रेयउत्तमम् ॥ १६ ॥ तेचेदभिनिवेक्ष्यंतेनाभ्युपैष्यंतिमेवचः ॥ कुरवोयुद्धमेवात्रघोरंकर्मभविष्यति ॥ १७ ॥ अस्मिन्युद्धेभीमसेनत्वयिभारःसमाहितः ॥ धूरर्जुनेनधार्यास्याद्वोढव्यइतरोजनः ॥ १८ ॥ अहंहियंताबीभत्सोर्भवितासंयुगेसति ॥ धनंजयस्यैषकामोनहियुद्धंनकामये ॥ १९ ॥ तस्मादाशंकमानोहंवृकोदरमतिंतव ॥ गदतःक्लीबयावाचातेजस्तेसमदीदिपम् ॥ २० ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिकृष्णवाक्येसप्तसप्ततितमोऽध्यायः ॥ ७७ ॥ ॥ ७ ॥ ॥ ७ ॥

तस्तत्रापिलक्षणंचिकित्साविवेकहेतुःशास्त्रंप्रवर्तते सर्वेष्वपिपौरुषंकर्तव्यमितिभावः ॥ १० ॥ एतदेवाह लोकस्येति कर्मणोन्यत्रपौरुषंविनाअन्यतएकस्माद्दैवादेववृत्तिर्जीविकानास्ति एवंबुद्धिःईदृक्ज्ञानवान्सन्प्रवर्तेतपुरुषकारंकुर्यात् तथासतिउभयान्वयेदैवपौरुषयोःसंबंधेफलंभवतिनान्यतरतइत्यर्थः ॥ ११ ॥ यइति यथाकर्षकःकर्मकृत्वादैवानुकूल्यात्फलंलब्ध्वापिनहृष्यति अनाकस्मिकत्वात्फलस्य दैवप्रातिकूल्यादलब्ध्वापिनव्यथते अनुचितस्याकरणात् तद्वदत्रापिज्ञेयमित्याशयः ॥ १२ ॥ तंप्रकृतेयोजयति तत्रेति अनुमात्राऽवधारणंनिश्चयइत्यर्थः मात्रंकात्स्न्र्येवधारणेइतिकोशः लिंगव्यत्ययआर्षः ॥ १३ ॥ प्रहीणरश्मिःनिष्प्रभः भावःप्रारब्धंकर्म अर्च्छेत्प्राप्नुयात् ॥ १४ ॥ १५ ॥ १६ ॥ तेकुरवइतिसंबंधः ॥ १७ ॥ अस्मिन्निति रथोपमोभीमः अश्वोपमोर्जुनः ॥ १८ ॥ अहमिति युद्धकामोप्यहंअर्जुनप्रीत्यैसारथ्यंकरिष्यामीत्यर्थः ॥ १९ ॥ २० ॥ ॥ इतिउद्योगपर्वणि नीलकंठीयेभारतभावदीपेसप्तसप्ततितमोऽध्यायः ॥ ७७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥

उक्तमिति ॥ १ दैन्याद्वाअस्मदीयात् ॥ २ ॥ पराक्रमंसर्वेषांरक्षणेयत्नं कर्माणिजीवनबीजानिप्राक्तनानि तदभावात्दलद्वयहितार्थंकृतोपियत्नोनिष्फलइतिमत्वाशममेवेच्छसीत्यर्थः ॥ ३ ॥ मंत्रकारणमाह तदिदमिति नहियुद्धंनकामयेइतियत्त्वयाभाषितं तथाचनतथापिच चनशब्दोऽप्यर्थे यद्यपिममैतदनिष्टंतथापित्वयायद्भाषितंतत्तथैवभविष्यतीत्यर्थः परंतुशमोपितवनासाध्योस्तीत्याह नचेति ॥ ४ ॥ एतत्कृच्छ्रंयुद्धंसंकटंमन्यसेऽगीकरोषि अस्माकंकुरुपांडवानांशमासंभवाद्युद्धमिच्छसीत्याह कुर्वंतीति येषांपुंसांफलोदयोनास्तितेषांकर्माणिक्रियमाणान्यपिसामादीनिकुर्वंतिकृण्वंतिहिंसंतिकृहिंसायामित्यस्यस्वादिगणस्थस्यरूपं तनादित्वमस्यार्षंलेखकप्रमादजंवा चतुर्थोपायसाध्येतुरिपौसांत्वमपक्रियेत्यभियुक्तोक्तेर्जीवनादृष्टाभावाद्दंडैकसाध्येषुकुरुषुसांत्वप्रयोगोदुष्करइत्यर्थः ॥ ५ ॥ ए

अर्जुनउवाच उक्तंयुधिष्ठिरेणैवयावद्वाच्यंजनार्दन ॥ तववाक्यंतुमेश्रुत्वाप्रतिभातिपरंतप ॥ १ ॥ नैवप्रशममत्रत्वंमन्यसेसुकरंप्रभो ॥ लोभाद्वाधृतराष्ट्रस्यदैन्याद्वासमुपस्थितात् ॥ २ ॥ अफलंमन्यसेवापिपुरुषस्यपराक्रमम् ॥ नचांतरेणकर्माणिपौरुषेणबलोदयः ॥ ३ ॥ तदिदंभाषितंवाक्यंतथाचनतथैवतत् ॥ नचैतदेवंद्रष्टव्यमसाध्यमपिकिंचन ॥ ४ ॥ किंचैतन्मन्यसेकृच्छ्रमस्माकमवसादकम् ॥ कुर्वंतितेषांकर्माणियेषांनास्तिफलोदयः ॥ ५ ॥ संपाद्यमानंसम्यक्चस्यात्कर्मसफलंप्रभो ॥ सतथाकृष्णवर्तस्वयथाशर्मभवेत्परैः ॥ ६ ॥ पांडवानांकुरूणांचभवान्नःप्रथमःसुहृत् ॥ सुराणामसुराणांचयथावीरप्रजापतिः ॥ ७ ॥ कुरूणांपांडवानांचप्रतिपत्स्वनिरामयम् ॥ अस्मद्धितमनुष्ठानंमन्येतवनदुष्करम् ॥ ८ ॥ एवंचकार्यतामेतिकार्यंतवजनार्दन ॥ गमनादेवमेवत्वंकरिष्यसिजनार्दन ॥ ९ ॥ चिकीर्षितमथान्यत्तेतस्मिन्वीरदुरात्मनि ॥ भविष्यतिचतत्सर्वंयथातवचिकीर्षितम् ॥ १० ॥ शर्मतैःसहवानोस्तुतववायच्चिकीर्षितम् ॥ विचार्यमाणोयःकामस्तवकृष्णसनोगुरुः ॥ नसनार्हतिदुष्टात्मावधंससुतबांधवः ॥ ११ ॥ येनधर्मसुतेदृष्टानसाश्रीरुपमर्षिता ॥ यच्चाप्यपश्यतोपायंधर्मिष्ठंमधुसूदन ॥ १२ ॥ उपायेननृशंसेनहृतादुर्द्यूतदेविना ॥ कथंहिपुरुषोजातःक्षत्रियेषुधनुर्धरः ॥ १३ ॥ समाहूतोनिवर्तेतप्राणत्यागेप्युपस्थिते ॥ अधर्मेणजितान्दृष्ट्वावनेप्रव्रजितांस्तथा ॥ १४ ॥ वध्यतांममवार्ष्णेयनिर्गतोसौसुयोधनः ॥ नचैतदद्भुतंकृष्णमित्रार्थेयच्चिकीर्षसि ॥ क्रियाकथंचमुख्यास्यान्मृदुनाचेतरेणवा ॥ १५ ॥ अथवामन्यसेज्यायान्वधस्तेषामनंतरम् ॥ तदेवक्रियतामाशुनविचार्यमतस्त्वया ॥ १६ ॥

वंजानन्नपिसामैवचेन्मन्यसेतत्राह संपाद्येति यत्कर्मसम्यक्संपाद्यमानंभवेत्तत्सफलंस्यादितिसंबंधः प्रभोइत्यनेनअसाध्यसाधनसामर्थ्यमस्यदर्शयति फलितमाह सइति ॥ ६ ॥ ७ ॥ निरामयंकुशलं ॥ ८ ॥ कार्यतांऔचित्यं कार्यंकर्म ॥ ९ ॥ १० ॥ शर्मेतिकृष्णात्स्वस्यव्यवहारतोभेदान्मतभेदमुक्त्वातत्त्वमाह विचार्यमाणइति गुरुःउपदेष्टा प्राणस्यप्राणमुतचक्षुषश्चक्षुरुतश्रोत्रस्यश्रोत्रंमनसोयेमनोविदुस्तेनिचिक्युर्ब्रह्मपुराणमग्र्यमितिश्रुतेरस्मन्मनसोपिमनसस्त्वमतस्त्वयःकामःसएवास्मत्कामस्यप्रवर्तकइतिभावः वस्तुतस्तुतवैवकामोयुक्तइत्याह नसइत्यादिना ॥ ११ ॥ धर्मिष्ठंयुद्धादिकं ॥ १२ ॥ हृताश्रीः ॥ १३ ॥ समाहूतोद्युतार्थं ॥ १४ ॥ निर्गतः निश्चयेनप्राप्तः कथंचकथमपि मुख्याफलवती मृदुनासाम्ना इतरेणयुद्धेन ॥ १५ ॥ ॥ १६ ॥

॥ १७ ॥ नामनिश्चितं सपांडवेषुसम्यग्वर्ततेतिबुद्धिर्मेनसंजायतेनोत्सहते ॥ १८ ॥ १९ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेअष्टसप्ततितमोध्यायः ॥ ७८ ॥ ॥ ७ ॥ ॥एवमिति ॥ १ ॥ द्वयोः कर्मणोःशमयुद्धयोर्मध्येइदंअनामयंसर्वकृत्स्नंममदूतस्यायत्तंअधीनंतथापिदैवानुकूल्यमत्रापेक्षितमित्याह क्षेत्रमिति कर्मणाकर्षणेनवाप्यादिजलदानेनचशुद्धंभूदोषहीनंरसवंद्राद्रैचउपपादितंकृतंतत् कदाचिद्वर्षविनापिफलप्रदंभवेत् ॥२॥ अत्रकेवलंपौरुषस्यैवश्रैष्ठ्यंदृष्टमित्याह तत्रेति ॥३॥ एतदपिदैवाधीनमेवेत्याह तत्रचापीति शोषणंवाप्यादेः सर्वथादृष्टस्यभावेयथानफलनिष्पत्तिस्तद्वद्दैवाभावेपीत्य

जानासिहियथैतेनद्रौपदीपापबुद्धिना ॥ परिक्लिष्टासभामध्येतच्चतस्योपमर्षितम् ॥ १७ ॥ सनामसम्यग्वर्ततेतपांडवेष्वितिमाधव ॥ नमेसंजायतेबुद्धिर्बीजमुप्तमिवोपरे ॥ १८ ॥ तस्माद्यन्मन्यसेयुक्तंपांडवानांहितंचयत् ॥ तथाशुकुरुवार्ष्णेययत्नःकार्यमनंतरम् ॥ १९ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणि अर्जुनवाक्येऽष्टसप्ततितमोऽध्यायः ॥ ७८ ॥ ॥ ७ ॥ ॥ श्रीभगवानुवाच ॥ ॥ एवमेतन्महाबाहोयथावदसिपांडव ॥ पांडवानांकुरूणांचप्रतिपत्स्येनिरामयं ॥ १ ॥ सर्वमेत्विदंममायत्तंवीभत्सोकर्मणोर्द्वयोः ॥ क्षेत्रंहिरसवच्छुद्धंकर्मणैवोपपादितम् ॥ २ ॥ ऋतेतपान्नकौंतेयजातुनिर्वर्तयेत्फलम् ॥ तत्रवैपौरुषंब्रूयुरासेकंयत्रकारितम् ॥ ३ ॥ तत्रचापिध्रुवंपश्येच्छोषणंदैवकारितम् ॥ तदिदंनिश्चितंबुद्ध्यापूर्वैरपिमहात्मभिः ॥ ४ ॥ दैवेचमानुषेचैवसंयुक्तंलोककारणम् ॥ अहंहितत्करिष्यामिपरंपुरुषकारतः ॥ ५ ॥ दैवंतुनमयाशक्यंकर्मकर्तुंकथंचन ॥ सहिधर्मंचलोकंचत्यक्त्वाचरतिदुर्मतिः ॥ ६ ॥ नहिसंतप्यतेतेननतथारूपेणकर्मणा ॥ तथापिबुद्धिपापिष्ठांवर्धयंत्यस्यमंत्रिणः ॥ ७ ॥ शकुनिःसूतपुत्रश्चभ्रातादुःशासनस्तथा ॥ सहित्यागेनराज्यस्यनशमंसमुपैष्यति ॥ ८ ॥ अंतरेणवधंपार्थसानुबंधःसुयोधनः ॥ नचापिप्रणिपातेनत्यक्तुमिच्छतिधर्मराट् ॥ याच्यमानश्चराज्यंसनप्रदास्यतिदुर्मतिः ॥ ९ ॥ नतुमन्येसतद्दाच्योयद्युधिष्ठिरशासनम् ॥ उक्तंप्रयोजनंयत्तुधर्मराजेनभारत ॥ १० ॥ तथापापस्तुतत्सर्वंनकरिष्यतिकौरवः ॥ तस्मिंश्चाक्रियमाणेसौलोकेवध्योभविष्यति ॥ ११ ॥ ममचापिसवध्योहिजगतश्चापिभारत ॥ येनकौमारकेयूयंसर्वेविप्रकृताःसदा ॥ १२ ॥ विप्रलुप्तंचवोराज्यंनृशंसेनदुरात्मना ॥ नचोपशाम्यतेपापःश्रियंदृष्ट्वायुधिष्ठिरे ॥ १३ ॥ असकृच्चाप्यहंतेनत्वल्कृते पार्थभेदितः ॥ नमयातद्गृहीतंचपापंतस्यचिकीर्षितम् ॥ १४ ॥ जानासिहिमहाबाहोत्वमप्यस्यपरंमतम् ॥ प्रियंचिकीर्षमाणंचधर्मराजस्यमामपि ॥ १५ ॥

॥८९॥

र्थः ॥ ४ ॥ संयुक्तंआहितं लोककारणंलोकहितसाधनं ॥ ५ ॥ दैवंकर्मप्राक्तनंकर्मकर्तुंअन्यथाकर्तुं ॥ ६ ॥ ७ ॥ पुरुषकाराच्छमोप्यत्रदुःसंपादइत्याह सहीति त्यागेनदानेना ॥ ८ ॥ सानुबंधःसपरिवारः नचेति एकोरज्यंत्यक्तुंनेच्छतिपरोदातुंनेच्छतीत्यर्थः ॥ ९ ॥ शासनंपंचग्रामान्देहीतितत्नवक्तव्यः दैन्यद्योतकत्वादितिभावः अफलत्वाच्चनैवंसवाच्यइत्याह उक्तमिति प्रयोजनंशमं ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

अभिशंकसेमांशममनिच्छंतमिवमन्यसे ॥ १६ ॥ दिव्यंविधानंभूभारापहारार्थंस्वर्गाद्देवानामवतरणम् ॥ १७ ॥ आशंसेसंभावयामि ॥ १८ ॥ कथमिति भीष्मेणएतच्छर्मयाच्यमानोपिसःहिनंकथंनोक्तःअपितूक्तएवदुर्योधनस्तथापिनगृहीतवानितिभावःसंवत्सरगतेगतसंवत्सरे ॥ १९ ॥ संकल्पिताःवध्यत्वेननिश्चिताःलवशाःक्षणशाःलवीशाःक्षणाःस्वीकारः राज्यलेशस्यस्वीकारेपिनसंतुष्टइत्यर्थः क्रमेणपञ्चम्यर्थेसप्तम्यर्थेचशास्त्रप्रत्ययः ॥ २० ॥ विभाव्यंविचारणीयं ॥ २१ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेऊनाशीतितमोऽध्यायः ॥ ७९ ॥ ॥ ७ ॥ ॥ उक्तमिति ॥ १ ॥ राज्ञोमतंआज्ञाय

संजानंस्त्वंचात्मानंममचैवपरंमतम् ॥ अजानन्निवमांकस्मादर्जुनाद्याभिशंकसे ॥ १६ ॥ यच्चापिपरमंदिव्यंतच्चाप्यनुगतंत्वया ॥ विधानंविहितंपार्थकथं शर्मभवेत्परैः ॥ १७ ॥ यत्तुवाचामयाशक्यंकर्मणावापिपांडव ॥ करिष्यतदहंपार्थनत्वाशंसेशमंपरैः ॥ १८ ॥ कथंगोहरणेयुक्तोनैतच्छर्मतथाहितम् ॥ याच्यमानोहिभीष्मेणसंवत्सरगतेध्वनि ॥ १९ ॥ तदैवतेपराभूतायदासंकल्पितास्त्वया ॥ लवशःक्षणशश्चापिनचतुष्टःसुयोधनः ॥ २० ॥ सर्वथातुमयाकार्यंधर्मराजस्यशासनम् ॥ विभाव्यंतस्यभूयश्चकर्मपापंदुरात्मनः ॥ २१ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिश्रीकृष्णवाक्येऊनाशीतितमोऽध्यायः ॥ ७९ ॥ ॥ ७ ॥ ॥ नकुलउवाच ॥ ॥ उक्तंबहुविधंवाक्यंधर्मराजेनमाधव ॥ धर्मज्ञेनवदान्येनश्रुतंचैवहितत्त्वया ॥ १ ॥ मतमाज्ञायराज्ञश्चभीमसेनेनमाधव ॥ संशमोबाहुवीर्यंचख्यापितंमाधवात्मनः ॥ २ ॥ तथैवफाल्गुनेनापियदुक्तंतत्त्वयाश्रुतम् ॥ आत्मनश्चमतंवीरकथितंभवतासकृत् ॥ ३ ॥ सर्वमेतदतिक्रम्यश्रुत्वापरमतंभवान् ॥ यत्प्राप्तकालंमन्येथास्तत्कुर्याःपुरुषोत्तम ॥ ४ ॥ तस्मिंस्तस्मिन्निमित्तेहिमतंभवतिकेशव ॥ प्राप्तकालंमनुष्येणक्षमंकार्यमरिंदम ॥ ५ ॥ अन्यथाचिंतितोह्यर्थःपुनर्भवतिसोन्यथा ॥ अनित्यमतयोलोकेनराःपुरुषसत्तम ॥ ६ ॥ अन्यथाबुद्धयोह्यासन्नस्मासुवनवासिषु ॥ अदृश्येष्वन्यथाकृष्णदृश्येषुपुनरन्यथा ॥ ७ ॥ अस्माकमपिवार्ष्णेयवनेविचरतांतदा ॥ नतथाप्रणयोराज्येयथासंप्रतिवर्तते ॥ ८ ॥ निवृत्तवनवासान्नःश्रुत्वावीरसमागताः ॥ अक्षौहिण्योहिसप्तेमास्त्वत्प्रसादाज्जनार्दन ॥ ९ ॥ इमान्हिपुरुषव्याघ्रानचिंत्यबलपौरुषान् ॥ आत्तशस्त्रान्रणेदृष्ट्वानव्यथेद्दिफकःपुमान् ॥ १० ॥

संशमःसम्यक्शमःख्यापितःहेमाधवमधुदेशज आत्मनःमतंआज्ञायबाहुवीर्यंख्यापितं हेमाधवलक्ष्मीपते ॥ २ ॥ ३ ॥ ४ ॥ तस्मिन्निति निमित्तभेदान्मतभेदोभवति कुलधुर्यस्ययुधिष्ठिरस्यमतंकुलोच्छेदोमाभूदितिकेशाकर्षणच्छिष्टायाःद्रौपद्यामतंशत्रवोनिर्मूलंउन्मूलनीयाइति तत्रकालानुरूपंयत्तूक्ष्मंयोग्यंतत्त्वयाकार्यमित्यर्थः ॥ ५ ॥ अनित्यानाशवतीमतिर्येषांते ॥ ६ ॥ नकेवलंव्यक्तिभेदान्मतभेदः किंतुव्यक्तयैक्येपिअवस्थाभेदान्मतभेदोभवतीत्याह अन्यथेत्यादिना अदृश्येष्विति अज्ञातवासकालेकथमनादृताश्चरिष्यामइत्येवमनोरथआसीत्दृश्येषुइदानींभव्येषुअस्मासुकदाराज्यंप्राप्स्यामइत्यस्तीतिभावः ॥ ७ ॥ प्रणयआदरः ॥ ८ ॥ नव्यथेत्कुध्येत् ॥ ९ ॥ १० ॥

॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ अर्थंप्रयोजनं निवर्तंतंभ्रश्यंतं ॥ १८ ॥ ॥इतिउद्योगप०नैलकंठीयेभारतभावदीपेअशीतितमोऽध्यायः ॥ ८० ॥ ॥ ७ ॥ ॥ यदेतदिति ॥ १ ॥
॥ २ ॥ ॥ ३ ॥ यदियद्यपिभीमादयोधार्मिकाःस्युःतथापिअहंधर्ममुत्सृज्यतेनसहयोद्धुमिच्छामि ॥ ४ ॥ महाबाहोहेकृष्ण ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेए

सभवान्कुरुमध्येतंसांत्वपूर्वंभयोत्तरम् ॥ ब्रूयाद्वाक्यंयथामंदोनव्यथेतसुयोधनः ॥ ११ ॥ युधिष्ठिरंभीमसेनंबीभत्सुंचापराजितम् ॥ सहदेवंचमांचैवत्वांचरामंचकेशव ॥ १२ ॥ सात्यकिंचमहावीर्यंविराटंचसहात्मजम् ॥ द्रुपदंचसहामात्यंधृष्टद्युम्नंचमाधव ॥ १३ ॥ काशिराजंचविक्रांतंधृष्टकेतुंचचेदिपम् ॥ मांसशोणितभृन्मर्त्यःप्रतियुध्येतकोयुधि ॥ १४ ॥ सभवान्गमनादेवसाधयिष्यत्यसंशयम् ॥ इष्टमर्थंमहाबाहोधर्मराजस्यकेवलम् ॥ १५ ॥ विदुरश्चैवभीष्मश्चद्रोणश्चसहबाह्लिकः ॥ श्रेयःसमर्थाविज्ञातुमुच्यमानास्त्वयानघ ॥ १६ ॥ तेचैनमनुनेष्यंतिधृतराष्ट्रंजनाधिपम् ॥ तंचपापसमाचारंसहामात्यंसुयोधनम् ॥ १७ ॥ श्रोताचार्थस्यविदुरस्त्वंचवक्ताजनार्दन ॥ कमिवार्थंनिवर्तंतंस्थापयेतांनवर्त्मनि ॥ १८ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिनकुलवाक्येअशीतितमोऽध्यायः ॥ ८० ॥ ॥ ७ ॥ ॥ सहदेवउवाच ॥ ॥ यदेतत्कथितंराज्ञाधर्मएषसनातनः ॥ यथाचयुद्धमेवस्यात्तथाकार्यमरिंदम ॥ १ ॥ यदिप्रशममिच्छेयुःकुरवःपांडवैःसह ॥ तथापियुद्धंदाशार्हयोजयेथाःसहैवतैः ॥ २ ॥ कथंनुदृष्ट्वापांचालींतथाकृष्णसभागताम् ॥ अवधेनप्रशाम्येतममन्युःसुयोधने ॥ ३ ॥ यदिभीमार्जुनौकृष्णधर्मराजश्चधार्मिकः ॥ धर्ममुत्सृज्यतेनाहंयोद्धुमिच्छामिसंयुगे ॥ ४ ॥ ॥ सात्यकिरुवाच ॥ ॥ सत्यमाहमहाबाहोसहदेवोमहामतिः ॥ दुर्योधनवधेशांतिस्तस्यकोपस्यमेभवेत् ॥ ५ ॥ नजानासियथादृष्ट्वाचीराजिनधरान्वने ॥ तवापिमन्युरुद्भूतोदुःखितान्प्रेक्ष्यपांडवान् ॥ ६ ॥ तस्मान्माद्रीसुतःशूरोयदाहरणकर्कशः ॥ वचनंसर्वयोधानांतन्मतंपुरुषोत्तम ॥ ७ ॥ ॥ वैशंपायनउवाच ॥ ॥ एवंवदतिवाक्यंतुयुयुधानेमहामतौ ॥ सुभीमःसिंहनादोभूद्योधानांतत्रसर्वशः ॥ ८ ॥ सर्वेहिसर्वशोवीरास्तद्वचःप्रत्यपूजयन् ॥ साधुसाध्वितिशैनेयंहर्षयंतोयुयुत्सवः ॥ ९ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिसहदेवसात्यकिवाक्येएकाशीतितमोऽध्यायः ॥ ८१ ॥ ॥ ७ ॥ ॥ वैशंपायनउवाच ॥ ॥ राज्ञस्तुवचनंश्रुत्वाधर्मार्थसहितंहितम् ॥ कृष्णादाशार्हमासीनमब्रवीच्छोककर्शिता ॥ १ ॥ सुताद्रुपदराजस्यस्वसितायतमूर्धजा ॥ संपूज्यसहदेवंचसात्यकिंचमहारथम् ॥ २ ॥ भीमसेनंचसंशांतंदृष्ट्वापरमदुर्मनाः ॥ अश्रुपूर्णेक्षणावाक्यमुवाचेदंमनस्विनी ॥ ३ ॥

काशीतितमोऽध्यायः ॥ ८१ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ राज्ञस्त्विति ॥ १ ॥ स्वसितायतमूर्धजाअतिकृष्णादीर्घाश्चकेशायस्याः ॥ २ ॥ ३ ॥

॥ ४ ॥ मंत्रेशमप्रधानं ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ प्रतिसमासितुंप्रतिपक्षतयास्थातुं ॥ ११ ॥ कश्चनअर्थःशमोपायःशक्यःकर्तुमितिशेषः ॥ १२ ॥ १३ ॥ १४ ॥ समर्थंयुक्तं ॥ १५ ॥ १६ ॥

विदितंतेमहाबाहोधर्मज्ञमधुसूदन ॥ यथानिकृतिमास्थायभ्रंशिताःपांडवाःसुखात् ॥ ४ ॥ धृतराष्ट्रस्यपुत्रेणसामात्येनजनार्दन ॥ यथाचसंजयोराज्ञामंत्रंरहसिश्रावितः ॥ ५ ॥ युधिष्ठिरस्यदाशार्हतच्चापिविदितंतव ॥ यथोक्तःसंजयश्चैवतच्चसर्वंश्रुतंत्वया ॥ ६ ॥ पंचनस्तातदीयंतांग्रामाइतिमहाद्युते ॥ अविस्थलंवृकस्थलंमाकंदींवारणावतम् ॥ ७ ॥ अवसानंमहाबाहोकंचिदेकंचपंचमम् ॥ इतिदुर्योधनोवाच्यःसुहृदश्चास्यकेशव ॥ ८ ॥ नचापित्यकरोद्वाक्यंश्रुत्वाकृष्णसुयोधनः ॥ युधिष्ठिरस्यदाशार्हश्रीमतःसंधिमिच्छतः ॥ ९ ॥ अप्रदानेनराज्यस्ययदिकृष्णसुयोधनः ॥ संधिमिच्छेन्नकर्तव्यंतत्रगत्वाकथंचन ॥ १० ॥ शक्ष्यंतिहिमहाबाहोपांडवाःसृंजयैःसह ॥ धार्तराष्ट्रबलंघोरंक्रुद्धंप्रतिसमासितुम् ॥ ११ ॥ नहिसाम्नानदानेनशक्योर्थस्तेषुकश्चन ॥ तस्मात्तेषुनकर्तव्याकृपातेमधुसूदन ॥ १२ ॥ साम्नादानेनवाकृष्णयेनशाम्यंतिशत्रवः ॥ योक्तव्यस्तेषुदंडःस्याज्जीवितंपरिरक्षता ॥ १३ ॥ तस्मात्तेषुमहादंडःक्षेप्तव्यःक्षिप्रमच्युत ॥ त्वयाचैवमहाबाहोपांडवैःसहसृंजयैः ॥ १४ ॥ एतत्समर्थंपार्थानांतवचैवयशस्करम् ॥ क्रियमाणंभवेत्कृष्णक्षत्रस्यचसुखावहम् ॥ १५ ॥ क्षत्रियेणहिहंतव्यःक्षत्रियोलोभमास्थितः ॥ अक्षत्रियोबादाशार्हस्वधर्ममनुतिष्ठता ॥ १६ ॥ अन्यत्रब्राह्मणात्तातसर्वपापेष्ववस्थितात् ॥ गुरुर्हिसर्ववर्णानांब्राह्मणःप्रसृताग्रभुक् ॥ १७ ॥ यथाऽवध्येवध्यमानेभवेद्दोषोजनार्दन ॥ सवध्यस्यावधेदृष्टइतिधर्मविदोविदुः ॥ १८ ॥ यथात्वांनस्पृशेदेषदोषःकृष्णतथाकुरु ॥ पांडवैःसहदाशार्हैःसृंजयैश्चससैनिकैः ॥ १९ ॥ पुनरुक्तंचवक्ष्यामिविश्रंभेणजनार्दन ॥ कातुसीमंतिनीमादृक्पृथिव्यामस्तिकेशव ॥ २० ॥ सुताद्रुपदराजस्यवेदिमध्यात्समुत्थिता ॥ धृष्टद्युम्नस्यभगिनीतवकृष्णप्रियासखी ॥ २१ ॥ आजमीढकुलंप्राप्तास्नुषापांडोर्महात्मनः ॥ महिषीपांडुपुत्राणांपंचेंद्रसमवर्चसाम् ॥ २२ ॥ सुतामेपंचभिर्वीरैःपंचजातामहारथाः ॥ अभिमन्युर्यथाकृष्णतथातेतवधर्मतः ॥ २३ ॥ साहंकेशग्रहंप्राप्तापरिक्लिष्टासभांगता ॥ पश्यतांपांडुपुत्राणांत्वयिजीवतिकेशव ॥ २४ ॥ जीवत्सुपांडुपुत्रेषुपंचालेष्वथवृष्णिषु ॥ दासीभूतास्मिपापानांसभामध्येव्यवस्थिता ॥ २५ ॥ निरमर्षेष्वचेष्टेषुप्रेक्षमाणेषुपांडुषु ॥ पाहिमामितिगोविंदमनसाचिंतितोसिमे ॥ २६ ॥ यत्रमांभगवान्राजाश्वश्रुरोवाक्यमब्रवीत् ॥ वरंवृणीष्वपांचालिवरार्हासिमतामम ॥ २७ ॥

प्रसृतंप्रदत्तंचतदग्र्यंचतस्यभोक्ताप्रसृताग्रभुक् पूज्यइत्यर्थः ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥

॥२८॥२९॥३०॥३१॥३२॥ मृदुसंहारंवेणीरूपेणसमाहृतमपिमृदुं वृजिनाग्रंकुटिलाग्रं केशवत्सूक्ष्माग्रंवा वृजिनःकुटिलेन्यंवदितिविश्वः सुदर्शनंरमणीयं ॥३३॥३४॥३५॥३६॥३७॥३८॥३९॥४०॥

अदासाःपांडवाःसंतुसरथाःसायुधाइति ॥ मयोक्तेयत्रनिर्मुक्तावनवासायकेशव ॥ २८ ॥ एवंविधानांदुःखानामभिज्ञोसिजनार्दन ॥ त्रायस्वपुंडरीकाक्षस भर्तृज्ञातिबांधवान् ॥ २९ ॥ नन्वहंकृष्णभीष्मस्यधृतराष्ट्रस्यचोभयोः ॥ स्नुषाभवामिधर्मेणसाहंदासीकृताबलात् ॥ ३० ॥ धिक्पार्थस्यधनुष्मत्तांभीमसेनस्य धिग्बलं ॥ यत्रदुर्योधनःकृष्णमुहूर्तमपिजीवति ॥ ३१ ॥ यदितेहमनुग्राह्यायदितेस्तिकृपामयि ॥ धार्तराष्ट्रेषुवैकोपःसर्वःकृष्णविधीयतां ॥ ३२ ॥ ॥ वैशंपाय नउवाच इत्युक्त्वामृदुसंहारंवृजिनाग्रंसुदर्शनम् ॥ सुनीलमसितापांगीसर्वगंधाधिवासितम् ॥ ३३ ॥ सर्वलक्षणसंपन्नंमहाभुजगवर्चसं ॥ केशपक्षंवरारोहा गृह्यवामेनपाणिना ॥ ३४ ॥ पद्माक्षीपुंडरीकाक्षमुपेत्यगजगामिनी ॥ अश्रुपूर्णेक्षणाकृष्णाकृष्णंवचनमब्रवीत् ॥ ३५ ॥ अयंतेपुंडरीकाक्षदुःशासनकरोद्धृतः ॥ स्मर्तव्यःसर्वकार्येषुपरेषांसंधिमिच्छता ॥ ३६ ॥ यदिभीमार्जुनौकृष्णकृपणौसंधिकामुकौ ॥ पितामेयोत्स्यतेवृद्धःसहपुत्रैर्महारथैः ॥ ३७ ॥ पंचचैवमहावीर्याःपु त्रामेमधुसूदन ॥ अभिमन्युंपुरस्कृत्ययोत्स्यंतेकुरुभिःसह ॥ ३८ ॥ दुःशासनभुजंश्यामंसंछिन्नंपांसुगुंठितम् ॥ यद्यहंतुनपश्यामिकाशांतिर्हृदयस्यमे ॥ ३९ ॥ त्रयो दशहिवर्षाणिप्रतीक्षंत्यागतानिमे ॥ विधायहृदयेमन्युंप्रदीप्तमिवपावकम् ॥ ४० ॥ विदीर्यतेमेहृदयंभीमवाक्शल्यपीडितम् ॥ योयमद्यमहाबाहुर्धर्ममेवानुप श्यति ॥ ४१ ॥ इत्युक्त्वाबाष्परुद्धेनकंठेनायतलोचना ॥ रुरोदकृष्णासोत्कंपंसस्वरंबाष्पगद्गदम् ॥ ४२ ॥ स्तनौपीनायतश्रोणीसहितावभिवर्षती ॥ द्रवीभूतमिवा त्युष्णंमुंचतीवारिनेत्रजम् ॥ ४३ ॥ तामुवाचमहाबाहुःकेशवःपरिसांत्वयन् ॥ अचिराद्द्रक्ष्यसेकृष्णेरुदतीर्भरतस्त्रियः ॥ ४४ ॥ एवंताभीरुरोत्स्यंतिनिहतज्ञातिबां धवाः ॥ हतमित्राहतबलायेषांक्रुद्धासिभामिनी ॥ ४५ ॥ अहंचतत्करिष्यामिभीमार्जुनयमैःसह ॥ युधिष्ठिरनियोगेनदैवाच्चविधिनिर्मितात् ॥ ४६ ॥ धार्तराष्ट्राः कालपक्वानचेच्छृण्वंतिमेवचः ॥ शेष्यंतेनिहताभूमौश्वसृगालादनीकृताः ॥ ४७ ॥ चलेद्धिहिमवान्शैलोमेदिनीशतधाफलेत् ॥ द्यौःपतेच्चसनक्षत्रानमेमोघंव चोभवेत् ॥ ४८ ॥ सत्यंतेप्रतिजानामिकृष्णेबाष्पोनिगृह्यताम् ॥ हतामित्रान्श्रियायुक्तानचिराद्द्रक्ष्यसेपतीन् ॥ ४९ ॥ ॥ इतिश्रीम० उद्यो० भगवद्या० द्रोपदीकृ ष्णसंवादेद्व्यशीतितमोऽध्यायः ॥ ८२ ॥ ॥ ७ ॥ ॥ अर्जुनउवाच ॥ कुरूणामद्यसर्वेषांभवान्सुहृदनुत्तमः ॥ संबंधीदयितोनित्यमुभयोःपक्षयोरपि ॥ १ ॥

हेभीमशत्रुभयंकरकृष्ण योयंभवान् ॥ ४१ ॥ ४२ ॥ अत्युष्णंवह्निं ॥ ४३ ॥ ४४ ॥ रोत्स्यंतिरोदिष्यंति ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ॥ इति० उ० नै० भा० द्व्यशीतितमोऽध्यायः ॥ ८२ ॥ ॥ ७ ॥ ॥ कुरूणामिति ॥ १ ॥

प्रतिपाद्यंसंपाद्यं अनामयंकुशलं ॥ २ ॥ ३ ॥ ४ ॥ यास्यामि तदेवकर्तुमितिशेषः अभीप्सयाप्राप्तुमिच्छया ॥ ५ ॥ विमलवद्गतेनिर्मलाकाशगे मैत्रेजन्मर्क्षादष्टमतारायां दूतस्यहिस्वामिबलेनैवबलवत्त्व

पांडवैर्धार्तराष्ट्राणांप्रतिपाद्यमनामयम् ॥ समर्थःप्रशमंचैवकर्तुमर्हसिकेशव ॥ २ ॥ त्वमितःपुंडरीकाक्षसुयोधनममर्षणम् ॥ शांत्यर्थंभ्रातरंब्रूयायत्तद्वाच्यममि त्रहन् ॥ ३ ॥ त्वयाधर्मार्थयुक्तंचेदुक्तंशिवमनामयम् ॥ हितंनादास्यतेबालोदिष्टस्यवशमेष्यति ॥ ४ ॥ ॥ श्रीभगवानुवाच ॥ ॥ धर्म्यमस्मद्धितंचैवकुरूणांय दनामयम् ॥ एषयास्यामिराजानंधृतराष्ट्रमभीप्सया ॥ ५ ॥ ॥ वैशंपायनउवाच ॥ ॥ ततोव्यपेतेतमसिसूर्येविमलवद्गते ॥ मैत्रेमुहूर्तेसंप्राप्तेमृद्वर्चिषिदिवाक रे ॥ ६ ॥ कौमुदेमासिरेवत्यांशरदंतेहिमागमे ॥ स्फीतसस्यसुखेकालेकल्पःसत्त्ववतांवरः ॥ ७ ॥ मंगल्याःपुण्यनिर्घोषावाचःशृण्वंश्चसूनृताः ॥ ब्राह्मणानांप्रती तानामृषीणामिववासवः ॥ ८ ॥ कृत्वापौर्वाह्णिकंकृत्यंस्नातःशुचिरलंकृतः ॥ उपतस्थेविवस्वंतंपावकंचजनार्दनः ॥ ९ ॥ ऋषभंपृष्ठआलभ्यब्राह्मणानभिवाद्य च ॥ अग्निंप्रदक्षिणंकृत्वापश्यन्कल्याणमग्रतः ॥ १० ॥ तत्प्रतिज्ञायवचनंपांडवस्यजनार्दनः ॥ शिनेर्नप्तारमासीनमभ्यभाषतसात्यकिम् ॥ ११ ॥ रथआरोप्य तांशंखश्चक्रंचगदयासह ॥ उपासंगाश्चशक्त्यश्वसर्वप्रहरणानिच ॥ १२ ॥ दुर्योधनश्चदुष्टात्माकर्णश्चसहसौबलः ॥ नचशत्रुरवज्ञेयोदुर्बलोपिबलीयसा ॥ १३ ॥ ततस्तन्मतमाज्ञायकेशवस्यपुरःसराः ॥ प्रसस्रुर्योजयिष्यंतोरथंचक्रगदाभृतः ॥ १४ ॥ तंदीप्तमिवकालाग्निमाकाशगमिवाशुगम् ॥ सूर्यचंद्रप्रकाशाभ्यांचक्रा भ्यांसमलंकृतम् ॥ १५ ॥ अर्धचंद्रैश्चचंद्रैश्चमत्स्यैःसमृगपक्षिभिः ॥ पुष्पैश्चविविधैश्चित्रंमणिरत्नैश्चसर्वशः ॥ १६ ॥ तरुणादित्यसंकाशंबृहंतंचारुदर्शनम् ॥ मणिहेमविचित्रांगंसुध्वजंसुपताकिनम् ॥ १७ ॥ सूपस्करमनाधृष्यंवैयाघ्रपरिवारणम् ॥ यशोघ्नंप्रत्यमित्राणांयदूनांनंदिवर्धनम् ॥ १८ ॥ वाजिभिःशैब्य सुग्रीवमेघपुष्पबलाहकैः ॥ स्नातैःसंपादयामासुःसंपन्नैःसर्वसंपदा ॥ १९ ॥ महिमानंतुकृष्णस्यभूयएवाभिवर्धयन् ॥ सुघोषःपतगेंद्रेणध्वजेनयुयुजेरथः ॥ २० ॥ तंमेरुशिखरप्रख्यंमेघदुंदुभिनिःस्वनम् ॥ आरुरोहरथंशौरिर्विमानमिवकामगम् ॥ २१ ॥ ततःसात्यकिमारोप्यप्रययौपुरुषोत्तमः ॥ पृथिवींचांतरि क्षंचरथघोषेणनादयन् ॥ २२ ॥ व्यपोढाभ्रस्ततःकालःक्षणेनसमपद्यत ॥ शिवश्चानुववौवायुःप्रशांतमभवद्रजः ॥ २३ ॥

मित्यर्थः ॥ ६ ॥ कौमुदेकार्तिके रेवत्यांअर्जुनस्यफल्गुनीजातस्यरेवतीमैत्रताराभवतीतिप्रसिद्धम् ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ प्रतिज्ञायअनुस्मृत्य ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ आकाशगःसूर्यः आकाशमिवचेतिपाठे जंगमाकाशतुल्यमित्यर्थः विशालत्वात् नक्षत्रोपमरत्नरचितत्वाच्च तदेवाह सूर्येति ॥ १५ ॥ १६ ॥ १७ ॥ सूपस्करंशोभनैरुपकरणैरुपेतम् ॥ १८ ॥ संपादयामासुःसज्जीकृतवंतः ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

॥ २४ ॥ मंगल्यार्थपदैः विजयी भवेत्यादिमंगलावहैः ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ संसाधनार्थं कार्यनिष्पत्त्यर्थम् ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥

प्रदक्षिणानुलोमाश्वमंगल्यास्तगपक्षिणः ॥ प्रयाणेवासुदेवस्यबभूवुरनुयायिनः ॥ २४ ॥ मंगल्यार्थपदैःशब्दैरन्ववर्ततसर्वशः ॥ सारसाःशतपत्राश्वहंसाश्वमधुसूदनम् ॥ २५ ॥ मंत्राहुतिमहाहोमैर्हूयमानश्चपावकः ॥ प्रदक्षिणमुखोभूत्वाविधूमःसमपद्यत ॥ २६ ॥ वसिष्ठोवामदेवश्चभूरिद्युम्नोगयःकवः ॥ शुक्रनारदवाल्मीकामरुतःकुशिकोभृगुः ॥ २७ ॥ देवब्रह्मर्षयश्चैवकृष्णंयदुसुखावहम् ॥ प्रदक्षिणमवर्ततसहितावासवानुजम् ॥ २८ ॥ एवमेतैर्महाभागैर्महर्षिगणसाधुभिः ॥ पूजितःप्रययौकृष्णःकुरूणांसदनंप्रति ॥ २९ ॥ तंप्रयांतमनुप्रायात्कुंतीपुत्रोयुधिष्ठिरः ॥ भीमसेनार्जुनौचाभौमाद्रीपुत्रौचपांडवौ ॥ ३० ॥ चेकितानश्चविक्रांतोधृष्टकेतुश्चचेदिपः ॥ द्रुपदःकाशिराजश्चशिखंडीचमहारथः ॥ ३१ ॥ धृष्टद्युम्नःसपुत्रश्चविराटःकेकयैःसह ॥ संसाधनार्थंप्रययुःक्षत्रियाःक्षत्रियर्षभं ॥ ३२ ॥ ततोनुव्रज्यगोविंदंधर्मराजोयुधिष्ठिरः ॥ राज्ञांसकाशेद्युतिमानुवाचेदंवचस्तदा ॥ ३३ ॥ योवैनकामान्नभयान्नलोभान्नार्थकारणात् ॥ अन्यायमनुवर्ततस्थिरबुद्धिरलोलुपः ॥ ३४ ॥ धर्मज्ञोधृतिमान्प्राज्ञःसर्वभूतेषुकेशवः ॥ ईश्वरःसर्वभूतानांदिवदेवःसनातनः ॥ ३५ ॥ तंसर्वगुणसंपन्नंश्रीवत्सकृतलक्षणम् ॥ संपरिष्वज्यकौंतेयःसंदेष्टुमुपचक्रमे ॥ ३६ ॥ ॥ युधिष्ठिरउवाच ॥ ॥ यासाबाल्यात्प्रभृत्यस्मान्पर्यवर्धयताबला ॥ उपवासतपःशीलासदास्वस्ययनेरता ॥ ३७ ॥ देवतातिथिपूजासुगुरुशुश्रूषणेरता ॥ वत्सलाप्रियपुत्राचप्रियास्माकंजनार्दन ॥ ३८ ॥ सुयोधनभयाद्यानोऽत्रायतामित्रकर्शन ॥ महतोमृत्युसंबाधादुद्धरेन्नौरिवार्णवात् ॥ ३९ ॥ अस्मत्कृतेचसततंययादुःखानिमाधव ॥ अनुभूतान्यदुःखार्हातांस्मपृच्छेरनामयम् ॥ ४० ॥ भृशमाश्वासयेश्चैनांपुत्रशोकपरिप्लुताम् ॥ अभिवाद्यस्वजेयास्त्वंपांडवान्परिकीर्तयन् ॥ ४१ ॥ ऊढात्प्रभृतिदुःखानिश्वशुराणामरिंदम ॥ निकारानतदर्हाचपश्यंतीदुःखमश्नुते ॥ ४२ ॥ अपिजातुसकालःस्यात्कृष्णदुःखविपर्ययः ॥ यदहंमातरंक्ष्विष्टांसुखंद्यामरिंदम ॥ ४३ ॥ प्रव्रजंतोनुधावंतींरुपणांपुत्रगृद्धिनीम् ॥ रुदतीमुपहायैनामगच्छाम वयंवनम् ॥ ४४ ॥ ननूनंम्रियतेदुःखैःसाचेज्जीवतिकेशव ॥ तथापुत्राधिभिर्गाढमार्तात्यानर्तसत्कृत ॥ ४५ ॥ अभिवाद्याथसाकृष्णत्वयामद्वचनाद्विभो ॥ धृतराष्ट्रश्चकौरव्योराजानश्चवयोधिकाः ॥ ४६ ॥ भीष्मंद्रोणंकृपंचैवमहाराजंचबाह्लिकम् ॥ द्रौणिंचसोमदत्तंचसर्वांश्चभरतान्प्रति ॥ ४७ ॥

॥ ४१ ॥ ऊढात्विवाहात् यद्वा ऊढस्तंद्रितबालयोरितिविश्वः बाल्यादित्यर्थः उभयत्रभावप्रधानोनिर्देशः ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥

॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ वीथीमार्गः ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥

विदुरंचमहाप्राज्ञंकुरूणांमंत्रधारिणम् ॥ अगाधबुद्धिममज्ञंत्वजेयामधुसूदन ॥ ४८ ॥ इत्युक्त्वाकेशवंतत्रराजमध्येयुधिष्ठिरः ॥ अनुज्ञातोनिवर्तेतकृष्णंकृत्वाप्रदक्षिणम् ॥ ४९ ॥ व्रजन्नेवतुबीभत्सुःसखायंपुरुषर्षभम् ॥ अब्रवीत्परवीरघ्नंदाशार्हमपराजितम् ॥ ५० ॥ यदस्माकंविभोवृत्तंपुरावैमंत्रनिश्चये ॥ अर्धराज्यस्यगोविंदविदितंसर्वराजसु ॥ ५१ ॥ तच्चेद्यादसंगेनसत्कृत्यानवमन्यच ॥ प्रियंमेस्यान्महाबाहोमुच्येरन्महतोभयात् ॥ ५२ ॥ अतश्चेदन्यथाकर्ताधार्तराष्ट्रोनुपायवित् ॥ अंतंनूनंकरिष्यामिक्षत्रियाणांजनार्दन ॥ ५३ ॥ ॥ वैशंपायनउवाच ॥ ॥ एवमुक्तेपांडवेनसमृष्यद्वकोदरः ॥ मुहुर्मुहुःक्रोधवशात्प्रावेपतचपांडवः ॥ ५४ ॥ वेपमानश्चकौंतेयःप्राक्रोशन्महतोरवान् ॥ धनंजयवचःश्रुत्वाहर्षोत्सिक्तमनाभृशम् ॥ ५५ ॥ तस्यतंनिनदंश्रुत्वासंप्रावेपंतधन्विनः ॥ वाहनानिचसर्वाणिशकृन्मूत्रेप्रसुस्रुवुः ॥ ५६ ॥ इत्युक्त्वाकेशवंतत्रतथाचोक्त्वाविनिश्चयम् ॥ अनुज्ञातोनिवर्तेतपरिष्वज्यजनार्दनम् ॥ ५७ ॥ तेषुराजसुसर्वेषुनिवृत्तेषुजनार्दनः ॥ तूर्णमभ्यगमद्वृष्टःशैव्यसुग्रीववाहनः ॥ ५८ ॥ तेहयावासुदेवस्यदारुकेणप्रचोदिताः ॥ पंथानमाचेमुरिवग्रसमानाइवांबरम् ॥ ५९ ॥ अथापश्यन्महाबाहुर्ऋषीनध्वनिकेशवः ॥ ब्राह्म्याश्रियादीप्यमानान्स्थितानुभयतःपथिः ॥ ६० ॥ सोवतीर्यरथात्तूर्णमभिवाद्यजनार्दनः ॥ यथावृत्तान्नृषीन्सर्वानभ्यभाषतपूजयन् ॥ ६१ ॥ कच्चिल्लोकेषुकुशलंकच्चिद्धर्मःस्वनुष्ठितः ॥ ब्राह्मणानांत्रयोवर्णाःकच्चित्तिष्ठंतिशासने ॥ ६२ ॥ तेभ्यःप्रयुज्यतांपूजांप्रोवाचमधुसूदनः ॥ भगवंतःकृसंसिद्धाःकावीथीभवतामिह ॥ ६३ ॥ किंवाकार्यंभगवतामहंकिंकरवाणिवः ॥ केनार्थेनोपसंप्राप्ताभगवंतोमहीतलम् ॥ ६४ ॥ तमब्रवीज्जामदग्न्यउपेत्यमधुसूदनम् ॥ परिष्वज्यचगोविंदंसुरासुरपतेःसखा ॥ ६५ ॥ देवर्षयःपुण्यकृतोब्राह्मणाश्चबहुश्रुताः ॥ राजर्षयश्चदाशार्हमानयंतस्तपस्विनः ॥ देवासुरस्यद्रष्टारःपुराणस्यमहामते ॥ ६६ ॥ समेतंपार्थिवंक्षत्रंदिदृक्षंतश्चसर्वतः ॥ सभासदश्चराजानस्त्वांचसत्यंजनार्दनम् ॥ ६७ ॥ एतन्महत्प्रेक्षणीयंद्रष्टुंगच्छामकेशव ॥ धर्मार्थसहितावाचःश्रोतुमिच्छाममाधव ॥ ६८ ॥ त्वयोच्यमानाःकुरुषुराजमध्येपरंतप ॥ भीष्मद्रोणादयश्चैवविदुरश्चमहामतिः ॥ ६९ ॥ त्वंचयादवशार्दूलसभायांवैसमेष्यथ ॥ तववाक्यानिदिव्यानितथातेषांचमाधव ॥ ७० ॥ श्रोतुमिच्छामगोविंदसत्यानिचहितानिच ॥ आपृष्टोसिमहाबाहोपुनर्द्रक्ष्यामहेवयम् ॥ ७१ ॥

॥७२॥ ॥इ०उ०ने०भा०त्र्यशीतितमोऽध्यायः॥८३॥ ॥७॥ ॥प्रयांतमिति॥१॥२॥३॥दिव्यानिशकुनानिऔत्पातिकानिअशंकुनानि॥४॥५॥प्रत्यक्प्रवतीपऊर्ध्वःप्रवाहःकृतवत्यः॥६॥७॥८॥खेशरीरंछायापु

यात्यविघ्नेनवैवीरद्रक्ष्यामस्त्वांसभागतम्॥आसीनमासनेदिव्येज्वलंतंतेजःसमाहितम्॥७२॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिश्रीकृष्णप्र

स्थानेत्र्यशीतितमोऽध्यायः॥८३॥ ॥७॥ ॥वैशंपायनउवाच॥प्रयांतंदेवकीपुत्रंपरवीररुजोदृशः॥ महारथामाहाबाहुमन्वयुःशस्त्रपाणयः॥१॥ पदातीनां

सहस्रंचसादिनांचपरंतप॥भोज्यंचविपुलंराजन्प्रेष्याश्चशतशोपरे॥२॥ ॥जनमेजयउवाच॥कथंप्रयातोदाशार्होमहात्मामधुसूदनः॥ कानिवाव्रजतस्त

स्यनिमित्तानिमहौजसः॥३॥ ॥वैशंपायनउवाच॥ ॥तस्यप्रयाणेयान्यासन्निमित्तानिमहात्मनः॥ तानिमेशृणुसर्वाणिदैवान्यौत्पातिकानिच॥४॥ अ

नभ्रेशनिनिर्घोषःसविद्युत्समजायत॥अन्वगेवचपर्जन्यःप्रावर्षद्विघनेभृशम्॥५॥ प्रत्यगूर्दुर्महानद्यःप्राङ्मुखाःसिंधुसंगमाः॥विपरीतादिशःसर्वानप्राज्ञायत

किंचन॥६॥प्राज्वलन्नग्नयोराजन्पृथिवीसमकंपत॥उदपानाश्चकुंभाश्चप्रासिंचन्शतशोजलम्॥७॥तमःसंवृतमप्यासीत्सर्वंजगदिदंतथा॥नदिशोनादि

शोराजन्प्रज्ञायंतेस्मरेणुना॥८॥प्रादुरासीन्महाञ्छब्दःखेशरीरंनदृश्यते॥सर्वेषुराजन्देशेषुतदद्भुतमिवाभवत्॥९॥ग्रामाद्ग्रामंनिनपुरंवातोदक्षिणपश्चि

मः॥आरुजन्गणशोवृक्षान्पुरुषोऽशनिनिःस्वनः॥१०॥यत्रयत्रचवार्ष्णेयोवर्ततेपथिभारत॥तत्रतत्रसुखोवायुःसर्वचासीत्प्रदक्षिणम्॥११॥ववर्षपुष्पव

र्षंचकमलानिचभूरिशः॥समश्वपंथानिर्दुःखोव्यपेतकुशकंटकः॥१२॥ संस्तुतोब्राह्मणैर्गीर्भिस्तत्रतत्रसहस्रशः॥ अर्च्यतेमधुपर्कैश्चवसुभिश्चवसुप्रदः॥१३

तंकिरंतिमहात्मानंवन्यैःपुष्पैःसुगंधिभिः॥स्त्रियःपथिसमागम्यसर्वभूतहितेरतम्॥१४॥ सशालिभवनंरम्यंसर्वसस्यसमाचितम्॥सुखंपरमधर्मिष्ठमभ्यगाद्ग्र

रतर्षभ॥१५॥पश्यन्बहुपशून्ग्रामान्रम्यान्हृदयतोषणान्॥पुराणिचव्यतिक्रामन्राष्ट्राणिविविधानिच॥१६॥नित्यंहृष्टाःसुमनसोभारतैरभिरक्षिताः॥

नोद्विग्नाःपरचक्राणांव्यसनानामकोविदाः॥१७॥ उपप्लव्यादथागम्यजनाःपुरनिवासिनः॥पथ्यतिथ्यंतसहितविष्वक्सेनदिदृक्षया॥१८॥तेतुसर्वेसमायां

तमग्निमिद्धमिवप्रभुम्॥अर्चयामासुरर्चार्हंदेशातिथिमुपस्थितम्॥१९॥वृकस्थलंसमासाद्यकेशवःपरवीरहा॥प्रकीर्णरश्मावादित्येव्योम्निवैलोहितायति॥

॥२०॥ अवतीर्यरथात्तूर्णंकृत्वाशौचंयथाविधि॥रथमोचनमादिश्यसंध्यामुपविवेशह॥२१॥

रुषशरीरम्॥९॥दक्षिणपश्चिमःनिर्ऋतिदेशः॥१०॥औत्पातिकान्युक्तादैवान्याह यत्रयत्रेति॥११॥१२॥१३॥१४॥भवंतिअस्मिन्निति भवनंक्षेत्रम्॥१५॥१६॥१७॥उपप्लव्यात्पामात्॥१८॥१९॥२०॥२१

॥ ९३ ॥

॥२२॥२३॥२४॥२५॥२६॥॥२७॥२८॥२९॥ ॥इतिउद्योगप०नैलकंठीयेभारतभावदीपेचतुरशीतितमोऽध्यायः॥८४॥ ॥७॥ ॥तथादूतैरिति॥१॥२॥३॥४॥५॥६॥७॥अभिप्रायान्मनोरथान्॥८॥

दारुकोपिहयान्मुक्तापरिचर्यचशास्त्रतः॥ मुमोचसर्वयोक्त्रादिमुक्त्वाचैतानवास्त्रजत्॥२२॥ अभ्यतीत्यतुतत्सर्वमुवाचमधुसूदनः॥ युधिष्ठिरस्यकार्यार्थंमिह

वत्स्यामहेक्षपाम्॥२३॥ तस्यतन्मतमाज्ञायचक्रुरावसथंनराः॥ क्षणेनचान्नपानानिगुणवंतिसमार्जयन्॥२४॥ तस्मिन्ग्रामेप्रधानास्तुयआसन्ब्राह्मणानृ

प॥ आर्याःकुलीनाक्षीमंतोब्राह्मींवृत्तिमनुष्ठिताः॥२५॥तेभिगम्यमहात्मानंहृषीकेशमरिंदमम्॥ पूजांचक्रुर्यथान्यायमाशीर्मंगलसंयुताम्॥२६॥तेपूजयित्वा

दाशार्हंसर्वलोकेषुपूजितम्॥ न्यवेदयंतवेश्मानिरत्नवंतिमहात्मने॥२७॥ तान्प्रभुःकृतमित्युक्तासत्कृत्यचययथार्हतः॥ अभ्येत्यचैपांवेश्मानिपुनरायात्सहैवतैः

॥२८॥ सुस्पृष्टंभोजयित्वाचब्राह्मणांस्तत्रकेशवः॥ भुक्त्वाचसहतैःसर्वैरवसत्तांक्षपांसुखम्॥२९॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिश्रीकृ

ष्णप्रयाणेचतुरशीतितमोऽध्यायः॥८४॥ ॥७॥ ॥वैशंपायनउवाच॥ ॥तथादूतैःसमाज्ञायप्रयांतंमधुसूदनम्॥ धृतराष्ट्रोब्रवीद्भीष्मंचयित्वामहाभुजं

॥१॥ द्रोणंचसंजयंचैवविदुरंचमहामतिम्॥ दुर्योधनंसहामात्यंहृष्टरोमाब्रवीदिदम्॥२॥ अद्भुतंमहदाश्चर्यंश्रूयतेकुरुनंदन॥ स्त्रियोबालाश्चवृद्धाश्चकथयंति

गृहेगृहे॥३॥ सत्कृत्याचक्षतेचान्येतथैवान्येसमागताः॥ पृथग्वादाश्चवर्तंतेचत्वरेषुसभासुच॥४॥ उपायास्यतिदाशार्हःपांडवार्थेपराक्रमी॥ सनोमान्यश्चपू

ज्यश्चसर्वथामधुसूदनः॥५॥ तस्मिन्हियाव्रालोकस्यभूतानामीश्वरोहिसः॥ तस्मिन्धृतिश्चवीर्यंचप्रज्ञाचौजश्चमाधवे॥६॥ समान्यतांनरश्रेष्ठःसहिधर्मःस

नातनः॥ पूजितोहिसुखायस्यादसुखःस्यादपूजितः॥७॥ सचेत्तुष्यतिदाशार्हउपचारैररिंदमः॥ कृष्णात्सर्वानभिप्रायान्प्राप्स्यामःसर्वराजसु॥८॥ तस्यपूजा

र्थमद्यैवसंविधत्स्वपरंतप॥ सभाःपथिविधीयंतांसर्वकामसमन्विताः॥९॥ यथाप्रीतिर्महाह्याहोत्वयिजायेततस्यवै॥ तथाकुरुष्वगांधारेकथंवाभीष्मन्यसे

॥१०॥ ततोभीष्मादयःसर्वेधृतराष्ट्रंजनाधिपम्॥ ऊचुःपरममित्येवंपूजयंतोस्यतद्वचः॥११॥ तेषामनुमतंज्ञात्वाराजादुर्योधनस्तदा॥ सभावास्तूनिरम्याणि

प्रदेष्टुमुपचक्रमे॥१२॥ ततोदेशेपुदेशेपुरमणीयेषुभागशः॥ सर्वरत्नसमाकीर्णाःसभाश्चक्रुरनेकशः॥१३॥ आसनानिविचित्राणियुतानिविविधैर्गुणैः॥

स्त्रियागंधानलंकारान्सूक्ष्माणिवसनानिच॥१४॥ गुणवंत्यन्नपानानिभोज्यानिविविधानिच॥ माल्यानिचसुगंधीनिनानिराजाददौततः॥१५॥ विशेषत

श्चवासार्थंसभांग्रामेवृकस्थले॥ विदधेकौरवोराजाबहुरत्नांमनोरमाम्॥१६॥

॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

॥ १७ ॥ १८ ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेपंचाशीतितमोऽध्यायः ॥ ८५ ॥ ॥ ७ ॥ ॥ उपप्लव्यादिति ॥ १ ॥ २ ॥ प्रपितामहःपितामहस्यब्रह्मणोपिपिता ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ई

एतद्विधायवैसर्वंदेवार्हमतिमानुषम्॥ आचख्यौधृतराष्ट्रायराजादुर्योधनस्तदा॥१७॥तासभाःकेशवःसर्वारत्नानिविविधानिच॥असमीक्ष्यैवदाशार्हउपाया
त्कुरुसद्मतत्॥ १८॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिमार्गेसभानिर्माणेपंचाशीतितमोऽध्यायः ॥ ८५॥ ॥ ७ ॥ ॥धृतराष्ट्रउवाच॥
उपप्लव्यादिहक्षत्तरुपायातोजनार्दनः॥ वकस्थलेनिवसतिसचप्रातरिहैष्यति ॥ १ ॥ आहुकानामधिपतिःपुरोगःसर्वसात्वताम्॥ महामनामहावीर्योमहास
त्त्वोजनार्दनः ॥ २ ॥ स्फीतस्यदक्षिणाराष्ट्रस्यभर्तागोप्ताचमाधवः ॥ त्रयाणामपिलोकानांभगवान्प्रपितामहः ॥ ३ ॥ वृष्ण्यंधकाःसुमनसोयस्यप्रज्ञामुपा
सते॥ आदित्यावसवोरुद्रायथाबुद्धिंबृहस्पतेः॥ ४॥तस्मैपूजांप्रयोक्ष्यामिदाशार्हायमहात्मने ॥ प्रत्यक्षंतवधर्मज्ञतांमेकथयतःशृणु ॥ ५॥ एकवर्णैःसुकुमांगै
र्बाह्लिजातैर्हयोत्तमैः॥ चतुर्युक्तान्रथांस्तस्मैरौक्मान्दास्यामिषोडश॥ ६ ॥ नित्यप्रभिन्नान्मातंगानीषादंतान्प्रहारिणः॥ अष्टानुचरमेकैकमष्टौदास्यामिकौ
रव॥ ७॥ दासीनामप्रजातानांशुभानांरुक्मवर्चसाम्॥ शतमस्मैप्रदास्यामिदासानामपितावताम्॥ ८ ॥ आविकंचसुखस्पर्शंपार्वतीयैरुपाहृतम्॥ तदप्य
स्मैप्रदास्यामिसहस्राणिदशाष्टच॥ ९॥ अजिनानांसहस्राणिचीनदेशोद्भवानिच॥ तान्यप्यस्मैप्रदास्यामियावद्दर्हतिकेशवः॥ १०॥ दिवारात्रौचभात्येषसु
तेजाविमलोमणिः॥ तमप्यस्मैप्रदास्यामितमर्हतिहिकेशवः॥ ११॥ एकेनाभिपतत्यह्नायोजनानिचतुर्दश ॥ यानमश्वतरीयुक्तंदास्येतस्मैतदप्यहम्॥ १२॥
यावंतिवाहनान्यस्ययावंतःपुरुषाश्चते॥ ततोष्टगुणमप्यस्मैभोज्यंदास्याम्यहंसदा ॥ १३ ॥ ममपुत्राश्चपौत्राश्चसर्वेदुर्योधनादृते ॥ प्रत्युद्यास्यंतिदाशार्हंरथै
र्मृष्टैःस्वलंकृताः॥ १४॥ स्वलंकृताश्चकल्याण्यःपादैरेवसहस्रशः॥ वारमुख्यामहाभागंप्रत्युद्यास्यंतिकेशवम्॥ १५ ॥ नगरादपियाःकाश्चिद्गमिष्यंतिजनार्दन
म्॥ द्रष्टुंकन्याश्चकल्याणस्ताश्चयास्यंत्यनावृताः॥ १६॥ सस्त्रीपुरुषबालंचनगरंमधुसूदनम्॥ उदीक्षतांमहात्मानंभानुमंतमिवप्रजाः॥ १७॥ महाध्वजपता
काश्चक्रियंतांसर्वतोदिशः॥ जलावसिक्तोविरजाःपंथास्तस्येतिचान्वशात्॥ १८ ॥ दुःशासनस्यचगृहंदुर्योधनगृहाद्वरम्॥ तदद्यक्रियतांक्षिप्रंसुसंमृष्टमलंकृ
तम्॥ १९॥ एतद्धिरुचिराकारैःप्रासादैरुपशोभितम्॥ शिवंचरमणीयंचसर्वर्तुसुमहाधनम्॥ २०॥

॥ ९४ ॥

बालांगलदंडस्तत्सदृशदंतान् अष्टौअनुचराःयस्यगजस्य ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ सर्वर्तुसर्वेऋतवोयुगपदस्मिन्संतीतितथा ॥ २० ॥

॥ २१ ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेषडशीतितमोऽध्यायः ॥ ८६ ॥ ॥ ७ ॥ ॥ राजन्निति ॥ १ ॥ २ ॥ ३ ॥ भावितःदृष्टः ॥ ४ ॥ मानीनशः हेतुमण्णिच् मानाशंप्रामुहि ॥ ५ ॥

सर्वमस्मिन्गृहेरत्नंममदुर्योधनस्यच॥ यद्यदर्हतिवार्ष्णेयस्तत्तद्देयमसंशयम्॥२१॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिधृतराष्ट्रवाक्येषडशी
तितमोऽध्यायः॥८६॥ ॥ ७ ॥ ॥विदुरउवाच॥ ॥राजन्बहुमतश्चासित्रैलोक्यस्यापिसत्तमः॥ संभावितश्चलोकस्यसंमतश्चासिभारत ॥ १ ॥ यत्त्वमेवंगते
ब्रूयाःपश्चिमेवयसिस्थितः॥शास्त्राद्वासुप्रतर्काद्वासुस्थिरःस्यविरोत्यसि ॥ २ ॥ लेखाशशिनिभाःसूर्यैर्महोर्मिरिवसागरे ॥ धर्मस्त्वयितथाराजन्निति व्यवसि
ताःप्रजाः॥ ३ ॥सदैवभावितोलोकोगुणौघैस्तवपार्थिव॥ गुणानांरक्षणेनित्यंप्रयतस्वसबांधवः॥४॥ आर्जवंप्रतिपद्यस्वमाबाल्याद्बहुनीनशः॥राजन्पुत्रांश्च
पौत्रांश्चसुहृदश्चैवसुप्रियान्॥ ५॥ यत्त्वमिच्छसिकृष्णायराजन्नतिथयेबहु॥ एतदन्यच्चदाशार्हःपृथिवीमपिचार्हति॥ ६॥ नतुत्वंधर्ममुद्दिश्यतस्यषाप्रियकार
णात्॥ एतद्दित्ससिकृष्णायसत्येनात्मानमालभे॥ ७॥ माषैषासत्यमेवैतच्छ्वेतद्रूरिदक्षिण॥ जानामित्वन्मतंराजन्गृहंबाल्येनकर्मणा॥ ८॥ पंचपंचैवलि
प्स्यंतिग्रामकान्पांडवान्नृप॥ नचदित्ससितेभ्यस्तांस्तच्छमंनकरिष्यसि॥ ९॥ अर्थेनतुमहाबाहुंवार्ष्णेयंत्वंजिहीर्षसि॥ अनेनचाप्युपायेनपांडवेभ्योविभेत्स्य
सि॥ १०॥ नचवित्तेनशक्योसौनोद्यमेननगर्हया॥ अन्योधनंजयात्कर्तुमेतत्तत्त्वंब्रवीमिते॥ ११॥ वेदकृष्णस्यमाहात्म्यंवेदास्यदृढभक्तिताम्॥ अत्याज्यमस्य
जानामिप्राणैस्तुल्यंधनंजयम्॥ १२॥ अन्यत्कुंभादपापूर्णादन्यत्पादावसेचनात्॥ अन्यत्कुशलसंप्रश्नान्नैवेक्ष्यतिजनार्दनः॥ १३॥ यत्त्वस्यप्रियमातिथ्यं
मानार्हस्यमहात्मनः॥ तदस्मैक्रियतांराजन्मानार्होसौजनार्दनः॥१४॥आशंसमानःकल्याणंकुरूनभ्येतिकेशवः॥ येनैवराजन्नर्थेनतदेवास्माडपाकुरु॥ १५॥
शममिच्छतिदाशार्हस्तवदुर्योधनस्यच॥ पांडवानांचराजेंद्रतदस्यवचनंकुरु॥ १६॥ पितासिराजन्पुत्रास्तेवृद्धस्त्वंशिशवःपरे॥ वर्तस्वपितृवत्तेषुवर्ततेहिपु
त्रवत्॥ १७॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिविदुरवाक्येसप्ताशीतितमोध्यायः॥८७॥ ॥ ७ ॥ ॥दुर्योधनउवाच॥ ॥यदाहवि
दुरःकृष्णेसर्वंतत्सत्यमच्युते॥ अनुरक्तोत्यसंहार्यःपार्थान्प्रतिजनार्दनः॥ १॥ यत्तत्सत्कारसंयुक्तंदेयंवसुजनार्दने॥ अनेकरूपंराजेंद्रनतद्देयंकदाचन॥ २॥

॥ ६ ॥ ७ ॥ मायाइंद्रजालं छद्मवंचनम् ॥ ८ ॥ ९ ॥ बिभेत्स्यसिशल्यवत्पृथक्करिष्यसि ॥ १० ॥ ११ ॥ वेदवेत्ति ॥ १२ ॥ नैवेक्ष्यति नैवांगीकरिष्यति ॥ १३ ॥ आतिथ्यंशमरूपम् ॥ १४ ॥ उपाकुरुअ
र्पय ॥ १५ ॥ १६ ॥ १७ ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेसप्ताशीतितमोध्यायः ॥ ८७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ यदाहेति असंहार्यःहर्तुमशक्यः ॥ १ ॥ २ ॥

देशइति यद्यपिकेशवोर्चामर्हत्येवतथापिअर्चायांदेशःकालश्चायुक्तइत्यर्थः तदेवाह मंत्र्यतीति ॥ ३ ॥ ४ ॥ ५ ॥ कार्यगतिःकर्तव्यरीतिः अविषहात् आतिथ्यमात्रेण ॥ ६ ॥ ७ ॥ नालंनपर्याप्तोसि ॥ ८ ॥ ॥ ९ ॥ तीर्थेनअवतरणवर्त्मना संशाम्यशांतोभव ॥ १० ॥ ११ ॥ पर्यायःप्रकारांतरं निक्केवलांकृत्स्नां पांडवान्यथादासवद्वासयेयंतथाप्रकारोनास्तीत्यर्थः ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

देशःकालस्तथायुक्तोनहिनार्हतिकेशवः॥ मंस्यत्यधोक्षजोराजन्भयादर्चतिमामिति॥ ३॥ अवमानश्चयत्रस्यात्क्षत्रियस्यविशांपते॥नतत्कुर्याद्बुधःकार्यमितिमेनिश्चितामतिः॥ ४॥ सहिपूज्यतमोलोकेकृष्णःपृथुललोचनः॥ त्रयाणामपिलोकानांविदितंममसर्वथा॥ ५॥ नतुतस्मैप्रदेयंस्यात्तथाकार्यगतिःप्रभो॥ विग्रहःसमुपारब्धोनहिशाम्यत्यविग्रहात्॥ ६॥ ॥ वैशंपायनउवाच ॥ ॥ तस्यतद्वचनंश्रुत्वाभीष्मःकुरुपितामहः॥ वैचित्रवीर्यंराजानमिदंवचनमब्रवीत्॥ ७॥ सत्कृतोऽसत्कृतोवापिनकुप्येतजनार्दनः॥ नालमेनमवज्ञातुंनावज्ञेयोहिकेशवः॥ ८॥ यत्तुकार्यंमहाबाहोमनसाकार्यतांगतम्॥ सर्वोपायैर्नतच्छक्यंकेनचित्कर्तुमन्यथा॥ ९॥ सयद्भूयान्महाबाहुस्तत्कार्यमविशंकया॥ वासुदेवेनतीर्थेनक्षिप्रंसंशाम्यपांडवैः॥ १०॥ धर्म्यमर्थ्यंचधर्मात्माध्रुवंवक्ताजनार्दनः॥ तस्मिन्वाच्याःप्रियावाचोभवताबांधवैःसह॥ ११॥ ॥दुर्योधनउवाच॥ ॥ नपर्यायोस्तियद्राजन्श्रियंनिष्केवलामहम्॥तैःसहेमामुपाश्नीयांयावज्जीवंपितामह॥ १२॥ इदंतुसुमहत्कार्यंशृणुमेयत्समर्थितम्॥परायणंपांडवानांनियच्छामिजनार्दनम्॥ १३॥ तस्मिन्बद्धेभविष्यंतिदृष्णयःपृथिवीतथा॥पांडवाश्चविधेयामेसचप्रातरिहैष्यति॥ १४॥ अत्रोपायान्यथासम्यङ्नबुध्येतजनार्दनः॥ नचापायोभवेत्कश्चित्तद्भवान्प्रब्रवीतुमे॥ १५॥ ॥ वैशंपायनउवाच॥ ॥ तस्यतद्वचनंश्रुत्वाघोरंकृष्णाभिसंहितम्॥धृतराष्ट्रःसहामात्योव्यथितोविमनाभवत्॥ १६॥ ततोदुर्योधनमिदंधृतराष्ट्रोब्रवीद्वचः॥मैवंवोचःप्रजापालनैषधर्मःसनातनः॥ १७॥ दूतश्चहिद्वेषीकेशःसंबंधीचप्रियश्चनः॥ अपापःकौरवेयेषुसकथंवधमर्हति॥ १८॥ ॥भीष्मउवाच॥ ॥परीतत्तवपुत्रोयंधृतराष्ट्रसुमंदधीः॥वृणोत्यनर्थंनैवार्थंयाच्यमानःसुहृज्जनैः॥ १९॥ इममुत्पथिवर्तंतंपापंपापानुबंधिनम्॥ वाक्यानिसुहृदांहित्वात्वमप्यस्यानुवर्तसे॥ २०॥ कृष्णमक्लिष्टकर्माणमासाद्यायंसुदुर्मतिः॥ तवपुत्रःसहामात्यःक्षणेननभविष्यति॥ २१॥ पापस्यास्यनृशंसस्यत्यक्तधर्मस्यदुर्मतेः॥ नोत्सहेऽनर्थसंयुक्ताःश्रोतुंवाचःकथंचन॥ २२॥ इत्युक्त्वाभरतश्रेष्ठोवृद्धःपरममन्युमान्॥ उत्थायतस्मात्प्रातिष्ठद्भीष्मःसत्यपराक्रमः॥ २३॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिदुर्योधनवाक्येअष्टाशीतितमोऽध्यायः॥ ८८॥ ॥ ७ ॥ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेअष्टाशीतितमोऽध्यायः॥ ८८॥

प्रातरिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ मृष्टंशोधितं ॥ १८ ॥ १९ ॥ परिहसन्नर्मकुर्वन् सांबंधिकंधनंजयादिसंबंधेहेतुकंव्यवहारम् ॥ २० ॥ पूजितःस्तुतः ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

वैशंपायनउवाच॥ ॥ प्रातरुत्थायकृष्णस्तुकृतवान्सर्वमाह्निकम्॥ ब्राह्मणैरभ्यनुज्ञातःप्रययौनगरंप्रति॥ १॥ तंप्रयांतंमहाबाहुमनुज्ञाप्यमहाबलम्॥ पर्यवर्ततसर्वेवृष्णयस्तत्रनिवासिनः॥ २॥ धार्तराष्ट्रास्तमायांतंप्रत्युज्जग्मुःस्वलंकृताः॥ दुर्योधनादयस्सर्वेभीष्मद्रोणकृपादयः॥ ३॥ पौराश्चबहुलाराजन्हृषीकेशंदिदृक्षवः॥ यानैर्बहुविधैरन्येपद्भिरेवतथापरे॥ ४॥ सर्वेपथिसमागम्यभीष्मेणाक्लिष्टकर्मणा॥ द्रोणेनधार्तराष्ट्रैश्चतैर्वृतोनगरंययौ॥ ५॥ कृष्णसंमाननार्थंचनगरंसमलंकृतम्॥ बभूवराजमार्गश्चबहुरत्नसमाचितः॥ ६॥ नचकश्चिद्गृहेराजंस्तदासीद्वरतर्षभ॥ नस्त्रीनवृद्धोनशिशुर्वासुदेवदिदृक्षया॥ ७॥ राजमार्गेनरास्तस्मिन्संस्तुवंत्यवर्तिगताः॥ तस्मिन्कालेमहाराजहृषीकेशप्रवेशने॥ ८॥ आवृतानिवरस्त्रीभिर्गृहाणिसुमहांत्यपि॥ प्रचलंतीवभारेणदृश्यंतेस्मक्षितौतले॥ ९॥ तथाचगतिमंतस्तेवासुदेवस्यवाजिनः॥ प्रनष्टगतयोभूवन्राजमार्गेनरैर्वृते॥ १०॥ सगृहंधृतराष्ट्रस्यप्राविशच्छत्रुकर्शनः॥ पांडुरंपुंडरीकाक्षःप्रासादैरुपशोभितम्॥ ११॥ तिस्रःकक्ष्याव्यतिक्रम्यकेशवोराजवेश्मनः॥ वैचित्रवीर्यंराजानमभ्यगच्छद्दरिंदमः॥ १२॥ अभ्यागच्छतिदाशार्हेप्रज्ञाचक्षुर्नराधिपः॥ सहैवद्रोणभीष्माभ्यामुदतिष्ठन्महायशाः॥ १३॥ कृपश्चसोमदत्तश्चमहाराजश्चबाह्लिकः॥ आसनेभ्योऽचलन्सर्वेपूजयंतोजनार्दनम्॥ १४॥ ततोराजानमासाद्यधृतराष्ट्रंयशस्विनम्॥ सभीष्मंपूजयामासवार्ष्णेयोवाग्निरंजसा॥ १५॥ तेषुधर्मानुपूर्वींतांप्रयुज्यमधुसूदनः॥ यथावयःसमीयायराजभिःसहमाधवः॥ १६॥ अथद्रोणंसबाह्लीकंसपुत्रंचयशस्विनम्॥ कृपंचसोमदत्तंचसमीयायजनार्दनः॥ १७॥ तत्रासीदूर्जितंभृष्टकांचनंमहदासनम्॥शासनाद्धृतराष्ट्रस्यतत्रोपाविशदच्युतः॥ १८॥ अथगांमधुपर्कंचाप्युदकंचजनार्दने॥ उपजह्रुर्यथान्यायंधृतराष्ट्रपुरोहिताः॥ १९॥ कृतातिथ्यस्तुगोविंदःसर्वान्परिहसन्कुरून्॥ आस्तेसांबंधिकंकुर्वन्कुरुभिःपरिवारितः॥ २०॥ सोर्चितोधृतराष्ट्रेणपूजितश्चमहायशाः॥ राजानंसमनुज्ञाप्यनिरक्रामदरिंदमः॥ २१॥ तैःसमेत्ययथान्यायंकुरुभिःकुरुसंसदि॥विदुरावसथंरम्यमुपातिष्ठतमाधवः॥ २२॥विदुरःसर्वकल्याणैरभिगम्यजनार्दनम्॥ अर्चयामासदाशार्हंसर्वकामैरुपस्थितं॥ २३॥ यामेप्रीतिःपुष्करास्त्वदर्शनसमुद्भवा॥साकिमाख्यायतेतुभ्यमंतरात्मासिदेहिनां॥ २४॥ कृतातिथ्यंतुगोविंदंविदुरःसर्वधर्मवित्॥कुशलंपांडुपुत्राणामपृच्छन्मधुसूदनम्॥ २५

विदुरःपांडवानांविचेष्टितंतत्स्यतंकृष्णंप्रतिअपृच्छदित्यन्वयः सार्धश्लोकएकंवाक्यं अपृच्छदितिपूर्वस्मादनुकृष्यते प्रीयमाणस्येत्यादिषड्योद्वितीयार्थे ॥ २६ ॥ २७ ॥ ॥ इतिउद्योगपर्वणिनैलकंठी येभारतभावदीपेएकोननवतितमोऽध्यायः ॥ ८९ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ अथेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ प्रियंराज्यादि सुखंभोगोऽथआह्लादः ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

प्रीयमाणस्यसुहृदोविदुरोबुद्धिसत्तमः॥ धर्मार्थनित्यस्यसतोगतरोषस्यधीमतः॥ २६॥तस्यसर्वंसविस्तारंपांडवानांविचेष्टितम्॥क्षत्तुराचष्टदाशार्हःसर्वंप्रत्यक्षदर्शिवान्॥ २७॥ ॥इतिश्रीम०उद्योगप०भगवद्यानप०धृतराष्ट्रगृहप्रवेशपूर्वकंश्रीकृष्णस्यविदुरगृहप्रवेशेएकोननवतितमोऽध्यायः ॥ ८९ ॥ ॥ ७ ॥

वैशंपायनउवाच॥ ॥ अथोपगम्यविदुरमपराह्णेजनार्दनः॥ पितृष्वसारंसपृथामभ्यगच्छदरिंदमः॥ १॥ साहृष्वाकृष्णमायांतंप्रसन्नादित्यवर्चसम्॥ कंठेगृहीत्वाप्राक्रोशत्स्मरंतीतनयान्पृथा॥२॥ तेषांसत्त्ववतांमध्येगोविंदंसहचारिणम्॥ चिरस्यदृष्ट्वावार्ष्णेयंबाष्पमाहारयत्पृथा॥ ३॥ साब्रवीत्कृष्णमासीनंकृतातिथ्युधांपतिं॥ बाष्पगद्गदपूर्णेनमुखेनपरिशुष्यता ॥ ४॥ येतेबाल्यात्प्रभृत्येवगुरुशुश्रूषणेरताः॥ परस्परस्यसुहृदःसंमताःसमचेतसः॥ निकृत्याभ्रंशितारा ज्याज्जनार्हानिर्जनंगताः ॥ ५॥ विनीतक्रोधहर्षाश्चब्रह्मण्याःसत्यवादिनः॥ त्यक्ताप्रियसुखेपार्थारुदतीमपहायमाम्॥ ६॥ अहार्षुश्चवनंयांतःसमूलंहृदयंमम॥ अतदर्हामहात्मानःकथंकेशवपांडवाः॥ ७॥ ऊषुर्महावनेतातसिंहव्याघ्रगजाकुले॥ बालाविहीनाःपित्रातेमयासततलालिताः॥ ८॥ अपश्यंतश्चपितरौ कथमूषुर्महावने॥ शंखदुंदुभिनिर्घोषैर्हृदंगैर्वेणुनिःस्वनैः॥ ९॥ पांडवाःसमबोध्यंतबाल्यात्प्रभृतिकेशव॥ येस्मवारणशब्देनहयानांहेषितेनच॥ १०॥ रथनेमिनिनादैश्चव्यबोध्यंततदागृहे॥ शंखभेरीनिनादेनवेणुवीणानुनादिना॥ ११॥ पुण्याहघोषमिश्रेणपूज्यमानाद्विजातिभिः॥ वस्त्रैरन्नैरलंकारैःपूजयंतोद्विजन्मनः॥ १२॥ गीर्भिर्मंगलयुक्ताभिर्ब्राह्मणानांमहात्मनाम्॥ अर्चितैरर्चनार्हैश्चस्तुवद्भिरभिनंदिताः॥ १३॥ प्रासादाग्रेष्वबोध्यंतरांकवाजिनशायिनः॥ क्रूरंचनिनदंश्रुत्वाश्वापदानांमहावने॥ १४॥ नस्मोपयांतिनिद्रांतेनतदर्हाजनार्दन॥ भेरीमृदंगनिनदैःशंखवेणवनिःस्वनैः॥ १५॥ स्त्रीणांगीतनिनादैश्चमधुरैर्मधुसूदन॥ बंदिमागधसूतैश्चस्तुवद्भिर्बोधिताःकथम्॥ १६॥ महावनेष्वबोध्यंतश्वापदानांरुतेनच॥ क्षीमान्सत्यधृतिर्दांतोभूतानामनुकंपिता॥ १७॥ कामद्वेषौ वशेकृत्वासतांवर्त्मानुवर्तते॥ अंबरीषस्यमांधातुर्ययातेर्नहुषस्यच॥ १८॥ भरतस्यदिलीपस्यशिबेरौशीनरस्यच॥ राजर्षीणांपुराणानांधुरंधत्तेदुरुद्वहाम्॥ १९॥ शीलवृत्तोपसंपन्नोधर्मज्ञःसत्यसंगरः॥ राजासर्वगुणोपेतस्त्रैलोक्यस्यापियोभवेत्॥ २०॥ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ धुरंभारं ॥ १९ ॥ २० ॥

प्रियोदर्शोदर्शनंयस्यदर्शादिश्राद्धकर्मवायस्य ॥ २१ ॥ सामर्षत्वादेवपांडवःपांडुरेवपांडवःस्वार्थेतद्धितः यद्वापांडवःपांडुपुत्रः पांडुःकुंतीपतौसितेइतिविश्वः ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥

अजातशत्रुर्धर्मात्माशुद्धजांबूनदप्रभः॥ श्रेष्ठःकुरुषुसर्वेषुधर्मतःश्रुतवत्ततः॥ प्रियदर्शोदीर्घभुजःकथंकृष्णयुधिष्ठिरः॥ २१॥ यःसनागायुतप्राणोवातरंहामहाबलः॥ सामर्षःपांडवोनित्यंप्रियोभ्रातुःप्रियंकरः॥ २२॥ कीचकस्यतुसज्ञातेर्योहंतामधुसूदन॥ शूरःक्रोधवशानांचहिडिंबस्यबकस्यच॥ २३॥ पराक्रमेशक्रसमोमातरिश्वसमोबले॥ महेश्वरसमःक्रोधेभीमःप्रहरतांवरः॥ २४॥ क्रोधंबलममर्षंचयोनिधायपरंतपः॥ जितात्मापांडवोमर्षीभ्रातुस्तिष्ठतिशासने॥ ॥ २५॥ तेजोराशिंमहात्मानंवरिष्ठमपितौजसम्॥ भीमंप्रदर्शनेनापिभीमसेनंजनार्दन॥ २६॥ तंममाचक्ष्ववार्ष्णेयकथमद्यवृकोदरः॥ आस्तेपरिघबाहुःसमध्यमःपांडवोबली॥ २७॥ अर्जुनेनार्जुनोयःसकृष्णबाहुसहस्रिणा॥ द्विबाहुःस्पर्धतेनित्यमतीतेनापिकेशव॥ २८॥ क्षिपत्येकेनवेगेनपंचबाणशतानियः॥ इष्वस्त्रेसदृशोराज्ञःकार्तवीर्यस्यपांडवः॥ २९॥ तेजसादित्यसदृशोमहर्षिसदृशोदमे॥ क्षमयापृथिवीतुल्योमहेंद्रसमविक्रमः॥ ३०॥ आधिराज्यंमहद्दीप्तंप्रथितंमधुसूदन॥ आत्मतंयेनवीर्येणकुरूणांसर्वराजसु॥ ३१॥ यस्यबाहुबलंसर्वेपांडवाःपर्युपासते॥ ससर्वरथिनांश्रेष्ठःपांडवःसत्यविक्रमः॥ ३२॥ यंगत्वाभिमुखःसंख्येनजीवन्कश्चिदावव्रजेत्॥ योजेतासर्वभूतानामजेयोजिष्णुरच्युत॥ ३३॥ योपाश्रयःपांडवानांदेवानामिववासवः॥ सतेभ्रातासखाचैवकथमद्यधनंजयः॥ ३४॥ दयावान्सर्वभूतेषुक्रीनिषेवोमहाबलवित्॥ मृदुश्चसुकुमारश्चधार्मिकश्चप्रियश्चमे॥ ३५॥ सहदेवोमहेष्वासःशूरःसमितिशोभनः॥ भ्रातॄणांकृष्णशुश्रूषुर्धर्मार्थकुशलोयुवा॥ ३६॥ सदैवसहदेवस्यभ्रातरोमधुसूदन॥ वृत्तंकल्याणवृत्तस्यपूजयंतिमहात्मनः॥ ३७॥ ज्येष्ठोपचायिनंवीरंसहदेवंयुधांपतिं॥ शुश्रूषुंममवार्ष्णेयमाद्रीपुत्रंप्रचक्ष्वमे॥ ३८॥ सुकुमारोयुवाशूरोदर्शनीयश्चपांडवः॥ भ्रातॄणांचैवसर्वेषांप्रियःप्राणोबहिश्चरः॥ ३९॥ चित्रयोधीचनकुलोमहेष्वासोमहाबलः॥ कच्चित्सकुशलीकृष्णवत्सोममसुखेधितः॥ ४०॥ सुखोचितमदुःखार्हंसुकुमारंमहारथम्॥ अपिजातुमहाबाहोपश्येयंनकुलंपुनः॥ ॥ ४१॥ पक्ष्मसंपातजेकालेनकुलेनविनाकृता॥ नलभामिधृतिंवीरसाद्यजीवामिपश्यमाम्॥ ४२॥ सर्वैःपुत्रैःप्रियतराद्द्रौपदीमेजनार्दन॥ कुलीनारूपसंपन्नासर्वैःसमुदितागुणैः॥ ४३॥

॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ज्येष्ठेपैचायिनंज्येष्ठानांभावैवृद्धिकरं ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ पक्ष्मणोःसंपातंजे निमेषमात्रेइत्यर्थः ॥ ४२ ॥ ४३ ॥
पुत्रलोकात्पुत्रसन्निकर्षेत्यक्तापतिलोकंपतिसन्निधिदृष्वाना ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ तथावृत्तापुण्यशीला ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ कच्चिदितिकाक्षासुखा
वहत्वंनास्तीतिव्यज्यते एषांमत्पुत्रभर्त्रादीनां ॥ ५६ ॥ नकुशलंमरणम् ॥ ५७ ॥ ५८ ॥ अवरोधःराज्याप्रदानरूपोवृत्तिनिरोधः ॥ ५९ ॥ यदिसुखंपुण्यक्षयरूपंअर्थादुःखंपापक्षयरूपंतर्हिदुःखात्पापक्षय

पुत्रलोकात्पतिलोकंवृष्वानासत्यवादिनी ॥ प्रियान्पुत्रान्परित्यज्यपांडवाननुरुध्यते ॥ ४४ ॥ महाभिजनसंपन्नासर्वकामैःसुपूजिता ॥ ईश्वरीसर्वकल्याणीद्रौ
पदीकथमच्युत ॥ ४५ ॥ पतिभिःपंचभिःशूरैरग्निकल्पैःप्रहारिभिः ॥ उपपन्नामहेष्वासैर्द्रौपदीदुःखभागिनी ॥ ४६ ॥ चतुर्दशमिदंवर्षंयन्नापश्यमरिंदम ॥ पुत्रा
धिभिःपरिहीनांद्रौपदींसत्यवादिनीम् ॥ ४७ ॥ ननूनंकर्मभिःपुण्यैरश्नुतेपुरुषःसुखम् ॥ द्रौपदीचत्तथावृत्तानाश्नुतेसुखमव्ययम् ॥ ४८ ॥ नप्रियोममकृष्णायावीभ
त्सुर्नयुधिष्ठिरः ॥ भीमसेनोयमौवापियदपश्यंसभागतां ॥ ४९ ॥ नमेदुःखतरंकिंचिद्भूतपूर्वंततोधिकम् ॥ स्नीधर्मिणींद्रौपदींयच्छशुराणांसमीपगाम् ॥ ५० ॥ आना
यितामनार्येणक्रोधलोभानुवर्तिना ॥ सर्वैप्रेक्षंतकुरवएकवस्त्रांसभागताम् ॥ ५१ ॥ तत्रैवधृतराष्ट्रश्चमहाराजश्चबाह्लिकः ॥ कृपश्चसोमदत्तश्चनिर्विण्णाःकुरव
स्तथा ॥ ५२ ॥ तस्यांसंसदिसर्वेषांक्षत्तारंपूजयाम्यहम् ॥ वृत्तेनहिभवत्यार्योनधनेननविद्यया ॥ ५३ ॥ तस्यकृष्णमहाबुद्धेर्गभीरस्यमहात्मनः ॥ क्षत्तुःशीलमलंका
रोलोकान्विष्टभ्यतिष्ठति ॥ ५४ ॥ ॥ वैशंपायनउवाच ॥ ॥ साशोकार्ताचवृष्टाचदृष्ट्वागोविंदमागतम् ॥ नानाविधानिदुःखानिसर्वाण्येवान्वकीर्तयत् ॥ ५५ ॥ पू
र्वैराचरितंयत्तत्कुराजभिररिंदम ॥ अक्षद्यूतंम्रगवधःकच्चिदेषांसुखावहम् ॥ ५६ ॥ तन्मांदहतियत्कृष्णासभायांकुरुसन्निधौ ॥ धार्तराष्ट्रैःपरिक्लिष्टायथानकुशलं
तथा ॥ ५७ ॥ निर्वासनंचनगरात्प्रव्रज्याचपरंतप ॥ नानाविधानांदुःखानामभिज्ञास्मिजनार्दन ॥ ५८ ॥ अज्ञातचर्याबालानामवरोधश्चमाधव ॥ नमेक्लेश
तमंतत्स्यात्पुत्रैःसहपरंतप ॥ ५९ ॥ दुर्योधनेननिकृतावर्षमद्यचतुर्दश ॥ दुःखादपिसुखंनःस्याद्यदिपुण्यफलक्षयः ॥ ६० ॥ नमेविशेषोजात्वासीत्धार्तराष्ट्रेषुपां
डवैः ॥ तेनसत्येनकृष्णत्वांहतामित्रंश्रियावृतम् ॥ अस्माद्विमुक्तंसंग्रामात्पश्येयंपांडवैःसह ॥ ६१ ॥ नैवशक्याःपराजेतुंसर्वत्यैषांतथाविधम् ॥ पितरंत्वेवगर्हयंना
त्मानंनसुयोधनम् ॥ ६२ ॥ येनाहंकुंतिभोजायधनंवृत्तैरिवार्पिता ॥ बालांमामार्यकस्तुभ्यंकीर्तींकंदुहस्तिकाम् ॥ ६३ ॥

हेतोस्तत्सुखंनःअस्माकंस्यात् तथाचनवयंदुःखाद्भयंप्रामुमइत्यर्थः ॥ ६० ॥ अस्माद्भाविनःकुरुपांडवसंग्रामात् गोत्रकलहेविषमधियामेवावमर्दःसमबुद्धीनांतुसुखमेवेतिभावः ॥ ६१ ॥ सर्वैवृत्तं एषांपां
डवानांतथाविधंअविषमम् ॥ ६२ ॥ वृत्तैर्वदान्यत्वेनख्यातैर्धनंयथाअक्लेशेनार्प्यतेतद्वत्येनाहमर्पिता वृत्तोनीतेदृढेख्यातेइतिविश्वः धूर्तैरिवेत्यपपाठः आर्यकःपितामहः तुभ्यंतव ॥ ६३ ॥

श्वशुरैर्भीष्मादिभिः धृतराष्ट्रोपिभर्तुर्ज्येष्ठत्वात्श्वशुरएव ॥ ६४ ॥ ६५ ॥ महाजन्येमहायुद्धे मेधान्अश्वमेधान् ॥ ६६ ॥ अभ्यसूयामिनिंदामि वैधसेविश्वकर्मे महतेइतिकृष्णस्येश्वरस्यानिंदार्थमुपहा
सः कर्मणएवप्राबल्यंधर्मपदस्यार्थदर्शनेनाह धर्मइति धारयतीतिधर्मइतिव्युत्त्याधर्मएवकर्ताधारयिता ईश्वराराधनंतुदृष्टैवेतिभावः ॥ ६७ ॥ धर्मश्चेदितिधर्मेपिसंशयंदर्शयति सतोपीश्वरस्याकिंचित्क

अदात्तुकुंतिभोजायसखासख्येमहात्मने ॥ साहंपित्राचनिकृताश्वशुरैश्चपरंतप ॥ अत्यंतदुःखिताकृष्णकिंजीवितफलंमम ॥ ६४ ॥ यन्मांवागब्रवीन्नक्तंसूतके
सव्यसाचिनः ॥ पुत्रस्तेपृथिवींजेतायशश्चास्यदिवंस्पृशेत् ॥ ६५ ॥ हत्वाकुरून्महाजन्येराज्यंप्राप्यधनंजयः ॥ भ्रातृभिःसहकौंतेयस्त्रीन्मेधानाहरिष्यति ॥ ६६ ॥
नाहंतामभ्यसूयामिनमोधर्मायवेधसे ॥ कृष्णायमहतेनित्यंधर्मोधारयतिप्रजाः ॥ ६७ ॥ धर्मश्चेदस्तिवार्ष्णेययथावागभ्यभाषत ॥ त्वंचापितत्तथाकृष्णसर्वसं
पादयिष्यसि ॥ ६८ ॥ नमांमाधववैधव्यंनार्थनाशोनवैरता ॥ तथाशोकायदहतियथापुत्रैर्विनाभवः ॥ ६९ ॥ याहंगांडीवधन्वानंसर्वशस्त्रभृतांवरम् ॥ धनंजयंन
पश्यामिकाशांतिर्हृदयस्यमे ॥ इतश्चतुर्दशंवर्षंयन्नापश्यंयुधिष्ठिरम् ॥ ७० ॥ धनंजयंचगोविंदयमौतंचवृकोदरम् ॥ जीवनाशंप्रनष्टानांश्राद्धंकुर्वंतिमानवाः ॥ ७१
अर्थतस्तेममसृतास्तेषांचाहंजनार्दन ॥ ब्रूयामाधवराजानंधर्मात्मानंयुधिष्ठिरम् ॥ ७२ ॥ भूयांस्तेहीयतेधर्मोमापुत्रकवृथाकृथाः ॥ पराश्रयावासुदेवयाजीवति
धिगस्तुताम् ॥ ७३ ॥ वृत्तेःकार्पण्यलब्धायाअप्रतिष्ठैवज्यायसी ॥ अथोधनंजनंब्रूयानित्योद्युक्तंवृकोदरम् ॥ ७४ ॥ यदर्थंक्षत्रियासूतेतस्यकालोयमागतः ॥ अस्मिं
श्चेदागतेकालेमिथ्याचातिक्रमिष्यति ॥ ७५ ॥ लोकसंभाविताःसंतःसुनृशंसंकरिष्यथ ॥ नृशंसेनचवोयुक्तांस्त्यजेयंशाश्वतीःसमाः ॥ ७६ ॥ कालेहिसमनुप्राप्ते
त्यक्तव्यमपिजीवनम् ॥ माद्रीपुत्रौचवक्तव्यौक्षत्रधर्मरतौसदा ॥ ७७ ॥ विक्रमेणार्जितान्भोगान्वृणीतंजीवितादपि ॥ विक्रमाधिगतान्यर्थाःक्षत्रधर्मेणजीव
तः ॥ ७८ ॥ मनोमनुष्यस्यसदाप्रीणंतिपुरुषोत्तम ॥ गत्वाब्रूहिमहाबाहोसर्वशस्त्रभृतांवरम् ॥ ७९ ॥ अर्जुनंपांडवंवीरंद्रौपद्याःपदवींचर ॥ विदितौहितवात्यंतंकु
द्धौनौतुयथांतकौ ॥ ८० ॥ भीमार्जुनौनयेतांहिदेवानपिपरांगतिम् ॥ तयोश्चैतदवज्ञानंयत्साकृष्णासभांगता ॥ ८१ ॥ दुःशासनश्चकर्णश्चपरुषाण्यभ्यभाषताम् ॥
दुर्योधनोभीमसेनमभ्यगच्छन्मनस्विनम् ॥ ८२ ॥ पश्यतांकुरुमुख्यानांतस्यद्रक्ष्यतियत्फलम् ॥ नहिवैरंसमासाद्यप्रशाम्यतिवृकोदरः ॥ ८३ ॥ सुचिरादपिभीम
स्यनहिवैरंप्रशाम्यति ॥ यावदंतंननयतिशात्रवाऽच्छचुकर्शनः ॥ ८४ ॥ नदुःखंराज्यहरणंनचद्यूतेपराजयः ॥ प्रव्राजनंतुपुत्राणांनमेतदुःखकारणम् ॥ ८५ ॥

रत्वमाह त्वंचेति ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ अतिक्रमिष्यतिअयुद्धेनेत्यर्थः ॥ ७५ ॥ सुनृशंसंअत्यंतबीभत्सम् ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥

॥८६॥८७॥८८॥८९॥९०॥ ९१॥९२॥९३॥९४॥९५॥ अंतराज्यंवावनंवा मध्यंअल्पैश्वर्यं अंतपदंव्याचष्टे उत्तमानिति उत्तमान्नीचवैराग्यज्ञानूपरिक्लेशान्शीतवातादीन्॥९६॥अंतेषुअंतयोःपरब्रह्मानं देसुषुमौवा उभयत्रैवद्वैतादर्शनात्सुखमस्ति एतयोरंतरंजाघत्त्वमौ दुःखंदुःखरूपं स्वयमात्मानिर्दुःखएवजाघत्त्वमयोस्तूपाधिसंबंधात्तत्रभासमानंदुःखंआगमापायित्वात्तत्रपुत्राःसहेतेत्वंचसहस्वेतिभावः

यत्तुसाबृहतीश्यामाएकवस्त्रासभांगता ॥ अश्रृणोत्पुरुषावाचःकिंनुदुःखतरंततः॥ ८६॥ स्त्रीधर्मिणीवरारोहाक्षत्रधर्मरतासदा॥ नाभ्यगच्छत्तदानाथंकृष्णा नाथवतीसती॥८७॥ यस्याममसपुत्रायास्त्वंनाथोमधुसूदन॥ रामश्चबलिनांश्रेष्ठःप्रद्युम्नश्चमहारथः॥ ८८॥ साहमेवंविधंदुःखंसहेयंपुरुषोत्तम॥ भीमेजीव तिदुर्धर्षेविजयेचापलायिनि॥८९॥ ॥वैशंपायनउवाच॥ ॥ततआश्वासयामासपुत्राधिभिरभिप्लुताम्॥ पितृष्वसारंशोचंतींशौरिःपार्थसखःपृथाम्॥९०॥ वासुदेवउवाच॥ ॥कातुसीमंतिनीत्वादृक्कुलोकेष्वस्तिपितृष्वसः॥ शूरस्यराज्ञोदुहिताअजमीढकुलंगता॥ ९१॥ महाकुलीनाभवतीक्रदाक्रदमिवागता॥ ई श्वरीसर्वकल्याणीभर्त्रापरमपूजिता॥ ९२॥ वीरसूर्वीरपत्नीत्वंसर्वैःसमुदितागुणैः॥ सुखदुःखेमहाप्राज्ञेत्वादृशीसोढुमर्हति॥ ९३॥ निद्रातंद्रेक्रोधहर्षौक्षुत्पि पासेहिमातपौ॥ एतानिपार्थानिर्जित्यनित्यंवीरसुखेरताः॥९४॥ त्यक्तग्राम्यसुखाःपार्थानित्यंवीरसुखप्रियाः॥ नतुस्वल्पेनतुष्येयुर्महोत्साहामहाबलाः॥९५॥ अंतंधीरानिषेवंतेमध्यंग्राम्यसुखप्रियाः॥ उत्तमांश्चपरिक्लेशान्भोगांश्चातीवमानुषान्॥९६॥अंतेपुरेमिरेधीरानतेमध्येपुरेमिरे॥ अंतप्राप्तिसुखामाहुर्दुःखमं तरमेतयोः॥९७॥अभिवादयंतिभवतींपांडवाःसहकृष्णया॥आत्मानंचकुशलिनंनिवेद्याहुरनामयम्॥९८॥अरोगान्सर्वसिद्धार्थान्क्षिप्रंद्रक्ष्यसिपांडवान्॥ ईश्वरान्सर्वलोकस्यहतामित्रान्श्रियावृतान्॥ ९९॥ एवमाश्वासिताकुंतीप्रत्युवाचजनार्दनम्॥ पुत्राधिभिरभिध्वस्तानिगृह्यबुद्धिजंतमः॥१००॥ ॥कुंत्यु वाच॥ ॥यद्यत्तेषांमहाबाहोपथ्यंस्यान्मधुसूदन॥ यथायथात्वंमन्येथाःकुर्याःकृष्णतथातथा॥१०१॥ अविलोपेनधर्मस्यअनिकृत्यापरंतप॥ प्रभावज्ञास्मि तेकृष्णसत्यस्याभिजनस्यच॥१०२॥ व्यवस्थायांचमित्रेषुबुद्धिविक्रमयोस्तथा॥ त्वमेवनःकुलेधर्मस्त्वंसत्यंत्वंतपोमहत्॥१०३॥ त्वंत्रातात्वंमहद्ब्रह्मत्वंयिसर्वं प्रतिष्ठितम्॥यथैवात्यतथैवैतत्त्वयिसत्यंभविष्यति॥१०४॥ ॥वैशंपायनउवाच॥ ॥तामामंत्र्यचगोविंदःकृत्वाचाभिप्रदक्षिणम्॥प्रातिष्ठतमहाबाहुर्दुर्यो धनगृहान्प्रति॥१०५॥ ॥इति०उ०भग०कृष्णकुंतीसंवादेनवतितमोऽध्यायः॥९०॥ ॥९७॥९८॥९९॥ अबुद्धिजंअज्ञानजंतमोविपर्ययज्ञानंअनात्मनिदेहादा वात्माभिमानरूपम्॥१००॥१०१॥ अनिकृत्याअच्छलेन॥१०२॥ त्वमेवेतिभगवतःसार्वात्म्यंसर्वाधिष्ठानत्वंप्रोक्तम्॥१०३॥१०४॥१०५॥ ॥इतिउद्योग०नैल०भारत०नवतितमोऽध्यायः॥९०॥

पृथामिति तामामंत्र्येतिपूर्वश्लोकेनप्रस्थानमात्रमुक्तापृथामामंत्र्येत्यत्रतुतदर्थानुवादपूर्वंकंदुर्योधनगृहप्राप्तिरुच्यतइत्यपौनरुक्त्यम्॥ १॥ २॥ अभ्रघनःसजलोमेघः सहिसविद्युत्तत्सादृश्येनमहेंद्रनी लमणिमयत्वंसुवर्णमयत्वंचसूचितं अन्येतुअभ्रघनःआकाशमात्रवर्तिघनःसहिशरत्संबंधाद्धवलइतिव्याचख्युः॥ ३॥ ४॥ ५॥ ६॥ ७॥ ८॥ ९॥ १०॥ ११॥ १२॥ शठोदर्कंशाक्ष्यपर्यवसानं

वैशंपायनउवाच॥ ॥पृथामामंत्र्यगोविंदःकृत्वाचाभिप्रदक्षिणम्॥दुर्योधनगृहंशौरिरभ्यगच्छद्रिंदमः॥१॥लक्ष्म्यापरमयायुक्तंपुरंदरगृहोपमम्॥ विचित्रै रासनैर्युक्तंप्रविवेशजनार्दनः॥ २॥ तस्यकक्ष्याव्यतिक्रम्यतिस्रोद्वाःस्थैरवारितः॥ ततोऽभ्रघनसंकाशंगिरिकूटमिवोच्छ्रितम्॥ ३॥ श्रियाज्वलंतंप्रासादमारु रोहमहायशाः॥ तत्रराजसहस्रैश्चकुरुभिश्चाभिसंवृतम्॥४॥ धार्तराष्ट्रंमहाबाहुंददर्शासीनमासने॥ दुःशासनंचकर्णंचशकुनिंचापिसौबलम्॥५॥दुर्योधनस मीपेतानासनस्थान्ददर्शसः॥ अभ्यागच्छतिदाशार्हेधार्तराष्ट्रोमहायशाः॥ ६॥ उदतिष्ठत्सहामात्यःपूजयन्मधुसूदनं॥ समेत्यधार्तराष्ट्रेणसहामात्येनकेशवः ॥७॥ राजभिस्तत्रवार्ष्णेयःसमागच्छद्यथावयः॥ तत्रजांबूनदमयंपर्यंकंसुपरिष्कृतम्॥८॥ विविधास्तरणास्तीर्णमभ्युपाविशदच्युतः॥ तस्मिन्गांमधुपर्कंचा प्युदकंचजनार्दने॥ ९॥ निवेदयामासतदागृहान्राज्यंचकौरवः॥ तत्रगोविंदमासीनंप्रसन्नादित्यवर्चसम्॥ १०॥ उपासांचक्रिरेसर्वेकुरवोराजभिःसह॥ त तोदुर्योधनोराजावार्ष्णेयंजयतांवरम्॥ ११॥ न्यमंत्रयद्राजनेननाभ्यनंदच्चकेशवः॥ ततोदुर्योधनःकृष्णमब्रवीत्कुरुसंसदि॥ १२॥ मृदुपूर्वंशठोदर्ककर्णमा भाष्यकौरवः॥ कस्मादन्नानिपानानिवासांसिशयनानिच॥ १३॥ त्वदर्थमुपनीतानिनाग्रहीस्त्वंजनार्दन॥ उभयोश्चददत्सात्यमुभयोश्चहितेरतः॥ १४॥ सं बंधीदयितश्चासियृतराष्ट्रस्यमाधव॥ त्वंहिगोविंदधर्मार्थौवेत्थतत्त्वेनसर्वशः॥ तत्रकारणमिच्छामिश्रोतुंचक्रगदाधर॥ १५॥ ॥वैशंपायनउवाच॥ ॥सए वमुक्तोगोविंदःप्रत्युवाचमहामनाः॥ उद्यन्मेघस्वनःकालेप्रगृह्यविपुलंभुजम्॥ १६॥ अलघूकृतमग्रस्तमनिरस्तमसंकुलम्॥ राजीवनेत्रोराजानंहेतुमद्वाक्य मुत्तमम्॥ १७॥ कृतार्थाभुंजतेदूताःपूजांगृह्णंतिचैवह॥ कृतार्थंमांसहामात्यंसमर्चिष्यसिभारत॥ १८॥ एवमुक्तःप्रत्युवाचधार्तराष्ट्रोजनार्दनम्॥ नयुक्तंभव तास्मासुप्रतिपत्तुमसांप्रतम्॥ १९॥ कृतार्थैवाकृतार्थंचत्वांवयंमधुसूदन॥ यतामहेपूजयितुंदाशार्हनचशक्नुमः॥ २०॥

आभाष्यसंबोधनेनोन्मुखीकृत्य॥ १३॥ १४॥ तत्रअन्नादेरपहणे॥ १५॥ प्रगृह्यउद्यम्य॥ १६॥ अलघूकृतंप्रयत्नशैथिल्यहीनकरणं पाठांतरेअनंबूकृतंअनिष्ठीवनं अनन्यकृतमित्यपिपठंति अग्रस्तं अलुप्ताक्षरं अनिरस्तंस्थानभंशरहितं असंकुलंअसंकीर्णवर्णम्॥ १७॥ १८॥ असांप्रतंप्रतिपत्तुंअयुक्तंकर्तुम्॥ १९॥ २०॥

॥ २१ ॥ वैरद्वेषः विग्रहोयुद्धम् ॥ २२ ॥ २३ ॥ संरंभात्क्रोधात् हेतुवादात्कपटात् ॥ २४ ॥ २५ ॥ द्वेष्टिज्ञवान् ॥ २६ ॥ २७ ॥ २८ ॥ विरुरुत्सतिविरोधंकर्तुमिच्छति ॥ २९ ॥ मोहात्अदुष्टेदुष्टबु
द्धिर्मोहः लोभःपरकीयधनापहारेच्छा अजितक्रोधइतिछेदः ॥ ३० ॥ ३१ ॥ ३२ ॥ शुभ्रात्नानारत्नमयत्वेनप्रदीप्तात् शुभंप्रदीप्तेधवलेःभकेचेतिविश्वः ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ अपचितिःपूजा

नचतत्कारणंविद्मोयस्मिन्नोमधुसूदन ॥ पूजांकृतांप्रीयमाणैर्नामंस्थाःपुरुषोत्तम ॥ २१ ॥ वैरंनोनास्तिभवतागोविंदनचविग्रहः ॥ सभवान्प्रसमीक्ष्यैतन्नेद
शंवक्तुमर्हति ॥ २२ ॥ ॥ वैशंपायनउवाच ॥ ॥ एवमुक्तःप्रत्युवाचधार्तराष्ट्रंजनार्दनः ॥ अभिवीक्ष्यसहामात्यंदाशार्हःप्रहसन्निव ॥ २३ ॥ नाहंकामान्नसंरंभा
न्नद्वेषान्नार्थकारणात् ॥ नहेतुवादाल्लोभाद्वाधर्मंजह्यांकथंचन ॥ २४ ॥ संप्रीतिभोज्यान्यन्नानिआपद्भोज्यानिवापुनः ॥ नचसंप्रीयसेराजन्नचैवापद्गतावयं
॥ २५ ॥ अकस्माद्वेष्टिवैराजन्जन्मप्रभृतिपांडवान् ॥ प्रियानुवर्तिनोभ्रातॄन्सर्वैःसमुदितान्गुणैः ॥ २६ ॥ अकस्माच्चैवपार्थानांद्वेषणंनोपपद्यते ॥ धर्मस्थिताः
पांडवेयाःकस्तार्क्किवक्तुमर्हति ॥ २७ ॥ यस्मान्द्वेष्टिसमांद्वेष्टियस्माननुसमामनु ॥ ऐकात्म्यंमांगतंविद्धिपांडवैर्धर्मचारिभिः ॥ २८ ॥ कामक्रोधानुवर्तीहियोमोहा
द्विरुरुत्सति ॥ गुणवंतंचयोद्वेष्टिमाद्दुःपुरुषाधमम् ॥ २९ ॥ यःकल्याणगुणान्ज्ञातीन्मोहाल्लोभाद्विद्वक्षते ॥ सोजितात्माऽजितक्रोधोनचिरंतिष्ठतिश्रियम् ॥ ३०
अथयोगुणसंपन्नान्लुब्धयस्याप्रियानपि ॥ प्रियेणकुरुतेवश्यांश्चिरंयशसितिष्ठति ॥ ३१ ॥ सर्वमेतन्नभोक्तव्यमन्नंदुष्टाभिसंहितम् ॥ क्षत्तुरेकस्यभोक्तव्यमिति
मेधीयतेमतिः ॥ ३२ ॥ एवमुक्तामहाबाहुर्दुर्योधनममर्षणम् ॥ निश्चक्रामततःशुभ्राद्धार्तराष्ट्रनिवेशनात् ॥ ३३ ॥ निर्यायचमहाबाहुर्वासुदेवोमहामनाः ॥ निवे
शाययद्यौवेश्मविदुरस्यमहात्मनः ॥ ३४ ॥ तमभ्यगच्छद्द्रोणश्चकृपोभीष्मोथबाह्लिकः ॥ कुरवश्चमहाबाहुंविदुरस्यगृहेस्थितम् ॥ ३५ ॥ तऊचुर्माधवंवीरंकुरवो
मधुसूदनम् ॥ निवेदयामोवार्ष्णेयसरत्नांस्तेगृहान्वयम् ॥ ३६ ॥ तानुवाचमहातेजाःकौरवान्मधुसूदनः ॥ सर्वेभवंतोगच्छंतुसर्वामेऽपचितिःकृता ॥ ३७ ॥ यातेषु
कुरुषुक्षत्तादाशार्हमपराजितम् ॥ अभ्यर्चयामासतदासर्वकामैःप्रयत्नवान् ॥ ३८ ॥ ततःक्षत्ताऽन्नपानानिशुचीनिगुणवंतिच ॥ उपाहरदनेकानिकेशवायमहा
त्मने ॥ ३९ ॥ तैस्तर्पयित्वाप्रथमंब्राह्मणान्मधुसूदनः ॥ वेदविद्भ्योददौकृष्णःप्रथमंद्रविणान्यपि ॥ ४० ॥ ततोनुयायिभिःसार्धमरुद्भिरिववासवः ॥ विदुरान्नानि
बुभुजेशुचीनिगुणवंतिच ॥ ४१ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिश्रीकृष्णदुर्योधनसंवादेएकनवतितमोऽध्यायः ॥ ९१ ॥ ॥ ७ ॥

॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ॥ इतिउद्योगपर्वणिनैलकंठीयेभारतभावदीपेएकनवतितमोऽध्यायः ॥ ९१ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ॥९१॥

तंभुक्तवंतमिति ॥ १ ॥ २ ॥ प्रपद्देनिर्बंधं अत्यंताभिनिवेशमित्यर्थः अनेयःअप्रापणीयः श्रेयसांकर्मणिषष्ठी ॥ ३ ॥ सर्वशंकितासर्वत्रविश्वासहीनः ॥ ४ ॥ ५ ॥ ६ ॥ वृत्तिंजीविकां एतेयुद्धेनमह्यंराज्यंदा

वैशंपायनउवाच ॥ ॥ तंभुक्तवंतमाश्वस्तंनिशायांविदुरोब्रवीत् ॥ नेदंसम्यग्व्यवसितंकेशवागमनंतव ॥ १ ॥ अर्थधर्मातिगोमंदःसंरंभीचजनार्दन ॥ मानघ्नो
मानकामश्चवृद्धानांशासनातिगः ॥ २ ॥ धर्मशास्त्रातिगोमूढोदुरात्माप्रग्रहंगतः ॥ अनेयःश्रेयसांमंदोधार्तराष्ट्रोजनार्दन ॥ ३ ॥ कामात्माप्राज्ञमानीचमित्रध्रु
क्सर्वशंकिता ॥ अकर्ताचाकृतज्ञश्चत्यक्तधर्मांप्रियानृतः ॥ ४ ॥ मूढश्चाकृतबुद्धिश्चइंद्रियाणामनीश्वरः ॥ कामानुसारीकृत्येषुसर्वेष्वकृतनिश्चयः ॥ ५ ॥ एतैश्चा
न्यैश्चबहुभिर्दोषैरेवसमन्वितः ॥ त्वयोच्यमानःश्रेयोपिसंरंभान्नग्रहीष्यति ॥ ६ ॥ भीष्मेद्रोणेकृपेकर्णेद्रोणपुत्रेजयद्रथे ॥ भूयसींवर्ततेवृत्तिनशमेकुरुतेमनः ॥
॥ ७ ॥ निश्चितंधार्तराष्ट्राणांसकर्णानांजनार्दन ॥ भीष्मद्रोणमुखान्पार्थानशक्ताःप्रतिवीक्षितुम् ॥ ८ ॥ सेनासमुदयंकृत्वापार्थिवंमधुसूदन ॥ कृतार्थमन्यतेबाल
आत्मानमविचक्षणः ॥ ९ ॥ एकःकर्णःपरान्जेतुंसमर्थइतिनिश्चितम् ॥ धार्तराष्ट्रस्यदुर्बुद्धेःसशमंनोपयास्यति ॥ १० ॥ संविच्चधार्तराष्ट्राणांसर्वेषामेवकेशव
शमेप्रयतमानस्यतवसौभ्रात्रकांक्षिणः ॥ ११ ॥ नपांडवानामस्माभिःप्रतिदेयंयथोचितम् ॥ इतिव्यवसितास्तेषुवचनंस्यान्निरर्थकम् ॥ १२ ॥ यत्रसूक्तंदुरुक्तंच
समंस्यान्मधुसूदन ॥ नतत्रप्रलपेत्प्राज्ञोबधिरेष्विवगायनः ॥ १३ ॥ अविजानत्सुमूढेषुनिर्मर्यादेषुमाधव ॥ नत्वंवाक्यंब्रुवन्युक्तश्चांडालेषुद्विजोयथा ॥ १४ ॥
सोयंबलस्थोमूढश्चनकरिष्यतितेवचः ॥ तस्मिन्निरर्थकंवाक्यमुक्तंसंपत्स्यतेतव ॥ १५ ॥ तेषांसमुपविष्टानांसर्वेषांपापचेतसाम् ॥ तवमध्यावतरणंममकृष्णन
रोचते ॥ १६ ॥ दुर्बुद्धीनामशिष्टानांबहूनांदुष्टचेतसाम् ॥ प्रतीपंवचनंमध्येतवकृष्णनरोचते ॥ १७ ॥ अनुपासितवृद्धत्वाच्छ्रियोदर्पाच्चमोहितः ॥ वयोदर्पादमर्षा
च्चनतेश्रेयोग्रहीष्यति ॥ १८ ॥ बलंबलवदप्यस्यदिवक्ष्यसिमाधव ॥ त्वय्यस्यमहतीशंकानकरिष्यतितेवचः ॥ १९ ॥ नेदमद्ययुधाशक्यमिंद्रेणापिसहामरैः ॥
इतिव्यवसिताःसर्वेधार्तराष्ट्राजनार्दन ॥ २० ॥ तेष्वेवमुपपन्नेषुकामक्रोधानुवर्तिषु ॥ समर्थमपितेवाक्यमसमर्थंभविष्यति ॥ २१ ॥ मध्येतिष्ठन्हस्त्यनीकस्यमं
दोरथाश्वयुक्तस्यबलस्यमूढः ॥ दुर्योधनोमन्यतेवीतभीतिःकृत्स्नामयेयंपृथिवीजितेति ॥ २२ ॥ आशंसतेवैधृतराष्ट्रस्यपुत्रोमहाराज्यमसपत्नंपृथिव्याम् ॥ तस्मि
न्नशमःकेवलोनोपलभ्योबद्धंसंतमन्यतेलब्धमर्थम् ॥ २३ ॥

॥ १० ॥ ११ ॥ प्रतिदेयंपराक्त्यदेयं व्यवसिताः निश्चिताः ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ तेत्वत्तः ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ बद्धंभवदीयत्वेनप्रतिबद्धमपिलब्धमेवमन्यते ॥ २३ ॥

स्यंतीत्याशयेत्यर्थः ॥ ७ ॥ ८ ॥ पार्थिवंपृथ्वीसंबंधिनम् ॥ ९ ॥

॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ॥ इतिउद्योगप० नैलकंठीयेभारतभा० द्विनवतितमोऽध्यायः ॥ ९२ ॥ ॥ ७ ॥ ॥ यथेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ पर्यस्तांअन्यथाभूतां

पर्यस्तेयंपृथिवीकालपक्वादुर्योधनार्थेपांडवान्योद्धुकामाः ॥ समागताःसर्वयोधाःपृथिव्यांराजानश्चक्षितिपालैःसमेताः ॥ २४ ॥ सर्वेचैतेकृतवैराःपुरस्तात्त्व
याराजानोहृतसाराश्चकृष्ण ॥ तवोद्वेगात्संश्रिताधार्तराष्ट्रान्सुसंहताःसहकर्णेनवीराः ॥ २५ ॥ त्यक्तात्मानःसहदुर्योधनेनहृष्टायोद्धुंपांडवान्सर्वयोधाः ॥ तेषांम
ध्येप्रविशेथायदित्वंनतन्मतंममदाशार्हवीर ॥ २६ ॥ तेषांसमुपविष्टानांबहूनांदुष्टचेतसाम् ॥ कथंमध्यंप्रपद्येथाःशत्रूणांशत्रुकर्शन ॥ २७ ॥ सर्वथात्वंमहाबाहो
देवैरपिदुरुत्सहः ॥ प्रभावंपौरुषंबुद्धिंजानामितवशत्रुहन् ॥ २८ ॥ यामेप्रीतिःपांडवेषुभूयःसात्वयिमाधव ॥ प्रेम्णाचबहुमानाच्चसौहृदाच्चब्रवीम्यहम् ॥ २९ ॥
यामेप्रीतिःपुष्कराक्षत्वद्दर्शनसमुद्भवा ॥ साकिमाख्यायतेतुभ्यमंतरात्मासिदेहिनाम् ॥ ३० ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिश्रीकृष्णविदु
रसंवादेद्विनवतितमोऽध्यायः ॥ ९२ ॥ ॥ ७ ॥ ॥ श्रीभगवानुवाच ॥ ॥ यथादूयान्महाप्राज्ञोयथाब्रूयाद्विचक्षणः ॥ यथावाच्यस्त्वद्विधेनभवतामद्विधःसुहृ
त् ॥ १ ॥ धर्मार्थयुक्तंतथ्यंचयथात्वय्युपपद्यते ॥ तथावचनमुक्तोस्मित्वयैतत्पितृमातृवत् ॥ २ ॥ सत्यंप्राप्तंचयुक्तंवाप्येवमेवयथात्थमाम् ॥ शृणुष्वागमनेहेतुंवि
दुरावहितोभव ॥ ३ ॥ दौरात्म्यंधार्तराष्ट्रस्यक्षत्रियाणांचवैरताम् ॥ सर्वमेतदहंजानन्क्षत्तःप्राप्तोद्यकौरवान् ॥ ४ ॥ पर्यस्तांपृथिवींसर्वांसाश्वांसरथकुंजराम् ॥ यो
मोचयेन्मृत्युपाशात्प्राप्नुयाद्धर्ममुत्तमम् ॥ ५ ॥ धर्मकार्यंयतन्शक्त्यानोचेत्प्राप्नोतिमानवः ॥ प्राप्तोभवतितत्पुण्यमत्रमेनास्तिसंशयः ॥ ६ ॥ मनसाचिंतयन्पापं
कर्मणानातिरोचयन् ॥ नप्राप्नोतिफलंतस्येत्येवंधर्मविदोविदुः ॥ ७ ॥ सोहंयतिष्येप्रशमंक्षत्तःकर्तुममायया ॥ कुरूणांसृंजयानांचसंग्रामेविनशिष्यताम् ॥ ८ ॥
सेयमापन्महाघोराकुरुष्वेवसमुत्थिता ॥ कर्णदुर्योधनकृतासर्वेह्येतेतदन्वयाः ॥ ९ ॥ व्यसनेक्लिश्यमानंहियोमित्रंनाभिपद्यते ॥ अनर्थाययथाशक्तितन्नृशंसं
विदुर्बुधाः ॥ १० ॥ आकेशग्रहणान्मित्रमकार्यात्संनिवर्तयन् ॥ अवाच्यःकस्यचिद्भवतिकृतयत्नोयथाबलम् ॥ ११ ॥ तत्समर्थंशुभंवाक्यंधर्मार्थसहितंहितम् ॥ धा
र्तराष्ट्रःसहामात्योग्रहीतुंविदुरार्हति ॥ १२ ॥ हितंहिधार्तराष्ट्राणांपांडवानांतथैवच ॥ पृथिव्यांक्षत्रियाणांचयतिष्येहममायया ॥ १३ ॥ हितेप्रयतमानंमांशंकेदु
र्योधनोयदि ॥ हृदयस्यचमेप्रीतिरानृण्यंचभविष्यति ॥ १४ ॥ ज्ञातीनांहिमिथोभेदेयन्मित्रंनाभिपद्यते ॥ सर्वयत्नेनमाध्यस्थंनतन्मित्रंविदुर्बुधाः ॥ १५ ॥

॥ ५ ॥ यतन्यतमानः ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ तन्नृशंसंअनर्थायविदुरितिसंबंधः अनुनीयेत्यपिपाठः ॥ १० ॥ ११ ॥ १२ ॥ हितंकर्तुमितिशेषः ॥ १३ ॥ १४ ॥ नाभिपद्यते नोपकरोति ॥ १५ ॥

॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ ॥ इतिउद्योगप० नैलकंठीयेभारतभावदीपेत्रिनवतितमोऽध्यायः ॥ ९३ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ नक्षत्रसंपन्ना शरदिनिरभ्रत्वात् ॥ १ ॥

नमांब्रूयुरधर्मिष्ठामूढाह्यसुहृदस्तथा ॥ शक्तोनावारयत्कृष्णःसंरब्धान्कुरुपांडवान् ॥ १६ ॥ उभयोःसाधयन्नर्थमहमागतइत्युत ॥ तत्रयत्नमहंकृत्वागच्छेयंनृ
ष्ववाच्यताम् ॥ १७ ॥ ममधर्मार्थयुक्तंहिश्रुत्वावाक्यमनामयम् ॥ नचेदादास्यतेबालोदिष्टस्यवशमेष्यति ॥ १८ ॥ अहापयन्पांडवार्थंयथावच्छमंकुरूणांयदिचा
चरेयम् ॥ पुण्यंचमेस्याच्चरितंमहात्मन्मुच्येरंश्चकुरवोमृत्युपाशात् ॥ १९ ॥ अपिवाचंभाषमाणस्यकाव्यांधर्मारामामर्थवतीमहिंस्राम् ॥ अवेक्षेरन्धार्तराष्ट्राः
शमार्थंमांचप्राप्तंकुरवःपूजयेयुः ॥ २० ॥ नचापिममपर्याप्ताःसहिताःसर्वपार्थिवाः ॥ क्रुद्धस्यप्रमुखेस्थातुंसिंहस्येवेतरेमृगाः ॥ २१ ॥ ॥ वैशंपायनउवाच ॥
इत्येवमुक्त्वावचनंवृष्णीनामृषभस्तदा ॥ शयनेसुखसंस्पर्शेशिश्येयदुसुखावहः ॥ २२ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिश्रीकृष्णवाक्ये
त्रिनवतितमोऽध्यायः ॥ ९३ ॥ ॥ ७ ॥ ॥ वैशंपायनउवाच ॥ ॥ तथाकथयतोरेवतयोर्बुद्धिमतोस्तदा ॥ शिवानक्षत्रसंपन्नासाव्यतीयायशर्वरी ॥ १ ॥ धर्मा
र्थकामयुक्ताश्चविचित्रार्थपदाक्षराः ॥ शृण्वतोविविधावाचोविदुरस्यमहात्मनः ॥ २ ॥ कथाभिरनुरूपाभिःकृष्णस्यामिततेजसः ॥ अकामस्येवकृष्णस्यसा
व्यतीयायशर्वरी ॥ ३ ॥ ततस्तुस्वरसंपन्नाबहवःसूतमागधाः ॥ शंखदुंदुभिनिर्घोषैःकेशवंप्रत्यबोधयन् ॥ ४ ॥ ततउत्थायदाशार्हऋषभःसर्वसात्वताम् ॥ सर्व
मावश्यकंचक्रेप्रातःकार्यंजनार्दनः ॥ ५ ॥ कृतोदकानुजप्यःसहुताग्निःसमलंकृतः ॥ ततश्चादित्यमुद्यंतमुपातिष्ठतमाधवः ॥ ६ ॥ अथदुर्योधनःकृष्णंशकुनिश्चा
पिसौबलः ॥ संध्यांतिष्ठंतमभ्येत्यदाशार्हमपराजितम् ॥ ७ ॥ आचक्षेतांतुकृष्णस्यधृतराष्ट्रंसभागतम् ॥ कुरूंश्चभीष्मप्रमुखान्राज्ञःसर्वांश्चपार्थिवान् ॥ ८ ॥
त्वामर्थयंतेगोविंददिविशक्रमिवामराः ॥ तावभ्यनंदद्गोविंदःसाम्नापरमवल्गुना ॥ ९ ॥ ततोविमलआदित्येब्राह्मणेभ्योजनार्दनः ॥ ददौहिरण्यंवासांसिगाश्चा
श्वांश्चपरंतपः ॥ १० ॥ विसृज्यबहुरत्नानिदाशार्हमपराजितम् ॥ तिष्ठंतमुपसंगम्यववंदेसारथिस्तदा ॥ ११ ॥ ततोरथेनशुभ्रेणमहताकिंकिणीकिना ॥ हयोत्तम
युजाशीघ्रमुपातिष्ठतदारुकः ॥ १२ ॥ तमुपस्थितमाज्ञायरथंदिव्यंमहामनाः ॥ महाभ्रघननिर्घोषंसर्वरत्नविभूषितम् ॥ १३ ॥ अग्निंप्रदक्षिणंकृत्वाब्राह्मणांश्च
जनार्दनः ॥ कौस्तुभंमणिमामुच्यश्रियापरमयाज्वलन् ॥ १४ ॥ कुरुभिःसंवृतःकृष्णोवृष्णिभिश्चाभिरक्षितः ॥ आतिष्ठतरथंशौरिःसर्वयादवनंदनः ॥ १५ ॥

॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ उदकंस्नानाचमनादिअनुजप्यंसंध्योपासनादितेउभेकृतेयेनसःकृतोदकानुजप्यः ॥ ६ ॥ तिष्ठंतंउपासीनम् ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

॥ १६ ॥ १७ ॥ १८ ॥ चित्राश्वतेरथाश्च ॥ १९ ॥ संमृष्टेदूरीकृतंसिक्तंजलेनाप्लावितंचरजोयस्मात्तंअविभक्तिकंपदम् ॥ २० ॥ एकपुष्कराःकाहलाः ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

अन्वारुरोहदाशार्हंविदुरःसर्वधर्मवित्॥ सर्वप्राणभृतांश्रेष्ठंसर्वबुद्धिमतांवरम्॥ १६॥ ततोदुर्योधनःकृष्णंशकुनिश्चापिसौबलः॥ द्वितीयेनरथेनैनमन्वयातांप
रंतपम्॥ १७॥ सात्यकिःकृतवर्माचकृष्णीनांचापरेरथाः॥ पृष्ठतोनुययुःकृष्णंगजैरश्वैरथैरपि॥ १८॥ तेषांहेमपरिष्कारैर्युक्ताःपरमवाजिभिः॥ गच्छतांघोषिण
श्चित्ररथाराजन्विरेजिरे॥ १९॥ संमृष्टसंसिक्तरजःप्रतिपेदेमहापथम्॥ राजर्षिचरितंकालेकृष्णोधीमान्श्रियाज्वलन्॥ २०॥ ततःप्रयातेदाशार्हेप्रावाद्यंतैक
पुष्कराः॥ शंखाश्चदध्मिरेतत्रवाद्यान्यन्यानियानिच॥ २१॥ प्रवीराःसर्वलोकस्ययुवानःसिंहविक्रमाः॥ परिवार्यरथंशौरेरगच्छंतपरंतपाः॥ २२॥ ततोन्येव
हुसाहस्राविचित्राद्भुतवाससः॥ असिप्रासायुधधराःकृष्णस्यासन्पुरःसराः॥ २३॥ गजाःपंचशतास्तत्ररथाश्चासन्सहस्रशः॥ प्रयांतमन्वयुर्वीरंदाशार्हमपरा
जितम्॥ २४॥ पुरंकुरूणांसंवृत्तंद्रष्टुकामंजनार्दनम्॥ सबालवृद्धंसहसाकरेण्यागतमरिंदम॥ २५॥ वेदिकामाश्रिताश्चिश्चसमाक्रांतान्यनेकशः॥ प्रचलंतीवभा
रेणयोषिद्भिर्भवनान्युत॥ २६॥ सपूज्यमानःकुरुभिःसंभृष्टंवन्मधुराःकथाः॥ यथार्हंप्रतिसत्कुर्वन्प्रेक्षमाणःशनैर्ययौ॥ २७॥ ततःसभांसमासाद्यकेशवस्यानु
यायिनः॥ सशंखैर्वेणुनिर्घोषैर्दिशःसर्वाव्यनादयन्॥ २८॥ ततःसासमितिःसर्वाराज्ञाममिततेजसाम्॥ संप्राकंपतहर्षेणकृष्णागमनकांक्षया॥ २९॥ ततोभ्या
शगतेकृष्णेसमस्तेष्वन्नराधिपाः॥ श्रुत्वातंरथनिर्घोषंपर्जन्यनिनदोपमम्॥ ३०॥ आसाद्यतुसभाद्वारमृषभःसर्वसात्वताम्॥ अवतीर्यरथाच्छौरिःकैलासशिख
रोपमात्॥ ३१॥ नवमेघप्रतीकाशांज्वलंतीमिवतेजसा॥ महेंद्रसदनप्रख्यांप्रविवेशसभांततः॥ ३२॥ पाणौगृहीत्वाविदुरंसात्यकिंचमहायशाः॥ ज्योतीं
ष्यादित्यवद्राजन्कुरूम्राच्छादयन्श्रिया॥ ३३॥ अग्रतोवासुदेवस्यकर्णदुर्योधनावुभौ॥ कृष्णयःकृतवर्माचाप्यासन्कृष्णस्यपृष्ठतः॥ ३४॥ धृतराष्ट्रंपुरस्कृ
त्यभीष्मद्रोणादयस्ततः॥ आसनेभ्योऽचलन्सर्वेपूजयंतोजनार्दनम्॥ ३५॥ अभ्यागच्छतिदाशार्हेप्रज्ञाचक्षुर्नरेश्वरः॥ सहैवद्रोणभीष्माभ्यामुदतिष्ठन्महाय
शाः॥ ३६॥ उत्तिष्ठतिमहाराजेधृतराष्ट्रेजनेश्वरे॥ तानिराजसहस्राणिसमुत्तस्थुःसमंततः॥ ३७॥ आसनंसर्वतोभद्रंजांबूनदपरिष्कृतम्॥ कृष्णार्थेकल्पितंतत्र
धृतराष्ट्रस्यशासनात्॥ ३८॥ स्मयमानस्तुराजानंभीष्मद्रोणौचमाधवः॥ अभ्यभाषतधर्मात्माराज्ञश्चान्यान्यथावयः॥ ३९॥ तत्रकेशवमानर्चुःसम्यगभ्या
गतंसभां॥ राजानःपार्थिवाःसर्वेकुरवश्चजनार्दनम्॥ ४०॥

॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥

॥ १०१ ॥

॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ॥ इत्युद्योगप॰नैलकंठीयेभारतभा॰चतुर्नवतितमोऽध्यायः ॥ ९४ ॥ ॥ ७ ॥ ॥ ७ ॥

तत्रतिष्ठन्सदाशार्होराजमध्येपरंतपः॥ अपश्यदंतरिक्षस्थानृषीन्परपुरंजयः॥ ततस्तानभिसंप्रेक्ष्यनारदप्रमुखानृषीन्॥ ४१॥ अभ्यभाषतदाशार्होभीष्मंशांत
नवंशनैः॥ पार्थिवींसमितिंद्रष्टुमृषयोभ्यागतानृप॥ ४२॥ निमंत्र्यंतामासनैश्चसत्कारेणचभूयसा॥ नैतेष्वनुपविष्टेषुशक्र्यंकेनचिदासितुम्॥ ४३॥ पूजाप्रयु
ज्यतामाशुमुनीनांभावितात्मनाम्॥ ऋषीन्शांतनवोदृष्ट्वासभाद्वारमुपस्थितान्॥ ४४॥ त्वरमाणस्ततोभृत्यानासनानीत्यचोदयत्॥ आसनान्यथमृष्टानिम
हांतिविपुलानिच॥ ४५॥ मणिकांचनचित्राणिसमाजकुरुसत्तमः॥ तेषुतत्रोपविष्टेषुगृहीतार्घेषुभारत॥ ४६॥ निषसादासनेकृष्णोराजानश्चयथासनम्॥ कु॰शा
सनःसात्यकयेददावासनमुत्तमम्॥ ४७॥ विविंशतिर्ददौपीठंकांचनंकृतवर्मणे॥ अविदूरेतुकृष्णस्यकर्णदुर्योधनावुभौ॥ ४८॥ एकासनेमहात्मानौनिषेदतु
रमर्षणौ॥ गांधारराजःशकुनिर्गांधारैरभिरक्षितः॥ ४९॥ निषसादासनेराजासहपुत्रोविशांपते॥ विदुरोमणिपीठेतुशुक्लस्यार्ष्याजिनोत्तरे॥ ५०॥ संस्पृशन्ना
सनंशौरेर्महामतिरुपाविशत्॥ चिरस्यदृष्ट्वादाशार्हंराजानःसर्वएवते॥ ५१॥ अमृतस्येवनातृप्यन्प्रेक्षमाणाजनार्दनम्॥ अतसीपुष्पसंकाशःपीतवासाजना
र्दनः॥ ५२॥ व्यभ्राजतसभामध्येहेमवेदीवोपहितोमणिः॥ ५३॥ ततस्तूष्णींसर्वमासीद्गोविंदगतमानसम्॥ ततस्तत्रकश्चिन्नकिंचिद्व्याजहारपुमान्क्वचित्॥ ५४॥
इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिश्रीकृष्णसभाप्रवेशेचतुर्नवतितमोऽध्यायः॥ ९४॥ ॥ ७ ॥ ॥ वैशंपायनउवाच॥ ॥ तेष्वासीनेषु
सर्वेषुतूष्णींभूतेषुराजसु॥ वाक्यमभ्याददेकृष्णःसुदंष्ट्रोदुंदुभिस्वनः॥ १॥ जीमूतइवघर्मांतेसर्वांसंश्रावयन्सभाम्॥ धृतराष्ट्रमभिप्रेक्ष्यसमभाषतमाधवः॥ २॥
॥ श्रीभगवानुवाच ॥ ॥ कुरूणांपांडवानांचशमःस्यादितिभारत॥ अप्रणाशेनवीराणामेतद्याचितुमागतः॥ ३॥ राजन्नान्यत्प्रवक्तव्यंतवनैःश्रेयसंवचः॥
विदितंत्वेवतेसर्ववेदितव्यमरिंदम॥ ४॥ इदंत्ववकुलंश्रेष्ठंसर्वराजसुपार्थिव॥ श्रुतवृत्तोपसंपन्नंसर्वैःसमुदितंगुणैः॥ ५॥ कृपानुकंपाकारुण्यमानृशंस्यंचभा
रत॥ तथार्जवंक्षमासत्यंकुरुष्वेतद्विशिष्यते॥ ६॥ तस्मिन्नेवंविधेराजन्कुलेमहतितिष्ठति॥ त्वन्निमित्तंविशेषेणनेहयुक्तमसांप्रतम्॥ ७॥

तेष्विति ॥ १ ॥ २ ॥ आगतोस्मीतिशेषः ॥ ३ ॥ ४ ॥ ५ ॥ कृपापरस्यसुखार्थेयत्नः अनुकंपापरदुःखदर्शनेत्रासः कारुण्यंपरदुःखप्राहाणार्थोयत्नः आनृशंस्यंपरदुःखाप्रदानम् ॥ ६ ॥ असांप्रतंकृपादिभ्योवि
परीतं परस्यदुःखार्थोयत्नः परदुःखदर्शनेआह्लादः परस्यसुखनाशार्थोयत्नः परस्यदुःखसंपादनंकौटिल्यादिकंच तच्चायुक्तम् ॥ ७ ॥

बाह्येषुद्यूतादिषु आभ्यंतरेषुजतुगृहादिषु ॥ ८ ॥ ९ ॥ १० ॥ कुरुष्वेवभवत्स्वेवनतुपांडवेषु ॥ ११ ॥ नदित्ससिकुलंनच्छेत्तुमिच्छसि त्वंचेदिच्छसीतिपाठेकुरून्स्थापयितुमिच्छसितर्हिशमोनदुष्करः ॥ १२ ॥

त्वंहिधारयिताश्रेष्ठःकुरूणांकुरुसत्तम ॥ मिथ्याप्रचरतांतातबाह्येष्वाभ्यंतरेषुच ॥ ८ ॥ तेपुत्रास्तवकौरव्यदुर्योधनपुरोगमाः ॥ धर्मार्थौपृष्ठतःकृत्वाप्रचरंतिनृशंसवत् ॥ ९ ॥ अशिष्टागतमर्यादालोभेनहृतचेतसः ॥ स्वेषुबंधुषुमुख्येषुतद्वेत्थपुरुषर्षभ ॥ १० ॥ सेयमापन्महाघोराकुरुष्वेवसमुत्थिता ॥ उपेक्ष्यमाणाकौरव्यपृथिवींघातयिष्यति ॥ ११ ॥ शक्याचेयंशमयितुंनचेद्दित्ससिभारत ॥ नदुष्करोह्यत्रशमोमतोमेभरतर्षभ ॥ १२ ॥ त्वय्यधीनःशमोराजन्मयिचैवविशांपते ॥ पुत्रान्स्थापयकौरव्यस्थापयिष्याम्यहंपरान् ॥ १३ ॥ आज्ञातवहिराजेंद्रकार्यापुत्रैःसहान्वयैः ॥ हितंबलवदप्येषांतिष्ठतांतवशासने ॥ १४ ॥ तवचैवहितंराजन्पांडवानामथोहितम् ॥ शमेप्रयतमानस्यममशासनकांक्षिणः ॥ १५ ॥ स्वयंनिष्फलमालक्ष्यसंविधत्स्वविशांपते ॥ सहायभूताभरतास्तवैवस्युर्जनेश्वर ॥ १६ ॥ धर्मार्थयोस्तिष्ठराजन्पांडवैरभिरक्षितः ॥ नहिशक्यास्तथाभूतायत्नादपिनराधिप ॥ १७ ॥ नहित्वांपांडवैर्जेतुंरक्ष्यमाणंमहात्मभिः ॥ इंद्रोपिदेवैःसहितःप्रसहेतकुतोनृपाः ॥ १८ ॥ यत्रभीष्मश्चद्रोणश्चकृपःकर्णोविविंशतिः ॥ अश्वत्थामाविकर्णश्चसोमदत्तोथबाह्लिकः ॥ १९ ॥ सैंधवश्चकलिंगश्चकांबोजश्चसुदक्षिणः ॥ युधिष्ठिरोभीमसेनःसव्यसाचीयमौतथा ॥ २० ॥ सात्यकिश्चमहातेजा युयुत्सुश्चमहारथः ॥ कोनुतान्विपरीतात्मायुध्येतभरतर्षभ ॥ २१ ॥ लोकस्येश्वरतांभूयःशत्रुभिश्चाप्यधृष्यताम् ॥ प्राप्स्यसित्वममित्रघ्नसहितःकुरुपांडवैः ॥ २२ ॥ तस्यतेपृथिवीपालास्त्वत्समाःपृथिवीपते ॥ श्रेयांसश्चैवराजानःसंधास्यंतेपरंतप ॥ २३ ॥ सत्वंपुत्रैश्चपौत्रैश्चपितृभिर्भ्रातृभिस्तथा ॥ सुहृद्भिःसर्वतोगुप्तःसुखंशक्ष्यसिजीवितुम् ॥ २४ ॥ एतानेवपुरोधायसत्कृत्यचयथापुरा ॥ अखिलांभोक्ष्यसेसर्वांपृथिवींपृथिवीपते ॥ २५ ॥ एतैर्हिसहितःसर्वैःपांडवैःस्वैश्चभारत ॥ अन्यान्विजेष्यसेशत्रूनेषस्वार्थस्तवाखिलः ॥ २६ ॥ तैरेवोपार्जितांभूमिंभोक्ष्यसेचपरंतप ॥ यदिसंपत्स्यसेपुत्रैःसहामात्यैर्नराधिप ॥ २७ ॥ संयुगेवैमहाराजदृश्यतेसुमहान्क्षयः ॥ क्षयेचोभयतोराजन्कंधर्ममनुपश्यसि ॥ २८ ॥ पांडवैर्निहतैःसंख्येपुत्रैर्वापिमहाबलैः ॥ यद्विंदेथाःसुखंराजंस्तद्ब्रूहिभरतर्षभ ॥ २९ ॥ शूराश्चहिकृतास्त्राश्चसर्वेयुद्धाभिकांक्षिणः ॥ पांडवास्तावकाश्चैवतान्रक्षमहतोभयात् ॥ ३० ॥

॥ १३ ॥ बलवत्अत्यंतं एषामेव अपिशब्दएवार्थे ॥ १४ ॥ शासनकांक्षिणःपुत्रान्शासितुमिच्छतस्तव ॥ १५ ॥ निष्फलंवैरं संविधत्स्वशमंकुरु ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ पांडवैःसहसंधास्यंतेसंधिंकरिष्यंति ॥ २३ ॥ २४ ॥ अखिलांनिष्कंटकाम् ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥

॥ ३१ ॥ ३२ ॥ प्रकृतिंसत्त्वगुणम् ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ हार्दंप्रीतिः आसीत्पूर्वंबाल्ये ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ स्थातास्थास्यति ॥ ४२ ॥ ४३ ॥ ४४ ॥ गुरोःगुरौ ॥ ४५ ॥ ॥ ४६ ॥ परिषदंधमज्ञसभां पुत्राःपांडवाः ॥ ४७ ॥ ४८ ॥ ४९ ॥ आरुजतिहिनस्ति अनुकूलजान्कूलंकूलमनुसृत्यजातान्वृक्षादीन् ॥ ५० ॥ येपांडवास्तूष्णीमासतेकालंनिर्वाह्यभवद्भ्योराज्यांशंलब्धुमि

नपश्येमकुरून्सर्वान्पांडवांश्चैवसंयुगे ॥ क्षीणानुभयतःशूरान्रथिनोरथिभिर्हतान् ॥ ३१ ॥ समवेताःपृथिव्यांहिराजानोराजसत्तम ॥ अमर्षवशमापन्नानाशयेयुरिमाःप्रजाः ॥ ३२ ॥ त्राहिराजन्निमंलोकंननश्येयुरिमाःप्रजाः ॥ त्वयिप्रकृतिमापन्नेशेषःस्यात्कुरुनंदन ॥ ३३ ॥ शुक्लावदान्याह्रीमंतआर्याःपुण्याभिजातयः ॥ अन्योन्यसचिवाराजंस्तान्पाहिमहतोभयात् ॥ ३४ ॥ शिवेनेमेभूमिपालाःसमागम्यपरस्परम् ॥ सहभुक्त्वाचपीत्वाचप्रतियांतुयथागृहम् ॥ ३५ ॥ सुवाससःस्रग्विणश्चसत्कृताभरतर्षभ ॥ अमर्षंचनिराकृत्यवैराणिचपरंतप ॥ ३६ ॥ हार्दंयत्पांडवेष्वासीत्प्राप्तेस्मिन्नायुषःक्षये ॥ तदेवतेभवत्वद्यसंधत्स्वभरतर्षभ ॥ ३७ ॥ बालाविहीनाःपित्रातेत्वयैवपरिवर्धिताः ॥ तान्पालययथान्यायंपुत्रांश्चभरतर्षभ ॥ ३८ ॥ भवतैवहिरक्ष्यास्तेव्यसनेषुविशेषतः ॥ मातेधर्मस्तथैवार्थोनश्येतभरतर्षभ ॥ ३९ ॥ आहुस्त्वांपांडवाराजन्नभिवाद्यप्रसाद्यच ॥ भवतःशासनाद्दुःखमनुभूतंसहानुगैः ॥ ४० ॥ द्वादशेमानिवर्षाणिवनेनिर्व्युषितानिनः ॥ त्रयोदशंतथाऽज्ञातैःसजनेपरिवत्सरम् ॥ ४१ ॥ स्थातानःसमयेतस्मिन्पितेतिकृतनिश्चयाः ॥ नाहास्मसमयंताततच्चनोब्राह्मणाविदुः ॥ ४२ ॥ तस्मिन्नःसमयेतिष्ठस्थितानांभरतर्षभ ॥ नित्यंसंक्लेशिताराजन्स्वराज्यांशंलभेमहि ॥ ४३ ॥ त्वंधर्ममर्थंसंजानन्सम्यङ्नस्त्रातुमर्हसि ॥ गुरुत्वंभवतिप्रेक्ष्यबहून्क्लेशांस्तितिक्ष्महे ॥ ॥ ४४ ॥ सभवान्मातृपितृवदस्मासुप्रतिपद्यताम् ॥ गुरोर्गरीयसीवृत्तिर्याचशिष्यस्यभारत ॥ ४५ ॥ वर्तामहेत्वयिचतांत्वंचवर्तस्वनस्तथा ॥ पित्रास्थापयितव्याहिवयमुत्पथमास्थिताः ॥ ४६ ॥ संस्थापयपथिष्वस्मांस्तिष्ठधर्मेसुवर्त्मनि ॥ आहुश्चेमांपरिषदंपुत्रास्तेभरतर्षभ ॥ ४७ ॥ धर्मज्ञेषुसभासत्सुनेहयुक्तमसांप्रतम् यत्रधर्मोह्यधर्मेणसत्यंयत्रानृतेनच ॥ ४८ ॥ हन्यतेप्रेक्षमाणानांहतास्तत्रसभासदः ॥ विद्धोधर्मोह्यधर्मेणसभांयत्रप्रपद्यते ॥ ४९ ॥ नचास्यशल्यंकृंतंतिविद्धास्तत्रसभासदः ॥ धर्मएतानारुजतियथानद्यनुकूलजान् ॥ ५० ॥ येधर्ममनुपश्यंतस्तूष्णींध्यायंतआसते ॥ तेसत्यमाहुर्धर्म्यंचन्याय्यंचभरतर्षभ ॥ ५१ ॥ शक्यंकिमन्यद्वक्तुंतेदानादन्यज्जनेश्वर ॥ ब्रुवंतुतेमहीपालाःसभायांयेसमासते ॥ ५२ ॥ धर्मार्थौसंप्रधार्यैवयदिसत्यंब्रवीम्यहम् ॥ प्रमुंचेमान्मृत्युपाशात्क्षत्रियान्पुरुषर्षभ ॥ ५३ ॥

च्छंतितेसत्यंधर्म्यंन्याय्यंचाहुः ॥ ५१ ॥ ५२ ॥ ५३ ॥

॥ ५४ ॥ ५५ ॥ दाहितःजनुगृहे निरस्तोद्यूतेनराज्याद्दूरीकृतः ॥ ५६ ॥ ५७ ॥ ५८ ॥ परमोपधिःमहं च्छम्य ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ॥ इति०उद्यो०नै०भा०पंचनवतितमोऽध्या

प्रशाम्यभरतश्रेष्ठमामन्युवशमन्वगाः॥ पिप्र्यंतेभ्यःप्रदायांशंपांडवेभ्योययोचितम्॥५४॥ततःसपुत्रःसिद्धार्थोभुंक्ष्वभोगान्परंतप॥ अजातशत्रुंजानीषेस्थि
तंधर्मेसतांसदा॥ ५५॥ सपुत्रेत्वयिवर्त्तिंचवर्ततेयांनराधिप॥ दाहितश्चनिरस्तश्चत्वामेवोपाश्रितःपुनः॥ ५६॥ इंद्रप्रस्थंत्वयैवासौसपुत्रेणविवासितः॥ सत
त्रनिवसन्सर्वान्वशमानीयपार्थिवान्॥ ५७॥ त्वन्मुखानकरोद्राजन्नचत्वामत्यवर्तत॥ तस्यैवंवर्तमानस्यसौबलेनजिहीर्षता॥ ५८॥ राष्ट्राणिधनधान्यंचत्र
युक्तःपरमोपधिः॥ सतामवस्थांसंप्राप्यकृष्णांप्रेक्ष्यसभांगताम्॥ ५९॥ क्षत्रधर्मादमेयात्मानाकंपतयुधिष्ठिरः॥ अहंतुतवतेपांचश्रेयइच्छामिभारत॥ ६०॥
धर्मादर्थात्सुखाच्चैवमाराजन्हीनशःप्रजाः॥ अनर्थमर्थमन्वानोप्यर्थंचानर्थमात्मनः॥ ६१॥ लोभेऽतिप्रस्तान्पुत्रान्निगृह्णीष्वविशांपते॥ स्थिताःशुश्रूषितुंपा
र्थाःस्थितायोद्दुमरिंदमाः॥ यत्तेपथ्यतमंराजंस्तस्मिंस्तिष्ठपरंतप॥ ६२॥ ॥ वैशंपायनउवाच॥ ॥ तद्वाक्यंपार्थिवाःसर्वेहृदयैःसमपूजयन्॥ ननत्रकश्चिद्वक्तुं
हिवाचंप्राक्रामदग्रतः॥ ६३॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिश्रीकृष्णवाक्येपंचनवतितमोऽध्यायः॥ ९५॥ ॥ ७॥ ॥ वैशंपायन
उवाच॥ ॥ तस्मिन्नभिहितेवाक्येकेशवेनमहात्मना॥ स्तिमितादृष्टरोमाणआसन्सर्वेसभासदः॥ १॥ कश्चिदुत्तरमेतेषांवक्तुंनोत्सहतेपुमान्॥ इतिसर्वेमनो
भिस्तेचिंतयंतिस्मपार्थिवाः॥ २॥ तथातेषुचसर्वेषुतूष्णींभूतेषुराजसु॥ जामदग्न्यइदंवाक्यमब्रवीत्कुरुसंसदि॥३॥ इमांमेसोपमांवाचंशृणुसत्यामशंकितः॥
तांश्रुत्वाश्रेयआदत्स्वयदिसाध्वितिमन्यसे॥ ४॥ राजादंभोद्भवोनामसार्वभौमःपुराभवत्॥ अखिलांबुभुजेसर्वांपृथिवीमितिनःश्रुतम्॥ ५॥ सस्मनित्यंनिशा
पायेप्रातरुत्थायवीर्यवान्॥ ब्राह्मणान्क्षत्रियांश्चैवपृच्छन्नास्तेमहारथः॥ ६॥ अस्तिकश्चिद्विशिष्टोवामद्विधोवाभवेद्युधि॥ शूद्रोवैश्यःक्षत्रियोवाब्राह्मणोवा
पिशब्दभृत्॥ ७॥ इतिब्रुवन्नन्वचरत्सराजापृथिवीमिमाम्॥ दर्पेणमहतामत्तःकंचिदन्यमचिंतयन्॥ ८॥ तंचवैद्याअकृपणाब्राह्मणाःसर्वतोऽभयाः॥ प्रत्यषेधंत
राजानंश्लाघमानंःपुनःपुनः॥ ९॥ निषिध्यमानोप्यसकृत्पृच्छत्येवसवैद्विजान्॥ अतिमानंश्रियामत्तंतमूचुर्ब्राह्मणास्तदा॥ १०॥ तपस्विनोमहात्मानोवेदत्र
त्ययदर्शिनः॥ उदीर्यमाणंराजानंक्रोधदीप्ताद्विजातयः॥ ११॥ अनेकजयिनोसंख्येयौवैपुरुषसत्तमौ॥ तयोस्त्वंनसमोराजन्भवितासिकदाचन॥ १२॥

यः॥ ९५॥ ॥ ७॥ ॥ तस्मिन्निति॥ १॥ २॥ ३॥ ४॥ ५॥ ६॥ ७॥ ८॥ ९॥ १०॥ वेदप्रत्ययदर्शिनःवेदज्ञःप्रत्ययोत्रह्मात्मैक्यापरोक्ष्यंतद्वेदद्वुशीलंयेषांते॥ ११॥ १२॥

॥ १०३ ॥

॥ १३ ॥ १४ ॥ तप्यते ताभ्यामितिशेषः ॥ १५ ॥ षडंगिनींरथनागाश्वपादातशकटोष्ट्रवतीं ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥

एवमुक्तःसराजातुपुनःपप्रच्छतान्द्विजान्॥ कतौवीरौकृतजन्मानौकिंकर्माणौचकौचतौ॥ १३॥ ॥ब्राह्मणाऊचुः॥ ॥नरोनारायणश्चैवतापसावितिनःश्रुतम्॥
आयातौमानुषेलोकेताभ्यांयुध्यस्वपार्थिव॥ १४॥ श्रूयेतेतौमहात्मानौनरनारायणावुभौ॥ तपोघोरमनिर्देश्यंतप्यतेगंधमादने॥ १५॥ सराजामहतींसे
नांयोजयित्वाषडंगिनीम्॥ अमृष्यमाणःसंप्रायाद्यत्रतावपराजितौ॥ १६॥ सगत्वाविषमंघोरंपर्वतंगंधमादनम्॥ मृगयाणोन्वगच्छत्तौतापसौवनमाश्रितौ
॥ १७॥ तौदृष्ट्वाक्षुत्पिपासाभ्यांकृशौधमनिसंततौ॥ शीतवातातपैश्चैवकर्शितौपुरुषोत्तमौ॥ १८॥ अभिगम्योपसंगृह्यपर्यपृच्छदनामयम्॥ तमर्चित्वामूलफ
लैरासनेनोदकेनच॥ १९॥ न्यमंत्रयेतांराजानंकिंकार्यंक्रियतामिति॥ ततस्तामानुपूर्वीसपुनरेवान्वकीर्तयत्॥ २०॥ बाहुभ्यांमेजिताभूमिर्निहताःसर्वशत्र
वः॥ भवद्भ्यांयुद्धमाकांक्षन्नुपयातोस्मिपर्वतम्॥ २१॥ आतिथ्यंदीयतामेतत्कांक्षितंमेचिरंप्रति॥ ॥ नरनारायणावूचतुः॥ अपेतक्रोधलोभोयमाश्रमोराज
सत्तम॥ २२॥ नत्यस्मिन्नाश्रमेयुद्धंकृतःशस्त्रंकुतोनृजुः॥ अन्यत्रयुद्धमाकांक्षबहवःक्षत्रियाःक्षितौ॥ २३॥ ॥रामउवाच॥ ॥उच्यमानस्तथापिस्मभूयएवा
भ्यभाषत॥ पुनःपुनःक्षम्यमाणःसांत्व्यमानश्चभारत॥ २४॥ दंभोद्भवोयुद्धमिच्छन्नाक्रुश्यत्येवतापसौ॥ ततोनरस्त्विषीकाणांमुष्टिमादायभारत॥ २५॥ अ
ब्रवीदेहियुध्यस्वयुद्धकामुकक्षत्रिय॥ सर्वशस्त्राणिचादत्स्वयोजयस्वचवाहिनीम्॥ २६॥ अहंहितेविनेष्यामियुद्धश्रद्धामितःपरम्॥ ॥ दंभोद्भवउवाच॥ ॥यद्येत
दस्त्रमस्मासुयुक्तंतापसमन्यसे॥ २७॥ एतेनापित्वयायोत्स्येयुद्धार्थीत्यहमागतः॥ ॥रामउवाच॥ ॥ इत्युक्ताशरवर्षेणसर्वतःसमवाकिरत्॥ २८॥ दंभोद्भवस्ता
पसंतंजिघांसुःसहसैनिकः॥ तस्यतानस्यतोघोरानिषून्परतनुच्छिदः॥ २९॥ कदर्थीकृत्यसमुनिरिषीकाभिःसमार्पयत्॥ ततोस्मैप्रास्रजद्घोरमैषीकमपरा
जितः॥ ३०॥ अस्त्रमप्रतिसंधेयंतदद्भुतमिवाभवत्॥ तेषामक्षीणिकर्णाश्चनासिकाश्चैवमायया॥ ३१॥ निमित्तवेधीसमुनिरिषीकाभिःसमार्पयत्॥ सदृष्ट्वा
श्वेतमाकाशमिषीकाभिःसमाचितम्॥ ३२॥ पादयोर्न्यपतद्राजास्वस्तिमेस्वितिचाब्रवीत्॥ तमब्रवीन्नरोराजन्शरण्यःशरणैषिणाम्॥ ३३॥ ब्रह्मण्योभवध
र्मात्मामाचस्मैवंपुनःकृथाः॥ नैतादृक्पुरुषोराजन्क्षत्रधर्ममनुस्मरन्॥ ३४॥ मनसानृपशार्दूलभवेत्परपुरंजयः॥ माचदर्पसमाविष्टःक्षेप्सीःकांश्चित्कथंचन
॥ ३५॥ अल्पीयांसंविशिष्टंवातत्तेराजन्समाहितम्॥ कृतप्रज्ञोवीतलोभोनिरहंकारआत्मवान्॥ ३६॥ ॥ ३०॥ ३१॥ ३२॥ ३३॥ ३४॥ ३५॥ ३६॥

॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ काकुदीकमित्यादयोष्टावस्त्रजातयः येनास्त्रेणाभिभूतारथगजादीनांककुथेवशेरतेतत्काकुदीकंप्रस्त्वापनंनाम येनशुकनलिकान्यायेनअन्ययेपिभयदर्शिनोहयरथा
दिपादेषुगाढंश्लिष्यंतितत्शुकंमोहनंनाम येनस्त्वर्गनगरंपश्यतितन्नाकंउन्मादनंनाम येनक्षिप्रमात्रेणानुविद्धास्त्रासात्शत्रून्सूत्रस्त्रवंतितत्अक्षिसंतर्जनंत्रासनंनाम संतानंअविच्छेदनशस्त्राणांवृष्टिकरंऐंद्रादि

दांतःक्षांतोमृदुःसौम्यप्रजाःपालयपार्थिव ॥ मास्मभूयःक्षिपेःकंचिदविदित्वाबलाबलम् ॥ ३७ ॥ अनुज्ञातःस्वस्तिगच्छमैवंभूयःसमाचरेः ॥ कुशलंब्राह्मणान्पृ
च्छेरावयोर्वचनाद्वृशम् ॥ ३८ ॥ ततोराजातयोःपादावभिवाद्यमहात्मनोः ॥ प्रत्याजगामस्वपुरंधर्मंचैवाचरद्वृशम् ॥ ३९ ॥ सुमहच्चापितत्कर्मयन्नरेणकृतंपुरा ॥
ततोगुणैःसुबहुभिःश्रेष्ठोनारायणोभवत् ॥ ४० ॥ तस्माद्यावद्धनुःश्रेष्ठगांडीवेसंनयुज्यते ॥ तावत्त्वंमानमुत्सृज्यगच्छराजन्धनंजयम् ॥ ४१ ॥ काकुदीकंशुकंना
कमक्षिसंतर्जनंतथा ॥ संतानंनर्तकंघोरमास्यमोदकमष्टमम् ॥ ४२ ॥ एतैर्विद्धाःसर्वएवमरणंयांतिमानवाः ॥ कामक्रोधौलोभमोहौमदमानौतथैवच ॥ ४३ ॥
मात्सर्याहंकृतीचैवकमादेतउदाहृताः ॥ उन्मत्ताश्चविचेष्टंतेनष्टसंज्ञाविचेतसः ॥ ४४ ॥ स्वपंतिचप्लुवंतेचच्छर्दयंतिचमानवाः ॥ मूत्रयंतेचसततंरुदंतिचहसंतिच
॥ ४५ ॥ निर्मातासर्वलोकानामीश्वरःसर्वकर्मवित् ॥ यस्यनारायणोबंधुरर्जुनोदुःसहोयुधि ॥ ४६ ॥ कस्तमुत्सहतेजेतुंत्रिषुलोकेषुभारत ॥ वीरंकपिध्वजंजि
ष्णुंयस्यनास्तिसमोयुधि ॥ ४७ ॥ असंख्येयागुणाःपार्थतद्विशिष्टोजनार्दनः ॥ त्वमेवभूयोजानासिकुंतीपुत्रंधनंजयम् ॥ ४८ ॥ नरनारायणौयौतौवेवार्जुन
केशवौ ॥ विजानीहिमहाराजप्रवीरौपुरुषोत्तमौ ॥ ४९ ॥ यद्येतदेवंजानासिनचमामभिशंकसे ॥ आर्यामतिंसमास्थायशाम्यभारतपांडवैः ॥ ५० ॥ अथचे
न्मन्यसेश्रेयोनमेभेदोभवेदिति ॥ प्रशाम्यभरतश्रेष्ठमाचयुद्धेमनःकृथाः ॥ ५१ ॥ भवतांचकुरुश्रेष्ठकुलंबहुमतंभुवि ॥ तत्तथैवास्तुभद्रंतेस्वार्थमेवोपचिंतय
॥ ५२ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिदंभोद्भवोपाख्यानेषण्णवतितमोऽध्यायः ॥ ९६ ॥ ॥ ७ ॥ ॥ वैशंपायनउवाच ॥ ॥ जामद
ग्न्यवचःश्रुत्वाकण्वोपिभगवान्ऋषिः ॥ दुर्योधनमिदंवाक्यमब्रवीत्कुरुसंसदि ॥ १ ॥ ॥ कण्वउवाच ॥ ॥ अक्षयश्चाव्ययश्चैवब्रह्मालोकपितामहः ॥ तथैवभ
गवंतौतौनरनारायणावृषी ॥ २ ॥ आदित्यानांहिसर्वेषांविष्णुरेकःसनातनः ॥ अजय्यश्चाव्ययश्चैवशाश्वतःप्रभुरीश्वरः ॥ ३ ॥

दिव्यं नर्तकंनर्तनकरंपैशाचं घोरंकदनकरंराक्षसं आस्यमोदकंयेनाभिहताःमुखेपाषाणंदत्वामरणार्थमेवप्रतिष्ठंतेतत्यास्यंनाम अत्रैवउन्मत्ताश्चेतिश्लोकोक्तादोषायथायोग्यंसंबंधनीयाः ॥ ४२ ॥ ४३ ॥ ॥ १०५ ॥
॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ॥ इतिउद्यो॰नै॰भा॰षण्णवतितमोऽध्यायः ॥ ९६ ॥ ॥ ७ ॥ ॥ जामदग्न्येति ॥ १ ॥ अव्ययःअपचयशून्यः
॥ २ ॥ प्रभवत्यस्मादितिप्रभुर्जगतउपादानकारणंघटस्येवमृत्पिंडः ॥ ३ ॥

निमित्तमरणाइतिनाशवंतइत्यर्थः पाठांतरेनिमित्तकारणानिचर्कचीवरकुलालादिस्थानीयानि ॥ ४ ॥ ५ ॥ ६ ॥ तरुणाइति भोगकालेयुद्धेनमरणंमाप्नुवंतीत्यर्थः ॥ ७ ॥ ८ ॥ ९ ॥ बलंसैन्यं बलिनांओ
रसबलवतांबलंसामर्थ्यंनभवति ॥ १० ॥ मातलेरितिहासमितिसंबंधः ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ उच्छ्रितानांमहत्तयाख्यातानाम् ॥ १५ ॥ १६ ॥ चक्षुषाज्ञानेनविचितौअन्वेषितौ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

निमित्तमरणाश्चान्येचंद्रसूर्यौमहीजलम् ॥ वायुरग्निस्तथाकाशंग्रहास्तारागणास्तथा ॥ ४ ॥ तेचक्षयंतेजगतोहित्वालोकत्रयंसदा ॥ क्षयंगच्छंतिवैसर्वेस्रष्टव्यंते
चपुनःपुनः ॥ ५ ॥ मुहूर्तमरणास्त्वन्येमानुषामृगपक्षिणः ॥ तैर्यग्योन्यश्चयेचान्येजीवलोकचरास्तथा ॥ ६ ॥ भूयिष्ठंनतुराजानःश्रियंभुक्त्वायुषःक्षये ॥ तरुणाः
प्रतिपद्यंतेभोक्तुंसुकृतदुष्कृते ॥ ७ ॥ सभवान्धर्मपुत्रेणशमंकर्तुमिहार्हति ॥ पांडवाःकुरवश्चैवपालयंतुवसुंधराम् ॥ ८ ॥ बलवानहमित्येवनमंतव्यंसुयोधन ॥
बलवंतोबलिभ्योहिदृश्यंतेपुरुषर्षभ ॥ ९ ॥ नबलंबलिनांमध्येबलंभवतिकौरव ॥ बलवंतोहितेसर्वेपांडवादेवविक्रमाः ॥ १० ॥ अत्राप्युदाहरंतीममितिहासंपु
रातनम् ॥ मातलेर्दातुकामस्यकन्यांस्वयतोवरम् ॥ ११ ॥ मतस्त्रिलोकराजस्यमातलिर्नामसारथिः ॥ तस्यैकैवकुलेकन्यारूपतोलोकविश्रुता ॥ १२ ॥ गुणकेशा
तिविख्यातानाघ्रासादेवरूपिणी ॥ श्रियाचवपुषाचैवस्त्रियोन्याःसाऽतिरिच्यते ॥ १३ ॥ तस्याःप्रदानसमयंमातलिःसहभार्यया ॥ ज्ञात्वाविमन्युशेराजंस्तत्परः
परिचिंतयन् ॥ १४ ॥ धिक्खल्वलघुशीलानामुच्छ्रितानांयशस्विनाम् ॥ नराणांमृदुसत्वानांकुलेकन्याप्ररोहणम् ॥ १५ ॥ मातुःकुलंपितृकुलंयत्रचैवप्रदीयते ॥ कु
लत्रयंसंशयितंकुरुतेकन्यकासताम् ॥ १६ ॥ देवमानुषलोकौद्वौमानुषेणैवचक्षुषा ॥ अवगाह्यैवविचितौनचमेरोचतेवरः ॥ १७ ॥ ॥ कण्वउवाच ॥ ॥ नदेवा
न्नैवदितिजान्नगंधर्वान्नमानुषान् ॥ अरोचयद्वरंकृतेतथैववदुलानृषीन् ॥ १८ ॥ भार्ययानुसमंभ्यसहरात्रौसुधर्मया ॥ मातलिर्नागलोकायचकारगमनेम
तिम् ॥ १९ ॥ नमेदेवमनुष्येषुगुणकेश्याःसमोवरः ॥ रूपतोदृश्यतेकश्चिन्नागेषुभविताध्रुवम् ॥ २० ॥ इत्यामंत्र्यसुधर्मांसंकृत्वाचाभिप्रदक्षिणम् ॥ कन्यां
शिरस्युपाघ्रायप्रविवेशमहीतलम् ॥ २१ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिमातलिवरान्वेषणेसप्तनवतितमोऽध्यायः ॥ ९७ ॥ ॥ ७ ॥
कण्वउवाच ॥ ॥ मातलिस्तुव्रजन्मार्गेनारदेनमहर्षिणा ॥ वरुणंगच्छतादृष्टसमागच्छद्यदृच्छया ॥ १ ॥ नारदोथाब्रवीदेनंकभवान्गंतुमुद्यतः ॥ स्वेनवासू
तकार्येणशासनाद्वाशतक्रतोः ॥ २ ॥ मातलिर्नारदेनैवंसंपृष्टःपथिगच्छता ॥ यथावत्सर्वमाचष्टस्वकार्येनारदंप्रति ॥ ३ ॥ तमुवाचाथसमुनिर्गच्छावःसहितावि
ति ॥ सलिलेशंदिदृक्षार्थमहमप्युद्यतोदिवः ॥ ४ ॥ ॥ इतिउद्योगपर्व॰नैलकंठीयेभारतभावदीपेसप्तनवतितमोऽध्यायः ॥ ९७ ॥ ॥ ७ ॥ ॥ मातलिरिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ यंतुःयंतारंमातलिप्रति ॥ ९ ॥ १० ॥ गोपतेःवारिपतेः भूवाग्वारिपुगौर्मतेतिविश्वः ॥ ११ ॥ १२ ॥ द्वितीयांसोमपुत्री तयाअदित्याःपुत्रःसूर्यःश्रेष्ठःकृतःभर्ताकृतः ॥ १३ ॥ वारुण्यं वारुण्याःसुरायाःइदंवारुण्यं सुराविषयतेयेषांतेसुराः ॥ १४ ॥ १५ ॥ विवर्ततेप्रक्षिप्तान्यपिपुनःपुनःग्रहर्तुर्हस्तमायांति ॥ १६ ॥ जात्यःजातीयाः पूर्वदैवतानिपूर्वदेवाःदैत्याः सर्वेतिपाठेनिर्मिताःनिश्चयेनप्र क्षिप्ताः ॥ १७ ॥ अग्निरिति हविष्मताऽग्निना आविद्धंरुद्धं विष्णुचक्रजमप्यत्रभयंनास्तीत्यर्थः ॥ १८॥ गांडीखड्गाख्यःपशुविशेषः तस्यविकारोगांडीमयः तस्यहिपशूनांवापृष्ठवंशस्यधनुःकर्तुंशक्यं यतः

अहंतेसर्वमाख्यास्येदर्शयन्वसुधातलम्॥दृष्ट्वातत्रवरंकंचिद्रोचयिष्यसिमातले ॥ ५ ॥ अवगाह्यतुतौभूमिमुभौमातलिनारदौ ॥ ददृशातेमहात्मानौलोकपाल मपांपतिम्॥ ६ ॥ तत्रदेवर्षिसदृशींपूजांसप्रापनारदः॥ महेंद्रसदृशींचैवमातलिःप्रत्यपद्यत ॥ ७ ॥ तावुभौप्रीतमनसौकार्यवंतौनिवेद्यह ॥ वरुणेनाभ्यनुज्ञातौ नागलोकंविचेरतुः॥ ८ ॥ नारदःसर्वभूतानामंतर्भूमिनिवासिनाम् ॥ जानंश्चकारव्याख्यानंयंतुःसर्वमशेषतः॥ ९ ॥ ॥ नारदउवाच ॥ ॥ दृष्टस्तेवरुणःसूतपुत्र पौत्रसमाहृतः ॥ पश्योदकपतेःस्थानंसर्वतोभद्रमृद्धिमत् ॥ १० ॥ एषपुत्रोमहाप्रज्ञोवरुणस्येहगोपतेः ॥ एषवैशीलवत्तेनशौचेनचविशिष्यते ॥ ११ ॥ एषो स्यपुत्रोभिमतःपुष्करःपुष्करेक्षणः॥ रूपवान्दर्शनीयश्चसोमपुत्र्याहृतःपतिः॥ १२ ॥ ज्योत्स्नाकालीतियामाहुर्द्वितीयांरूपतःश्रियम्॥ अदित्याश्चैवयःपुत्रोज्ये ष्ठःश्रेष्ठःकृतःस्मृतः॥ १३ ॥ भवनंपश्यवारुण्ययंदेतत्सर्वकांचनम्॥ यत्राप्यसुरतांप्राप्ताःसुराःसुरपतेःसखे॥ १४ ॥ एतानिदृतराज्यानांदैतेयानांस्ममातले॥ दी प्यमानानिदृश्यंतेसर्वप्रहरणान्युत ॥ १५ ॥ अक्षयाणिकिलैतानिविवर्ततेस्ममातले॥ अनुभावप्रयुक्तानिसुरैरवजितानिह ॥ १६ ॥ अत्रराक्षसजात्यश्चदैत्य जात्यश्चमातले॥ दिव्यप्रहरणाश्चासन्पूर्वदैवतनिर्मिताः ॥ १७ ॥ अग्निरेषमहार्चिष्मान्जागर्तिवारुणेऋदे॥ वैष्णवंचक्रमाविद्धंविधूमेनहविष्मता ॥ १८ ॥ एषगांडीमयश्चापोलोकसंहारसंभृतः॥ रक्ष्यतेदैवतैर्नित्यंयतस्तद्धांडिवंधनुः ॥ १९ ॥ एषकृत्येसमुत्पन्नेतत्तद्वारयतेबलम्॥ सहस्रशतसंख्येनप्राणेनसततंधुवः ॥ २० ॥ अशास्यानपिशास्त्येषरक्षोबंधुपुराजसु ॥ सृष्टःप्रथमतश्चंडोब्रह्मणाब्रह्मवादिना॥ २१ ॥ एतच्छस्त्रंनरेंद्राणांमहच्चक्रेणभाषितम्॥ पुत्राःसलिलराज स्यधारयंतिमहोदयम्॥ २२ ॥

गांडीमयत्वादेवतत्गांडीवंनामधनुरभूत् गांडीशब्दाद्विकारार्थोवप्रत्ययःकल्प्यतइतिभावः गांडीवज्रयंथिस्तन्मयंइत्यन्ये ॥ १९ ॥ एषचापःकृत्येअभेद्यभेदने तत्तत्तावत्तावत्प्राणेनबलेन सर्वदालक्षचापतु ल्यबलोप्ययंचापःकार्यकालेऽधिकबलोपिभवतीत्यनंतबलइत्यर्थः ॥ २० ॥ रक्षोबंधुपुरक्षस्तुल्येषु ॥ २१ ॥ एतच्छस्त्रंधनुः चक्रेणचक्रादपि एतच्छास्त्रंनरेंद्राणांमहच्छुक्रेणभाषितमितिपाठेनीतिशास्त्रं शुक्रेणकाव्येन छत्रेणेतिवापाठः ॥ २२ ॥

॥ २३ ॥ मूर्छितंअभिभूतंआहतमितियावत् येनहेतुनाजनोस्यदर्शनंनार्छतिनप्राप्नोति ॥ २४ ॥ २५ ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभा०अष्टनवतितमोऽध्यायः॥ ९८ ॥ ॥ ७ ॥ ॥ एतदिति ॥ १ ॥ अद्भिःसमंप्राप्ताःजलवेगेनानीताः ॥ २ ॥ व्यापारेणयत्नेनधृतःमर्यादायांस्थापितः अन्यथासयःकृत्वासमुद्रंलोकांश्चदहेत् आत्मानंनिबद्धं देवैरितिशेषः समबुध्यतअग्निरित्यर्थः धृतात्मेतिसंधिरार्षः ॥ ३ ॥ निहितंस्थापितं अतःसोमस्येति कंदुकाकारंभूगोलंप्रदक्षिणीकुर्वतःसूर्यस्यसोमस्यवाकेनचिह्नभूगोलप्रदेशेनआवरणात्कदाचिददर्शनंभवति सैवतेषांरात्रिः येतुगोलस्यशिरसिअधस्ताच्चतिष्ठंतितेसर्वदै वसूर्यादीन्पश्यंति तत्रजलमयंचंद्रमंडलंसूर्यरश्मिभिस्तैजसैःप्रकाश्यते तयोश्चयथायथाविप्रकर्षःतथातथाऽधिकंचंद्रोऽवभासते यथायथासन्निकर्षःतथातथाधिकंसूर्यपुरोवर्तिभिरश्यादिभिर्दैवताभिस्ति

एतत्सलिलराजस्यच्छत्रंछत्रगृहेस्थितम्॥ सर्वतःसलिलंशीतंजीमूतइववर्षति॥ २३ ॥ एतच्छत्रात्परिभ्रष्टंसलिलंसोमनिर्मलम्॥ तमसामूर्छितंभातियेनना र्छतिदर्शनम्॥ २४ ॥ बहून्यद्भुतरूपाणिद्रष्टव्यानीहमातले॥ तवकार्यावरोधस्तुतस्माद्गच्छावमाचिरम्॥ २५ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्व्या नपर्वणिमातलिवरान्वेषणेऽष्टनवतितमोऽध्यायः॥ ९८ ॥ ॥ ७ ॥ ॥ नारदउवाच ॥ ॥ एतत्तुनागलोकस्यनाभिस्थानेस्थितंपुरम् ॥ पातालमितिविख्यातंदै त्यदानवसेवितम्॥ १ ॥ इदमद्भिःसमंप्राप्तायेकेचिद्बुविजंगमाः॥ प्रविशंतोमहानादंनदंतिभयपीडिताः॥ २ ॥ अत्रासुरोग्निःसततंदीप्यतेवारिभोजनः॥ व्या पारेणधृतात्मानंनिबद्धंसमबुध्यत ॥ ३ ॥ अत्रास्तंसुरैःपीत्वानिहतंनिहतारिभिः॥ अतःसोमस्यहानिश्चवृद्धिश्चैवप्रदृश्यते ॥ ४ ॥ अत्रादित्योहयशिराःकाले पर्वणिपर्वणि॥ उत्तिष्ठतिसुवर्णाख्यंवाग्भिरापूरयन्जगत् ॥ ५ ॥ यस्मादलंसमस्तास्तापतंतिजलमूर्तयः ॥ तस्मात्पातालमित्येवख्यातेपुरमुत्तमम्॥ ६ ॥ ऐरावणोस्मात्सलिलंगृहीत्वाजगतोहितः॥ मेघेष्वामुंचतेशीतंयन्महेंद्रःप्रवर्षति ॥ ७ ॥ अत्रनानाविधाकारास्तिमयोनैकरूपिणः ॥ अप्सुसोमप्रभांपीत्वावसं तिजलचारिणः॥ ८ ॥ अत्रसूर्यांशुभिर्भिन्नाःपातालतलमाश्रिताः ॥ मृताहिदिवसेसूतपुनर्जीवंतिवैनिशि ॥ ९ ॥ उदयन्नित्यशश्वात्रचंद्रमारश्मिवाहुभिः॥ अमृतंस्पृश्यसंस्पर्शात्संजीवयतिदेहिनः॥ १० ॥ अत्रतेधर्मनिरतावद्धाःकालेनपीडिताः॥ दैतेयानिवसंतिस्मवासवेनहृतश्रियः ॥ ११ ॥

रोधीयतेस्मदृष्ट्या एतदेवाभिलक्ष्यप्रथमांपिबतेवह्निर्द्वितीयांपिबतेरविरित्यादिशास्त्रंप्रवृत्तं पानंचेहसान्निध्यादाप्यायनमात्रं पातालनाभिस्थानांतुमेरुशिखरस्थानामिवसर्वदासंपूर्णएवचंद्रोवभासते तदृश्य प्रदेशेऽप्यावरणाभावात् अतःस्थानात्चंद्रस्यऋासदृद्धिप्रदृश्येतइतिविरुद्धलक्षणयानदृश्येतेइत्यर्थः नदृश्यतेइत्येवपाठोलेखकप्रमादाद्भ्रष्टोवा ॥ ४ ॥ आदित्योऽदितेःपुत्रोविष्णुर्हयग्रीवरूपीसुवर्णाख्यं जगत्वेदरूपीनामात्मकःप्रपंचः नामवाऋग्वेदइत्यादिश्रुतेः तंवाग्भिरापूरयन्उत्तिष्ठतिवेदाध्यायिनांध्वनिंउपबृंहयितुमाविर्भवतीत्यर्थः ॥ ५ ॥ जलमूर्तयश्चंद्राद्याःपतंतिचंद्रकांतवज्जलंस्रवंति अतोयंपत ज्जलइतिवक्तव्येपातालइत्यर्थः ॥ ६ ॥ ७ ॥ ८ ॥ प्रदेशांतरंगत्वाह अत्रसूर्यांशुभिरिति दिवसेऽस्मदीयरात्रौ निशिअस्मदीयदिवसे ॥ ९ ॥ १० ॥ ११ ॥

॥ १२ ॥ स्वाध्यायाध्यायोवेदपाठः ॥ १३ ॥ गोव्रतंयाचष्टे यत्रेति ॥ १४ ॥ १५ ॥ १६ ॥ आप्रजानांनिसर्गात्प्रजोत्पत्तिमारभ्य ॥ १७ ॥ जातिजन्म निसर्गस्वभावं ततःपूर्वमुत्पन्नस्यकस्यचिदभावात् ॥ १८ ॥ १९ ॥ २० ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभा०ऊनशततमोऽध्यायः ॥ ९९ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ हिरण्येति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

अत्रभूतपतिर्नामसर्वभूतमहेश्वरः॥ भूतयेसर्वभूतानामचरत्तपउत्तमम्॥११॥ अत्रगोव्रतिनोविप्राःस्वाध्यायाध्यायकर्शिताः॥ त्यक्तप्राणाजितस्वर्गानिवसंतिमहर्षयः॥ १३॥ यत्रतत्रशयोनित्यंयेनकेनचिदाशितः॥ येनकेनचिदाच्छन्नःसगोव्रतइहोच्यते ॥ १४॥ ऐरावणोनागराजोवामनःकुमुदोजनः॥ प्रसूताःसुप्रतीकस्यवंशेवारणसत्तमाः॥ १५॥ पश्यायत्रतेकश्चिद्रोचतेगुणतोवरः॥ वरयिष्यामितंगत्वायत्नमास्थायमातले॥ १६॥ अंडमेतज्जलेल्यस्तंदीप्यमानमिवश्रिया॥ आप्रजानांनिसर्गाद्वैनोद्विद्यतिनसर्पति॥ १७॥ नास्यजातिंनिसर्गंवाकथ्यमानंशृणोमिवै॥ पितरंमातरंचापिनास्यजानातिकश्चन॥ १८॥ अतःकिलमहानग्निरंतकालेसमुत्थितः॥ धक्ष्यतेमातलेसर्वंत्रैलोक्यंसचराचरम्॥ १९॥ मातलिस्त्वब्रवीच्छ्रुत्वानारदस्याथभाषितम्॥ नमेत्ररोचतेकश्चिदन्यतोव्रजमाचिरम्॥ २०॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिमातलिवरान्वेषणेऊनशततमोऽध्यायः॥ ९९ ॥ ॥ ७ ॥ ॥ नारदउवाच॥ हिरण्यपुरमित्येतत्ख्यातंपुरवरंमहत्॥ दैत्यानांदानवानांचमायाशतविचारिणाम्॥ १॥ अनल्पेनप्रयत्नेनमितंविश्वकर्मणा॥ मयेनमनसास्रष्टंपातालतलमाश्रितम्॥ २॥ अत्रमायासहस्राणिविकुर्वाणामहौजसः॥ दानवानिवसंतिस्मशूरादत्तवराःपुरा॥ ३॥ नैतेशक्रेणनान्येनयमेनवरुणेनवा॥ शक्यंतेवशमानेतुंतथैवधनदेनच॥ ४॥ असुराःकालखंजाश्चतथाविष्णुपदोद्भवाः॥ नैर्ऋतायातुधानाश्चब्रह्मपादोद्भवाश्चये॥ ५॥ दंष्ट्रिणोभीमवेगाश्चवातवेगपराक्रमाः॥ मायावीर्योपसंपन्नानिवसंत्यत्रमातले॥ ६॥ निवातकवचानामदानवायुद्धदुर्मदाः॥ जानासिचययथाशक्रोनैतान्शक्नोतिबाधितुम्॥ ७॥ यदुशोमातलेत्वंच तवपुत्रश्चगोमुखः॥ निर्भग्नोदेवराजश्चसहपुत्रःशचीपतिः॥ ८॥ पश्यवेश्मानिरौक्माणिमातलेराजतानिच॥ कर्मणाविधियुक्तेनयुक्तान्युपगतानिच॥ ९॥ वैदूर्यमणिचित्राणिप्रवालरुचिराणिच॥ अर्कस्फटिकशुभ्राणिवज्रसारोज्ज्वलानिच॥ १०॥ पार्थिवानीवचाभ्रांतिपद्मरागमयानिच॥ शैलानीवचदृश्यंतेदारवाणीवचाप्युत॥ ११॥ सूर्यरूपाणिचाभ्रांतिदीप्ताग्निसदृशानिच॥ मणिजालविचित्राणिप्रांशूनिनिबिडानिच॥ १२॥ नैतानिशक्यंनिर्देष्टुंरूपतोद्रव्यतस्तथा॥ गुणतश्चैवसिद्धानिप्रमाणगुणवंतिच॥ १३॥

शैलानिशिलामयानि॥ ११॥ १२॥ १३॥

॥ १०६ ॥

आक्रीडानक्रीडास्थानानि ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ आत्मानंअहिंसापरंजानामि हिंसात्मनांतथाहिंसात्मकमनंहिंसाप्रधानानांदैत्यानांकमनंअपेक्षणीयंचहिंसोदर्कतयाजानामि अन्येतु

आक्रीडान्यस्यदैत्यानांतथैवशयनान्युत॥ रत्नवंतिमहार्हाणिभाजनान्यासनानिच॥ १४॥ जलदाभांस्तथाशैलांस्तोयप्रस्रवणानिच॥ कामपुष्पफलांश्चापिपादपान्कामचारिणः॥ १५॥ मातलेकश्चिदत्रापिरुचिरस्तेवरोभवेत्॥ अथवान्यांदिशंभूमेर्गच्छावयदिमन्यसे॥ १६॥ मातलिस्त्वब्रवीदेनंभाषमाणंतथाविधम्॥ देवर्षेनैवमेकार्यंविप्रियंत्रिदिवौकसाम्॥ १७॥ नित्यानुषक्तवैराहिभ्रातरोदेवदानवाः॥ परपक्षेणसंबंधंरोचयिष्याम्यहंकथम्॥ १८॥ अन्यत्रसाधुगच्छावब्रूहुंनार्हामिदानवान्॥ जानामितवचात्मानंहिंसात्मकमनंतथा॥ १९॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिमातलिवरान्वेषणेशततमोऽध्यायः॥ १००॥ ॥ ७ ॥ ॥ नारदउवाच॥ अयंलोकःसुपर्णानांपक्षिणांपन्नगाशिनाम्॥ विक्रमेगमनेभारेनैषामस्तिपरिश्रमः॥ १॥ वैनतेयसुतैःसूतपक्षिस्तमिदंकुलम्॥ सुमुखेनसुनाम्नाचसुनेत्रेणसुवर्चसा॥ २॥ सुरुचापक्षिराजेनसुबलेनचमातले॥ वर्धितानिप्रसूत्यावैविनताकुलकर्त्रभिः॥ ३॥ पक्षिराजाभिजात्यानांसहस्राणिशतानिच॥ कश्यपस्यततोवंशेजातैर्भूतिविवर्धनैः॥ ४॥ सर्वेत्येतेश्रियायुक्ताःसर्वेश्रीवत्सलक्षणाः॥ सर्वेश्रियमभीप्संतोधारयंतिबलान्युत॥ ५॥ कर्मणाक्षत्रियाश्चैतेनिर्घृणाभोगिभोजिनः॥ ज्ञातिसंक्षयकर्तृत्वाद्ब्राह्मण्यंनलभंतिवै॥ ६॥ नामानिचैषांवक्ष्यामियथाप्राधान्यतःशृणु॥ मातलेश्लाघ्यमेतद्धिकुलंविष्णुपरिग्रहं॥ ७॥ दैवतंविष्णुरेतेषांविष्णुरेवपरायणम्॥ तद्धिचैषांसदाविष्णुर्विष्णुरेवसदागतिः॥ ८॥ सुवर्णचूडोनागाशीदारुणश्चंडतुंडकः॥ अनिलश्चानलश्चैवविशालाक्षोथकुंडली॥ ९॥ पंकजिद्वज्रविष्कंभोवैनतेयोथवामनः॥ वातवेगोदिशाचक्षुर्निमेषोऽनिमिषस्तथा॥ १०॥ त्रिरावःशरावश्चवाल्मीकिर्दीपकस्तथा॥ दैत्यद्वीपःसरिद्वीपःसारसःपद्मकेतनः॥ ११॥ सुमुखश्चित्रकेतुश्चचित्रबर्हस्तथानघः॥ मेघस्तत्कुमुदोदक्षःसर्पांतःसोमभोजनः॥ १२॥ गुरुभारःकपोतश्चसूर्यनेत्रश्चिरांतकः॥ विष्णुधर्माकुमारश्चपरिबर्होहरिस्तथा॥ १३॥ सुस्वरोमधुपर्कश्चहेमवर्णस्तथैवच॥ मालयोमातरिश्वाचनिशाकरदिवाकरौ॥ १४॥ एतेप्रदेशमात्रेणमयोक्तागरुडात्मजाः॥ प्राधान्यतस्तेयशसाकीर्तिताःप्राणिनश्चये॥ १५॥

दित्यात्मकमलंतथेतिपाठंप्रकल्प्यदित्यात्मकंदानेच्छाप्रचुरंअलंअत्यर्थंइतिव्याचक्षते ॥ १९ ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभा०शततमोऽध्यायः ॥ १०० ॥ ॥ ७ ॥ ॥ अयमिति ॥ १ ॥ २ ॥ प्रसत्त्याप्रकृष्टगत्या जवेनवद्भिमंतीत्यर्थः ॥ ३ ॥ ४ ॥ ५ ॥ निर्घृणाःनिर्दयाः ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

॥ १६ ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभा०एकाधिकशततमोऽध्यायः ॥ १०१ ॥ ॥ ७ ॥ ॥ इदंरसातलमिति ॥ १ ॥ २ ॥ वदनात्मुखाद्उदतिष्ठत् तेनमुखजेनब्राह्मणेनतस्याएककुलत्वं य
थोक्तं ब्राह्मणाश्चैवगावश्चकुलमेकंद्विधाकृतमिति ॥ ३ ॥ ४ ॥ फेनेनपुष्पितस्येवश्वेतस्यास्यपर्यंतंतीरप्रदेशंफेनेनैवानुवेष्टितंपिबंतःसादरमवलोकयंतएववसंतितेनैवफेनपाइत्युच्यंते ॥ ५ ॥ एतेभ्योऽन्येफे

यद्यत्रनरुचिःकाचिदेहिगच्छावमातले ॥ तंनयिष्यामिदेशंत्वांवरंयत्रोपलप्स्यसे ॥ १६ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिमातलिवरान्वे
षणेएकाधिकशततमोऽध्यायः ॥ १०१ ॥ ॥ ७ ॥ ॥ नारदउवाच ॥ ॥ इदंरसातलंनामसमंसर्वपृथिवीतलम् ॥ यत्रास्तेसुरभिर्मातागवाममृतसंभवा ॥ १ ॥ क्ष
रंतीसततंक्षीरंपृथिवीसारसंभवम् ॥ षण्णांरसानांसारेणरसमेकमनुत्तमम् ॥ २ ॥ अमृतेनाभितृप्तस्यसारमुद्गिरतःपुरा ॥ पितामहस्यवदनादुदतिष्ठद्दिनिदिता ॥ ३ ॥
यस्याःक्षीरस्यधारायानिपतंत्यामहीतले ॥ ह्रदःकृतःक्षीरनिधिःपवित्रंपरमुच्यते ॥ ४ ॥ पुष्पितस्येवफेनेनपर्यंतमनुवेष्टितम् ॥ पिबंतोनिवसंत्यत्रफेनपामुनिसत्त
माः ॥ ५ ॥ फेनपानामतेख्याताःफेनाहाराश्चमातले ॥ उग्रेतपसिवर्तंतेयेषांबिभ्यतिदेवताः ॥ ६ ॥ अस्याश्चतस्रोधेन्वान्योदिक्षुसर्वासुमातले ॥ निवसंतिदिशां
पाल्योधारयंत्योदिशःस्मताः ॥ ७ ॥ पूर्वांदिशंधारयतेसुरूपानामसौरभी ॥ दक्षिणांहंसिकानामधारयत्यपरांदिशम् ॥ ८ ॥ पश्चिमावारुणीदिक्धार्यतेवैसुभद्र
या ॥ महानुभावयानित्यंमातलेविश्वरूपया ॥ ९ ॥ सर्वकामदुघानामधेनुर्धारयतेदिशम् ॥ उत्तरांमातलेधर्म्यांतथैलविलसंज्ञिताम् ॥ १० ॥ आसांतुपयसामि
श्रंपयोनिर्मथ्यसागरे ॥ मंथानंमंदरंकृत्वादेवैरसुरसंहितैः ॥ ११ ॥ उद्धृतावारुणीलक्ष्मीरमृतंचापिमातले ॥ उच्चैःश्रवाश्चाश्वराजोमणिरत्नंचकौस्तुभम् ॥ १२ ॥
सुधाहारेषुचसुधांस्वधाभोजिषुचस्वधाम् ॥ अमृतंचामृताशेषुसुरभीक्षरतेपयः ॥ १३ ॥ अत्रगाथापुरागीतारसातलनिवासिभिः ॥ पौराणीश्रूयतेलोकेगीयते
यामनीषिभिः ॥ १४ ॥ ननागलोकेनस्वर्गेनविमानेत्रिविष्टपे ॥ परिवासःसुखस्तादृग्रसातलतलेयथा ॥ १५ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यान
पर्वणिमातलिवरान्वेषणेद्व्यधिकशततमोऽध्यायः ॥ १०२ ॥ ॥ ७ ॥ ॥ नारदउवाच ॥ ॥ इयंभोगवतीनामपुरीवासुकिपालिता ॥ यादृशीदेवराजस्यपु
रीवर्यामरावती ॥ १ ॥ एषशेषःस्थितोनागोयेनेयंधार्यतेसदा ॥ तपसालोकमुख्येनप्रभावसहितामही ॥ २ ॥

नाहाराश्चेत्यर्थः ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ इलविलस्येमांऐलविलसंज्ञिताम् ॥ १० ॥ असुरसंहितैःअसुरसहितैः ॥ ११ ॥ १२ ॥ सुधेति सर्पपितृदेवानांतत्तद्योग्याहाररूपंपयःक्षरतीत्यर्थः सुधासर्पस्यभोज
नं स्वधाभोजिनःपितरः अमृताशेषुदेवेषु ॥ १३ ॥ १४ ॥ परिवासःनिवासः सुखःसुखकरः ॥ १५ ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभा०द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥ ॥ ७ ॥ ॥ इयमिति ॥ १ ॥ २ ॥

॥ ३ ॥ ४ ॥ कमंडलुकलक्षणाःपानपात्रसदृशचिह्नाः ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ ॥ इ०उ०नै०भा०द्व्यधिकशततमो

श्वेताचलनिभाकारोदिव्याभरणभूषितः ॥ सहस्रंधारयन्मूर्ध्नाज्वालाजिह्वोमहाबलः ॥ ३ ॥ इहनानाविधाकारानानाविधविभूषणाः ॥ सुरसायाःसुतानागानि
वसंतिगतव्यथाः ॥ ४ ॥ मणिस्वस्तिकचक्रांकाःकमंडलुकलक्षणाः ॥ सहस्रसंख्याबलिनःसर्वेरौद्राःस्वभावतः ॥ ५ ॥ सहस्रशिरसःकेचित्कचित्पंचशताननाः ॥
शतशीर्षास्तथाकेचित्केचित्त्रिशिरसोपिच ॥ ६ ॥ द्विपंचशिरसःकेचित्केचित्सप्तमुखास्तथा ॥ महाभोगामहाकायाःपर्वताभोगभोगिनः ॥ ७ ॥ बहूनीहसह
स्राणिप्रयुतान्यर्बुदानिच ॥ नागानामेकवंशानांयथाश्रोतुमेशृणु ॥ ८ ॥ वासुकिस्तक्षकश्चैवककोटकधनंजयौ ॥ कालीयोनहुषश्चैवकंबलाश्वतरावुभौ
॥ ९ ॥ वात्यकुंडोमणिर्नागस्तथैवापूरणःखगः ॥ वामनश्चैलपत्रश्चकुकुरःकुकुणस्तथा ॥ १० ॥ आर्यकोनंदकश्चैवतथाकलशपोतकौ ॥ कैलासकःपिंजरकोना
गश्चैरावतस्तथा ॥ ११ ॥ सुमनोमुखोदधिमुखःशंखोनंदोपनंदकौ ॥ आप्तःकोटरकश्चैवशिखीनिष्ठूरिकस्तथा ॥ १२ ॥ तित्तिरिर्हस्तिभद्रश्चकुमुदोमाल्यपिंड
कः ॥ द्वौपद्मौपुंडरीकश्चपुष्पोमुद्गरपर्णकः ॥ १३ ॥ करवीरःपीठरकःसंवर्त्तोवर्त्तएवच ॥ पिंडारोबिल्वपत्रश्चमूषिकादःशिरीषकः ॥ १४ ॥ दिलीपःशंखशीर्षश्च
ज्योतिष्कोथापराजितः ॥ कौरव्योधृतराष्ट्रश्चकुद्दुरःकृशकस्तथा ॥ १५ ॥ विरजाधारणश्चैवसुबाहुर्मुखरोजयः ॥ बधिरांधौविशुंडिश्चविरसःसुरसस्तथा ॥ १६ ॥
एतेचान्येचबहवःकश्यपस्यात्मजाःस्मृताः ॥ मातलेपश्ययत्रकश्चित्तेरोचतेवरः ॥ १७ ॥ ॥ कण्वउवाच ॥ ॥ मातलिस्त्वेकमव्यग्रःसततंसंनिरीक्ष्यवै ॥ पप्रच्छ
नारदंतत्रप्रीतिमानिवचाभवत् ॥ १८ ॥ ॥ मातलिरुवाच ॥ ॥ स्थितोयएषपुरतःकौरव्यस्यार्यकस्यतु ॥ द्युतिमान्दर्शनीयश्चकस्यैषकुलनंदनः ॥ १९ ॥ कःपि
ताजननीचास्यकतमस्यैषभोगिनः ॥ वंशस्यकस्यैषमहान्केतुभूतइवस्थितः ॥ २० ॥ प्रणिधानेनधैर्येणरूपेणवयसाचमे ॥ मनःप्रविष्टोदेवर्षेगुणकेश्याःपति
र्वरः ॥ २१ ॥ ॥ कण्वउवाच ॥ ॥ मातलिंप्रीतमनसंदृष्ट्वासुमुखदर्शनात् ॥ निवेदयामासतदामाहात्म्यंजन्मकर्मच ॥ २२ ॥ ॥ नारदउवाच ॥ ॥ ऐरावतकुले
जातःसुमुखोनामनागराट् ॥ आर्यकस्यमतःपौत्रोदौहित्रोवामनस्यच ॥ २३ ॥ एतस्यहिपितानागश्चिकुरोनाममातले ॥ नचिराद्वैनतेयेनपंचत्वमुपपादितः
॥ २४ ॥ ततोब्रवीत्प्रीतमनामातलिर्नारदंवचः ॥ एषमेरुचितस्तातजामाताभुजगोत्तमः ॥ २५ ॥ क्रियतामत्रयत्नोवैप्रीतिमानस्म्यनेनवै ॥ अस्मैनागायवै
दातुंप्रियांदुहितरंमुने ॥ २६ ॥ इतिश्रीम०उद्योगपर्वणिभगवद्यानपर्वणिमातलिवरान्वेषणेऽध्यधिकशततमोऽध्यायः ॥ १०३ ॥ ॥ ७ ॥ ऽध्यायः ॥ १०३ ॥ ॥ ७ ॥

सूतइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

नारदउवाच ॥ ॥ सूतोयंमातलिर्नामशक्रस्यदयितःसुहृत् ॥ शुचिःशीलगुणोपेतस्तेजस्वीवीर्यवान्बली ॥ १ ॥ शक्रस्यायंसखाचैवमंत्रीसारथिरेवच ॥ अल्पांतरप्रभावश्चवासवेनरणेरणे ॥ २ ॥ अयंहरिसहस्रेणयुक्तंजैत्रंरथोत्तमम् ॥ देवासुरेषुयुद्धेषुमनसैवनियच्छति ॥ ३ ॥ अनेनविजितान्श्चैर्दोर्भ्यांजयतिवासवः ॥ अनेनबलभित्पूर्वंप्रहृतेप्रहरत्युत ॥ ४ ॥ अस्यकन्यावरारोहारूपेणासदृशीभुवि ॥ सत्यशीलगुणोपेतागुणकेशीतिविश्रुता ॥ ५ ॥ तस्यास्ययत्नाच्चरतस्त्रैलोक्यममरद्युते ॥ सुमुखोभवतःपौत्रारोचतेदुहितुःपतिः ॥ ६ ॥ यदितेरोचतेसम्यग्भुजगोत्तममाचिरम् ॥ क्रियतामार्यकक्षिप्रंबुद्धिःकन्यापरिग्रहे ॥ ७ ॥ यथाविष्णुकुलेलक्ष्मीर्यथास्वाहाविभावसोः ॥ कुलेतवतथैवास्तुगुणकेशीसुमध्यमा ॥ ८ ॥ पौत्रस्यार्थेभवांस्तस्माद्गुणकेशींप्रतीच्छतु ॥ सदृशींप्रतिरूपस्यवासवस्यशचीमिव ॥ ९ ॥ पितृहीनमपित्र्येनंगुणतोवरयामहे ॥ बहुमानाच्चभवतस्तथैवैरावतस्यच ॥ १० ॥ सुमुखश्चगुणैश्चैवशीलशौचदमादिभिः ॥ अभिगम्यस्वयंकन्यामयंदातुंसमुद्यतः ॥ ११ ॥ मातलिस्तस्यसंमानंकर्तुमर्होभवानपि ॥ ॥ कण्वउवाच ॥ ॥ सतुदीनःप्रहृष्टश्चप्राहनारदमार्यकः ॥ १२ ॥ ब्रियमाणेतथापौत्रेपुत्रेच निधनंगते ॥ कथमिच्छामिदेवर्षेगुणकेशींसुषांप्रति ॥ १३ ॥ ॥ आर्यकउवाच ॥ ॥ नमेनैतद्बहुमतंमहर्षेवचनंतव ॥ सखाशक्रस्यसंयुक्तःकस्यायंनेप्सितो भवेत् ॥ १४ ॥ कारणस्यतुदौर्बल्याच्चिंतयामिमहामुने ॥ अस्यदेहकरस्तातममपुत्रोमहाद्युते ॥ १५ ॥ भक्षितोवैनतेयेनदुःखार्तास्तेनवैवयम् ॥ पुनरेवचतेनोक्तंवैनतेयेनगच्छता ॥ मासेनान्येनसुमुखंभक्षयिष्यइतिप्रभो ॥ १६ ॥ ध्रुवंतथातद्भविताजानीमस्तस्यनिश्चयम् ॥ तेनहर्षःप्रनष्टोमेसुपर्णवचनेनवै ॥ १७ ॥ कण्वउवाच ॥ मातलिस्त्वब्रवीदेनंबुद्धिरत्रकृतामया ॥ जामात्रभावेनवृतःसुमुखस्तवपुत्रजः ॥ १८ ॥ सोयंमयाचसहितोनारदेनचपन्नगः ॥ त्रिलोकेशंसुरपतिंगत्वापश्यतुवासवम् ॥ १९ ॥ शेषणैवास्यकार्येणप्रज्ञास्याम्यहमायुषः ॥ सुपर्णस्यविघातेचप्रयतिष्यामिसत्तम ॥ २० ॥ सुमुखश्चमयासार्धंदेवेशमभिगच्छतु ॥ कार्यसंसाधनार्थायस्वस्तितेस्तुभुजंगम ॥ २१ ॥ ततस्तेसुमुखंगृह्यसर्वएवमहौजसः ॥ ददृशुःशक्रमासीनंदेवराजंमहाद्युतिम् ॥ २२ ॥ संगत्यातत्रभगवान्विष्णुरासीच्चतुर्भुजः ॥ ततस्तत्सर्वमाचख्यौनारदोमातलिंप्रति ॥ २३ ॥ ॥ वैशंपायनउवाच ॥ ॥ ततःपुरंदरंविष्णुरुवाचभुवनेश्वरम् ॥ अमृतंदीयतामस्मैक्रियताममरैःसमः ॥ २४ ॥ मातलिर्नारदश्चैवसुमुखश्चैववासव ॥ लभंतांभवतःकामात्काममेतंयथेप्सितम् ॥ २५ ॥

॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ॥ इतिउद्योगप० नैलकंठीयेभारतभावदीपेचतुरधिकशततमोऽध्यायः ॥ १०४ ॥ ॥ ५ ॥ ॥ गरुडइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

पुरंदरोथसंचिंत्यवैनतेयपराक्रमम् ॥ विष्णुमेवाब्रवीदेनंभवानेवददात्विति ॥ २६ ॥ ॥ विष्णुरुवाच ॥ ॥ ईशस्त्वंसर्वलोकानांचराणामचराश्चये ॥ त्वयादत्तमदत्तंकःकर्तुमुत्सहतेविभो ॥ २७ ॥ प्रादाच्छक्रस्ततस्तस्मैपन्नगायायुरुत्तमम् ॥ नत्वेनममृतप्राशंचकारबलदत्रहा ॥ २८ ॥ लब्ध्वावरंतुसुमुखःसुमुखःसंबभूवह ॥ कृतदारोयथाकामंजगामचगृहान्प्रति ॥ २९ ॥ नारदस्त्वार्यकश्चैवकृतकार्यौमुदायुतौ ॥ अभिजग्मतुरभ्यर्च्यदेवराजंमहाद्युतिं ॥ ३० ॥ ॥ इतिश्रीम० उद्योगपर्वणिभगवद्यानपर्वणिमातलिवरान्वेषणेचतुरधिकशततमोऽध्यायः ॥ १०४ ॥ ॥ ५ ॥ ॥ कण्वउवाच ॥ ॥ गरुडस्तत्रशुश्रावयथावृत्तंमहाबलः ॥ आयुःप्रदानंशक्रेणकृतंनागस्यभारत ॥ १ ॥ पक्षवातेनमहतारुद्धाभ्रिभुवनंखगः ॥ सुपर्णःपरमक्रुद्धोवासवंसमुपाद्रवत् ॥ २ ॥ ॥ गरुडउवाच ॥ ॥ भगवन्किमवज्ञानाद्दत्तिःप्रतिहतामम ॥ कामकारवरंदत्वापुनश्चलितवानसि ॥ ३ ॥ निसर्गात्सर्वभूतानांसर्वभूतेश्वरेणमे ॥ आहारोविहितोधात्राकिमर्थंवार्यतेत्वया ॥ ४ ॥ वृतश्चैषमहानागःस्थापितःसमयश्चमे ॥ अनेनचमयादेवभर्तव्यःप्रसवोमहान् ॥ ५ ॥ एतस्मिंस्तुतथाभूतेनान्यंहिंसितुमुत्सहे ॥ क्रीडसेकामकारेणदेवराजयथेच्छकम् ॥ ६ ॥ सोहंप्राणान्विमोक्ष्यामितथापरिजनोमम ॥ येचभृत्याममगृहेप्रीतिमान्भववासव ॥ ७ ॥ एतच्चैवाहमर्हामिभूयश्चबलवृत्रहन् ॥ त्रैलोक्यस्येश्वरोयोहंपरभृत्यत्वमागतः ॥ ८ ॥ त्वयितिष्ठतिदेवेशनविष्णुःकारणंमम ॥ त्रैलोक्यराजराज्यंहित्वयिवासवशाश्वतम् ॥ ९ ॥ ममापिदक्षस्यसुताजननीकश्यपःपिता ॥ अहमप्युत्सहेलोकान्समंताद्दोदुमंजसा ॥ १० ॥ असत्यंसर्वभूतानांममापिविपुलंबलम् ॥ मयापिसुमहत्कर्मकृतंदैतेयविग्रहे ॥ ११ ॥ श्रुतश्रीःश्रुतसेनश्चविवस्वान्त्रोचनामुखः ॥ प्रसृतःकालकाक्षश्चमयापिदितिजाहताः ॥ १२ ॥ यत्तुध्वजस्थानगतोयत्नात्परिचराम्यहम् ॥ वहामिचैवानुजंतेतेनमामवमन्यसे ॥ १३ ॥ कोन्योभारसहोत्यस्तिकोन्योस्तिबलवत्तरः ॥ मयायोहंविशिष्टःसन्वहामीमंसबांधवम् ॥ १४ ॥ अवज्ञायतुयत्तेहंभोजनाद्यपरोपितः ॥ तेनमेगौरवंनष्टंत्वत्तश्चास्माच्चवासव ॥ १५ ॥ अदित्यांयइमेजाताबलविक्रमशालिनः ॥ त्वमेषांकिलसर्वेषांबलेनबलवत्तरः ॥ १६ ॥ सोहंपक्षैकदेशेनवहामित्वांगतक्लमः ॥ विमृशत्वंशनैस्तातकोन्वत्रबलवानिति ॥ १७ ॥ ॥ कण्वउवाच ॥ ॥ सतस्यवचनंश्रुत्वाखगस्योदर्कदारुणम् ॥ अक्षोभ्यंक्षोभयंस्तार्क्ष्यमुवाचरथचक्रभृत् ॥ १८ ॥ गरुत्मन्मन्यसेत्मानंबलवंतंसुदुर्बलम् ॥ अलमस्मत्समक्षंतेस्तोतुमात्मानमंडज ॥ १९ ॥

॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥

॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ॥ इतिउद्योगप० नैलकंठीयेभारत

त्रैलोक्यमपिमेकृत्स्नमशक्तंदेहधारणे ॥ अहमेवात्मनात्मानंवहामित्वांचधारये ॥ २० ॥ इमंतावन्ममैकंत्वंबाहुंसव्येतरंवह ॥ यद्येनंधारयस्येकंसफलंतेविकत्थितम् ॥ २१ ॥ ततःसभगवांस्तस्यस्कंधेबाहुंसमासजत् ॥ निपपातसभारार्तोविह्वलोनष्टचेतनः ॥ २२ ॥ यावान्हिभारःकृत्स्नायाःपृथिव्याःपर्वतैःसह ॥ एकस्यादेहशाखायास्तावद्भारममन्यत ॥ २३ ॥ नत्वेनंपीडयामासबलेनबलवत्तरः ॥ ततोहिजीवितंतस्यनव्यनीनशदच्युतः ॥ २४ ॥ व्यात्तास्यःस्रस्तकायश्चविचेताविह्वलःखगः ॥ मुमोचपत्राणितदागुरुभारप्रपीडितः ॥ २५ ॥ सविष्णुंशिरसापक्षीप्रणम्यविनतासुतः ॥ विचेताविह्वलोदीनःकिंचिद्वचनमब्रवीत् ॥ २६ ॥ भगवन्लोकसारस्यसदृशेनवपुष्मता ॥ भुजेनस्वैरमुक्तेननिष्पिष्टोस्मिमहीतले ॥ २७ ॥ क्षंतुमर्हसिमेदेवविह्वलस्याल्पचेतसः ॥ बलदाहविदग्धस्यपक्षिणोध्वजवासिनः ॥ २८ ॥ नहिज्ञातंबलंदेवमयातेपरमंविभो ॥ तेनमन्याम्यहंवीर्यमात्मनोनसमंपरैः ॥ २९ ॥ ततश्चक्रेसभगवान्प्रसादंवैगरुत्मतः ॥ मैवंभूयइतिस्नेहात्तदाचैनमुवाचह ॥ ३० ॥ पादांगुष्ठेनचिक्षेपसुमुखंगरुडोरसि ॥ ततःप्रभृतिराजेंद्रसहसर्पेणवर्तते ॥ ३१ ॥ एवंविष्णुबलाक्रांतोगर्वनाशमुपागतः ॥ गरुडोबलवान्राजन्वैनतेयोमहायशाः ॥ ३२ ॥ ॥ कण्वउवाच ॥ ॥ तथात्वमपिगांधारेयावत्पांडुसुतान्रणे ॥ नासादयसितान्वीरांस्तावज्जीवसिपुत्रक ॥ ३३ ॥ भीमःप्रहरतांश्रेष्ठोवायुपुत्रोमहाबलः ॥ धनंजयश्चेंद्रसुतोनहन्यातांतुकंरणे ॥ ३४ ॥ विष्णुर्वायुश्चशक्रश्चधर्मस्तौचाश्विनावुभौ ॥ एतेदेवास्त्वयाकेनहेतुनावीक्षितुंक्षमाः ॥ ३५ ॥ तदलंतेविरोधेनशमंगच्छनृपात्मज ॥ वासुदेवेनतीर्थेनकुलंरक्षितुमर्हसि ॥ ३६ ॥ प्रत्यक्षदर्शीसर्वस्यनारदोयंमहातपाः ॥ माहात्म्यस्यतदाविष्णोःसोयंचक्रगदाधरः ॥ ३७ ॥ ॥ वैशंपायनउवाच ॥ ॥ दुर्योधनस्तुतच्छ्रुत्वानिःश्वसन्भ्रुकुटीमुखः ॥ राधेयमभिसंप्रेक्ष्यजहासस्वनवत्तदा ॥ ३८ ॥ कदर्थीकृत्यतद्वाक्यमृषेःकण्वस्यदुर्मतिः ॥ ऊरुंगजकराकारंताडयन्निदमब्रवीत् ॥ ३९ ॥ यथैवेश्वरसृष्टोस्मियद्भावियाचमेगतिः ॥ तथामहर्षेवर्तामिकिंप्रलापःकरिष्यति ॥ ४० ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिमातलिवरान्वेषणेपंचाधिकशततमोऽध्यायः ॥ १०५ ॥ ॥ ७ ॥ ॥ जनमेजयउवाच ॥ अनर्थेजातनिर्बंधंपरार्थेलोभमोहितं ॥ अनार्यकेष्वभिरतंमरणेकृतनिश्चयं ॥ १ ॥ ज्ञातीनांदुःखकर्तारंबंधूनांशोकवर्धनं ॥ सुहृदांक्लेशदातारंद्विषतांहर्षवर्धनं ॥ २

भावदीपेपंचाधिकशततमोऽध्यायः ॥ १०५ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ अनर्थेइति परार्थेपरस्वनिमित्तम् ॥ १ ॥ २ ॥

भगवान्पितामहोव्यासोनतुभीष्मः उत्तरेतस्यपृथगुपादानात् उक्तमित्यस्यावृत्तिदर्शनाच्च ॥ ३ ॥ ४ ॥ सुहृत्प्रत्युपकारमनपेक्ष्यउपकर्तामादृशःतदीयवाक्यस्यश्रोतासुहृच्छ्रोता मूढोयंहितमप्युक्तंनश्रोष्यतीतिभावः तिष्ठतेस्थिरोभवति यत्रमहासंकटे तत्रबंधुःउपकारमपेक्ष्योपकर्ताकर्णादिःनतिष्ठतेनप्रकाशते प्रकाशनस्थेयाख्ययोश्चेत्युभयत्रतङ् बंधुतोपिसुहृद्वचःश्रेयस्करमित्यर्थः ॥ ५ ॥ श्रोतव्यंश्रोतुंयुक्तं

कथंनैनंविमार्गस्थंवारयंतीहबांधवाः ॥ सौहृदाद्वासुहृत्स्निग्धोभगवान्वापितामहः ॥ ३ ॥ ॥ वैशंपायनउवाच ॥ ॥ उक्तंभगवतावाक्यमुक्तंभीष्मेणयत्क्षमम् ॥ उक्तंबहुविधंचैवनारदेनापितच्छृणु ॥ ४ ॥ ॥ नारदउवाच ॥ ॥ दुर्लभोवैसुहृच्छ्रोतादुर्लभश्चहितःसुहृत् ॥ तिष्ठतेहिसुहृद्यत्रनबंधुस्तत्रतिष्ठते ॥ ५ ॥ श्रोतव्यमपिपश्यामिसुहृदांकुरुनंदन ॥ नकर्तव्यश्चनिर्बंधोनिर्बंधोहिसुदारुणः ॥ ६ ॥ अत्राप्युदाहरंतीममितिहासंपुरातनम् ॥ यथानिर्बंधतःप्राप्तोगालवेनपराजयः ॥ ७ ॥ विश्वामित्रंतपस्यंतंधर्मोजिज्ञासयापुरा ॥ अभ्यगच्छत्स्वयंभूत्वावसिष्ठोभगवानृषिः ॥ ८ ॥ सप्तर्षीणामन्यतमंवेषमास्थायभारत ॥ बुभुक्षुःक्षुधितोराजन्नाश्रमंकौशिकस्यतु ॥ ९ ॥ विश्वामित्रोथसंभ्रांतःश्रपयामासवैचरुम् ॥ परमान्नस्ययत्नेननचतंप्रत्यपालयत् ॥ १० ॥ अन्नंतेनयदाभुक्तमन्यैर्दत्तंतपस्विभिः ॥ अथगृह्यान्नमत्युष्णंविश्वामित्रोप्युपागमत् ॥ ११ ॥ भुक्तंमेतिष्ठतावत्त्वमित्युक्त्वाभगवान्ययौ ॥ विश्वामित्रस्ततोराजन्स्थितएवमहाद्युतिः ॥ १२ ॥ भक्तंप्रगृह्यमूर्ध्नावैबाहुभ्यांसंशितव्रतः ॥ स्थितःस्थाणुरिवाभ्याशेनिश्चेष्टोमारुताशनः ॥ १३ ॥ तस्यशुश्रूषणेयत्नमकरोद्गालवोमुनिः ॥ गौरवाद्बहुमानाच्चहार्देनप्रियकाम्यया ॥ १४ ॥ अथवर्षशतेपूर्णेधर्मःपुनरुपागमत् ॥ वासिष्ठंवेषमास्थायकौशिकंभोजनेप्सया ॥ १५ ॥ सदृष्ट्वाशिरसाभक्तंध्रियमाणंमहर्षिणा ॥ तिष्ठतावायुभक्षेणविश्वामित्रेणधीमता ॥ १६ ॥ प्रतिगृह्यततोधर्मस्तथैवोष्णंतथानवम् ॥ भुक्त्वाप्रीतोस्मिविप्रर्षेतमुक्त्वासमुनिर्गतः ॥ १७ ॥ क्षत्रभावादपगतोब्राह्मणत्वमुपागतः ॥ धर्मस्यवचनात्प्रीतोविश्वामित्रस्तथाभवत् ॥ १८ ॥ विश्वामित्रस्तुशिष्यस्यगालवस्यतपस्विनः ॥ शुश्रूषयाचभक्त्याचप्रीतिमानित्युवाचह ॥ १९ ॥ अनुज्ञातोमयावत्सयथेष्टंगच्छगालव ॥ इत्युक्तःप्रत्युवाचेदंगालवोमुनिसत्तमम् ॥ २० ॥ प्रीतोमधुरयावाचाविश्वामित्रंमहाद्युतिम् ॥ दक्षिणाःकाःप्रयच्छामिभवतेगुरुकर्मणि ॥ २१ ॥

निर्बंधःसत्यपिबलवद्बाधकेतत्रैवाग्रहः सुदारुणोनाशकारी ॥ ६ ॥ ७ ॥ वसिष्ठमूर्त्याधर्मोभ्यागच्छत् ॥ ८ ॥ ९ ॥ नप्रत्यपालयत्अन्नसिद्धिपर्यंतंनप्रतीक्षितवान् ॥ १० ॥ तेनवसिष्ठेन उपागमत्वसिष्ठसमीपम् ॥ ११ ॥ १२ ॥ मूर्ध्नाबाहुभ्यांचपरिगृह्य अभ्याशेसमीपेआश्रमस्य ॥ १३ ॥ गौरवात्गुरुत्वात् बहुमानात्लोकपूज्यत्वात् हार्देनप्रीत्या ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ शुश्रूषयासेवया भक्त्याआराध्यत्वज्ञानेन ॥ १९ ॥ २० ॥ गुरुकर्मणिब्रह्मचर्यव्रतसमाप्तौसत्याम् ॥ २१ ॥

मानवमिनिपाठेसिध्यतिसिद्धंकृतकृत्यंकरोतीत्यर्थः एतदेवाह दक्षिणानामिति अपवर्गेणफलप्राप्या ॥ २२ ॥ क्रतुफलंदक्षिणाप्रदएवप्राप्नोति इतोयज्ञस्त्वदक्षिणइतिस्मृतेरदक्षिणस्यक्रतोर्हेतत्वेनाफलत्वात् शांतिःसर्वोपद्रवहारिणी उच्यतेवेदेन दक्षिणाकर्मकृणुतेविजानन्निति ॥ २३ ॥ जानानःशुश्रूषणेनैवदक्षिणाकर्मसमानिरिति सजानंस्तेनेतिपाठेनगालवेनशुश्रूषणेनैवजितोवशीकृतोस्मीतिजानन्नित्यन्वयः ॥ २४ ॥ २५ ॥ २६ ॥ श्यामोहरितः एकतःबहिःप्रदेशेएवश्यामाःकर्णायेषांएकतःश्यामकर्णानाम् ॥ २७ ॥ ॥ इ० उ० नै० भा० षडधिकशततमोऽध्यायः ॥ १०६ ॥ ॥ ७ ॥ ॥ एवमिति ॥ १ ॥ हरिणःपांडुरः

दक्षिणाभिरुपेतंहिकर्मसिध्यतिमानद ॥ दक्षिणानांहिदातावैअपवर्गेणयुज्यते ॥ २२ ॥ स्वर्गेक्रतुफलंतद्विदक्षिणाशांतिरुच्यते ॥ किमाहरामिगुर्वर्थंब्रवीतुभगवानिति ॥ २३ ॥ जानानस्तेनभगवान्जितःशुश्रूषणेनवै ॥ विश्वामित्रस्तमसकृद्गच्छगच्छेत्यचोदयत् ॥ २४ ॥ असकृद्गच्छगच्छेतिविश्वामित्रेणभाषितः ॥ किंददानीतिबहुशोगालवःप्रत्यभाषत ॥ २५ ॥ निर्बंधतस्तुबहुशोगालवस्यतपस्विनः ॥ किंचिदागतसंरंभोविश्वामित्रोब्रवीदिदम् ॥ २६ ॥ एकतःश्यामकर्णानां हयानांचंद्रवर्चसाम् ॥ अष्टौशतानिमेदेहिगच्छगालवमाचिरम् ॥ २७ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिगालवचरितेषडधिकशततमोऽध्यायः ॥ १०६ ॥ ॥ ७ ॥ ॥ नारदउवाच ॥ ॥ एवमुक्तस्तदातेनविश्वामित्रेणधीमता ॥ नास्तेनशेतेनाहारंकुरुतेगालवस्तदा ॥ १ ॥ त्वगस्थिभूतोहरिणश्चिंता शोकपरायणः ॥ शोचमानोतिमात्रंसदत्यमानश्चमन्युना ॥ गालवोदुःखितोदुःखाद्विललापसुयोधन ॥ २ ॥ कुतःपुष्टानिमित्राणिकुतोर्थाःसंचयःकुतः ॥ हयानां चंद्रशुभ्राणांशतान्यष्टोकुतामम ॥ ३ ॥ कुतोमेभोजनेश्रद्धासुखश्रद्धाकुतश्चमे ॥ श्रद्धामेजीवितस्यापिछिन्नाकिंजीवितेनमे ॥ ४ ॥ अहंपारेसमुद्रस्यपृथिव्या वापरंपरात् ॥ गत्वात्मानंविमुंचामिकिंफलंजीवितेनमे ॥ ५ ॥ अधनस्याकृतार्थस्यत्यक्तस्यविविधैःफलैः ॥ ऋणंधारयमाणस्यकुतःसुखमनीहया ॥ ६ ॥ सुहृदांहिधनंभुक्त्वाकृत्वाप्रणयमीप्सितम् ॥ प्रतिकर्तुमशक्तस्यजीवितान्मरणंवरम् ॥ ७ ॥ प्रतिश्रुत्यकरिष्येतिकर्तव्यंतदकुर्वतः ॥ मिथ्यावचनदग्धस्यइष्टापूर्तंप्रणश्यति ॥ ८ ॥ नरूपमनृतस्यास्तिनानृतस्यास्तिसंततिः ॥ नानृतस्याधिपत्यंचकृतएवगतिःशुभा ॥ ९ ॥ कुतःकृतघ्नस्ययशःकुतःस्थानंकुतःसुखम् ॥ अश्रद्धेयःकृतघ्नोहिकृतघ्नेनास्तिनिष्कृतिः ॥ १० ॥ नजीवत्यधनःपापःकुतःपापस्यतंत्रणम् ॥ पापोध्रुवमवाप्नोतिविनाशंनाशयन्कृतम् ॥ ११ ॥

॥ ११० ॥

मन्युनादैन्येन दह्यमानश्चितामिना ॥ २ ॥ ३ ॥ ४ ॥ परंपरात्दूरादपिदूरं आत्मानंदेहम् ॥ ५ ॥ अनीहयाअनुद्यमेन ॥ ६ ॥ ईप्सितंप्रणयंकृत्वाईप्सितंदास्यामीतिविश्वासमुत्पाद्य प्रणयःप्रेम्णिविस्रंभेइतिविश्वः ॥ ७ ॥ एतदेवाह प्रतिश्रुत्येति करिष्येतीतिसंधिरार्षः ॥ ८ ॥ अनृतस्यसत्यहीनस्यरूपंस्वरूपं जीवन्नेवसमृतइत्यर्थः ॥ ९ ॥ १० ॥ तंत्रणंकुटुंबधारणं पाठांतरेमंत्रणंइष्टैःसहविचारणं अविश्वसनीयत्वादित्यर्थः ॥ ११ ॥

तत्भाषितमितिसंबंधः ॥ १२ ॥ अनुत्तमंयत्नंअधमोपायंविषोद्बंधनादिरूपंकृत्वाप्राणान्मोक्ष्यामीत्यर्थः अर्थितायाञ्ञा ॥ १३ ॥ अहंत्विति अत्राहमितिपदस्यद्विरावृत्तिर्वक्तुर्वैक्लव्यादोषः ॥ १४ ॥ भोगाःभोग्यवर्गोवियदादिःप्रतिष्ठतेनिःसरंतिबीजादिवदक्षाः ॥ १५ ॥ तस्यविष्णुदासत्वेनसखानतुपूर्वोपकारादिना ॥ १६ ॥ सुहृदांविश्वंविष्णुरितिबुद्ध्यासर्वलोकमित्राणाम् ॥ १७ ॥ वासवावरजोविष्णुः उक्तःअहंगालवस्यसाहाय्यंकर्तुमिच्छामीतिप्रार्थितःतेनविष्णुना ॥ १८ ॥ देशंपृथिव्यंतर्गतमेवपृथिव्याःपारंसमुद्रः ॥ १९ ॥ ॥ इतिउद्योगप० नैलकंठीयेभारतभा० सप्ताधिकशततमोऽध्यायः ॥ १०७ ॥

सोहंपापःकृतघ्नश्चकृपणश्चानृतोपिच ॥ गुरोर्यःकृतकार्यःसंस्तत्करोमिनभाषितम् ॥ १२ ॥ सोहंप्राणान्विमोक्ष्यामिकृत्वायत्नमनुत्तमम् ॥ अर्थितानमयाकाचित्कृतपूर्वादिवौकसाम् ॥ १३ ॥ मानयंतिचमांसर्वेत्रिदशायज्ञसंस्तरे ॥ अहंतुविबुधश्रेष्ठंदेवंत्रिभुवनेश्वरम् ॥ विष्णुंगच्छाम्यहंकृष्णंगतिंगतिमतांवरम् ॥ १४ ॥ भोगायस्मात्प्रतिष्ठंतेव्याप्यसर्वान्सुरासुरान् ॥ प्रणतोद्रष्टुमिच्छामिकृष्णंयोगिनमव्ययम् ॥ १५ ॥ एवमुक्तेसखातस्यगरुडोविनतात्मजः ॥ दर्शयामासतंप्राहसंहृष्टःप्रियकाम्यया ॥ १६ ॥ सुहृद्भवान्ममतःसुहृदांचमतःसुहृत् ॥ ईप्सितेनाभिलाषेणयोक्तव्योविभवेसति ॥ १७ ॥ विभवश्चास्तिमेविप्रवासवावरजोद्विज ॥ पूर्वमुक्तस्त्वदर्थंचकृतःकामश्चतेनमे ॥ १८ ॥ सभवानेतुगच्छावनियिष्येत्वांयथासुखम् ॥ देशंपारंपृथिव्यावागच्छगालवमाचिरम् ॥ १९ ॥ इतिश्रीम० उद्यो० भगवद्यानपर्वणिगालवचरितेसप्ताधिकशततमोऽध्यायः ॥ १०७ ॥ ॥ ७ ॥ ॥ सुपर्णउवाच ॥ ॥ अनुशिष्टोस्मिदेवेनगालवज्ञानयोनिना ॥ ब्रूहिकामंतुकांयामिद्रष्टुंप्रथमतोदिशम् ॥ १ ॥ पूर्वांवादक्षिणांवाहमथवापश्चिमांदिशम् ॥ उत्तरांवाद्विजश्रेष्ठकुतोगच्छामिगालव ॥ २ ॥ यस्यामुदयतेपूर्वंसर्वलोकप्रभावनः ॥ सवितायत्रसंध्यायांसाध्यानांवर्ततेतपः ॥ ३ ॥ यस्यांपूर्वंमतिर्यातायत्याव्याप्तमिदंजगत् ॥ चक्षुषीयत्रधर्मस्ययंत्रवैसुप्रतिष्ठिते ॥ ४ ॥ कृतंयतोद्रुतंहव्यंसर्पतेसर्वतोदिशं ॥ एतद्वारंद्विजश्रेष्ठदिवसस्यतथाध्वनः ॥ ५ ॥ अत्रपूर्वंप्रसूतावैदाक्षायण्यःप्रजास्त्रियः ॥ यस्यांदिशिप्रवद्भाश्वकश्यपस्यात्मसंभवाः ॥ ६ ॥ अतोमूलंसुराणांश्रीर्यत्रशक्रोऽभ्यषिच्यत ॥ सुरराज्येनविप्रर्षेदेवैश्चात्रतपश्चितम् ॥ ७ ॥ एतस्मात्कारणाद्ब्रह्मन्पूर्वेत्येषादिगुच्यते ॥ यस्मात्पूर्वतरेकालेपूर्वमेवावदतासुरैः ॥ ८ ॥

अनुशिष्टआज्ञापितःज्ञानयोनिनाधीप्रवर्तकेनविष्णुना पाठांतरेअज्ञातयोनिनासर्वादित्वात्अज्ञातःरूपादिहीनत्वाच्चतादृशोपियोनिःजगदुदयप्रलयस्थानंतेनकामयेथेष्टं ॥ १ ॥ २ ॥ साध्यानांदेवतानाविशेषाणांतपआलोचनंवर्ततेअनुवर्ततेसाध्यादेवाइहोच्यंतेसत्यकामावभूवुरित्यर्थः ॥ ३ ॥ मतिर्बुद्धिःयातायाप्ता प्रातःसंध्यायांसवितुःप्रसादात्प्रथमंयत्रधीप्राप्तिर्भवति गायत्र्यांसवितुर्धीप्रवर्तकत्वदर्शनादित्यर्थः चक्षुषीआज्यभागाख्येअग्नीषोमदैवत्ये धर्मस्ययज्ञस्य यंत्रयतेस्तुमर्थेतवैप्रत्ययोवैदिकस्तत्कारलोपश्च ॥ ४ ॥ तदेवाह कृतंसंस्कृतंहव्यंयतोद्रुतंययोर्मध्येहुतंसतृतदाज्यभागावंतरेणाहुतीःप्रतिपादयेदितिश्रुतेर्यज्ञस्यरक्षणंभवति अन्यत्रगतंत्वर्थाद्धर्मनाशकंभवतीतिभावः अध्वनःदेवयानस्यपितृयाणस्यवा ॥ ५ ॥ दाक्षायण्यःअदितिर्दितिर्दनुःकाष्ठाइत्यादयःप्रजाःलोकान् ॥ ६ ॥ ७ ॥ ८ ॥

पूर्वपूर्वसंस्थानि सुखमीप्सतासुखार्थिना ॥ ९ ॥ १० ॥ यजूंषिदत्तानियाज्ञवल्क्यायेतिशेषः ॥ ११ ॥ स्वांयोनिंसोमाज्यपयआदिरूपंजलम् ॥ १२ ॥ पूर्वमित्रावरुणयोर्यज्ञकालेपौराणस्यपुराणस्य स्वार्थेतद्धितः निधननिमित्तशापात्स्थूलदेहवियोगःसृतिःकुंभात्तस्मिन्नेवयज्ञे ॥ १३ ॥ दशरात्रीशब्दस्यपृषोदरादिशकारलोपेनदशरात्रीशब्दःसहस्रवाची स्तनयोर्मार्गाःओंकारोवैसर्ववाङ्मितिश्रुतेर्वेदस्यशाखाप्रशाखादिभेदोऽप्येवजातइत्यर्थः ॥ १४ ॥ १५ ॥ येमानुषाःकृतघ्नाःयेचासुरास्तान्अत्रैवोदयन्हंति तेषामायुरल्पीकरोतीत्यर्थः ॥ १६ ॥ विशावःप्रविशावः ॥ १७ ॥ १८ ॥ ॥ इतिउद्योगप०नैलकं

अतएवचसर्वेषांपूर्वामाशांप्रचक्षते ॥ पूर्वंसर्वाणिकार्याणिदैवानिसुखमीप्सता ॥ ९ ॥ अत्रवेदान्जगौपूर्वंभगवान्लोकभावनः ॥ अत्रैवोक्तासवित्रासीत्सा
वित्रीब्रह्मवादिषु ॥ १० ॥ अत्रदत्तानिसूर्येणयजूंषिद्विजसत्तम ॥ अत्रलब्धवरःसोमःसुरैःऋतुषुपीयते ॥ ११ ॥ अत्रहुताहुतवहास्त्वांयोनिमुपभुंजते ॥ अत्रपाता
लमाश्रित्यवरुणःश्रियमापच ॥ १२ ॥ अत्रपूर्ववसिष्ठस्यपौराणस्यद्विजर्षभ ॥ सृतिश्चैवप्रतिष्ठाचनिधनंचप्रकाशते ॥ १३ ॥ ओंकारस्यात्रजायंतेस्तनयोद
शतीर्दश ॥ पिबंतिमुनयोयत्रहविर्धूमंस्मधूमपाः ॥ १४ ॥ प्रोक्षितायत्रबहवोवराहाद्याम्टगावने ॥ शक्रेणयज्ञभागार्थेदैवतेषुप्रकल्पिताः ॥ १५ ॥ अत्राहिताःकृ
तघ्नाश्चमानुषाश्चासुराश्चये ॥ उदयंस्तान्हिसर्वान्वैक्रोधाद्धंतिविभावसुः ॥ १६ ॥ एतद्वारंत्रिलोकस्यस्वर्गस्यचसुखस्यच ॥ एषपूर्वोदिशांभागोविशावोत्रयदी
च्छसि ॥ १७ ॥ प्रियंकार्यंहिमेतस्ययस्यास्मिवचनेस्थितः ॥ ब्रूहिगालवयास्यामिश्रुणुचाप्यपरांदिशम् ॥ १८ ॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यान
पर्वणिगालवचरितेअष्टाधिकशततमोऽध्यायः ॥ १०८ ॥ ॥ ९ ॥ ॥सुपर्णउवाच ॥ इयंविवस्वतापूर्वंश्रौतेनविधिनाकिल ॥ गुरवेदक्षिणादत्तादक्षिणेत्यु
च्यतेचदिक् ॥ १ ॥ अत्रलोकत्रयस्यास्यपितृपक्षःप्रतिष्ठितः ॥ अत्रोष्मपाणांदेवानांनिवासःश्रूयतेद्विज ॥ २ ॥ अत्रविश्वेसदादेवाःपितृभिःसार्धमासते ॥ इज्य
मानास्मलोकेषुसंप्राप्तास्तुल्यभागताम् ॥ ३ ॥ एतद्वितीयंदेवस्यद्वारमाचक्षतेद्विज ॥ त्रुटिशोलवशश्चापिगण्यतेकालनिश्चयः ॥ ४ ॥ अत्रदेवर्षयोनित्यंपितृलो
कर्षयस्तथा ॥ तथाराजर्षयःसर्वेनिवसंतिगतव्यथाः ॥ ५ ॥ अत्रधर्मश्चसत्यंचकर्मचात्रनिगद्यते ॥ गतिरेषाद्विजश्रेष्ठकर्मणामवसायिनाम् ॥ ६ ॥

ठीयेभा०अष्टाधिकशततमोध्यायः ॥ १०८ ॥ ॥ ९ ॥ ॥ इयमिति स्त्रीवेणेतिपाठेस्त्रुवेणहूयतेस्मिन्निति स्त्रौवोविधिर्यज्ञः गुरवेकश्यपाय ॥ १ ॥ ऊष्मपाणांउष्णान्नभोजिनां यावदुष्णान्नवत्यन्नंपि
तरस्तावदश्नंतीतिस्मृतेः ॥ २ ॥ विश्वेत्रयोदशमितोगणः ॥ ३ ॥ द्वितीयंदेवस्यधर्मस्यद्वारं पूर्वादिक्प्रथमंतदपेक्षयापित्र्यस्यधर्मस्यद्वारमिदंद्वितीयं प्राकूसंस्थानिदैवानिकर्माणिदक्षिणसंस्थानिपित्र्याणीति
स्मृतेः ॥ ४ ॥ ५ ॥ कर्मपुण्यापुण्यरूपंनिगद्यतेप्रकाश्यतेचित्रगुप्तादिभिःअवसायिनांमृतानांकर्मनिग्रहानुग्रहरूपम् ॥ ६ ॥

सर्वःमुमूर्षुमात्रः दृताळन्ना अनवबोधेनतमसा पुण्यवान्पापीवामरणकालेअत्यंतमूढत्वात्दुःखेवसन्नेतांदिशंगच्छतीत्यर्थः कृत्वात्वनवरोधेनेतिपाठेअनवःप्राक्संचितेनकर्मणाउपस्थितोरोधोमोहस्तेनस
र्वःकृत्वाकर्तापूरुषः आतोमनिन्क्वनिब्वनिपश्चेतिसूत्रात्कनिबित्यनुवर्तमानेऽन्येभ्योपिदृश्यंतइतिकृञःकर्तरिकनिप् ॥ ७ ॥ ८ ॥ चित्तंचबुद्धिश्चतयोर्हराः योगिनांतत्त्वानुसंधानंप्रपंचमिथ्यात्वनिश्चयंच
हरंतीत्यर्थः ॥ ९ ॥ गाथाःवर्णमध्योमंत्राद्याः सामानितदाश्रयाणिगीतानिश्रुत्वाऽतीतंकालमजानन्भूलोकेआगत्यदारान्नष्टान्ज्ञात्वावनंगतइतिपौराणीकथा ॥ १० ॥ सावर्णिनामनुनामर्यादासूर्यरथस्य

एषादिक्साद्विजश्रेष्ठयांसर्वःप्रतिपद्यते ॥ दृताळवनबोधेनसुखंतेननगम्यते ॥ ७ ॥ नैर्ऋतानांसहस्राणिबहून्यत्रद्विजर्षभ ॥ स्रष्टानिप्रतिकूलानिद्रष्टव्यान्यकृता
त्मभिः ॥ ८ ॥ अत्रमंदरकुंजेषुविप्रर्षिसदनेषुच ॥ गायंतिगाथागंधर्वाश्चित्तबुद्धिहराद्विज ॥ ९ ॥ अत्रसामानिगाथाभिःश्रुत्वागीतानिरैवतः ॥ गतदारोगता
मात्योगतराज्योवनंगतः ॥ १० ॥ अत्रसावर्णिनाचैवयवक्रीतात्मजेनच ॥ मर्यादास्थापिताब्रह्मन्यांसूर्योनातिवर्तते ॥ ११ ॥ अत्रराक्षसराजेनपौलस्त्येनम
हात्मना ॥ रावणेननतपश्चीर्त्वासुरेभ्योऽमरतांदृता ॥ १२ ॥ अत्रदत्तेनदत्तोपिशक्रशत्रुत्वमीयिवान् ॥ अत्रसर्वासवःप्राणाःपुनर्गच्छंतिपंचधा ॥ १३ ॥ अत्रदु
ष्कृतकर्माणोनराःपच्यंतिगालव ॥ अत्रवैतरणीनामनदीवितरणैर्दृता ॥ १४ ॥ अत्रगत्वासुखस्यांतंदुःखस्यांतंप्रपद्यते ॥ अत्रदत्तोदिनकरःसुरसंक्षरतेपयः
॥ १५ ॥ काष्ठांचासाद्यवासिष्ठींहिममुत्सृजतेपुनः ॥ अत्राहंगालवपुराक्षुधार्तःपरिचिंतयन् ॥ १६ ॥ लब्धवान्युध्यमानौद्वौबृहंतौगजकच्छपौ ॥ अत्रचक्रध
नुर्नामसूर्याज्ञातोमहानृषिः ॥ १७ ॥ विदुर्यंकपिलंदेवंयेनार्ताःसगरात्मजाः ॥ अत्रसिद्धाःशिवानामब्राह्मणावेदपारगाः ॥ १८ ॥ अधीत्यसकलान्वेदाँल्लेभिरे
मोक्षमक्षयम् ॥ अत्रभोगवतीनामपुरीवासुकिपालिता ॥ १९ ॥ तक्षकेणचनागेनतथैवैरावतेनच ॥ अत्रनिर्याणकालेपितमःसंप्राप्यतेमहत् ॥ २० ॥ अभेद्यं
भास्करेणापिस्वयंवाकृष्णवर्त्मना ॥ एषतस्यापितेमार्गःपरिचार्यस्यगालव ॥ ब्रूहिमेयदिगंतव्यंप्रतीचींशृणुचापराम् ॥ २१ ॥ ॥इतिश्रीमहाभारतेउद्योग
पर्वणिभगवद्यानपर्वणिगालवचरितेनवाधिकशततमोऽध्यायः ॥ १०९ ॥ ॥ ९ ॥ ॥ ९ ॥ ॥ ९ ॥ ॥ ९ ॥ ॥ ९ ॥

वीथीनांवाहकानांदेवतानांचनियमः ॥ ११ ॥ १२ ॥ सर्वासवःसर्वेषांप्राणाअत्रप्राप्ताःसंतःपुनःपंचधागच्छंतिदेहंप्रामुवंति प्राणापानादिभेदेनेत्यर्थः ॥ १३ ॥ वितरणैःवैतरणीनदीसंज्ञकनरकगामिभिः ॥
॥ १४ ॥ सुखस्यांतंनरकं दुःखस्यांतंस्वर्गसुखं आदत्तःकर्कायनगतः तदाहिप्रायेणाद्यानक्षत्रंभवतितच्चवर्षाकालस्यादिभूतंप्रसिद्धम् ॥ १५ ॥ वासिष्ठींकाष्ठांउदीचींवसिष्ठोपलक्षितसप्तर्षिभिरधिष्ठितां
धानिष्ठीमितिपाठेऽतिशयेनधनवान्धनिष्ठःकुबेरस्तदीयां उत्सृजतेत्यजति ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ निर्याणकालेमरणकाले तमःआंध्यम् ॥ २० ॥ तस्यतेतव परिचार्यस्यसेव्यस्य ॥ २१ ॥ ॥इ
तिश्रीमहाभारतेउद्योगपर्वणिनैलकंठीयेभारतभा०नवाधिकशततमोऽध्यायः ॥ १०९ ॥ ॥ ९ ॥ ॥ ९ ॥ ॥ ९ ॥ ॥ ९ ॥ ॥ ९ ॥

गोपतेःसूर्यस्यप्रतिष्ठेतिसंबंधः ॥ १ ॥ एतदेवाह पश्चादद्दहदिति अङ्गःपश्चाद्भागे गाःरश्मीन्विसर्जयति अतएवपश्चिमामंतिमेत्यर्थः ॥ २ ॥ ३ ॥ ४ ॥ पश्चात्कृताःविमुखीकृताः संयताःसन्नद्धाःसंतः ॥ ५ ॥ ॥ ६ ॥ अर्धआयुषोहर्नुनिद्रयाव्ययीकर्तुमित्यर्थः ॥ ७ ॥ ८ ॥ मंदरंसमुद्रेमग्नं एतेनहिमवन्मूलस्यसमुद्रजलस्यचाप्रमेयत्वमुक्तम् ॥९॥ कांचनमयानिअंबुरुहाणियत्रतस्पउदधेःसमुद्रतुल्यस्यसरसः ॥ १० ॥ ११ ॥ सुवर्णशिरसोमुनेः हरिरोम्णःअपलितस्यनित्यतरुणस्येत्यर्थः ॥ १२ ॥ हरिमेधसोमुनेःकुमारी तिष्ठतिष्ठेतिसूर्यस्यशासनात् ॥ १३ ॥ अत्रवायुरिति वाय्वादयोत्रदुःखदंशीतोष्णस्पर्शविमुंचंति स

सुपर्णउवाच ॥ ॥इयंदिग्दयितारात्रेर्वरुणस्यतुगोपतेः॥सदासलिलराजस्यप्रतिष्ठाचादिरेवच॥१॥अत्रपश्चादहःसूर्योविसर्जयतिगाःस्वयम्॥पश्चिमेत्यभिविख्यातादिगियंद्विजसत्तम॥ २॥ यादसामत्रराज्येनसलिलस्यचगुप्तये॥ कश्यपोभगवान्देवोवरुणंस्माभ्यषेचयत् ॥ ३॥ अत्रपीत्वासमस्तान्वैवरुणस्यरसांस्तुषट्॥ जायतेतरुणःसोमःशुक्लस्यादौतमिस्रहा॥ ४॥ अत्रपश्चात्कृतादैत्यावायुनासंयतास्तदा ॥ निःश्वसंतोमहावातैरर्दिताःसुषुपुर्द्विज॥ ५॥ अत्रसूर्यप्रणयिनंप्रतिगृह्णातिपर्वतः॥ अस्तोनामयतःसंध्यापश्चिमांप्रतिसर्पति॥६॥ अतोरात्रिश्चनिद्राचनिर्गतादिवसक्षये॥ जायतेजीवलोकस्यहर्तुमर्धमिवायुषः ॥७॥ अत्रदेवींदितिंसुप्तामात्मप्रसवधारिणीं॥ विगर्भामकरोच्छक्रोयत्रजातोमरुद्गणः॥८॥ अत्रमूलंहिमवतोमंदरंयातिशाश्वतम्॥ अपिवर्षसहस्रेणनचास्यांतोधिगम्यते॥ ९॥ अत्रकांचनशैलस्यकांचनांबुरुहस्यच॥ उदधेस्तीरमासाद्यसुरभिःक्षरतेपयः॥१०॥अत्रमध्यंसमुद्रस्यकबंधःप्रतिदृश्यते॥ स्वर्भानोःसूर्यकल्पस्यसोमसूर्यौजिघांसतः॥ ११॥ सुवर्णशिरसोप्यत्रहरिरोम्णःप्रगायतः॥ अदृश्यस्याप्रमेयस्यश्रूयतेविपुलोध्वनिः ॥ १२ ॥ अत्रध्वजवतीनामकुमारीहरिमेधसः॥ आकाशेतिष्ठतिष्ठेतितस्थौसूर्यस्यशासनात्॥ १३॥ अत्रवायुस्तथावह्निरापःखंचापिगालव॥ आह्निकंचैवनैशंचदुःखंस्पर्शविमुंचति॥ १४॥ अतःप्रभृतिसूर्यस्यतिर्यगावर्ततेगतिः॥ अत्रज्योतींषिसर्वाणिविशंत्यादित्यमंडलम्॥ १५॥ अष्टाविंशतिरात्रंचचंक्रम्यसहभानुना॥ निष्पतंतिपुनःसूर्यात्सोमसंयोगयोगतः॥ १६॥ अत्रनित्यंस्रवंतीनांप्रभवःसागरोदयः॥ अत्रलोकत्रयस्यापस्तिष्ठंतिवरुणालये॥ १७॥

दासुखसंस्पर्शाएवेत्यर्थः ॥ १४ ॥ अतःप्रभृतीति मेरुंप्रदक्षिणीकुर्वन्सूर्यःसर्वदातिर्यग्गतिरेवसन्लोकदृष्ट्याउपर्यधश्चगच्छतीत्येवभाति अतःपरंलोकदृष्ट्यभावात्तिर्यग्गेवावर्ततइत्यर्थः आदित्यमंडलंकर्तृ ज्योतींष्यग्र्यादीन्विशंति आदित्योवाअस्तंयन्नग्निमनुप्रविशतीतिश्रुतेः नक्षत्रादीन्यपिअग्नयत्वादप्रकाशानिआदित्यप्रभयैवभासंतेरात्रौ दिवानुतयैवतिरोभवंतीतिप्रसिद्धिः ॥ १५ ॥ अष्टेति अष्टाविंशतितमेदिनेएकैकंनक्षत्रंभानुनाचंद्रेणसहसंक्रम्यएकोनत्रिंश्यांरात्रौनिष्पततिबहिर्निर्गच्छतिचंद्रादेव पुनस्तद्वत्सोमसंयोगसदृशेनयोगेनसंवंधेनसूर्येणसहापिसंक्रम्यकालेनिष्पतंतीत्यर्थः एवंचंद्रवत्सर्वेषामपिनक्षत्राणांसर्वदहयोगस्तुल्यः ॥ १६ ॥ स्रवंतीनांनदीनां सागरस्योदयःपूर्तिर्येनतादृशःप्रभवः ॥ १७ ॥

॥ ११२ ॥

॥ १८ ॥ १९ ॥ दिग्द्वारेणसंक्षेपप्रकारेणतेतव ॥ २० ॥ ॥ इति०नै०भार०दशाधिकशततमोऽध्यायः ॥ ११० ॥ ॥ ७ ॥ ॥ यस्मादितिउत्तरेणपथागतानांहिपापनाशःस्वर्गप्राप्तिश्चभवतीतियो गादुत्तराउत्कृष्टतराइयंदिगित्यर्थः ॥ १ ॥ परिवापःस्थानं हिरण्यस्यनिधीनामित्यर्थः उत्तरंयन्निधिस्थानंततःस्वर्गमार्गःदिग्भ्यामुपलक्षितोमध्यमोज्ञेयइतिभावः ॥ २ ॥ अविधेयात्माअजितचित्तः॥३॥ ॥ ४ ॥ प्रकृत्याउमया ॥ ५ ॥ नसःमायाविष्टोपिनदृश्योदर्शनार्हःकिमुतमायारहितःशुद्धचिन्मात्रः ॥ ६ ॥ सहस्रशिरसइत्यकारांतःशब्दः मायययाउपेतमितिशेषः वस्तुतोस्यप्रत्यगात्मत्वेनदृष्टुदृश्यभाव

अत्रपन्नगराजस्याप्यनंतस्यनिवेशनम्॥ अनादिनिधनस्यात्रविष्णोःस्थानमनुत्तमम्॥१८॥अत्रानलसखस्यापिपवनस्यनिवेशनम्॥महर्षेःकश्यपस्यात्रमारीचस्यनिवेशनम्॥१९॥एषतेपश्चिमोमार्गोदिग्द्वारेणप्रकीर्तितः॥ब्रूहिगालवगच्छावोबुद्धिःकाद्विजसत्तम॥२०॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिगालवचरितेदशाधिकशततमोऽध्यायः॥ ११०॥ ॥७॥ ॥सुपर्णउवाच॥ ॥यस्मादुत्तार्यतेपापाद्यस्मान्निःश्रेयसोभुते॥ अस्मादुत्तारणबलादुत्तरेत्युच्यतेद्विज॥१॥उत्तरस्यहिरण्यस्यपरिवापश्चगालव॥मार्गःपश्चिमपूर्वाभ्यांदिग्भ्यांवैमध्यमःस्मृतः॥२॥अस्यांदिशिवरिष्ठायामुत्तरायांद्विजर्षभ॥ नासौम्योनाविधेयात्मानाधर्मोवसतेजनः॥३॥अत्रनारायणःकृष्णोजिष्णुश्चैवनरोत्तमः॥ वदर्याआश्रमपदेतथाब्रह्माचशाश्वतः॥४॥अत्रवैहिमवत्पृष्ठेनित्यमास्तेमहेश्वरः॥ प्रकृत्यापुरुषःसार्धंयुगांताग्निसमप्रभः॥५॥नसदृश्योमुनिगणैस्तथादेवैःसवासवैः॥गंधर्वयक्षसिद्धैर्वानरनारायणाहृते॥६॥अत्रविष्णुःसहस्राक्षःसहस्रचरणोव्ययः॥ सहस्रशिरसःश्रीमानेकःपश्यतिमायया॥ ७॥ अत्रराज्येनविप्राणांचंद्रमाश्चाभ्यषिंचत॥ अत्रगंगांमहादेवःपतंतींगगनाच्युतां॥८॥प्रतिगृह्यददौलोकेमानुषेब्रह्मवित्तम॥ अत्रदेव्यातपस्तप्तंमहेश्वरपरीप्सया॥९॥ अत्रकामश्चरोषश्चशैलश्चोमाचसंभुः॥ अत्रराक्षसयक्षाणांगंधर्वाणांचगालव॥ १०॥ आधिपत्येनकैलासेधनदोप्यभिषेचितः॥ अत्रचैत्ररथंरम्यमत्रवैखानसाश्रमः॥ ११॥ अत्रमंदाकिनीचैवमंदरश्चद्विजर्षभ॥ अत्रसौगंधिकवनंनैर्ऋतैरभिरक्ष्यते॥ १२॥ शाद्वलंकदलीस्कंधमत्रसंतानकानगाः॥ अत्रसंयमनित्यानांसिद्धानांस्वैरचारिणाम्॥१३॥विमानान्यनुरूपाणिकामभोग्यानिगालव॥ अत्रतेऋषयःसप्तदेवीचारुंधतीतथा॥ १४॥ अत्रतिष्ठतिवैस्वातिरत्रास्योदयःस्मृतः॥ अत्रयज्ञंसमासाद्यभुवंस्थातापितामहः॥ १५॥

स्याभावादितिभावः सगुणब्रह्मभावप्राप्तिपूर्विकैवनिर्गुणप्राप्तिरितिप्रघट्टकार्थः यथोक्तं सोपाधिर्निरुपाधिश्चद्वेधाब्रह्मविदुध्यते सोपाधिकःस्यात्सर्वात्मानिरुपाख्योनुपाधिकइति एतच्चसम्यग्व्युत्पादितमस्माभिर्वेदांतकतके ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ शाद्वलंजंबालंदेवनाभेदः कदलीवैजयंतीपताकातस्याःस्कंधवदुच्छ्रितं अथकदलीपताकाम्नगभेदयोरितिमेदिनी नगाःवृक्षाःकल्पद्रुमाः संयमोधारणाध्यानादिभिर्नित्योनत्याज्योयेषांतेषाम् ॥ १३ ॥ १४ ॥ १५ ॥

गंगामहाद्वारमित्यत्रगायंतिकाद्वारमितिपाठेगायंतिकाविलविशेषः ॥ १६ ॥ मूर्तिःपिंडः आकृतिःसंस्थानविशेषः ॥ १७ ॥ परिवर्तोगतागतं सहस्राणिसर्वेऽन्नपरिवेषणपात्राणिकामभोज्यानिचनज्ञायंते स्थूलदृष्टिभिरित्यर्थः तस्मात्हिमस्थानात् ॥ १८ ॥ प्रविलीयतिहिमेननश्यति ॥ १९ ॥ ऐलविलस्यकुबेरस्य ॥ २० ॥ २१ ॥ २२ ॥ उशीरबीजेस्थाने ॥ २३ ॥ कनकाकरःजीमूतस्यउपसमीपेतस्थे

ज्योतींषिचेंद्रसूर्यौचपरिवर्ततेतिनित्यशः॥ अत्रगंगामहाद्वारंरक्षंतिद्विजसत्तम॥ १६॥ धामानाममहात्मानोमुनयःसत्यवादिनः॥ नतेषांज्ञायतेमूर्तिर्नाकृतिर्न तपश्चितम्॥ १७॥परिवर्तःसहस्राणिकामभोज्यानिगालव॥ यथायथाप्रविशंतितस्मात्परतरंनरः॥ १८॥ तथातथाद्विजश्रेष्ठप्रविलीयतिगालव॥नैतल्लेकनचिदन्येनगतपूर्वंद्विजर्षभ॥ १९॥ ऋतेनारायणंदेवंनरंवाजिष्णुमव्ययम्॥अत्रकैलासमित्युक्तंस्थानमैलविलस्यतत्॥ २०॥ अत्रविद्युत्प्रभानामजज्ञिरेऽप्सरसोदश॥ अत्रविष्णुपदंनामक्रमताविष्णुनाकृतम्॥ २१॥ त्रिलोकविक्रमेब्रह्मन्नुत्तरांदिशमाश्रितम्॥अत्रराज्ञामरुत्तेनयज्ञेनेष्टंद्विजोत्तम॥ २२॥ उशीरबीजेवि प्रर्षेयत्रजांबूनदंसरः॥ जीमूतस्यात्रविप्रर्षेरुपतस्थेमहात्मनः॥ २३॥ साक्षाद्धैमवतःपुण्योविमलःकनकाकरः॥ब्राह्मणेषुचयत्किंत्स्वंतंकृत्वाधनंमहत्॥ २४॥ वव्रेधनंमहर्षिःसजैमूतंतद्धनंततः॥ अत्रनित्यंदिशांपालाःसायंप्रातर्द्विजर्षभ॥ २५॥ कस्यकार्यंकिमितिवैपरिक्रोशंतिगालव॥ एवमेषाद्विजश्रेष्ठगुणैरन्यैर्दिगुत्तरा॥ २६॥ उत्तरेतिपरिख्यातासर्वकर्मसुचोत्तरा॥ एताविस्तरशस्तातवसंकीर्तितादिशः॥ २७॥ चतस्रःक्रमयोगेनकामाशांगंतुमिच्छसि॥ उद्यतोहंद्विजश्रेष्ठतवदर्शयितुंदिशः॥ पृथिवींचाखिलांब्रह्मंस्तस्मादारोहमांद्विज॥ २८॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिगालवचरितेएकादशाधिकशततमोऽध्यायः॥ १११॥ ॥ ७ ॥ ॥गालवउवाच॥ ॥गरुत्मन्भुजगेंद्रारेसुपर्णविनतात्मज॥ नयमांतार्क्ष्यपूर्वेणयत्रधर्मस्यचक्षुषी॥ १॥ पूर्वमेतांदिशंगच्छयापूर्वंपरिकीर्तिता॥देवतानांहिसान्निध्यमत्रकीर्तितवानसि॥ २॥ अत्रसत्यंचधर्मश्चत्वयासम्यक्प्रकीर्तितः॥ इच्छेयंतुसमागंतुंसमस्तैर्देवतैरहं॥ भूयश्चतान्सुरान्द्रष्टुमिच्छेयमरुणानुज॥ ३॥ ॥नारदउवाच॥ ॥तमाहविनतासूनुरारोहस्वेतिवैद्विजम्॥ आरुरोहाथसमुनिर्गरुडंगालवस्तदा॥ ४॥

प्रकाशंगतः प्रकाशनस्थेयाख्ययोश्चेतिटङ् ॥ २४ ॥ वव्रेब्राह्मणेभ्यः मन्नामकमेतदस्त्विति ॥ २५ ॥ उत्तराउत्कृष्टतरा ॥ २६ ॥ २७ ॥ २८ ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेएकादशाधिकशततमोऽध्यायः॥ १११ ॥ ॥ ७ ॥ ॥ गरुत्मन्निति पूर्वेणपूर्वस्यांदिशि चक्षुषीअग्नीषोमौ ॥ १ ॥ २ ॥ समागंतुंएकीभवितुम् ॥ ३ ॥ ४ ॥

सहस्रांशोर्विवस्वतइतिपक्षवातानुगामिनांगरुडप्रभयाऽवभासितानांदक्षाणामंशुसाम्यंनिरावरणत्वंचाभिप्रेत्यविशेषणंद्वयं एतच्चवाक्यशेषाद्यत्कंभविष्यति वसआच्छादनेऽस्मात्क्विपिवःवस्वादित्यद्वात्ववस्वान्तद्विपरीतोविवस्वानित्यर्थः ॥ ५॥ ६ ॥ ७ ॥ खमिवारोप्यतेखेऽवस्थाप्यतइव ॥ ८ ॥ ९ ॥ रवैःशब्दैः कारणंप्रयोजनमपिनवेद्मिनस्मरामि ॥ १० ॥ ११ ॥ तेतव मणीवेतिइवार्थेवशब्दः ॥ १२ ॥

गालवउवाच॥ ॥क्रममाणस्यतेरूपंदृश्यतेपन्नगाशन॥ भास्करस्येवपूर्वाह्णेसहस्रांशोर्विवस्वतः॥५॥ पक्षवातप्रणुन्नानांदक्षाणामनुगामिनाम्॥प्रस्थितानामिवसमंपश्यामीहगतिंखग॥६॥ ससागरवनामुर्वीसशैलवनकाननाम्॥ आकर्षन्निवचाभासिपक्षवातेनखेचर॥७॥ समीननागनक्रंचखमिवारोप्यतेजलम्॥वायुनाचैवमहतापक्षवातेनचानिशम्॥८॥ तुल्यरूपाननान्मत्स्यांस्तथातिमितिमिंगिलान्॥ नागाश्चनरवक्त्रांश्चपश्याम्युन्मथितानिव॥९॥महार्णवस्यचरवैःश्रोत्रमेवधिरेकृते॥ नशृणोमिनपश्यामिनात्मनोवेद्मिकारणम्॥१०॥ शनैःसतुभवान्यातुब्रह्मवध्यामनुस्मरन्॥ नदृश्यतेरविस्तातनदिशोनचखंखग॥ ११॥ तमएवतुपश्यामिशरीरंतेनलक्षये॥ मणीवजात्यौपश्यामिचक्षुषीतेऽहमंडज॥१२॥ शरीरंतुनपश्यामितवचैवात्मनश्चह॥पदेपदेतुपश्यामिशरीरादग्निमुत्थितम्॥१३॥ समेनिर्वाप्यसहसाचक्षुषीशाम्यतेपुनः॥ तन्नियच्छमहावेगंगमनेविनतात्मज॥ १४॥ नमेप्रयोजनंकिंचिद्गमनेपन्नगाशन॥ संनिवर्तमहाभागनवेगंविपहामिते॥१५॥ गुरवेसंश्रुतानीहशतान्यष्टौहिवाजिनाम्॥ एकतःश्यामकर्णानांशुभ्राणांचंद्रवर्चसाम्॥ १६॥ तेषांचैवापवर्गायमार्गंपश्यामिनांडज॥ ततोयंजीवितत्यागेदृष्टोमार्गोमयात्मनः॥ १७॥ नैवमेस्तिधनंकिंचिन्नधनेनान्वितःसुहृत्॥ नचार्थेनापिमहताशक्यमेतद्व्यपोहितुम्॥ १८॥ नारदउवाच॥ ॥एवंबहुचदीनंचब्रुवाणंगालवंतदा॥ प्रत्युवाचव्रजन्नेवप्रहसन्विनतात्मजः॥ १९॥ नातिप्रज्ञोसिविप्रर्षेयोत्मानंत्यक्तुमिच्छसि॥ नचापिकृत्रिमःकालःकालोहिपरमेश्वरः॥ २०॥ किमहंपूर्वमेवेहभवतानाभिचोदितः॥ उपायोत्रमहानस्तियेनैतदुपपद्यते॥ २१॥ तदेषऋषभोनामपर्वतःसागरांतिके॥ अत्रविश्रम्यभुक्त्वाचनिवर्तिष्यावगालव॥ २२॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिगालवचरितेद्वादशाधिकशततमोऽध्यायः॥ ११२॥ नारदउवाच॥ ऋषभस्यततःशृंगंनिपत्यद्विजपक्षिणौ॥ शांडिलींब्राह्मणींतत्रददृशातेतपोन्विताम्॥ १॥ अभिवाद्यसुपर्णस्तुगालश्चाभिपूज्यताम्॥तयाचस्वागतेनोक्तौविष्टरेसन्निषीदतुः॥ २॥

॥ १३ ॥ निर्वाप्यमंदीकृत्य ॥ १४ ॥ संनिवर्तन्निवर्तस्व ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ योत्मानंसंधिरार्षः कृत्रिमःस्वेच्छासंपाद्यः कालो मृत्युः ॥ २० ॥ २१ ॥ निर्वाप्यावेत्यार्षस्तङोऽभावः ॥ २२ ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेद्वादशाधिकशततमोऽध्यायः॥ ११२॥ ॥ ७ ॥ ॥ ऋषभस्येति ॥ १ ॥ २ ॥

॥ ३ ॥ भष्टतनूजंछिन्नपक्षमंगंयस्यतंभष्टतनूजागम् ॥ ४ ॥ ५ ॥ ६ ॥ व्यभिचारोधर्मातिक्रमः ॥ ७ ॥ ८ ॥ ९ ॥ शोचताकथमियमत्रवसतीति ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ द्र

सिद्धमन्नंतयादत्तंबलिमंत्रोपबृंहितम् ॥ भुक्त्वात्मानावुभौभूमौसुखीतावनुमोदितौ ॥ ३ ॥ मुहूर्तात्प्रतिबुद्धस्तुसुपर्णोगमनेप्सया ॥ अथभ्रष्टतनूजांगमात्मानं
ददृशेखगः ॥ ४ ॥ मांसपिंडोपमोऽभूत्समुखपादान्वितःखगः ॥ गालवस्तंतथादृष्ट्वाविमनाःपर्यपृच्छत ॥ ५ ॥ किमिदंभवताप्राप्तमिहागमनजंफलम् ॥ वासोय
मिहकालंतुकियंतंनौभविष्यति ॥ ६ ॥ किंनुतेमनसाध्यातमशुभंधर्मदूषणम् ॥ नह्ययंभवतःस्वल्पोव्यभिचारोभविष्यति ॥ ७ ॥ सुपर्णोथाब्रवीद्विप्रंप्रध्यातंवैम
याद्विज ॥ इमांसिद्धामिनोनेतुंतत्रयत्रप्रजापतिः ॥ ८ ॥ यत्रदेवोमहादेवोयत्रविष्णुःसनातनः ॥ यत्रधर्मश्चयज्ञश्चतत्रेयंनिवसेदिति ॥ ९ ॥ सोहंभगवतींयाचे
प्रणतःप्रियकाम्यया ॥ मयैतन्नामप्रध्यातंमनसाशोचताकिल ॥ १० ॥ तदेवंबहुमानात्तेमयेहानीप्सितंकृतम् ॥ सुकृतंदुष्कृतंवात्वंमाहात्म्यात्क्षंतुमर्हसि ॥ ११ ॥
सातौतदाब्रवीत्तुष्टापतगेंद्रद्विजर्षभौ ॥ नभेतव्यंसुपर्णोसिसुपर्णत्यजसंभ्रमम् ॥ १२ ॥ निंदितास्मित्वयावत्सनचनिंदांक्षमाम्यहम् ॥ लोकेभ्यःसपदिभ्रश्येद्योमां
निंदेतपापकृत् ॥ १३ ॥ हीनयाऽलक्षणैःसर्वैस्तथाऽनिंदितयामया ॥ आचारंप्रतिगृह्णंत्यासिद्धिःप्राप्तेयमुत्तमा ॥ १४ ॥ आचारःफलतेधर्ममाचारःफलतेधनम् ॥
आचाराच्छ्रियमाप्नोतिआचारोहंत्यलक्षणम् ॥ १५ ॥ तदायुष्मन्खगपतेयथेष्टंगम्यतामितः ॥ नचतेगर्हणीयाऽहंगर्हितव्याःस्त्रियःक्वचित् ॥ १६ ॥ भवितासिय
थापूर्वंबलवीर्यसमन्वितः ॥ बभूवतुस्ततस्तस्यपक्षौद्रविणवत्तरौ ॥ १७ ॥ अनुज्ञातस्तुशांडिल्यायथागतमुपागमत् ॥ नैवचासादयामासतथारूपांस्तुरंगमान्
॥ १८ ॥ विश्वामित्रोथतंदृष्ट्वागालवंचाध्वनिस्थितः ॥ उवाचवदतांश्रेष्ठोवैनतेयस्यसन्निधौ ॥ १९ ॥ यस्त्वयास्वयमेवार्थःप्रतिज्ञातोममद्विज ॥ तस्यकालोऽपव
र्गस्ययथावामन्यतेभवान् ॥ २० ॥ प्रतीक्षिष्याम्यहंकालमेतावंतंतथापरम् ॥ यथासंसिध्यतेविप्रसमार्गस्तुनिशम्यतां ॥ २१ ॥ सुपर्णोथाब्रवीद्दीनंगालवंभृशदुः
खितम् ॥ प्रत्यक्षंखल्विदानींमेविश्वामित्रोयदुक्तवान् ॥ २२ ॥ तदागच्छद्विजश्रेष्ठमंत्रयिष्यावगालव ॥ नादत्वागुरवेशक्यंकृत्स्नमर्थंत्वयासितुम् ॥ २३ ॥ ॥ इति
श्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिगालवचरितेत्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

विणवत्तरौबलवत्तरौ ॥ १७ ॥ १८ ॥ १९ ॥ अपवर्गस्यफलप्राप्तेः ॥ २० ॥ निशम्यतांविचार्यताम् ॥ २१ ॥ २२ ॥ आसितुंस्थातुम् ॥ २३ ॥ ॥ इतिउद्योगप० नैलकंठीयेभारतभावदीपेत्रयो
दशाधिकशततमोऽध्यायः ॥ ११३ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

॥ ११४ ॥

हिरण्यपदप्रवृत्तिनिमित्तमाह निर्मितमिति भूम्यंतर्गतमेवपार्थिवेषुपांसुषुवह्निनाधम्यमानेषुव्यक्तीभवतीतिवह्निनानिर्मितं वायुनावह्निमुद्दीपयताविशोधितं वायुनावर्धितमित्यपिपाठः सर्वंजगत्हिरण्म
यंहिरण्यप्रधानं तेनभूमेःसारत्वात्शुद्धत्वात्सर्वजगन्मोहकत्वाच्चहिरण्यमित्युच्यतइत्यर्थः ॥ १ ॥ धत्तेपुष्णाति धारयतेजीवयति ॥ २ ॥ नित्यमिति प्रोष्ठपदाभ्यामितितृतीयामूलेनावाहयेद्देवीमितिवत्सप्त
म्यर्थे तेनतस्मिन्नक्षत्रद्वयेशुक्रेशुक्रवासरेतयोर्गेसतिशुक्रोग्निःधनपतीकुबेरस्यदद्यार्थंमनुष्येभ्यःसंप्रदानेभ्यःधनंवत्तेददाति शुक्रश्चित्तार्जितमित्यनेनवह्निरेतस्त्वंतस्यप्रदर्श्यते शुक्रःकाव्येऽनलेज्येष्ठेइतिविश्वः

नारदउवाच ॥ ॥ अथाहगालवंदीनंसुपर्णःपततांवरः ॥ निर्मितंवह्निनाभूमौवायुनाशोधितंतथा ॥ यस्माद्धिरण्मयंसर्वंहिरण्यंतेनचोच्यते ॥ १ ॥ धत्तेधारयते
चेदमेतस्मात्कारणाद्धनम् ॥ तदेतत्रिषुलोकेषुधनंतिष्ठतिशाश्वतम् ॥ २ ॥ नित्यंप्रोष्ठपदाभ्यांचशुक्रेधनपतौतथा ॥ मनुष्येभ्यःसमादत्तेशुक्रश्चित्तार्जितंधनम्
॥ ३ ॥ अजैकपादहिर्बुध्न्यैरस्यतेधनदेनच ॥ एवंनशक्यतेलब्धुमलब्ध्वाद्विजसत्तम ॥ ऋतेचधनमश्वानांनावामिर्विद्यतेतव ॥ ४ ॥ सत्वंयाचात्रराजानंकंचिद्राज
र्षिवंशजम् ॥ अपीड्यराजापौरान्हियोनौकुर्याल्लतार्थिनौ ॥ ५ ॥ अस्तिसोमान्ववायेमेजातःकश्चिन्नृपःसखा ॥ अभिगच्छावहेतंवैतस्यास्तिविभवोभुवि
॥ ६ ॥ ययातिर्नामराजर्षिर्नाहुषःसत्यविक्रमः ॥ सदास्यतिमयाचोक्तोभवताचार्थितःस्वयम् ॥ ७ ॥ विभवश्चास्यसुमहानासीद्धनपतेरिव ॥ एवंगुरुधनंविद्ध
नूदानेनैवविशोधय ॥ ८ ॥ तथातौकथयंतौचचिंतयंतौचयत्क्षमम् ॥ प्रतिष्ठानेनरपतिंययातिंप्रत्युपस्थितौ ॥ ९ ॥ प्रतिगृह्यचसत्कारैरर्घ्यपाद्यादिकंवरम् ॥
पृष्ट्वाचागमनेहेतुमुवाचविनतासुतः ॥ १० ॥ अयंमेनाहुषसखागालवस्तपसोनिधिः ॥ विश्वामित्रस्यशिष्योभूद्वर्षाण्ययुतशोनृप ॥ ११ ॥ सोयंतेनाभ्यनुज्ञा
तउपकारेप्सयाद्विजः ॥ तमाहभगवान्कालेददानिगुरुदक्षिणाम् ॥ १२ ॥ असकृत्तेनचोक्तेनकिंचिदागतमन्युना ॥ अयमुक्तःप्रयच्छेतिजानताविभवंलघु
॥ १३ ॥ एकतःश्यामकर्णानांशुभ्राणांशुद्धजन्मनाम् ॥ अष्टौशतानिमेदेहिहयानांचंद्रवर्चसाम् ॥ १४ ॥ गुर्वर्थोदीयतामेषयदिगालवमन्यसे ॥ इत्येवमाहस
क्रोधोविश्वामित्रस्तपोधनः ॥ १५ ॥ सोयंशोकेनमहतातप्यमानोद्विजर्षभः ॥ अशक्तःप्रतिकर्तुतद्भवंतंशरणंगतः ॥ १६ ॥ प्रतिगृह्यनरव्याघ्रत्वत्तोभिक्षांगत
व्यथः ॥ कृत्वापवर्गंगुरवेचरिष्यतिमहत्तपः ॥ १७ ॥ तपसःसंविभागेनभवंतमपियोक्ष्यते ॥ स्वेनराजर्षितपसापूर्णत्वांपूरयिष्यति ॥ १८ ॥

धनार्थीउक्तनक्षत्रद्वारयोगेवह्निंप्रार्थयेत् तच्चधनंयागादिद्वारायाभूमौनिखननेननवासर्वंकुबेरंप्रत्येवगच्छतीतिभावः ॥ ३ ॥ अजेति अजएकपात्पूर्वंप्रोष्ठपदादेवता अहिर्बुध्न्यउत्तरप्रोष्ठपदादेवता धनदश्च
तदध्यक्षस्तस्मादेतानिप्रार्थयताधनंलब्धुंशक्यंनान्यथेत्यर्थः ॥ ४ ॥ याचयाचस्व यःराजा नौआवाम् ॥ ५ ॥ ६ ॥ ७ ॥ विशोधयपरिहर ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥

॥ १९॥२०॥ ॥इतिउद्योग०नैलकंठीयेभारतभावदीपेचतुर्दशाधिकशततमोऽध्यायः॥ ११४॥ ॥७॥ ॥एवमुक्तइति॥ १॥२॥३॥४॥५॥६॥७॥हंतनाशोऽतिथिरितिशेषः॥८॥९॥१०॥११॥१२॥१३॥१४॥

यावंतिरोमाणिहयेभवंतीहनरेश्वर ॥ तावंतोवाजिनोलोकान्प्राप्नुवंतिमहीपते॥ १९॥ पात्रंप्रतिग्रहस्यायंदातुंपात्रंतथाभवान्॥ शंखेक्षीरमिवासक्तंभवत्वे
तत्तयोपमम्॥२०॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिगालवचरितेचतुर्दशाधिकशततमोऽध्यायः॥११४॥ ॥७॥ ॥नारदउवाच॥ एव
मुक्तःसुपर्णेनतथ्यंवचनमुत्तमम् ॥ विस्मयावहितोराजानिश्चित्यचपुनःपुनः ॥ १ ॥ यष्टाक्रतुसहस्राणांदातादानपतिःप्रभुः ॥ ययातिःसर्वकाशीशइदंवचन
मब्रवीत्॥ २॥ दृष्ट्वाप्रियसखंतार्क्ष्यंगालवंचद्विजर्षभम्॥ निदर्शनंचतपसोभिक्षांश्लाघ्यांचकीर्तिताम्॥ ३ ॥ अतीत्यचनृपानन्यानादित्यकुलसंभवान् ॥ म
त्सकाशमनुप्राप्तावेतांबुद्धिमवेक्ष्यच ॥ ४ ॥ अद्यमेसफलंजन्मतारितंचाद्यमेकुलम्॥ अद्ययंतारितोदेशोममतार्क्ष्यत्वयानघ ॥५॥ वक्तुमिच्छामितुसखेयया
जानासिमांपुरा ॥ नतथावित्तवानस्मिक्षीणंवित्तंचमेसखे॥ ६ ॥ नचशक्तोस्मितेकर्तुंमोघमागमनंखग ॥ नचाशामस्यविप्रर्षेर्वितथीकर्तुमुत्सहे ॥७॥ तत्तुदा
स्यामियत्कार्यमिदंसंपादयिष्यति ॥ अभिगम्यहताशोहिनिवृत्तोदहतेकुलं॥८॥नातःपरंवैनतेयकिंचित्पापिष्ठमुच्यते ॥ ययाशानाशनाल्लोकेदेहिनास्तीतिवाव
च:॥ ९॥ हताशोत्यकृतार्थःसन्हतःसंभावितोनरः॥ हिनस्तितस्यपुत्रांश्चपौत्रांश्चाकुर्वतोहितं॥ १०॥तस्माच्चतुर्णांवंशानांस्थापयित्रीसुतामम ॥ इयंसुरसुतप्र
ख्यासर्वधर्मोपचायिनी॥ ११॥सदादेवमनुष्याणामसुराणांचगालव ॥ कांक्षितारूपतोबालासुतामेप्रतिगृह्यतां॥ १२ ॥ अस्याःशुल्कंप्रदास्यंतिनृपाराज्यम
पिधुवं ॥ किंपुनःश्यामकर्णानांहयानांद्वेचतुःशते ॥ १३ ॥ सभवान्प्रतिगृह्णातुममैतांमाधवींसुतां ॥ अहंदौहित्रवान्स्यांवैवरएषममप्रभो॥ १४॥प्रतिगृह्यचतां
कन्यांगालवःसहपक्षिणा ॥ पुनर्द्रक्ष्यावइत्युक्त्वाप्रतस्थेसहकन्यया॥ १५॥ उपलभ्यमिदंद्वारमश्वानामितिचांडजः ॥ उक्त्वागालवमापृच्छ्यजगामभवनंस्वकं
॥ १६ ॥ गतेपतगराजेतुगालवःसहकन्यया ॥ चिंतयानःक्षमंदानेराज्ञांवैशुल्कतोऽगमत् ॥ १७ ॥ सोगच्छन्मनसेक्ष्वाकुंहर्यश्वंराजसत्तमं॥अयोध्यायांमहा
वीर्यंचतुरंगबलान्वितम् ॥ १८॥ कोशधान्यबलोपेतंप्रियपौरंद्विजप्रियम् ॥प्रजाभिकामंशाम्यंतंकुर्वाणंतपउत्तमम्॥ १९॥ तमुपागम्यविप्रःसहर्यश्वंगालवो
ब्रवीत्॥कन्येयंममराजेंद्रप्रसवैःकुलवर्धिनी ॥ २० ॥ इयंशुल्केनभार्यार्थंहर्यश्वप्रतिगृह्यतां ॥ शुल्कंतेकीर्तयिष्यामितच्छ्रुत्वासंप्रधार्यतां॥२१॥ ॥इतिश्रीम०
उद्यो०भग०गालवचरितेपंचदशाधिकशततमोऽध्यायः॥ ११५॥ ॥७॥ ॥१५॥१६॥१७॥१८॥१९॥२०॥२१॥ ॥इतिउ०नै०भा०पंचदशाधिकशततमोऽध्यायः॥११५॥

॥ ११५ ॥

हर्यश्वइति ॥ १ ॥ षट्सुकरपृष्ठयोःपादपृष्ठयोःकुचयोश्च स्तनयोर्नितंबयोश्चसुषोश्चेतिप्राचः वक्षःकुक्ष्यलकस्कंधकरवकंषडुन्नतमितिकाशीखंडोक्तिः समसुसूक्ष्मात्वक्केशदशनेषुकरांगुलिषुपादांगुलिषु

नारदउवाच॥ ॥हर्यश्वस्त्ववबवीद्राजाविचिंत्यबहुधाततः॥ दीर्घमुष्णंचनिःश्वस्यप्रजाहेतोर्नृपोत्तमः ॥ १ ॥ उन्नतेषून्नताषट्सुसूक्ष्मासूक्ष्मेषुसप्तसु ॥ गंभीरा
त्रिषुगंभीरेष्वियंरक्ताचपंचसु॥ २॥बहुदेवासुरालोकाबहुगंधर्वदर्शना॥ बहुलक्षणसंपन्नाबहुप्रसवधारिणी॥३॥समर्थेयंजनयितुंचक्रवर्तिनमात्मजम्॥ब्रू
हिशुल्कंद्विजश्रेष्ठसमीक्ष्यविभवंमम ॥ ४ ॥ ॥गालवउवाच॥ ॥एकतःश्यामकर्णानांशतान्यष्टौप्रयच्छमे॥हयानांचंद्रशुभ्राणांदेशजानांवपुष्मताम्॥५॥त
त्सलभवित्रीयंपुत्राणांजननीशुभा॥ अरणीवहुताशानांयोनिरायतलोचना॥ ६॥ ॥नारदउवाच॥ ॥एतच्छ्रुत्वावचोराजाहर्यश्वःकाममोहितः॥ उवाच
गालवंदीनोराजर्षिर्क्रमिसत्तमम्॥७॥द्वेमेशतेसंनिहितेहयानांयद्विधास्तव॥एष्टव्याःशतशस्त्वन्येचरंतिममवाजिनः॥८॥सोहमेकमपत्यंवैजनयिष्यामिगाल
व॥ अस्यामेतंभवान्कामंसंपादयतुमेवरम्॥९॥एतच्छ्रुत्वातुसाकन्यागालवंवाक्यमब्रवीत्॥ ममदत्तोवरःकश्चिल्लेनचिद्ब्रह्मवादिना॥१०॥ प्रसूत्यंतेप्रसूत्यं
तेकन्यैवत्वंभविष्यसि॥ सत्वंददस्वमांराज्ञेप्रतिगृह्यहयोत्तमान्॥११॥ नृपेभ्योहिचतुर्भ्यस्तेपूर्णान्यष्टौशतानिमे॥ भविष्यंतितथापुत्रामम चत्वारएवच॥१२॥
क्रियतामुपसंहारोगुर्वर्थंद्विजसत्तम॥ एषातावन्ममप्रज्ञायथावामन्यसेद्विज॥१३॥ एवमुक्तस्तुसमुनिःकन्ययागालवस्तदा॥ हर्यश्वंपृथिवीपालमिदंवचन
मब्रवीत्॥१४॥इयंकन्यानरश्रेष्ठहर्यश्वप्रतिगृह्यताम्॥ चतुर्भागेनशुल्कस्यजनयस्वैकमात्मजम्॥१५॥ प्रतिगृह्यसतांकन्यांगालवंप्रतिनंद्यच ॥ समयेदेशका
लेचलब्धवान्सुतमीप्सितम्॥ १६॥ ततोवसुमनानामवसुभ्योवसुमत्तरः ॥ वसुप्रख्योनरपतिःसबभूववसुप्रदः॥ १७॥ अथकालेपुनर्धीमान्गालवःप्रत्युप
स्थितः॥ उपसंगम्यचोवाचहर्यश्वंप्रीतमानसं॥ १८॥ जातानृपसुतस्तेयंबालोभास्करसंनिभः॥कालोगंतुंनरश्रेष्ठभिक्षार्थमपरंनृपं॥ १९॥ हर्यश्वःसत्यवचने
स्थितःस्थित्वाचपौरुषे॥ दुर्लभत्वाद्धयानांचप्रददौमाधवींपुनः॥२०॥ माधवीचपुनर्दीनांपरित्यज्यनृपश्रियं॥कुमारीकामतोभूत्वागालवंपृष्ठतोन्वगात्॥२१॥

तदुभयपर्वसुचसूक्ष्मा त्रिषुस्वरसत्वनाभिषुगंभीरा पंचसुपाणितलेनेत्रांतेतालुनिजिह्वायांअधरोष्ठेचरक्ता ॥ २ ॥ बहुभिर्देवैरसुरैश्चआलोकयितुंयोग्याबहुदेवासुरालोका गंधर्वाणांदर्शनंशास्त्रंगीतादिविद्या
यस्यांसातथा ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ कामतइच्छयायोगबलेनकुमारीभूत्वायौवनंपरित्यज्येत्यर्थः ॥२१॥

॥२२॥ ॥ इतिउद्योगप॰नैलकंठीयेभारतभावदीपेषोडशाधिकशततमोऽध्यायः ॥ ११६ ॥ ॥ ७ ॥ ॥ महावीर्यइति ॥ १ ॥२॥३॥४॥५॥६॥७॥८॥९॥१०॥११॥१२॥१३॥१४॥१५॥१६॥१७॥

त्वय्येवतावत्तिष्ठंतुहयाइत्युक्तवान्द्विजः॥ प्रययौकन्ययासार्धंदिवोदासंप्रजेश्वरम्॥२२॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिगालवचरिते षोडशाधिकशततमोऽध्यायः॥ ११६॥ ॥७॥ ॥गालवउवाच॥ ॥महावीर्योमहीपालःकाशीनामीश्वरःप्रभुः॥दिवोदासइतिख्यातोभैमसेनिर्नराधिपः ॥ १ ॥तत्रगच्छावहेभद्रेशनैरागच्छमाशुचः॥ धार्मिकःसंयमेयुक्तःसत्येचैवजनेश्वरः॥ २ ॥ ॥नारदउवाच॥ ॥तमुपागम्यसमुनिर्न्यायतस्तेनसत्कृतः॥गा लवःप्रसवस्यार्थेतंनृपंप्रत्यचोदयत्॥ ३ ॥ ॥दिवोदासउवाच॥ ॥श्रुतमेतन्मयापूर्वंकिमुक्तावित्तरंद्विज॥ कांक्षितोहिमयैषोर्थःश्रुत्वैवद्विजसत्तम॥४॥एत च्चमेबहुमतंयदुत्सृज्यनराधिपान्॥मामेवमुपयातोसिभाविचैतदसंशयम्॥५॥सएवविभवोस्माकमश्वानामपिगालव॥अहमप्येकमेवास्यांजनयिष्यामि पार्थिवम्॥ ६॥ तथेत्युक्ताद्विजश्रेष्ठःप्रादात्कन्यांमहीपतेः ॥ विधिपूर्वांचतांराजाकन्यांप्रतिगृहीतवान्॥ ७॥रेमेसतस्यांराजर्षिःप्रभावत्यांयथारविः॥स्वाहा यांचयथावह्निर्यथाशच्यांचवासवः ॥ ८ ॥ यथाचंद्रश्ररोहिण्यांयथाधूमोर्णायायमः॥वरुणश्चयथागौर्यांयथाचर्ष्यांधनेश्वरः॥ ९ ॥ यथानारायणोलक्ष्म्यां जाह्नव्यांचयथोदधिः ॥ यथारुद्रश्ररुद्राण्यांयथावेद्यांपितामहः॥ १० ॥ अदृश्यंत्यांचवासिष्ठोवसिष्ठश्चाक्षमालया॥ च्यवनश्चसुकन्यायांपुलस्त्यःसंध्ययाय था॥ ११ ॥ अगस्त्यश्चापिवैदर्भ्यांसावित्र्यांसत्यवान्यथा ॥ यथाभृगुःपुलोमायामदित्यांकश्यपोयथा॥ १२॥रेणुकायांयथार्चीकोहैमवत्यांचकौशिकः॥ बृ हस्पतिश्चतारायांशुक्रश्चशतपर्वणा॥ १३॥ यथाभूम्यांभूमिपतिरुर्वश्यांचपुरूरवाः॥ ऋचीकःसत्यवत्यांचसरस्वत्यांयथामनुः॥ १४॥ शकुंतलायांदुष्यंतोधृ त्यांधर्मश्चशाश्वतः॥ दमयंत्यांनलश्चैवसत्यवत्यांचनारदः ॥ १५ ॥ जरत्कारुर्जरत्कार्वांपुलस्त्यश्चप्रतीच्यया॥ मेनकायांयथोर्णायुस्तुंबुरुश्चैवरंभया॥ १६॥ वासुकिःशतशीर्षायांकुमार्यांचधनंजयः॥ वैदेत्यांचयथारामोरुक्मिण्यांचजनार्दनः ॥ १७॥तथातुरममाणस्यदिवोदासस्यभूपतेः॥ माधवीजनयामासपु त्रमेकंप्रतर्दनम्॥१८॥अथाजगामभगवान्दिवोदासंसगालवः ॥ समयेसमनुप्राप्तेवचनंचेदमब्रवीत्॥१९॥ निर्यातयतुमेकन्यांभवांस्तिष्ठंतुवाजिनः॥ या वदन्यत्रगच्छामिशुल्कार्थंपृथिवीपते॥ २०॥ दिवोदासोथधर्मात्मासमयेगालवस्यताम्॥ कन्यांनिर्यातयामासस्थितःसत्येमहीपतिः॥२१॥ ॥इतिश्रीम॰ उद्यो॰भग॰गालवचरितेसप्तदशाधिकशततमोऽध्यायः॥ ११७॥ ॥ १८॥ १९॥ २०॥ २१॥ ॥इतिउ॰नै॰भा॰सप्तदशाधिकशततमोऽध्यायः॥ ११७ ॥ ॥ ७ ॥

॥ ११६ ॥

तथेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ प्रवर्णंपुत्रोत्पत्तौतत्परम् ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ ॥ इतिउद्योगप॰नै॰भार

नारदउवाच॥ ॥तथैवतांश्रियंत्यक्त्वाकन्याभूत्वायशस्विनी ॥ माधवीगालवंविप्रमभ्ययात्सत्यसंगरा॥ १ ॥ गालवोविस्मृशन्नेवस्वकार्यगतमानसः॥ जगा मभोजनगरंद्रष्टुमौशीनरंनृपम्॥२॥तमुवाचाथगत्वासनृपतिंसत्यविक्रमम्॥ इयंकन्यासुतौद्वौतेजनयिष्यतिपार्थिवौ॥३॥अस्यांभवानवामार्थोभवितापुत्रे त्यचेहच॥ सोमार्कप्रतिसंकाशौजनयित्वासुतौनृप॥४॥शुल्कंतुसर्वधर्मज्ञहयानांचंद्रवर्चसाम्॥ एकतःश्यामकर्णानांदेयंमह्यंचतुःशतम्॥५॥गुर्वर्थोयंसमा रंभोनहयैःकृत्यमस्तिमे॥ यदिशक्यंमहाराजक्रियतामविचारितम्॥६॥ अनपत्योसिराजर्षेपुत्रौजनयपार्थिव॥ पितॄन्पुत्रप्लवेनत्वमात्मानंचैवतारय॥७॥नपु त्रफलभोक्ताहिराजर्षेपात्यतेदिवः॥ नयातिनरकंघोरंयथागच्छंत्यनात्मजाः॥८॥ एतच्चान्यच्चविविधंश्रुत्वागालवभाषितम्॥ उशीनरःप्रतिवचोददौतस्यनरा धिपः॥९॥ श्रुतवानस्मितेवाक्यंयथावदसिगालव॥ विधिस्तुबलवान्ब्रह्मन्प्रवर्णंहिमनोमम॥१०॥शतेद्वेतुमाश्वानामीदृशानांद्विजोत्तम॥ इतरेषांसहस्रा णिसुबहूनिचरंतिमे॥ ११॥ अहमप्येकमेवास्यांजनयिष्यामिगालव॥ पुत्रंद्विजगतंमार्गंगमिष्यामिपरैरहम्॥१२॥ मूल्येनापिसमंकुर्यांतवाहंद्विजसत्तम॥ पौरजानपदार्थंतुममार्थोनात्मभोगतः॥ १३॥ कामतोहिधनंराजापारक्यंयःप्रयच्छति ॥ नसधर्मेणधर्मात्मन्युज्यतेयशसानच॥ १४॥ सोहंप्रतिग्रहीष्यामि ददात्वेतांभवान्मम॥ कुमारींदेवगर्भाभामेकपुत्रभवायमे॥१५॥तथातुबहुधाकन्यामुक्तवंतंनराधिपम्॥ उशीनरंद्विजश्रेष्ठोगालवःप्रत्यपूजयत्॥१६॥उशी नरंप्रतिग्राह्यगालवःप्रययौवनम्॥ रेमेसतांसमासाद्यकृतपुण्यइवश्रियम्॥१७॥कंदरेषुचशैलानांनदीनांनिर्झरेषुच॥उद्यानेषुविचित्रेषुवनेषूपवनेषुच॥१८॥ हर्म्येषुरमणीयेषुप्रासादशिखरेषुच॥ वातायनविमानेषुतथागर्भगृहेषुच॥१९॥ततोस्यसमयेजज्ञेपुत्रोबालरविप्रभः॥ शिबिर्नाम्नाग्निविख्यातोयःसपार्थिव सत्तमः॥२०॥ उपस्थायसतंविप्रोगालवःप्रतिगृह्यच॥ कन्यांप्रयातस्तांराजन्दृष्टवान्विनतात्मजम्॥२१॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानप र्वणिगालवचरितेअष्टादशाधिकशततमोऽध्यायः॥ ११८॥ ॥७॥ ॥नारदउवाच॥ ॥गालवंवैनतेयोथप्रहसन्निदमब्रवीत्॥ दिष्ट्याकृतार्थंपश्या मिभवंतमिहवैद्विज॥१॥गालवस्तुवचःश्रुत्वावैनतेयेनभाषितम्॥ चतुर्भागावशिष्टंतदाचख्यौकार्यमस्यहि॥२॥सुपर्णस्त्वब्रवीदेनंगालवंवदतांवरः॥ प्रयत्न स्तेनकर्तव्योनैषसंपत्स्यतेतव॥३॥

॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ संतारेमार्गे ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ निर्यात्यप्रत्यर्प्य शिष्यायगालवाय ॥२०॥ २१॥२२॥२३॥२४॥ ॥ इतिउद्योग

पुरांहिकान्यकुब्जेवैगाधेःसत्यवतींसुताम्॥ भार्यार्थेवरयत्कन्यामृचीकस्तेनभाषितः॥४॥एकतःश्यामकर्णानांहयानांचंद्रवर्चसाम्॥ भगवन्दीयतांमह्यंसहस्र
मितिगालव ॥५॥ ऋचीकस्तुतथेत्युक्त्वावरुणस्यालयंगतः॥ अश्वतीर्थेहयान्लब्ध्वादत्तवान्पार्थिवायवै ॥ ६ ॥ इष्ट्वातेपुंडरीकेणदत्ताराज्ञाद्विजातिषु॥ तेभ्यो
द्वेद्वेशतेकीत्वाप्रायेतैःपार्थिवैःस्तदा॥७॥अपराण्यपिचत्वारिशतानिद्विजसत्तम॥ नीयमानानिसंतारेदत्तान्यासन्वितस्तया॥८॥एवंनशक्यमप्राप्यंप्रार्थुगाल
वकर्हिचित्॥ इमामश्वशताभ्यांवैद्वाभ्यांतस्मैनिवेदय॥ ९॥ विश्वामित्रायधर्मात्मन्षड्भिरश्वशतैःसह॥ ततोसिगतसंमोहःकृतकृत्योद्विजोत्तम॥१०॥ गालव
स्तंतथेत्युक्त्वासुपर्णसहितस्ततः॥ आदायाश्वांश्चकन्यांचविश्वामित्रमुपागमत्॥ ११ ॥ अश्वानांकांक्षितार्थानांषड्भिमानिशतानिवै॥ शतद्वयेनकन्येयंभवता
प्रतिगृह्यताम्॥ १२॥अस्यांराजर्षिभिःपुत्राजातावैधार्मिकास्त्रयः॥चतुर्थंजनयत्वेकंभवानपिनरोत्तमम्॥ १३॥पूर्णान्येवंशतान्यष्टौतुरगाणांभवंतुते॥भवतो
त्यनृणोभूत्वातपःकुर्यांयथासुखम्॥ १४॥ विश्वामित्रस्तुतंदृष्ट्वागालवंसहपक्षिणा॥ कन्यांचतांवरारोहामिदमित्यब्रवीद्वचः॥ १५॥ किमियंपूर्वमेवेहनदत्ता
ममगालव॥ पुत्राममैवचत्वारोभवेयुःकुलभावनाः॥ १६॥ प्रतिगृह्यामितेकन्यामेकपुत्रफलायवै॥ अश्वाश्चाश्रममासाद्यचरंतुममसर्वशः॥ १७॥ सतया
रममणोथविश्वामित्रोमहाद्युतिः॥ आत्मजंजनयामासमाधवीपुत्रमष्टकम्॥ १८॥ जातमात्रंसुतंतंचविश्वामित्रोमहामुनिः॥ संयोज्यार्थैस्तथाधर्मैरश्वैस्तैः
समयोजयत्॥ १९॥अथाष्टकःपुरंप्रायात्तदासोमपुरप्रभम्॥निर्यात्यकन्यांशिष्यायकौशिकोपिवनंययौ॥ २०॥ गालवोपिसुपर्णेनसहनिर्यात्यदक्षिणाम्॥म
नसातिप्रतीतेनकन्यामिदमुवाचह॥ २१॥ जातोदानपतिःपुत्रस्त्वयाशूरस्तथापरः॥ सत्यधर्मरतश्चान्योयज्वाचापितथापरः॥ २२॥ तदागच्छवरारोहेतारि
तस्तेपितासुतैः॥ चत्वारश्चैवराजानस्तथाचाहंसुमध्यमे॥२३॥ गालवस्त्वभ्यनुज्ञायसुपर्णपन्नगाशनम्॥पितुर्निर्यात्यतांकन्यांप्रययौवनमेवह॥ २४॥ ॥इ
तिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिगालवचरितेएकोनविंशत्यधिकशततमोऽध्यायः॥ ११९॥ ॥७॥ ॥नारदउवाच॥ ॥सतुराजापुनस्तस्याः
कर्तुकामःस्वयंवरम्॥ उपगम्याश्रमपदंगंगायमुनसंगमे॥ १॥ गृहीतमाल्यदामांतांरथमारोप्यमाधवीम्॥ पूरुर्यदुश्चभगिनीमाश्रमेपर्यधावताम्॥ २॥

॥ ११७ ॥

प०नैलकंठीयेभारतभावदीपेएकोनविंशत्यधिकशततमोऽध्यायः॥ ११९॥ ॥७॥ ॥सतुराजाआश्रमपदमुपगम्यकर्तुकामःअभूदितिशेषः ॥ १ ॥ पर्यधावतांवरान्वेषणायेत्यर्थः ॥ २ ॥

॥३॥४॥वनंवनवासम्॥५॥६॥आत्मनःचित्तस्यलघुतांरागद्वेषादिमलराहित्येनसूक्ष्मार्थभेदनेशीघ्रताम्॥ ७॥ ८॥ ९॥ व्याघ्राणांविप्रोषितंपर्यटनंयेषु ॥१०॥११॥ युयुजेयोगंप्राप्तवान् कालधर्मणामृत्युना

नागयक्षमनुष्याणांगंधर्वमृगपक्षिणाम्॥ शैलद्रुमवनौकानामासीत्तत्रसमागमः॥३॥नानापुरुषदेश्यानामीश्वरैश्चसमाकुलम्॥ऋषिभिर्ब्रह्मकल्पैश्चसमंता
दावृतंवनम्॥४॥ निर्दिश्यमानेषुतुसावरेषुवरवर्णिनी॥वरानुत्क्रम्यसर्वांस्तान्वरंवृतवतीवनम्॥५॥ अवतीर्यरथात्कन्यानमस्कृत्यचबंधुषु॥ उपगम्यवनंपुण्यं
तपस्तेपेययातिजा॥६॥ उपवासैश्चविविधैर्दीक्षाभिर्नियमैस्तथा॥ आत्मनोलघुतांकृत्वाबभूवमृगचारिणी॥ ७॥ वैदूर्यांकुरकल्पानिमृदूनिहरितानिच॥ च
रंतीश्लक्ष्णशष्पाणितिक्तानिमधुराणिच॥ ८॥ स्रवंतीनांचपुण्यानांसुरसानिशुचीनिच॥ पिबंतीवारिमुख्यानिशीतानिविमलानिच॥ ९॥ वनेषुमृगराजे
षुव्याघ्रविप्रोषितेषुच॥ दावाग्निविप्रयुक्तेषुशून्येषुगहनेषुच॥ १०॥ चरंतीहरिणैःसार्धंमृगीववनचारिणी॥चचारविपुलंधर्मंब्रह्मचर्येणसंवृतम्॥ ११॥ययाति
रपिपूर्वेषांराज्ञांवृत्तमनुष्ठितः॥ बहुवर्षसहस्रायुर्युयुजेकालधर्मणा॥ १२॥पूरुर्यदुश्चद्वौवंशेवर्धमानौनरोत्तमौ॥ ताभ्यांप्रतिष्ठितोलोकेपरलोकेचनाहुषः
॥ १३॥ महीपतेनरपतिर्ययातिःस्वर्गमास्थितः॥ महर्षिकल्पोनृपतिःस्वर्गाय्यफलभुग्विभुः॥ १४॥ बहुवर्षसहस्राख्येकालेबहुगुणेगते॥राजर्षिषुनिषण्णेषु
महीयःसुमहर्धिषु॥ १५॥ अवमेनेनरान्सर्वान्देवानृषिगणांस्तथा॥ ययातिर्मूढविज्ञानोविस्मयाविष्टचेतनः॥ १६॥ ततस्तंबुबुधेदेवःशक्रोबलनिषूदनः॥ ते
चराजर्षयःसर्वेधिग्धिगित्येवमब्रुवन्॥ १७॥ विचारश्चसमुत्पन्नोनिरीक्ष्यनहुषात्मजम्॥ कोन्वयंकस्यवाराज्ञःकथंवास्वर्गमागतः॥ १८॥ कर्मणाकेनसि
द्धोयंकवानेनतपश्चितम्॥ कथंवाज्ञायतेस्वर्गेकेनवाज्ञायतेप्युत॥ १९॥ एवंविचारयंतस्तेराजानंस्वर्गवासिनः॥ दृष्ट्वापप्रच्छुरन्योन्ययायातिंनृपतिंप्रति॥ २०॥
विमानपालाःशतशःस्वर्गद्वाराभिरक्षिणः॥ पृष्टाआसनपालाश्चनजानीमेत्यथाब्रुवन्॥ २१॥ सर्वेतेत्यावृतज्ञानानाभ्यजानंततंनृपम्॥समुहूर्तादथनृपोहतौ
जाश्चाभवत्तदा॥ २२॥ ॥ इतिश्रीम०उद्योगपर्वणिभ०गालवचरितेययातिमोहेविंशत्यधिकशततमोऽध्यायः॥ १२०॥ ॥७॥ ॥नारदउवाच॥
अथप्रचलितःस्थानादासनाच्चपरिच्युतः॥ कंपितेनेवमनसाधर्षितःशोकवह्निना॥ १॥ म्लानस्रग्भ्रष्टविज्ञानःप्रभ्रष्टमुकुटांगदः॥ विघूर्णन्स्रस्तसर्वांगःप्रभ्र
ष्टाभरणांबरः॥ २॥ अदृश्यमानस्तान्यस्मन्पश्यंश्चपुनःपुनः॥ शून्यःशून्येनमनसाप्रपतिष्यन्महीतलम्॥ ३॥

॥ १२ ॥ नाहुषःययातिः॥१३॥१४॥१५॥१६॥१७॥१८॥१९॥२०॥२१॥२२॥ ॥इतिउद्योगप०नैलकंठीयेभारतभावदीपेविंशत्यधिकशततमोऽध्यायः॥१२०॥ ॥७॥ ॥अथेति॥ १॥ २॥३॥

धर्मदूषणंपुण्यनाशकम् ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ प्रज्ञायसेहीनतेजस्त्वेनअप्रकाशत्वात् ॥ ८ ॥ ९ ॥ शिबिरौशीनरइत्येकः ॥ १० ॥ ११ ॥ एकइवशब्दःपादपूरणार्थः गंगानदीमिवधूममयीलेखामालंब्यनिपपातेतिसंबंधः

किंमयामनसाध्यातमशुभंधर्मदूषणम् ॥ येनाहंचलितःस्थानादितिराजाव्यचिंतयत् ॥ ४ ॥ ततुतत्रैवराजानःसिद्धाश्चाप्सरसस्तथा ॥ अपश्यंतनिरालंबंतंय यातिंपरिच्युतम् ॥ ५ ॥ अथैत्यपुरुषःकश्चित्क्षीणपुण्यनिपातकः ॥ ययातिमब्रवीद्राजन्देवराजस्यशासनात् ॥ ६ ॥ अतीवमदमत्तस्त्वंनकंचिन्नावमन्यसे ॥ मा नेनभ्रष्टःस्वर्गस्तेनार्हस्त्वंपार्थिवात्मज ॥ ७ ॥ नचप्रज्ञायसेगच्छपतस्वेतितमब्रवीत् ॥ पतेयंसत्स्वितिवचस्निरुक्तानहुषात्मजः ॥ ८ ॥ पतिष्यंश्चितयामासगतिं गतिमतांवरः ॥ एतस्मिन्नेवकालेतुनैमिषेपार्थिवर्षभान् ॥ ९ ॥ चतुरोपश्यतनृपस्तेषांमध्येपपातह ॥ प्रतर्दनोवसुमनाःशिबिरौशीनरोष्टकः ॥ १० ॥ वाजपेये नयज्ञेनतर्पयंतिसुरेश्वरम् ॥ तेषामध्वरजंधूमंस्वर्गद्वारमुपस्थितम् ॥ ११ ॥ ययातिरुपजिघ्रन्वैनिपपातमहींप्रति ॥ भूमौस्वर्गेचसंबद्धांनदींधूममयीमिव ॥ गंगां गामिवगच्छंतीमालंब्यजगतीपतिः ॥ १२ ॥ श्रीमत्स्ववभृथाग्र्येषुचतुर्षुप्रतिबंधुषु ॥ मध्येनिपतितोराजालोकपालोपमेषुसः ॥ १३ ॥ चतुर्षुहुतकल्पेषुराजर्सि हमहाग्निषु ॥ पपातमध्येराजर्षिर्ययातिःपुण्यसंक्षये ॥ १४ ॥ तमाहुःपार्थिवाःसर्वेदीप्यमानमिवश्रिया ॥ कोभवान्कस्यवाबंधुर्देशस्यनगरस्यवा ॥ १५ ॥ यक्षो वाप्यथवादेवोगंधर्वोराक्षसोपिवा ॥ नहिमानुषरूपोसिकोवार्थःकांक्ष्यतेत्वया ॥ १६ ॥ ॥ ययातिरुवाच ॥ ॥ ययातिरस्मिराजर्षिःक्षीणपुण्यश्च्युतोदिवः ॥ प तेयंसत्स्वितिध्यायन्भवत्सुपतितस्ततः ॥ १७ ॥ ॥ राजानऊचुः ॥ ॥ सत्यमेतद्भवतुतेकांक्षितंपुरुषर्षभ ॥ सर्वेषांनःक्रतुफलंधर्मश्चप्रतिगृह्यतां ॥ १८ ॥ ॥ यया तिरुवाच ॥ ॥ नाहंप्रतिग्रहधनोब्राह्मणःक्षत्रियोत्यहम् ॥ नचमेप्रवणाबुद्धिःपरपुण्यविनाशने ॥ १९ ॥ ॥ नारदउवाच ॥ ॥ एतस्मिन्नेवकालेतुऋगचर्याक्रमाग तां ॥ माधवींप्रेक्ष्यराजानस्तेभिवाद्येदमब्रुवन् ॥ २० ॥ किमागमनकृत्यंतेकिंकुर्मःशासनंतव ॥ आज्ञाप्याहिवयंसर्वेतवपुत्रास्तपोधने ॥ २१ ॥ तेषांतद्भाषितंश्रु त्वामाधवीपरयामुदा ॥ पितरंसमुपागच्छद्ययातिंसाववंदच ॥ २२ ॥ स्पृष्ट्वामूर्धनितान्पुत्रांस्तापसीवाक्यमब्रवीत् ॥ दौहित्रास्तवराजेंद्रममपुत्रानतेपराः ॥ २३ ॥ इमेत्वांतारयिष्यंतिदृष्टमेतत्पुरातन ॥ अहंतेदुहिताराजन्माधवीर्ऋगचारिणी ॥ २४ ॥ मयाप्युपचितोधर्मस्तवोर्धप्रतिगृह्यतां ॥ यस्माद्राजन्नराःसर्वेअपत्यफ लभागिनः ॥ २५ ॥ तस्मादिच्छंतिदौहित्रान्यथात्वंवसुधाधिप ॥ ततस्तेपार्थिवाःसर्वेशिरसाजननींतदा ॥ २६ ॥

॥ ११८ ॥

॥ १२ ॥ प्रतिबंधुषुदौहित्ररूपेषु ॥ १३ ॥ १४ ॥ बंधुःपालयिता ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ पुरातनेअनादिकालप्रवृत्तेवेदे ॥ २४ ॥ २५ ॥ २६ ॥

॥ २७ ॥ अष्टभागेनअष्टमांशेन ॥ २८ ॥ ॥ इतिउ० नै० भा० एकविंशाधिकशततमोऽध्यायः ॥ १२१ ॥ ॥ ७ ॥ ॥ प्रत्यभिज्ञातेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ आधानेअग्न्याधानोपलक्षितेश्रौतधर्मे ॥ ५ ॥ ६ ॥ ७ ॥ विहार्येषुपरि

अभिवाद्यनमस्कृत्यमातामहमथाब्रुवन् ॥ उच्चैरनुपमैःस्निग्धैःस्वरैरापूर्यमेदिनीम् ॥ २७ ॥ मातामहंनृपतयस्तारयंतोदिवश्च्युतम् ॥ अथतस्मादुपगतोगालवो प्याहपार्थिवम् ॥ तपसोमेऽष्टभागेनस्वर्गमारोहतांभवान् ॥ २८ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिगालवचरितेययातिस्वर्गभ्रंशेएकविं शाधिकशततमोऽध्यायः ॥ १२१ ॥ ॥ ७ ॥ ॥ नारदउवाच ॥ ॥ प्रत्यभिज्ञातमात्रोथसद्भिस्तैर्नरपुंगवः ॥ समारुरोहनृपतिरस्पृशन्वसुधातलम् ॥ ययातिर्दिव्य संस्थानोबभूवविगतज्वरः ॥ १ ॥ दिव्यमाल्यांबरधरोदिव्याभरणभूषितः ॥ दिव्यगंधगुणोपेतोनपृथ्वीमस्पृशत्पदा ॥ २ ॥ ततोवसुमनाःपूर्वमुच्चैरुच्चारयन्वचः ॥ ख्यातोदानपतिर्लोकेव्याजहारनृपंतदा ॥ ३ ॥ प्राप्तवानस्मियल्लोकेसर्ववर्णैश्चगर्हया ॥ तदप्यथचदास्यामितेनसंयुज्यतांभवान् ॥ ४ ॥ यत्फलंदानशीलस्य क्षमाशीलस्ययत्फलम् ॥ यच्चमेफलमाधानेतेनसंयुज्यतांभवान् ॥ ५ ॥ ततःप्रतर्दनोप्याहवाक्यंक्षत्रियपुंगवः ॥ यथाधर्मरतिर्नित्यंनित्यंयुद्धपरायणः ॥ ६ ॥ प्रा प्तवानस्मियल्लोकेक्षत्रवंशोद्भवंयशः ॥ वीरशब्दफलंचैवतेनसंयुज्यतांभवान् ॥ ७ ॥ शिबिरौशीनरोधीमानुवाचमधुरांगिरम् ॥ यथाबालेषुनारीषुवैहार्येषुतथै वच ॥ ८ ॥ संगरेषुनिपातेषुतथातद्यासनेषुच ॥ अनृतंनोक्तपूर्वंमेतेनसत्येनखंव्रज ॥ ९ ॥ यथाप्राणांश्चराज्यंचराजन्कामसुखानिच ॥ त्यजेयंनपुनःसत्यंतेनस त्येनखंव्रज ॥ १० ॥ यथासत्येनमेधर्मोयथासत्येनपावकः ॥ प्रीतःशतक्रतुश्चैवतेनसत्येनखंव्रज ॥ ११ ॥ अष्टकस्त्वथराजर्षिःकौशिकोमाधवीसुतः ॥ अनेक शतयज्वानंनाहुषंप्राप्यधर्मवित् ॥ १२ ॥ शतशःपुंडरीकामेगोसवाश्वरिताःप्रभो ॥ क्रतवोवाजपेयाश्चतेषांफलमवाप्नुहि ॥ १३ ॥ नमेरत्नानिनधनंनतथान्येप रिच्छदाः ॥ क्रतुष्वनुपयुक्तानितेनसत्येनखंव्रज ॥ १४ ॥ यथायथाहिजल्पंतिदौहित्रास्तंनराधिपम् ॥ तथातथावसुमतीत्यक्काराजादिवंययौ ॥ १५ ॥ एवंसर्वेस मस्तैस्तेराजानःसुकृतैस्तदा ॥ ययातिंस्वर्गतोभ्रष्टंतारयामासुरंजसा ॥ १६ ॥ दौहित्राःस्वेनधर्मेणयज्ञदानकृतेनवै ॥ चतुर्षुराजवंशेषुसंभूताःकुलवर्धनाः ॥ मा तामहंमहाप्राज्ञंदिवमारोपयंतते ॥ १७ ॥ ॥ राजानऊचुः ॥ ॥ राजधर्मगुणोपेताःसर्वधर्मगुणान्विताः ॥ दौहित्रास्तेवयंराजन्दिवमारोहपार्थिव ॥ १८ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिगालवचरितेययातिस्वर्गारोहणेद्वाविंशत्यधिकशततमोऽध्यायः ॥ १२२ ॥ ॥ ७ ॥ ॥ ॥

हसनेनलालनीयेषुस्यालसंबंध्यादिषु ॥ ८ ॥ आपत्सुसंकटेषुव्यसनेषुयूतादिषुखंस्वर्गी ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ इतिउ० नै० भा० द्वाविंशत्यधिकशततमोऽध्यायः ॥ १२२ ॥

सद्भिरिति ॥ १ ॥ वर्षेणवृष्ट्या ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ चतुष्पादःतपोयज्ञज्ञानदानवान्अहिंसासत्यमस्तेयमानृण्यंचेतिवापादाः ॥ ७ ॥ सुकृतेनसम्यक्तपादितेनकर्मणामयासमोन्योनास्तीतिवाक्यं

नारदउवाच॥ ॥सद्भिरारोपितःस्वर्गपार्थिवैर्भूरिदक्षिणैः ॥ अभ्यनुज्ञायदौहित्रान्ययातिर्दिवमास्थितः ॥ १ ॥ अभिवृष्टश्चवर्षेणनानापुष्पसुगंधिना ॥ परिष्वक्तश्चपुण्येनवायुनापुण्यगंधिना ॥ २ ॥ अचलंस्थानमासाद्यदौहित्रफलनिर्जितम् ॥ कर्मभिःस्वैरुपचितोजज्वालपरयाश्रिया॥ ३ ॥ उपगीतोपनृत्तश्चगंधर्वाप्सरसांगणैः ॥ प्रीत्याप्रतिगृहीतश्चस्वर्गेदुंदुभिनिःस्वनैः ॥ ४ ॥ अभिष्टुतश्चविविधैर्देवराजर्षिचारणैः ॥ अर्चितश्चोत्तमार्घेणदैवतैरभिनंदितः ॥ ५ ॥ प्राप्तःस्वर्गफलंचैवतमुवाचपितामहः ॥ निर्वृतंशांतमनसंवचोभिरुपयन्निव ॥ ६ ॥ चतुष्पादस्त्वयाधर्मश्चितोलोक्येनकर्मणा ॥ अक्षयस्तवलोकोयंकीर्तिश्चैवाक्षयादिवि ॥ ७ ॥ पुनस्त्वयैवराजर्षेसुकृतेनविपातितम् ॥ आवृतंतमसाचेतःसर्वेषांस्वर्गवासिनाम् ॥ ८ ॥ येनत्वांनाभिजानंतिततोऽज्ञातोसिपातितः ॥ प्रीत्यैवचासिदौहित्रैस्तारितस्त्वमिहागतः ॥ ९ ॥ स्थानंचप्रतिपन्नोसिकर्मणास्वेननिर्जितम् ॥ अचलंशाश्वतंपुण्यमुत्तमंध्रुवमव्ययम् ॥ १० ॥ ॥ययातिरुवाच॥ ॥भगवन्संशयोमेस्तिकश्चित्तंछेत्तुमर्हसि ॥ नह्यन्यमहमर्हामिप्रष्टुंलोकपितामह ॥ ११ ॥ बहुवर्षसहस्रांतंप्रजापालनवर्धितम् ॥ अनेकक्रतुदानौघैरर्जितंमेमहत्फलम् ॥ १२ ॥ कथंतदल्पकालेनक्षीणंयेनास्मिपातितः ॥ भगवन्वेत्थलोकांश्चशाश्वतान्ममनिर्मितान् ॥ कथंनुममतत्सर्वंविप्रनष्टंमहाद्युते ॥ १३ ॥ ॥पितामहउवाच॥ ॥बहुवर्षसहस्रांतंप्रजापालनवर्धितम् ॥ अनेकक्रतुदानौघैर्यत्त्वयोपार्जितंफलम् ॥ १४ ॥ तदनेनैवदोषेणक्षीणंयेनासिपातितः ॥ अभिमानेनराजेंद्रधिक्कृतःस्वर्गवासिभिः ॥ १५ ॥ नायंमानेनराजर्षेनबलेननहिंसया ॥ नशाठ्येननमायाभिर्लोकोभवतिशाश्वतः ॥ १६ ॥ नावमान्यास्त्वयाराजन्नधमोत्कृष्टमध्यमाः ॥ नहिमानप्रदग्धानांकश्चिदस्तिशमःक्वचित् ॥ १७ ॥ पतनारोहणमिदंकथयिष्यंतियेनराः ॥ विषमाण्यपितेप्राप्तास्तरिष्यंतिनसंशयः ॥ १८ ॥ ॥नारदउवाच॥ ॥एषदोषोभिमानेनपुराप्राप्तोययातिना ॥ निर्बंधतातिमात्रंचगालवेनमहीपते ॥ १९ ॥ श्रोतव्यंहितकामानांसुहृदांहितमिच्छताम् ॥ नकर्तव्योहिनिर्बंधोनिर्बंधोहिक्षयोदयः ॥ २० ॥ तस्मात्त्वमपिगांधारेमानंक्रोधंचवर्जय ॥ संधत्स्वपांडवैर्वीरसंरंभंत्यजपार्थिव ॥ २१ ॥

योगेणतमसाक्रोधेन ॥ ८ ॥ नाभिजानंतिश्रेष्ठोयमितिनांगीकुर्वंतिततोहेनोःअज्ञातःअकीर्त्यातिरोभूतः ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ शाठ्यंविश्वासघातःमायाअद्भुतार्थप्रदर्शनरंजनपूर्वकंपरवंचनम् ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

पापिष्ठत्वेनत्वत्कृतंपापंत्वयैवभोक्तव्यंननुभ्रात्रादिभिरित्याशयेनाह ददातीति किंतुकर्तैवतदाप्नोति॥ २२ ॥ बहुधानानाशास्त्रयुक्त्यादिभिः प्रधारितंनिश्चितम् ॥ २३ ॥ ॥ इतिउ० नै० भारतभावदीपेत्रयोविं

ददातियत्पार्थिवयत्करोतियद्वातपस्तप्यतियज्जुहोति ॥ ननस्यनाशोस्तिनचापकर्षोनान्यस्तदश्नातिसएवकर्ता ॥ २२ ॥ इदंमहाख्यानमनुत्तमंहितंबहुश्रुतानांगतरोपरागिणाम् ॥ समीक्ष्यलोकेबहुधाप्रधारितंत्रिवर्गदृष्टिःपृथिवीमुपाश्नुते ॥ २३ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिगालवचरितेत्रयोविंशत्यधिकशततमोऽध्यायः ॥ १२३ ॥ ॥५॥ ॥धृतराष्ट्रउवाच॥ ॥भगवन्नेवमेवैतद्यथावदसिनारद ॥ इच्छामिचाहमप्येवंनत्वीशोभगवन्नहम् ॥ १ ॥ ॥ वैशंपायनउवाच॥ ॥ एवमुक्काततःकृष्णमभ्यभाषतकौरवः ॥ स्वर्ग्यंलोक्यंचमामात्यधर्म्यंन्याय्यंचकेशव ॥ २ ॥ नत्वहंस्ववशस्तातक्रियमाणंनमेप्रियम् ॥ अंगदुर्योधनंकृष्णमंदंशास्त्रातिगंमम ॥ ३ ॥ अनुनेतुंमहाबाहोयतस्वपुरुषोत्तम ॥ नश्रृणोतिमहाबाहोवचनंसाधुभाषितम् ॥ ४ ॥ गांधार्याश्चर्षीकेशविदुरस्यचधीमतः ॥ अन्येषांचैवसुहृदांभीष्मादीनांहितैषिणाम् ॥ ५ ॥ सत्वंपापमतिंक्रूरंपापचित्तमचेतनम् ॥ अनुशाधिदुरात्मानंस्वयंदुर्योधनंनृपम् ॥ ६ ॥ सुहृत्कार्यंतुसुमहत्कृतंतेस्याज्जनार्दन ॥ ततोभ्यावृत्यवार्ष्णेयदुर्योधनममर्षणम् ॥ ७ ॥ अब्रवीन्मधुरांवाचंसर्वधर्मार्थतत्त्ववित् ॥ दुर्योधननिबोधेदंमद्वाक्यंकुरुसत्तम ॥ ८ ॥ शर्मार्थंतेविशेषेणसानुबंधस्यभारत ॥ महाप्रज्ञकुलेजातःसाध्वेतत्कर्तुमर्हसि ॥ ९ ॥ श्रुतवृत्तोपसंपन्नःसर्वैःसमुदितोगुणैः ॥ दौष्कुलेयादुरात्मानोनृशंसानिरपत्रपाः ॥ १० ॥ तएतदीदृशंकुर्युर्यथात्वंतातमन्यसे ॥ धर्मार्थयुक्तालोकेस्मिन्प्रवृत्तिर्लक्ष्यतेसताम् ॥ ११ ॥ असतांविपरीतातुलक्ष्यतेभरतर्षभ ॥ विपरीतात्वियंवृत्तिरसकृल्लक्ष्यतेत्वयि ॥ १२ ॥ अधर्मश्चानुबंधोत्रघोरःप्राणहरोमहान् ॥ अनिष्टश्चानिमित्तश्चनचशक्यश्चभारत ॥ १३ ॥ तमनर्थंपरिहरन्नात्मश्रेयःकरिष्यसि ॥ भ्रातॄणामथभृत्यानांमित्राणांचपरंतप ॥ १४ ॥ अधर्म्यादयशस्याच्चकर्मणस्त्वंप्रमोक्ष्यसे ॥ प्राज्ञैःशूरैर्महोत्साहैरात्मवद्भिर्बहुश्रुतैः ॥ १५ ॥ संधत्स्वपुरुषव्याघ्रपांडवैर्भरतर्षभ ॥ तद्धितंचप्रियंचैवधृतराष्ट्रस्यधीमतः ॥ १६ ॥ पितामहस्यद्रोणस्यविदुरस्यमहामतेः ॥ कृपस्यसोमदत्तस्यबाह्लीकस्यचधीमतः ॥ १७ ॥ अश्वत्थाम्नोविकर्णस्यसंजयस्यविविंशतेः ॥ ज्ञातीनांचैवभूयिष्ठंमित्राणांचपरंतप ॥ १८ ॥ शमेशर्मभवेत्तातसर्वस्यजगतस्तथा ॥ क्षीमानसिकुलेजातःश्रुतवानृशंसवान् ॥ तिष्ठतातपितुःशास्त्रेमातुश्चभरतर्षभ ॥ १९ ॥ एतच्छ्रेयोहिमन्यंतेपितायच्छास्तिभारत ॥ उत्तमापद्गतःसर्वःपितुःस्मरतिशासनम् ॥ २० ॥

शत्यधिकशततमोऽध्यायः ॥ १२३ ॥ ॥५॥ ॥ भगवन्निति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ अभ्यावृत्यपुनःपुनः ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ शास्त्रेशासने ॥ १९ ॥ २० ॥

॥ २१ ॥ किंपाकंमहाकालफलम् ॥ २२ ॥ २३ ॥ निःश्रेयसंकल्याणम् ॥ २४ ॥ अर्थकामस्यइष्टार्थिनः ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ उपचरिताःप्रतारिताः ॥ ३२ ॥ ३३ ॥ ३४ ॥

रोचतेतेपितुस्तातपांडवैःसहसंगमः॥ सामात्यस्यकुरुश्रेष्ठतत्तुभ्यंतातरोचताम्॥२१॥ श्रुत्वायःसुहृदांशास्त्रंमर्त्योनप्रतिपद्यते॥विषाक्तंतेदहत्येनंकिंपाकमिव भक्षितम्॥ २२॥ यस्तुनिःश्रेयसंवाक्यंमोहान्नप्रतिपद्यते॥ सदीर्घसूत्रोहीनार्थःपश्चात्तापेनयुज्यते॥२३॥ यस्तुनिःश्रेयसंश्रुत्वाप्राकृतेवाभिपद्यते॥ आत्मनो मतमुत्सृज्यसलोकेसुखमेधते॥ २४॥ योर्थकामस्यवचनंप्रातिकूल्यान्नसृष्यते॥ शृणोतिप्रतिकूलानिद्विषतांवशमेतिसः॥ २५॥ सतांमतमतिक्रम्ययोऽसतांवर्ततेमते॥ शोचंतिव्यसनेतस्यसुहृदोनचिरादिव॥२६॥ मुख्यानमात्यानुत्सृज्ययोनिहीनान्निषेवते॥ सघोरामापदंप्राप्यनोत्तारमधिगच्छति॥२७॥ योऽसत्सेवीदृथाचारोनश्रोतासुहृदांसताम्॥परान्दृणीतेस्वान्द्वेष्टितंगौस्त्यजतिभारत॥२८॥सत्वंविरुध्यतैर्वीरैरन्येभ्यस्त्राणमिच्छसि॥अशिष्टेभ्योऽसमर्थेभ्योमूढेभ्योभरतर्षभ॥ २९॥ कोहिशक्रसमान्ज्ञातीनतिक्रम्यमहारथान्॥ अन्येभ्यस्त्राणमाशंसेत्त्वदन्योभुविमानवः॥ ३०॥ जन्मप्रभृतिकौंतेयानित्यंविनिकृतास्त्वया॥ नचतेजातुकुप्यंतिधर्मात्मानोहिपांडवाः॥ ३१॥ मिथ्योपचरितास्तातजन्मप्रभृतिबांधवाः॥ त्वयिसम्यङ्महाबाहोप्रतिपन्नायशस्विनः॥३२॥ त्वयापिप्रतिपत्तव्यंतथैवभरतर्षभ॥ स्वेषुबंधुषुमुख्येषुमामन्युवशमन्वगाः॥ ३३॥ त्रिवर्गयुक्तःप्राज्ञानामारंभोभरतर्षभ॥ धर्मार्थावनुरुध्यंतेत्रिवर्गासंभवेनराः॥ ३४॥ पृथक्त्वविनिविष्टानांधर्मधीरोनुरुध्यते॥ मध्यमोर्थंकलिंबालःकाममेवानुरुध्यते॥ ३५॥ इंद्रियैःप्राकृतोलोभाद्धर्मंविप्रजहातियः॥ कामार्थावनुपायेनलिप्समानोविनश्यति॥ ३६॥ कामार्थौलिप्समानस्तुधर्ममेवादितश्चरेत्॥ नहिधर्मादपैत्यर्थःकामोवापिकदाचन॥३७॥ उपायंधर्ममेवाहुस्त्रिवर्गस्यविशांपते॥ लिप्समानोहितेनाशुकक्षेग्निरिववर्धते॥ ३८॥ सत्वंतातानुपायेनलिप्ससेभरतर्षभ॥ आधिराज्यंमहद्दीप्तंप्रथितंसर्वराजसु॥ ३९॥ आत्मानंतक्षतित्येषवनंपरशुनायथा॥ यःसम्यग्वर्तमानेषुमिथ्याराजन्प्रवर्तते॥ ननस्यहिमतिंछिंद्याद्यस्यनेच्छेत्पराभवम्॥ ४०॥ अविच्छिन्नमतेरस्यकल्याणेधीयतेमतिः॥ आत्मवान्नावमन्येतत्रिषुलोकेषुभारत॥ ४१॥ अप्यन्यंप्राकृतंकिंचित्किमुतान्पांडवर्षभान्॥ अमर्षवशमापन्नोनकिंचिद्बुध्यतेजनः॥ ४२॥ छिद्यतेह्यातंतं सर्वंप्रमाणंपश्यभारत॥ श्रेयस्तेदुर्जनात्तातपांडवैःसहसंगतम्॥ ४३॥

अर्थकलिंकलहहेतुम् ॥ ३५ ॥ अनुपायेनहीनोपायेन ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ छिंद्यात्लोभादिनादूषयेत् ॥ ४० ॥ ४१ ॥ ४२ ॥ छिद्यतेप्रमाणमार्गात्च्युतोभवतीत्यर्थः प्रमाणंलोकवेदप्रसिद्धं दुर्जनात्सगिनःपांडवैःसंगतंश्रेयः ॥ ४३ ॥

॥ १२० ॥

निर्मितांवशीकरणेनोत्पादिताम्॥ ४४॥ ४५॥ ४६॥ ४७॥ ४८॥ ४९॥ ५०॥ ५१॥ यस्मिन्नर्जुनेजितेसतितेतवजितंजयःस्यात्॥ ५२॥ ५३॥ ५४॥ ५५॥ ५६॥ ५७॥ ५८॥ ५९॥ ६०॥ ६१॥ ६२॥ ॥ इतिउद्योगप०नै

तैर्हिसंप्रीयमाणस्त्वंसर्वान्कामानवाप्स्यसि॥ पांडवैर्निर्मितांभूमिंभुंजानोराजसत्तम॥ ४४॥ पांडवान्पुरतःकृत्वात्राणमाशंससेऽन्यतः॥ दुःशासनेदुर्विषहे कर्णेचापिससौबले॥ ४५॥ एतेष्वैश्वर्यमाधायभूतिमिच्छसिभारत॥ नचैतेतवपर्याप्ताज्ञानेधर्मार्थयोस्तथा॥ ४६॥ विक्रमेचाप्यपर्याप्ताःपांडवान्प्रतिभारत॥ नहीमेसर्वराजानःपर्याप्ताःसहितास्त्वया॥ ४७॥ क्रुद्धस्यभीमसेनस्यप्रेक्षितुंमुखमाहवे॥ इदंसंनिहितंतातसमग्रंपार्थिवंबलम्॥ ४८॥ अयंभीष्मस्तथाद्रोणःकर्णश्चायंतथाकृपः॥ भूरिश्रवाःसौमदत्तिरश्वत्थामाजयद्रथः॥ ४९॥ अशक्ताःसर्वएवैतेप्रतियोद्धुंधनंजयम्॥ अजेयोह्यर्जुनःसंख्येसर्वैरपिसुरासुरैः॥ मानुषैरपिगंधर्वैर्मायुद्धेचेताधिथाः॥ ५०॥ दृश्यतांवापुमान्कश्चित्समग्रेपार्थिवेबले॥ योर्जुनंसमरेप्राप्यस्वस्तिमान्व्रजेद्गृहान्॥ ५१॥ किंतेजनक्षयेणेहकृतेनभरतर्षभ॥ यस्मिन्जितेजितंतत्स्यात्पुमानेकःसदृश्यताम्॥५२॥ यःसदेवान्सगंधर्वान्सयक्षासुरपन्नगान्॥अजयत्खांडवप्रस्थेकर्त्तायुध्येतमानवः॥५३॥ तथाविराटनगरेश्रूयतेमहदद्भुतम्॥एकस्यचबहूनांचपर्याप्तंतन्निदर्शनम्॥५४॥ युद्धेयेनमहादेवःसाक्षात्संतोषितःशिवः॥नमजेयमनाधृष्यंविजेतुंजिष्णुमच्युतम्॥आशंससिहसमरेवीरमर्जुनमूर्जितम्॥५५॥मद्वितीयंपुनःपार्थंकःप्रार्थयितुमर्हति॥ युद्धेप्रतीपमायांतमपिसाक्षात्पुरंदरः॥ ५६॥ बाहुभ्यामुद्वहेद्भूमिंदहेत्क्रुद्धइमाःप्रजाः॥ पातयेद्दिविवादेवान्योर्जुनंसमरेजयेत्॥५७॥ पश्यपुत्रांस्तथाभ्रातॄन्ज्ञातीन्संबंधिनस्तथा॥ त्वत्कृतेनविनश्येयुरिमेभरतसत्तमाः॥ ५८॥ अस्तुशेषंकौरवाणांमापराभूदिदंकुलम्॥ कुलघ्नइतिनोच्येथानष्टकीर्तिर्नराधिप॥५९॥ त्वामेवस्थापयिष्यंतियौवराज्येमहारथाः॥ महाराज्येपितरंवृतराष्ट्रं जनेश्वरम्॥६०॥मातातश्रियमायांतीमवमंस्थाःसमुद्यताम्॥अर्धंप्रदायपार्थेभ्योमहतींश्रियमाप्नुहि॥६१॥ पांडवैःसंशमंकृत्वाकृत्वाचसुहृदांवचः॥ संप्रीयमाणोमित्रैश्चचिरंभद्राण्यवाप्स्यसि॥ ६२॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिभगवद्वाक्येचतुर्विंशाधिकशततमोऽध्यायः॥ १२४॥

वैशंपायनउवाच॥ ॥ततःशांतनवोभीष्मोदुर्योधनममर्षणम्॥केशवस्यवचःश्रुत्वाप्रोवाचभरतर्षभ॥१॥ कृष्णेनवाक्यमुक्तोसिसुहृदांशममिच्छता॥अन्यपद्यस्वतत्तातमामन्युवशमन्वगाः॥ २॥ अकृत्वावचनंतातकेशवस्यमहात्मनः॥ श्रेयोनजातुनसुखंनकल्याणमवाप्स्यसि॥३॥ धर्म्यमर्थ्यंमहाबाहुराहत्वांतात केशवः॥ तदर्थमभिपद्यस्वमाराजन्नीनशःप्रजाः॥ ४॥ लक्ष्मीयेभारतभावदीपेचतुर्विंशाधिकशततमोऽध्यायः॥१२४॥ ॥७॥ ततइति॥ १॥ २॥३॥ मानीनशःमानाशय॥४॥

॥ ५ ॥ ६ ॥ ७ ॥ कुलघ्नोमाभूरितिशेषः ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ एतेकर्णादयः कृत्यायजयाय परेषांअस्मदादीनाम् ॥ १३ ॥ माजीघनःमाघातय यंयतान्अजेयान्विद्धि ॥१४॥ १५॥ सुखे

ज्वलितांत्वमिमांलक्ष्मींभारतींसर्वराजसु॥जीवतोधृतराष्ट्रस्यदौरात्म्याद्भंशयिष्यसि॥५॥आत्मानंचसहामात्यंसपुत्रभ्रातृबांधवम्॥अहमित्यनयाबुद्ध्याजो
वितादुंशयिष्यसि॥६॥ अतिक्रामन्केशवस्यतथ्यंवचनमर्थवत्॥ पितुश्चभारतश्रेष्ठविदुरस्यचधीमतः॥७॥माकुलघ्नःकुपुरुषोदुर्मतिःकापथंगमः॥ मातरं
पितरंचैवमामज्ञीःशोकसागरे॥८॥ अथद्रोणोब्रवीत्तत्रदुर्योधनमिदंवचः॥ अमर्षवशमापन्ननिःश्वसंतंपुनःपुनः॥ ९॥धर्मार्थयुक्तंवचनमाहत्वांतातकेश
वः॥ तथाभीष्मःशांतनवस्तज्जुषस्वनराधिप॥१०॥ प्राज्ञौमेधाविनौदांतावर्थकामौबहुश्रुतौ॥ आहतुस्त्वांहितंवाक्यंतज्जुषस्वनराधिप॥११॥ अनुतिष्ठम
हाप्राज्ञकृष्णभीष्मौयदूचतुः॥माधवंबुद्धिमोहेनमावमंस्थाःपरंतप॥१२॥ येत्वांप्रोत्साहयंत्येतेनैतेकृत्यायकर्हिचित्॥ वैरंपरेषांग्रीवायांप्रतिमोक्ष्यंतिसंयुगे
॥१३॥ माजीघनःप्रजाःसर्वाःपुत्रान्भ्रातॄंस्तथैवच॥ वासुदेवार्जुनौयत्रविध्यजेयानलंहितान्॥१४॥ एतच्चैवमतंसत्यंसुहृदोःकृष्णभीष्मयोः॥ यदिनादा
स्यसेतातपश्चात्तप्स्यसिभारत॥१५॥ यथोक्तंजामदग्न्येनभूयानेषततोर्जुनः॥ कृष्णोहिदेवकीपुत्रोदेवैरपिसुदुःसहः॥ किंतेसुखप्रियेणेहप्रोक्तेनभरतर्षभ
॥१६॥एतत्तेसर्वमाख्यातंयथेच्छसितथाकुरु॥नहित्वामुत्सहेवक्तुंभूयोभरतसत्तम॥१७॥ ॥वैशंपायनउवाच॥ ॥तस्मिन्वाक्यांतरेवाक्यंक्षत्तापिविदुरो
ब्रवीत्॥दुर्योधनमभिप्रेक्ष्यधार्तराष्ट्रममर्षणम्॥१८॥ दुर्योधननशोचामित्वामहंभरतर्षभ॥इमौतुद्वौशोचामिगांधारींपितरंचते॥१९॥यावनाथौचरिष्येते
त्वयानाथेनदुर्हृदा॥हतमित्रौहतामात्यौलूनपक्षाविवांडजौ॥२०॥भिक्षुकौविचरिष्येतेशोचंतौपृथिवीमिमाम्॥कुलघ्नमीदृशंपापंजनयित्वाकुपूरुषम्॥२१॥
अथदुर्योधनंराजाधृतराष्ट्रोभ्यभाषत॥आसीनंभ्रातृभिःसार्धंराजभिःपरिवारितम्॥२२॥दुर्योधननिबोधेदंशौरिणोक्तंमहात्मना॥आदस्स्वशिवमत्यंतंयो
गक्षेमवदव्ययम्॥२३॥ अनेनहिसहायेनकृष्णेनाक्लिष्टकर्मणा॥इष्टान्सर्वानभिप्रायान्प्राप्स्यामःसर्वराजसु॥ २४॥सुसंहतःकेशवेनतातगच्छयुधिष्ठिरम्॥
चरस्वस्ययनंकृत्स्नंभरतानामनामयम्॥ २५॥ वासुदेवेनतीर्थेनतातगच्छस्वसंशमम्॥ कालप्राप्तमिदंमन्येमात्वंदुर्योधनातिगाः॥ २६॥

॥ १२१ ॥

हितावहंप्रियंचन्यायोपेतत्वात्तेनसुखप्रियेणप्रोक्तेनवचनेननतवमूढस्यकिं नकिमपीत्यर्थः॥ १६॥१७॥१८॥१९॥२०॥२१॥२२॥२३॥ २४॥ सुसंहतःसुष्ठुएकीभूतः॥ २५॥ तीर्थेनउपायेन॥ २६॥

अपराभवोजयः॥ २७॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेपंचविंशाधिकशततमोऽध्यायः॥ १२५॥ ॥७॥ ॥धृतराष्ट्रवचइति॥ १॥ मेधाग्नौसंग्रामाग्नौ मेधोयज्ञःयान्येवसंग्राम
नामानितानियज्ञनामानीतियास्कः॥ २॥ वैशसंवैरम्॥ ३॥ ४॥ ५॥ ६॥ ७॥ ८॥ ९॥ उरस्युनिपात्यंतइतिउत्तरेणसंबंधः॥१०॥ ११॥ १२॥ १३॥ रत्नयुक्तौषधिवद्वेष्टयतीतिरत्नौषधिरत्नांगु

शमंचेद्याचमानंत्वंप्रत्याख्यास्यसिकेशवम्॥त्वदर्थमभिजल्पंतंनतवास्यपराभवः॥२७॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिभीष्मादिवा
क्येपंचविंशाधिकशततमोऽध्यायः॥ १२५॥ ॥७॥ ॥ वैशंपायनउवाच॥ ॥धृतराष्ट्रवचःश्रुत्वाभीष्मद्रोणौसमव्यथौ॥दुर्योधनमिदंवाक्यमूचतुःशास
नातिगम्॥१॥ यावत्कृष्णावसन्नद्धौयावत्तिष्ठतिगांडिवम्॥यावद्भौम्योनमेधाग्नौजुहोतीहद्विषद्बलम्॥२॥यावन्नप्रेक्षतेकुद्धःसेनांतवयुधिष्ठिरः॥क्षीनिषेवोम
हेष्वासस्तावच्छाम्यतुवैशसम्॥३॥यावन्नदृश्यतेपार्थःस्वेप्यनीकेव्यवस्थितः॥ भीमसेनोमहेष्वासस्तावच्छाम्यतुवैशसम्॥४॥ यावन्नचरतेमार्गान्पृतनाम
भिधर्षयन्॥ भीमसेनोगदापाणिस्तावत्संशाम्यपांडवैः॥५॥ यावन्नशातयत्याजौशिरांसिगजयोधिनां॥ गदयावीरघातिन्याफलानीववनस्पतेः॥६॥ का
लेनपरिपक्वानितावच्छाम्यतुवैशसम्॥ नकुलःसहदेवश्चधृष्टद्युम्नश्चपार्षतः॥७॥ विराटश्चशिखंडीचशैशुपालिश्चदंशिताः॥ यावन्नप्रविशंत्येतेनक्राइवमहा
र्णवम्॥८॥कृतास्त्राःक्षिप्रमस्यंतस्तावच्छाम्यतुवैशसं॥यावन्नसुकुमारेषुशरीरेषुमहीक्षितां॥९॥गार्ध्रपत्त्राःपतंत्युग्रास्तावच्छाम्यतुवैशसम्॥चंदनागुरुदिग्धे
षुहारनिष्कधरेषुच॥ नोरःसुयावद्योधानांमहेष्वासैर्महेषवः॥ १०॥ कृतास्त्रैःक्षिप्रमस्यद्भिर्दूरपातिभिरायसाः॥ अभिलक्ष्यैर्निपात्यंतेतावच्छाम्यतुवैशसं
॥११॥ अभिवादयमानंत्वांशिरसाराजकुंजरः॥ पाणिभ्यांप्रतिगृह्णातुधर्मराजोयुधिष्ठिरः॥ १२॥ ध्वजांकुशपताकांकंदक्षिणंतंसुदक्षिणः॥ स्कंधेनिक्षि
पतांबाहुंशांतयेभरतर्षभ॥ १३॥ रत्नौषधिसमेतेनरत्नांगुलितलेनच॥ उपविष्टस्यपृष्ठंतेपाणिनापरिमार्जतु॥ १४॥शालस्कंधोमहाबाहुस्त्वांस्वजानोदकोद
रः॥ साम्नाऽभिवदतांचापिशांतयेभरतर्षभ॥ १५॥ अर्जुनेनयमाभ्यांचत्रिभिस्तैरभिवादितः॥ मूर्ध्नितान्समुपाघ्रायप्रेम्णाभिवदपार्थिव॥ १६॥ दृष्ट्वात्वांपां
डवैर्वीरैर्भ्रातृभिःसहसंगतम्॥ यावदानंदजाश्रूणिप्रमुंचंतुनराधिपाः॥ १७॥

लीयकं रत्नबंधसमेतेनेतिपाठःस्वच्छः आबंधोदृढबंधेस्यात्येमालंकारयोरपीतिविश्वः रत्नालंकारेणरत्नैःप्रेम्णाचवासमेतेनेतिभावः रत्नवदारक्तानिअंगुलितलानियस्यतेनरत्नांगुलितलेन॥ १४॥ स्वजानः
वक्षसिमिलितः स्वंजपरिष्वंग॥ १५॥ १६॥ १७॥

सर्वसंपत्परस्परंप्रीतिः ॥ १८ ॥ ॥ इतिउ०नै०भा०षड्विंशाधिकशततमोऽध्यायः ॥ १२६ ॥ ॥ ७ ॥ ॥ श्रुत्वेति ॥ १ ॥ प्रसमीक्ष्यविचार्य विभाष्यपरुषमुल्का ॥ २ ॥ ३ ॥ ४ ॥ व्यभिचारंअ

घुष्यतांराजधानीषुसर्वसंपन्महीक्षितां ॥ पृथिवीभ्रातृभावेनभुज्यतांविज्वरोभव ॥ १८ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिभीष्मद्रोणवा
क्येषड्विंशाधिकशततमोऽध्यायः ॥ १२६ ॥ ॥ ७ ॥ ॥ वैशंपायनउवाच ॥ ॥ श्रुत्वादुर्योधनोवाक्यमप्रियंकुरुसंसदि ॥ प्रत्युवाचमहाबाहुंवासुदेवंयशस्विनं
॥ १ ॥ प्रसमीक्ष्यभवानेतद्वक्तुमर्हतिकेशव ॥ मामेवहिविशेषेणविभाष्यपरिगर्हसे ॥ २ ॥ भक्तिवादेनपार्थानामकस्मान्मधुसूदन ॥ भवान्गर्हयतेनित्यंकिंसमी
क्ष्यबलाबलं ॥ ३ ॥ भवान्क्षत्ताचराजावाप्याचार्योवापितामहः ॥ मामेवपरिगर्हतेनान्यंकंचनपार्थिवं ॥ ४ ॥ नचाहंलक्षयेकंचिद्व्यभिचारमिहात्मनः ॥ अथस
र्वेभवंतोमांविद्विषंतिसराजकाः ॥ ५ ॥ नचाहंकंचिदत्यर्थमपराधमरिंदम ॥ विचिंतयन्प्रपश्यामिसुसूक्ष्ममपिकेशव ॥ ६ ॥ प्रियाभ्युपगतेद्यूतेपांडवामधुसूद
न ॥ जिताःशकुनिनाराज्यंतत्रकिंममदुष्कृतम् ॥ ७ ॥ यत्पुनर्द्रविणंकिंचित्तत्राजीयंतपांडवाः ॥ तेभ्यएवाभ्यनुज्ञातंतत्तदामधुसूदन ॥ ८ ॥ अपराधोनचास्मा
कंयत्तेत्यक्षैःपराजिताः ॥ अजेयाजयतांश्रेष्ठपार्थाःप्रव्राजितावनं ॥ ९ ॥ केनवाप्यपवादेनविरुध्यंत्यरिभिःसह ॥ अशक्ताःपांडवाःकृष्णप्रद्रष्टाःप्रत्यमित्रवत्
॥ १० ॥ किमस्माभिःकृतंतेषांकस्मिन्वापुनरागसि ॥ धार्तराष्ट्रान्जिघांसंतिपांडवाःसृंजयैःसह ॥ ११ ॥ नचापिवयमुग्रेणकर्मणावचनेनवा ॥ प्रभ्रष्टाःप्रणमा
मेहभयादपिशतक्रतुं ॥ १२ ॥ नचतंकृष्णपश्यामिक्षत्रधर्ममनुष्ठितं ॥ उत्सहेतयुधाजेतुंयोनःशत्रुनिबर्हण ॥ १३ ॥ नहिभीष्मकृपद्रोणाःसकर्णामधुसूदन ॥ दे
वैरपियुधाजेतुंशक्याःकिमुतपांडवैः ॥ १४ ॥ स्वधर्ममनुपश्यंतोयदिमाधवसंयुगे ॥ अस्रेणनिधनंकालेप्राप्स्यामःस्वर्ग्यमेवतत् ॥ १५ ॥ मुख्यश्चैवैषनोधर्मः
क्षत्रियाणांजनार्दन ॥ यच्छयीमहिसंग्रामेशरतल्यगतावयं ॥ १६ ॥ तेवयंवीरशयनंप्राप्स्यामोयदिसंयुगे ॥ अप्रणम्यैवशत्रूणांननस्तप्स्यंतिमाधव ॥ १७ ॥
कश्चजातुकुलेजातःक्षत्रधर्मेणवर्तयन् ॥ भयाद्वृत्तिसमीक्ष्यैवंप्रणमेदिहकर्हिचित् ॥ १८ ॥ उद्यच्छेद्देवननमेदुद्यमोह्येवपौरुषं ॥ अप्यपर्वणिभज्येतननमेदिह
कर्हिचित् ॥ १९ ॥ इतिमातंगवचनंपरीप्संतिहितेप्सवः ॥ धर्मायचैवप्रणमेद्ब्राह्मणेभ्यश्चमद्विधः ॥ २० ॥ अचिंतयन्कंचिदन्यंयावज्जीवंतथाचरेत् ॥ एषधर्मःक्ष
त्रियाणांमतमेतच्चमेसदा ॥ २१ ॥

न्याय्यम् ॥ ५ ॥ ६ ॥ प्रियाभ्युपगतेप्रीत्यास्वीकृते ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ ॥ १२२ ॥

॥ १८ ॥ उद्यच्छेद्देवउद्यमंकुर्यादेवअपर्वणिअप्रस्तावे पर्वस्यादुत्सवेपंथौप्रस्तावेलक्षणांतरेइतिविश्वः ॥ १९ ॥ मातंगःमुनिः ॥ २० ॥ २१ ॥

॥ २२ ॥ न्यस्तशस्त्राःत्यक्तक्षत्रियधर्माःउपजीवामभिक्षुकवत्सिद्धमन्नंभोक्ष्यामइत्यर्थः ॥ २३ ॥ २४ ॥ २५ ॥ ॥ इतिउ०नै०भा०सप्तविंशाधिकशततमोऽध्यायः ॥ १२७ ॥ ॥ ७ ॥ ॥ ततइति॥प्रशम्य

राज्यांशश्चाभ्यनुज्ञातोयोमेपित्रापुराभवत् ॥ नसलभ्यःपुनर्जातुमयिजीवतिकेशव ॥ २२ ॥ यावच्चराजाधियतेधृतराष्ट्रोजनार्दन ॥ न्यस्तशस्त्रावयंतेवाप्युप
जीवाममाधव ॥ अप्रदेयंपुरादत्तंराज्यंपरवतोमम ॥ २३ ॥ अज्ञानाद्वाभयाद्वापिमयिबालेजनार्दन ॥ नतदद्यपुनर्लभ्यंपांडवैर्वृष्णिनंदन ॥ २४ ॥ ध्रियमाणम
हाबाहौमयिसंप्रतिकेशव ॥ यावद्धितीक्ष्णयासूच्याविध्येदग्रेणकेशव ॥ तावदप्यपरित्याज्यंभूमेर्नःपांडवाव्रति ॥ २५ ॥ ॥ इतिश्रीमहाभारतेउद्यो०भगवद्या
नपर्वणिदुर्योधनवाक्येसप्तविंशाधिकशततमोऽध्यायः ॥ १२७ ॥ ॥ ७ ॥ ॥ वैशंपायनउवाच ॥ ॥ ततःप्रशम्यदाशार्हःक्रोधपर्याकुलेक्षणः ॥ दुर्योधन
मिदंवाक्यमब्रवीत्कुरुसंसदि ॥ १ ॥ लप्स्यसेवीरशयनंकाममेतदवाप्स्यसि ॥ स्थिरोभवसहामात्योविमर्दोभवितामहान् ॥ २ ॥ यच्चैवंमन्यसेमूढनमेकश्चिद्व्य
तिक्रमः ॥ पांडवेष्वितितत्सर्वंनिबोधतनराधिपाः ॥ ३ ॥ श्रियासंतप्यमानेनपांडवानांमहात्मनाम् ॥ त्वयादुर्मंत्रितंद्यूतंसौबलेनचभारत ॥ ४ ॥ कथंचज्ञातयस्ता
तश्रेयांसःसाधुसंमताः ॥ अथान्याय्यमुपस्थातुंजिह्मेनाजिह्मचारिणः ॥ ५ ॥ अक्षद्यूतंमहाप्रज्ञसतांमतिविनाशनम् ॥ असतांतत्रजायंतेभेदाश्चव्यसनानिच ॥ ६
तदिदंव्यसनंघोरंत्वयाद्यूतमुखंकृतम् ॥ असमीक्ष्यसदाचारैःसार्धंपापानुबंधनैः ॥ ७ ॥ कश्चान्योभ्रातृभार्यांवैविप्रकर्तुंतथार्हति ॥ आनीयचसभांद्यूतंयथोक्ता
द्रौपदीत्वया ॥ ८ ॥ कुलीनाशीलसंपन्नाप्राणेभ्योपिगरीयसी ॥ महिषीपांडुपुत्राणांतथाविनिकृतात्वया ॥ ९ ॥ जानंतिकुरवःसर्वेयथोक्ताःकुरुसंसदि ॥ दुःशा
सनेनकौंतेयाःप्रव्रजंतःपरंतपाः ॥ १० ॥ सम्यग्वृत्तेष्वलुब्धेषुसततंधर्मचारिषु ॥ स्वेषुबंधुषुकःसाधुश्चरेद्देवमसांप्रतम् ॥ ११ ॥ नृशंसानामनार्याणांपुरुषाणांच
भाषणम् ॥ कर्णदुःशासनाभ्यांचत्वयाचबहुशःकृतम् ॥ १२ ॥ सहमात्राप्रदग्धुंतान्बालकान्वारणावते ॥ आस्थितःपरमंयत्नंनसस्रंचतत्तव ॥ १३ ॥ ऊषुश्चसु
चिरंकालंप्रच्छन्नाःपांडवास्तदा ॥ मात्रासहैकचक्रायांब्राह्मणस्यनिवेशने ॥ १४ ॥ विषेणसर्पबंधैश्चयतिताःपांडवास्त्वया ॥ सर्वोपायैर्विनाशायनसस्रंचच
तत्तव ॥ १५ ॥ एवंबुद्धिःपांडवेषुमिथ्यावृत्तिःसदाभवान् ॥ कथंतेनापराधोस्तिपांडवेषुमहात्मसु ॥ १६ ॥ यच्चैभ्योयाचमानेभ्यःपित्र्यमंशंनदित्ससि ॥ तच्चपा
पप्रदातासिभ्रष्टश्चार्योनिपातितः ॥ १७ ॥ कृत्वाबहून्यकार्याणिपांडवेषुनृशंसवत् ॥ मिथ्यावृत्तिरनार्यःसन्नद्यविप्रतिपद्यसे ॥ १८ ॥

विचार्य ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ विप्रतिपद्येविवादंकुरुषेमात्रादिभिःसह ॥ १८ ॥

मातापितृभ्यांभीष्मेणद्रोणेनविदुरेणच ॥ शाम्येतिमुहुरुक्तोसिनचशाम्यसिपार्थिव ॥ १९ ॥ शमेहिसुमहाँल्लाभस्तवपार्थस्यचोभयोः ॥ नचरोचयसेराजन्
किमन्यद्बुद्धिलाघवात् ॥ २० ॥ नशर्मप्राप्स्यसेराजन्नुत्क्रम्यसुहृदांवचः ॥ अधर्म्यमयशस्यंचक्रियतेपार्थिवत्वया ॥ २१ ॥ ॥ वैशंपायनउवाच ॥ ॥ एवंब्रुवति
दाशार्हेदुर्योधनममर्षणम् ॥ दुःशासनइदंवाक्यमब्रवीत्कुरुसंसदि ॥ २२ ॥ नचेत्संधास्यसेराजन्स्वेनकामेनपांडवैः ॥ बद्धाकिलत्वांदास्यंतिकुंतीपुत्रायकौरवाः
॥ २३ ॥ वैकर्तनंत्वांचमांचत्रीनेतान्मनुजर्षभ ॥ पांडवेभ्यःप्रदास्यंतिभीष्मोद्रोणःपिताचते ॥ २४ ॥ भ्रातुरेतद्वचःश्रुत्वाधार्तराष्ट्रःसुयोधनः ॥ क्रुद्धःप्रातिष्ठितो
त्थायमहानागइवश्वसन् ॥ २५ ॥ विदुरंधृतराष्ट्रंचमहाराजंचबाह्लिकं ॥ कृपंचसोमदत्तंचभीष्मंद्रोणंजनार्दनं ॥ २६ ॥ सर्वानेताननादृत्यदुर्मतिर्निरपत्रपः ॥ अ
शिष्टवदमर्यादोमानीमान्यावमानिता ॥ २७ ॥ तंप्रस्थितमभिप्रेक्ष्यभ्रातरोमनुजार्षभं ॥ अनुजग्मुःसहामात्याराजानश्चापिसर्वशः ॥ २८ ॥ सभायामुत्थितं
क्रुद्धंप्रस्थितंभ्रातृभिःसह ॥ दुर्योधनमभिप्रेक्ष्यभीष्मःशांतनवोब्रवीत् ॥ २९ ॥ धर्मार्थावभिसंत्यज्यसंरंभंयोनुमन्यते ॥ हसंतिव्यसनेतस्यदुर्हृदोनचिरादिव ॥ ३०
दुरात्माराजपुत्रोयंधार्तराष्ट्रोनुपायकृत् ॥ मिथ्याभिमानीराज्यस्यक्रोधलोभवशानुगः ॥ ३१ ॥ कालपक्वमिदंमन्येसर्वंक्षत्रंजनार्दन ॥ सर्वेह्यनुसृतामोहात्पा
र्थिवाःसहमंत्रिभिः ॥ ३२ ॥ भीष्मस्याथवचःश्रुत्वादाशार्हःपुष्करेक्षणः ॥ भीष्मद्रोणमुखान्सर्वानभ्यभाषतवीर्यवान् ॥ ३३ ॥ सर्वेषांकुरुवृद्धानांमहानयमति
क्रमः ॥ प्रसह्यमंदमैश्वर्येननियच्छतयन्नृपम् ॥ ३४ ॥ तत्रकार्यमहंमन्येकालप्राप्तमरिंदमाः ॥ क्रियमाणेभवेच्छ्रेयस्तत्सर्वंशृणुतानघाः ॥ ३५ ॥ प्रत्यक्षमेतद्भ
वतांयद्वक्ष्यामिहितंवचः ॥ भवतामानुकूल्येनयदिरोचेतभारताः ॥ ३६ ॥ भोजराजस्यवृद्धस्यदुराचारोह्यनात्मवान् ॥ जीवतःपितुरैश्वर्यंहृत्वामृत्युवशंगतः
॥ ३७ ॥ उग्रसेनसुतःकंसःपरित्यक्तःसबांधवैः ॥ ज्ञातीनांहितकामेनमयाशस्तोमहामृधे ॥ ३८ ॥ आहुकःपुनरस्माभिर्ज्ञातिभिश्चापिसत्कृतः ॥ उग्रसेनःकृतोरा
जाभोजराजन्यवर्धनः ॥ ३९ ॥ कंसमेकंपरित्यज्यकुलार्थेसर्वयादवाः ॥ संभूयसुखमेधंतेभारतांधकवृष्णयः ॥ ४० ॥ अपिचाप्यवदद्राजन्परमेष्ठीप्रजापतिः ॥
व्यूढेदेवासुरेयुद्धेभ्युद्यतेष्वायुधेषुच ॥ ४१ ॥ द्वैधीभूतेषुलोकेषुविनश्यत्सुचभारत ॥ अब्रवीत्सृष्टिमान्देवोभगवान्लोकभावनः ॥ ४२ ॥ पराभविष्यंत्यसुरादै
तेयादानवैःसह ॥ आदित्यावसवोरुद्राभविष्यंतिदिवौकसः ॥ ४३ ॥ देवासुरमनुष्याश्चगंधर्वोरगराक्षसाः ॥ अस्मिन्युद्धेसुसंक्रुद्धाहनिष्यंतिपरस्परम् ॥ ४४ ॥

॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ॥ इतिउद्योगप० नैलकंठीयेभारतभावदीपेअष्टाविंशत्यधिकशततमोऽध्यायः ॥ १२८ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ कृष्णस्येति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

इतिमत्वाब्रवीद्धर्मंपरमेष्ठीप्रजापतिः ॥ वरुणायप्रयच्छैतान्बद्धादैतेयदानवान् ॥ ४५ ॥ एवमुक्तस्ततोधर्मोनियोगात्परमेष्ठिनः ॥ वरुणायददौसर्वान्बद्धा
दैतेयदानवान् ॥ ४६ ॥ तान्बद्धाधर्मपाशैश्चस्वैश्चपाशैर्जलेश्वरः ॥ वरुणःसागरेयत्तोनित्यंरक्षतिदानवान् ॥ ४७ ॥ तथादुर्योधनंकर्णंशकुनिंचापिसौबलम् ॥
बद्धादुःशासनंचापिपांडवेभ्यःप्रयच्छथ ॥ ४८ ॥ त्यजेत्कुलार्थेपुरुषंग्रामस्यार्थेकुलंत्यजेत् ॥ ग्रामंजनपदस्यार्थेआत्मार्थेपृथिवींत्यजेत् ॥ ४९ ॥ राजन्दुर्यो
धनंबद्धाततःसंशाम्यपांडवैः ॥ त्वत्कृतेनविनश्येयुःक्षत्रियाःक्षत्रियर्षभ ॥ ५० ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिकृष्णवाक्येअष्टाविंश
त्यधिकशततमोऽध्यायः ॥ १२८ ॥ ॥ ७ ॥ ॥ वैशंपायनउवाच ॥ ॥ कृष्णस्यतुवचःश्रुत्वाधृतराष्ट्रोजनेश्वरः ॥ विदुरंसर्वधर्मज्ञंत्वरमाणोभ्यभाषत ॥ १ ॥
गच्छतातमहाप्राज्ञांगांधारींदीर्घदर्शिनीं ॥ आनयेहतयासार्धमनुनेष्यामिदुर्मतिम् ॥ २ ॥ यदिसापिदुरात्मानंशमयेद्दुष्टचेतसम् ॥ अपिकृष्णस्यसुहृदस्तिष्ठेमव
चनेवयम् ॥ ३ ॥ अपिलोभाभिभूतस्यपंथानमनुदर्शयेत् ॥ दुर्बुद्धेर्दुःसहायस्यशमार्थंब्रुवतीवचः ॥ ४ ॥ अपिनोव्यसनंघोरंदुर्योधनकृतंमहत् ॥ शमयेच्चिररात्राय
योगक्षेमवदव्ययम् ॥ ५ ॥ राज्ञस्तुवचनंश्रुत्वाविदुरोदीर्घदर्शिनीं ॥ आनयामासगांधारींधृतराष्ट्रस्यशासनात् ॥ ६ ॥ ॥ धृतराष्ट्रउवाच ॥ ॥ एषगांधारिपुत्रस्तेदुरा
त्माशासनातिगः ॥ ऐश्वर्यलोभादैश्वर्यंजीवितंचप्रहास्यति ॥ ७ ॥ अशिष्टवदमर्यादःपापैःसहदुरात्मवान् ॥ सभायानिर्गतोमूढोव्यतिक्रम्यसुहृद्वचः ॥ ८ ॥ ॥ वै
शंपायनउवाच ॥ ॥ साभर्तृवचनंश्रुत्वाराजपुत्रीयशस्विनी ॥ अन्विच्छंतीमहच्छ्रेयोगांधारीवाक्यमब्रवीत् ॥ ९ ॥ ॥ गांधार्युवाच ॥ ॥ आनाययसुतंक्षिप्रं
राज्यकामुकमातुरम् ॥ नहिराज्यमशिष्टेनशक्यंधर्मार्थलोपिना ॥ १० ॥ आप्तुमाप्तंतथापीदमविनीतेनसर्वथा ॥ त्वंह्येवात्रभृशंगर्ह्योधृतराष्ट्रसुतप्रियः ॥ ११ ॥ यो
जानन्पापतामस्यतत्प्रज्ञामनुवर्तसे ॥ सएषकाममन्युभ्यांप्रलब्धोलोभमास्थितः ॥ १२ ॥ अशक्योद्यत्वयाराजन्विनिवर्तयितुंबलात् ॥ राष्ट्रप्रदानेमूढस्यबा
लिशस्यदुरात्मनः ॥ १३ ॥ दुःसहायस्यलुब्धस्यधृतराष्ट्रोश्नुतेफलम् ॥ कथंहिस्वजनेभेदमुपेक्षेतमहीपतिः ॥ भिन्नंहिस्वजनेनत्वांप्रहसिष्यंतिशत्रवः ॥ १४ ॥ याहि
शक्यामहाराजसाम्नाभेदेनवापुनः ॥ निस्तर्तुमापदःस्वेषुदंडंकस्तत्रपातयेत् ॥ १५ ॥

चिररात्राययोगक्षेमवत् बहुकालंअप्राप्तस्यसुखस्यप्राप्तिःप्राप्तस्यसंरक्षणंचनिर्वहेदित्यर्थः ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

॥ १६ ॥ १७ ॥ १८ ॥ आयत्यांपरिणामे ॥ १९ ॥ २० ॥ अपचितिःपूजा॥ २१॥ २२॥ दीर्घमंतरंचिरकालम् ॥ २३ ॥ २४ ॥ २५ ॥ महद्राज्यम् महद्राज्यविशालयोरितिविश्वः ॥ २६ ॥ अविधे

वैशंपायनउवाच ॥ ॥ शासनाद्धृतराष्ट्रस्यदुर्योधनममर्षणम् ॥ मातुश्चवचनात्सत्तासभांप्रावेशयत्पुनः ॥ १६ ॥ समातुर्वचनाकांक्षीप्रविवेशपुनःसभाम् ॥ अभिताम्रेक्षणःक्रोधान्निःश्वसन्निवपन्नगः ॥ १७ ॥ तंप्रविष्टमभिप्रेक्ष्यपुत्रमुत्पथमास्थितम् ॥ विगर्हमाणागांधारीशमार्थवाक्यमब्रवीत् ॥ १८ ॥ दुर्योधन निबोधेदंवचनंममपुत्रक ॥ हितंतेसानुबंधस्यतथायत्यांसुखोदयम् ॥ १९ ॥ दुर्योधनयदाहत्वांपिताभरतसत्तम ॥ भीष्मोद्रोणःकृपःक्षत्तासुहृदांकुरुतद्वचः ॥ २० ॥ भीष्मस्यतुपितुश्चैवममचापचितिःकृता ॥ भवेद्द्रोणमुखानांचसुहृदांशाम्यतात्वया ॥ २१ ॥ नहिराज्यंमहाप्राज्ञस्वेनकामेनशक्यते ॥ अवाप्तुंरक्षितुंवा पिभोक्तुंभरतसत्तम ॥ २२ ॥ नत्यवस्येंद्रियोराज्यमश्नीयाद्दीर्घमंतरम् ॥ विजितात्मातुमेधावीसराज्यमभिपालयेत् ॥ २३ ॥ कामक्रोधौहिपुरुषमर्थेभ्योव्यप कर्षतः ॥ तौतुशत्रूविनिर्जित्यराजाविजयतेमहीम् ॥ २४ ॥ लोकेश्वरप्रभुत्वंहिमहदेतदुरात्मभिः ॥ राज्यंनामेप्सितंस्थानंनशक्यमभिरक्षितुम् ॥ २५ ॥ इंद्रिया णिमहत्येप्सुर्नियच्छेदर्थधर्मयोः ॥ इंद्रियैर्नियतैर्बुद्धिर्वर्धतेग्निरिवेंधनैः ॥ २६ ॥ अविधेयानिहीमानिव्यापादयितुमप्यलम् ॥ अविधेयाइवादांताहयाः पथिकुसारथिम् ॥ २७ ॥ अविजित्ययआत्मानममात्यान्विजिगीषते ॥ अमित्रान्वाजितामात्यःसोवशःपरिहीयते ॥ २८ ॥ आत्मानमेवप्रथमंद्वेष्यरूपेणयो जयेत् ॥ ततोमात्यानमित्रांश्चनमोघंविजिगीषते ॥ २९ ॥ वश्येंद्रियंजितामात्यंधृतदंडविकारिषु ॥ परीक्ष्यकारिणंधीरमत्यर्थंश्रीर्निषेवते ॥ ३० ॥ क्षुद्राक्षेणे वजालेनझषावपिहितावुभौ ॥ कामक्रोधौशरीरस्थौप्रज्ञानंतौविलुंपतः ॥ ३१ ॥ याभ्यांहिदेवाःस्वर्यातुःस्वर्गस्यपिदधुर्मुखम् ॥ विभ्यतोनुपरागस्यकामक्रोधौ स्मवर्धितौ ॥ ३२ ॥ कामंक्रोधंचलोभंचदंभंदर्पंचभूमिपः ॥ सम्यग्विजेतुंयोवेदसमहीमभिजायते ॥ ३३ ॥ सततंनिग्रहेयुक्तइंद्रियाणांभवेन्नृपः ॥ ईप्सन्नर्थंच धर्मंचद्विषतांचपराभवम् ॥ ३४ ॥ कामाभिभूतःक्रोधाद्वायोमिथ्याप्रतिपद्यते ॥ स्वेषुचान्येषुवातस्यनसहायाभवंत्युत ॥ ३५ ॥ एकीभूतैर्महाप्राज्ञैःशूरैररिनिबर्हणैः ॥ पांडवैःपृथिवींतातभोक्ष्यसेसहितःसुखी ॥ ३६ ॥ यथाभीष्मःशांतनवोद्रोणश्चापिमहारथः ॥ आहतुस्ततत्सत्यमजेयौकृष्णपांडवौ ॥ ३७ ॥

॥ १२४ ॥

यानिअवशीकृतानि व्यापादयितुंहंतुम् ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ क्षुद्राक्षेणसूक्ष्मच्छिद्रेण ॥ ३१ ॥ अनुपरागस्यअनासक्तस्यापिकामक्रोधौस्वर्गनिरोधकावित्यर्थः ॥ ३२ ॥ अभिजायतेशास्तीत्य र्थः ॥ ३३ ॥ ३४ ॥ यःकामेनअभिभूतःक्रोधाद्वाअभिभूतःमिथ्याकपटेनवाऽभिभूतःप्रतिपद्यतेईप्सितार्थादीनूतस्यसहायानभवंतीत्यर्थः ॥ ३५ ॥ ३६ ॥ ३७ ॥

॥ ३८ ॥ ३९ ॥ ४० ॥ अंशःभागः ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ निकारःअपकारः समाःवर्षाणि ॥ ४७ ॥ यःत्वंपार्थानांअर्थंअभीप्ससिसएषत्वंनशक्तःतदर्थापहारायेत्यर्थः नापिसूतपुत्रादयःशक्ताः

प्रपद्यस्वमहाबाहुंकृष्णमक्लिष्टकारिणम् ॥ प्रसन्नोहिसुखायस्यादुभयोरेवकेशवः ॥ ३८ ॥ सुहृदामर्थकामानांयोनतिष्ठतिशासने ॥ प्राज्ञानांकृतविद्यानांस नरःशत्रुनंदनः ॥ ३९ ॥ नयुद्धेतातकल्याणंनधर्मार्थौकुतःसुखम् ॥ नचापिविजयोनित्यंमायुद्धेचेतआधिथाः ॥ ४० ॥ भीष्मेणहिमहाप्राज्ञपित्रातेषाद्विकेन च ॥ दत्तोंशःपांडुपुत्राणांभेदाद्भीतैररिंदम ॥ ४१ ॥ तस्यचैतत्प्रदानस्यफलमद्यानुपश्यसि ॥ यद्भुंक्षेपृथिवींकृत्स्नांशूरैर्निहतकंटकाम् ॥ ४२ ॥ प्रयच्छपांडुपुत्राणां यथोचितमरिंदम ॥ यदीच्छसिसहामात्योभोक्तुमर्धंप्रदीयताम् ॥ ४३ ॥ अलमर्धंपृथिव्यास्तेसहामात्यस्यजीवितुम् ॥ सुहृदांवचनेतिष्ठन्यशःप्राप्स्यसिभारत ॥ ४४ ॥ श्रीमद्भिरात्मवद्भिस्तैर्बुद्धिमद्भिर्जितेंद्रियैः ॥ पांडवैर्विग्रहस्तातभ्रंशयेन्महतःसुखात् ॥ ४५ ॥ निगृह्यसुहृदांमन्युंशाधिराज्यंयथोचितम् ॥ स्वमंशंपांडु पुत्रेभ्यःप्रदायभरतर्षभ ॥ ४६ ॥ अलमंगनिकारोयंत्रयोदशसमाःकृतः ॥ शमयैनंमहाप्राज्ञकामक्रोधसमेधितम् ॥ ४७ ॥ नचैषशक्तःपार्थानांयस्त्वमर्थमभी प्ससि ॥ सूतपुत्रोदृढक्रोधोभ्रातादुःशासनश्चते ॥ ४८ ॥ भीष्मेद्रोणेकृपेकर्णेभीमसेनेधनंजये ॥ धृष्टद्युम्नेचसंक्रुद्धेनस्युःसर्वाःप्रजाध्रुवम् ॥ ४९ ॥ अमर्षवशमा पन्नोमाकुरुंस्तातजीघनः ॥ एषाहिपृथिवीकृत्स्नामागमत्त्वत्कृतेवधम् ॥ ५० ॥ यच्चत्वंमन्यसेमूढभीष्मद्रोणकृपादयः ॥ योत्स्यंतेसर्वशक्त्येतिनैतदुपपद्यते ॥ ५१ ॥ समंहिराज्यंप्रीतिश्चस्थानंहिविदितात्मनाम् ॥ पांडवेष्वथयुष्मासुधर्मस्त्वभ्यधिकस्ततः ॥ ५२ ॥ राजपिंडभयादेतेयदिहास्यंतिजीवितम् ॥ नहिशक्ष्यंति राजानंयुधिष्ठिरमुदीक्षितुम् ॥ ५३ ॥ नलोभादर्थसंपत्तिर्नराणामिहदृश्यते ॥ तदलंतातलोभेनप्रशाम्यभरतर्षभ ॥ ५४ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभग वद्यानपर्वणिगांधारीवाक्येऊनत्रिंशाधिकशततमोऽध्यायः ॥ १२९ ॥ ॥ ५ ॥ ॥ वैशंपायनउवाच ॥ ॥ तत्तुवाक्यमनादृत्यसोर्थवन्मातृभाषितम् ॥ पुनःप्रत स्थेसंरंभात्सकाशमकृतात्मनाम् ॥ १ ॥ ततःसभायानिर्गम्यमंत्रयामासकौरवः ॥ सौबलेनमताक्षेणराज्ञाशकुनिनासह ॥ २ ॥ दुर्योधनस्यकर्णस्यशकुनेःसौब लस्यच ॥ दुःशासनचतुर्थानामिदमासीद्विचेष्टितम् ॥ ३ ॥ पुरायमस्मान्गृह्णातिक्षिप्रकारीजनार्दनः ॥ सहितोधृतराष्ट्रेणराज्ञाशांतनवेनच ॥ ४ ॥ वयमेवद्वेषी केशंनिगृह्णीमबलादिव ॥ प्रसह्यपुरुषव्याघ्रमिंद्रोवैरोचनिंयथा ॥ ५ ॥ श्रुत्वागृहीतंवार्ष्णेयंपांडवाहतचेतसः ॥ निरुत्साहाभविष्यंतिभग्नदंष्ट्राइवोरगाः ॥ ६ ॥

॥ ४८ ॥ ४९ ॥ मागमत्मागच्छतु ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ५४ ॥ ॥ इतिउद्योगप • नैलकंठीयेभारतभावदीपेऊनत्रिंशाधिकशततमोऽध्यायः ॥ १२९ ॥ ॥ ॥ ५ ॥ तच्चिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ वैरोचनिंबलिं ॥ ५ ॥ ६ ॥

॥७॥केशवंबद्धारिपून्योत्स्यामहेइत्युत्तरश्लोकेनान्वयः ॥ ८॥ ९॥१०॥११॥१२॥१३॥कर्मदूतनिषहाख्यम् ॥१४॥ विकुर्वतेविकारंकलहाख्यंकुर्वते॥१५॥१६॥१७॥१८॥अशक्यंनचकर्तुंशक्यं॥ १९ ॥

अयंत्वेषांमहाबाहुःसर्वेषांशर्मवर्मच ॥ अस्मिन्गृहीतेवरदेकृष्णेसर्वसात्वताम् ॥ ७ ॥ निरुद्यमाभविष्यंतिपांडवाःसोमकैःसह ॥ तस्माद्वयमिहैवैनंकेशवंक्षिप्रकारिणम्॥८॥कोशतोधृतराष्ट्रस्यबद्धायोत्स्यामहेरिपून् ॥ तेषांपापमभिप्रायंपापानांदुष्टचेतसाम् ॥ ९ ॥ इंगितज्ञःकविःक्षिप्रमन्वबुध्यतसात्यकिः ॥ तदर्थमभिनिष्क्रम्यहार्दिक्येनसहास्थितः॥ १० ॥ अब्रवीत्कृतवर्माणंक्षिप्रंयोजयवाहिनीम् ॥ व्यूढानीकःसभाद्वारमुपतिष्ठस्वदंशितः॥ ११ ॥ यावदाख्याम्यहंचैतत्कृष्णायाक्लिष्टकारिणे ॥ सप्रविश्यसभांवीरःसिंहोगिरिगुहामिव ॥ १२ ॥ आचष्टतमभिप्रायंकेशवायमहात्मने ॥ धृतराष्ट्रंततश्चैवविदुरंचान्वभाषत ॥ १३ ॥ तेषामेतमभिप्रायमाचचक्षेस्मयन्निव ॥ धर्मादर्थाच्चकामाच्चकर्मसाधुविगर्हितम् ॥ १४ ॥ मंदाःकर्तुमिहेच्छंतिनचावाप्यंकथंचन ॥ पुराविकुर्वतेमूढाःपापात्मानःसमागताः ॥ १५ ॥ धर्षिताःकाममन्युभ्यांक्रोधलोभवशानुगाः ॥ इमंहिपुंडरीकाक्षंजिघृक्षंत्यल्पचेतसः ॥ १६ ॥ पटेनाग्निप्रज्वलितंयथाबालायथाजडाः ॥ सात्यकेस्तद्वचःश्रुत्वाविदुरोदीर्घदर्शिवान् ॥ १७ ॥ धृतराष्ट्रंमहाबाहुमब्रवीत्कुरुसंसदि ॥ राजन्परीतकालास्तेपुत्राःसर्वेपरंतप ॥ १८ ॥ अशक्यमयशस्यंचकर्तुंकर्मसमुद्यताः ॥ इमंहिपुंडरीकाक्षमभिभूयप्रसह्यच ॥ १९ ॥ निग्रहीतुंकिलेच्छंतिसहितावासवानुजं ॥ इमंपुरुषशार्दूलमप्रधृष्यंदुरासदम् ॥ २० ॥ आसाद्यनभविष्यंतिपतंगाइवपावकं ॥ अयमिच्छन्हितान्सर्वान्युध्यमानान्जनार्दनः ॥ २१ ॥ सिंहोनागानिवक्रुद्धोगमयेद्यमसादनम् ॥ नत्वयंनिंदितंकर्मकुर्यात्पापंकथंचन ॥ २२ ॥ नचधर्मादपक्रामेदच्युतःपुरुषोत्तमः ॥ विदुरेणैवमुक्तेतुकेशवोवाक्यमब्रवीत् ॥ २३ ॥ धृतराष्ट्रमभिप्रेक्ष्यसुहृदांशृण्वतांमिथः ॥ राजन्नेतेयदिक्रुद्धामांनिगृह्णीयुरोजसा ॥ २४ ॥ एतेवामामहंवैनाननुजानीहिपार्थिव ॥ एतान्हिसर्वान्संरब्धान्नियंतुमहमुत्सहे ॥ २५ ॥ नत्वहंनिंदितंकर्मकुर्यांपापंकथंचन ॥ पांडवार्थेहिलुभ्यंतःस्वार्थान्हास्यंतितेसुताः ॥ २६ ॥ एतेचेदेवमिच्छंतिकृतकार्योयुधिष्ठिरः ॥ अद्यैवत्यहमेनांश्चयेचैनाननुभारत ॥ २७ ॥ निगृह्यराज न्पार्थेभ्योदद्यांकिंदुष्कृतंभवेत् ॥ इदंतुनप्रवर्तेयंनिंदितंकर्मभारत ॥ २८ ॥ सन्निधौतेमहाराजक्रोधजंपापबुद्धिजम् ॥ एषदुर्योधनोराजन्नयथेच्छतितथास्तुतत् ॥ २९ ॥ अहंतुसर्वास्तनयाननुजानामितेनृप ॥ एतच्छ्रुत्वातुविदुरंधृतराष्ट्रोभ्यभाषत ॥ क्षिप्रमानयतंपापंराज्यलुब्धंसुयोधनम् ॥ ३० ॥

वासवानुजंविष्णुंत्रिविक्रममित्यर्थः॥२०॥नभविष्यंतिमरिष्यंति ॥ २१ ॥ २२ ॥ २३ ॥ २४॥ २५॥ पांडवार्थेपांडवधनेलुभ्यंतःलोभंकुर्वंतः ॥२६॥२७॥ इदंतुकर्मकर्तुमितिशेषः ॥ २८ ॥ २९ ॥ ३० ॥

पंथानंअवतारयितुंसत्पथेनिवेशयितुम् ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ निर्मोचनेनगरविशेषे ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥

सहमित्रंसहामात्यंससोदर्यंसहानुगम् ॥ शक्नुयांयदिपंथानमवतारयितुंपुनः ॥ ३१ ॥ ततोदुर्योधनंक्षत्तापुनःप्रावेशयत्सभाम् ॥ अकामंभ्रातृभिःसार्धंराजभिःपरिवारितम् ॥ ३२ ॥ अथदुर्योधनंराजाधृतराष्ट्रोभ्यभाषत ॥ कर्णदुःशासनाभ्यांचराजभिश्चापिसंवृतम् ॥ ३३ ॥ नृशंसपापभूयिष्ठक्षुद्रकर्मसहायवान् ॥ पापैःसहार्यःसंहत्यपापंकर्मचिकीर्षसि ॥ ३४ ॥ अशक्यमयशस्यंचसद्भिश्चापिविगर्हितम् ॥ यथात्वादृशकोमूढोव्यवस्येत्कुलपांसनः ॥ ३५ ॥ त्वमिमंपुंडरीकाक्षमप्रधृष्यंदुरासदम् ॥ पापैःसहायैःसंहत्यनिग्रहीतुंकिलेच्छसि ॥ ३६ ॥ योनशक्योबलात्कर्तुंदेवैरपिसवासवैः ॥ तंत्वंप्रार्थयसेमंदबालश्चंद्रमसंयथा ॥ ३७ ॥ देवैर्मनुष्यैर्गंधर्वैरसुरैरुरगैश्चयः ॥ नसोढुंसमरेशक्यस्तंनबुध्यसिकेशवम् ॥ ३८ ॥ दुर्ग्राह्यःपाणिनावायुर्दुस्पर्शःपाणिनाशशी ॥ दुर्धरापृथिवीमूर्ध्नादुर्ग्राह्यःकेशवोबलात् ॥ ३९ ॥ इत्युक्तेधृतराष्ट्रेणक्षत्तापिविदुराब्रवीत् ॥ दुर्योधनमभिप्रेत्यधार्तराष्ट्रममर्षणम् ॥ ४० ॥ ॥ विदुरउवाच ॥ ॥ दुर्योधननिबोधेदंवचनंममसांप्रतम् ॥ सौभद्वारेवानरेंद्रोद्विविदोनामनामतः ॥ शिलावर्षेणमहताच्छादयामासकेशवम् ॥ ४१ ॥ ग्रहीतुकामोविक्रम्यसर्वयत्नेनमाधवम् ॥ ग्रहीतुंनाशकच्चैनंतत्त्वंप्रार्थयसेबलात् ॥ ४२ ॥ प्राग्ज्योतिषगतंशौरिंनरकःसहदानवैः ॥ ग्रहीतुंनाशकत्तत्रतंत्वंप्रार्थयसेबलात् ॥ ४३ ॥ अनेकयुगवर्षायुर्निहत्यनरकंमृधे ॥ नीत्वाकन्यासहस्राणिउपयेमेयथाविधि ॥ ४४ ॥ निर्मोचनेषट्सहस्राःपाशैर्बद्धामहासुराः ॥ ग्रहीतुंनाशकंश्चैनंतंत्वंप्रार्थयसेबलात् ॥ ४५ ॥ अनेनहिहताबाल्येपूतनाशकुनीतथा ॥ गोवर्धनोधारितश्चगवार्थेभरतर्षभ ॥ ४६ ॥ अरिष्टोधेनुकश्चैवचाणूरश्चमहाबलः ॥ अश्वराजश्चनिहतःकंसश्चारिष्टमाचरन् ॥ ४७ ॥ जरासंधश्चवक्रश्चशिशुपालश्चवीर्यवान् ॥ बाणश्चनिहतःसंख्येराजानश्चनिषूदिताः ॥ ४८ ॥ वरुणोनिर्जितोराजापावकश्चामितौजसा ॥ पारिजातंचहरताजितःसाक्षाच्छचीपतिः ॥ ४९ ॥ एकार्णवेचस्वपतानिहतौमधुकैटभौ ॥ जन्मांतरमुपागम्यहयग्रीवस्तथाहतः ॥ ५० ॥ अयंकर्तानकियतेकारणंचापिपौरुषे ॥ यद्यदिच्छेदयंशौरिस्तत्तत्कुर्यादयत्नतः ॥ ५१ ॥ तंनबुध्यसिगोविंदंघोरविक्रममच्युतम् ॥ आशीविषमिवक्रुद्धंतेजोराशिमनिंदितम् ॥ ५२ ॥ प्रधर्षयन्महाबाहुंकृष्णमक्लिष्टकारिणम् ॥ पतंगोग्निमिवासाद्यसामात्योनभविष्यसि ॥ ५३ ॥ ॥ इतिश्रीम०उद्यो०भग०विदुरवाक्येत्रिंशदधिकशततमोऽध्यायः ॥ १३० ॥ ॥ ७ ॥

॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ॥इतिउद्योगपर्वणिनैलकंठीयेभारतभावदीपेत्रिंशदधिकशततमोऽध्यायः ॥ १३० ॥ ॥७॥ ॥७॥ ॥७॥

॥ वैशंपायनउवाच ॥ ॥ विदुरेणैवमुक्तस्तुकेशवःशत्रुपूगहा ॥ दुर्योधनंधार्तराष्ट्रमभ्यभाषतवीर्यवान् ॥ १ ॥ एकोहमितियन्मोहान्मन्यसेमांसुयोधन ॥ परिभूयसुदुर्बुद्धेग्रहीतुंमांचिकीर्षसि ॥ २ ॥ इहैवपांडवाःसर्वेतथैवांधकवृष्णयः ॥ इहादित्याश्चरुद्राश्चवसवश्चमहर्षिभिः ॥ ३ ॥ एवमुक्त्वाजहासोच्चैःकेशवःपरवीरहा ॥ तस्यसंस्मयतःशौरेर्विद्युद्रूपामहात्मनः ॥ ४ ॥ अंगुष्ठमात्रास्त्रिदशामुमुचुःपावकार्चिषः ॥ अस्यब्रह्मालललाटस्थोरुद्रोवक्षसिचाभवत् ॥ ५ ॥ लोकपालाभुजेष्वासन्नग्निरास्यादजायत ॥ आदित्याश्चैवसाध्याश्चवसवोथाश्विनावपि ॥ ६ ॥ मरुतश्चसहेंद्रेणविश्वेदेवास्तथैवच ॥ बभूवुश्चैकरूपाणियक्षगंधर्वरक्षसां ॥ ७ ॥ प्रादुरास्तांतथादोर्भ्यांसंकर्षणधनंजयौ ॥ दक्षिणेथार्जुनोधन्वीहलीरामश्चसव्यतः ॥ ८ ॥ भीमोयुधिष्ठिरश्चैवमाद्रीपुत्रौचपृष्ठतः ॥ अंधकावृष्णयश्चैवप्रद्युम्नप्रमुखास्ततः ॥ ९ ॥ अग्रेबभूवुःकृष्णस्यसमुद्यतमहायुधाः ॥ शंखचक्रगदाशक्तिशार्ङ्गलांगलनंदकाः ॥ १० ॥ अदृश्यंतोद्यतान्येवसर्वप्रहरणानिच ॥ नानाबाहुषुकृष्णस्यदीप्यमानानिसर्वशः ॥ ११ ॥ नेत्राभ्यांनस्ततश्चैवश्रोत्राभ्यांचसमंततः ॥ प्रादुरासन्महारौद्राःसधूमाःपावकार्चिषः ॥ १२ ॥ रोमकूपेषुचतथासूर्यस्येवमरीचयः ॥ तंदृष्ट्वाघोरमात्मानंकेशवस्यमहात्मनः ॥ १३ ॥ न्यमीलयंतनेत्राणिराजानस्तत्रचेतसः ॥ कृतेद्रोणंचभीष्मंचविदुरंचमहामतिम् ॥ १४ ॥ संजयंचमहाभागमृषींश्चैवतपोधनान् ॥ प्रादात्तेषांसभगवान्दिव्यंचक्षुर्जनार्दनः ॥ १५ ॥ तदृष्ट्वामहदाश्चर्यंमाधवस्यसभातले ॥ देवदुंदुभयोनेदुःपुष्पवर्षंपपातच ॥ १६ ॥ ॥ धृतराष्ट्रउवाच ॥ ॥ त्वमेवपुंडरीकाक्षसर्वस्यजगतोहितः ॥ तस्मात्त्वंयादवश्रेष्ठप्रसादंकर्तुमर्हसि ॥ १७ ॥ भगवन्ममनेत्राणामंतर्धानंवृणेपुनः ॥ भवंतंद्रष्टुमिच्छामिनान्यंद्रष्टुमिहोत्सहे ॥ १८ ॥ ततोब्रवीन्महाबाहुर्धृतराष्ट्रंजनार्दनः ॥ अदृश्यमानेनेत्युक्त्वाभवेतांकुरुनंदन ॥ १९ ॥ तत्राद्भुतंमहाराजधृतराष्ट्रश्चचक्षुषी ॥ लब्ध्वावान्वासुदेवाच्चविश्वरूपंदिदृक्षया ॥ २० ॥ लब्धचक्षुषमासीनंधृतराष्ट्रंनराधिपाः ॥ विस्मिताऋषिभिःसार्धंतुष्टुवुर्मधुसूदनम् ॥ २१ ॥ चचालचमहीकृत्स्नासागरश्चापिचुक्षुभे ॥ विस्मयंपरमंजग्मुःपार्थिवाभरतर्षभ ॥ २२ ॥ ततःसपुरुषव्याघ्रःसंजहारवपुःस्वकम् ॥ तांदिव्यामद्भुतांचित्रामृद्धिमत्तामरिंदमः ॥ २३ ॥ ततःसात्यकिमादायपाणौहार्दिक्यमेवच ॥ ऋषिभिस्तैरनुज्ञातोनिर्ययौमधुसूदनः ॥ २४ ॥ ऋषयोतार्हिताजग्मुस्ततस्तेनारदादयः ॥ तस्मिन्कोलाहलेवृत्तेतद्भुतमिवाभवत् ॥ २५ ॥ तंप्रस्थितमभिप्रेक्ष्यकौरवाःसहराजभिः ॥ अनुजग्मुर्नरव्याघ्रंदेवाइवशतक्रतुम् ॥ २६ ॥

॥ १२६ ॥

॥ २७ ॥ २८ ॥ वरूथिनारथगुप्तिमता ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ मंदोदुर्योधनः ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ किंकिणीकंक्षुद्रघंटिकाजालंतद्वतार्किंकिणीकिना

अर्चितयन्नमेयात्मासर्वतद्राजमंडलम् ॥ निश्चक्रामततःशौरिःसधूमइवपावकः ॥ २७ ॥ ततोरथेनशुभ्रेणमहतार्किंकिणीकिना ॥ हेमजालविचित्रेणलघुनामेघनादिना ॥ २८ ॥ सूपस्करेणशुभ्रेणवैयाघ्रेणवरूथिना ॥ शैब्यसुग्रीवयुक्तेनप्रत्यदृश्यतदारुकः ॥ २९ ॥ तथैवरथमास्थायकृतवर्मामहारथः ॥ वृष्णीनांसंमतोवीरोहार्दिक्यःसमदृश्यत ॥ ३० ॥ उपस्थितरथंशौरिंप्रयास्यंतमरिंदमम् ॥ धृतराष्ट्रोमहाराजःपुनरेवाभ्यभाषत ॥ ३१ ॥ यावद्वलंमेपुत्रेषुपश्यतस्तेजनार्दन ॥ प्रत्यक्षंतेनतेकिंचित्परोक्षंशत्रुकर्शन ॥ ३२ ॥ कुरूणांशममिच्छंतंयतमानंचकेशव ॥ विदित्वैतामवस्थांमेनाभिशंकितुमर्हसि ॥ ३३ ॥ नमेपापोस्त्यभिप्रायःपांडवान्प्रतिकेशव ॥ ज्ञातमेवहितंवाक्यंयन्मयोक्तःसुयोधनः ॥ ३४ ॥ जानंतिकुरवःसर्वेराजानश्चैवपार्थिवाः ॥ शमेप्रयतमानंमांसर्वयत्नेनमाधव ॥ ३५ ॥ ॥ वैशंपायनउवाच ॥ ॥ ततोब्रवीन्महाबाहुर्धृतराष्ट्रंजनार्दनः ॥ द्रोणंपितामहंभीष्मंक्षत्तारंवाह्लिकंकृपम् ॥ ३६ ॥ प्रत्यक्षमेतद्भवतांयद्वृत्तंकुरुसंसदि ॥ यथाचाशिष्टवन्मंदोरोषादग्रसमुत्थितः ॥ ३७ ॥ वदत्यनीशमात्मानंधृतराष्ट्रोमहीपतिः ॥ आपृच्छेभवतःसर्वान्गमिष्यामियुधिष्ठिरम् ॥ ३८ ॥ आमंत्र्यप्रस्थितंशौरिंरथस्थंपुरुषर्षभ ॥ अनुजग्मुर्महेष्वासाःप्रवीराभरतर्षभाः ॥ ३९ ॥ भीष्मोद्रोणःकृपःक्षत्तायुतराष्ट्रोथवाह्लिकः ॥ अश्वत्थामाविकर्णश्चयुयुत्सुश्चमहारथः ॥ ४० ॥ ततोरथेनशुभ्रेणमहतार्किंकिणीकिना ॥ कुरूणांपश्यतांद्रष्टुंस्वसारंसपितुर्ययौ ॥ ४१ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिविश्वरूपदर्शनेएकत्रिंशदधिकशततमोऽध्यायः ॥ १३१ ॥ ॥ ७ ॥ ॥ वैशंपायनउवाच ॥ ॥ प्रविश्याथगृहंतस्याश्वरणावभिवाद्यच ॥ आचख्यौतत्समासेनयद्वृत्तंकुरुसंसदि ॥ १ ॥ ॥ वासुदेवउवाच ॥ ॥ उक्तंबहुविधंवाक्यंग्रहणीयंसहेतुकम् ॥ ऋषिभिश्चैवचमयानचासौतद्ग्रहीतवान् ॥ २ ॥ कालपक्वमिदंसर्वंसुयोधनवशानुगम् ॥ आपृच्छेभवतींशीघ्रंप्रयास्येपांडवान्प्रति ॥ ३ ॥ किंवाच्याःपांडवेयास्तेभवत्यावचनान्मया ॥ तद्ब्रूहित्वंमहाप्रज्ञेशुश्रूषेवचनंतव ॥ ४ ॥ ॥ कुंत्युवाच ॥ ॥ ब्रूयाःकेशवराजानंधर्मात्मानंयुधिष्ठिरम् ॥ भूयांस्तेहीयतेधर्मोमापुत्रकथाकथाः ॥ ५ ॥ श्रोत्रियस्येवतेराजन्मंदकस्याविपश्चितः ॥ अनुवाकहताबुद्धिर्धर्ममेवैकमीक्षते ॥ ६ ॥

॥ ४१ ॥ ॥ इतिउद्योगपर्वणिनैलकंठीयेभारतभावदीपेएकत्रिंशदधिकशततमोऽध्यायः ॥ १३१ ॥ ॥ ७ ॥ ॥ प्रविश्येति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ भूयान्पृथ्वीपालनजोधर्मः ॥ ५ ॥ श्रोत्रियस्यवेदाध्यायिनः मंदकस्यअर्थज्ञानशून्यस्य अनुवाकेनअत्यंतवेदाक्षरावृत्त्या हतानष्टा ॥ ६ ॥

॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ दंडनीतिःस्वामिनाप्रयुक्तेतिसंबंधः धर्मेभ्यःधर्मार्थेनियच्छतिनिवर्धकरोतिदंडनीतिरेव ॥ १४ ॥ १५ ॥ राजाधर्मेअधर्मेवाप्रवर्तयन्कृतत्रेतादियुगरूपस्य कालस्यकारणं एवंचसर्वस्मिन्नपिकालेधर्मादितारतम्याद्युगचतुष्टयमस्तीतिभावः ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ जगतःदोषेणसचराजास्पृश्यते ॥ २० ॥ २१ ॥ फलंनलभ्यवान्प्राप्तवान् असीतिशेषः

अंगावेक्षस्वधर्मंत्वंयथास्रष्टःस्वयंभुवा ॥ बाहुभ्यांक्षत्रियाःस्रष्टाबाहुवीर्योपजीविनः॥ ७॥ क्रूरायकर्मणेनित्यंप्रजानांपरिपालने ॥ शृणुचात्रोपमामेकांया वृद्धेभ्यःश्रुतामया ॥ ८॥ मुचुकुंदस्यराजर्षेरदद्यृथिवीमिमाम् ॥ पुरावैश्रवणःप्रीतोनचासौतद्ग्रहीतवान्॥ ९॥ बाहुवीर्यार्जितंराज्यमश्नीयामितिकामये॥ तोवैश्रवणःप्रीतोविस्मितःसमपद्यत॥ १०॥ मुचुकुंदस्ततोराजासोन्वशासद्वसुंधराम्॥ बाहुवीर्यार्जितांसम्यक्क्षत्रधर्ममनुव्रतः॥ ११ ॥ यंहिधर्मंचरंतोहप्रजा राज्ञासुरक्षिताः॥ चतुर्थंतस्यधर्मस्यराजाविंदेतभारत ॥ १२ ॥ राजाचरतिचेद्धर्मंदेवत्वायैवकल्पते॥ सचेदधर्मंचरतिनरकायैवगच्छति॥ १३ ॥ दंडनीतिश्चध र्मेभ्यश्चातुर्वर्ण्यंनियच्छति॥ प्रयुक्तास्वामिनासम्यगधर्मेभ्यश्चयच्छति॥ १४ ॥ दंडनीत्यांयदाराजासम्यक्कार्त्स्न्येनवर्तते ॥ तदाकृतयुगंनामकालःश्रेष्ठःप्रव र्तते॥ १५॥ कालोवाकारणंराज्ञोराजावाकालकारणम्॥इतितेसंशयोमाभूद्राजाकालस्यकारणम्॥ १६॥राजाकृतयुगस्रष्टात्रेतायाद्वापरस्यच॥युगस्यचच तुर्थस्यराजाभवतिकारणम्॥ १७॥ कृतस्यकरणाद्राजास्वर्गमत्यंतमश्नुते ॥ त्रेतायाःकरणाद्राजास्वर्गनात्यंतमश्नुते॥ १८ ॥ प्रवर्तनाद्वापरस्ययथाभागमुपा श्नुते॥ कलेःप्रवर्तनाद्राजापापमत्यंतमश्नुते॥ १९ ॥ ततोवसतिदुष्कर्मानरकेशाश्वतीःसमाः ॥ राजदोषेणहिजगत्स्पृश्यतेजगतःसच ॥ २० ॥ राजधर्मानवे क्षस्वपितृपैतामहोचितान्॥ नैतद्राजर्षिवृत्तंहियत्रत्वंस्थातुमिच्छसि॥ २१ ॥नहिवैक्लव्यसंसृष्टआनृशंस्यव्यवस्थितः॥प्रजापालनसंभूतंफलंकिंचनलभ्यवान् ॥ २२ ॥ नत्येतामाशिषंपांडुर्नचाहंनपितामहः॥प्रयुक्तवंतःपूर्वंतेययाचरसिमेधया॥ २३ ॥ यज्ञोदानंतपःशौर्यंप्रज्ञासंतानमेवच ॥ माहात्म्यंबलमोजश्चनित्य माशंसितंमया॥ २४ ॥ नित्यंस्वाहास्वधानित्यंदद्युर्मानुषदेवताः ॥ दीर्घमायुर्धनंपुत्रान्सम्यगाराधिताःशुभाः ॥ २५॥ पुत्रेष्वाशासतेनित्यंपितरोदेवतानिच॥ दानमध्ययनंयज्ञःप्रजानांपरिपालनम्॥ २६ ॥ एतद्धर्ममधर्मंवाजन्मनैवाभ्यजायथाः॥ नेतुवैद्याःकुलेजाताअवृत्त्यातातपीडिताः॥ २७॥

॥ १२७ ॥

॥ २२ ॥ २३ ॥ २४ ॥ नित्यमिति मानुषाश्चदेवताश्चसम्यगाराधिताःसत्यःइहलोकेआयुरादीनिपरलोकसाधनानित्वधादीनिसत्कर्माणिचदद्युः ॥ २५ ॥ २६ ॥ एतत्मद्वाक्यंधर्मंधर्मयुक्तंअधर्मंवाज न्मनैवत्वंभावतएवअभ्यजायथाः अभिजानीषेहेकृष्ण नेतुपांडवास्तुवैद्याःविद्यावंतः ॥ २७ ॥

दानपतिंपालनाधिकारिणं देवृपालनेअस्यरूपम् ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेद्वात्रिंशदधिकशततमोऽध्यायः ॥१३२॥ ॥७॥ ॥अ त्रेति॥१॥ततःमदुक्तात्श्रेयःप्रशस्ततरं भूयोधिकतरं मन्युमतींदैन्यवती विभावरीकुपिता विभावरीरजन्यांचवक्तयोषितीतिविश्वः॥२॥३॥राजन्यामूर्धाभिषिक्ता मूर्धाभिषिक्तोराजन्यइत्यमरःजगर्हेनिंदि

यत्रदानपतिंशूरंक्षुधिताःपृथिवीचराः॥ प्राप्यतुष्टाःप्रतिष्ठंतेधर्मःकोन्यधिकस्ततः॥ २८॥ दानेनान्यंबलेनान्यंतथासूनृतयापरं ॥ सर्वतःप्रतिगृह्णीयाद्राज्यंप्रा प्येहधार्मिकः॥ २९॥ ब्राह्मणःप्रचरेद्भैक्षंक्षत्रियःपरिपालयेत्॥ वैश्योधनार्जनंकुर्याच्छूद्रःपरिचरेच्चतान्॥ ३०॥ भैक्षंविप्रतिषिद्धंतेकृषिर्नैवोपपद्यते ॥ क्षत्रि योसिक्षतात्त्राताबाहुवीर्योपजीविता॥ ३१ ॥ पित्र्यमंशंमहाबाहोनिमग्नंपुनरुद्धर ॥ साम्नाभेदेनदानेनदंडेनाथनयेनवा॥ ३२॥ इतोदुःखतरंकिंनुयदहंदीनवांधवा॥ परपिंडमुदीक्षेत्वांसूत्वामित्रनंदन॥ ३३॥ युध्यस्वराजधर्मेणमानिमज्ञोःपितामहान्॥ मागमःक्षीणपुण्यस्त्वंसानुजःपापिकांगतिं॥ ३४॥ ॥इति श्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिकुंतीवाक्येद्वात्रिंशदधिकशततमोऽध्यायः॥ १३२॥ ॥७॥ ॥कुंत्युवाच॥ ॥अत्राप्युदाहरंतीममितिहा संपुरातनं॥विदुलायाश्चसंवादंपुत्रस्यचपरंतप॥ १॥ ततःश्रेयश्चभूयश्चयथावद्वक्तुमर्हसि॥यशस्विनीमन्युमतीकुलेजाताविभावरी॥ २॥क्षत्रधर्मरतादांतावि दुलादीर्घदर्शिनी॥ विश्रुताराजसंसत्सुश्रुतवाक्याबहुश्रुता॥ ३॥ विदुलानामराजन्याजगर्हेपुत्रमौरसं॥ निर्जितंसिंधुराजेनशयानंदीनचेतसं॥ ४॥ ॥विदु लोवाच॥ ॥अनंदनमयाजातद्विषतांहर्षवर्धन॥ नमयात्वंनपित्राचजातःक्वाभ्यागतोत्थसि॥ ५॥ निर्मन्युश्चाप्यसंख्येयःपुरुषःक्लीबसाधनः॥ यावज्जीवंनिरा शोसिकल्याणायधुरंवह॥ ६॥ मात्मानमवमन्यस्वमैनमल्पेनबीभरः॥ मनःकृत्वासुकल्याणंमाभैस्त्वंप्रतिसंहर॥ ७॥उत्तिष्ठहेकापुरुषमाशेष्वैवंपराजितः॥अ मित्रान्नंदयन्सर्वान्मित्रमानोबंधुशोकदः॥ ८॥ सुपूरावैकुनदिकासुपूरोमुषिकांजलिः॥ सुसंतोषःकापुरुषःस्वल्पकेनैवतुष्यति॥ ९॥ अप्यहेरारुजन्दंष्ट्रामाश्वेव निधनंव्रज॥ अपिवासंशयंप्राप्यजीवितेपिपराक्रमेः॥ १०॥ अप्यरेःस्वनवच्छिद्रंपश्येस्त्वंविपरिक्रमन्॥ विवदन्वाथवातूष्णींव्योन्नीवापरिशंकितः॥ ११॥ त्वमेवंप्रेतवच्छेषेकस्माद्व्यहतोयथा॥ उत्तिष्ठहेकापुरुषमास्वाप्सीःशत्रुनिर्जितः॥ १२॥

तवती॥४॥ अनंदनकुपुत्र कुत्सार्थेऽत्रनञ्॥ ५॥ असंख्येयःअगणनीयःतुच्छत्वात् क्लीबंनिर्वीर्यंसाधनंबाह्वादिकंयस्यसतथा ॥ ६ ॥ मात्मानंभरःमापालय प्रतिसंहर भयमितिशेषः ॥ ७॥ माशेष्वनिरुद्योगोभूः ॥ ८ ॥ ९ ॥ पराक्रमेःपराक्रमंकुरु ॥ १० ॥ विवदन्शत्रुजयार्थंअनेकान्पक्षानुद्भावयन्वातूष्णींभूतोऽरेश्छिद्रंपश्येः यथाव्योन्निअपरिशंकितःशत्रोराधिक्याद्भयमपश्यन्श्येनस्तद्वत् ॥ ११ ॥ १२ ॥

विश्रूयस्वख्यातोभव मामध्यइति सामभेदौजघन्यमध्यमौ दानमधमोनीचउपायः दंडस्तूत्तमः तत्रायत्रयकर्तामाभूःकिंतुगर्जितोदंडयित्रैवभवेत्यर्थः ऊर्जितइतिवापाठः ॥ १३ ॥ तिंदुकस्यअलातंयथा दिक्षुस्फुलिंगान्विक्षिपतिज्वलतितद्वज्ज्वलदीप्यस्व परंतुतुषाग्निवदनार्चिर्माधूमायस्व काकरंखाजिजीविषुरितिपाठांतरेकाकरंखाः काकरमध्यगारंमाखाःमानाशय खैतुस्थैर्यैर्खदनहिंसयोरितिखायतेरिदं रूपं काकरंखइतिपाठे काकवत्रंखनिपलायतेवाकाकरंखः रखिगतावित्यस्यखरूपम् ॥ १४॥ माजनिमाउत्पद्यतां खरःकर्कशः खरीतिपाठेखरत्ववानितिसएवार्थः मृदुर्ईयालुः ॥१५॥ आजिंसंयामं स्त्वाःजित्य मानुष्यकंमनुष्यस्योचितम् ॥ १६ ॥ प्राणानांप्राणाःबलंतत्साध्यानांकार्याणां आनंतर्यंअविच्छेदेनकार्यधारामारभतेत्यर्थः नधनायनेधनंआत्मनोनेच्छति तृष्णांत्यजतीत्यर्थः ॥१७॥ ध्रुवांग

मास्तंगमस्त्वंकृपणोविश्रूयस्वस्वकर्मणा॥ मामध्येमाजघन्येत्वंमाधोभूस्त्विष्ठगर्जितः॥ १३॥ अलातंतिंदुकस्येवमुहूर्तमपिहिज्वल॥ मातुषाग्निरिवानार्चिर्धूमायस्वजिजीविषुः॥१४॥ मुहूर्तंज्वलितंश्रेयोनचधूमायितंचिरम्॥माहस्मकस्यचिद्वेहेजनिराज्ञःखरोमृदुः॥१५॥कृत्वामानुष्यकंकर्मस्तुत्वाजिंयावदुत्तमम्॥ धर्मस्यानृण्यमाप्नोतिनचात्मानंविगर्हते॥ १६॥ अलब्ध्वायदिवालब्ध्वानानुशोचतिपंडितः॥ आनंतर्यंचारभतेनप्राणानांधनायते ॥ १७ ॥ उद्भावयस्ववीर्यंवातांवागच्छध्रुवांगतिम्॥ धर्मंपुत्राग्रतःकृत्वाकिंनिमित्तंहिजीवसि॥१८॥ इष्टापूर्तंहितेक्लीबकीर्तिश्चसकलाहता॥ विच्छिन्नंभोगमूलंतेकिंनिमित्तंहिजीवसि॥ १९॥शत्रुर्निमज्जताग्राह्योजंघायांप्रपतिष्यता॥ विपरिच्छिन्नमूलोपिनविषीदेत्कथंचन ॥ २०॥ उद्यम्यधुरमुत्कर्षेदाजानेयकृतंस्मरन् ॥ कुरुसत्वंचमानंचविद्धिपौरुषमात्मनः॥२१॥उद्भावयकुलंमग्नंत्वत्कृतेस्वयमेवहि॥ यस्यदत्तंनजल्पंतिमानवामहदद्भुतम्॥ २२॥ राशियर्धनमात्रंसनैवस्त्रीनपुनःपुमान्॥ दानेनतपसिसत्येचयस्यनोच्चरितंयशः॥२३॥ विद्यायामर्थलाभेवामातुरुच्चारएवसः॥ श्रुतेनतपसावापिश्रियावाविक्रमेणवा॥२४॥ जनान्योभिभवत्यन्यान्कर्मणाहिसवैपुमान्॥ नत्वेवजाल्मींकापालींवृत्तिमेषितुमर्हसि॥२५॥ नृशंस्यामयशस्यांचदुःखांकापुरुषोचिताम्॥ यमेनमभिनंदेयुरमित्राःपुरुषंकृशं ॥ २६॥ लोकस्यसमवज्ञातंनिहीनासनवाससम्॥ अहोलाभकरंहीनमल्पजीवनमल्पकम्॥ २७॥

तिंमरणं अपतइत्युपहासः पृष्ठतःकृत्वेत्यर्थः ॥ १८ ॥ भोगमूलंराज्यंधनंवा ॥ १९ ॥ निमज्जताप्रपतिष्यताचशत्रुर्जंघायांग्राह्यः तेनैवसहनिमज्जेत्पतेद्वेत्यर्थः नविषीदेत्निरुद्यमोनभवेत् ॥ २० ॥ उद्यम्य उद्यमंकृत्वाधुरंभारमुत्कर्षेत्उद्यच्छेत् आजानेयाःजात्यश्वाःतेषांकृतंकर्मयुद्धेऽनवसादरूपंस्मरन् विद्धिप्राप्तुहि॥२१॥ त्वत्कृतेमग्नमितिसंबंधः ॥२२॥ राशिवर्धनःसंख्यापूरकोनतुप्रयोजनांतरार्हः ॥ २३ ॥ मातुःउच्चारोविष्ठा ॥ २४ ॥ कापालीवृत्तिंभिक्षाचर्यां ॥ २५ ॥ यंएनंअमित्राअभिनंदेयुःतंवंधुबांधवःआसाद्यनसुखमेधतइतितृतीयश्लोकेनसंबंधः ॥ २६ ॥ अहोलाभकरंअल्पेपिलाभेअहोलाभोजातइतिविस्मयंकुर्वाणम् ॥ २७ ॥

अवत्स्याजीवनोपायाभावेनविपत्स्यामःमरिष्यामः ॥२८॥ अवल्गुअमंगलंअकर्मेतिवापाठःतत्कारिणंनिश्चेष्टंकुलंज्ञातयःवंशाःसोमसूर्यादिमूलोत्पत्तिस्थानम् ॥२९॥ संजयेत्तितस्यनाम ॥३०॥ ३१ ॥ ॥३२॥अनुक्रोशोदया॥ ३३॥ अनुत्थानंशत्रुंप्रत्यनवस्थानंभयंचतेउभेचश्रियंहृतइतिपूर्वेणसंबंधःनिरीहोनिश्चेष्टोनाश्नुतेमहत्पदमितिशेषः निरुतिपापेभ्यःपराभववदोषेभ्यः ॥ ३४ ॥ स्वकंधनादिकंपरंविष

नेदृशंबंधुमासाद्यबांधवःसुखमेधते॥ अवत्स्यैवविपत्स्यामोवयंराष्ट्रात्प्रवासिताः॥२८॥ सर्वकामरसैर्हीनाःस्थानभ्रष्टाअकिंचनाः॥अवल्गुकारिणंसत्सुकुलवंशस्यनाशनं॥ २९॥ कलिंपुत्रप्रवादेनसंजयत्वामजीजनं॥ निरमर्षंनिरुत्साहंनिर्वीर्यमरिनंदनं॥३०॥मास्मसीमंतिनीकाचिज्जनयेत्पुत्रमीदृशं॥माधूमायज्वलात्यंतमाक्रम्यजहिशात्रवान्॥३१॥ज्वलमूर्धन्यमित्राणांमुहूर्तमपिवाक्षणं॥ एतावानेवपुरुषोयदमर्षीयदक्षमी॥३२॥क्षमावान्निरमर्षश्चनैवस्त्रीनपुनःपुमान्॥संतोषोवैश्रियंहंतितथानुक्रोशएवच॥३३॥ अनुत्थानभयेचोभेनिरीहोनाश्नुतेमहत्॥ एभ्योनिरुतिपापेभ्यःप्रमुंचात्मानमात्मना॥३४॥आयसंहृदयंकृत्वाभृगयस्वपुनःस्वकं॥ परंविषहतेयस्मात्तस्मात्पुरुषउच्यते॥३५॥तमाहुर्व्यर्थनामानंस्त्रीवद्यइहजीवति॥शूरस्योर्जितसत्वस्यसिंहविक्रांतचारिणः॥३६॥दिष्टभावंगतस्यापिविषयेमोदतेप्रजा॥ यआत्मनःप्रियसुखेहित्वाभृगयतेश्रियं॥३७॥ अमात्यानामथोहर्षमादधात्यचिरेणसः॥३८॥ ॥पुत्रउवाच किंनुतेमामपश्यंत्याःपृथिव्याअपिसर्वया॥ किमाभरणकृत्यंतेकिंभोगैर्जीवितेनवा॥३९॥ ॥मातोवाच॥ ॥किमद्यकानांयेलोकाद्विषंतस्तानवाप्नुयुः॥ येत्वादृतात्मनांलोकाःसुहृदस्तान्व्रजंतुनः॥४०॥ भृत्यैर्विहीयमानानांपरपिंडोपजीविनां ॥ कृपणानामसत्वानांमावृत्तिमनुवर्तिथाः॥४१॥ अनुत्वांतातजीवंतुब्राह्मणाःसुहृदस्तथा॥ पर्जन्यमिवभूतानिदेवाइवशतक्रतुम्॥४२॥ यमाजीवंतिपुरुषंसर्वभूतानिसंजय॥ पक्वंद्रुममिवासाद्यतस्यजीवितमर्थवत्॥४३॥ यस्यशूरस्यविक्रांतेरधंतेबांधवाःसुखम्॥त्रिदशाइवशक्रस्यसाधुतस्येहजीवितम्॥४४॥स्वबाहुबलमाश्रित्ययोऽभ्युज्जीवतिमानवः॥सलोकेलभतेकीर्तिंपरत्रचशुभांगतिम्॥ ४५॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिविदुलापुत्रानुशासनेत्रयस्त्रिंशाधिकशततमोऽध्यायः॥ १३३॥ ॥ ७ ॥

हतेइतिपुरुषपदनिर्वचनंवर्णविकारादिनाज्ञेयम्॥३५॥३६॥दिष्टभावंमरणं प्रजासंततिः प्रियंपुत्रादि सुखंतत्परिष्वंगादिजोहर्षः॥३७॥३८॥मामपश्यंत्यास्तेपृथिव्याकिमितिसंबंधः॥ ३९॥किमद्यकिंभोक्तव्यमितियेचिंतयंतिनिर्धनास्तेषांकिमद्यकानांयद्वा किमद्यत्वरयाश्वएवशत्रूनजेष्यामइतिविलंबशीलानां हन्यमानस्येतिपाठेअनुद्युतस्य अत्रहंतिर्गत्यर्थःअनाहतानामितिपाठेशस्त्रैरक्षतानांअनाहतानामितिपाठेअलसानां निर्मन्युकानामित्यपिपाठः॥४०॥४१॥४२॥ ४३॥ ४४ ॥ ४५॥ इतिउद्योगप० नैलकंठीयेभारतभावदीपेत्रयस्त्रिंशदधिकशततमोऽध्यायः॥ १३३॥ ॥ ७ ॥ ॥७॥

अथेति ॥ १॥ २ ॥ ३ ॥ ४ ॥ सहायोपचितिंसहायसंपत्तिंकृत्वापिअपरैस्वकीयांस्तवपौरुषमपश्यंतोयत्ननैष्फल्यादनुदुष्येयुःशत्रुपक्षंश्रययुरित्यर्थः ॥ ५ ॥स्वीयानांसंग्रहेउपायमाह नैरितिंतैःस्वीयैः संघातंऐक्यं व्यसनंपरस्य अयंतवशत्रुः ॥ ६ ॥ ७ ॥ मेमसंब्राह्मणोऽब्रवीदितिसंबंधः ॥ ८ ॥ ९ ॥ अर्थाभिनिर्वृत्तौप्रयोजननिष्पत्तौ परेतत्संबंधिनः तेनार्थेनआप्यायिताभवंति तस्यतद्वाग्यादेवा

॥ विदुलोवाच ॥ ॥ अथैतस्यामवस्थायांपौरुषंहातुमिच्छसि ॥ निहीनसेवितंमार्गंगमिष्यस्यचिरादिव ॥ १ ॥ योहितेजोयथाशक्तिनदर्शयतिविक्रमात् ॥ क्ष त्रियोजीविताकांक्षीस्तेनइत्येवतंविदुः ॥ २ ॥ अर्थवंत्युपपन्नानिवाक्यानिगुणवंतिच ॥ नैवसंप्राप्नुवंतित्वांमुमूर्षुमिवभेषजम् ॥ ३ ॥ संतिवैसिंधुराजस्यसंतुष्टा नतथाजनाः ॥ दौर्बल्यादासतेमूढाव्यसनौघप्रतीक्षिणः ॥ ४ ॥ सहायोपचितिंकृत्वाव्यवसाय्यततस्ततः ॥ अनुदुष्येयुरपरेपश्यंतस्तवपौरुषम् ॥ ५ ॥ तैःकृत्वासहसं घातंगिरिदुर्गालयंचर ॥ कालेव्यसनमाकांक्षनैवायमजरामरः ॥ ६ ॥ संजयोनामतश्चत्वंनचपश्यामितत्त्वयि ॥ अन्वर्थनामाभवमेपुत्रमाव्यर्थनामकः ॥ ७ ॥ सम्यग्दृष्टिर्महाप्राज्ञोबालंत्वांब्राह्मणोऽब्रवीत् ॥ अयंप्राप्यमहत्कृच्छ्रंपुनर्वृद्धिंगमिष्यति ॥ ८ ॥ तस्यस्मरंतीवचनमाशंसेविजयंतव ॥ तस्मात्तातब्रवीमित्वांव क्ष्यामिचपुनःपुनः ॥ ९ ॥ यस्यत्वर्थाभिनिर्वृत्तौभवंत्याप्यायिताःपरे ॥ तस्यार्थसिद्धिर्नियतानयेष्वर्थानुसारिणः ॥ १० ॥ समृद्धिरसमृद्धिर्वापूर्वेषांममसंजय ॥ एवंविद्वान्युद्धमनाभवमाप्रत्युपाहरः ॥ ११ ॥ नातःपापीयसींकांचिदवस्थांशंबरोब्रवीत् ॥ यत्रनैवाद्यनप्रातर्भोजनंप्रतिदृश्यते ॥ १२ ॥ पतिपुत्रवधादेतत्परमं दुःखमब्रवीत् ॥ दारिद्र्यमितियत्प्रोक्तंपर्यायमरणंहितत् ॥ १३ ॥ अहंमहाकुलेजाताऋद्ध्यद्ममिवागता ॥ ईश्वरीसर्वकल्याणीभर्त्रापरमपूजिता ॥ १४ ॥ महा र्हमाल्याभरणांसुवृष्टांबरवाससम् ॥ पुरात्दृष्टःसुहृद्वर्गोमामपश्यत्सुहृद्गताम् ॥ १५ ॥ यदामांचैवभार्यांचद्रष्टासिभृशदुर्बलाम् ॥ नतदाजीवितेनार्थोभवितात वसंजय ॥ १६ ॥ दासकर्मकरान्भृत्यानाचार्यर्त्विक्पुरोहितान् ॥ अदृश्यास्मान्प्रजहतोदृष्ट्वाकिंजीवितेनते ॥ १७ ॥ यदिकृत्यंनपश्यामितवाद्याहंयथापुरा ॥ श्ला घनीयंयशस्यंचकाशांतिर्हृदयस्यमे ॥ १८ ॥ नेतिचेद्ब्राह्मणंब्रूयांदीर्घंतद्धृदयंमम ॥ नत्यहंनचमेभर्तानेतिब्राह्मणमुक्तवान् ॥ १९ ॥ वयमाश्रयणीयाःस्मनश्रोता रःपरस्यच ॥ सान्यमासाद्यजीवंतीपरित्यक्ष्यामिजीवितम् ॥ २० ॥ अपारेभवनःपारमप्लवेभवनःप्लवः ॥ कुरुष्वस्थानमस्थानेमृतान्संजीवयस्वनः ॥ २१ ॥

र्थसिद्धिः नयेषुनीतिमार्गेषु ॥ १० ॥ पूर्वेषांममचयुद्धेसमृद्धिरसमृद्धिर्वाऽवश्यंभाविनीत्येवंविद्वान्युद्धमनाभव लाभालाभौसमौकृत्वायुद्धस्वेतिभावः माप्रत्युपाहरंप्रत्युपहारंयुद्धोपसंहारंमाकार्षीरि त्यर्थः ॥ ११ ॥अयुध्यतोदरिद्रत्वंस्यात्तच्चानिष्टमित्याह नातइति ॥ १२ ॥ पर्यायमरणंदारिद्र्यं नामांतरेणमरणमेवेत्यर्थः ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ अस्मान्प्रजहतःअस्मत्त्यागंकुर्वतः ॥ १७ ॥ कृत्यंकर्तव्यंपराक्रमम् ॥ १८ ॥ १९ ॥ श्रोतारःपराज्ञायाःपाठांतरेश्रेतारआश्रयितारः ॥ २० ॥ २१ ॥

॥ १२९ ॥

शक्याः जेतुमितिशेषःसह्याइतिपाठेसहनीयाः ॥ २२ ॥ निर्विण्णात्माविरक्तचित्तःयतोहतमनानष्टसंकल्पः विश्रुतिंख्यातिं ॥ २३ ॥ यहंसोमपात्रंप्रयहमितिपाठेनियमनंनियंतृत्वमित्यर्थःप्रयहश्चतु लासूत्रेवंद्यांनियमनेभुजेइतिविश्वः ॥ २४ ॥ २५ ॥ २६ ॥ कापुरुषाःजनाःरणेआत्मानंदेहंत्यक्कारणेदक्षंशूरंसमृद्धिभिस्तर्पयंतिस्मेतिसंबंधः ॥ २७ ॥ उपविभ्रंशंमहाप्रपातंजीवितस्यसंशयोमरणंलब्ध स्यजितस्य शेषंपुनःस्वल्पेनविभवेनावस्थापनं॥२८॥रूढंयस्तंमत्वाएकायनंस्वर्गराज्ययोर्मध्येएकंमार्गंपतगच्छ॥२९॥मात्वेति शत्रूणांभयवर्धनंभयच्छेदनं अनुयत्वात् सुरुपणंदीनं त्वात्वां मादृशंमाद्राक्षं

सर्वेतेशत्रवःशक्यानचेज्जीवितुमर्हसि ॥ अथचेदीदृशींवृत्तिंक्लीबामभ्युपपद्यसे ॥ २२ ॥ निर्विण्णात्माहतमनामुंचैतांपापजीविकाम् ॥ एकशत्रुवधेनैवशूरोग च्छतिविश्रुतिम् ॥ २३ ॥ इंद्रोदृत्रवधेनैवमहेंद्रःसमपद्यत ॥ माहेंद्रंचग्रहंलेभेलोकानांचेश्वरोभवत् ॥ २४ ॥ नामविश्राव्यवैसंख्येशत्रूनाहूयदंशितान् ॥ सेनाग्रं चापिविद्राव्यहत्वावापुरुषंवरम् ॥ २५ ॥ यदैवलभतेवीरःसुयुद्धेनमहद्यशः ॥ तदैवप्रव्यथंतेऽस्यशत्रवोविनमंतिच ॥ २६ ॥ त्यक्कात्मानंरणेदक्षंशूरंकापुरुषाज नाः ॥ अवशास्तर्पयंतिस्मसर्वकामसमृद्धिभिः ॥ २७ ॥ राज्यंचाप्युग्रविभ्रंशंसंशयोजीवितस्यवा ॥ नलब्धस्यहिशत्रोर्वैशेषंकुर्वंतिसाधवः ॥ २८ ॥ स्वर्गद्वारोप मंराज्यमथवाप्यमृतोपमम् ॥ रुद्धमेकायनंमत्वापतोल्मुकइवारिषु ॥ २९ ॥ जहिशत्रूत्रणेराजन्स्वधर्ममनुपालय ॥ मात्वादृशंसुरुपणंशत्रूणांभयवर्धनम् ॥ ३० ॥ अस्मदीयैश्चशोचद्भिर्नदद्भिश्चपरैर्वृतम् ॥ अपित्वांनानुपश्येयंदीनाद्दीनमिवास्थितम् ॥ ३१ ॥ दृष्यसौवीरकन्याभिःश्लाघस्वार्थैर्यथापुरा ॥ माचसैंधवकन्यानामवसन्नोवशंगमः ॥ ३२ ॥ युवारूपेणसंपन्नोविद्ययाभिजनेनच ॥ यत्त्वादृशोविकुर्वीतयशस्वीलोकविश्रुतः ॥ ३३ ॥ अधुर्यवच्चवोढव्येमन्येमरण मेवतत् ॥ यदित्वामनुपश्यामिपरस्यप्रियवादिनम् ॥ ३४ ॥ पृष्ठतोनुव्रजंतंवाकाशांतिर्हृदयस्यमे ॥ नास्मिन्जातुकुलेजातोगच्छेद्यान्यस्यपृष्ठतः ॥ ३५ ॥ न त्वंपरस्यानुचरस्तातजीवितुमर्हसि ॥ अहंहिक्षत्रहृदयंवेदयत्परिशाश्वतम् ॥ ३६ ॥ पूर्वैःपूर्वतरैःप्रोक्तंपरैःपरतरैरपि ॥ शाश्वतंचाव्ययंचैवप्रजापतिविनिर्मि तम् ॥ ३७ ॥ योवैकश्चिदिहाजातःक्षत्रियःक्षत्रकर्मवित् ॥ भयाद्वृत्तिसमीक्षोवाननमेदिहकस्यचित् ॥ ३८ ॥

दृशमितिमाङ्योगादडभावेइरितोवेत्यङ्पक्षेदृशिरूपेक्षणेऽस्यलुङुक्तमैकवचनं पाठांतरंतुमूढजनकल्पितंनादरणीयं ॥ ३० ॥ ३१ ॥ दृष्यहर्षंप्रामुहि सौवीरकन्याभिःस्वदारैः माचेति सैंधवकन्यानांशत्रुदे शजकन्यानां ॥ ३२ ॥ विकुर्वीतअपसरणंकुर्वीत ॥ ३३ ॥ अधुर्यवत्अदांतदृपभवत् अनड्वानिवेत्यपिपाठः तत्विकारकरणं ॥ ३४ ॥ ३५ ॥वेदवेद्मि परिशाश्वतंसर्वथैवैकरूपं अक्षीणमित्यर्थः॥३६॥ पूर्वैःस्ववंशजैः परैरन्यवंशीयैः परतरैर्वृद्धैः अव्ययंअपक्षयहीनंक्षत्रहृदयंप्रोक्तमितिपूर्वेणसंबंधः ॥ ३७ ॥ आजातःसम्यग्जातःकुलेजातइत्यर्थः यआजातःसभयात्कस्यचिन्ननमेत् वृत्तिसमीक्षोवृत्तिं समीक्षमाणोवाननमेत् ॥ ३८ ॥

उद्यच्छेत्उद्यमंकुर्यात् अपर्वणिअकांडेवृथापीत्यर्थः ॥३९॥ परीयात्पर्यटनंकुर्यात् ॥४०॥ दुष्कृतःपापिष्ठान् ॥४१॥ ॥इतिउद्योगप०नैलकंठीयेभारतभावदीपेचतुस्त्रिंशदधिकशततमोऽध्यायः॥१३४॥ कृष्णायसस्यलोहस्य संहत्यपिंडीकृत्य ॥ १ ॥ २ ॥ एकजंअभ्रातृकं ॥ ३ ॥ ४ ॥ सर्वावस्थागार्हस्थ्यादिरूपा सर्वारंभाइतिपाठांतरं तावेवधर्मार्थावेव अचूचुदंप्रेरितवत्यस्मि ॥ ५ ॥ समीक्ष्यक्रमोपेतःद्रष्टुं

उद्यच्छेदेवननमेदुद्यमोह्येवपौरुषम् ॥ अप्यपर्वणिभज्येतननमेतेहकस्यचित् ॥ ३९ ॥ मातंगोमत्तइवचपरीयात्समहामनाः ॥ ब्राह्मणेभ्योनमेन्नित्यंधर्मायैव चसंजय ॥ ४० ॥ नियच्छन्नितरान्वर्णान्विनिघ्नन्सर्वदुष्कृतः ॥ ससहायोऽसहायोवायावज्जीवंतथाभवेत् ॥ ४१ ॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिविदुलापुत्रानुशासनेचतुस्त्रिंशदधिकशततमोऽध्यायः ॥ १३४ ॥ ॥७॥ ॥पुत्रउवाच॥ ॥ कृष्णायसस्येवचतेसंहत्यहृदयंकृतम् ॥ ममामातस्त्वकरुणेवीरप्रज्ञेह्यमर्षणे ॥ १ ॥ अहोक्षत्रसमाचारोयत्रमामितरंयथा ॥ नियोजयसियुद्धायपरमातेवमांतथा ॥ २ ॥ ईदृशंवचनंब्रूयाद्भवतीपुत्रमेकजम् ॥ किंनुतेमामपश्यंत्याःपृथिव्याअपिसर्वया ॥ ३ ॥ किमाभरणकृत्येनकिंभोगैर्जीवितेनवा ॥ मयिवासंगरहतेप्रियपुत्रेविशेषतः ॥ ४ ॥ ॥मातोवाच॥ ॥ सर्वावस्थाहिविदुषांतातधर्मार्थकारणात् ॥ तावेवाभिसमीक्ष्याहंसंजयत्वामचूचुदम् ॥ ५ ॥ ससमीक्ष्यक्रमोपेतोमुख्यःकालोयमागतः ॥ अस्मिंश्चेदागतेकाले कार्यंनप्रतिपद्यसे ॥ ६ ॥ असंभावितरूपस्त्वमानृशंस्यंकरिष्यसि ॥ तंत्वामयशसास्पृष्टंनब्रूयांयदिसंजय ॥ ७ ॥ खरीवात्सल्यमाहुस्तन्निःसामर्थ्यमहेतुकम् ॥ सद्भिर्विगर्हितंमार्गंत्यजमूर्खनिषेवितम् ॥ ८ ॥ अविद्यावैमहत्यस्तियामिमांसंश्रिताःप्रजाः ॥ तवस्याद्यदिसद्वृत्तंतेनमेत्वंप्रियोभवेः ॥ ९ ॥ धर्मार्थगुणयुक्तेन नेतरेणकथंचन ॥ दैवमानुषयुक्तेनसद्भिराचरितेनच ॥ १० ॥ योह्येवमविनीतेनरमतेपुत्रनप्तृणा ॥ अनुत्थानवताचापिदुर्विनीतेनदुर्धिया ॥ ११ ॥ रमतेयस्तु पुत्रेणमोघंतस्यप्रजाफलम् ॥ अकुर्वंतोहिकर्माणिकुर्वंतोनिंदितानिच ॥ १२ ॥ सुखंनैवेहनामुत्रलभंतेपुरुषाधमाः ॥ युद्धायक्षत्रियःसृष्टःसंजयेहजयायच ॥ १३ ॥ जयन्वावध्यमानोवाप्राप्नोतींद्रसलोकताम् ॥ नशक्रभवनेपुण्येदिवितद्विद्यतेसुखम् ॥ यदमित्रान्वशेकृत्वाक्षत्रियःसुखमेधते ॥ १४ ॥

योग्येनपराक्रमेणयुक्तः अस्मिन्कालेचेत्कार्यंकर्तव्यंयुद्धंनप्रतिपद्यसे ॥६॥ आनृशंस्यंशत्रुषुस्वदेहेवादयांकरिष्यसितर्हित्वंअसंभावितरूपस्तिरस्कृतरूपोभविष्यसीतिसंबंधः॥७॥ खरीति उभयलोकानुपयुक्तेपिपुत्रेवृथावात्सल्यंखरीकरोतितद्वदहमपिस्यामित्यर्थः ॥ ८ ॥ अविद्याअनात्मनिदेहेआत्मबुद्धिःसायदितवस्यात्तर्हिसत्समीचीनंतवदेहनाशादात्मनाशंपश्यतोवृत्तंशीलं उपहासार्थमिदमुच्यते तेन देहात्मभावेनममदेहादन्यमात्मानंपश्यंत्याःप्रियोभवेः अयमप्युपहासः देहात्मवादीदुर्वृत्तोममद्वेष्यश्चभविष्यसीत्यर्थः ॥ ९ ॥ धर्मार्थेति त्वयाभाव्यमितिशेषः ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

निकृतेनअपकृतेनापिशत्रून्प्रतिजिगीषया प्रस्थातव्यमेवेतिशेषः ॥ १५ ॥ १६ ॥ स्वल्पमैश्वर्यंअप्रियमनिष्टंइच्छतिमन्यतेप्राज्ञः यस्यतुअल्पमेवैश्वर्यंप्रियंतस्यध्रुवंनिश्चितंतदेवाल्पंप्रियत्वेनगृहीतंअप्रियमनर्थकरंस्यात् तेनराज्ञाऽल्पसंतुष्टेननभवितव्यमित्यर्थः ॥ १७ ॥ अभावंनाशम् ॥ १८ ॥ कारुण्यमेवपश्य हितत्वेनेतिशेषः ॥१९॥ अतोवचनात्मेममभूयसीनंदिःसमृद्धिः भवितेतिशेषः यत्एवंकारुण्यदेहेकृपांअनुपश्यसिहितत्वेन एवंसत्यपित्वमेवचोद्यंपूर्वपक्षंचोदयसिप्रेरयसिकारुण्यंकुर्वेति अथापिवज्रहृदयाहंतेतुभ्यंचोदयामि ॥ २० ॥ सैंधवान्हत्वाकृच्छ्रेणभावितंतेतवविजयंयदापश्यामिद्रक्ष्यामि

मन्युनादह्यमानेनपुरुषेणमनस्विना ॥ निकृतेनेहबहुशःशत्रून्प्रतिजिगीषया ॥ १५ ॥ आत्मानंवापरित्यज्यशत्रुंवाविनिपात्यच ॥ अतोन्येनप्रकारेणशांतिरस्यकुतोभवेत् ॥ १६ ॥ इहप्राज्ञोहिपुरुषःस्वल्पमप्रियमिच्छति ॥ यस्यस्वल्पंप्रियंलोकेध्रुवंतस्याल्पमप्रियम् ॥ १७ ॥ प्रियाभावाच्चपुरुषोनैवप्राप्नोतिशोभनम् ॥ ध्रुवंचाभावमभ्येतिगत्वागंगेवसागरम् ॥ १८ ॥ ॥पुत्रउवाच॥ ॥ नेयंमतिस्त्वयावाच्यामातःपुत्रेविशेषतः ॥ कारुण्यमेवात्रपश्यभूत्वेहजडमूकवत् ॥ १९ ॥ मातोवाच॥ ॥ अतोमेभूयसीनंदिर्यदेवमनुपश्यसि ॥ चोद्यंमांचोदयस्येतद्भृशंवैचोदयामिते ॥ २० ॥ अथत्वांपूजयिष्यामिहत्वावैसर्वसैंधवान् ॥ अहंपश्यामिविजयंकृच्छ्रभावितमेवते ॥ २१ ॥ ॥पुत्रउवाच॥ ॥ अकोशस्यासहायस्यकुतःसिद्धिर्जयोमम ॥ इत्यवस्थांविदित्वैतामात्मनात्मनिदारुणाम् ॥ २२ ॥ राज्याद्भावोनिवृत्तोमेत्रिदिवादिवदुष्कृतः ॥ ईदृशंभवतीकंचिदुपायमनुपश्यति ॥ २३ ॥ तन्मेपरिणतप्रज्ञेसम्यक्प्रब्रूहिपृच्छते ॥ करिष्यामिहितत्सर्वंयथावदनुशासनं ॥ २४ ॥ ॥मातोवाच॥ ॥ पुत्रनात्मावमतव्यःपूर्वाभिरसमृद्धिभिः ॥ अभूत्वाहिभवंत्यर्थाभूत्वानश्यंतिचापरे ॥ अमर्षेणैवचाप्यर्थानारब्धव्याःसुबालिशैः ॥ २५ ॥ सर्वेषांकर्मणांतातफलेनित्यमनित्यता ॥ अनित्यमितिजानंतोनभवंतिभवंतिच ॥ २६ ॥ अथयेनैवकुर्वंतिनैवजातुभवंतिते ॥ ऐकगुण्यमनीहायामभावःकर्मणांफलम् ॥ २७ ॥ अथद्वैगुण्यमीहायांफलंभवतिवानवा ॥ यस्यप्रागेवविदितासर्वार्थानामनित्यता ॥ २८ ॥

अथत्वांपूजयिष्यामीतियोजना ॥ २१ ॥ एतांअवस्थांदारुणामात्मनिआत्मनास्वयंविदित्वा मेममभावश्चित्तंराज्यान्निवृत्तइत्युत्तरेणसंबंधः ॥ २२ ॥ २३ ॥ २४ ॥ अर्थाःधर्माद्याःबालिशैरमर्षेणैवनारब्धव्याः पंडितैस्तुआदरेणआरब्धव्याएवेतिभावः ॥ २५ ॥ अनित्यमितिजानंतःपंडिताआरभमाणानभवंतिकदाचिदैश्वर्यंनलभंते भवंतिचकदाचित्सिद्धार्थाः ॥ २६ ॥ अकुर्वाणान्निंदति अथेति अनीहायांचेष्टायाअभावे ऐकगुण्यंएकगुणमेवफलं यत्कर्मणामीप्सिततमानामभावोऽप्राप्तिः ॥ २७ ॥ ईहायांतुद्वैगुण्यंगुणद्वयंयत्फलंभवतिवानवेति अभावनिश्चयापेक्षयापाक्षिकफलसद्भाववतीप्रवृत्तिरेवश्रेष्ठेत्यर्थः ॥ २८ ॥

वृद्धिःपीडा वृधुहिंसायामित्यस्यरूपं समृद्धिरैश्वर्यं तेउभेनुदेत्दूरीकुर्यात् आत्मनःपीडांपरस्यैश्वर्यंचनुदेदित्यर्थः योक्तव्यंसज्जीभवितव्यम् ॥ २९ ॥ ईश्वरेदेवः ॥ ३० ॥ ३१ ॥ उद्धर्षणानिप्रोत्साहकानि अनुदर्शितंरूपंलोकवृत्तांतोयस्मैसतथा ॥ ३२ ॥ ३३ ॥ ३४ ॥ तेषांक्रुद्धादीनां अपप्रदायी भक्तंवेतनंचसर्वेभ्यःप्रथमंदेयं नचेत्सद्यःकुपितास्तेत्यजेयुरित्यर्थः ॥ ३५॥ त्यक्तजीवितंयुद्धेजीवितनिराकांक्षंश त्रुर्जीविताकांक्षीउद्विजते ॥ ३६ ॥ तमिति तंशत्रुंपराक्रांतंपराक्रमवंतंविदित्वाअशक्त्यावशेस्वाज्ञायांयदिनकरोतितर्हिएनंनिर्वादैःपरिनिष्ठितैर्दूतैर्निर्वदेत्परिनिष्ठांप्रापयेत् साम्नादानेनवातंपर्यवस्थापयेदि

नुदेद्वृद्धिसमृद्धीसप्रतिकूलेनृपात्मज ॥ उत्थातव्यंजागृतव्यंयोक्तव्यंभूतिकर्मसु॥२९॥भविष्यतीत्येवमनःकृत्वासततमव्यथैः ॥ मंगलानिपुरस्कृत्यब्राह्मणांश्चे श्वरैःसह ॥ ३० ॥ प्राज्ञस्यनृपतेराशुवृद्धिर्भवतिपुत्रक॥ अभिवर्ततिलक्ष्मीस्तंप्राचीमिवदिवाकरः॥ ३१॥निदर्शनान्युपायांश्चबहून्युद्धर्षणानिच॥ अनुदर्शि तरूपोसिपश्यामिकुरुपौरुषम्॥३२॥ पुरुषार्थमभिप्रेतंसमाहर्तुमिहार्हसि॥ क्रुद्धान्लुब्धान्परिक्षीणानवलिप्तान्विमानितान्॥ ३३ ॥ स्पर्धिनश्चैवयेकेचित्ता न्युक्तउपधारय॥ एतेनत्वंप्रकारेणमहतोभेत्स्यसेगणान्॥ ३४ ॥ महावेगइवोद्भूतोमातरिश्वाबलाहकान्॥ तेषामग्रप्रदायीस्याःकल्पोत्थायीप्रियंवदः॥तेत्वां प्रियंकरिष्यंतिपुरोधास्यंतिचध्रुवम्॥३५॥ यदैवशत्रुर्जानीयात्सपत्नंत्यक्तजीवितम्॥तदैवास्मादुद्विजतेसर्पाद्वेश्मगतादिव ॥ ३६॥तंविदित्वापराक्रांतंवशेन कुरुतेयदि ॥ निर्वादैर्निर्वदेदेनमंततस्तद्भविष्यति ॥ ३७॥ निर्वादादास्पदंलब्धाधनवृद्धिर्भविष्यति॥ धनवंतंहिमित्राणिभजंतेचाश्रयंतिच ॥ ३८ ॥ स्खलिता र्थंपुनस्तानिसंत्यजंतिचबांधवाः॥ अप्यस्मिन्नाश्वसंतेचजुगुप्संतेचतादृशम्॥३९॥शत्रुंकृत्वायःसहायंविश्वासमुपगच्छति॥अतःसंभाव्यमेवैतद्यद्राज्यंप्राप्नु यादिति॥ ४० ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिविदुलापुत्रानुशासनेपंचत्रिंशदधिकशततमोऽध्यायः॥ १३५॥ ॥छ॥ ॥छ॥

॥ मातोवाच॥ ॥नैवराज्ञादरःकार्योजातुकस्यांचिदापदि॥ अथचेदपिदीर्णःस्यान्नैववर्तेतदीर्णवत्॥ १ ॥ दीर्णंहिदृष्ट्वाराजानंसर्वमेवानुदीर्यते॥ राष्ट्रंबलम मात्याश्चपृथक्कुर्वंतितेमतीः॥ २॥शत्रूनेकेप्रपद्यंतेप्रजहत्यपरेपुनः ॥ अन्येतुप्रजिहीर्षंतियेपुरस्ताद्विमानिताः॥ ३॥

त्यर्थः निर्वादःस्यात्परीवादेपरिनिष्ठितवादयोरितिविश्वः अंततःफलतःतत्शत्रोर्वशीकरणंभविष्यति ॥ ३७ ॥ तत्रोपायमाह निर्वादादिति एवंपरिनिष्ठिततयाआस्पदंस्थानंप्राप्तंचेत्शत्रुणाऽनुपद्रुतस्यधन वृद्ध्यादिकंसर्वंसेत्स्यतीत्यर्थः ॥ ३८ ॥ स्खलितार्थंच्युतधनं नआश्वसंतेइतिच्छेदः विश्वासंनकुर्वंतीत्यर्थः ॥ ३९ ॥ संभाव्यमेवैतदित्युपहासः असंभावितमेतत्यच्छत्रौविश्वासंकृत्वापिराज्यंप्राप्नुयादिति ॥ ४० ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेपंचत्रिंशदधिकशततमोऽध्यायः ॥ १३५ ॥ ॥छ॥ ॥ दरोभयं जातुकदाचित् दीर्णोभीतः ॥ १ ॥ महीमितिपाठेमहीस्थान्लोकान् ॥ २ ॥ अपरेस्वीयाः प्रजिहीर्षंतिप्रहर्तुंताडितुमिच्छंति॥ ३ ॥

इलाःधेनवः इलाधेनुःसहवत्सानआगादितिमंत्रवर्णात् ॥ ४ ॥ तेतवापिसुहृदःसंति ॥ ५॥ येराष्ट्रंअस्मदीयमिदंअस्माभीरक्षणीयंराजाचव्यसनादुद्धर्तव्यइतिअभिमन्यंतेअभिमानवंतः मादीदरःमाविदार य ॥ ६ ॥ समाश्वासंधैर्यम् ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ [illegible]चेतसोपितस्यतमोऽपागमदितिसंबंधः ॥ १२ ॥ उदकेमज्जंतीव भूःपित्र्यंराज्यं धूरितिपाठेपिसएवार्थः इयंमयाधार्यामग्रंराज्यंवाउद्धर्त व्यंप्रवणेप्रपातेवायुद्धाख्येवामर्तव्यंनतुएवमेवनिर्व्यापा[illegible]स्थे [illegible]शिक्षयित्री ॥१३॥ अपरापरंअपरमपरंउत्तरोत्तरमितियावत् प्रतिवदन्प्रतिकूलंवदन् आयसंहृदयंतवेतिपुत्रेनिःस्नेहासीत्यादि॥१४॥

यएवात्यंतसुहृदस्तएनंपर्युपासते॥अशक्तयःस्वस्तिकामाबद्धवत्साइलाइव॥४॥शोचंतमनुशोचंतिपतितानिवबांधवान्॥ अपितेपूजिताःपूर्वमपितेसुहृदो मताः॥ ५॥ येराष्ट्रमभिमन्यंतेराज्ञोव्यसनमीयुषः॥ मादीदरस्त्वंसुहृदोमात्वांदीर्णंप्रहासिषुः ॥ ६॥ प्रभावंपौरुषंबुद्धिंजिज्ञासंत्यामयातव॥ विदधत्यासमा श्वासमुक्तंतेजोविवृद्धये॥७॥यदेतत्संविजानासियदिसम्यग्ब्रवीम्यहम्॥ कृत्वासौम्यमिवात्मानंजयायोत्तिष्ठसंजय॥८॥ अस्तिनःकोशनिचयोमहान्हिविदि तस्तव॥ तमहंवेदनान्यस्तमुपसंपादयामिते॥ ९॥ संतिनैकतमाभूयःसुहृदस्तवसंजय ॥ सुखदुःखसहावीरसंग्रामादनिवर्त्तिनः ॥ १० ॥ तादृशाहिसहायावै पुरुषस्यबुभूषतः॥इष्टंजिहीर्षतःकिंचित्सचिवाःशत्रुकर्शन॥११॥ यस्यास्त्वीदृशकंवाक्यंश्रुत्वापिस्वल्पचेतसः॥ तमस्त्वपागमत्तस्यसुचित्रार्थपदाक्षरम्॥१२ ॥पुत्रउवाच॥ ॥उदकेभूरियंधार्यामर्तव्यंप्रवणेमया॥ यस्यमेभवतीनेत्रीभविष्यद्भूतिदर्शिनी ॥१३॥ अहंहिवचनंत्वत्तःशुश्रूषुरपरापरम्॥ किंचित्किंचित्प्र तिवदंस्तूष्णीमासंमुहुर्मुहुः॥१४॥ अतृप्यन्नमृतस्येवकृच्छ्राल्लब्धस्यबांधवात्॥ उद्यच्छाम्येषशत्रूणांनियमार्थंजयायच॥१५॥ ॥कुंत्युवाच॥ ॥सदश्वइव सक्षिप्तःप्रणुन्नोवाक्यसायकैः॥तच्चकारतथासर्वंयथावदनुशासनम्॥१६॥इदमुद्धर्षणंभीमंतेजोवर्धनमुत्तमम्॥राजानंश्रावयेन्मंत्रीसीदंतंशत्रुपीडितं॥१७ जयोनामेतिहासोयंश्रोतव्योविजिगीषुणा ॥ महींविजयतेक्षिप्रंश्रुत्वाशत्रूंश्चमर्दति॥ १८ ॥इदंपुंसवनंचैववीराजननमेवच॥ अभीक्ष्णंगर्भिणीश्रुत्वाध्रुवं वीरंप्रजायते॥१९॥विद्याशूरंतपःशूरंदानशूरंतपस्विनम्॥ब्राह्म्याश्रियादीप्यमानंसाधुवादेचसंमतम्॥२०॥अर्चिष्मंतंबलोपेतंमहाभागंमहारथम्॥धृतिमं तमनाधृष्यंजेतारमपराजितं॥२१॥ नियंतारमसाधूनांगोप्तारंधर्मचारिणां॥ईदृशंक्षत्रियासूतेवीरंसत्यपराक्रमं॥२२॥ ॥इ०उ०भग०विदुलापुत्रानुशास नसमाप्तौषट्त्रिंशदधिकशततमोऽध्यायः॥१३६॥ ॥छ॥ ॥छ॥

बांधवात्बंधुतः उद्यच्छामिउद्यमंकरोमि नियमार्थंनिग्रहार्थं बांधवानितिपाठेउद्यच्छामिधारयामि ॥ १५ ॥ १६ ॥ १७ ॥ १८॥ पुंसवनंपुत्रप्रसवकरं वीराणांआजननंयेनतद्वीराजननं प्रजायतेजनय ति ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ ॥इतिउद्योगप०नैलकंठीयेभा०षट्त्रिंशदधिकशततमोऽध्यायः ॥ १३६ ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

अर्जुनमिति ॥ १ ॥ २ ॥ उद्वर्तयिष्यतिआकुलीकरिष्यति लोकंशत्रुजनम् ॥ ३ ॥ ४ ॥ मेधान्अश्वमेधान् ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ धर्मोपचायिनांध

॥ कुंत्युवाच ॥ ॥ अर्जुनंकेशवब्रूयास्त्वयिजातेस्मसूतके ॥ उपोपविष्टानारीभिराश्रमेपरिवारिता ॥ १ ॥ अथांतरिक्षेवागासीद्दिव्यरूपामनोरमा ॥ सहस्राक्ष समःकुंतिभविष्यत्येषतेसुतः ॥ २ ॥ एषजेष्यतिसंग्रामेकुरून्सर्वान्समागतान् ॥ भीमसेनद्वितीयश्चलोकमुद्वर्तयिष्यति ॥ ३ ॥ पुत्रस्तेपृथिवींजेतायशश्चास्यदिवंस्पृशेत् ॥ हत्वाकुरूंश्चसंग्रामेवासुदेवसहायवान् ॥ ४ ॥ पित्र्यमंशंप्रनष्टंचपुनरप्युद्धरिष्यति ॥ भ्रातृभिःसहितःश्रीमांस्त्रीन्मेधानाहरिष्यति ॥ ५ ॥ ससत्यसंधोबीभत्सुःसव्यसाचीयथाच्युत ॥ तथात्वमेवजानासिबलवंतंदुरासदम् ॥ ६ ॥ तथातदस्तुदाशार्हयथावागभ्यभाषत ॥ धर्मश्चेदस्तिवार्ष्णेयतथासत्यंभविष्यति ॥ ७ ॥ त्वंचापितत्तथाकृष्णसर्वंसंपादयिष्यसि ॥ नाहंतदभ्यसूयामियथावागभ्यभाषत ॥ ८ ॥ नमोधर्मायमहतेधर्मोधारयतिप्रजाः ॥ एतद्धनंजयोवाच्योनित्योद्युक्तोवृकोदरः ॥ ९ ॥ यदर्थंक्षत्रियासूतेतस्यकालोयमागतः ॥ नहिवैरंसमासाद्यसीदंतिपुरुषर्षभाः ॥ १० ॥ विदितातेसदाबुद्धिर्भीमस्यनसशाम्यति ॥ यावदंतंनकुरुतेशत्रूणांशत्रुकर्शन ॥ ११ ॥ सर्वधर्मविशेषज्ञांस्नुषांपांडोर्महात्मनः ॥ ब्रूयामाधवकल्याणींकृष्णकृष्णांयशस्विनीम् ॥ १२ ॥ युक्तमेतन्महाभागेकुलेजातेयशस्विनि ॥ यन्मेपुत्रेषुसर्वेषुयथावत्त्वमवर्तिथाः ॥ १३ ॥ माद्रीपुत्रौचवक्तव्यौक्षत्रधर्मरतावुभौ ॥ विक्रमेणार्जितान्भोगान्वृणीतंजीवितादपि ॥ १४ ॥ विक्रमाधिगताह्यर्थाःक्षत्रधर्मेणजीवतः ॥ मनोमनुष्यस्यसदाप्रीणंतिपुरुषोत्तम ॥ १५ ॥ यच्चवःप्रेक्षमाणानांसर्वधर्मोपचायिनाम् ॥ पांचालीपरुषाण्युक्ताकोनुतत्क्षंतुमर्हति ॥ १६ ॥ नराज्यहरणंदुःखंद्यूतेचापिपराजयः ॥ प्रव्राजनंसुतानांवानमेतद्दुःखकारणम् ॥ १७ ॥ यत्रसाबृहतीश्यामासभायांरुदतीतदा ॥ अश्रौषीत्परुषावाचस्तन्मेदुःखतरंमहत् ॥ १८ ॥ स्त्रीधर्मिणीवरारोहाक्षत्रधर्मरतासदा ॥ नाध्यगच्छत्तदानाथंकृष्णानाथवतीसती ॥ १९ ॥ तंवैब्रूहिमहाबाहोसर्वशस्त्रभृतांवरम् ॥ अर्जुनंपुरुषव्याघ्रंद्रौपद्याःपदवींचर ॥ २० ॥ विदितंहितवात्यंतंक्रुद्धाविवयमांतकौ ॥ भीमार्जुनौनयेतांहिदेवानपिपरांगतिम् ॥ २१ ॥ तयोश्चैतदवज्ञानंयत्साकृष्णासभागता ॥ दुःशासनश्चयद्भीमंकटुकान्यभ्यभाषत ॥ २२ ॥ पश्यतांकुरुवीराणांतच्चसंस्मारयेःपुनः ॥ पांडवान्कुशलंपृच्छेःसपुत्रान्कृष्णयासह ॥ २३ ॥ मांचकुशलिनींब्रूयास्तेषुभूयोजनार्दन ॥ अविष्टंपृच्छपंथानंपुत्रान्मेप्रतिपालय ॥ २४ ॥

र्मवर्धनशीलानाम् ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ पदवींचरमार्गमनुसर शत्रुस्त्रीणांवैधव्यार्थंयतस्वेत्यर्थः ॥ २० ॥ परांगतिंमरणम् ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥

॥ २५ ॥ २६ ॥ २७ ॥ नैतदस्ति राष्ट्रमितिशेषः ॥ २८ ॥ निर्यायनिर्गत्य ॥ २९ ॥ ३० ॥ ३१ ॥ उपप्लव्यंविराटनगरं ॥ ३२ ॥ ॥ इतिउद्योगपर्वणिनैलकंठीयेभारतभावदीपेसप्तत्रिंशदधिकशततमोऽध्या

वैशंपायनउवाच ॥ ॥ अभिवाद्याथतांकृष्णःकृत्वाचापिप्रदक्षिणम् ॥ निश्चक्राममहाबाहुःसिंहखेलगतिस्ततः ॥ २५ ॥ ततोविसर्जयामासभीष्मादीन्कुरुपुंगवान् ॥ आरोप्याथरथेकर्णंप्रायात्सात्यकिनासह ॥ २६ ॥ ततःप्रयातेदाशार्हेकुरवःसंगतामिथः ॥ जजल्पुर्महदाश्चर्यंकेशवेपरमाद्भुतम् ॥ २७ ॥ प्रमूढापृथिवीसर्वामृत्युपाशवशीकृता ॥ दुर्योधनस्यबालिश्यान्नैतदस्तीतिचाब्रुवन् ॥ २८ ॥ ततोनिर्यायनगरात्प्रययौपुरुषोत्तमः ॥ मंत्रयामासचतदाकर्णेनसुचिरंसह ॥ २९ ॥ विसर्जयित्वाराधेयंसर्वयादवनंदनः ॥ ततोजवेनमहतातूर्णमश्वानचोदयत् ॥ ३० ॥ तेपिबंतइवाकाशंदारुकेणप्रचोदिताः ॥ हयाजग्मुर्महावेगामनोमारुतरंहसः ॥ ३१ ॥ तेव्यतीत्यमहाध्वानंक्षिप्रंश्येनाइवाशुगाः ॥ उच्चैर्जग्मुरुपप्लव्यंशार्ङ्गधन्वानमावहन् ॥ ३२ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिकुंतीवाक्येसप्तत्रिंशदधिकशततमोऽध्यायः ॥ १३७ ॥ ॥ ७ ॥ ॥ वैशंपायनउवाच ॥ ॥ कुंत्यास्तुवचनंश्रुत्वाभीष्मद्रोणौमहारथौ ॥ दुर्योधनमिदंवाक्यमूचतुःशासनातिगम् ॥ १ ॥ श्रुतंतेपुरुषव्याघ्रकुंत्याःकृष्णस्यसंनिधौ ॥ वाक्यमर्थवदत्युग्रमुक्तंधर्म्यमनुत्तमम् ॥ २ ॥ तत्करिष्यंतिकौंतेयावासुदेवस्यसंमतम् ॥ नहितेजातुशाम्येरन्नृतेराज्येनकौरव ॥ ३ ॥ क्लेशिताहित्वयापार्थाधर्मपाशसितास्तदा ॥ सभायांद्रौपदीचैवतैश्चतन्मर्षितंतव ॥ ४ ॥ कृतास्त्रंह्यर्जुनंप्राप्यभीमंचकृतनिश्चयम् ॥ गांडीवंचेषुधीचैवरथंचध्वजमेवच ॥ ५ ॥ नकुलंसहदेवंचबलवीर्यसमन्वितौ ॥ सहायंवासुदेवंचनक्षंस्यतियुधिष्ठिरः ॥ ६ ॥ प्रत्यक्षंतेमहाबाहोयथापार्थेनधीमता ॥ विराटनगरेपूर्वंसर्वेस्मयुधिनिर्जिताः ॥ ७ ॥ दानवाघोरकर्माणोनिवातकवचायुधि ॥ रौद्रमस्त्रंसमादायदग्धावानरकेतुना ॥ ८ ॥ कर्णप्रभृतयश्चेमेत्वंचापिकवचीरथी ॥ मोक्षितोघोषयात्रायांपर्याप्तंतन्निदर्शनम् ॥ प्रशाम्यभरतश्रेष्ठभ्रातृभिःसहपांडवैः ॥ ९ ॥ रक्षेमांपृथिवींसर्वांमृत्योर्दंष्ट्रांतरंगतां ॥ ज्येष्ठोभ्राताधर्मशीलोवत्सलःश्लक्ष्णवाक्कविः ॥ १० ॥ तंगच्छपुरुषव्याघ्रंव्यपनीयेहकिल्बिषम् ॥ दृष्टश्चत्वंपांडवेनव्यपनीतशरासनः ॥ ११ ॥ प्रशांतभ्रुकुटिःश्रीमान्कृताशांतिःकुलस्यनः ॥ तमभ्येत्यसहामात्यःपरिष्वज्यनृपात्मजं ॥ १२ ॥ अभिवादयराजानंयथापूर्वमरिंदम ॥ अभिवादयमानंत्वांपाणिभ्यांभीमपूर्वजः ॥ १३ ॥ प्रतिगृह्णातुसौहार्दात्कुंतीपुत्रोयुधिष्ठिरः ॥ सिंहस्कंधोरुबाहुस्त्वांवृत्तायतमहाभुजः ॥ १४ ॥ परिष्वजतुबाहुभ्यांभीमःप्रहरतांवरः ॥ कंबुग्रीवोगुडाकेशस्ततस्त्वांपुष्करेक्षणः ॥ १५ ॥ यः ॥ १३७ ॥ ॥ ७ ॥ ॥ कुंत्याइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ प्रशाम्यप्रशमंकुरु ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

॥ १६ ॥ आश्विनेयौअश्विनोःपुत्रौनकुलसहदेवौ ॥ १७ ॥ ॥ १८ ॥ १९ ॥वारणंप्रतिषेधम्॥ २० ॥ २१ ॥ २२ ॥ २३ ॥दीप्तांदिशमितिदिग्दाहाख्यउत्पातउक्तः॥ २४ ॥ २५ ॥ २६ ॥ शुष्मिणःबलिनःअवसव्यंविप

अभिवादयतांपार्थःकुंतीपुत्रोधनंजयः॥ १६ ॥ आश्विनेयौनरव्याघ्रौरूपेणाप्रतिमौभुवि॥ तौचत्वांगुरुवत्सेम्णापूजयाप्रत्युदीयतां॥ १७॥ मुंचंत्वानंदजाश्रू
णिदाशार्हप्रमुखान्नृपाः॥ संगच्छध्वंभ्रातृभिःसार्धमानंसंत्यज्यपार्थिव॥ १८ ॥ प्रशाधिपृथिवींकृत्स्नांततस्त्वंभ्रातृभिःसह॥ समालिंग्यचहर्षेणनृपायांतुपरस्परं
॥ १९ ॥ अलंयुद्धेनराजेंद्रसुहृदांशृणुवारणम्॥ध्रुवंविनाशोयुद्धेहिक्षत्रियाणांप्रदृश्यते॥ २० ॥ ज्योतींषिप्रतिकूलानिदारुणान्मृगपक्षिणः॥उत्पाताविविधावी
रदृश्यंतेक्षत्रनाशनाः ॥ २१ ॥ विशेषतइहास्माकंनिमित्तानिनिवेशने ॥ उल्काभिर्हिप्रदीप्ताभिर्बाध्यतेघृतनातव ॥ २२ ॥ वाहनान्यप्रहृष्टानिरुदंतीवविशांप
ते॥ गृध्रास्तेपर्युपासंतेसैन्यानिचसमंततः॥ २३ ॥ नगरंनयथापूर्वंतथाराजनिवेशनम्॥ शिवाश्चाशिवनिर्घोषादीप्तांसेवंतिवैदिशम्॥ २४॥ कुरुवाक्यंपितुर्मा
तुरस्माकंचहितैषिणां॥ त्वय्यायत्तोमहाबाहोशमोव्यायामएवच ॥ २५॥ नचेत्करिष्यसिवचःसुहृदामरिकर्शन॥ तप्स्यसेवाहिनींदृष्ट्वापार्थबाणप्रपीडितां
॥ २६ ॥ भीमस्यचमहानादंनदतःशुष्मिणोरणे॥ श्रुत्वास्मर्तासिमेवाक्यंगांडीवस्यचनिःस्वनम्॥ यद्येतदपसव्यंतेवचोममभविष्यति॥ २७॥ इतिश्रीमहा०
उद्योगपर्वणिभगवद्यानपर्वणिभीष्मद्रोणवाक्येअष्टत्रिंशदधिकशततमोऽध्यायः॥ १३७॥ ॥वैशंपायनउवाच॥ ॥एवमुक्तस्तुविमनास्तिर्यग्दृष्टिरधोमुखः॥
संहत्यचभ्रुवोर्मध्यंनकिंचिद्व्याजहारह॥ १ ॥ तंवैविमनसंदृष्ट्वासंप्रेक्ष्यान्योन्यमंतिकात्॥ पुनरेवोत्तरंवाक्यमुक्तवंतौनरर्षभौ॥ २ ॥ ॥भीष्मउवाच॥ ॥शुश्रू
षुमनसूयंचब्रह्मण्यंसत्यवादिनम्॥ प्रतियोत्स्यामहेपार्थमतोदुःखतरंनुकिं॥ ३ ॥ ॥द्रोणउवाच॥ ॥अश्वत्थाग्नियथापुत्रेभूयोममधनंजये॥ बहुमानःपरो
राजन्सन्नतिश्चकपिध्वजे॥ ४॥ तंचपुत्राग्नियतमंप्रतियोत्स्येधनंजयं॥क्षात्रंधर्ममनुष्ठायधिगस्तुक्षत्रजीविकाम्॥५॥यस्यलोकेसमोनास्तिकश्चिदन्योधनु
र्धरः॥ मत्प्रसादात्सबीभत्सुःश्रेयान्नैर्धनुर्धरैः॥६॥मित्रध्रुग्दुष्टभावश्चनास्तिकोथानृजुःशठः॥नमत्सुलभतेपूजांयज्ञेमूर्खइवागतः॥ ७॥ वार्यमाणोपिपापेभ्यः
पापात्मापापमिच्छति॥ चोद्यमानोपिपापेनशुभात्माशुभमिच्छति॥८॥ मिथ्योपचरिताह्येतेवर्तमानात्यनुप्रिये॥ अहितत्वायकल्पंतेदोषाभरतसत्तम॥९॥

रीतंयदिनिर्घातसदृशमितिपाठे निर्घातसदृशंवज्रपाततुल्यम्॥ २७॥ ॥इतिउद्योगप०नैलकंठीयेभारतभावदीपेअष्टत्रिंशदधिकशततमोऽध्यायः॥ १३८॥ ॥७॥ ॥एवमिति॥ १ ॥ २ ॥ ३ ॥
॥ ४ ५ ॥ ६ ॥ पूजांनलभतेहेदुर्योधनत्वद्वत् ॥ ७ ॥ ८ ॥ एतेपांडवास्त्वयामिथ्योपचरिताअपिअनुपश्चात्प्रियेवर्तमानाहिप्रसिद्धं तवतुदोषाःद्वेषादयःअहितत्वायवैरभावायकल्पंते ॥ ९॥

॥ १० ॥ उष्णगेउष्णातिगमेवर्षाकाले ॥ ११ ॥ वासएवेतिपाठेवासगृहे पाठांतरेत्यक्तंवासोवस्त्रंपरकीयंस्त्रीयमितिमन्यसेइतियोज्यम्॥ १२ ॥ १३ ॥ ऐलविलंकुबेरंआसाद्यरणेप्राप्य ॥ १४ ॥ १५ ॥
त्वमुक्तःकुरुवृद्धेनमयाचविदुरेणच॥ वासुदेवेनचतथाश्रेयोनैवाभिमन्यसे ॥ १० ॥ अस्तिमेबलमित्येवसहसात्वंतितीर्षसि॥ सग्राहनक्रमकरंगंगावेगमि
वोष्णगे॥ ११ ॥ वाससैवयथाहित्वंप्रावृण्वानोभिमन्यसे॥ स्रजंत्यक्तामिवप्राप्यलोभाद्यौधिष्ठिरींश्रियम्॥ १२ ॥ द्रौपदीसहितंपार्थंसायुधैर्भ्रातृभिर्वृतम्॥
वनस्थमपिराज्यस्थःपांडवंकोविजेष्यति॥ १३ ॥ निदेशेयस्यराजानःसर्वेतिष्ठंतिकिंकराः॥ तमैलविलमासाद्यधर्मराजोव्यराजत॥ १४॥ कुबेरसदनंप्राप्यत
तोरत्नान्यवाप्यच॥ स्फीतमाक्रम्यतेराष्ट्रंराज्यमिच्छंतिपांडवाः॥ १५॥ दत्तंहुतमधीतंचब्राह्मणास्तर्पिताधनैः॥ आवयोर्गतमायुश्चकृतकृत्यौचविद्धिनौ॥ १६॥
त्वंतुहित्वासुखंराज्यंमित्राणिचधनानिच॥ विग्रहंपांडवैःकृत्वामहह्यासनमाप्स्यसि ॥ १७ ॥ द्रौपदीयस्यचाशास्तेविजयंसत्यवादिनी ॥ तपोघोरव्रतादेवीक
थंजेष्यसिपांडवम्॥ १८॥ मंत्रीजनार्दनोयस्यभ्रातायस्यधनंजयः॥ सर्वशस्त्रभृतांश्रेष्ठःकथंजेष्यसिपांडवम्॥ १९॥ सहायाब्राह्मणायस्यधृतिमंतोजितेंद्रियाः॥
तमुग्रतपसंवीरंकथंजेष्यसिपांडवम्॥ २० ॥ पुनरुक्तंचवक्ष्यामियत्कार्यंभूतिमिच्छता ॥ सुहृदामज्जमानेषुसुहृत्सुव्यसनार्णवे॥ २१ ॥ अलंयुद्धेनतैर्वीरैःशा
म्यत्वंकुरुवृद्धये॥ मागमःससुतामात्यःसबलश्चपराभवम्॥ २२॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिभीष्मद्रोणवाक्येएकोनचत्वारिंशदधि
कशततमोऽध्यायः॥ १३९॥ ॥ ७ ॥ ॥ धृतराष्ट्रउवाच॥ ॥राजपुत्रैःपरिवृतस्तथाभृत्यैश्चसंजय॥ उपारोप्यरथेकर्णंनिर्यातोमधुसूदनः॥ १॥ किमब्रवी
दमेयात्माराधेयंपरवीरहा॥ कानिसांत्वानिगोविंदःसूतपुत्रेप्रयुक्तवान्॥ २ ॥ उद्यन्मेघस्वनःकालेकृष्णःकर्णमथाब्रवीत्॥ मृदुवायदिवातीक्ष्णंतन्ममाचक्ष्व
संजय॥ ३॥ ॥ संजयउवाच॥ आनुपूर्व्येणवाक्यानितीक्ष्णानिचमृदूनिच॥ प्रियाणिधर्मयुक्तानिसत्यानिचहितानिच॥ ४ ॥ हृदयग्रहणीयानिराधेयंमधु
सूदनः॥ यान्यब्रवीदमेयात्मातानिमेशृणुभारत॥ ५॥ ॥ वासुदेवउवाच॥ ॥उपासितास्तेराधेयब्राह्मणावेदपारगाः॥ तत्त्वार्थंपरिपृष्टाश्चनियतेनानसूयया
॥ ६॥ त्वमेवकर्णजानासिवेदवादान्सनातनान्॥ त्वमेवधर्मशास्त्रेषुसूक्ष्मेषुपरिनिष्ठितः॥ ७॥ कानीनश्चसहोढश्चकन्यायांयश्चजायते॥ वोढारंपितरंतस्याप्राहुः
शास्त्रविदोजनाः॥ ८॥ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेएकोनचत्वारिंशदधिकशततमोऽध्यायः ॥ १३९ ॥ ॥ ७ ॥
राजपुत्रैरिति॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ कानीनोद्विविधःसहोढःविवाहादूर्ध्वंजातःविवाहात्पाग्जातश्च तन्मातुर्वोढारंतस्यपितरंप्राहुः ॥ ८ ॥

॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ॥ इतिउद्योगपर्वणिनैलकंठीयेभारतभा

सोसिकर्णतथाजातःपांडोःपुत्रोसिधर्मतः॥ निग्रहाद्धर्मशास्त्राणामेहिराजाभविष्यसि ॥ ९ ॥ पितृपक्षेचतेपार्थामातृपक्षेचवृष्णयः ॥ द्वौपक्षावभिजानीहि त्वमेतौपुरुषर्षभ॥ १० ॥ मयासार्धमितोयातमत्वंचातिपांडवाः ॥ अभिजानंतुकौंतेयंपूर्वजातंयुधिष्ठिरात्॥ ११ ॥ पादौतवग्रहीष्यंतिभ्रातरःपंचपांडवाः॥ द्रौपदेयास्तथापंचसौभद्रश्चापराजितः॥ १२ ॥ राजानोराजपुत्राश्चपांडवार्थेसमागताः॥ पादौतवग्रहीष्यंतिसर्वेचांधकवृष्णयः॥ १३ ॥ हिरण्मयांश्चतेकुंभा न्राजतान्पार्थिवांस्तथा॥ ओषध्यःसर्वबीजानिसर्वरत्नानिवीरुधः ॥ १४ ॥ राजन्याराजकन्याश्चाप्यानयंत्वाभिषेचनम्॥षष्ठेत्वांचतथाकालेद्रौपद्युपगमिष्य ति ॥ १५ ॥ अग्निंजुहोतुवैधौम्यःसंशितात्माद्विजोत्तमः॥ अद्यत्वामभिषिंचंतुचातुर्वैद्याद्विजातयः॥ १६ ॥ पुरोहितःपांडवानांब्रह्मकर्मण्यवस्थितः॥ तथैवभ्रा तरःपंचपांडवाःपुरुषर्षभाः॥ १७ ॥ द्रौपदेयास्तथापंचपंचालाश्चेदयस्तथा ॥ अहंचत्वाऽभिषेक्ष्यामिराजानंपृथिवीपतिम्॥१८॥ युवराजोस्तुतेराजाधर्मपुत्रो युधिष्ठिरः॥ गृहीत्वाव्यजनंश्वेतंधर्मात्मासंशितव्रतः॥ १९ ॥ उपान्वारोहतुरथंकुंतीपुत्रोयुधिष्ठिरः ॥ छत्रंचतेमहाश्वेतंभीमसेनोमहाबलः ॥ २० ॥ अभिषिक्त स्यकौंतेयोधारयिष्यतिमूर्धनि ॥ किंकिणीशतनिर्घोषंवैयाघ्रपरिवारणम् ॥ २१ ॥ रथंश्वेतहयैर्युक्तमर्जुनोवाहयिष्यति ॥ अभिमन्युश्चतेनित्यंप्रत्यासन्नोभवि ष्यति ॥ २२ ॥ नकुलःसहदेवश्चद्रौपदेयाश्चपंचये ॥ पंचालाश्चानुयास्यंतिशिखंडीचमहारथः ॥ २३ ॥ अहंचत्वाऽनुयास्यामिसर्वेचांधकवृष्णयः॥ दाशार्हाःप रिवारास्तेदाशार्णाश्चविशांपते ॥ २४ ॥ भुंक्ष्वराज्यंमहाबाहोभ्रातृभिःसहपांडवैः॥ जपैर्होमैश्चसंयुक्तोमंगलैश्चपृथग्विधैः॥ २५ ॥ पुरोगमाश्चतेसंतुद्रविडाः सहकुंतलैः॥ आंध्रास्तालचराश्चैवचूचुपावेणुगास्तथा ॥ २६ ॥ स्तुवंतुत्वांचवृष्णिभिःस्तुतिभिःसूतमागधाः ॥ विजयंवसुषेणस्यघोषयंतुचपांडवाः॥ २७॥ स त्वंपरिवृतःपार्थैर्नक्षत्रैरिवचंद्रमाः॥ प्रशाधिराज्यंकौंतेयकुंतींचप्रतिनंदय ॥ २८ ॥ मित्राणितेप्रहृष्यंतुव्यथंतुरिपवस्तथा॥ सौभ्रात्रंचैवतेद्यास्तुभ्रातृभिःसह पांडवैः॥ २९ ॥ ॥ इतिश्रीम०उद्योगपर्वणिभगवद्यानपर्वणिश्रीकृष्णवाक्येचत्वारिंशदधिकशततमोऽध्यायः ॥ १४० ॥ ॥५॥ ॥ कर्णउवाच॥ ॥ असंश यंसौहृदान्मेप्रणयाच्चात्यकेशव॥ सख्येनचैववार्ष्णेयश्रेयस्कामतयैवच॥१॥ सर्वंचैवाभिजानामिपांडोःपुत्रोस्मिधर्मतः॥ निग्रहाद्धर्मशास्त्राणांयथात्वंकृष्ण मन्यसे॥ २॥

॥ १३४ ॥

वदीपेचत्वारिंशदधिकशततमोऽध्यायः ॥ १४० ॥ ॥५॥ ॥५॥ ॥ असंशयमिति ॥१ ॥ २ ॥

॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ आवाहाःकुलधर्माः आवापाइतिपाठेपिसएवार्थः ॥ १४ ॥ मांच मित्रमितिशेषः शस्त्रसमुद्यमःयुद्धोत्साहः ॥ १५ ॥ १६ ॥ वधा त्वधंप्राप्यापि बंधात्निर्बंधात्कुंतीसंबंधाद्वा भयात्पराजयभयात् ॥ १७ ॥ उभयोरपिअकीर्तिःउभाभ्यामप्यन्योन्यवधस्यप्रतिज्ञातत्वात् ॥ १८ ॥ ब्रूयात्त्वंपांडवान्प्रतीतिशेषः तद्वशित्वात्त्वमेववं

कन्यागर्भसमाधत्तभास्करान्मांजनार्दन ॥ आदित्यवचनाच्चैवजातंमांसाव्यसर्जयत् ॥ ३॥ सोस्मिकृष्णतथाजातःपांडोःपुत्रोस्मिधर्मतः ॥ कुंत्यात्वहमपा कीर्णोयथानकुशलंतथा॥ ४॥ सूतोहिमामधिरथोद्दृष्ट्वैवाभ्यानयद्गृहान्॥ राधायाश्चैवमांप्रादात्सौहार्दान्मधुसूदन॥ ५॥ मत्स्नेहाच्चैवराधायांसद्यःक्षीरमवा तरत्॥ सामेमूत्रंपुरीषंचप्रतिजग्राहमाधव ॥६॥ तस्याःपिंडव्यपनयंकुर्यादस्मद्विधःकथम्॥ धर्मविद्धर्मशास्त्राणांश्रवणेसततंरतः॥७॥ तथामामभिजानाति सूतश्चाधिरथःसुतम्॥ पितरंचाभिजानामितमहंसौहृदात्सदा॥ ८॥ सहिमेजातकर्मादिकारयामासमाधव॥ शास्त्रदृष्टेनविधिनापुत्रप्रीत्याजनार्दन॥९॥ ना मवैवसुषेणेतिकारयामासवैद्विजैः ॥ भार्याश्चोढाममप्राप्तेयौवनेतत्परिग्रहात् ॥ १० ॥ तासुपुत्राश्चपौत्राश्चममजाताजनार्दन ॥ तासुमेहृदयंकृष्णसंजातं कामबंधनम्॥ ११॥ नृपथिव्यासकलयानसुवर्णस्यराशिभिः॥ हर्षाद्भ्रयाद्वागोविंदमिथ्याकर्तुंतदुत्सहे॥ १२॥ धृतराष्ट्रकुलेकृष्णदुर्योधनसमाश्रयात्॥ मया त्रयोदशसमाभुक्तंराज्यमकंटकम्॥ १३॥ इष्टंचबहुभिर्यज्ञैःसहसूतैर्मयाऽसकृत्॥ आवाहाश्चविवाहाश्चसहसूतैर्मयाकृताः॥ १४॥ मांचकृष्णसमासाद्यकृतः शस्त्रसमुद्यमः॥ दुर्योधनेनवार्ष्णेयविग्रहश्चापिपांडवैः॥ १५॥ तस्माद्रणेद्वैरथंमांप्रत्युद्यातारमच्युत ॥ वृतवान्परमंकृष्णप्रतीपंसव्यसाचिनः॥ १६॥ वधाद्वै धाद्भयाद्वापिलोभाद्वापिजनार्दन॥ अनृतंनोत्सहेकर्तुंधार्तराष्ट्रस्यधीमतः ॥ १७॥ यदित्यद्यनगच्छेयंद्वैरथंसव्यसाचिना॥ अकीर्तिःस्याद्धृषीकेशममपार्थस्य चोभयोः॥ १८॥ असंशयंहितार्थायब्रूयास्त्वंमधुसूदन ॥ सर्वंचपांडवाःकुर्युस्त्वद्दृशित्वान्नसंशयः॥ १९॥ मंत्रस्यनियमंकुर्यास्त्वमत्रमधुसूदन ॥ एतदत्रहि तंमन्येसर्वयादवनंदन॥ २०॥ यदिजानातिमांराजाधर्मात्मासंयतेंद्रियः॥ कुंत्याःप्रथमजंपुत्रंनसराज्यंग्रहीष्यति ॥ २१॥ प्राप्यचापिमहद्राज्यंतदहंमधुसूद न॥ स्फीतंदुर्योधनायैवसंप्रदद्यामरिंदम॥ २२॥ सएवराजाधर्मात्माशाश्वतोस्तुयुधिष्ठिरः॥ नेतायस्यहृषीकेशोयोद्धायस्यधनंजयः॥ २३॥

शीनियामकोयेषांतेषांभावस्तत्त्वंततः ॥ १९ ॥ मित्रस्यकर्णःकुंतीसुतइत्येवंविधस्यआवयोर्गुप्तपरिभाषणस्यनियमंगोपनंयुधिष्ठिरेःप्रकाशनमितियावत्॥ २० ॥ अन्यथाबाधकमाह यदीति ॥ २१ ॥ इष्टापत्तिमाशंक्याह प्राप्येति अधर्मिष्ठस्यदुर्योधनस्यराज्यलोकनाशकरमितिभावः ॥ २२ ॥ २३ ॥

॥ २४ ॥ २५ ॥ इंद्रगोपकःवर्षासुप्रचलन्रक्तजंतुस्तद्वर्णास्ताभाइत्यर्थः इंद्रायुधंइंद्रधनुः ॥ २६ ॥ निधिस्त्वंचजनार्दन निधिरिवाक्षयःकामपूरकः ॥ २७ ॥ समुदायेयःसमुदायीकरणम् ॥ २८ ॥ अस्य यज्ञस्यवेत्ताउपद्रष्टा ॥ २९ ॥ आध्वर्यवंयज्ञस्यनेतृत्वं लोकेहिउपद्रष्टान्योऽध्वर्युरन्योदृश्यते अत्रनेतृत्वमेवईश्वररूपेणकर्ताब्रह्मरूपेणसाक्षीचेतिभावः ॥ ३० ॥ ३१ ॥ अनुयातोऽनुगतःपितृसमइत्यर्थः गीतंस्तोत्रंप्रगीतमंत्रप्रसाध्यांस्तुतिं उद्गातृकर्मेत्यर्थः तत्सौभद्रःभविष्यतिअनुभविष्यतिकरिष्यतीत्यर्थः ॥ ३२ ॥ ३३ ॥ कारयिष्यति स्वार्थेणिच् करिष्यतीत्यर्थः ॥ ३४ ॥ नादएवसुब्रह्मण्योयुद्धयज्ञे

पृथिवीतस्यराष्ट्रंचयस्यभीमोमहारथः ॥ नकुलःसहदेवश्चद्रौपदेयाश्चमाधव ॥ २४ ॥ धृष्टद्युम्नश्चपांचाल्यःसात्यकिश्चमहारथः ॥ उत्तमौजायुधामन्युःसत्य धर्माचसौमकिः ॥ २५ ॥ चैद्यश्चचेकितानश्चशिखंडीचापराजितः ॥ इंद्रगोपकवर्णाश्चकेकयाभ्रातरस्तथा ॥ इंद्रायुधसवर्णश्चकुंतिभोजोमहामनाः ॥ २६ ॥ मातुलोभीमसेनस्यश्येनजिच्चमहारथः ॥ शैखःपुत्रोविराटस्यनिधिस्त्वंचजनार्दन ॥ २७ ॥ महानयंकृष्णकृतःक्षत्रस्यसमुदानयः ॥ राज्यंग्रामंमिदंदीप्तंप्रथितंस र्वराजसु ॥ २८ ॥ धार्तराष्ट्रस्यवार्ष्णेयशस्रयज्ञोभविष्यति ॥ अस्ययज्ञस्यवेत्तात्वंभविष्यसिजनार्दन ॥ २९ ॥ आध्वर्यवंचतेकृष्णकृतवस्मिन्भविष्यति ॥ होता चैवात्रबीभत्सुःसन्नद्धःसकपिध्वजः ॥ ३० ॥ गांडीवंसुकृतथाचाज्यंवीर्यंपुंसांभविष्यति ॥ ऐंद्रंपाशुपतंब्राह्मंस्थूणाकर्णंचमाधव ॥ मंत्रास्त्रभविष्यंतिप्रयुक्ताः सव्यसाचिना ॥ ३१ ॥ अनुयातश्चपितरमधिकोवापराक्रमे ॥ गीतंस्तोत्रंससौभद्रःसम्यक्तत्रभविष्यति ॥ ३२ ॥ उद्गातात्रपुनर्भीमःप्रस्तोतासुमहाबलः ॥ विन दन्सनरव्याघ्रोनागानीकांतकृद्रणे ॥ ३३ ॥ सचैवतत्रधर्मात्माशश्वद्राजायुधिष्ठिरः ॥ जपैर्होमैश्चसंयुक्तोब्रह्मत्वंकारयिष्यति ॥ ३४ ॥ शंखशब्दाःसमुरजाभेर्य श्चमधुसूदन ॥ उत्कृष्टःसिंहनादश्चसुब्रह्मण्योभविष्यति ॥ ३५ ॥ नकुलःसहदेवश्चमाद्रीपुत्रौयशस्विनौ ॥ शामित्रंतौमहावीर्यौसम्यक्तत्रभविष्यतः ॥ ३६ ॥ कल्माषदंडागोविंदविमलारथपंक्तयः ॥ यूपाःसमुपकल्पंतामस्मिन्यज्ञेजनार्दन ॥ ३७ ॥ कर्णिनालीकनाराचावत्सदंतोपबृंहणाः ॥ तोमराःसोमकलशाःप वित्राणिधनूंषिच ॥ ३८ ॥ असयोत्रकपालानिपुरोडाशाःशिरांसिच ॥ हविस्तुरुधिरंकृष्णातस्मिन्यज्ञेभविष्यति ॥ ३९ ॥ इध्माःपरिधयश्चैवशक्तयोविमलागदाः ॥ सदस्याद्रोणशिष्याश्चकृपस्यचशरद्वतः ॥ ४० ॥

भोक्तुःकालस्यावाहनकर्ता ॥ ३५ ॥ शामित्रंक्षत्रियपशूनांमारणम् ॥ ३६ ॥ कल्माषदंडाश्चित्रध्वजाः ॥ ३७ ॥ कर्णिप्रभृतयोवत्सदंतांताःउपबृंहणाःअध्वर्योःसोमाहुतिप्रक्षेपकालेसहायाश्चमसाध्वर्यव इत्यर्थः सोमकलशाःसोमरसग्रहणपात्राणि तोमराःतोमरच्छायाः पवित्राणिसोमोत्पवनसाधनानिबाणोत्क्षेपणसाम्यात्धनूंषि ॥ ३८ ॥ कपालानिशिरःपुरोडाशपाचकानिखर्परशकलानि हविःसोमा ज्यपयोरूपम् ॥ ३९ ॥ इध्माःअग्निसमिंधनार्थाःसमिधः शक्तयःपरिधयःअग्नेःपरितःआहुतिरक्षणार्थंस्थापितानिकाष्ठानिगदाः ॥ ४० ॥

॥ १३५ ॥

परिस्तोमाःसोमचमसादयः ॥ ४१ ॥ प्रतिप्रस्थाताऽध्वर्योस्तवद्वितीयःतस्यकर्मप्रतिप्रास्थानिकं ॥ ४२ ॥ अतिरात्रेक्रतौ श्लेषेणनिशीथेचघटोत्कचःरात्रिचरत्वात्शामित्रंकरिष्यति ॥ ४३ ॥ वैतानिकेकर्मणि वितानोग्नीनांविस्तरःतत्रविदितेवैतानिकेश्रौतयज्ञे कर्ममुखेकर्मप्रभवेद्वारे कर्मैवमुखंनिर्गमद्वारंयस्मिन्नतुयोनिःतस्मिन् ॥ ४४ ॥ पांडवेषुलेहंदर्शयति यदब्रुवमिति ॥ ४५ ॥ पुनश्चित्तिर्यज्ञानंतरंचयनारंभो यज्ञविशेषेषूक्तः ॥ ४६ ॥ आनर्दमहानादंनर्दनः णमुलंतंपूर्वपदं सूयंसोमाभिषवः राजसूयसूर्येतिनिपातनात् उपपदयोगस्त्वनित्यःआर्षोवा तदभावेपिसुब्लुक्यप्दीर्घश्च सुत्यमित्यपिपठंति॥ ४७ ॥यज्ञाव

इषवोत्रपरिस्तोमामुक्तागांडीवधन्वना ॥ महारथप्रयुक्ताश्चद्रोणद्रौणिप्रचोदिताः ॥ ४१ ॥ प्रतिप्रास्थानिकंकर्मसात्यकिस्तुकरिष्यति ॥ दीक्षितोधार्तराष्ट्रोत्रप त्नीचास्यमहाचमूः ॥ ४२ ॥ घटोत्कचोत्रशामित्रंकरिष्यतिमहाबलः ॥ अतिरात्रेमहाबाहोवितते यज्ञकर्मणि ॥ ४३ ॥ दक्षिणात्वस्ययज्ञस्यधृष्टद्युम्नःप्रतापवा न् ॥ वैतानिकेकर्ममुखेजातोयत्कृष्णपावकात् ॥ ४४ ॥ यदब्रुवमहंकृष्णकुरुकानिस्मपांडवान् ॥ प्रियार्थंधार्तराष्ट्रस्यतेननप्येत्यकर्मणा ॥ ४५ ॥ यदाद्रक्ष्यसि मांकृष्णनिहतंसव्यसाचिना ॥ पुनश्चित्तिस्तदाचास्ययज्ञस्याथभविष्यति ॥ ४६ ॥ दुःशासनस्यरुधिरंयदापास्यतिपांडवः ॥ आनर्दनर्दतःसम्यक्तदासूयंभवि ष्यति ॥ ४७ ॥ यदाद्रोणंचभीष्मंचपांचाल्यौपातयिष्यतः ॥ तदायज्ञावसानंतद्भविष्यतिजनार्दन ॥ ४८ ॥ दुर्योधनंयदाहंताभीमसेनोमहाबलः ॥ तदासमा प्स्यतेयज्ञोधार्तराष्ट्रस्यमाधव ॥ ४९ ॥ स्रुषाश्चप्रस्रुषाश्चैवधृतराष्ट्रस्यसंगताः ॥ हतेश्वरानष्टपुत्राहतनाथाश्चकेशव ॥ ५० ॥ रुदंत्यःसहगांधार्याश्चगृध्रकुरराकु ले ॥ सयज्ञेस्मिन्नवभृथोभविष्यतिजनार्दन ॥ ५१ ॥ विद्याद्वावयोवद्वाःक्षत्रियाःक्षत्रियर्षभ ॥ यथामृत्युंनकुर्वीरंस्त्वत्कृतेमधुसूदन ॥ ५२ ॥ शस्रेणनिधनं गच्छेत्समृद्धंक्षत्रमंडलं ॥ कुरुक्षेत्रेपुण्यतमेत्रैलोक्यस्यापिकेशव ॥ ५३ ॥ तदत्रपुंडरीकाक्षविधत्स्वयदभीप्सितम् ॥ यथाकात्स्न्येनवार्ष्णेयक्षत्रंस्वर्गमवाप्नुया त् ॥ ५४ ॥ यावत्स्थास्यंतिगिरयःसरितश्चजनार्दन ॥ तावत्कीर्तिभवःशब्दःशाश्वतोयंभविष्यति ॥ ५५ ॥ ब्राह्मणाःकथयिष्यंतिमहाभारतमाहवम् ॥ समागमेषु वार्ष्णेयक्षत्रियाणांयशोधनम् ॥ ५६ ॥ समुपानयकौंतेयंयुद्धायममकेशव ॥ मंत्रसंवरणंकुर्वन्नित्यमेवपरंतप ॥ ५७ ॥ ॥ इ० उ० भग० कर्णोपनिवादेएकच त्वारिंशदधिकशततमोऽध्यायः ॥ १४१ ॥ ॥ ५ ॥ ॥ संजयउवाच ॥ ॥ कर्णस्यवचनंश्रुत्वाकेशवःपरवीरहा ॥ उवाचप्रहसन्वाक्यंस्मितपूर्वमिदंयथा ॥ १ ॥

सानंयज्ञस्यमध्येमध्येविरम्यावस्थानं ॥ ४८ ॥ ४९ ॥ प्रस्रुषाःस्रुषाणामपिस्रुषाः संगताएकीभूताः हतेश्वराः ईश्वरोराजा नाथःपतिः ॥ ५० ॥ स्रुषादयोयद्रुदंत्योऽश्रुभिरार्द्रदेहाःसएवार्द्रीभावोऽवभृथइ त्यर्थः ॥ ५१ ॥ इदंयुद्धंश्रेयएवेत्याह विधेयेति यथाअयुद्धेन ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ समागमेषुसंग्रामेषु यशोजयःपराक्रमेणमृत्युर्वातंदेवक्षत्रियाणांधनम् ॥ ५६ ॥ ५७ ॥ ॥ इतिउद्योग प०नै०भा०एकचत्वारिंशदधिकशततमोऽध्यायः ॥ १४१ ॥ ॥ ५ ॥ ॥ कर्णस्येति ॥ १ ॥

राज्यलंभोपपादनंराज्यप्राप्त्युपायस्त्वांनलभेत्नस्पृशेत् तंनस्वीयंमन्यसेइत्यर्थः ॥ २ ॥ ३ ॥ भौमनेनविश्वकर्मणा दृश्यंतिपश्यंति स्वार्थयगंतोयं कंड्वादेराकृतिगणत्वात् अत्रध्वजे ॥ ४॥५ ॥ अग्निमारुते आग्नेयंमारुतंच ॥ ६ ॥ नतदेति कृतेहिसर्वेकृतकृत्याएवेतिनत्रिवर्गंकश्चिदपेक्षते त्रेतायांतुधर्मप्राधान्येनार्थकामावानुषंगिकत्वेनचापेक्षंते द्वापरेतुअर्थकामौप्राधान्येनधर्मंचतदंगत्वेन तत्रकृतंनभवितेति

श्रीभगवानुवाच॥ ॥अपित्वांनलभेत्कर्णराज्यलंभोपपादनम्॥मयादत्तांहिपृथिवींनप्रशासितुमिच्छसि॥२॥ध्रुवोजयःपांडवानामितीदंनसंशयःकश्चनविद्यतेत्र॥जयध्वजोदृश्यतेपांडवस्यसमुच्छ्रितोवानरराजउग्रः॥३॥दिव्यामायाविहिताभौमनेनसमुच्छ्रिताइंद्रकेतुप्रकाशा॥दिव्यानिभूतानिजयावहानिदृश्यंतिचैवात्रभयानकानि॥४॥नसज्जतेशैलवनस्पतिभ्यऊर्ध्वंतिर्यग्योजनमात्ररूपः॥श्रीमान्ध्वजःकर्णधनंजयस्यसमुच्छ्रितःपावकतुल्यरूपः॥५॥यदाद्रक्ष्यसिसंग्रामेश्वेताश्वंकृष्णसारथिं॥ऐंद्रमस्त्रंविकुर्वाणमुभेचाप्यग्निमारुते॥६॥गांडीवस्यचनिर्घोषंविस्फूर्जितमिवाशनेः॥नतदाभवितात्रेतानकृतंद्वापरंनच॥७॥यदाद्रक्ष्यसिसंग्रामेकुंतीपुत्रंयुधिष्ठिरम्॥जपहोमसमायुक्तंस्वांरक्षंतंमहाचमूम्॥८॥आदित्यमिवदुर्धर्षंतपंतंशत्रुवाहिनीं॥नतदाभवितात्रेतानकृतंद्वापरंनच॥९॥यदाद्रक्ष्यसिसंग्रामेभीमसेनंमहाबलम्॥दुःशासनस्यरुधिरंपीत्वानृत्यंतमाहवे॥१०॥प्रभिन्नमिवमातंगंप्रतिद्विरदघातिनम्॥नतदाभवितात्रेतानकृतंद्वापरंनच॥११॥यदाद्रक्ष्यसिसंग्रामेद्रोणंशांतनवंकृपम्॥सुयोधनंचराजानंसैंधवंचजयद्रथम्॥१२॥युद्धायापततस्तूर्णंवारितान्सव्यसाचिना॥नतदाभवितात्रेतानकृतंद्वापरंनच॥१३॥यदाद्रक्ष्यसिसंग्रामेमाद्रीपुत्रौमहाबलौ॥वाहिनींधार्तराष्ट्राणांक्षोभयंतौगजाविव॥१४॥विगाढेशस्त्रसंपातेपरवीररथारुजौ॥नतदाभवितात्रेतानकृतंद्वापरंनच॥१५॥ब्रूयाःकर्णइतोगत्वाद्रोणंशांतनवंकृपम्॥सौम्योयंवर्ततेमासःसुप्रापयवसेंधनः॥१६॥सर्वौषधिवनस्फीतःफलवानल्पमक्षिकः॥निष्पंकोरसवत्तोयोनात्युष्णशिशिरःसुखः॥१७॥सप्तमाच्चापिदिवसादमावास्याभविष्यति॥संग्रामोयुज्यतांतस्यांतामाहुःशक्रदेवतां॥१८॥तथाराज्ञोवदेःसर्वान्येयुद्धायाभ्युपागताः॥यद्वोमनीषितंतद्वैसर्वंसंपादयाम्यहम्॥१९॥राजानोराजपुत्राश्चदुर्योधनवशानुगाः॥प्राप्यशस्त्रेणनिधनंप्राप्स्यंतिगतिमुत्तमां॥२०॥ ॥इतिश्रीम० उद्यो० भगवद्यानपर्वणिकर्णोपनिवादेभगवद्वाक्येद्विचत्वारिंशदधिकशततमोऽध्यायः॥१४२॥

मोक्षात्भ्रंशउक्तः नत्रेतेतिधर्माद्भ्रंशउक्तः सचदुर्योधनादीनामस्त्येव द्वापरंनभवितेतितेषामर्थकामावपिनभविष्यतोयुद्धेनमरणस्यावश्यंभावादित्यर्थः॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४॥ रथारुजौरथभंजकौ ॥ १५ ॥ सौम्यःचंद्रिकयाअभिरामः ॥ १६ ॥ १७ ॥ संग्रामःसंग्रामसाधनकलापः युज्यतांएकीभूयावतिष्ठतां संग्रामारंभस्तुदिनांतरेएवेतिवक्ष्यते ॥ १८ ॥ १९ ॥ २० ॥ ॥ इतिउद्योगप० नैलकंठीयेभारतभावदीपेद्विचत्वारिंशदधिकशततमोऽध्यायः ॥ १४२ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥

केशवस्येति शुभंराज्यादिलाभंआहितःप्रवेशितःप्रलोभितइत्यर्थः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ प्राजापत्यंरोहिणीनक्षत्रं प्रजानांपतिर्दुर्योधनस्तदीयंनामनक्षत्रंउत्तराभाद्रपदाख्यमितिवा तेनपत्युःपीडयाप्राणिनामपिपीडेतियुक्तं यद्वापृथ्वीकूर्मोदरस्थांरोहिणींशनैश्चरःपीडयतितेनमध्यदेशेमहान्क्षयोराज्ञोनाशश्चेतिभावः ॥ ८ ॥ कृत्वाचेति ज्येष्ठांअप्राप्ययदिभौमोवक्रीभवेत्तर्हिज्येष्ठस्यराज्ञोयेमित्रभूतास्तेसर्वेनश्येयुरितिभावः मैत्रंमित्रसमूहंसंगमयन्नाशयन्वैवस्वतंसंगमनंजनानामित्यादौसंपूर्वस्यगमेर्मारणार्थत्वदर्शनात् ॥ ९ ॥ चित्रांग्रहोमहापाताख्योज्योतिःशास्त्रप्रसिद्धःतेनराकारस्य

संजयउवाच॥ ॥केशवस्यतुतद्वाक्यंकर्णःश्रुत्वाहितःशुभम्॥अब्रवीदभिसंपूज्यकृष्णंतंमधुसूदनम्॥१॥जानन्मांकिंमहाबाहोसंमोहयितुमिच्छसि॥योयंपृथिव्याःकार्त्स्न्येनविनाशःसमुपस्थितः॥२॥निमित्तंतत्रशकुनिरहंदुःशासनस्तथा॥दुर्योधनश्चनृपतिर्धृतराष्ट्रसुतोभवत्॥३॥असंशयमिदंकृष्णमहद्युद्धमुपस्थितं॥पांडवानांकुरूणांचघोरंरुधिरकर्दमं॥४॥राजानोराजपुत्राश्चदुर्योधनवशानुगाः॥रणेशस्त्राग्निनादग्धाःप्राप्स्यंतियमसादनं॥५॥स्वप्नाहिबहवोघोरादृश्यंतेमधुसूदन॥निमित्तानिचघोराणितथोत्पाताःसुदारुणाः॥६॥पराजयंधार्तराष्ट्रेविजयंचयुधिष्ठिरे॥शंसंतइववार्ष्णेयविविधारोमहर्षणाः॥७॥प्राजापत्यंहिनक्षत्रंग्रहस्तीक्ष्णोमहाद्युतिः॥शनैश्चरःपीडयतिपीडयन्प्राणिनोधिकम्॥८॥कृत्वाचांगारकोवक्रंज्येष्ठायांमधुसूदन॥अनुराधांप्रार्थयतेमैत्रंसंगमयन्निव॥९॥नूनंमहद्भयंकृष्णकुरूणांसमुपस्थितम्॥विशेषेणहिवार्ष्णेयचित्रांपीडयतेग्रहः॥१०॥सोमस्यलक्ष्मव्यावृत्तंराहुरर्कमुपैतिच॥दिवश्चोल्काःपतंत्येताःसनिर्घाताःसकंपनाः॥११॥निष्टनंतिचमातंगामुंचंत्यश्रूणिवाजिनः॥पानीयंयवसंचापिनाभिनंदंतिमाधव॥१२॥प्रादुर्भूतेषुचैतेषुभयमाहुरुपस्थितम्॥निमित्तेषुमहाबाहोदारुणंप्राणिनाशनम्॥१३॥अल्पेभुक्तेपुरीषंचप्रभूतमिहदृश्यते॥वाजिनांवारणानांचमनुष्याणांचकेशव॥१४॥धार्तराष्ट्रस्यसैन्येषुसर्वेषुमधुसूदन॥पराभवस्यतल्लिंगमितिप्राहुर्मनीषिणः॥१५॥प्रहृष्टंवाहनंकृष्णपांडवानांप्रचक्षते॥प्रदक्षिणामृगाश्चैवतत्तेषांजयलक्षणं॥१६॥अपसव्यामृगाःसर्वेधार्तराष्ट्रस्यकेशव॥वाचश्चाप्यशरीरिण्यस्तत्पराभवलक्षणम्॥१७॥मयूराःपुण्यशकुनाहंससारसचातकाः॥जीवंजीवकसंघाश्चाप्यनुगच्छंतिपांडवान्॥१८॥

वेधाद्राजजातीयानांक्षयोभवितेतिभावः ॥ १० ॥ लक्ष्मव्यावृत्तंक्षीणत्वादमावास्यासान्निध्यात्क्षीणचंद्रोपिपापएव तस्मिंश्चामावास्यायामर्केणयुक्तेउभयोःशत्रुःसदावक्रीराहुरर्कंउपैतिचेदयंकर्त्तरीयोगःसोमवंश्यानांसूर्यवंश्यानांचराज्ञांक्षयकरइत्यर्थः ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ पुण्यशकुनाहंसादयएव षाढांतरेपुष्पशकुनाःकुक्कुटाःजीवंजीवकाःपक्षिविशेषाः येजीवजीवेत्येवशब्दंकुर्वंतितेषांसंघाश्चकोरादयः ॥ १८ ॥

पाठांतरेखलाःकाकाः॥ १९ ॥ २० ॥ उदपानाःकूपादयोजलाशयाः ॥ २१ ॥ २२ ॥ गंधर्वनगरंसप्राकारं परिघैःपरिवेषःतत्राकाशेगंधर्वनगरोपपत्तेर्वा ॥ २३ ॥ शिवाक्रोष्ट्रीवाशंतिशब्दंकरोति ॥ २४ ॥
एकपक्षाक्षिचरणाःपक्षिणोमहाराष्ट्रभाषायांपांकोळीतिप्रसिद्धाःघोरंदीप्तंसमलमूत्रादिकमित्यर्थः ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ सहस्रपादंसहस्रस्तंभं ॥ ३० ॥ ३१ ॥ तवपृथिवीतिसंबंधःत्व

गृध्राःकंकावकाःश्येनायातुधानास्तथाद्विजाः॥ मक्षिकाणांचसंघाताअनुधावंतिकौरवान्॥ १९॥ धार्तराष्ट्रस्यसैन्येषुभेरीणांनास्तिनिःस्वनः॥ अनाहताःपांडवानांनदंतिपटहाःकिल॥ २०॥ उदपानाश्चनर्दंतियथागोवृषभास्तथा॥ धार्तराष्ट्रस्यसैन्येषुतत्पराभवलक्षणम्॥ २१॥ मांसशोणितवर्षंचवृष्टंदेवेनमाधव॥ तथा गंधर्वनगरंभानुमत्समुपस्थितम्॥ २२॥ सप्राकारंसपरिखंसवप्रंचारुतोरणम्॥ कृष्णश्वपरिघस्तत्रभानुमादृत्यतिष्ठति॥ २३॥ उदयास्तमनेसंध्येवेदयंतीमहद्भयं॥ शिवाचवाशतेघोरंतत्पराभवलक्षणं ॥ २४॥ एकपक्षाक्षिचरणाःपक्षिणोमधुसूदन॥ उत्सृजंतिमहद्घोरंतत्पराभवलक्षणं॥ २५॥ कृष्णग्रीवाश्वशकुना रक्तपादाभयानकाः॥ संध्यामभिमुखायांतितत्पराभवलक्षणम्॥ २६॥ ब्राह्मणान्प्रथमंहृष्टिगुरूंश्चमधुसूदन॥ भृत्यान्भक्तिमतश्चापितत्पराभवलक्षणम्॥ २७॥ पूर्वादिग्लोहिताकाराशस्त्रवर्णाचदक्षिणा॥ आमपात्रप्रतीकाशापश्चिमामधुसूदन॥ उत्तराशंखवर्णाभादिशांवर्णाउदाहृताः॥ २८॥ प्रदीप्ताश्चदिशःसर्वाधा र्तराष्ट्रस्यमाधव॥ महद्भयंवेदयंतितस्मिन्नुत्पातदर्शने॥ २९॥ सहस्रपादंप्रासादंस्वप्नांतेस्मयुधिष्ठिरः॥ अधिरोहन्मयादृष्टःसहभ्रातृभिरच्युत॥ ३०॥ श्वेतो ष्णीषाश्चदृश्यंतेसर्वेवैशुक्लवाससः॥ आसनानिचशुभ्राणिसर्वेषामुपलक्षये॥ ३१॥ तवचापिमयाकृष्णस्वप्नांतेरुधिराविला॥ अंत्रेणपृथिवीदृष्टापरिक्षिप्ता जनार्दन॥ ३२॥ अस्यिसंचयमारूढश्चामितौजायुधिष्ठिरः॥ सुवर्णपाद्यांसंदृष्टोभुक्तवान्घृतपायसम्॥ ३३॥ युधिष्ठिरोमयादृष्टोग्रसमानोवसुंधराम्॥ त्वया दत्तामिमांव्यक्तंभोक्ष्यतेसवसुंधराम्॥ ३४॥ उच्चंपर्वतमारूढोभीमकर्मावृकोदरः॥ गदापाणिर्नरव्याघ्रोग्रसन्निवमहीमिमाम्॥ ३५॥ क्षपयिष्यतिनःसर्वान्स सुव्यक्तंमहारणे॥ विदितंमेवृषीकेशयतोधर्मस्ततोजयः॥ ३६॥ पांडुरंगजमारूढोगांडीवीसधनंजयः॥ त्वयासार्धंवृषीकेशश्रियापरमयाज्वलन्॥ ३७॥ यू यंसर्वेवधिष्यध्वंतत्रमेनास्तिसंशयः॥ पार्थिवान्समरेकृष्णदुर्योधनपुरोगमान्॥ ३८॥ नकुलःसहदेवश्चसात्यकिश्चमहारथः॥ शुक्लकेयूरकंठत्राःशुक्लमाल्यां बरावृताः॥ ३९॥

च्छरीरमित्यर्थः परिक्षिप्तापरिवेष्टिता ॥ ३२ ॥ वसुंधरांग्रसमानोवृद्धक्षणंकुर्वन् ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ शुक्लानिमौक्तिकमयत्वा

त्केयूराणिवाहुभूषणानिकंठत्राणिकंठपूरकारूपाणिशिरोदेशमारभ्यअंसपर्यंतंलंबमानानिकंठावरणानियेषांतेशुक्लकेयूरकंठत्राः॥ ३९ ॥

॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ तवदृश्यंकर्तृ ममवचोनोपैतिनांगीकरोति ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ पीडितंयथास्यात्तथा गाढंपरिष्वज्येत्यर्थः ॥ ५० ॥ ५१ ॥ ५२ ॥ इतिकरणे

अधिरूढानरव्याघ्रानरवाहनमुत्तमम्॥ त्रयएतेमयादृष्टाःपांडुरच्छत्रवाससः॥ ४०॥ श्वेतोष्णीषाश्चदृश्यंतेत्रयएतेजनार्दन॥ धार्तराष्ट्रेषुसैन्येषुतान्विजानीहिकेशव॥ ४१॥ अश्वत्थामाकृपश्चैवकृतवर्माचसात्वतः॥ रक्तोष्णीषाश्चदृश्यंतेसर्वेमाधवपार्थिवाः॥ ४२॥ उष्ट्रप्रयुक्तमारूढौभीष्मद्रोणौमहारथौ॥ मयासार्धं महाबाहोधार्तराष्ट्रेणवाविभो॥ ४३॥ अगस्त्यशास्त्रांचदिशंप्रयाताःस्मजनार्दन॥ अचिरेणैवकालेनप्राप्स्यामोयमसादनम्॥ ४४॥ अहंचान्येचराजानोय च्चतत्सत्रमंडलम्॥ गांडीवाग्निंप्रवेक्ष्यामइतिमेनास्तिसंशयः॥ ४५॥ ॥ कृष्णउवाच॥ ॥ उपस्थितविनाशेयंनूनमद्यवसुंधरा॥ यथाहिमेवचःकर्णनोपैतिवृद्ध यंतव॥ ४६॥ सर्वेषांतातभूतानांविनाशेप्रत्युपस्थिते॥ अनयोनयसंकाशोवृद्धयान्नापसर्पति॥ ४७॥ ॥ कर्णउवाच॥ ॥ अपित्वांकृष्णपश्यामजीवंतोस्मा न्महारणात्॥ समुत्तीर्णामहाबाहोवीरक्षत्रविनाशनात्॥ ४८॥ अथवासंगमःकृष्णस्वर्गेनोभविताध्रुवम्॥ तत्रेदानींसमेष्यामःपुनःसार्धंत्वयानघ॥ ४९॥ संजयउवाच॥ ॥ इत्युक्त्वामाधवंकर्णःपरिष्वज्यचपीडितम्॥ विसर्जितःकेशवेनरथोपस्थादवातरत्॥ ५०॥ ततःस्वरथमास्थायजांबूनदविभूषितम्॥ सहा स्माग्निर्निवर्ततेराधेयोदीनमानसः॥ ५१॥ ततःशीघ्रतरंप्रायात्केशवःसहसात्यकिः॥ पुनरुच्चारयन्वाणींयाहियाहीतिसारथिं॥ ५२॥ ॥ इतिश्रीमहाभार तेउद्योगपर्वणिभगवद्यानपर्वणिकर्णोपनिवादेकृष्णकर्णसंवादेत्रिचत्वारिंशदधिकशततमोऽध्यायः॥ १४३॥ ॥ ७॥ ॥ वैशंपायनउवाच॥ असिद्धानुनयेकृष्णेकुरुभ्यःपांडवान्गते॥ अभिगम्यपृथांक्षत्ताशनैःशोचन्निवाब्रवीत्॥ १॥ जानासिमेजीवपुत्रिभावंनित्यमविग्रहे॥ क्रोशतोनचगृह्णीते वचनंमेसुयोधनः॥ २॥ उपपन्नोह्यसौराजाचेदिपांचालकेकयैः॥ भीमार्जुनाभ्यांकृष्णेनयुयुधानयमैरपि॥ ३॥ उपप्लव्येनिविष्टोपिधर्ममेवयुधिष्ठिरः॥ कां क्षतेज्ञातिसौहार्दाद्बलवान्दुर्बलोयथा॥ ४॥ राजातुधृतराष्ट्रोयंवयोवृद्धोनशाम्यति॥ मत्तःपुत्रमदेनैवविधर्मेपथिवर्तते॥ ५॥ जयद्रथस्यकर्णस्यतथादुःशा सनस्यच॥ सौबलस्यचदुर्बुध्यामियोभेदःप्रपत्स्यते॥ ६॥

कर्णोपनिवादःकर्णस्यभेदनम् ॥ ॥ इत्युद्योगप०नी०भा०त्रिचत्वारिंशदधिकशततमोऽध्यायः॥ १४३॥ ॥ ७॥ ॥ असिद्धानुनयेविफलविनये ॥ १॥ क्रोशतइत्यनादरेषष्ठी ॥ २॥
॥ ३॥ उपप्लव्येविराटनगरे ॥ ४॥ विधर्मेधर्महीने ॥ ५॥ ६॥

अधर्मेणेति हियस्मात् येषांअधर्मेणकृतमपिवैकार्यविकारजनकंवैरंईदृशंचतुर्दशेवर्षेस्वंराज्यंप्राप्स्यथेतिप्रतिज्ञायाअयथाकरणरूपंधर्मिष्ठधर्मयुक्तमेवभवति येषामधर्मकृतमेववैरंधर्मवद्भातीत्यर्थः तेषांअयंविकृतोधर्मःसानुबंधःसफलोभविष्यति अधर्मफलंविनाशस्तेषांभविष्यत्येवेत्यर्थः ॥ ७ ॥ बलाद्धर्मेपाखंडिनांपारदार्यंउभयसंतोषकरमितिद्वयोरपिधर्महेतुरितिबलात्कल्पनाशास्त्रबहिर्भूतादृदयमपीत्य

अधर्मेणहिधर्मिष्ठंकृतंवैकार्यमीदृशम्॥ येषांतेषामयंधर्मःसानुबंधोभविष्यति ॥ ७ ॥ क्रियमाणेबलाद्धर्मेकुरुभिःकोन्वसंज्वरेत्॥ असाध्याकेशवेयातेसमुद्योक्ष्यंतिपांडवाः॥ ८ ॥ ततःकुरूणामनयोभविताक्षीरनाशनः॥ चिंतयन्नलभेनिद्रामहःसुचनिशासुच॥ ९ ॥ श्रुत्वातुकुंतीतद्वाक्यमर्थकामेनभाषितम्॥ सानिःश्वसंतीदुःखार्तामनसाविममर्शह ॥ १० ॥ धिगस्त्वर्थंयत्कृतेयंमहान्ज्ञातिवधःकृतः॥ वर्त्स्यतेसुहृदांचैवयुद्धेस्मिन्वैपराभवः॥ ११ ॥ पांडवाश्चेदिपंचालायादवाश्चसमागताः॥ भारतैःसहयोत्स्यंतिकिंनुदुःखमतःपरम्॥ १२ ॥ पश्येदोषंध्रुवंयुद्धेतथाऽयुद्धेपराभवम्॥ अधनस्यमृतंश्रेयोनहिज्ञातिक्षयोजयः ॥ १३ ॥ इतिमेचिंतयंत्यावैहृदिदुःखंप्रवर्तते॥ पितामहःशांतनवआचार्यश्चयुधांपतिः ॥ १४ ॥ कर्णश्चधार्तराष्ट्रार्थेवर्धयंतिभयंमम॥ नाचार्यःकामवान्शिष्यैर्द्रोणोयुध्येतजातुचित्॥ १५॥ पांडवेषुकथंहार्दंकुर्यान्नचपितामहः ॥ अयंत्वेकोवधाद्दृष्टिर्धार्तराष्ट्रस्यदुर्मतेः ॥ १६ ॥ मोहानुवर्तीसततंपापोद्वेष्टिचपांडवान्॥ महत्यनर्थेनिर्बंधीबलवांश्चविशेषतः॥ १७॥ कर्णःसदापांडवानांतन्मेदहतिसंप्रति॥ आशंसेत्वद्यकर्णस्यमनोहंपांडवान्प्रति॥ १८ ॥ प्रसादयितुमासाद्यदर्शयंतीयथातथम्॥ तोषितोभगवान्यत्रदुर्वासामेवरंददौ॥ १९॥ आह्वानंमंत्रसंयुक्तंवसंत्याःपितृवेश्मनि ॥ साहमंतःपुरेराज्ञःकुंतिभोजपुरस्कृता॥ २० ॥ चिंतयंतीबहुविधंहृदयेनविदूयता॥ बलाबलंचमंत्राणांब्राह्मणस्यचवाग्बलम् ॥ २१ ॥ स्त्रीभावाद्बालभावाच्चचिंतयंतीपुनःपुनः ॥ धाक्ष्याविस्रब्धयागुप्तासखीजनवृतादा॥ २२॥ दोषंपरिहरंतीचपितुश्चारिष्यरक्षिणी ॥ कथंनुसुकृतंमेस्यान्नापराधवतीकथम्॥ २३॥ भवेयमितिसंचिंत्यब्राह्मणंनंनमस्यच॥ कौतूहलात्तुतंलब्ध्वाबालिश्यादाचरंतदा॥ कन्यासतींदेवमर्कमासादयमहंततः ॥ २४ ॥ योसौकानीनगर्भोमेपुत्रवत्परिरक्षितः ॥ कस्मान्नकुर्याद्वचनंपथ्यंभ्रातृहितंतथा ॥ २५॥ इतिकुंतीविनिश्चित्यकार्यनिश्चयमुत्तमम्॥ कार्यार्थमभिनिश्चित्ययौभागीरथींप्रति॥ २६॥

र्थः ॥ ८ ॥ ९ ॥ अर्थकामेनहितकामेन ॥ १० ॥ कृतःनिश्चितत्वात्कृतइव ॥ ११ ॥ १२ ॥ पश्येपश्यामि आर्षमात्मनेपदम् अयुद्धेयुद्धाभावे ॥ १३ ॥ १४ ॥ १५ ॥१६ ॥ १७ ॥ १८ ॥ १९॥२० ॥ ॥ २१ ॥ २२ ॥ २३ ॥ तंलब्ध्वामंत्रंप्राप्य आचरंतेनमंत्रेणदेवताबाहनाख्यंकार्यंकृतवती आसादयंलब्धवती ॥ २४ ॥ पुत्रवत्परिरक्षितइत्यत्रकामंचपरिवासितइतिपाठेत्वेच्छयात्यक्तइत्यर्थः ॥ २५ ॥ कार्यार्थंअवश्यकर्तव्यंप्रयोजनम् ॥ २३ ॥

॥ १३८ ॥

घृणिनःदयालोः सत्यसंगिनःसत्यरतस्य ॥ २७ ॥ २८ ॥ उत्तरवाससिउत्तरीयवस्त्रच्छायायाम् ॥ २९ ॥ आपृष्ठतापादपराह्णपर्यंतमित्यर्थः ॥ ३० ॥ उत्स्मयन्उद्गतस्मितः ॥३१॥ ॥ इतिउद्योगपर्व

आत्मजस्यततस्तस्यघृणिनःसत्यसंगिनः॥ गंगातीरेपृथाश्रौषीद्वेदाध्ययननिःस्वनम् ॥ २७॥प्राङ्मुखस्योर्ध्वबाहोःसापर्यतिष्ठतपृष्ठतः॥जप्यावसानंकार्यार्थंप्रतीक्षंतीतपस्विनी॥ २८ ॥ अतिष्ठत्सूर्यतापार्ताकर्णस्योत्तरवाससि ॥ कौरव्यपत्नीवार्ष्णेयीपद्ममालेवशुष्यती॥ २९ ॥ आपृष्ठतापाज्जस्वासपरिवृत्ययतव्रतः॥ दृष्ट्वाकुंतीमुपातिष्ठदभिवाद्यकृतांजलिः॥ ३० ॥ यथान्यायंमहातेजामानीधर्मभृतांवरः॥ उत्स्मयन्प्रणतःप्राहकुंतीवैकर्तनोवृषः॥ ३१ ॥ ॥ इतिश्रीम० उद्योगपर्वणिभगवद्यानपर्वणिकुंतीकर्णसमागमेचतुश्चत्वारिंशदधिकशततमोऽध्यायः॥ १४४ ॥ ॥५॥ ॥ कर्णउवाच ॥ ॥ राधेयोहमाधिरथिःकर्णस्वामभिवादये॥ प्राप्ताकिमर्थंभवतीब्रूहिकिंकरवाणिते ॥ १ ॥ ॥ कुंत्युवाच ॥ ॥ कौंतेयस्त्वंनराधेयोनतवाधिरथःपिता॥ नासिसूतकुलेजातःकर्णतद्विद्धिमेवचः॥ २॥ कानीनस्त्वंमयाजातःपूर्वजःकुक्षिणाधृतः॥ कुंतिराजस्यभवनेपार्थस्त्वमसिपुत्रक ॥ ३ ॥ प्रकाशकर्मातपनोयोयंदेवोविरोचनः॥ अजीजनत्त्वांमय्येषकर्णशस्त्रभृतांवरम्॥४॥कुंडलीवद्धकवचोदेवगर्भःश्रियावृतः॥ जातस्त्वमसिदुर्धर्षमयापुत्रपितुर्गृहे ॥ ५ ॥ सत्वंभ्रातॄनसंबुध्यमोहाद्यदुपसेवसे॥ धार्तराष्ट्रान्नतद्युक्तंत्वयिपुत्रविशेषतः ॥ ६ ॥ एतद्धर्मफलंपुत्रनराणांधर्मनिश्चये॥ यत्तुष्यंत्यस्यपितरोमाताचाप्येकदर्शिनी ॥ ७ ॥ अर्जुनेनार्जितांपूर्वंहृतांलोभादसाधुभिः॥आच्छिद्यधार्तराष्ट्रेभ्योभुंक्ष्वयौधिष्ठिरींश्रियम्॥८॥ अद्यपश्यंतिकुरवःकर्णार्जुनसमागमम्॥सौभ्रात्रेणसमालक्ष्यसंनमंतामसाधवः॥ ९ कर्णार्जुनौवैभवेतांयथारामजनार्दनौ॥ असाध्यंकिंनुलोकेस्याद्युवयोःसंहितात्मनोः ॥ १० ॥ कर्णशोभिष्यसेनूनंपंचभिर्भ्रातृभिर्वृतः॥ देवैःपरिवृतोब्रह्मावैद्यामिवमहाध्वरे ॥ ११ ॥ उपपन्नोगुणैःसर्वैर्ज्येष्ठःश्रेष्ठेषुबंधुषु ॥ सूतपुत्रेतिमाशब्दःपार्थस्त्वमसिवीर्यवान् ॥ १२ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिकुंतीकर्णसमागमेपंचचत्वारिंशदधिकशततमोऽध्यायः॥ १४५॥ ॥५॥ ॥ वैशंपायनउवाच॥ ॥ ततःसूर्यान्निश्चरितांकर्णःशुश्रावभारतीम्॥ दुरत्ययांप्रणयिनींपितृवद्भास्करेरिताम्॥ १॥ सत्यमाहपृथावाक्यंकर्णमातृवचःकुरु ॥ श्रेयस्तेस्यान्नरव्याघ्रसर्वमाचरतस्तथा॥ २॥

णिनैलकंठीयेभारतभावदीपेचतुश्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४४ ॥ ॥५॥ ॥ राधेयइति ॥ १ ॥ २॥३॥४॥५॥ ६ ॥ एकंपुत्रमेवस्नेहेनपश्यंतीएकदर्शिनी ॥ ७ ॥ ८ ॥ संनमंतांप्रह्वाभवंतु ॥ ९ ॥ भवेतांवर्धेतां सहितात्मनोःमिलितचेतसोः ॥ १० ॥ ११ ॥ सूतपुत्रेतिशब्दोमाभूदितिशेषः॥ १२ ॥ ॥ इतिउ०नै०भा०पंचचत्वारिंशदधिकशततमोऽध्यायः॥ १४५॥ ॥५॥ ॥ततइति॥१॥२॥

॥ ३ ॥ नश्रद्दधेकर्तव्यत्वेननमन्ये धर्मद्वारंधर्मापगमद्वारं तवनियोगकरणंत्वदाज्ञामात्रानुष्ठानं ॥ ४ ॥ सुमहात्ययंसुमहान्अत्ययोजातिभंशाख्योविनाशोयस्मात् अपाकीर्णस्संकरः यशोमाहात्म्यख्यातिः कीर्तिःसद्भिस्तस्याःकीर्तनम् ॥ ५ ॥ त्वत्कृतेत्वत्सुखार्थं कानीनोगर्भःप्रकटोमाभूदितिहेतोरहंक्षत्रसक्रियांचेन्नप्राप्तस्तर्हित्वदन्यःकःशत्रुःकिममाहितंपापीयइतिइतोपिपापतरंकुर्यान्नकोपीत्यर्थः ॥ ६ ॥ क्रि

वैशंपायनउवाच ॥ ॥ एवमुक्तस्यमात्राचस्वयंपित्राचभानुना ॥ चचालनैवकर्णस्यमतिःसत्यधृतेस्तदा ॥ ३ ॥ ॥ कर्णउवाच ॥ ॥ नचैतच्छ्रद्दधेवाक्यं क्षत्रियेभाषितंत्वया॥धर्मद्वारंममैतत्स्यान्नियोगकरणंतव॥४॥ अकरोन्मयियत्पापंभवतीसुमहात्ययम्॥ अपाकीर्णोस्मियन्मातस्तद्यशःकीर्तिनाशनम्॥५॥ अहंचेत्क्षत्रियोजातोनप्राप्तःक्षत्रसक्रियाम्॥ त्वत्कृतेकिंनुपापीयःशत्रुःकुर्यान्ममाहितम्॥६॥ क्रियाकालेत्वनुक्रोशमकृत्वात्वमिमंमम॥हीनसंस्कारसमयम द्यमांसमचूचुदः॥७॥ नवैममहितंपूर्वमात्मवच्चेष्टितंत्वया ॥ सामांसंबोधयस्यद्यकेवलात्महितैषिणी॥८॥ कृष्णेनसहितात्कोवैनव्यथेतधनंजयात्॥ कोद्यभी तंनमांविद्यात्पार्थानांसमितिंगतम्॥ ९॥ अभ्रातराविदितःपूर्वंयुद्धकालेप्रकाशितः॥पांडवान्यदिगच्छामिकिंमांक्षत्रंवदिष्यति॥१०॥ सर्वकामैःसंविभक्तःपू जितश्चयथासुखम्॥अहंवैधार्तराष्ट्राणांकुर्यांतदफलंकथम्॥११॥उपनत्यपरैर्वैरंयेमांनित्यमुपासते॥ नमस्कुर्वंतिचसदावसवोवासवंयथा॥१२॥ ममप्राणे नयेशत्रून्शक्ताःप्रतिसमासितुम्॥मन्यंतेतेकथंतेषामहंछिद्यांमनोरथम्॥१३॥ मयाप्लवेनसंग्रामंतितीर्षंतिदुरत्ययम्॥ अपारेपारकामायेत्यजेयंतानहंकथं ॥१४॥ अयंहिकालःसंप्राप्तोधार्तराष्ट्रोपजीविनाम्॥ निर्वेष्टव्यंमयातत्रप्राणानपरिरक्षता॥१५॥ कृतार्थाःसुभृतायेहिकृत्यकालेत्युपस्थिते॥अनवेक्ष्यकृतंपा पाविकुर्वंत्यनवस्थिताः॥१६॥राजकिल्बिषिणांतेषांभर्तृपिंडापहारिणाम्॥नैवायंनपरोलोकोविद्यतेपापकर्मणाम्॥१७॥ धृतराष्ट्रस्यपुत्राणामर्थेयोत्स्यामि तेसुतैः॥ बलंचशक्तिंचास्थायनवैत्वव्यनृतंवदे॥ १८॥ आनृशंस्यमथोदत्तंरक्षन्सत्पुरुषोचितम्॥ अतोर्थकरमप्येतन्नकरोम्यद्यतेवचः॥१९॥ नचतेऽयंसमा रंभोमयिमोघोभविष्यति॥ वध्यान्विषह्यान्संग्रामेनहनिष्यामितेसुतान्॥ २०॥ युधिष्ठिरंचभीमंचयमौचैवार्जुनादृते॥ अर्जुनेनसमंयुद्धमपियोधिष्ठिरेबले ॥२१॥ अर्जुनंहिनिहत्याजौसंग्रामंस्यात्फलंमया॥ यशसाचापियुज्येयंनिहतःसव्यसाचिना॥ २२॥ नतेजातुनशिष्यंतिपुत्राःपंचयशस्विनि॥ निरर्जुनाःस कर्णावासार्जुनावाहतेमयि॥२३॥ याकालेक्षत्रियोचितसंस्कारकाले अनुक्रोशंदयां समचूचुदःस्वकार्यार्थंप्रेरितवत्यसि ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ उपनम्रबद्धा ॥ १२ ॥ ॥ १३९ ॥

प्रतिसमासितुंजेतुम् ॥ १३ ॥ १४ ॥ निर्वेष्टव्यंभुक्तस्यतदन्नादेरानृण्यंकर्तव्यम् ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ वध्यान्वधार्हान्विषह्यान्हंतुंशक्यानपीत्यर्थः ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

॥ २४ ॥२५॥२६॥ साचसचतौ धर्माधर्मौनत्यजतोधर्माधर्मैकसंश्रयौ प्रार्थितावपिपित्राद्यैःकर्णदुर्योधनादिभिरितिकृत्वाख्यायिकातात्पर्यम्॥२७॥ ॥ इ०उ०नै०भा०षट्चत्वारिंशदधिकशततमोऽध्या यः ॥ १४६ ॥ ॥ ७ ॥ ॥ आगम्येति पांडवानांपुरइतिशेषः ॥१॥२॥३॥४॥ नागपुरंहास्तिनपुरम् ॥५॥पथ्यंन्यायोपेतं हितंउभयत्रजयावहम्॥ ६ ॥७॥८॥९॥ १० ॥ कुरुमुख्ययोःभीष्मधृतराष्ट्रयोः

इतिकर्णवचःश्रुत्वाकुंतीदुःखात्प्रवेपती॥ उवाचपुत्रमाश्लिष्यकर्णंधैर्यादकंपनम्॥२४॥एवंवैभाष्यमेतेनक्षयंयास्यंतिकौरवाः॥यथात्वंभाषसेकर्णदैवंतुबल वत्तरम्॥२५॥त्वयाचतुर्णांभ्रातॄणामभयंशत्रुकर्शन॥ दत्तंतत्प्रतिजानीहिसंगरप्रतिमोचनम्॥२६॥ अनामयंस्वस्तिचेतिपृथायोकर्णमब्रवीत्॥ तांकर्णोथत थेत्युक्ततत्स्त्रीजग्मतुःपृथक्॥२७॥ ॥इतिश्रीम०उ०भगवद्यानपर्वणिकुंतीकर्णसमागमेषट्चत्वारिंशदधिकशततमोऽध्यायः॥१४६॥ ॥ ७ ॥ ॥ वै शंपायनउवाच ॥ ॥आगम्यहास्तिनपुरादुपप्लव्यमरिंदमः ॥ पांडवानांयथावृत्तंकेशवःसर्वमुक्तवान्॥ १ ॥ संभाष्यसुचिरंकालंमंत्रयित्वापुनःपुनः॥ स्वमेव भवनंशौरिर्विश्रामार्थंजगामह॥ २॥ विसृज्यसर्वान्नृपतीन्विराटप्रमुखांस्तदा॥ पांडवाभ्रातरःपंचभानावस्तंगतेसति॥ ३॥ संध्यामुपास्यध्यायंतस्तमेवग तमानसाः॥ आनाय्यकृष्णंदाशार्हंपुनर्मंत्रममंत्रयन्॥ ४॥ ॥युधिष्ठिरउवाच॥ ॥त्वयानागपुरंगत्वासभायांधृतराष्ट्रजः॥ किमुक्तःपुंडरीकाक्षतन्नःशंसितु मर्हसि॥ ५॥ ॥वासुदेवउवाच॥ ॥मयानागपुरंगत्वासभायांधृतराष्ट्रजः॥ तथ्यंपथ्यंहितंचोक्तोनचगृह्णातिदुर्मतिः॥ ६॥ ॥युधिष्ठिरउवाच॥ ॥तस्मिन्मुत्प थमापन्नेकुरुवृद्धःपितामहः॥ किमुक्तवान्वृषीकेशदुर्योधनममर्षणम्॥ ७॥आचार्योवामहाभागभारद्वाजःकिमब्रवीत्॥ पितावाधृतराष्ट्रस्तंगांधारीवाकिम ब्रवीत्॥८॥पितायवीयानस्माकंक्षत्तासर्वविदांवरः॥ पुत्रशोकाग्निसंतप्तःकिमाहधृतराष्ट्रजम्॥९॥ किंचसर्वेनृपतयःसभायांयेसमासते॥उक्तवंतोयथातत्त्वंत द्बूहित्वंजनार्दन॥१०॥ उक्तवान्हिभवान्सर्ववचनंकुरुमुख्ययोः॥ धार्तराष्ट्रस्यतेषांहिवचनंकुरुसंसदि॥ ११ ॥ कामलोभाभिभूतस्यमंदस्यप्राज्ञमानिनः॥ अ प्रियंहृदयेमत्यंतन्नंतिष्ठतिकेशव॥ १२॥ तेषांवाक्यानिगोविंदश्रोतुमिच्छाम्यहंविभो॥ यथाचनाभिपद्येतकालस्तातथाकुरु॥ भवान्हिनोगतिःकृष्णभवा न्नाथोभवान्गुरुः॥१३॥ ॥वासुदेवउवाच॥ ॥शृणुराजन्यथावाक्यमुक्तोराजासुयोधनः॥ मध्येकुरूणांराजेंद्रसभायांतन्निबोधमे॥१४॥ मयाविश्रावितेवाक्येजहासधृतराष्ट्रजः॥ अथभीष्मःसुसंक्रुद्धइदंवचनमब्रवीत्॥१५॥दुर्योधननिबोधेदंकुलार्थेयद्ब्रवीमिते॥ तच्छ्रुत्वाराजशार्दूलस्वकुलस्यहितंकुरु॥ १६॥

तेषांराज्ञांचवचनं यच्चभवानुक्तवान्वचनंमसंमदर्थंतत्सर्वंधार्तराष्ट्रस्यहृदयेनतिष्ठतीतिद्वयोःसंबंधः ॥ ११ ॥ १२ ॥ नाभिपद्येतनातिक्रामेत नोःस्माकं ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

॥ १७ ॥ १८ ॥ कालीसत्यवती ॥ १९ ॥ प्रतीतःतुष्टः ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ विप्रवासितःदूरेस्थापितःरामभयात्स्वयंपलायनेनप्रजाभिस्तदीयशिबिरस्थशून्यताकरणात् ॥ २४ ॥ २५ ॥ ई

ममतातपितराजन्शांतनुर्लोकविश्रुतः ॥ तस्याहमेकएवासंपुत्रःपुत्रवतांवरः ॥ १७ ॥ तस्यबुद्धिःसमुत्पन्नाद्वितीयःस्यात्कथंसुतः ॥ एकपुत्रमपुत्रंवैप्रवदंति
मनीषिणः ॥ १८ ॥ नचोच्छेदंकुलंयायाद्विस्तीर्यैश्चकथंयशः ॥ तस्याहमीप्सितंबुद्धाकालींमातरमावहम् ॥ १९ ॥ प्रतिज्ञांदुष्करांकृत्वापितुरर्थेकुलस्यच ॥ अरा
जाचोर्ध्वरेताश्चययासुविदितंतव ॥ प्रतीतोनिवसाम्येषप्रतिज्ञामनुपालयन् ॥ २० ॥ तस्यांजज्ञेमहाबाहुःश्रीमान्कुरुकुलोद्वहः ॥ विचित्रवीर्योधर्मात्माकनी
यान्ममपार्थिव ॥ २१ ॥ स्वर्यातेहंपितरितंस्वराज्येसन्यवेशयम् ॥ विचित्रवीर्यंराजानंभृत्योभूत्वाह्यधश्वरः ॥ २२ ॥ तस्याहंसदृशान्दारान्राजेंद्रसमुपाहरम् ॥
जित्वापार्थिवसंघातमपितेबहुशःश्रुतम् ॥ २३ ॥ ततोरामेणसमरेद्वंद्वयुद्धमुपागमम् ॥ सहिरामभयादेभिर्नागरैर्विप्रवासितः ॥ २४ ॥ दारेष्वप्यतिसक्तश्चयक्ष्मा
णंसमपद्यत ॥ यदात्वराजकेराष्ट्रेनववर्षसुरेश्वर ॥ तदाभ्यधावन्मामेवप्रजाःक्षुद्भयपीडिताः ॥ २५ ॥ ॥ प्रजाऊचुः ॥ ॥ उपक्षीणाःप्रजाःसर्वाराजाभवभवाय
नः ॥ ईतीःप्रणुदभद्रंतेशांतनोःकुलवर्धन ॥ २६ ॥ पीड्यंतेतेप्रजाःसर्वाव्याधिभिश्चशदारुणैः ॥ अल्पावशिष्टागांगेयताःपरित्रातुमर्हसि ॥ २७ ॥ व्याधीन्प्रणुदवीर
त्वंप्रजाधर्मेणपालय ॥ त्वयिजीवतिमाराष्ट्रंविनाशमुपगच्छतु ॥ २८ ॥ ॥भीष्मउवाच ॥ ॥ प्रजानांक्रोशतीनांवैनैवाक्षुभ्यतमेमनः ॥ प्रतिज्ञांरक्षमाणस्यसहृ
त्तंस्मरतस्तथा ॥ ततःपौरामहाराजमाताकालीचमेशुभा ॥ २९ ॥ भृत्याःपुरोहिताचार्याब्राह्मणाश्चबहुश्रुताः ॥ मामूचुर्भृशसंतप्तामहाराजेतिसंततम् ॥ ३० ॥ प्रती
परक्षितंराष्ट्रंत्वांप्राप्यविनशिष्यति ॥ सत्वमस्मद्धितार्थंवैराजाभवमहामते ॥ ३१ ॥ इत्युक्तःप्रांजलिर्भूत्वादुःखितोभृशमातुरः ॥ तेभ्योन्यवेदयंतत्रप्रतिज्ञांपि
ढगौरवात् ॥ ३२ ॥ ऊर्ध्वरेताह्यराजाचकुलस्यार्थेपुनःपुनः ॥ विशेषतस्त्वदर्थंचधुरिमामांनियोजय ॥ ३३ ॥ ततोहंप्रांजलिर्भूत्वामातरंसंप्रसादयम् ॥ नांबशांत
नुनाजातःकौरवंवंशमुद्वहन् ॥ ३४ ॥ प्रतिज्ञांवितथांकुर्यामितिराजन्पुनःपुनः ॥ विशेषतस्त्वदर्थंचप्रतिज्ञांकृतवानहम् ॥ ३५ ॥ अहंप्रेष्यश्चदासश्चतवाद्यसुतव
त्सले ॥ एवंतामनुनीयाहंमातरंजनमेवच ॥ ३६ ॥ आयाचंभ्रातृदारेषुतदाव्यासंमहामुनिं ॥ सहमात्रामहाराजप्रसाद्यतमृषिंतदा ॥ ३७ ॥ अपत्यार्थंमहाराज
प्रसादंकृतवांश्चसः ॥ त्रीन्सपुत्रानजनयत्तदाभरतसत्तम ॥ ३८ ॥ अंधःकरणहीनत्वान्नवैराजापितातव ॥ राजातुपांडुरभवन्महात्मालोकविश्रुतः ॥ ३९ ॥

तीःअनावृष्ट्यादिरूपाः ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥

॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेसप्तचत्वारिंशदधिकशततमोऽध्यायः ॥ १४७ ॥ ॥७॥ भीष्मेणोक्तइति ॥ १ ॥ २ ॥ ३ ॥ ज्येष्ठोंधत्वादनर्हःक्षत्ता

सराजातस्यतेपुत्राःपितुर्दायाद्यहारिणः ॥ मातातकलहंकार्षीराज्यस्यार्धंप्रदीयताम् ॥ ४० ॥ मयिजीवतिराज्यंकःसंप्रशासेत्पुमानिह ॥ मावमंस्थावचोमत्यंश
ममिच्छामिवःसदा ॥ ४१ ॥ नविशेषोस्तिमेपुत्रत्वयितेषुचपार्थिव ॥ मतमेतत्पितुर्लुभ्यंगांधार्यांविदुरस्यच ॥ ४२ ॥ श्रोतव्यंखलुवृद्धानांनाभिशंकीर्वचोमम ॥
नाशयिष्यसिमासर्वमात्मानंपृथिवींतथा ॥ ४३ ॥ ॥ इतिश्रीम०उद्यो०भगवद्यानपर्वणिभगवद्वाक्येसप्तचत्वारिंशदधिकशततमोऽध्यायः ॥ १४७ ॥

वासुदेवउवाच ॥ ॥ भीष्मेणोक्ततोद्रोणोदुर्योधनमभाषत ॥ मध्येनृपाणांभद्रंतेवचनंवचनक्षमः ॥ १ ॥ प्रातीपःशांतनुस्तातकुलस्यार्थेयथास्थितः ॥ ययादे
वव्रतोभीष्मःकुलस्यार्थेस्थितोभवत् ॥ २ ॥ तथापांडुर्नरपतिःसत्यसंधोजितेंद्रियः ॥ राजाकुरूणांधर्मात्मासुव्रतःसुसमाहितः ॥ ३ ॥ ज्येष्ठायराज्यमददद्भृतरा
ष्ट्रायधीमते ॥ यवीयसेतथाक्षत्त्रेकुरूणांवंशवर्धनः ॥ ४ ॥ ततःसिंहासनेराजन्स्थापयित्वैनमच्युतम् ॥ वनंजगामकौरव्योभार्याभ्यांसहितोनृपः ॥ ५ ॥ नीचैःस्थि
त्वातुविदुरउपास्तेस्मविनीतवत् ॥ प्रेष्यवत्पुरुषव्याघ्रोवालव्यजनमुत्क्षिपन् ॥ ६ ॥ ततःसर्वाःप्रजास्तातधृतराष्ट्रंजनेश्वरम् ॥ अन्वपद्यंतविधिवद्यथापांडुंजना
धिपं ॥ ७ ॥ विसृज्यधृतराष्ट्रायराज्यंसविदुरायच ॥ चचारपृथिवींपांडुःसर्वापरपुरंजयः ॥ ८ ॥ कोशसंवननेदानेभृत्यानांचान्ववेक्षणे ॥ भरणेचैवसर्वस्यविदुरः
सत्यसंगरः ॥ ९ ॥ संधिविग्रहसंयुक्तोराज्ञांसंवाहनक्रियाः ॥ अवैक्षतमहातेजाभीष्मःपरपुरंजयः ॥ १० ॥ सिंहासनस्थेनृपतिर्धृतराष्ट्रोमहाबलः ॥ अन्वास्य
मानःसततंविदुरेणमहात्मना ॥ ११ ॥ कथंतस्यकुलेजातःकुलभेदंव्यवस्यसि ॥ संभूयभ्रातृभिःसार्धंभुंक्ष्वभोगान्जनाधिप ॥ १२ ॥ ब्रवीम्यहंनकार्पण्यान्ना
र्थहेतोःकथंचन ॥ भिष्मेणदत्तमिच्छामिनत्वयाराजसत्तम ॥ १३ ॥ नाहंत्वत्तोभिकांक्षिष्येदत्त्युपायंजनाधिप ॥ यतोभीष्मस्ततोद्रोणोयद्भीष्मस्त्वाहतत्कुरु
॥ १४ ॥ दीयतांपांडुपुत्रेभ्योराज्यार्धमरिकर्शन ॥ सममाचार्यकंतातत्ववतेषांचमेसदा ॥ १५ ॥ अश्वत्थामायथामत्यंतथाश्वेतहयोमम ॥ बहुनाकिंप्रलापेन
यतोधर्मस्ततोजयः ॥ १६ ॥ ॥ वासुदेवउवाच ॥ ॥ एवमुक्तेमहाराजद्रोणेनामिततेजसा ॥ व्याजहारततोवाक्यंविदुरःसत्यसंगरः ॥ पितुर्वदनमन्वीक्ष्यपरि
वृत्त्यचधर्मवित् ॥ १७ ॥ वियोनित्वादनर्हइतिसूचयन्नयथाज्येष्ठायाददत्तथाक्षत्रेविदुरायापिन्यासभूतमददादितिभावः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ संवननमात्मीयतत्करणम् ॥ ९ ॥

संवाहनक्रियाःसंवाहनंसंप्रापणंदानोपादानादिकंतावेवक्रियाः ॥ १० ॥ ११ ॥ १२ ॥ कार्पण्यायुद्भभयात् ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ पितुर्भीष्मस्य ॥ १७ ॥

॥ १८॥१९॥२०॥ शास्त्रंआज्ञांदुर्योधनकृतेन दुर्योधनकर्मणा ॥२१॥२२॥२३॥२४॥ वनंगच्छेति तावतात्वंयावत्त्वंदनुगामिनाद्रोणेनचत्यक्तोयंहीनपक्षोदुर्योधनःपांडवेभ्योभयंप्राप्स्यतीत्याशयः ॥ २५ ॥

विदुरउवाच॥ ॥देवव्रतनिबोधेदंवचनंममभाषतः॥ प्रनष्टःकौरवोवंशस्त्वयायंपुनरुद्धृतः॥ १८॥ तन्मेविलपमानस्यवचनंसमुपेक्षसे॥ कोयंदुर्योधनोनाम कुलेस्मिन्कुलपांसनः॥१९॥ यस्यलोभाभिभूतस्यमतिंसमनुवर्तसे॥ अनार्यस्याकृतज्ञस्यलोभेनहृतचेतसः॥२०॥ अतिक्रामतियःशास्त्रंपितुर्धर्मार्थदर्शिनः॥ एतेनश्यंतिकुरवोदुर्योधनकृतेनवै॥ २१॥ यथातेनप्रणश्येयुर्महाराजतथाकुरु॥ मांचैवधृतराष्ट्रंचपूर्वमेवमहामते॥ २२॥ चित्रकारइवालेख्यंकृत्वास्थापितवानसि॥ प्रजापतिःप्रजाःसृष्ट्वायथासंहरतेतथा॥२३॥ नोपेक्षस्वमहाबाहोपश्यमानःकुलक्षयम्॥ अथतेऽयमतिर्नष्टाविनाशेप्रत्युपस्थिते॥ २४॥ वनंगच्छमयासार्धंधृतराष्ट्रेणचैवह॥ बद्धावानिकृतिप्रज्ञंधार्तराष्ट्रंसुदुर्मतिम्॥ २५॥ शाधीदंराज्यमद्याशुपांडवैरभिरक्षितम्॥ प्रसीदराजशार्दूलविनाशोदृश्यतेमहान्॥ २६॥ पांडवानांकुरूणांचराज्ञाममिततेजसाम्॥ विररामैवमुक्तातुविदुरोदीनमानसः॥ प्रध्यायमानःसतदानिःश्वसंश्चपुनःपुनः॥ २७॥ ततोथराज्ञःसुबलस्यपुत्रीधर्मार्थयुक्तंकुलनाशभीता॥ दुर्योधनंपापमतिंनृशंसंराज्ञांसमक्षंसुतमाहकोपात्॥ २८॥ येपार्थिवाराजसभांप्रविष्टाब्रह्मर्षयोयेचसभासदोन्ये॥ शृण्वंतुवक्ष्यामितवापराधंपाप्रस्यसामात्यपरिच्छदस्य॥२९॥ राज्यंकुरूणामनुपूर्वभोज्यंक्रमागतोनःकुलधर्मएषः॥ त्वंपापबुद्धेऽतिनृशंसकर्मन्राज्यंकुरूणामनयाद्विहंसि॥३०॥राज्येस्थितोधृतराष्ट्रोमनीषीतस्यानुजोविदुरोदीर्घदर्शी॥ एतावतिक्रम्यकथंनृपत्वंदुर्योधनप्रार्थयसेऽद्यमोहात्॥३१॥ राजाचक्षत्तृाचमहानुभावौभीष्मेस्थितेपरवंतौभवेताम्॥ अयंतुधर्मज्ञतयामहात्मानकामयेद्योनृवरोनदीजः॥३२॥ राज्यंतुपांडोरिदमप्रधृष्यंतस्याद्यपुत्राःप्रभवंतिनान्ये॥ राज्यंतदेतन्निखिलंपांडवानांपैतामहंपुत्रपौत्रानुगामि॥३३॥ यद्ब्रूतेकुरुमुख्योमहात्मादेवव्रतःसत्यसंधोमनीषी॥ सर्वंतदस्माभिरहत्यकार्यंराज्यंस्वधर्मान्परिपालयद्भिः॥ ३४॥ अनुज्ञयाचाथमहाव्रतस्यब्रूयान्नृपोयंविदुरस्तथैव॥ कार्यंभवेत्तत्सुहृद्भिर्नियोज्यंधर्मपुरस्कृत्यसुदीर्घकालम्॥३५॥ न्यायागतंराज्यमिदंकुरूणांयुधिष्ठिरःशास्तुवैधर्मपुत्रः॥ प्रचोदितोधृतराष्ट्रेणराज्ञापुरस्कृतःशांतनवेनचैव॥३६॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिभग०कृष्णवाक्येअष्टचत्वारिंशदधिकशततमोऽध्यायः॥१४८॥ ॥७॥ ॥वासुदेवउवाच॥ ॥एवमुक्तेतुगांधार्याधृतराष्ट्रोजनेश्वरः॥ दुर्योधनमुवाचेदंराजमध्येजनाधिप ॥ १ ॥

॥ १४१ ॥

॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ इतिउद्योगप०नैलकंठीयेभारतभा०अष्टचत्वारिंशदधिकशततमोऽध्यायः ॥ १४८ ॥ ॥७॥ ॥एवमुक्तइति ॥ १ ॥

॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ अभिजायतेप्राप्नोतिजायतेतलभते ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ त्वग्दोषीकुष्ठी ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ वृद्धःप्रतीपः ॥ २१ ॥

दुर्योधननिबोधेदंयत्त्वांवक्ष्यामिपुत्रक॥तथातत्कुरुभद्रंतेयद्यस्तिपितृगौरवम्॥२॥ सोमःप्रजापतिःपूर्वंकुरूणांवंशवर्धनः॥सोमाद्बभूवषष्ठोयंययातिर्नहुषात्मजः॥ ३॥ तस्यपुत्राबभूवुर्हिपंचराजर्षिसत्तमाः॥ तेषांयदुर्महातेजाज्येष्ठःसमभवत्प्रभुः॥ ४॥ पूरुर्यवीयांश्चततोयोस्माकंवंशवर्धनः॥ शर्मिष्ठयासंप्रसूतोदुहित्रावृषपर्वणः॥ ५॥ यदुश्चभरतश्रेष्ठदेवयान्याःसुतोभवत्॥ दौहित्रस्तातशुक्रस्यकाव्यस्यामिततेजसः॥ ६॥ यादवानांकुलकरोबलवान्वीर्यसंमतः॥अवमनेसतुतस्रंदर्पपूर्णःसुमंदधीः॥ ७॥ नचातिष्ठत्पितुःशास्त्रेबलदर्पविमोहितः॥ अवमनेचपितरंभ्रातॄंश्चाप्यपराजितः॥ ८॥ पृथिव्यांचतुरंतायांयदुरेवाभवद्बली॥ वशेकृत्वासनृपतीन्न्यवसन्नागसाह्वये॥ ९॥ तंपितापरमकुद्धोययातिर्नहुषात्मजः॥ शशापपुत्रंगांधारेराज्याच्चापिव्यरोपयत्॥ १०॥ येचैनमन्ववर्ततभ्रातरोबलदर्पिताः॥ शशापतानभिक्रुद्धोययातिस्तनयानथ॥ ११॥ यवीयांसंततःपूरुंपुत्रंस्ववशवर्तिनम्॥ राज्येनिवेशयामासविधेयंनृपसत्तमः॥ १२॥ एवंज्येष्ठोप्यथोत्सिक्तोनराज्यमभिजायते॥ यवीयांसोपिजायंतेराज्यंवृद्धोपसेवया॥ १३॥ तथैवसर्वधर्मज्ञःपितुर्ममपितामहः॥ प्रतीपःपृथिवीपालस्त्रिषुलोकेषुविश्रुतः॥ १४॥ तस्यपार्थिवसिंहस्यराज्यंधर्मेणशासतः॥ त्रयःप्रजज्ञिरेपुत्रादेवकल्पायशस्विनः॥ १५॥ देवापिरभवज्ज्येष्ठोबाह्लीकस्तदनंतरम्॥ तृतीयःशांतनुस्तातधृतिमान्मेपितामहः॥ १६॥ देवापिस्तुमहातेजास्त्वग्दोषीराजसत्तमः॥ धार्मिकःसत्यवादीचपितुःशुश्रूषणेरतः॥ १७॥ पौरजानपदानांचसंमतःसाधुसत्कृतः॥ सर्वेषांबालवृद्धानांदेवापिर्वृद्धयंगमः॥ १८॥ वदान्यःसत्यसंधश्चसर्वभूतहितेरतः॥ वर्तमानःपितुःशास्त्रेब्राह्मणानांतथैवच॥ १९॥ बाह्लीकस्यप्रियोभ्राताशांतनोश्चमहात्मनः॥ सौभ्रात्रंचपरंतेषांसहितानांमहात्मनाम्॥२०॥ अथकालस्यपर्यायेवृद्धोनृपतिसत्तमः॥संभारानभिषेकार्थंकारयामासशास्त्रतः॥२१॥ कारयामाससर्वाणिमंगलार्थानिवैविभुः॥तंब्राह्मणाश्चवृद्धाश्चपौरजानपदैःसह॥ २२॥ सर्वैर्निवारयामासुर्देवापेरभिषेचनम्॥सतच्छ्रुत्वातुनृपतिरभिषेकनिवारणम्॥अश्रुकंठोभवद्राजापर्यशोचतचात्मजम्॥ २३॥ एवंवदान्योधर्मज्ञःसत्यसंधश्चसोभवत्॥प्रियःप्रजानामपिसंस्त्वग्दोषेणप्रदूषितः॥२४॥ हीनांगंपृथिवीपालंनाभिनंदंतिदेवताः॥ इतिकृत्वानृपश्रेष्ठंप्रत्यषेधन्द्विजर्षभाः॥२५॥ ततःप्रव्यथितांगोसौपुत्रशोकसमन्वितः॥ निवारितंनृपंदृष्ट्वादेवापिःसंश्रितोवनम्॥ २६॥

॥ २२ ॥ आलजंदेवापिं ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

राज्यंत्यक्त्वामातुलकुलंसमाश्रितइतिसंबंधः ॥ २७ ॥ अकारयत्अकरोत् ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ आसमंतात्अनुकंपीदयावान् ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ इतिउद्योगप०नैल
कंठीयेभारतभावदीपेएकोनपंचाशदधिकशततमोऽध्यायः ॥ १४९ ॥ ॥ ७ ॥ ॥ एवमुक्तेइति ॥ १ ॥ २ ॥ पुष्योद्येति पुष्यनक्षत्रंहिअश्विन्याःपौर्णमास्याउपरिअष्टम्यांभवति पूर्वमपिसमभाद्दिव

बाह्लीकोमातुलकुलंत्यक्त्वाराज्यंसमाश्रितः ॥ पितृभ्रातॄन्परित्यज्यप्राप्तवान्परमर्धिमत् ॥ २७ ॥ बाह्लीकेनत्वनुज्ञातःशांतनुर्लोकविश्रुतः ॥ पितर्युपरतेराजन्रा
जाराज्यमकारयत् ॥ २८ ॥ तथैवाहंमतिमतापरिचिंत्येहपांडुना ॥ ज्येष्ठःप्रभ्रंशितोराज्याद्धीनांगइतिभारत ॥ २९ ॥ पांडुस्तुराज्यंसंप्राप्तःकनीयानपिसन्नृपः ॥
विनाशेतस्यपुत्राणामिदंराज्यमरिंदम ॥ ३० ॥ मय्यभागिनिराज्यायकथंत्वंराज्यमिच्छसि ॥ अराजपुत्र्योत्यस्वामीपरस्वंहर्तुमिच्छसि ॥ ३१ ॥ युधिष्ठिरोराजपु
त्रोमहात्मान्यायागतंराज्यमिदंचतस्य ॥ सकौरवस्यास्यकुलस्यभर्तांप्रशासिताचैवमहानुभावः ॥ ३२ ॥ ससत्यसंधःसतथाऽप्रमत्तःशास्त्रेस्थितोबंधुजनस्यसा
धुः ॥ प्रियःप्रजानांसुहृदानुकंपीजितेंद्रियःसाधुजनस्यभर्ता ॥ ३३ ॥ क्षमातितिक्षादमआर्जवंचसत्यव्रतत्वंश्रुतमप्रमादः ॥ भूतानुकंपात्यनुशासनंचयुधिष्ठि
रेराजगुणाःसमस्ताः ॥ ३४ ॥ अराजपुत्रस्त्वमनार्यवृत्तोलुब्धःसदाबंधुषुपापबुद्धिः ॥ क्रमागतंराज्यमिदंपरेषांहर्तुंकथंशक्ष्यसिदुर्विनीत ॥ ३५ ॥ प्रयच्छराज्या
र्धमपेतमोहःसवाहनंत्वंसपरिच्छदंच ॥ ततोवशेषंतवजीवितस्यसहानुजस्यैवभवेन्नरेंद्र ॥ ३६ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिधृतरा
ष्ट्रवाक्यकथनेएकोनपंचाशदधिकशततमोऽध्यायः ॥ १४९ ॥ ॥ ७ ॥ ॥ वासुदेवउवाच ॥ ॥ एवमुक्तेतुभीष्मेणद्रोणेनविदुरेणच ॥ गांधार्याधृतराष्ट्रेण
वैमंदोन्वबुध्यत ॥ १ ॥ अवधूयोत्थितोमंदःक्रोधसंरक्तलोचनः ॥ अन्वद्रवंततंपश्चाद्राजानस्यक्तजीविताः ॥ २ ॥ आज्ञापयच्चराज्ञस्तान्पार्थिवान्नष्टचेतसः ॥
प्रयाध्वंवैकुरुक्षेत्रंपुष्योद्येतिपुनःपुनः ॥ ३ ॥ ततस्तेपृथिवीपालाःप्रययुःसहसैनिकाः ॥ भीष्मंसेनापतिंकृत्वासंदृष्टाःकालचोदिताः ॥ ४ ॥ अक्षौहिण्योदशैका
चकौरवाणांसमागताः ॥ तासांप्रमुखतोभीष्मस्तालकेतुर्व्यरोचत ॥ ५ ॥ यदत्रयुक्तंप्राप्तंचतद्विधत्स्वविशांपते ॥ उक्तंभीष्मेणयद्वाक्यंद्रोणेनविदुरेणच ॥ ६ ॥
गांधार्याधृतराष्ट्रेणसमक्षंममभारत ॥ एतत्तेकथितंराजन्यद्वृत्तंकुरुसंसदि ॥ ७ ॥ साम्यमादौप्रयुक्तंमेराजन्सौभ्रात्रमिच्छता ॥ अभेदायास्यवंशस्यप्रजानां
चविवृद्धये ॥ ८ ॥ पुनर्भेदश्चमेयुक्तोयदासामनगृह्यते ॥ कर्मानुकीर्तनंचैवदेवमानुषसंहितम् ॥ ९ ॥

सादूर्ध्वममावास्याभविष्यति संधामंयोजयेत्तस्मात्मित्युक्तत्वात् ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ साम्यंसाम्नोभावःसामेतियावत् ॥ ८ ॥ पुनर्भेदश्चकर्णेनसहोपसंवादेन ॥ ९ ॥

॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ पंचग्रामप्रदानस्वीकारेणकृत्स्नराज्यसमर्पणरूपंदानमपिप्रयुक्तम् ॥ १७ ॥ दंडएवोपायोनान्यइत्याह दंडमिति ॥ १८ ॥ १९ ॥ २० ॥ ॥ इतिउ०नै०

यदानाद्रियतेवाक्यंसामपूर्वंसुयोधनः ॥ तदामयासमानीयभेदिताःसर्वपार्थिवाः ॥ १० ॥ अद्भुतानिचघोराणिदारुणानिचभारत ॥ अमानुषाणिकर्माणिद
र्शितानिमयाविभो ॥ ११ ॥ निर्भर्त्सयित्वाराज्ञस्तांस्तृणीकृत्यसुयोधनम् ॥ राधेयंभीषयित्वाचसौबलंचपुनःपुनः ॥ १२ ॥ द्यूतेतोधार्तराष्ट्राणांनिर्दांकृत्वातथापु
नः ॥ भेदयित्वान्नृपान्सर्वान्वाग्भिर्मंत्रेणचासकृत् ॥ १३ ॥ पुनःसामाभिसंयुक्तंसंप्रदानमथाब्रुवम् ॥ अभेदात्कुरुवंशस्यकार्ययोगात्तथैवच ॥ १४ ॥ तेशूराधृत
राष्ट्रस्यभीष्मस्यविदुरस्यच ॥ तिष्ठेयुःपांडवाःसर्वेहित्वामानमधश्वराः ॥ १५ ॥ प्रयच्छंतुचतेराज्यमनीशास्तेभवंतुच ॥ यथाहराजागांगेयोविदुरश्चहितंतव
॥ १६ ॥ सर्वंभवतुतेराज्यंपंचग्रामान्विसर्जय ॥ अवश्यंभरणीयाहिपितुस्तेराजसत्तम ॥ १७ ॥ एवमुक्तोपिदुष्टात्मानैवभागंव्यमुंचत ॥ दंडंचतुर्थंपश्यामितेषु
पापेषुनान्यथा ॥ १८ ॥ निर्यांताश्चविनाशायकुरुक्षेत्रंनराधिपाः ॥ एतत्तेकथितंराजन्यद्वृत्तंकुरुसंसदि ॥ १९ ॥ नतेराज्यंप्रयच्छंतिविनायुद्धेनपांडव ॥ विना
शहेतवःसर्वेप्रत्युपस्थितमृत्यवः ॥ २० ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्यानपर्वणिकृष्णवाक्येपंचाशदधिकशततमोऽध्यायः ॥ १५० ॥ समाप्तंच
भगवद्यानपर्व ॥ ॥ ७ ॥ ॥ अथसैन्यनिर्याणपर्व ॥ ॥ वैशंपायनउवाच ॥ ॥ जनार्दनवचःश्रुत्वाधर्मराजोयुधिष्ठिरः ॥ भ्रातॄनुवाचधर्मात्मासमक्षंकेश
वस्यह ॥ १ ॥ श्रुतंभवद्भिर्यद्वृत्तंसभायांकुरुसंसदि ॥ केशवस्यापियद्वाक्यंतत्सर्वमवधारितम् ॥ २ ॥ तस्मात्सेनाविभागंमेकुरुध्वंनरसत्तमाः ॥ अक्षौहिण्यश्चसप्त
ताःसमेताविजयायवै ॥ ३ ॥ तासांयेपतयःसप्तविख्याताःक्षत्रियोधत ॥ द्रुपदश्चविराटश्चधृष्टद्युम्नशिखंडिनौ ॥ ४ ॥ सात्यकिश्चेकितानश्चभीमसेनश्चवीर्यवा
न् ॥ एतेसेनाप्रणेतारोवीराःसर्वेतनुत्यजः ॥ ५ ॥ सर्वेवेदविदःशूराःसर्वेसुचरितव्रताः ॥ क्षीमंतोनीतिमंतश्चसर्वेयुद्धविशारदाः ॥ ६ ॥ इष्वस्त्रकुशलाःसर्वेतथास
र्वास्त्रयोधिनः ॥ समानामपियोनेतासेनानांप्रविभागवित् ॥ ७ ॥ यःसहेतरणेभीष्मंशरार्चिःपावकोपमम् ॥ तंतावत्सहदेवाग्रंब्रूहिकुरुनंदन ॥ स्वमतंपुरुषव्या
घ्रकोनःसेनापतिःक्षमः ॥ ८ ॥ ॥ सहदेवउवाच ॥ ॥ संयुक्तएकदुःखश्चवीर्यवांश्चमहीपतिः ॥ यंसमाश्रित्यधर्मज्ञंस्वमंशमनुयुंज्महे ॥ ९ ॥ मत्स्योविराटोबल
वान्कृतास्त्रोयुद्धदुर्मदः ॥ प्रसहिष्यतिसंग्रामेभीष्मंतांश्चमहारथान् ॥ १० ॥ ॥ वैशंपायनउवाच ॥ ॥ तथोक्तेसहदेवेनवाक्येवाक्यविशारद ॥ नकुलोनंतरंत
स्मादिदंवचनमाददे ॥ ११ ॥ भा०पंचाशदधिकशततमोऽध्यायः ॥ १५० ॥ ॥ ७ ॥ ॥ जनार्दनेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ संयुक्तःसंबंधी ॥ ९ ॥ १० ॥ ११ ॥

कुलेनवंशेन अभिजनेनस्वजनसमूहेन ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ अंगिरसोद्रोणस्य ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

वयसाशास्त्रतोधैर्यात्कुलेनाभिजनेनच ॥ क्षीमान्बलान्वितःश्रीमान्सर्वशास्त्रविशारदः ॥ १२ ॥ वेदचास्त्रंभरद्वाजाद्दुर्धर्षःसत्यसंगरः ॥ योनित्यंस्पर्धतेद्रोणंभीष्मंचैवमहाबलम् ॥ १३ ॥ श्लाघ्यःपार्थिववंशस्यप्रमुखेवाहिनीपतिः ॥ पुत्रपौत्रैःपरिवृतःशतशाखइवद्रुमः ॥ १४ ॥ यस्तातपतपोघोरंसदारःपृथिवीपतिः ॥ रोषाद्द्रोणविनाशायवीरःसमितिशोभनः ॥ १५ ॥ पितेवास्मान्समाधत्तेयःसदापार्थिवर्षभः ॥ श्वशुरोद्रुपदोस्माकंसेनाग्रंसप्रकर्षतु ॥ १६ ॥ सद्रोणभीष्मावायातौसहेदितिमतिर्मम ॥ सहिदिव्यास्त्रविद्राजासखाचांगिरसोनृपः ॥ १७ ॥ माद्रीसुताभ्यामुक्तेतुस्वमतेकुरुनंदनः ॥ वासवर्विवासवसमःसव्यसाच्यब्रवीद्वचः ॥ १८ ॥ योयंतपःप्रभावेनऋषिसंतोषणेनच ॥ दिव्यःपुरुषउत्पन्नोज्वालावर्णोमहाभुजः ॥ १९ ॥ धनुष्मान्कवचीखड्गीरथमारुत्यदंशितः ॥ दिव्यैर्हयवरैर्युक्तमग्निकुंडात्समुत्थितः ॥ २० ॥ गर्जन्निवमहामेघोरथघोषेणवीर्यवान् ॥ सिंहसंहननोवीरःसिंहतुल्यपराक्रमः ॥ २१ ॥ सिंहोरस्कःसिंहभुजःसिंहवक्षमहाबलः ॥ सिंहप्रगर्जनोवीरःसिंहस्कंधोमहाद्युतिः ॥ २२ ॥ सुभ्रूःसुदंष्ट्रःसुहनुःसुबाहुःसुमुखोऽकृशः ॥ सुजत्रुःसुविशालाक्षःसुपादःसुप्रतिष्ठितः ॥ २३ ॥ अभेद्यःसर्वशस्त्राणांप्रभिन्नइववारणः ॥ जज्ञेद्रोणविनाशायसत्यवादीजितेंद्रियः ॥ २४ ॥ धृष्टद्युम्नमहंमन्येसहेद्रौष्मस्यसायकान् ॥ वज्राशनिसमस्पर्शान्दीप्तास्यानुरगानिव ॥ २५ ॥ यमदूतसमान्वेगेनिपातेपावकोपमान् ॥ रामेणाजौविषहितान्वज्रनिष्पेषदारुणान् ॥ २६ ॥ पुरुषंतंनपश्यामियःसहेतमहाव्रतम् ॥ धृष्टद्युम्नंतेराजन्निति मेधीयतेमतिः ॥ २७ ॥ क्षिप्रहस्तश्चित्रयोधीमतःसेनापतिर्मम ॥ अभेद्यकवचःश्रीमान्मातंगइवयूथपः ॥ २८ ॥ ॥ भीमसेनउवाच ॥ ॥ वधार्थंयःसमुत्पन्नःशिखंडीद्रुपदात्मजः ॥ वदंतिसिद्धाराजेंद्रऋषयश्चसमागताः ॥ २९ ॥ यस्यसंग्राममध्येतुदिव्यमस्त्रंप्रकुर्वतः ॥ रूपंद्रक्ष्यंतिपुरुषारामस्येवमहात्मनः ॥ ३० ॥ नतंयुद्धेप्रपश्यामियोभिद्यात्तुशिखंडिनम् ॥ शस्त्रेणसमरेराजन्सन्नद्धंस्यंदनेस्थितम् ॥ ३१ ॥ द्वैरथेसमरेनान्योभीष्महन्यान्महाव्रतम् ॥ शिखंडिनंतेवीरंसमेसेनापतिर्मतः ॥ ३२ ॥ ॥ युधिष्ठिरउवाच ॥ ॥ सर्वस्यजगतस्तातसारासारंबलाबलम् ॥ सर्वंजानातिधर्मात्मामतमेषांचकेशवः ॥ ३३ ॥ यमाहकृष्णोदाशार्हःसोस्तुसेनापतिर्मम ॥ कृतास्त्रोप्यकृतास्त्रोवाहंद्योवायदिवायुवा ॥ ३४ ॥ एषनोविजयेमूलमेषतातविपर्यये ॥ अत्रप्राणाश्चराज्यंचभावाभावौसुखासुखे ॥ ३५ ॥ एषधाताविधाताचसिद्धिरत्रप्रतिष्ठिता ॥ यमाहकृष्णोदाशार्हःसोस्तुनोवाहिनीपतिः ॥ ३६ ॥

॥ १४३ ॥

॥ ३७ ॥ शस्त्राणामधिवासनंगंधाद्यैःपूजनं कौतुकंरक्षाबंधनं मंगलंस्वस्तिवाचनम् ॥ ३८ ॥ धनंजयमवेक्ष्येत्यनेनार्जुनाभिमतोधृष्टद्युम्नःसेनापतिरितिस्वाशयंप्रदर्श्यत्यर्थः ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥

ब्रवीतुवदतांश्रेष्ठोनिशासमभिवर्तते ॥ ततःसेनापतिंकृत्वाकृष्णस्यवशवर्तिनः ॥ ३७ ॥ रात्रेःशेषेव्यतिक्रांतेप्रयास्यामोरणाजिरम् ॥ अधिवासितशस्त्राश्चकृतकौतुकमंगलाः ॥ ३८ ॥ ॥ वैशंपायनउवाच ॥ ॥ तस्यतद्वचनंश्रुत्वाधर्मराजस्यधीमतः ॥ अब्रवीत्पुंडरीकाक्षोधनंजयमवेक्ष्यह ॥ ३९ ॥ ममाप्येतेमहाराजभवद्भिर्यउदाहृताः ॥ नेतारस्तवसेनायामताविक्रांतयोधिनः ॥ ४० ॥ सर्वएवसमर्थाहितवशत्रुंप्रबाधितुम् ॥ इंद्रस्यापिभयंत्यक्त्वेतेजनयेयुर्महाहवे ॥ ४१ ॥ किंपुनर्धार्तराष्ट्राणांलुब्धानांपापचेतसाम् ॥ मयापिहिमहाबाहोत्वय्यर्थेमहाहवे ॥ ४२ ॥ कृतोयत्नोमहांस्तत्रशमःस्यादितिभारत ॥ धर्मस्यगतमानृण्यंनस्मवाच्याविवक्षताम् ॥ ४३ ॥ कृतास्त्रंमन्यतेबालआत्मानमविचक्षणः ॥ धार्तराष्ट्रोबलस्थंचपश्यत्यात्मानमातुरः ॥ ४४ ॥ युज्यतांवाहिनीसाधुवधसाध्याहिमेमताः ॥ नधार्तराष्ट्राःशक्ष्यंतिस्थातुंदृष्ट्वाधनंजयम् ॥ ४५ ॥ भीमसेनंचसंक्रुद्धंयमौचापियमोपमौ ॥ युयुधानद्वितीयंचधृष्टद्युम्नममर्षणम् ॥ ४६ ॥ अग्निमन्युंद्रौपदेयान्विराटद्रुपदावपि ॥ अक्षौहिणीपतींश्चान्यान्नरेंद्रान्भीमविक्रमान् ॥ ४७ ॥ सारवद्बलमस्माकंदुष्प्रधर्षंदुरासदम् ॥ धार्तराष्ट्रबलंसंख्येहनिष्यतिनसंशयः ॥ ४८ ॥ धृष्टद्युम्नमहंमन्येसेनापतिमरिंदम ॥ ॥ वैशंपायनउवाच ॥ ॥ एवमुक्तेतुकृष्णेनसंप्राहृष्यन्नरोत्तमाः ॥ ४९ ॥ तेषांप्रहृष्टमनसांनादःसमभवन्महान् ॥ योगइत्यथसैन्यानांत्वरतांसंप्रधावताम् ॥ ५० ॥ हयवारणशब्दाश्चनेमिघोषाश्चसर्वतः ॥ शंखदुंदुभिघोषाश्चतुमुलाःसर्वतोभवन् ॥ ५१ ॥ तदुग्रंसागरनिभंक्षुब्धंबलसमागमम् ॥ रथपत्तिगजोद्ग्रंमहोर्मिभिरिवाकुलम् ॥ ५२ ॥ धावतामाद्रयानानांतनुत्राणिचबभ्रताम् ॥ प्रयास्यतांपांडवानांससैन्यानांसमंततः ॥ ५३ ॥ गंगेवपूर्णादुर्धर्षासमदृश्यतवाहिनी ॥ अग्रानीकेभीमसेनोमाद्रीपुत्रौचदंशितौ ॥ ५४ ॥ सौभद्रोद्रौपदेयाश्चधृष्टद्युम्नश्चपार्षतः ॥ प्रभद्रकाश्चपंचालाभीमसेनमुखायययुः ॥ ५५ ॥ ततःशब्दःसमभवत्समुद्रस्येवपर्वणि ॥ हृष्टानांसंप्रयातानांघोषोदिवमिवास्पृशत् ॥ ५६ ॥ प्रहृष्टादंशितायोधाःपरानीकविदारणाः ॥ तेषांमध्येययौराजाकुंतीपुत्रोयुधिष्ठिरः ॥ ५७ ॥

॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ अस्माकंबलंकर्तृधार्तराष्ट्रबलंकर्म ॥ ४८ ॥ ४९ ॥ योगोयुद्धायसज्जीभवनं द्रव्योपायसन्नहनेष्वपियोगइतिविश्वः ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥

शकटाअनांसि आपणोवणिग्वीथ्युपलक्षितंविक्रेयद्रव्यं वेशोवेश्याजनाश्रयःपटगृहाणि यानयुग्ययानेषुयुग्ययुगग्रहणीतिरथादि शकटमुपस्करादिभारवहंयुग्यं इदंतुकेवलंप्रयाणार्हंयुग्यं युग्यंचपत्रे इतिनिपातनात् कोशंधनचयं यंत्रायुधंगोलकप्रक्षेपणंनालइत्युच्यतेलोके चिकित्सकाःशस्त्रवैद्याः ॥ ५८ ॥ ५९ ॥ ६० ॥ मूलप्रतीकारंधनदाररक्षां गुल्मैःस्थावरैःप्राकाररूपैःजंगमैःपरितःस्थानेस्थानेषु

शकटापणवेशाश्चयानयुग्यंचसर्वशः ॥ कोशंयंत्रायुधंचैवयेचवैद्याश्चिकित्सकाः ॥ ५८ ॥ फल्गुयच्चबलंकिंचिद्यच्चापिकृशंदुर्बलम् ॥ तत्संगृह्ययथौराजायेचापिपरिचारकाः ॥ ५९ ॥ उपप्लव्येतुपांचालीद्रौपदीसत्यवादिनी ॥ सहस्त्रीभिर्निवर्तेतदासीदाससमावृता ॥ ६० ॥ कृत्वामूलप्रतीकारंगुल्मैःस्थावरजंगमैः ॥ स्कंधावारेणमहताप्रययुःपांडुनंदनाः ॥ ६१ ॥ ददतोगांहिरण्यंचब्राह्मणैरभिसंवृताः ॥ स्तूयमानाययूराजन्रथैर्मणिविभूषितैः ॥ ६२ ॥ ककयाधृष्टकेतुश्चपुत्रः काश्यस्यचाभिभुः ॥ श्रेणिमान्वसुदानश्चशिखंडीचापराजितः ॥ ६३ ॥ तृष्टास्तुष्टाःकवचिनःसशस्त्राःसमलंकृताः ॥ राजानमन्वयुःसर्वेपरिवार्ययुधिष्ठिरम् ॥ ६४ ॥ जघनार्धेविराटश्चयाज्ञसेनिश्चसौमकिः ॥ सुधर्माकुंतिभोजश्चधृष्टद्युम्नस्यचात्मजाः ॥ ६५ ॥ रथायुतानिचत्वारिहयाःपंचगुणास्तथा ॥ पत्तिसैन्यंदशगुणंगजानामयुतानिषट् ॥ ६६ ॥ अनाधृष्टिश्चेकितानोधृष्टकेतुश्चसात्यकिः ॥ परिवार्ययुःसर्ववासुदेवधनंजयौ ॥ ६७ ॥ आसाद्यतुकुरुक्षेत्रंव्यूढानीकाःप्रहारिणः ॥ पांडवाःसमदृश्यंतनर्दंतोदृषभाइव ॥ ६८ ॥ तेवगाह्यकुरुक्षेत्रंशंखान्दध्मुररिंदमाः ॥ तथैवदध्मतुःशंखंवासुदेवधनंजयौ ॥ ६९ ॥ पांचजन्यस्यनिर्घोषंविरफूर्जितमिवाशनेः ॥ निशम्यसर्वसैन्यानिसमदृष्यंतसर्वशः ॥ ७० ॥ शंखदुंदुभिसंदृष्टःसिंहनादस्तरस्विनाम् ॥ पृथिवींचांतरिक्षंचसागरांश्चान्वनादयत् ॥ ७१ ॥

॥ इतिश्रीमहाभारतेउद्यो॰सैन्यनिर्याणपर्वणिकुरुक्षेत्रप्रवेशेएकपंचाशदधिकशततमोऽध्यायः ॥ १५१ ॥ ॥ ७ ॥ ॥ वैशंपायनउवाच ॥ ॥ ततोदेशेसमेस्निग्धेप्रभूतयवसेंधने ॥ निवेशयामासतदासेनांराजायुधिष्ठिरः ॥ १ ॥ परिहृत्यऽशानानिदेवतायतनानिच ॥ आश्रमांश्चमहर्षीणांतीर्थान्यायतनानिच ॥ २ ॥ मधुरानूषरेदेशेशुचौपुण्येमहामतिः ॥ निवेशंकारयामासकुंतीपुत्रोयुधिष्ठिरः ॥ ३ ॥ ततश्चपुनरुत्थायसुखीविश्रांतवाहनः ॥ प्रययौपृथिवीपालैर्वृतःशतसहस्रशः ॥ ४ ॥ विद्राव्यशतशोगुल्मान्धार्तराष्ट्रस्यसैनिकान् ॥ पर्यक्रामत्समंताच्चपार्थेनसहकेशवः ॥ ५ ॥

रसंघैः स्कंधावारेणसैन्येन ॥ ६१ ॥ गांभूमिंधेनुंवा ॥ ६२ ॥ ६३ ॥ ६४ ॥ जघनार्धेपश्चिमार्धे ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ समदृष्यंतरोमांचितानि ॥ ७० ॥ ७१ ॥ ॥ इतिउद्योगप॰ नैलकंठीयेभारतभावदीपेएकपंचाशदधिकशततमोऽध्यायः ॥ १५१ ॥ ॥ ७ ॥ ॥ ततइति ॥ १ ॥ २ ॥ मधुरेमनोहरे ॥ ३ ॥ ४ ॥ गुल्मान्सैनिकसंघान् ॥ ५ ॥

॥ ६ ॥ सूपतीर्थांशोभनोपकंठाम् ॥ ७ ॥ ८ ॥ तद्विधानिशिबिराणि ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ कंटकसन्नाहाः येषांस्पर्शमात्रादपिगजांतराणांकंटकवेधोभवतितादृशाःसन्नाहाःकवचानि कंटकैःक

शिबिरंमापयामासधृष्टद्युम्नश्चपार्षतः ॥ सात्यकिश्चरथोदारोयुयुधानश्चवीर्यवान् ॥ ६ ॥ आसाद्यसरितंपुण्यांकुरुक्षेत्रेहिरण्वतीं ॥ सूपतीर्थांशुचिजलांशर्करापंकवर्जिताम् ॥ ७ ॥ खानयामासपरिखांकेशवस्तत्रभारत ॥ गुप्त्यर्थमपिचादिश्यबलंतत्रन्यवेशयत् ॥ ८ ॥ विधिर्यःशिबिरस्यासीत्पांडवानांमहात्मनाम् ॥ तद्विधानिनरेंद्राणांकारयामासकेशवः ॥ ९ ॥ प्रभूततरकाष्ठानिदुराधर्षतराणिच ॥ भक्ष्यभोज्यान्नपानानिशतशोथसहस्रशः ॥ १० ॥ शिबिराणिमहार्हाणिराज्ञांतत्रपृथक्पृथक् ॥ विमानानीवराजेंद्रनिविष्टानिमहीतले ॥ ११ ॥ तत्रासन्शिल्पिनःप्राज्ञाःशतशोदत्तवेतनाः ॥ सर्वोपकरणैर्युक्तावैद्याःशास्त्रविशारदाः ॥ १२ ॥ व्याधनुर्वर्मशस्त्राणांतथैवमधुसर्पिषोः ॥ ससर्जरसपांसूनांराशयःपर्वतोपमाः ॥ १३ ॥ बहूदकंसुयवसंतुषांगारसमन्वितम् ॥ शिबिरेशिबिरेराजासंचकारयुधिष्ठिरः ॥ १४ ॥ महायंत्राणिनाराचास्तोमराणिपरश्वधाः ॥ धनूंषिकवचादीनिऋष्टयस्तूणसंयुताः ॥ १५ ॥ गजाःकंटकसन्नाहालोहवर्मोत्तरच्छदाः ॥ दृश्यंतेतत्रगिर्याभाःसहस्रशतयोधिनः ॥ १६ ॥ निविष्टान्पांडवांस्तत्रज्ञात्वामित्राणिभारत ॥ अभिससुर्यथादेशंसबलाःसहवाहनाः ॥ १७ ॥ चरितब्रह्मचर्यास्तेसोमपाभूरिदक्षिणाः ॥ जयायपांडुपुत्राणांसमाजग्मुर्महीक्षितः ॥ १८ ॥

॥ इतिश्रीमहाभारतेउद्योगपर्वणिसैन्यनिर्याणपर्वणिशिबिरादिनिर्माणेद्विपंचाशदधिकशततमोऽध्यायः ॥ १५२ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ जनमेजयउवाच ॥ ॥ युधिष्ठिरंसहानीकमुपायांतंयुयुत्सया ॥ सन्निविष्टंकुरुक्षेत्रेवासुदेवेनपालितम् ॥ १ ॥ विराटद्रुपदाभ्यांससपुत्राभ्यांसमन्वितम् ॥ केकयैर्धृष्टकेतुनाभिश्चैवपार्थिवैःशतशोवृतम् ॥ २ ॥ महेंद्रमिवचादित्यैरभिगुप्तंमहारथैः ॥ श्रुत्वादुर्योधनोराजार्किंकार्यंप्रत्यपद्यत ॥ ३ ॥ एतदिच्छाम्यहंश्रोतुंविस्तरेणमहामते ॥ संभ्रमेतुमुलेतस्मिन्यदासीत्कुरुजांगले ॥ ४ ॥ व्यथयेयुरिमेदेवान्सेंद्रानपिसमागमे ॥ पांडवावासुदेवश्चविराटद्रुपदौतथा ॥ ५ ॥ धृष्टद्युम्नश्चपांचाल्यःशिखंडीचमहारथः ॥ युधामन्युश्चविक्रांतोदेवैरपिदुरासदः ॥ ६ ॥ एतदिच्छाम्यहंश्रोतुंविस्तरेणतपोधन ॥ कुरूणांपांडवानांचयद्यदासीद्विचेष्टितम् ॥ ७ ॥ ॥ वैशंपायनउवाच ॥ ॥ प्रतियातेतुदाशार्हेराजादुर्योधनस्तदा ॥ कर्णंदुःशासनंचैवशकुनिंचाब्रवीदिदम् ॥ ८ ॥ अकृतेनैवकार्येणगतःपार्थानधोक्षजः ॥ सएनान्मन्युनाविष्टोध्रुवंधक्ष्यत्यसंशयम् ॥ ९ ॥

वचैःसन्नहनंयेषामितिप्राज्ञः ॥ १६ ॥ अभिससुरभ्याजग्मुः ॥ १७ ॥ १८ ॥ ॥ इतिउ॰नै॰भा॰द्विपंचाशदधिकशततमोऽध्यायः ॥ १५२ ॥ ॥ ७ ॥ ॥ युधिष्ठिरमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ आसन्नजलाःकोष्ठाःकक्ष्याःयेषुतानितथा अच्छेद्यःशत्रुभिरनिवार्यआहारओहारणंवस्तूनांमार्गाश्चयेषुतानिअच्छेद्याहारमार्गाणि ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥

इष्टोहिवासुदेवस्यपांडवैर्ममविग्रहः॥ भीमसेनार्जुनौचैवदाशार्हस्यमतेस्थितौ॥ १० ॥ अजातशत्रुरत्यर्थंभीमसेनवशानुगः ॥ निकृतश्चमयापूर्वंसहसर्वैःसहोदरैः॥ ११ ॥ विराटद्रुपदौचैवकृतवैरौमयासह ॥ तौचसेनाप्रणेतारौवासुदेववशानुगौ॥ १२ ॥ भवताविग्रहःसोयंतुमुलोलोमहर्षणः॥ तस्मात्सांग्रामिकं सर्वंकारयध्वमतंद्रिताः॥ १३ ॥ शिबिराणिकुरुक्षेत्रेक्रियंतांवसुधाधिपाः॥ स्वपर्याप्तावकाशानिदुरादेयानिशत्रुभिः ॥ १४ ॥ आसन्नजलकोष्ठानिशतशोथसहस्रशः॥ अच्छेद्याहारमार्गाणिबंधोच्छ्रयचितानिच॥ १५ ॥ विविधायुधपूर्णानिपताकाध्वजवंतिच॥ समाश्वनेषांपंथानःक्रियंतांनगराद्बहिः॥ १६ ॥ प्रयाणंघुष्यतामद्यश्वोभूतइतिमाचिरम्॥ तेतथेतिप्रतिज्ञायश्वोभूतेचक्रिरेतथा॥ १७ ॥ तृष्टरूपामहात्मानोनिवासायमहीक्षिताम्॥ततस्तेपार्थिवाःसर्वेतच्छ्रुत्वाराजशासनम् ॥ १८ ॥ आसनेभ्योमहार्हेभ्यउदतिष्ठन्नमर्षिताः॥ बाहून्परिघसंकाशान्संस्पृशंतःशनैःशनैः॥ १९ ॥ कांचनांगददीप्तांश्चचंदनागुरुभूषितान्॥ उष्णीषाणिनियच्छंतःपुंडरीकनिभैःकरैः॥ अंतरीयोत्तरीयाणिभूषणानिचसर्वशः॥ २० ॥ तेरथान्रथिनःश्रेष्ठाहयांश्चहयकोविदाः ॥ सज्जयंतिस्मनागांश्चनागशिक्षास्वनुष्ठिताः ॥ २१ ॥ अथवर्माणिचित्राणिकांचनानिबहूनिच॥ विविधानिचशस्त्राणिचक्रुःसर्वाणिसर्वशः॥ २२ ॥ पदातयश्चपुरुषाःशस्त्राणिविविधानिच॥ उपाजक्रुःशरीरेषुहेमचित्राण्यनेकशः॥ २३ ॥ तदुत्सवइवोदग्रंसंप्रहृष्टनराकुलम्॥ नगरंधार्तराष्ट्रस्यभारतासीत्समाकुलम्॥ २४ ॥ जनौघसलिलावर्तोरथनागाश्वमीनवान्॥ शंखदुंदुभिनिर्घोषःकोशसंचयरत्नवान्॥ २५ ॥ चित्राभरणवर्मौर्मिःशस्त्रनिर्मलफेनवान्॥ प्रासादमालाद्रिवृतोरथ्यापणमहाह्रदः॥ २६ ॥ योधचंद्रोदयोद्भूतःकुरुराजमहार्णवः॥ व्यदृश्यततदाराजंश्चंद्रोदयइवोदधिः॥ २७ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिसैन्यनिर्याणपर्वणिदुर्योधनसैन्यसज्जकरणेत्रिपंचाशदधिकशततमोऽध्यायः॥ १५३ ॥ ॥ ७ ॥ ॥ वैशंपायनउवाच ॥ ॥ वासुदेवस्यतद्वाक्यमनुस्मृत्ययुधिष्ठिरः॥ पुनःपप्रच्छवार्ष्णेयंकथंमंदोब्रवीदिदम्॥ १॥ अस्मिन्नभ्यागतेकालेकिंचनःक्षममच्युत॥ कथंचवर्तमानावैस्वधर्मान्नच्यवेमहि॥ २॥ दुर्योधनस्यकर्णस्यशकुनेःसौबलस्यच॥ वासुदेवमतज्ञोसिममसभ्रातृकस्यच॥ ३॥

॥ १९ ॥ अंतरीयंपरिधानीयं उत्तरीयंप्रावरणवस्त्रम् ॥ २० ॥ २१ ॥ २२ ॥ उपाजक्रुःपरिधानंकृतवंतः ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेत्रिपंचाशदधिकशततमोऽध्यायः॥ १५३ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ वासुदेवेति ॥ १ ॥ २ ॥ ३ ॥

॥ १४५ ॥

॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ युक्तंसम्यक् ॥ १३ ॥ नकल्याणंअकल्याणं पापंअकल्याणंचत्रतीयेचवियमानंसर्वंतस्मिन्दुर्योधनेप्रतिष्ठितम् ॥ १४ ॥ परित्यागेनराज्यत्योपेक्ष

विदुरस्यापितद्वाक्यंश्रुतंभीष्मस्यचोभयोः॥ कृत्याश्चविपुलप्रज्ञप्रज्ञाकात्रुर्येनतेश्रुता ॥ ४ ॥ सर्वमेतदतिक्रम्यविचार्यचपुनःपुनः॥ क्षमंयन्नोमहाबाहोतद्ब्रवीत्यविचारयन्॥ ५ ॥ श्रुत्वैतद्धर्मराजस्यधर्मार्थसहितंवचः॥ मेघदुंदुभिनिर्घोषःकृष्णोवाक्यमथाब्रवीत्॥ ६ ॥ ॥ कृष्णउवाच ॥ ॥ उक्तवानस्मियद्वाक्यंधर्मार्थसहितंहितम्॥ नतुतन्निकृतिप्रज्ञेकौरव्येप्रतितिष्ठति॥ ७ ॥ नचभीष्मस्यदुर्मेधाःशृणोतिविदुरस्यवा॥ ममवाभाषितंकिंचित्सर्वमेवातिवर्तते॥ ८ ॥ नैषकामयतेधर्मंनैषकामयतेयशः॥ जितंसमन्यतेसर्वंदुरात्माकर्णमाश्रितः॥ ९ ॥ बंधमाज्ञापयामाससममचापिसुयोधनः॥ नचतंलब्धवान्कामंदुरात्मापापनिश्चयः॥ १० ॥ नचभीष्मोनचद्रोणोयुक्तंवाहतुर्वचः॥ सर्वेतमनुवर्तंतेकृतेविदुरमच्युत॥ ११ ॥ शकुनिःसौबलश्चैवकर्णदुःशासनावपि॥ त्वय्ययुक्तान्यभाषंतमूढामूढममर्षणम्॥ १२ ॥ किंचतेनमयोक्तेनयान्यभाषतकौरवः॥ संक्षेपेणदुरात्मासौनयुक्तंत्वयिवर्तते॥ १३ ॥ पार्थिवेषुनसर्वेषुयइमेतवसैनिकाः॥ यत्पापंयन्नकल्याणंसर्वंतस्मिन्प्रतिष्ठितम्॥ १४ ॥ नचापिवयमत्यर्थंपरित्यागेनकर्हिचित्॥ कौरवैःशममिच्छामस्तत्रयुद्धमनंतरम् ॥ १५ ॥ ॥ वैशंपायनउवाच ॥ ॥ तच्छ्रुत्वापार्थिवाःसर्वेवासुदेवस्यभाषितम्॥ अब्रुवंतोमुखंराज्ञःसमुदैक्षंतभारत ॥ १६ ॥ युधिष्ठिरस्त्वभिप्रायमभिलक्ष्यमहीक्षिताम्॥ योगमाज्ञापयामासभीमार्जुनयमैःसह॥ १७ ॥ ततःकिलकिलाभूतमनीकंपांडवस्यह॥ आज्ञापितेतदायोगेसमहृष्यंतसैनिकाः ॥ १८ ॥ अवध्यानांवधंपश्यन्धर्मराजोयुधिष्ठिरः॥ निःश्वसन्भीमसेनंचविजयंचेदमब्रवीत्॥ १९ ॥ यदर्थंवनवासश्चप्राप्तंदुःखंचयन्मया ॥ सोयमस्मानुपैत्येवपरोनर्थःप्रयत्नतः ॥ २० ॥ तस्मिन्यत्नःकृतोस्माभिःसनोहीनःप्रयत्नतः॥ अकृतेतुप्रयत्नेस्मानुपावृत्तःकलिर्महान्॥ २१ ॥ कथंत्ववध्यैःसंग्रामःकार्यःसहभविष्यति॥ कथंहत्वागुरून्वृद्धान्विजयोनोभविष्यति॥ २२ ॥ तच्छ्रुत्वाधर्मराजस्यसव्यसाचीपरंतपः॥ यदुक्तंवासुदेवेनश्रावयामाससद्वचः ॥ २३ ॥ उक्तवान्देवकीपुत्रःकुंत्याश्चविदुरस्यच ॥ वचनंत्वयाराजन्निखिलेनावधारितम्॥ २४ ॥

या ॥ १५ ॥ १६ ॥ योगंयुद्धोद्योगम् ॥ १७ ॥ १८ ॥ १९ ॥ यदर्थंयन्निवृत्त्यर्थं अनर्थःकुलक्षयः प्रयत्नतोबलात् ॥ २० ॥ तस्मिन्निति तस्मिन्ननर्थेनिमित्तेसतियत्नस्तत्परिहारार्थंउपायःसद्यःशत्रुवधरूपोभीमस्ययूतकालेसंमतःसनोऽस्माकंअस्माभिःक्षमांकुर्वद्भिःप्रयत्नतोबलाद्धीनोव्यर्थःकृतः अकृतेतुअकृतेपिप्रयत्नेयुद्धार्थमुद्योगे तथापिअस्मान्कलिरुपावृत्तआगतः ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥

तौकुंतीविदुरौ अधर्ममितिच्छेदः अयुध्यतस्तवनिवार्तितुमपिनयुक्तम्॥२५॥२६॥२७॥ ॥इतिउद्योगप०नैलकंठीयेभारतभावदीपेचतुःपंचाशदधिकशततमोऽध्यायः॥१५४॥ ॥७॥ ॥व्युष्टायांव्यतीतायाम् ॥१॥ सारंपुरोगामि मध्यंमध्यमं फल्गुपाश्चात्यम् ॥२॥ सानुकर्षाइत्यादीनिनानामणिविभूषिताइत्यंतानिचित्रानीकानांविशेषणानि अनुकर्षःयुद्धविमर्देयस्यकस्यचिद्रथावयवस्यनष्टस्यप्रतिसमाधानार्थंयद्रथस्याधोदारुबध्यतेतत् अनुकर्षोरथाधःस्थदारुणीतिमेदिनी तूणीरोरथवाह्योबाणकोशः महान्निषंगइतियावत् वरूथोरथगुप्तिर्व्याघ्रादिचर्ममयी तोमराःहस्तक्षेप्याःसशल्यादंडाः उपासंगाः हयगजवाह्यास्तूणाः निषंगःपत्तिवाह्यःसएव शक्तिर्लोहदंडः ऋष्टिर्गुरुतरःकाष्ठदंडः ॥ ३ ॥ शरासनतोमराःधनुःप्रक्षेप्यास्तोमराःस्थूलबाणाः पाशाःसमीपागतस्यगलेप्रक्षेपार्थं परिच्छदाआस्तरणादीनि प

नचतौवक्ष्यतोऽधर्ममितिमेनैष्ठिकीमतिः॥ नापियुक्तंचकौंतेयनिवर्तितुमयुध्यतः॥ २५॥ तच्छ्रुत्वावासुदेवोपिसव्यसाचिवचस्तदा॥ स्मयमानोब्रवीद्वाक्यं पार्थमेवमितिब्रुवन्॥ २६॥ ततस्तेधृतसंकल्पायुद्धायसहसैनिकाः॥ पांडवेयामहाराजतांरात्रिंसुखमावसन्॥ २७॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिसैन्यनिर्याणपर्वणियुधिष्ठिरार्जुनसंवादेचतुःपंचाशदधिकशततमोऽध्यायः॥ १५४॥ ॥७॥ ॥वैशंपायनउवाच॥ ॥व्युष्टायांवैरजन्यांहिराजादुर्योधनस्ततः॥ व्यभजत्तान्यनीकानिदशचैकंचभारत॥ १॥ नरहस्तिरथाश्वानांसारंमध्यंचफल्गुच॥ सर्वेष्वेतेष्वनीकेषुसंदिदेशनराधिपः॥ २॥ सानुकर्षाःसतूणीराःसवरूथाःसतोमराः॥ सोपासंगाःसशक्तीकाःसनिषंगाःसहर्ष्टयः॥ ३॥ सध्वजाःसपताकाश्चसशरासनतोमराः॥ रज्जुभिश्चविचित्राभिःसपाशाःसपरिच्छदाः॥ ४॥ सकचग्रहविक्षेपाःसतैलगुडवालुकाः॥ साशीविषघटाःसर्वेससर्जरसपांसवः॥ ५॥ सघंटफलकाःसर्वेसायोगुडजलोपलाः॥ सशालभिंदिपालाश्चसमधूच्छिष्टमुद्गराः॥ ६॥ सकांडदंडकाःसर्वेससीरविषतोमराः॥ सशूर्पपिटकाःसर्वेसदात्रांकुशतोमराः॥ ७॥

रिस्तराइतिपाठेआस्तरणमेव ॥ ४ ॥ कचग्रहविक्षेपःकचेषुगृहीत्वायेनशत्रुर्विक्षिप्यतेतादृशःकलविंकग्रहतुल्यश्चिक्कणद्रव्यांजितापोदंडविशेषः करग्रहेतिपाठेअंकुशविशेषः तैलादयःप्रतप्ताःशत्रूणामुपरिक्षिप्यंते साशीविषघटाःससर्पाःकुंभाः सर्जरसोरालद्रव्यमग्न्युद्दीपकं ॥ ५ ॥ सघंटानिफलकानिशस्त्राग्राणियेषांतेसघंटफलकाः घंटासहितंचर्मेत्यन्ये अयांसिखड्गपट्टिशच्छुरिकादीनि गुडजलंतप्तं उपलायंत्रक्षेप्यागोलाः शालतेकत्थतेशब्दंकरोतीतिशालःसचासौभिंदिपालोगोफलकः सशूलेतिगौडपाठः मधूच्छिष्टंमयनंतदपिद्रवीकृत्यगुडजलवत्प्रक्षेप्यं मुद्गरःमुशलतुल्योदंडः ॥ ६ ॥ कांडंबाणफलकंतद्युक्तोदंडःकांडदंडःकंटकदंडइतियावत् दंडकंटकइतिपाठेसएवार्थः सीरंलांगलं विषंप्रसिद्धंतेनयुक्तास्तोमराविषतोमराः शूर्पाणितप्तगुडादिप्रक्षेपार्थानि पिटकास्तदाश्रयामंजूषाः अस्त्ररोधनार्थावा दात्रंपरशुप्रभृति अंकुशतोमराःबदरीकंटकतुल्यलोहकंटकोपेतास्तोमराः येषामंतःप्रविष्टानांबहिर्निःसरणेअंत्राण्यपिबहिर्निःसरंति ॥ ७ ॥

कीलकवचवान्हिपरेणमुष्टियुद्धेजेतुमशक्यः सकीलककचाइतिपाठेसदंतंकरपत्रंयेनतक्षाकाष्ठंपाटयति वाशीकाष्ठप्रच्छन्नंशस्त्रं वास्येतिवासीतिवापाठेपिसएवार्थः वृक्षादनाःलोहकंटककीलादीन्युपकरणानि व्याघ्रचर्मणाद्वीपीचित्रव्याघ्रस्तच्चर्मणाचपरिवृतारथाएव ॥८॥ऋष्टिःद्रविडेषुप्रसिद्धंहस्तक्षेप्यंवक्रंकाष्ठफलकं शृंगसाहचर्यात् शृंगंगदाघातेननष्टस्यरक्तस्यमोक्षणार्थं विण्मूत्रोत्सर्जनस्थानंवा प्रासाः भल्लाः तैलक्षौमानितैलाक्तवस्त्रविशेषायेषांभस्मप्रहारस्थलेदीयते सर्पिश्चपुरातनंतदर्थमेव॥९॥चित्राश्चतेअनीकाश्चचित्रानीकाःचित्राणिसैन्यानि अनीकोस्त्रीरणेसैन्येइतिमेदिनी॥१०॥विनिवेशितायेषुरथेष्वितिशेषः॥११॥बद्धानिअरित्राणिअशुभहराणियंत्रौषधादीनियेषुतेबद्धारिष्टाः रिष्टंक्षेमाशुभाभावेइतिमेदिनी बद्धकक्षाःबद्धाःकक्षाःस्पर्धापदानितुरगादिशिरसिघंटामालामौक्तिकगुच्छादीन्यतिशौर्या

सकीलकवचाःसर्वेवाशीवृक्षादनान्विताः॥ व्याघ्रचर्मपरीवाराद्वीपिचर्मावृताश्चते॥ ८॥ सहर्ष्टयःसशृंगाश्चसप्रासविविधायुधाः॥ सकुठाराःसकुद्दालाःसतैलक्षौमसर्पिषः॥ ९॥ रुक्मजालप्रतिच्छन्नानानामणिविभूषिताः॥ चित्रानीकाःसुवपुषोज्वलिताइवपावकाः॥ १०॥ तथाकवचिनःशूराःशस्त्रेषुकृतनिश्चयाः॥ कुलीनाहययोनिज्ञाःसारथ्येविनिवेशिताः॥ ११॥ बद्धारिष्टाबद्धकक्षाबद्धध्वजपताकिनः॥ बद्धाभरणनिर्यूहाबद्धचर्मासिपट्टिशाः॥ १२॥ चतुर्युजोरथाःसर्वेसर्वेचोत्तमवाजिनः॥ सप्रासऋष्टिकाःसर्वेसर्वेशतशरासनाः॥ १३॥ धुर्ययोर्हययोरेकस्तथान्यौपार्ष्णिसारथी॥ तौचापिरथिनांश्रेष्ठौरथीचहयवित्तथा॥ १४॥ नगराणीवगुप्तानिदुराधर्षाणिशत्रुभिः॥ आसन्रथसहस्राणिहेममालीनिसर्वशः॥ १५॥ यथारथास्तथानागाबद्धकक्षाःस्वलंकृताः॥ बभूवुःसप्तपुरुषारत्नवंतइवाद्रयः॥ १६॥ द्वावंकुशधरौतत्रद्वावुत्तमधनुर्धरौ॥ द्वौवरासिधरौराजन्नेकःशक्तिपिनाकधृक्॥ १७॥ गजैर्मत्तैःसमाकीर्णंसवर्मायुधकोशकैः॥ तद्बभूवबलंराजन्कौरव्यस्यमहात्मनः॥ १८॥ आमुक्तकवचैर्युक्तैःसपताकैःस्वलंकृतैः॥ सादिभिश्चोपपन्नास्तुतथाचायुतशोहयाः॥ १९॥ असंग्राहाःसुसंपन्नाहेमभांडपरिच्छदाः॥ अनेकशतसाहस्राःसर्वेसादिवशेस्थिताः॥ २०॥ नानारूपविकाराश्चनानाकवचशस्त्रिणः॥ पदातिनोनरास्तत्रबभूवुर्हेममालिनः॥ २१॥ रथस्यासन्दशगजागजस्यदशवाजिनः॥ नरादशहयस्यासन्पादरक्षाःसमंततः॥ २२॥ बद्योतीनिबिरुदानियेषु कक्षास्यादंतरीयस्यपश्चादंचलपल्लवे स्पर्धापदेनादोर्मूलेइतिमेदिनी बद्धानिआभरणानिक्षुद्रघंटिकादीनिनिर्यूहाःशिखराणिचयेषु निर्यूहःशिखरेद्वारेइतिमेदिनी॥१२॥१३॥चतुर्युजइत्येतद्व्याचष्टे धुर्ययोरिति धुर्ययोःधूःसन्निहितयोः पार्ष्णिसारथीचक्ररक्षौ॥१४॥१५॥ ॥१६॥ अंकुशधरौगजनियंतारौ उत्तमधनुर्धरौदूरस्थान्प्रहर्तुं असिधरौसमीपस्थान् शक्तिपिनाकधरौमध्यस्थान् पिनाकःत्रिशूलं पिनाकोस्त्रीरुद्रचापेपांशुवर्षत्रिशूलयोरितिमेदिनी ॥ १७॥ १८ ॥ सादिभिःअश्वारोहैः ॥१९॥ संग्राहःबृहदुद्रंगःहेषणपूर्वकमग्रपादाभ्यामुत्प्लवनमितियावत् तद्रहिताःअसंग्राहाः संग्राहोबृहदुद्रंगइतिविश्वः यतःसुसंपन्नाःसम्यक्शिक्षिताः भांडंअश्वाभरणंतेनपरिच्छदःपरिष्कारोयेषांते भांडंभूषाश्वभूषयोरितिविश्वः ॥२०॥ रूपविकाराःरक्तकृष्णहयमुखत्वादयः ॥ २१ ॥ रथस्येति एकस्यरथस्ययथोक्तविभागेनदशगजाःशतंअश्वाःसहस्रंपदातयश्चपरिवारइत्यर्थः ॥ २२ ॥

पक्षांतरमाह रथस्येति एकस्यरथस्यपंचाशद्गजाःपंचसहस्रंअश्वाःपंचविंशत्सहस्रंपदातयःपरिवारइत्यर्थः ॥ २३ ॥ अत्ररथादीनांप्राधान्यांप्राधान्यांभिप्रायेणपरिवाराख्यत्वबहुत्वेज्ञेये साधारणीतुसंख्या आदिपर्वण्युक्ता एकोरथोगजस्त्वेकोनराःपंचपदातयः त्रयश्चतुरगास्तज्ज्ञैःपत्तिरित्यभिधीयतइत्यादिना तामेवानुसरति सेनेति तत्रगजानांरथानांचतुल्यसंख्योक्तिःपूर्वोक्तसंख्योपलक्षणार्था तेनपंचविंश तिशतानिमनुष्याःपंचदशशतंतुरगाइत्यपिज्ञेयं पृतनायांतुपंचसहस्रंनागास्तावंतोरथाःपंचविंशतिसहस्रंनराःपंचदशसहस्रंअश्वाः वाहिन्यांपंचाशत्सहस्रंनागास्तावंतोरथाःसार्धलक्षद्वयंनराःसार्द्धलक्षंअश्वा

रथस्यनागाःपंचाशन्नागस्यासन्शतंहयाः ॥ हयस्यपुरुषाःसप्तभिन्नसंधानकारिणः ॥ २३ ॥ सेनापंचशतंनागारथास्तावंतएवच ॥ दशसेनाचपृतनापृतना दशवाहिनी ॥ २४ ॥ सेनाचवाहिनीचैवपृतनाध्वजिनीचमूः ॥ अक्षौहिणीतिपर्यायैर्निरुक्ताचवरूथिनी ॥ २५ ॥ एवंव्यूढान्यनीकानिकौरवेयेणधीमता ॥ अ क्षौहिण्योदशैकाचसंख्याताःसप्तचैवह ॥ २६ ॥ अक्षौहिण्यस्तुसप्तैवपांडवानामभूद्बलम् ॥ अक्षौहिण्योदशैकाचकौरवाणामभूद्बलम् ॥ २७ ॥ नराणांपंचपंचाश देषापत्तिर्विधीयते ॥ सेनामुखंचतिस्रस्तागुल्मइत्यभिशब्दितम् ॥ २८ ॥ त्रयोगुल्मागणस्त्वासीद्गणास्त्वयुतशोभवन् ॥ दुर्योधनस्यसेनासुयोत्स्यमानाःप्रहा रिणः ॥ २९ ॥ तत्रदुर्योधनोराजाशूरान्बुद्धिमतोनरान् ॥ प्रसमीक्ष्यमहाबाहुश्चकेसेनापतींस्तदा ॥ ३० ॥ पृथगक्षौहिणीनांचप्रणेतॄन्नरसत्तमान् ॥ विधिव त्पूर्वमानीयपार्थिवानभ्यभाषत ॥ ३१ ॥ कृपंद्रोणंचशल्यंचसैंधवंचजयद्रथम् ॥ सुदक्षिणंचकांबोजंकृतवर्माणमेवच ॥ ३२ ॥ द्रोणपुत्रंचकर्णंचभूरिश्रवसमे वच ॥ शकुनिंसौबलंचैवबाह्लीकंचमहाबलम् ॥ ३३ ॥ दिवसेदिवसेतेषांप्रतिवेलंचभारत ॥ चक्रेसविविधाःपूजाःप्रत्यक्षंचपुनःपुनः ॥ ३४ ॥ तथाविनियताः सर्वेयेचतेषांपदानुगाः ॥ बभूवुःसैनिकाराज्ञांप्रियंराज्ञश्चिकीर्षवः ॥ ३५ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिसैन्यनिर्याणपर्वणिदुर्योधनसैन्यविभागेपंच पंचाशदधिकशततमोऽध्यायः ॥ १५५ ॥ ॥७॥ ॥ वैशंपायनउवाच ॥ ॥ ततःशांतनवंभीष्मंप्रांजलिर्धृतराष्ट्रजः ॥ सहसर्वैर्महीपालैरिदंवचनमब्रवीत् ॥ १ ॥ ऋतेसेनाप्रणेतारंपृतनासुमहत्यपि ॥ दीर्यतेयुद्धमासाद्यपिपीलिकपुटंयथा ॥ २ ॥

इतिज्ञेयं ॥ २४ ॥ एवमपिपूर्वोक्ताक्षौहिणीसंख्ययाविसंवादएवेत्याशंक्याह सेनेति सेनादयःशब्दाःपर्यायाःनतुसंख्येयानांसंख्याभेदमात्रेणनानार्थाः एकस्मिन्नपिभीमसेनेदशनागसहस्रबलत्वस्मरणात् एवंचबलस्यैवेयंएकादशसप्तेतिसंख्यानसंख्येयस्येतिभावः पांडवानांहीनबलत्वेपिअसंख्येयंवासुदेवबलंतत्रसहायीभूतमितिजयोऽभूदितिद्रष्टव्यं ॥ २५ ॥ २६ ॥ २७ ॥ नराणामिति अयुतशइत्यनेननरा णामंतोनास्तीतिदर्शितं ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेपंचपंचाशदधिकशततमोऽध्यायः ॥ १५५ ॥ ॥७॥ ॥ ततइति ॥ १॥२॥ ॥ १४७ ॥

॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ उशनसाशुक्रेण असंहार्यःपितुर्वरदानात्कालेनापिसंहर्तुमशक्यः ॥ ११ ॥ १२ ॥ कुमारःकार्तिकेयः ॥ १३ ॥ १४ ॥ पावकिःकार्तिकेयएव ॥ १५ ॥

नहिजातुद्वयोर्बुद्धिःसमाभवतिकर्हिचित् ॥ शौर्यंचबलनेतॄणांस्पर्धतेचपरस्परम् ॥ ३ ॥ श्रूयतेचमहाप्राज्ञहैहयानमितौजसः ॥ अभ्ययुर्ब्राह्मणाःसर्वेसमुच्छ्रित कुशध्वजाः ॥ ४ ॥ तानभ्ययुस्तदावैश्याःशूद्राश्चैवपितामह ॥ एकतस्तुत्रयोवर्णाएकतःक्षत्रियर्षभाः ॥ ५ ॥ ततोयुद्धेष्वभज्यंतत्रयोवर्णाःपुनःपुनः ॥ क्षत्रियाश्च जयंत्येववहुलंचैकतोबलम् ॥ ६ ॥ ततस्तेक्षत्रियानेवपप्रच्छुर्द्विजसत्तमाः ॥ तेभ्यःशशंसुर्धर्मज्ञायाथातथ्यंपितामह ॥ ७ ॥ वयमेकस्यभृण्वानामहाबुद्धिमतोरणे ॥ भवंतस्तुपृथक्सर्वेस्वबुद्धिवशवर्तिनः ॥ ८ ॥ ततस्तेब्राह्मणाश्चक्रुरेकंसेनापतिंद्विजम् ॥ नयेसुकुशलंशूरमजयन्क्षत्रियांस्ततः ॥ ९ ॥ एवंयेकुशलंशूरंहितेप्सितमकल्मषम् ॥ सेनापतिंप्रकुर्वंतितेजयंतिरणेरिपून् ॥ १० ॥ भवानुशनसातुल्योहितैषीचसदामम ॥ असंहार्यःस्थितोधर्मेसनःसेनापतिर्भव ॥ ११ ॥ रश्मिवता मिवादित्योवीरुधामिवचंद्रमाः ॥ कुबेरइवयक्षाणांदेवानामिववासवः ॥ १२ ॥ पर्वतानांयथामेरुःसुपर्णःपक्षिणांयथा ॥ कुमारइवदेवानांवसूनामिवहव्य वाट् ॥ १३ ॥ भवताहिवयंगुप्ताःशक्रेणेवदिवौकसः ॥ अनाधृष्याभविष्यामस्त्रिदशानामपिध्रुवम् ॥ १४ ॥ प्रयातुनोभवानग्रेदेवानामिवपावकिः ॥ वयंत्वामनु यास्यामःसौरभेयाइवर्षभम् ॥ १५ ॥ ॥ भीष्मउवाच ॥ ॥ एवमेतन्महाबाहोयथावदसिभारत ॥ यथैवहिभवंतोमेतथैवममपांडवाः ॥ १६ ॥ अपिचैवम याश्रेयोवाच्यतेषांनराधिप ॥ संयोद्धव्यंतवार्थायययामेसमयःकृतः ॥ १७ ॥ नतुपश्यामियोद्धारमात्मनःसदृशंभुवि ॥ ऋतेतस्मान्नरव्याघ्रात्कुंतीपुत्राद्धनंज यात् ॥ १८ ॥ सहिवेदमहाबुद्धिर्दिव्यान्यस्त्राण्यनेकशः ॥ नतुमांविदतोयुद्धेजातुयुध्येतपांडवः ॥ १९ ॥ अहंचैवक्षणेनैवनिर्मनुष्यमिदंजगत् ॥ कुर्यांशस्त्रबलेनै वससुरासुरराक्षसम् ॥ २० ॥ नत्वेवोत्सादनीयामेपांडोःपुत्राजनाधिप ॥ तस्माद्योधान्हनिष्यामिप्रयोगेणायुतंसदा ॥ २१ ॥ एवमेषांकरिष्यामिनिधनंकुरुनं दन ॥ नचेत्तेमांहनिष्यंतिपूर्वमेवसमागमे ॥ २२ ॥ सेनापतिस्त्वहंराजन्समयेनापरेणते ॥ भविष्यामियथाकामंतन्मेश्रोतुमिहार्हसि ॥ २३ ॥ कर्णोवायुध्यतां पूर्वमहंवापृथिवीपते ॥ स्पर्धतेहिसदात्यर्थंसूतपुत्रोमयारणे ॥ २४ ॥ ॥ कर्णउवाच ॥ ॥ नाहंजीवतिगांगेयेराजन्योत्स्येकथंचन ॥ हतेभीष्मेतुयोत्स्यामि सहगांडीवधन्वना ॥ २५ ॥ ॥ वैशंपायनउवाच ॥ ॥ ततःसेनापतिंचक्रेविधिवद्भूरिदक्षिणम् ॥ धृतराष्ट्रात्मजोभीष्मंसोभिषिक्तोव्यरोचत ॥ २६ ॥

॥ १६ ॥ १७ ॥ १८ ॥ विदतोविस्पष्टोभूत्वेत्यर्थः ॥ १९ ॥ २० ॥ नमेमयाउत्सादनीयानाशयितुंशक्याः सदाप्रत्यहम् ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

॥ २७ ॥ २८ ॥ पातयंतःमुच्छितानिकुर्वंतः ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ॥इतिउद्योगप०नैलकंठीयेभारतभावदीपेषट्पंचाशदधिकशततमोऽध्यायः ॥ १५६ ॥ ॥ ७ ॥

ततोभेरीश्चशंखांश्चशतशोथसहस्रशः॥ वादयामासुरव्यग्रावादकाराजशासनात् ॥ २७॥ सिंहनादाश्चविविधावाहनानांचनिःस्वनाः ॥ प्रादुरासन्नभश्चेव वर्षरुधिरकर्दमम् ॥ २८॥ निर्घाताःपृथिवीकंपागजबृंहितनिःस्वनाः॥ आसंश्चसर्वयोधानांपातयंतोमनांस्युत ॥ २९ ॥ वाचश्चाप्यशरीरिण्योदिवश्चोल्काःप्रपेदिरे ॥ शिवाश्चभयवेदिन्योनेदुर्दीप्ततराभृशम् ॥ ३० ॥ सैनापत्येयदाराजागांगेयमभिषिक्तवान् ॥ तदैतान्युग्ररूपाणिबभूवुःशतशोनृप ॥ ३१ ॥ ततःसेनापतिं कृत्वाभीष्मंपरबलार्दनम् ॥ वाचयित्वाद्विजश्रेष्ठान्गोभिर्निष्कैश्चभूरिशः॥ ३२॥ वर्धमानोजयाशीर्भिर्निर्ययौसैनिकैर्वृतः॥ आपगेयंपुरस्कृत्यभ्रातृभिःसहितस्तदा॥ ३३॥स्कंधावारेणमहताकुरुक्षेत्रंजगामह॥ ३४॥परिक्रम्यकुरुक्षेत्रंकर्णेनसहकौरवः॥ शिबिरंमापयामाससमेदेशेजनाधिप ॥ ३५॥मधुरानूषरेदेशेप्रभूतयवसेंधने ॥ यथैवहास्तिनपुरंतद्वच्छिबिरमाबभौ॥ ३६॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिसैन्यनिर्याणपर्वणिभीष्मसेनापत्येषट्पंचाशदधिकशततमोऽध्यायः॥ १५६ ॥ ॥ ७ ॥ ॥जनमेजयउवाच॥ ॥आपगेयंमहात्मानंभीष्मंशस्त्रभृतांवरम् ॥ पितामहंभारतानांध्वजंसर्वमहीक्षिताम्॥ १॥बृहस्पतिसमंबुद्ध्याक्षमयापृथिवीसमम्॥समुद्रमिवगांभीर्येहिमवंतमिवस्थिरम्॥ २॥प्रजापतिमिवौदार्येतेजसाभास्करोपमम्॥महेंद्रमिवशत्रूणांध्वंसनंशरदृष्टिभिः॥ ३॥रणयज्ञेप्रविततेसुभीमेलोमहर्षणे॥ दीक्षितंचिरराज्ञायश्रुत्वातत्रयुधिष्ठिरः॥ ४॥ किमब्रवीन्महाबाहुःसर्वशस्त्रभृतांवरः॥ भीमसेनार्जुनौवापिकृष्णोवाप्रत्यभाषत ॥ ५॥ ॥ वैशंपायनउवाच॥ ॥आपद्धर्मार्थकुशलोमहाबुद्धिर्युधिष्ठिरः॥ सर्वान्भ्रातॄन्समानीयवासुदेवंचशाश्वतम्॥ ६॥उवाचवदतांश्रेष्ठःसांत्वपूर्वमिदंवचः॥ पर्याक्रामतसैन्यानियत्तास्तिष्ठतदंशिताः॥ ७॥ पितामहेनवोयुद्धंपूर्वमेवप्रविष्यति॥ तस्मात्सप्तसुसेनासुप्रणेतॄन्समपश्यत॥ ८॥ ॥ कृष्णउवाच॥ ॥यथार्हतिभवान्वक्तुमस्मिन्कालेत्युपस्थिते॥ तथेदमर्थवद्वाक्यमुक्तंतेभरतर्षभ॥ ९॥ रोचतेमेमहाबाहोक्रियतांयदनंतरम्॥नायकास्तवसेनायांक्रियंतामिहसप्तवै॥ १०॥ ॥ वैशंपायनउवाच॥ ॥ततोद्रुपदमानाय्यविराटंशिनिपुंगवम्॥ धृष्टद्युम्नंचपांचाल्यंधृष्टकेतुंचपार्थिव॥ ११॥शिखंडिनंचपांचाल्यंसहदेवंचमागधम्॥ एतान्सप्तमहाभागान्वीरान्युद्धाभिकांक्षिणः॥ १२॥ सेनाप्रणेतॄन्विधिवदभ्यषिंचद्युधिष्ठिरः॥ सर्वसेनापतिंचात्रधृष्टद्युम्नंचकारह॥ १३॥ द्रोणांतहेतोरुत्पन्नोयइद्धाज्जातवेदसः॥सर्वेषामेवतेषांतुसमस्तानांमहात्मनाम्॥ १४॥ आपगेयमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५॥ ६ ॥ ७॥८॥९॥१०॥११॥१२॥१३॥इद्धाद्यग्नीमात्॥ १४ ॥

॥ १५ ॥ महात्ययंअत्यंतक्षयंकरम् ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ रौहिणेयोबलरामः ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ उपद्रुरेएकांते ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥

सेनापतिपतिंचक्रेगुडाकेशंधनंजयम्॥ अर्जुनस्यापिनेताचसंयंताचैववाजिनाम्॥ १५॥ संकर्षणानुजःश्रीमान्महाबुद्धिर्जनार्दनः॥ तद्दृष्ट्वोपस्थितंयुद्धंसमासन्नंमहात्ययम्॥ १६॥ प्राविशद्भवनंराजन्पांडवानांहलायुधः॥ सहाक्रूरप्रभृतिभिर्गदसांबोद्धवादिभिः॥ १७॥ रौक्मिणेयादुकसुतैश्चारुदेष्णपुरोगमैः॥ दृष्णिमुख्यैरधिगतैर्व्याघ्रैरिवबलोत्कटैः ॥ १८ ॥ अभिगुप्तोमहाबाहुर्मरुद्भिरिववासवः ॥ नीलकौशेयवसनःकैलासशिखरोपमः ॥ १९ ॥ सिंहखेलगतिःश्रीमान्मदरक्तांतलोचनः॥ तंदृष्ट्वाधर्मराजश्चकेशवश्चमहाद्युतिः॥ २० ॥ उदतिष्ठत्ततःपार्थोभीमकर्मावृकोदरः॥ गांडीवधन्वायेचान्येराजानस्तत्रकेचन ॥ २१ ॥ पूजयांचक्रिरेतेवैसमायांतंहलायुधम्॥ ततस्तंपांडवोराजाकरेपस्पर्शपाणिना॥ २२॥ वासुदेवपुरोगास्तंसर्वएवाभ्यवादयन्॥ विराट्द्रुपदौवृद्धावभिवाद्यहलायुधः॥ २३॥ युधिष्ठिरेणसहितउपाविशदरिंदमः॥ ततस्तेषूपविष्टेषुपार्थिवेषुसमंततः॥ वासुदेवमभिप्रेक्ष्यरौहिणेयोभ्यभाषत॥ २४॥ भवितायंमहारौद्रोदारुणःपुरुषक्षयः॥ दिष्टमेतद्ध्रुवंमन्येनशक्यमतिवर्तितुम्॥ २५॥ तस्माद्युद्धात्समुत्तीर्णानपिवःससुहृज्जनान्॥ अरोगानक्षतैर्देहैर्दृष्टास्मीतिमतिर्मम॥ २६॥ समेतंपार्थिवंक्षत्रंकालपक्वमसंशयम् ॥ विमर्दश्चमहान्भावीमांसशोणितकर्दमः ॥ २७॥ उक्तोमयावासुदेवःपुनःपुनरुपद्धरे ॥ संबंधिषुसमांवृत्तिर्वर्तस्वमधुसूदन॥ २८॥ पांडवाहियथास्माकंतथादुर्योधनोनृपः॥ तस्यापिक्रियतांसाह्यंसपर्येतिपुनःपुनः॥ २९॥ तच्चमेनाकरोद्वाक्यंत्वदर्थेमधुसूदनः॥ निर्विण्णःसर्वभावेनधनंजयमवेक्ष्यह॥ ३०॥ ध्रुवोजयःपांडवानामितिमेनिश्चितामतिः॥ तथाप्यभिनिवेशोयंवासुदेवस्यभारत॥ ३१॥ नचाहमुत्सहेकृष्णस्तेलोकमुदीक्षितुम्॥ ततोहमनुवर्तामिकेशवस्यचिकीर्षितम्॥ ३२॥ उभौशिष्यौहिमेवीरौगदायुद्धविशारदौ॥ तुल्यस्नेहोस्म्यतोभीमेतथादुर्योधनेनृपे॥ ३३॥ तस्माद्यास्यामितीर्थानिसरस्वत्यानिषेवितुम्॥ नहिशक्ष्यामिकौरव्यान्नश्यमानानुपेक्षितुम्॥ ३४॥ एवमुक्तामहाबाहुरनुज्ञातश्चपांडवैः॥ तीर्थयात्रांययौरामोनिवर्त्यमधुसूदनम्॥३५॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिसैन्यनिर्याणपर्वणिबलरामतीर्थयात्रागमनेसप्तपंचाशदधिकशततमोऽध्यायः॥ १५७॥ ॥ ७ ॥

॥ वैशंपायनउवाच॥ ॥ एतस्मिन्नेवकालेतुभीष्मकस्यमहात्मनः ॥ हिरण्यरोम्णोनृपतेःसाक्षादिंद्रसखस्यवै ॥ १ ॥

॥ ३३ ॥ ३४ ॥ ३५ ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेसप्तपंचाशदधिकशततमोऽध्यायः ॥ १५७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ एतस्मिन्निति साक्षात्तुत्रइतिसंबंधः ॥ १ ॥

आकृतीनांसंकल्पानां सत्यसंकल्पइत्यर्थः ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ गौरवान्आवर्ततेमयान् यैरिदानींशार्ङ्गधनुषिज्याक्रियते ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

आकूतीनामधिपतिर्भोजस्यातियशस्विनः ॥ दाक्षिणात्यपतेःपुत्रोदिक्षुरुक्मीतिविश्रुतः ॥ २ ॥ यःकिंपुरुषसिंहस्यगंधमादनवासिनः ॥ कृत्स्नंशिष्योधनुर्वेदं चतुष्पादमवाप्तवान् ॥ ३ ॥ योमाहेंद्रंधनुर्लेभेतुल्यंगांडीवतेजसा ॥ शार्ङ्गंचमहाबाहुःसम्मितंदिव्यलक्षणम् ॥ ४ ॥ त्रीण्येवैतानिदिव्यानिधनूंषिदिविचारिणाम् ॥ वारुणंगांडिवंतत्रमाहेंद्रंविजयंधनुः ॥ शार्ङ्गंतुवैष्णवंप्राहुर्दिव्यंतेजोमयंधनुः ॥ ५ ॥ धारयामासतत्कृष्णःपरसेनाभयावहम् ॥ गांडीवंपावकाल्लेभेखांडवेपाकशासनिः ॥ ६ ॥ द्रुमाद्रुक्मीमहातेजाविजयंप्रत्यपद्यत ॥ संछिद्यमौरवान्पाशान्निहत्यमुरुमोजसा ॥ ७ ॥ निर्जित्यनरकंभौममाहृत्यमणिकुंडले ॥ षोडशस्त्रीसहस्राणिरत्नानिविविधानिच ॥ ८ ॥ प्रतिपेदेदृषीकेशःशार्ङ्गंचधनुरुत्तमम् ॥ रुक्मीतुविजयंलब्ध्वाधनुर्मेघनिभस्वनम् ॥ ९ ॥ विभीषयन्निवजगत्पांडवानभ्यवर्तत ॥ नाशृण्वतपुरायोसौस्ववाहुबलगर्वितः ॥ १० ॥ रुक्मिण्याहरणंवीरोवासुदेवेनधीमता ॥ कृत्वाप्रतिज्ञांनाहत्वानिवर्तिष्येजनार्दनम् ॥ ११ ॥ ततोन्वधावद्वार्ष्णेयंसर्वशस्त्रभृतांवरः ॥ सेनयाचतुरंगिण्यामहत्यादूरपातया ॥ १२ ॥ विचित्रायुधवर्मिण्यागंगयेवप्रवृद्धया ॥ ससमासाद्यवार्ष्णेयंयोगानामीश्वरं प्रभुं ॥ १३ ॥ व्यंसितोव्रीडितोराजन्नाजगामसकुंडिनम् ॥ यत्रैवरुक्ष्मिणेनरणेनिर्जितःपरवीरहा ॥ १४ ॥ तत्रभोजकटंनामकृतंनगरमुत्तमम् ॥ सैन्येनमहतातेनप्रभूतगजवाजिना ॥ १५ ॥ पुरंतद्भुविविख्यातंनाम्नाभोजकटंनृप ॥ सभोजराजःसैन्येनमहतापरिवारितः ॥ १६ ॥ अक्षौहिण्यामहावीर्यःपांडवान्क्षिप्रमागमत् ॥ ततःसकवचीधन्वीतलीखड्गीशरासनी ॥ १७ ॥ ध्वजेनादित्यवर्णेनप्रविवेशमहाचमूम् ॥ विदितःपांडवेयानांवासुदेवप्रियेप्सया ॥ १८ ॥ युधिष्ठिरस्तुतंराजाप्रत्युद्गम्याभ्यपूजयत् ॥ सपूजितःपांडुपुत्रैर्यथान्यायंसुसंस्तुतः ॥ १९ ॥ प्रतिगृह्यतुतान्सर्वान्विश्रांतःसहसैनिकः ॥ उवाचमध्येवीराणांकुंतीपुत्रंधनंजयं ॥ २० ॥ सहायोस्मिस्थितोयुद्धेयदिभीतोसिपांडव ॥ करिष्यामिरणेसाह्यमसह्यंतवशत्रुभिः ॥ २१ ॥ नहिमेविक्रमेतुल्यःपुमानस्तीहकश्चन ॥ हनिष्यामिरणेभागंयन्मेदास्यसिपांडव ॥ २२ ॥ अपिद्रोणकृपौवीरौभीष्मकर्णावथोपुनः ॥ अथवासर्वएवैतेतिष्ठंतुवसुधाधिपाः ॥ २३ ॥ निहत्यसमरेशत्रूंस्तवदास्यामिमेदिनीं ॥ इत्युक्तोधर्मराजस्यकेशवस्यचसंनिधौ ॥ २४ ॥ शृण्वतांपार्थिवेंद्राणामन्येषांचैवसर्वशः ॥ वासुदेवमभिप्रेक्ष्यधर्मराजंचपांडवम् ॥ २५ ॥ उवाचधीमान्कौंतेयःप्रहस्यसखिपूर्वकम् ॥ कौरवाणांकुलेजातःपांडोःपुत्रोविशेषतः ॥ २६ ॥

॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

द्रोणंअयंममगुरुरितिव्यपदिशन्कथयन् ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ उपजीव्यआराध्य रणेयुद्धनिमित्तम् ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ॥ इतिउद्योगप० नैलकंठीयेभारतभावदी

द्रोणंव्यपदिशन्शिष्योवासुदेवसहायवान् ॥ भीतोस्मीतिकथंब्रूयांदधानोगांडिवंधनुः ॥ २७ ॥ युध्यमानस्यमेवीरगंधर्वैःसुमहाबलैः ॥ सहायोघोषयात्रायांकस्तदासीत्सखामम ॥ २८ ॥ तथाप्रतिभयेतस्मिन्देवदानवसंकुले ॥ खांडवेयुध्यमानस्यकःसहायस्तदाभवत् ॥ २९ ॥ निवातकवचैर्युद्धेकालकेयैश्चदानवैः ॥ तत्रमेयुध्यमानस्यकःसहायस्तदाभवत् ॥ ३० ॥ तथाविराटनगरेकुरुभिःसहसंगरे ॥ युध्यतोबहुभिस्तत्रकःसहायोऽभवन्मम ॥ ३१ ॥ उपजीव्यरणेरुद्रंशक्रंवैश्रवणंयमम् ॥ वरुणंपावकंचैवकृपंद्रोणंचमाधवम् ॥ ३२ ॥ धारयन्गांडिवंदिव्यंधनुस्तेजोमयंदृढम् ॥ अक्ष्यय्यशरसंयुक्तोदिव्यास्त्रपरिबृंहितः ॥ ३३ ॥ कथमस्मद्विधोब्रूयाद्भीतोस्मीतियशोहरम् ॥ वचनंनरशार्दूलवज्रायुधमपिस्वयं ॥ ३४ ॥ नास्मिभीतोमहाबाहोसहायार्थश्चनास्तिमे ॥ यथाकामंययायोगंगच्छवान्यत्रतिष्ठवा ॥ ३५ ॥ विनिवर्त्यततोरुक्मीसेनांसागरसंनिभाम् ॥ दुर्योधनमुपागच्छत्तथैवभरतर्षभ ॥ ३६ ॥ तथैवचाभिगम्यैनमुवाचवसुधाधिपः ॥ प्रत्याख्यातश्चतेनापिसतदाशूरमानिना ॥ ३७ ॥ द्वावेवतुमहाराजतस्माद्युद्धादपेयतुः ॥ रौहिणेयश्चवार्ष्णेयोरुक्मीचवसुधाधिपः ॥ ३८ ॥ गतेरामेतीर्थयात्रांभीष्मकस्यसुतेतथा ॥ उपाविशन्पांडवेयामंत्रायपुनरेवच ॥ ३९ ॥ समितिर्धर्मराजस्यसापार्थिवसमाकुला ॥ शुशुभेतारकैश्चित्राद्यौश्चंद्रेणवभारत ॥ ४० ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिसैन्यनिर्याणपर्वणिरुक्मिप्रत्याख्यानेअष्टपंचाशदधिकशततमोऽध्यायः ॥ १५८ ॥ ॥ ७ ॥ ॥ जनमेजयउवाच ॥ ॥ तथाव्यूढेष्वनीकेषुकुरुक्षेत्रेद्विजर्षभ ॥ किमकुर्वंश्चकुरवःकालेनाभिप्रचोदिताः ॥ १ ॥ ॥ वैशंपायनउवाच ॥ ॥ तथाव्यूढेष्वनीकेषुयत्तेषुभरतर्षभ ॥ धृतराष्ट्रोमहाराजसंजयंवाक्यमब्रवीत् ॥ २ ॥ एहिसंजयसर्वंमेआचक्ष्वानवशेषतः ॥ सेनानिवेशेयद्दृत्तंकुरुपांडवसेनयोः ॥ ३ ॥ दिष्टमेवपरंमन्येपौरुषंचाप्यनर्थकम् ॥ यद्हंबुध्यमानोपियुद्धदोषान्क्षयोदयान् ॥ ४ ॥ तथापिनिकृतिप्रज्ञंपुत्रंदुर्यूतदेविनम् ॥ नशक्नोमिनियंतुंवाकर्तुंवाहितमात्मनः ॥ ५ ॥ भवत्येवहिमेसूतबुद्धिर्दोषानुदर्शिनी ॥ दुर्योधनंसमासाद्यपुनःसापरिवर्तते ॥ ६ ॥ एवंगतेवैयद्भावितद्भविष्यतिसंजय ॥ क्षत्रधर्मःकिलरणेतनुत्यागोहिपूजितः ॥ ७ ॥ ॥ संजयउवाच ॥ त्वयुक्तोयमनुप्रश्नोमहाराजयथेच्छसि ॥ नतुदुर्योधनेदोषमिममाधातुमर्हसि ॥ ८ ॥

पेअष्टपंचाशदधिकशततमोऽध्यायः ॥ १५८ ॥ ॥ ७ ॥ ॥ तथेति ॥ १ ॥ २ ॥ ३ ॥ क्षयस्यैवउदयोयेभ्यस्तान्क्षयोदयान् ॥ ४ ॥ निकृतिप्रज्ञंकपटविषयैवप्रज्ञानधर्मविषयायस्यतम् ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

एनसादोषेणदेवान्कालंवागंतुंउपालब्धुंनार्हति दृष्टेसंभवत्यदृष्टकल्पनायाअन्याय्यत्वाद्दृष्टापराधाभावेदेवत्यकालत्यवाउपालंभःकर्तुमुचितोननुतस्मिन्सतीत्यर्थः नसकालंनवादेवंवकुमेतदिहार्हतीतिपाठेप्ययमेवार्थः ॥ ९ ॥ १० ॥ निकाराःतिरस्काराः ॥ ११ ॥ वैशसंवैरं समरेनिमित्ते ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेऊनषष्ट्यधिकशततमोऽध्यायः ॥१५९॥

शृणुष्वानवशेषेणवदतोममपार्थिव ॥ यआत्मनोदुश्चरितादशुभंप्राप्नुयान्नरः ॥ नसकालंनवादेवानेनसागंतुमर्हति ॥ ९ ॥ महाराजमनुष्येषुनिंद्यंयःसर्वमाचरेत् ॥ सवध्यःसर्वलोकस्यनिंदितानिसमाचरन् ॥ १० ॥ निकारामनुजश्रेष्ठपांडवैस्त्वत्प्रतीक्षया ॥ अनुभूताःसहामात्यैर्निकृतैरधिदेवने ॥ ११ ॥ हयानांचगजानांचराज्ञांचामिततेजसाम् ॥ वैशसंसमरेवृत्तंयत्तन्मेशृणुसर्वशः ॥ १२ ॥ स्थिरोभूत्वामहाप्राज्ञसर्वलोकक्षयोदयम् ॥ यथाभूतंमहायुद्धेश्रुत्वाचैकमनाभव ॥ १३ ॥ नत्वेवकर्तापुरुषःकर्मणोःशुभपापयोः ॥ अस्वतंत्रोहिपुरुषःकार्यतेदारुयंत्रवत् ॥ १४ ॥ केचिदीश्वरनिर्दिष्टाःकेचिद्देवयदृच्छया ॥ पूर्वकर्मभिरप्यन्येत्रैधमेतत्प्रदृश्यते ॥ तस्मादनर्थमापन्नःस्थिरोभूत्वानिशामय ॥ १५ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिसैन्यनिर्याणपर्वणिसंजयवाक्येऊनषष्ट्यधिकशततमोऽध्यायः ॥ १५९ ॥ ॥ समाप्तंचसैन्यनिर्याणपर्व ॥ ॥ ७ ॥ ॥ अथउलूकदूतागमनपर्व ॥ ॥ संजयउवाच ॥ ॥ हिरण्वत्यांनिविष्टेषुपांडवेषुमहात्मसु ॥ न्यविशंतमहाराजकौरवेययथाविधि ॥ १ ॥ तत्रदुर्योधनोराजानिवेश्यबलमोजसा ॥ संमानयित्वानृपतीन्न्यस्यगुल्मांस्तथैवच ॥ २ ॥ आरक्षस्यविधिंकृत्वायोधानांतत्रभारत ॥ कर्णंदुःशासनंचैवशकुनिंचापिसौबलम् ॥ ३ ॥ आनाय्यनृपतिस्तत्रमंत्रयामासभारत ॥ तत्रदुर्योधनोराजाकर्णेनसहभारत ॥ ४ ॥ संभाषित्वाचकर्णेनभ्रात्राद्दुःशासनेनच ॥ सौबलेनचराजेंद्रमंत्रयित्वानरर्षभ ॥ ५ ॥ आहूयोपह्वरेराजन्नुलूकमिदमब्रवीत् ॥ उलूकगच्छकैतव्यपांडवान्सहसोमकान् ॥ ६ ॥ गत्वाममवचोब्रूहिवासुदेवस्यशृण्वतः ॥ इदंतत्समनुप्राप्तंवर्षपूगाभिचिंतितम् ॥ ७ ॥ पांडवानांकुरूणांचयुद्धंलोकभयंकरम् ॥ यदेतत्कत्थनावाक्यंसंजयोमहदब्रवीत् ॥ ८ ॥ वासुदेवसहायस्यगर्जतःसानुजस्यते ॥ मध्येकुरूणांकौंतेयतस्यकालोयमागतः ॥ ९ ॥ यथावःसंप्रतिज्ञातंतत्सर्वंक्रियतामिति ॥ ज्येष्ठंतथैवकौंतेयंब्रूयास्त्वंवचनान्मम ॥ १० ॥ भ्रातृभिःसहितःसर्वैःसोमकैश्चसकेकयैः ॥ कथंवाधार्मिकोभूत्वात्वमधर्मेमनःकृथाः ॥ ११ ॥

हिरण्वत्यामिति ॥ १ ॥ गुल्मान्सैन्यान् ॥ २ ॥ आरक्षस्यरक्षणीयस्यद्रव्यादेःविधिरक्षाविधानं आरक्षंरक्षणीयेस्यादितिविश्वः ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ कत्थनावाक्यंआत्मप्रशंसनम् ॥ ८ ॥ ९ ॥ संप्रतिज्ञातंद्युःशासनरुधिरपानादि ॥ १० ॥ भ्रातृभिःसहितःकथमधर्मेमनःकृथाइतिसंबंधः ॥ ११ ॥

दातादास्यसिपारिव्राज्यंकरिष्यसीत्यर्थः ॥ १२ ॥ १३ ॥ भोसुराइतिदेवान्प्रह्लादःसंबोधयति यस्यव्रतस्यधर्मध्वजोधर्मचिह्नंदंभपवित्रपाणित्वादि उच्छ्रितःसर्वलोकविदितः ॥ १४ ॥ १५ ॥ १६ ॥ मनःशुद्धिंहिसातोनिवृत्तिम् ॥ १७ ॥ विश्रंभंविश्वासम् ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ बहवश्चतेमित्राणिचेतिबहुमित्राः बहुमित्राइत्यपिपाठः वृद्धाश्चबालाश्चतेषांसमाहारोवृद्धबालंतस्य ॥ २२ ॥ २३ ॥ २४ ॥

यइच्छसिजगत्सर्वंनस्यमानंनृशंसवत् ॥ अभयंसर्वभूतेभ्योदातात्वमितिमेमतिः ॥ १२ ॥ श्रूयतेहिपुरागीतःश्लोकोयंभरतर्षभ ॥ प्रह्लादेनाथभद्रंतेवृत्तेराज्येतुदैवतैः ॥ १३ ॥ यस्यधर्मध्वजोनित्यंसुराध्वजइवोच्छ्रितः ॥ प्रच्छन्नानिचपापानिवैडालंनामतद्व्रतम् ॥ १४ ॥ अत्रतेवर्तयिष्यामिआख्यानमिदमुत्तमम् ॥ कथितंनारदेनेहपितुर्ममनराधिप ॥ १५ ॥ मार्जारःकिलदुष्टात्मानिश्चेष्टःसर्वकर्मसु ॥ ऊर्ध्वबाहुःस्थितोराजन्गंगातीरेकदाचन ॥ १६ ॥ सवैकृत्वामनःशुद्धिंप्रत्ययार्थंशरीरिणाम् ॥ करोमिधर्ममित्याहसर्वानेवशरीरिणः ॥ १७ ॥ तस्यकालेनमहतावि श्रंभंजग्मुरंडजाः ॥ समेत्यचप्रशंसंतिमार्जारंतंविशांपते ॥ १८ ॥ पूज्यमानस्तुतैःसर्वैःपक्षिभिःपक्षिभोजनः ॥ आत्मकार्यकृतंमेनेचर्यायाश्चकृतंफलम् ॥ १९ ॥ अथदीर्घस्यकालस्यतद्देशंमूषिकाययुः ॥ ददृशुस्तंचतेतत्रधार्मिकंव्रतचारिणम् ॥ २० ॥ कार्येणमहतायुक्तंदंभयुक्तेनभारत ॥ तेषांमतिरियंराजन्नासीत्तत्रविनिश्चये ॥ २१ ॥ बहुभिर्नावयंसर्वेतेषांनोमातुलोत्ययम् ॥ रक्षांकरोतुसततंवृद्धबालस्यसर्वशः ॥ २२ ॥ उपगम्यतुतेसर्वेविडालमिदमब्रुवन् ॥ भवत्प्रसादादिच्छामश्चर्तुंचैवयथासुखम् ॥ २३ ॥ भवान्नोगतिरव्यग्राभवान्नःपरमःसुहृत् ॥ तेवयंसहिताःसर्वेभवंतंशरणंगताः ॥ २४ ॥ भवान्धर्मपरोनित्यंभवान्धर्मेव्यवस्थितः ॥ सनोरक्षमहाप्रज्ञत्रिदशानिववज्रभृत् ॥ २५ ॥ एवमुक्तस्तुतैःसर्वैर्मूषिकैःसविशांपते ॥ प्रत्युवाचततःसर्वान्मूषिकान्मूषिकांतकृत् ॥ २६ ॥ द्वयोर्योगंनपश्यामितपसोरक्षणस्यच ॥ अवश्यंतुमयाकार्यंवचनंभवतांहितम् ॥ २७ ॥ युष्माभिरपिकर्तव्यंवचनंममनित्यशः ॥ तपसास्मिपरिश्रांतोदृढंनियममास्थितः ॥ २८ ॥ नचापिगमनेशक्तिंकांचित्पश्यामिचिंतयन् ॥ सोस्मिनेयःसदातातानदीकुलमितःपरम् ॥ २९ ॥ तथेतितंप्रतिज्ञायमूषिकाभरतर्षभ ॥ वृद्धबालमथोसर्वंमार्जारायन्यवेदयन् ॥ ३० ॥ ततःसपापोदुष्टात्मामूषिकानथभक्षयन् ॥ पीवरश्चसुवर्णश्चदृढबंधश्चजायते ॥ ३१ ॥ मूषिकाणांगणश्चात्रभृशंसंक्षीयतेऽथसः ॥ मार्जारोवर्धतेचापितेजोबलसमन्वितः ॥ ३२ ॥ ततस्तेमूषिकाःसर्वेसमेत्यान्योन्यमब्रुवन् ॥ मातुलोवर्धतेनित्यंवयंक्षीयामहेभृशम् ॥ ३३ ॥ ततःप्राज्ञतमःकश्चिद्विंडिकोनाममूषिकः ॥ अब्रवीद्वचनंराजन्मूषिकाणांमहागणम् ॥ ३४ ॥ गच्छतांवोनदीतीरंसहितानांविशेषतः ॥ पृष्ठतोहंगमिष्यामिसहैवमातुलेनतु ॥ ३५ ॥ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥

॥ ३६ ॥ ३७ ॥ ३८॥ शिखाशाखाअग्निरस्यापिमित्रभावरूपेपक्षांतरं कृतास्त्रीकृताशिखाशाखावर्हिचूडेतिशाखापक्षांतरेवाहाविनिचमेदिनी॥३९॥गणश्चमूपिकाणाम्॥४०॥४१॥४२॥४३॥इदंलक्ष्य अजातशत्रुत्वरूपं धर्मिष्ठोसीत्युपहासः ॥ ४४ ॥ ४५ ॥ प्रमार्जप्रमार्जय॥४६॥४७॥४८॥४९॥५०॥॥५१॥५२॥५३॥५४ ॥इंद्रजालंप्रसिद्धंमायाछलंकुहकाकल्याप्रतिगर्जनाःविपरीतंकोपंवहंतिप्रापयं

साधुसाध्वितितेसर्वेपूजयांचक्रिरेतदा॥ चक्रुश्चैवयथान्यायंडिंडिकस्यवचोर्थवत् ॥ ३६ ॥ अविज्ञानात्ततःसोथडिंडिकंद्युपभुक्तवान् ॥ ततस्तेसहिताःसर्वेमंत्रयामासुरंजसा॥ ३७॥ तत्रवृद्धतमःकश्चित्कोलिकोनाममूषिकः॥ अब्रवीद्वचनंराजन्ज्ञातिमध्येयथातथम्॥ ३८॥ नमातुलोधर्मकामश्छद्मनात्रंकृताशिखा॥ नमूलफलभक्षस्यविघ्नाभवतिलोमशा ॥ ३९॥ अस्यगात्राणिवर्धंतेगणश्चपरिहीयते॥ अद्यप्रभृतिदिवसान्डिंडिकोपिनदृश्यते॥४०॥ एतच्छ्रुत्वावचः सर्वेमूषिकाविप्रदुद्रुवुः॥ बिडालोपिसदुष्टात्माजगामैवयथागतम्॥४१॥तथात्वमपिदुष्टात्मन्बिडालंव्रतमास्थितः॥ चरसिज्ञातिपुंसदाबिडालोमूषिकेष्विव ॥ ४२॥ अन्यथाकिलतेवाक्यमन्यथाकर्मदृश्यते॥ दंभनार्थायलोकस्यवेदाश्चोपशमश्चते॥ ४३॥ त्यक्ताऽग्नित्विदंराजन्क्षत्रधर्मसमाश्रितः॥ कुरुकार्याणि सर्वाणिधर्मिष्ठोसिनरर्षभ॥ ४४॥ बाहुवीर्येणपृथिवींलब्ध्वाभरतसत्तम॥ देहिदानंद्विजातिभ्यःपितृभ्यश्चययोचितम्॥ ४५॥ क्लिष्टायावर्षपूगांश्चमातुर्मातृहितेस्थितः॥ प्रमार्जाश्रुरणेजित्वासंमानंपरमावह॥ ४६॥ पंचग्रामाद्तायन्नान्नास्माभिरपवर्जिताः॥ युध्यामहेकथंसंख्येकोपयेमचपांडवान्॥ ४७॥ त्वत्कृतेदुष्टभावस्यसंत्यागोविदुरस्यच॥ जातुपेचगृहेदाहंस्मरतंपुरुषोभव॥ ४८॥ यच्चकृष्णमवोचस्त्वमायांतंकुरुसंसदि॥ अयमस्मिस्थितोराजन्शमायसमरायच॥ ४९॥ तस्यायमागतःकालःसमरस्यनराधिप॥ एतदर्थमयासर्वंकृतमेतद्युधिष्ठिर॥ ५०॥ किंनुयुद्धात्परंलाभंक्षत्रियोवहुमन्यते॥ किंचत्वंक्षत्रिय कुलेजातःसंप्रथितोभुवि॥ ५१॥ द्रोणादस्त्राणिसंप्राप्यकृपाच्चभरतर्षभ॥ तुल्ययोनौसमबलेवासुदेवंसमाश्रितः॥ ५२॥ ब्रूयास्त्वंवासुदेवंचपांडवानांसमीपतः॥ आत्मार्थंपांडवार्थंचयत्तोमांप्रतियोधय॥ ५३॥ सभामध्येचयद्रूपंमाययाकृतवानसि॥ तत्तथैवपुनःकृत्वासार्जुनोमामभिद्रव॥ ५४॥ इंद्रजालंचमायांवैकुहकावापिभीषणां॥ आत्तशस्त्रस्यसंग्रामेवहंतिप्रतिगर्जनाः॥ ५५॥ वयमप्युत्सहेमद्यांखंचगच्छेममायया॥ रसातलंविशामोपिऐंद्रंवापुरमेवतु ॥ ५६॥ दर्शयेमचरूपाणिस्वशरीरेबहून्यपि॥ नतुपर्यायतःसिद्धिर्बुद्धिमान्प्राप्नोतिमानुषीं॥ ५७॥

तिननुभयंजनयंतीत्यर्थः गर्जनंनिनदंकोपइतिमेदिनी ॥ ५५ ॥ ५६॥ पर्यायतःपर्यायोभयपदर्शनादिरूपःप्रकारस्तेनसिद्धिःस्वस्यनतुभवति तथापरोपितेनबुद्धिमानुषींभयाल्लिकांनप्राप्नोति ॥ ५७ ॥

यतोमनसैवईश्वरेणैववयंवशेकर्तव्यानत्वादृशैर्विभीषिकयेतिभावः पूर्वश्लोकेनत्वित्यत्रनन्विति पाठेपर्यायतःक्रमतःभावस्तुसएव पर्यायःप्रकारेवसरेक्रमेइतिमेदिनी ॥ ५८ ॥ आचचक्षेआख्यातवान् ॥५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ सश्मंगकाःश्मंगपुंस्त्वचिह्नंश्मश्रुलत्वलिंगवत्त्वादिकंतत्सहिताःषंढाःनिर्वीर्याःसंति येषुतवशौर्यंप्रख्यातमितिभावः॥ ६३॥ तूवरकंतूबरःप्रौढश्मंगोनड्वान्तत्तुल्यं तूपरइतिपाठे

मनसैवहिभूतानिधातैवकुरुतेवशे॥यद्ब्रवीषिचवार्ष्णेयधार्तराष्ट्रानहंरणे॥ ५८॥ घातयित्वाप्रदास्यामिपार्थेभ्योराज्यमुत्तमम्॥आचचक्षेचमेसर्वंसंजयस्तवभाषितम्॥ ५९॥ मद्वितीयेनपार्थेनवैरंवःसव्यसाचिना॥ससत्यसंगरोभूत्वापांडवार्थेपराक्रमी॥ ६०॥ युध्यस्वाद्यरणेयत्तःपश्यामःपुरुषोभव॥यस्तुशत्रुमभिज्ञायशुद्धंपौरुषमास्थितः॥ ६१॥ करोतिद्विषतांशोकंसजीवतिसुजीवितम्॥ अकस्माच्चैवतेकृष्णख्यातंलोकेमहद्यशः॥ ६२॥ अद्येदानींविजानीमःसंतिषंढाःसश्मंगकाः॥ मद्विधोनापिनृपतिस्त्वयियुक्तःकथंचन॥ ६३॥ सन्नाहंसंयुगेकर्तुंकसभृत्येविशेषतः॥तंचतूबरकंबालंबह्वाशिनमविद्यकम्॥ ६४॥ उलूकमद्यचोब्रूहि असकृद्भीमसेनकम्॥विराटनगरेपार्थयस्त्वंसूदोत्यभूःपुरा॥ ६५॥ बल्लवोनामविख्यातस्तन्ममैवहिपौरुषम्॥ प्रतिज्ञातंसभामध्येनतन्मिथ्यात्वयापुरा॥ ६६॥ दुःशासनस्यरुधिरंपीयतांयदिशक्यते॥ यद्ब्रवीषिचकौंतेयधार्तराष्ट्रानहंरणे॥ ६७॥ निहनिष्यामितरसातस्यकालोयमागतः॥ त्वंहिभोज्येपुरस्कार्योभक्ष्यपेयेचभारत॥ ६८॥ कयुद्धंकचभोक्तव्यंयुध्यस्वपुरुषोभव॥ शयिष्यसेहतोभूमौगदामालिंग्यभारत॥ ६९॥ तद्यथाचसभामध्येवल्गितंतेवृकोदर॥उलूकनकुलंब्रूहिवचनान्ममभारत॥ ७०॥युध्यस्वाद्यस्थिरोभूत्वापश्यामस्तवपौरुषम्॥युधिष्ठिरानुरागंचद्वेषंचमयिभारत॥कृष्णायाश्चपरिक्लेशंस्मरेदानींयथातथं॥ ७१॥ ब्रूयास्त्वंसहदेवंचराजमध्येवचोममम॥ युध्येदानींरणेयत्तःक्लेशान्स्मरचपांडव॥ ७२॥ विराटद्रुपदौचोभौब्रूयास्त्वंवचनान्मम॥ नदृष्टपूर्वाभर्तारोभृत्यैरपिमहागुणैः॥ ७३॥ तथार्थपतिभिर्भृत्यायतःसृष्टाःप्रजास्ततः॥ अश्लाघ्योयंनरपतिर्युवयोरितिचागतम्॥ ७४॥ तेयूयंसंहताभूत्वातद्वधार्थंममापिच॥आत्मार्थंपांडवार्थंचप्रयुध्यध्वंमयासह॥ ७५॥ धृष्टद्युम्नंचपांचाल्यंब्रूयास्त्वंवचनान्मम॥ एषतेसमयःप्राप्तोलब्ध्यश्चत्वयापिसः॥ ७६॥

पिसएवार्थः अश्मश्रुपुरुषमित्यन्ये तूबरोऽश्मश्रुपुरुषेप्रौढश्मंगानड्वत्सयोतिमेदिनी तेषांभीमसेनोनिःश्मश्रुकइतिकल्पनाभवति अश्वोऽजस्तूपरोगोश्मगइतिप्राजापत्याइतिश्रुतौअश्वादिसाहचर्यात्तूपरोपिशुरेव अविद्यकंमूढम् ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ मद्दृष्टेति भर्तारःराजानः ॥ ७३ ॥ अर्थपतिभीराजभिः यतःकालात्ततआरभ्येत्यर्थः मूढायूयंमयिगुणवतिस्वामिनिसंतुष्टाःस्थमूढश्चयुधिष्ठिरोभवद्दादिषुनिर्गुणेष्वपितुष्यतीतिभावः ॥ ७४ ॥ तत्तस्माद्धेतोरमंमवधार्थंचप्रयुध्यध्वमितिसंबंधः ॥ ७५ ॥ ७६ ॥

पापंकर्मकुरुगुरुवधारूप्यं स्वार्थमितिपाठेदुष्करपदादेवायमर्थोज्ञेयः ससुहृत्परार्थमितिपाठेतुक्रियाविशेषणमिदं सुहृद्भिःपार्थैश्चसहितंयथास्यात्तथायुध्यस्वेत्यर्थः अयमेवमूलपाठइतिभाति ॥७७॥ ७८॥ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ राज्यमाक्रम्यमादृशइतिशेषः ॥ ८५ ॥ अकर्मणाअयुद्धेनकथंतेनत्वंप्रशंसामात्रेण ॥ ८६ ॥ स्थानंस्थितिंतत्स्थानराज्ययोरुद्धरणंपौरुषंपुरुषकर्मकुरु

द्रोणमासाद्यसमरेज्ञास्यसेहितमुत्तमम्॥युध्यस्वससुहृत्पापंकुरुकर्मसुदुष्करम्॥७७॥शिखंडिनमथोबूहिउलूकवचनान्मम॥स्रीतिमत्वामहाबाहुर्नहनिष्यति कौरवः ॥७८॥ गांगेयोधन्विनांश्रेष्ठोयुध्येदानींसुनिर्भयः॥ कुरुकर्मरणेयत्तःपश्यामःपौरुषंतव ॥७९॥ एवमुक्ताततोराजाप्रहस्योलूकमब्रवीत्॥ धनंजयंपुनर्बूहिवासुदेवस्यशृण्वतः॥८०॥ अस्मान्वात्वंपराजित्यप्रशाधिपृथिवीमिमां॥अथवानिर्जितोस्माभीरणेवीरशयिष्यसि॥८१॥राष्ट्रान्निर्वासनक्लेशंवनवा संचपांडव॥ कृष्णायाश्चपरिक्लेशंसंस्मरन्पुरुषोभव॥८२॥ यदर्थंक्षत्रियासूतेसर्वंतदिदमागतम्॥ बलंवीर्यंचशौर्यंचपरंचाप्यस्रलाघवम्॥८३॥पौरुषंदर्शय न्युद्देकोपस्यंकुरुनिष्कृतिं॥ परिक्लिष्टस्यदीनस्यदीर्घकालोषितस्यच ॥ हृदयंकस्यनस्फोटेद्दैश्वर्याद्भ्रंशितस्यच॥८४॥ कुलेजातस्यशूरस्यपरवित्तेष्वगृध्यतः॥ आस्थितंराज्यमाक्रम्यकोपंकस्यनदीपयेत्॥८५॥ यत्तदुक्तंमहद्वाक्यंकर्मणातद्विभाव्यताम्॥ अकर्मणाकत्थितेनसंतःकुपुरुषंविदुः॥८६॥ अमित्राणांवशे स्थानंराज्यंचपुनरुद्धर॥ द्वावर्थौयुद्धकामस्यतस्मात्तत्कुरुपौरुषम्॥८७॥ पराजितोसियूतेनकृष्णाचानायितासभाम्॥शक्योमर्षोमनुष्येणकर्तुंपुरुषमानिना ॥८८॥ द्वादशैवतुवर्षाणिवनेधिष्ण्याद्विवासितः॥ संवत्सरंविराटस्यदास्यमास्थायचोषितः॥८९॥ राष्ट्रान्निर्वासनक्लेशंवनवासंचपांडव॥ कृष्णायाश्चपरि क्लेशंसंस्मरन्पुरुषोभव॥९०॥अप्रियाणांचवचनंप्रब्रुवत्सुपुनःपुनः॥ अमर्षंदर्शयस्वत्वममर्षोत्येवपौरुषम्॥९१॥क्रोधोबलंतथावीर्यंज्ञानयोगोस्रलाघवम्॥ इहतेदृश्यतांपार्थयुध्यस्वपुरुषोभव॥९२॥ लोहाभिसारोनिर्वृत्तःकुरुक्षेत्रमकर्दमम्॥ पुष्टास्तेऽश्वाभृतायोधाःश्वोयुध्यस्वसकेशवः॥९३॥ असमागम्यभीष्मेणसंयुगेकिंविकत्थसे॥ आरुरुक्षुर्यथामंदःपर्वतंगंधमादनम्॥९४॥ एवंकत्थसिकौंतेयअकत्थन्पुरुषोभव॥ सूतपुत्रंसुदुर्धर्षंशल्यंचबलिनांवरम्॥९५॥ द्रो णंचबलिनांश्रेष्ठंशचीपतिसमंयुधि॥ अजित्वासंयुगेपार्थराज्यंकथमिहेच्छसि॥९६॥ ब्राह्मेधनुषिचाचार्यंवेदयोरंतगंद्वयोः॥ युधिधुर्यमविक्षोभ्यमनीक चरमच्युतम्॥९७॥ ॥ ८७॥ ८८॥ धिष्ण्यात्गृहात्॥ ८९॥९०॥ अप्रियाणांशत्रूणांवक्तुंयोग्यंवचनंगौर्गोःनसंतिपतयोभद्रेषंढतिलाएतेइत्यादिकंप्रब्रुवत्सुदुःशासनादिषुअमर्षंकोपंदर्शय ॥ ९१ ॥ ९२ ॥ लोहाभिसारः शस्त्राणांनीराजनादिकंतेषुमंत्रेणदेवतावाहनादिकंच अकर्दममितियुद्धयोग्यत्वंभूमेरुक्तम्॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥ वेदयोःश्रुतिधनुर्वेदयोःअंतगंपारगम् ॥ ९७ ॥

॥ ९८ ॥ युगंकालचक्रं ॥ ९९ ॥ १०० ॥ आभ्यांद्रोणभीष्माभ्यांअभिध्यातोहंतव्यत्वेननिश्चितः दारुणेनभयानकेनास्त्रादिना पदाभूमिविनिमर्त्यउत्कः ॥ १०१ ॥ दर्दुरोमंडूकः ॥ १०२ ॥ १०३ ॥ नागबलस्यहस्तिसैन्यस्य ॥ १०४ ॥ १०५ ॥ पर्यायात्युद्धप्रकारात् ॥ १०६ ॥ १०७ ॥ १०८ ॥ पर्यायधर्मेणउपधर्मेणमायादिना अन्येतुराजपुत्रोयंराज्यार्हइतिक्रमधर्मस्तेननकिंतुशौर्येणैवसिद्धिमा

द्रोणंमहाद्युतिंपार्थजेतुमिच्छसितन्नृप॥ नहिशुश्रुमवातेनमेरुमुन्मथितंगिरिं॥ ९८॥ अनिलोवावहेन्मेरुंद्यौर्वापिनिपतेन्महीं॥ युगंवापरिवर्तेतयथैवंस्या द्यथात्यमाम्॥९९॥कोत्यस्तिजीविताकांक्षीप्राप्येममरिमर्दनम्॥ पार्थोवाद्वितरोवापिकोन्यःस्वस्तिगृहान्व्रजेत्॥ १००॥ कथमाभ्यामभिध्यातःसंस्पृष्टोदारुणेनवा॥ रणेजीवन्प्रमुच्येतपदाभूमिमुपस्पृशन्॥ १०१॥ किंदर्दुरःकूपशयोयथेमांनबुध्यसेराजचमूंसमेताम्॥दुराधर्षांदेवचमूप्रकाशांगुप्तांनरेंद्रैस्त्रिदशैरिवद्यां॥ १०२॥ प्राच्यैःप्रतीच्यैरथदाक्षिणात्यैरुदीच्यकांबोजशकैःखशैश्च॥शाल्वैःसमत्स्यैःकुरुमध्यदेश्यैर्म्लेच्छैःपुलिंदैर्द्रविडांध्रकांच्यैः॥ १०३॥ नानाजनौघैयुधिसंप्रवृद्धांगांगंयथावेगमपारणीयम्॥ मांचस्थितंनागबलस्यमध्येयुयुत्ससेमंदकिमल्पबुद्धे॥ १०४॥ अक्षय्याविषुधीचैवअग्निदत्तंचतेरथम्॥जानीमोहिरणेपार्थकेतुंदिव्यंचभारत॥ १०५॥ अकत्थमानोयुध्यस्वकत्थसेर्जुनकिंबहु॥ पर्यायात्सिद्धिरेतस्यनैतत्सिध्यतिकत्थनात्॥ १०६॥ यदीदंकत्थनाल्लोकेसिध्येत्कर्मधनंजय॥ सर्वेभवेयुःसिद्धार्थाःकत्थनेकोहिदुर्गतः॥ १०७॥ जानामितेवासुदेवंसहायंजानामितेगांडिवंतालमात्रम्॥जानाम्यहंत्वाद्दशोनास्तियोद्धा जानानस्तेराज्यमेतद्ददामि॥ १०८॥ नतुपर्यायधर्मेणसिद्धिप्राप्नोतिमानवः॥ मनसैवानुकूलानिधातैवकुरुतेवशे॥ १०९॥त्रयोदशसमाभुक्तंराज्यंविलप तस्तव॥ भूयश्चैवप्रशासिष्येत्वांनिहत्यसबांधवम्॥ ११०॥ कृतदाग्रांडिवंतेभूयत्त्वंदासपणेर्जितः॥ कृतदाभीमसेनस्यबलमासीच्चफाल्गुन॥ १११॥ सगदा द्भीमसेनाद्वाफाल्गुनाद्वासगांडिवात्॥ नवैमोक्षस्तदायोभूद्विनाकृष्णामनिंदिताम्॥ ११२॥ सावोदास्येसमापन्नान्मोचयामासपार्षती॥ अमानुष्यंसमाप न्नान्दासकर्मण्यवस्थितान्॥ ११३॥ अवोचंयत्षंढतिलानहंवस्तथ्यमेवतत्॥ धृताहिवेणीपार्थेनविराटनगरेतदा॥ ११४॥ सूदकर्मणिचश्रांतंविराटस्यम हानसे॥ भीमसेनेनकौंतेययत्तुतन्ममपौरुषम्॥ ११५॥ एवमेवसदादंडंक्षत्रियाःक्षत्रियेदधुः॥ वेणींकृत्वाषंढवेषःकन्यांनर्तितवानसि॥ ११६॥

मोतीत्यर्थः मनसासंकल्पेनधातैवकुरुतेननुमनुष्यः॥ १०९॥ ११०॥ हेवास वासवइतिपाठेइंद्रपुत्र॥ १११॥ ११२॥ अमानुष्यंनीचमनुष्यत्वं अलवणायवागूरितिवदल्पार्थोत्रनञ्॥ ११३॥११४॥ ॥ ११५॥ वेणींकृत्वाषंढवेषःकन्यांनर्तितवानसीत्येतत्स्मात्परं श्रोण्यांवेण्यांचकक्ष्यांचसंयुगेयःपलायतइत्यर्धदृश्यते तस्यार्थः यःषंढवेषःअस्त्रीअपिस्त्रीवेषभृत्श्रोणिकक्षावेण्युपलक्षितेषुरत्यवमर्दंदर्शन स्थानेषुसंयुगेस्मरयुद्धेउपस्थितेसतिपलायते स्त्रीत्वस्मिन्संयुगेस्थिरीभवति अयंतुततोप्यधमइतिभावः कक्षायामित्यपेक्षितेआकारलोपआर्षः॥ ११६॥

॥ ११७ ॥ नमायेतिव्याख्यातएवश्लोकः ॥ ११८ ॥ ११९ ॥ भीष्मेणसहसंग्रामःगिरौशिरीभेदनादिवत्तस्यनाशकरइत्यर्थः ॥ १२० ॥ उद्वेलोवृद्धिः ॥ १२१ ॥ १२२ ॥ ओघःप्रवाहःपुरुमित्रोदुर्यो धनभ्रातासएवगाधोगांभीर्यस्यपर्यंतोयस्मिन् गाढमितिपाठेतेनगाढंदुष्प्रवेशं दुर्मर्षणोदंदुर्मर्षणोदकं सोपिदुर्योधनभ्रातैव ॥ १२३ ॥ १२४ ॥ निवर्तितानिवर्तिष्यति प्रशाम्यशांतोभव प्रशास्येतिपाठेप्रशा

नभयाद्वासुदेवस्यनचापितवफाल्गुन ॥ राज्यंप्रतिप्रदास्यामियुध्यस्वसहकेशवः ॥ ११७ ॥ नमायाहींद्रजालंवाकुहकावापिभीषणा ॥ आत्तशस्त्रस्यसंग्रामे वहंतिप्रतिगर्जनाः ॥ ११८ ॥ वासुदेवसहस्रंवाफाल्गुनानांशतानिवा ॥ आसाद्यमाममोघेषुंद्रविष्यंतिदिशोदश ॥ ११९ ॥ संयुगंगच्छभीष्मेणगिरिंवाशि रसागिरिम् ॥ तरस्ववामहागाधंबाहुभ्यांपुरुषोदधिं ॥ १२० ॥ शारद्वतमहामीनंविविंशतिमहोरगम् ॥ बृहद्बलमहोद्वेलंसौमदत्तितिमिंगिलम् ॥ १२१ ॥ भीष्मवेग मपर्यंतंद्रोणग्राहदुरासदम् ॥ कर्णशल्यझषावर्तकांबोजवडवामुखम् ॥ १२२ ॥ दुःशासनौघंशलशल्यमत्स्यंसुषेणचित्रायुधनागनक्रं ॥ जयद्रथाद्रिंपुरुमित्रगा धंदुर्मर्षणोदंशकुनिप्रपातम् ॥ १२३ ॥ शस्त्रौघमक्षय्यमभिप्रवृद्धंयदावगात्यश्रमनष्टचेताः ॥ भविष्यसित्वंहतसर्वबांधवस्तदामनस्तेपरितापमेष्यति ॥ १२४ ॥ तदामनस्तेत्रिदिवादिवाशुचेर्निवर्तितापार्थमहीप्रशासनात् ॥ प्रशाम्यराज्यंहिसुदुर्लभंत्वयाबुभूषितःस्वर्गइवातपस्विना ॥ १२५ ॥ ॥ इतिश्रीमहाभारतेउद्यो गपर्वणिउलूकदूतागमनपर्वणिदुर्योधनवाक्येषष्ट्यधिकशततमोऽध्यायः ॥ १६० ॥ ॥५॥ ॥ संजयउवाच ॥ ॥सेनानिवेशंसंप्राप्तःकैतव्यःपांडवस्यह ॥ समागतःपांडवेयैर्युधिष्ठिरमभाषत ॥ १ ॥ अभिज्ञोदूतवाक्यानांयथोक्तंब्रुवतोमम ॥ दुर्योधनसमादेशंश्रुत्वानःकर्तुमर्हसि ॥ २ ॥ ॥युधिष्ठिरउवाच ॥ ॥उलू कनभयंतेस्तिब्रूहित्वंविगतज्वरः ॥ यन्मतंधार्तराष्ट्रस्यलुब्धस्यादीर्घदर्शिनः ॥ ३ ॥ततोद्युतिमतांमध्येपांडवानांमहात्मनाम् ॥ संजयानांचमत्स्यानांकृष्णस्यचय शस्विनः ॥ ४ ॥ द्रुपदस्यसपुत्रस्यविराटस्यचसंनिधौ ॥ भूमिपानांचसर्वेषांमध्येवाक्यंजगादह ॥ ५ ॥ ॥उलूकउवाच ॥ ॥इदंत्वामब्रवीद्राजाधार्तराष्ट्रोम हामनाः ॥ शृण्वतांकुरुवीराणांतन्निबोधयुधिष्ठिर ॥ ६ ॥ पराजितोसिद्यूतेनकृष्णाचानायितासभाम् ॥ शक्योमर्षोमनुष्येणकर्तुंपुरुषमानिना ॥ ७ ॥ द्वादशैवतु वर्षाणिवनेधिष्ण्याद्विवासितः ॥ संवत्सरंविराटस्यदास्यमास्थायचोषितः ॥ ८ ॥ अमर्षराज्यहरणंवनवासंचपांडव ॥ द्रौपद्याश्चपरिक्लेशंसंस्मरन्पुरुषोभव ॥ ९ ॥ अशक्तेनचयच्छक्यंभीमसेनेनपांडव ॥ दुःशासनस्यरुधिरंपीयतांयदिशक्यते ॥ १० ॥ स्यंचतद्राज्यंचेतिसमासः बुभूषितःप्राप्तुमिष्टः अतपस्विनास्वर्गइवत्वयाराज्यंदुर्लभं लब्धुमशक्यं ॥ १२५ ॥ ॥ इतिउद्योगप० नैलकंठीयेभारतभावदीपेषष्ट्यधिकशततमोऽध्यायः ॥ १६० ॥ ॥५॥ ॥ सेनेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ शमंशपथःकृतः ॥ १० ॥

व्याख्यातएवायमध्यायः ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥

लोहाभिसारोनिर्वृत्तःकुरुक्षेत्रमकर्दमम् ॥ समःपंथाभृतास्तेश्वाःश्वोयुध्यस्वसकेशवः ॥ १ ॥ असमागम्यभीष्मेणसंयुगेकिंविकत्थसे ॥ आरुरुक्षुर्यथामंदःप र्वतंगंधमादनम् ॥ २ ॥ एवंकत्थसिकौंतेयअकत्थ्यम्पुरुषोभव ॥ सूतपुत्रंसुदुर्धर्षंशल्यंचबलिनांवरम् ॥ ३ ॥ द्रोणंचबलिनांश्रेष्ठंशचीपतिसमंयुधि ॥ अजित्वा संयुगेपार्थराज्यंकथमिहेच्छसि ॥ ४ ॥ ब्राह्मेधनुषिचाचार्यवेदयोरंतगंद्वयोः ॥ युधिधुर्यमविक्षोभ्यमनीकचरमच्युतम् ॥ ५ ॥ द्रोणंमहाद्युतिंपार्थजेतुमिच्छ सितन्मृषा ॥ नहिशुश्रुमवातेनमेरुमुन्मथितंगिरिम् ॥ ६ ॥ अनिलोवावहेन्मेरुंद्यौर्वापिनिपतेन्महीम् ॥ युगंवापरिवर्तेतयद्येवंस्याद्यथात्थमाम् ॥ ७ ॥ कांक्ष्यस्ति जीविताकांक्षीप्राप्येममरिमर्दनम् ॥ गजोवाजीरथोवापिपुनःस्वस्तिगृहान्व्रजेत् ॥ ८ ॥ कथमाभ्यामभिध्यातःसंतृष्टोदारुणेनवा ॥ रणेजीवन्विमुच्येतपदा भूमिमुपस्पृशन् ॥ ९ ॥ किंदर्दुरःकूपशयोयथेमांनबुध्यसेराजचमूंसमेताम् ॥ दुराधर्षांदेवचमूप्रकाशांगुप्तांनरैर्द्वेस्त्रिदशैरिवद्याम् ॥ २० ॥ प्राच्यैःप्रतीच्यैरथदा क्षिणात्यैरुदीच्यकांबोजशकैःखशैश्च ॥ शाल्वैःसमत्स्यैःकुरुमुख्यदेशैर्म्लेच्छैःपुलिंदैर्द्रविडांध्रकांच्यैः ॥ २१ ॥ नानाजनौघंयुधिसंप्रवृद्धंगांगंयथावेगमपार णीयम् ॥ मांचस्थितंनागबलस्यमध्येयुयुत्ससेमंदकिमल्पबुद्धे ॥ २२ ॥ इत्येवमुक्काराजानंधर्मपुत्रंयुधिष्ठिरम् ॥ अभ्यावृत्यपुनर्जिष्णुमुलूकःप्रत्यभाषत ॥ २३ ॥ अकत्थमानोयुध्यस्वकत्थसेर्जुनकिंबहु ॥ पर्याप्तायात्सिद्धिरेतस्यनैतत्सिध्यतिकत्थनात् ॥ २४ ॥ यदीदंकत्थनाल्लोकेसिध्येत्कर्मधनंजय ॥ सर्वेभवेयुःसिद्धार्थाःक त्थनेकोहिदुर्गतः ॥ २५ ॥ जानामितेवासुदेवंसहायंजानामितेगांडिवंतालमात्रम् ॥ जानाम्येतत्त्वादृशोनास्तियोद्धाजानानस्तेराज्यमेतद्धरामि ॥ २६ ॥ नतुप र्याप्तधर्मेणराज्यंप्राप्नोतिमानुषः ॥ मनसैवानुकूलानिविधाताकुरुतेवशे ॥ २७ ॥ त्रयोदशसमाभुक्तंराज्यंविलपतस्तव ॥ भूयश्चैवप्रशासिष्येनिहत्यत्वांसबांध वम् ॥ २८ ॥ कृतदागांडिवंतेभूयत्त्वंदासपणैर्जितः ॥ कृतदाभीमसेनस्यबलमासीच्चफाल्गुन ॥ २९ ॥ सगदाद्भीमसेनाद्वापार्थाद्वापिसगांडिवात् ॥ नवैमोक्ष्यस्तदा वोभूद्विनाकृष्णामनिंदिताम् ॥ ३० ॥ सावोदास्येसमापन्नान्मोक्षयामासपार्षती ॥ अमानुष्यंसमापन्नान्दासकर्मण्यवस्थितान् ॥ ३१ ॥ अवोचंयत्पंढतिला नहंवस्तथ्यमेवतत् ॥ धृताहिवेणीपार्थेनविराटनगरेतदा ॥ ३२ ॥ सूदकर्मणिचश्रांतंविराटस्यमहानसे ॥ भीमसेनेनकौंतेययच्चतन्ममपौरुषम् ॥ ३३ ॥ एवमे तत्सदादंडंक्षत्रियाःक्षत्रियेदधुः ॥ वेणींकृत्वापंढवेषःकन्यांनर्तितवानसि ॥ ३४ ॥

॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिनीलकंठीयेभारतभावदीपेएकषष्ट्युत्तरशततमोऽध्यायः ॥ १६१ ॥ ॥७॥ ॥ उलूकस्त्विति ॥ १ ॥

नभयाद्वासुदेवस्यनचापितवफाल्गुन ॥ राज्यंप्रतिप्रदास्यामियुध्यस्वसहकेशवः ॥ ३५ ॥ नमायाहींद्रजालंवाकुहकावापिभीषणा ॥ आत्तशस्त्रस्यमेयुद्धेवर्हति प्रतिगर्जनाः ॥ ३६ ॥ वासुदेवसहस्रंवाफाल्गुनानांशतानिवा ॥ आसाद्यमाममोघेषुंद्रविष्यंतिदिशोदश ॥ ३७ ॥ संयुगंगच्छभीष्मेणभिंधिवाशिरसागिरिम् ॥ तरेमंवामहागाधंबाहुभ्यांपुरुषोदधिं ॥ ३८ ॥ शारद्वतमहामीनंविविंशतिमहोरगं ॥ बृहद्बलमहोद्वेलंसौमदत्तितिमिंगिलं ॥ ३९ ॥ भीष्मवेगमपर्यंतंद्रोणग्राहदुरासदं ॥ कर्णशल्यझषावर्तंकांबोजवडवामुखं ॥ ४० ॥ दुःशासनौघशलशल्यमत्स्यंसुषेणचित्रायुधनागनक्रं ॥ जयद्रथाद्रिंपुरुमित्रगाधंदुर्मर्षणोदंशकुनिप्रपातं ॥ ४१ ॥ शस्त्रौघमक्षय्यमतिप्रवृद्धंयदावगात्यश्रमनष्टचेताः ॥ भविष्यसित्वंहतसर्वबांधवस्तदामनस्तेपरितापमेष्यति ॥ ४२ ॥ तदामनस्तेत्रिदिवादिवाशु चेर्निवर्तितापार्थमहीप्रशासनात् ॥ प्रशाम्यमज्यंहिसुदुर्लभंत्वयावुभूषितःस्वर्गइवातपस्विना ॥ ४३ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिउलूकदूतागमनपर्वणिउलूकवाक्येएकषष्ट्युत्तरशततमोऽध्यायः ॥ १६१ ॥ ॥ ७ ॥ ॥ संजयउवाच ॥ ॥ उलूकस्त्वर्जुनंभूयोययोक्तंवाक्यमब्रवीत् ॥ आशीविषमिवकुद्धंतुदन्वाक्यशलाकया ॥ १ ॥ तस्यतद्वचनंश्रुत्वारुषिताःपांडवाभृशं ॥ प्रागेवभृशसंकुद्धाःकैतव्येनापिधर्षिताः ॥ २ ॥ आसनेषूदतिष्ठंतबाहूंश्चैवप्रचिक्षिपुः ॥ आशीविषाइवकुद्धावीक्षांचक्रुःपरस्परं ॥ ३ ॥ अवाक्शिराभीमसेनःसमुदैक्षतकेशवं ॥ नेत्राभ्यांलोहितांताभ्यामाशीविषइवश्वसन् ॥ ४ ॥ आर्तवातात्मजंदृष्ट्वाक्रोधेनाभिहतंभृशं ॥ उत्स्मयन्निवदाशार्हःकैतव्यंप्रत्यभाषत ॥ ५ ॥ प्रयाहिशीघ्रंकैतव्यब्रूयाश्चैवसुयोधनं ॥ श्रुतंवाक्यंगृहीतोर्थोमतंयत्तेतथास्तुतत् ॥ ६ ॥ एवमुक्तामहाबाहुःकेशवोराजसत्तम ॥ पुनरेवमहाप्राज्ञंयुधिष्ठिरमुदैक्षत ॥ ७ ॥ सृंजयानांचसर्वेषांकृष्णस्यचयशस्विनः ॥ द्रुपदस्यसपुत्रस्यविराटस्यचसंनिधौ ॥ ८ ॥ भूमिपानांचसर्वेषांमध्येवाक्यंजगादह ॥ उलूकोप्यर्जुनंभूयोययोक्तंवाक्यमब्रवीत् ॥ ९ ॥ आशीविषमिवकुद्धंतुदन्वाक्यशलाकया ॥ कृष्णादींश्चैवतान्सर्वान्ययोक्तंवाक्यमब्रवीत् ॥ १० ॥ उलूकस्यतुतद्वाक्यंपापंदारुणमीरितं ॥ श्रुत्वाविचुक्षुभेपार्थोललाटंचाप्यमार्जयत् ॥ ११ ॥ तदवस्थंतदादृष्ट्वापार्थंसासमितिर्नृप ॥ नाशक्ष्यंतमहाराजपांडवानांमहारथाः ॥ १२ ॥ अधिक्षेपेणकृष्णस्यपार्थस्यचमहात्मनः ॥ श्रुत्वातेपुरुषव्याघ्राःक्रोधाज्ज्वलुरच्युत ॥ १३ ॥ धृष्टद्युम्नःशिखंडीचसात्यकिश्चमहारथः ॥ केकयाभ्रातरःपंचराक्षसश्चघटोत्कचः ॥ १४ ॥ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ समितिःसभा ॥ १२ ॥ १३ ॥ १४ ॥

द्रौपदेयैःसहितोऽभिमन्युःद्रौपदेयाभिमन्युः ॥ १५ ॥ १६ ॥ पारिहार्यैःपरितोहारायैषांतेपरिहाराःमौक्तिकंगुच्छाःमौक्तिकादिजालानिवातएवपारिहार्याणि स्वार्थेष्यञ् ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ यश्चेति इहदुःशासनरुधिरपानकालेमामभियास्यति ॥ २८ ॥ आत्मानंआलभेशपामि अंतरात्मानंईश्वरंवास्पृष्ट्वाहआलभेइति ईश्वरशपथंक

द्रौपदेयाभिमन्युश्चधृष्टकेतुश्चपार्थिवः ॥ भीमसेनश्चविक्रांतोयमजौचमहारथौ ॥ १५ ॥ उत्पेतुरासनात्सर्वेक्रोधसंरक्तलोचनाः ॥ बाहून्प्रगृह्यरुचिरान्रक्तचंदनरूषितान् ॥ अंगदैःपारिहार्यैश्चकेयूरैश्चविभूषितान् ॥ १६ ॥ दंतान्दंतेषुनिष्पिष्यसृक्किणीपरिलेलिहन् ॥ तेषामाकारभावज्ञःकुंतीपुत्रोवृकोदरः ॥ १७ ॥ उद्तिष्ठत्सवेगेनक्रोधेनप्रज्वलन्निव ॥ उद्दृत्यसहसानेमेदंतान्कटकटाप्यच ॥ १८ ॥ हस्तंहस्तेननिष्पिष्योलूकंवाक्यमब्रवीत् ॥ अशक्तानामिवास्माकंप्रोत्साहननिमित्तकम् ॥ १९ ॥ श्रुतंतेवचनंमूर्खयत्त्वांदुर्योधनोब्रवीत् ॥ तन्मेकथयतोमंदशृणुवाक्यंदुरासदम् ॥ २० ॥ सर्वक्षत्रस्यमध्येतंयद्वक्ष्यसिसुयोधनम् ॥ शृण्वतःसूतपुत्रस्यपितुश्चत्वंदुरात्मनः ॥ २१ ॥ अस्माभिःप्रीतिकामैस्तुभ्रातुर्ज्येष्ठस्यनित्यशः ॥ मर्षितंतेदुराचारतत्त्वंनबहुमन्यसे ॥ २२ ॥ प्रेषितश्चवृद्धपीकेशःशमाकांक्षीकुरूत्तमः ॥ कुलस्यहितकामेनधर्मराजेनधीमता ॥ २३ ॥ त्वंकालचोदितोनूनंगंतुकामोयमक्षयम् ॥ गच्छस्वाहवमस्माभिस्तच्चश्वोभविताध्रुवम् ॥ २४ ॥ मयापिचप्रतिज्ञातोवधःसभ्रातृकस्यते ॥ सतथाभवितापापनात्रकार्याविचारणा ॥ २५ ॥ वेलामतिक्रमेत्सद्यःसागरोवरुणालयः ॥ पर्वताश्चविशीर्येयुर्मयोक्तंनमृषाभवेत् ॥ २६ ॥ सहायस्तेयदियमःकुबेरोरुद्रएववा ॥ यथाप्रतिज्ञांदुर्बुद्धेप्रकरिष्यंतिपांडवाः ॥ दुःशासनस्यरुधिरंपातास्मियथेप्सितम् ॥ २७ ॥ यश्चेहप्रतिसंरब्धःक्षत्रियोमाभियास्यति ॥ अपिभीष्मंपुरस्कृत्यतंनेष्यामियमक्षयम् ॥ २८ ॥ यच्चैतदुक्तंवचनंमयाक्षत्रस्यसंसदि ॥ यथैतद्भवितासत्यंतथैवात्मानमालभे ॥ २९ ॥ भीमसेनवचःश्रुत्वासहदेवोप्यमर्षणः ॥ क्रोधसंरक्तनयनस्ततोवाक्यमुवाचह ॥ ३० ॥ शौटीरशूरसदृशमनीकजनसंसदि ॥ शृणुपापवचोमत्यं यद्वाच्योहिपितात्वया ॥ ३१ ॥ नास्माकंभविताभेदःकदाचित्कुरुभिःसह ॥ धृतराष्ट्रस्यसंबंधोयदिनस्यात्त्वयासह ॥ ३२ ॥ त्वंतुलोकविनाशायधृतराष्ट्रकुलस्यच ॥ उत्पन्नोवैरपुरुषःस्वकुलघ्नश्चपापकृत् ॥ ३३ ॥ जन्मप्रभृतिचास्माकंपितातेपापपूरुषः ॥ अहितान्यनृशंसानिनित्यशःकर्तुमिच्छति ॥ ३४ ॥

रोमीत्यर्थः ॥ २९ ॥ ३० ॥ शौटीरःसगर्वः शूरोविक्रांतः शौटृगर्वेशूरविक्रांतौइतिधातू अनीकजनःसैन्यवासीजनः हेपाप मन्मम ॥ ३१ ॥ नास्माकमिति धृतराष्ट्रदोषादेववैरंजातंअन्यथातेनवास्म्यएवत्वयित्यक्तेसतितत्स्यादितिभावः ॥ ३२ ॥ ३३ ॥ तेतवपिताअस्माकंअहितानिकर्तुमिच्छतीतिसंबंधः ॥ ३४ ॥

॥ ३५ ॥ भीमसेनस्येतिप्राचीनपाठेशुल्वेत्यध्याहारः ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ पांडवेष्विति हेपापपांडवे

तस्यवैरानुषंगस्यगंतास्म्यंतंसुदुर्गमम्॥ अहमादौनिहत्यत्वांशकुनेःसंप्रपश्यतः॥३५॥ ततोस्मिशकुनिंहंतामिषतांसर्वधन्विनाम्॥ भीमस्यवचनंश्रुत्वासहदेवस्यचाभयोः॥ ३६॥ उवाचफाल्गुनोवाक्यंभीमसेनंस्मयन्निव॥ भीमसेननतेसंतियेषांवैरंत्वयासह॥ ३७॥ मंदाग्रहेषुसुखिनोमृत्युपाशवशंगताः॥ उलूकश्चनतेवाच्यःपरुषंपुरुषोत्तम॥३८॥ दूताःकिमपराध्यंतेयथोक्तस्यानुभाषिणः॥ एवमुक्कामहाबाहुर्भीमंभीमपराक्रमम्॥३९॥ धृष्टद्युम्नमुखान्वीरान्सुहृदःसमभाषत॥ श्रुतंवस्तस्यपापस्यधार्तराष्ट्रस्यभाषितम्॥ ४०॥ कुत्सनंवासुदेवस्यममचैवविशेषतः॥ श्रुत्वाभवंतःसंरब्धाअस्माकंहितकाम्यया॥४१॥ प्रभावाद्वासुदेवस्यभवतांचप्रयत्नतः॥ समग्रंपार्थिवंक्षत्रंसर्वनगणयाम्यहम्॥४२॥ भवद्भिःसमनुज्ञातोवाक्यमस्ययदुत्तरम्॥ उलूकेप्रापयिष्यामियद्वक्ष्यतिसुयोधनम्॥४३॥ श्वोभूतेकत्थितस्यास्यप्रतिवाक्यंचमूमुखे॥ गांडीवेनाभिधास्यामिक्लीबाहिवचनोत्तराः॥४४॥ ततस्तेपार्थिवाःसर्वेप्रशशंसुर्धनंजयम्॥ तेनवाक्योपचारेणविस्मिताराजसत्तमाः॥ ४५॥ अनुनीयचतान्सर्वान्यथामान्यंयथावयः॥ धर्मराजंतदावाक्यंतत्राप्यंप्रत्यभाषत॥ ४६॥ आत्मानमवमन्वानोनहिस्यात्पार्थिवोत्तमः॥ तत्रोत्तरंप्रवक्ष्यामितवशुश्रूषणेरतः॥४७॥ उलूकंभरतश्रेष्ठसामपूर्वमथोर्जितम्॥ दुर्योधनस्यतद्वाक्यंनिशम्यभरतर्षभः॥४८॥ अतिलोहितनेत्राभ्यामाशीविषइवश्वसन्॥ स्मयमानइवक्रोधात्सृक्किणीपरिसंलिहन्॥ ४९॥ जनार्दनमभिप्रेक्ष्यभ्रातॄंश्चैवेदमब्रवीत्॥ अभ्यभाषतकैतव्यंप्रगृह्य विपुलंभुजम्॥५०॥ उलूकगच्छकैतव्यब्रूहितातसुयोधनम्॥ कृतघ्नंवैरपुरुषंदुर्मतिंकुलपांसनम्॥५१॥ पांडवेषुसदापापनित्यंजिह्मंप्रवर्तते॥ स्ववीर्याद्यःपराक्रम्यपापआक्रयतेपरान्॥ अभीतःपूरयन्वाक्यमेषवैक्षत्रियःपुमान्॥ ५२॥ सपापःक्षत्रियोभूत्वाअस्मानाहूयसंयुगे॥ मान्यामान्यान्पुरस्कृत्ययुद्धंमागाःकुलाधम॥ ५३॥ आत्मवीर्यंसमाश्रित्यभृत्यवीर्यंचकौरव॥ आक्रयस्वरणेपार्थान्सर्वथाक्षत्रियोभव॥ ५४॥ परवीर्यंसमाश्रित्ययःसमाक्रयतेपरान्॥ अशक्तःस्वयमादातुमेतदेवनपुंसकम्॥ ५५॥ सत्वंपरेषांवीर्येणआत्मानंबहुमन्यसे॥ कथमेवमशक्तस्त्वमस्मान्समभिगर्जसि॥ ५६॥

पुत्वयोरुक्तंबैडालव्रतरूपंजिह्मंप्रवर्ततइतितुप्यतुर्दुर्जनन्यायेनांगीकरोति प्रवर्तसइतिपाठेतुस्पष्टोर्थः पूरयन्वाक्यंतदर्थानुष्ठानेनसमर्थयन् ॥५२॥ मान्याःभीष्मद्रोणादयः अमान्याःपुत्राःलक्ष्मणादयः बालबुद्धनाशंमाकार्षीरित्यर्थः ॥ ५३ ॥ ५४ ॥ नपुंसकंनपुंसकत्वंतव ॥ ५५ ॥ परेषांकर्णादीनाम् ॥ ५६ ॥

॥ ५७ ॥ ५८ ॥ जघन्यकालंचरमकालेपिएतन्नभवेन्माभूत् एतदेवाह सर्वेत्यादिनाश्लोकशेषेण ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ समीक्षतेगणयति ॥ ६३ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिनैलकं० द्विषष्यधिकशततमोऽध्यायः ॥ १६२ ॥ ॥ ७ ॥ ॥ दुर्योधनस्येति समुदैक्षतगुडाकेशइतिसंबंधः ॥ १ ॥ २ ॥ पूरणात्पुरुषइतिपुरुषशब्दनिर्वचनं अन्यथात्वपुरुषएवेत्यर्थः ॥ ३ ॥ क्षत्रबंधुः

कृष्णउवाच॥ ॥ मद्वचश्चापिभूयस्तेवक्तव्यःससुयोधनः॥ श्वइदानींप्रपद्येथाःपुरुषोभवदुर्मते॥५७॥ मन्यसेयच्चमूढत्वंनयोत्स्यतिजनार्दनः॥ सारथ्येनहतःपार्थैरितित्वंनबिभेषिच॥५८॥ जघन्यकालमप्येतन्नभवेत्सर्वपार्थिवान्॥ निर्दहेयमहंक्रोधात्तृणानीवहुताशनः॥ ५९॥ युधिष्ठिरनियोगात्तुफाल्गुनस्यमहात्मनः॥ करिष्येयुध्यमानस्यसारथ्यंविजितात्मनः॥६०॥ यद्युत्पतसिलोकांस्त्रीन्यद्याविशसिभूतलम्॥ तत्रतत्रार्जुनरथंप्रभातेद्रक्ष्यसेपुनः॥६१॥ यच्चापिभीमसेनस्यमन्यसेमोघभाषितम्॥ दुःशासनस्यरुधिरंपीतमद्यावधारय॥६२॥ नत्वांसमीक्षतेपार्थोनापिराजायुधिष्ठिरः॥ नभीमसेनोनयमौप्रतिकूलप्रभाषिणम्॥६३॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिउलूकदूताभिगमनप०कृष्णादिवाक्येद्विषष्यधिकशततमोऽध्यायः॥१६२॥ ॥७॥ ॥संजयउवाच॥ ॥दुर्योधनस्यतद्वाक्यंनिशम्यभरतर्षभ॥ नेत्राभ्यामतिताम्राभ्यांकैतव्यंसमुदैक्षत॥१॥ सकेशवमभिप्रेक्ष्यगुडाकेशोमहायशाः॥ अभ्यभाषतकैतव्यंप्रगृह्यविपुलंभुजम्॥२॥ स्ववीर्ययःसमाश्रित्यसमाह्वयतिवैपरान्॥ अभीतोयुध्यतेशत्रूनसवैपुरुषउच्यते॥ ३॥ परवीर्यंसमाश्रित्ययःसमाह्वयतेपरान्॥ क्षत्रबंधुरशक्तस्त्वाल्लोकेसपुरुषाधमः॥४॥ सत्वंपरेषांवीर्येणमन्यसेवीर्यमात्मनः॥ स्वयंकापुरुषोमूढपरांश्चक्षेप्तुमिच्छसि॥५॥ यस्त्वंवृद्धंसर्वराज्ञांहितबुद्धिंजितेंद्रियम्॥ मरणायमहाप्रज्ञंदीक्षयित्वाविकत्थसे॥ ६॥ भावस्तेविदितोस्माभिर्दुर्बुद्धेकुलपांसन॥ नहनिष्यंतिगांगेयंपांडवाघृणयेतिहि॥ ७॥ यस्यवीर्यंसमाश्रित्यधार्तराष्ट्रविकत्थसे॥ हंतास्मिप्रथमंभीष्मंमिषतांसर्वधन्विनाम्॥८॥ कैतव्यगत्वाभरतान्समेत्यसुयोधनंधार्तराष्ट्रंवदस्व॥ तथेत्युवाचार्जुनःसव्यसाचीनिशाव्यपायेभवितावि मर्दः॥ ९॥ यद्ब्रवीद्वाक्यमदीनसत्वोमध्येकुरून्हर्षयन्सत्यसंधः॥ अहंहंतासंजयानामनीकंशाल्वेयकांश्चेतिममैषभारः॥ कैतव्यगत्वाभरतान्समेत्यसुयोधनंधार्तराष्ट्रंवदस्व॥ १०॥ हन्यामहंद्रोणमृतेपिलोकंनतेभयंविद्यतेपांडवेभ्यः॥ ततोहितेलब्धतमंचराज्यमापद्भ्रताःपांडवाश्चेतिभावः॥ ११॥

क्षत्रजातिरेवनतुक्षत्रकर्मेत्यर्थः ॥ ४ ॥ ५ ॥ वृद्धंबाह्लीकंभीष्मंच ॥ ६ ॥ ७ ॥ मिषतांपश्यतां ॥ ८ ॥ कैतव्येति समेत्यएकीकृत्य निशाव्यपायेश्वोभूते ॥ ९ ॥ सत्यसंधोभीष्मः भीष्मवाक्यमेवाह अहंहंतेति हेकैतव्यअहंहंतेत्यादिमदीयंवाक्यंभरतान्पांडवान्प्रतिगत्वावदस्व किंकृत्वा सुयोधनंसमेत्य मदीयंसंदेशंदुर्योधनायश्रावयित्वापांडवान्प्रतिकथयेत्यर्थः तेनदुर्योधनसुखंपांडवानांभयंचोद्देष्यतीतिभावः ॥ १० ॥ द्रोणमृतेपिद्रोणंविनाप्यसहायएवाहंलोकंहन्याम् ततोभीष्मवाक्यात् तेतवभावएवंभूतोजातइत्यर्थः ॥ ११॥

हंताहनिष्यामि कुरुवृद्धंभीष्मम् ॥ १२ ॥ योयुक्तसेनोध्वजीरथीतंरक्षतेतियोजना द्वीपंमज्जतामाधारम् ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ अभिमानःश्रेष्ठोस्मीतिबुद्धिः दर्पःपराभिभवसमर्थोस्मीतिधीः को धोभिज्वलनं पारुष्यंनिष्ठुरवाक्यत्वं नैष्ठुर्यंनिःस्नेहता अवलेपोन्येषामवज्ञा आत्मसंभावनंअहमेवज्ञातागुरुश्चास्मीतिबुद्धिः॥१७॥ नृशंसतानिर्दयत्वं नैष्कर्म्यंतीक्ष्णताविषादानादिवीभत्सकर्मकारित्वं धर्मवि

सदर्पपूर्णोनसमीक्षसेत्वमनर्थमात्मन्यपिवर्तमानम्॥ तस्मादहंतेप्रथमंसमूहेहंतासमक्षंकुरुवृद्धमेव ॥ १२ ॥ सूर्योदयेयुक्तसेनःप्रतीक्ष्यध्वजीरथीरक्षतसत्यसं धम्॥ अहंहिवःपश्यतांहीपमेनंभीष्मंरथात्पातयिष्यामिबाणैः॥ १३ ॥ श्वोभूतेकत्थनावाक्यंविज्ञास्यतिसुयोधनः ॥ आचितंशरजालेनमयाहृष्ट्वापितामहम् ॥ १४ ॥ यदुक्तश्चसभामध्येपुरुषोक्षस्वदर्शनः॥ कृष्णेनभीमसेनेनभ्रातादुःशासनस्तव ॥ १५ ॥ अधर्मज्ञोनित्यवैरीपापबुद्धिर्नृशंसवत्॥ सत्यांप्रतिज्ञामचिरा द्द्रक्ष्यसेनांसुयोधन॥ १६ ॥ अभिमानस्यदर्पस्यक्रोधपारुष्ययोस्तथा ॥ नैष्ठुर्यस्यावलेपस्यआत्मसंभावनस्यच ॥ १७ ॥ नृशंसतायास्तैक्ष्ण्यस्यधर्मविद्वेषण स्यच ॥ अधर्मस्यातिवादस्यदृढातिक्रमणस्यच ॥ १८ ॥ दर्शनस्यचचक्रस्यकृत्स्नस्यापनयस्यच ॥ द्रक्ष्यसित्वंफलंतीव्रमचिरेणसुयोधन ॥ १९ ॥ वासुदेवद्वि तीयेहिमयिकृद्धेनराधम ॥ आशातेजीवितेमूढराज्येवाकेनहेतुना ॥ २० ॥ शांतेभीष्मेतथाद्रोणेसूतपुत्रेचपातिते ॥ निराशोजीवितेराज्येपुत्रेषुचभविष्यसि ॥ २१ ॥ भ्रातॄणांनिधनंश्रुत्वापुत्राणांचसुयोधन ॥ भीमसेनेननिहतोदुष्कृतानिस्मरिष्यसि ॥ २२ ॥ नद्वितीयांप्रतिज्ञांहिप्रतिजानामिकैतव ॥ सत्यंब्रवीम्यहं त्येतत्सर्वंसत्यंभविष्यति ॥ २३ ॥ युधिष्ठिरोपिकैतव्यमुलूकमिदमब्रवीत् ॥ उलूकमद्यचोब्रूहिगत्वातातसुयोधनम् ॥ २४ ॥ स्वेनदत्तेनमेदत्तंनाधिगंतुंत्वमर्हसि ॥ उभयोरंतरंवेदसूनृतानृतयोरपि ॥ २५ ॥ नचाहंकामयेपापमपिकीटपिपीलयोः ॥ किंपुनर्ज्ञातिषुवधंकामयेयंकथंचन ॥ २६ ॥ एतदर्थंमयातातपंचग्रामाद्य ताःपुरा ॥ कथंतवसुदुर्बुद्धेनप्रेक्ष्येव्यसनंमहत् ॥ २७ ॥ सत्वंकामपरीतात्मामूढभावाच्चकत्थसे ॥ तथैववासुदेवस्यनगृह्णासिहितंवचः ॥ २८ ॥ किंचेदानींबहू क्तेनयुध्यस्वसहबांधवैः ॥ ममविप्रियकर्तारंकैतव्यब्रूहिकौरवम् ॥ २९ ॥ श्रुत्वावाक्यंगृहीतोर्थोमतंयत्तेतथास्तुतत्॥ भीमसेनस्ततोवाक्यंभूयआहनृपात्मजम् ॥ ३० ॥ उलूकमद्यचोब्रूहिदुर्मतिंपापपूरुषम्॥ शठंनैकृतिकंपापंदुराचारंसुयोधनम् ॥ ३१ ॥

द्वेषणंकपटद्यूतादिना अधर्मोयथाप्रतिज्ञातराज्याप्रदानं अतिवादोधर्मिष्ठेष्वधर्मिष्ठत्वारोपोबैडालव्रतिकोसीत्यादिवचनं दृढातिक्रमणंविदुरादीनामवमाननं ॥ १८ ॥ दर्शनंकर्णादिषुजयनिश्चयः चक्रंसे नायाआधिक्यं अपनयःअस्माकंदूरीकरणं एतेषांफलंद्रक्ष्यसि ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ वेदवेद्मि ॥ २५ ॥ २६ ॥ कथमिति हेसुदुर्बुद्धेतवव्यसनंमरणागमंकथमपिनप्रेक्ष्येइतिहेतोः पंचग्रामादत्ताइतिसंबंधः ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥

॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ यत्इमंचक्लेशंश्रुत्वादृष्टःसन्विकत्थसेतत्तनोहेतोःशोचिष्यसेइतिसंबंधः ॥ ४० ॥ अश्लाघ्योहंनरपतिर्युवयोरितिदुर्योधनवाक्यस्योत्तरंविराठ द्रुपदावाहतुरित्याह विराटेति साधोःदासभावंनियच्छेवनितरांयच्छेवमार्थयावहे इषुगमीतिछावेशेयमयतेर्विधिलिङिउत्तमस्यद्विवचनं इतिआवयोर्मतिरस्ति तौचआवांदासावदासौवेतियस्यतवयादृशं

गृध्रोदरेवावस्तव्यंपुरेवानागसाह्वये॥ प्रतिज्ञातंमयायच्चसभामध्येनराधम ॥ ३२ ॥ कर्ताहंतद्वचःसत्यंसत्येनैवशपामिते॥ दुःशासनस्यरुधिरंहत्वापास्याम्य हंमधे ॥ ३३ ॥ सक्थिनीतवभंक्ष्यैवहत्वाहितवसोदरान्॥ सर्वेषांधार्तराष्ट्राणामहंहत्युःसुयोधन ॥ ३४ ॥ सर्वेषांराजपुत्राणामभिमन्युरसंशयम्॥ कर्मणातोष यिष्यामिभूयश्चैववचःशृणु ॥ ३५ ॥ हत्वासुयोधनत्वावैसहितंसर्वसोदरैः॥ आक्रमिष्येपदामूर्ध्निधर्मराजस्यपश्यतः॥ ३६ ॥ नकुलस्ततोवाक्यमिदमाहमहीपते॥उलूकब्रूहिकौरव्यंधार्तराष्ट्रंसुयोधनम्॥ ३७ ॥ श्रुतंतेगदतोवाक्यंसर्वमेवयथातथम्॥तथाकर्तास्मिकौरव्ययथात्वमनुशासिमाम्॥ ३८ ॥ सहदेवोपिनृपतेइ दमाहवचोर्थवत्॥ सुयोधनमतिर्यातंदृष्ट्वैपातेभविष्यति॥ ३९ ॥ शोचिष्यसेमहाराजसपुत्रज्ञातिबांधवः॥ इमंचक्लेशमस्माकंदृष्टोयत्त्वंविकत्थसे ॥ ४० ॥ विरा टद्रुपदौदृष्ट्वावुलूकमिदमूचतुः॥ दासभावंनियच्छेवसाधोरितिमतिःसदा॥ तौचदासावदासौवापौरुषंयस्ययादृशम् ॥ ४१ ॥ शिखंडीतुततोवाक्यमुलूकमिद मब्रवीत्॥ वक्तव्योभवताराजापापेष्वभिरतःसदा ॥ ४२ ॥ पश्यत्वंमारणेराजन्कुर्वाणंकर्मदारुणम्॥ यस्यवीर्यंसमासाद्यमन्यसेविजयंयुधि ॥ ४३ ॥ तमहंपा तयिष्यामिरथात्तवपितामहम्॥ अहंभीष्मवधात्सृष्टोनूनंधात्रामहात्मना ॥ ४४ ॥ सोहंभीष्महनिष्यामिमिषतांसर्वधन्विनां॥ धृष्टद्युम्नोपिकैतव्यमुलूकमिदमब्र वीत्॥ ४५ ॥ सुयोधनोममवचोवक्तव्योनृपतेःसुतः॥ अहंद्रोणंहनिष्यामिसगणंसहबांधवम्॥ ४६ ॥ अवश्यंचमयाकार्यंपूर्वेषांचरितंमहत्॥ कर्ताचाहंतथाक र्मयथानान्यःकरिष्यति ॥ ४७ ॥ तमब्रवीद्धर्मराजःकारुण्यार्थंवचोमहत्॥ नाहंज्ञातिवधंराजन्कामयेयंकथंचन ॥ ४८ ॥ तवैवदोषाद्दुर्बुद्धेसर्वमेतत्त्वनादृतम्॥ सगच्छमाचिरंतातउलूकयदिमन्यसे ॥ ४९ ॥ इहवातिष्ठभद्रंतेवयंहितववांधवाः॥ उलूकस्ततोराजन्धर्मपुत्रंयुधिष्ठिरम्॥ ५० ॥ आमंत्र्यप्रययौतत्रयत्रराजा सुयोधनः॥उलूकस्तत आगम्यदुर्योधनममर्षणम्॥ ५१ ॥ अर्जुनस्यसमादेशंयथोक्तंसर्वमब्रवीत्॥ वासुदेवस्यभीमस्यधर्मराजस्यपौरुषम् ॥ ५२ ॥ नकुलस्य विराटस्यद्रुपदस्यचभारत॥ सहदेवस्यचवचोधृष्टद्युम्नशिखंडिनोः॥ केशवार्जुनयोर्वाक्यंयथोक्तंसर्वमब्रवीत्॥ ५३ ॥ पौरुषंतत्तथैवस्योद्रक्ष्यावइतिशेषः ॥ ४१ ॥ ४२ ॥

॥ ४३ ॥ वधात्वधहेतोः ॥ ४४ ॥ ४५ ॥ ४६ ॥ पूर्वेषांचरितंद्रोणवधेनपितृवैरप्रतियातनं सर्वेषामितिपाठेपिसएवार्थः ॥ ४७ ॥ अनादृतंविस्पष्टं ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥

रथयूथपामहारथाःतेषांयूथपोऽतिरथः ॥ २९ ॥ सिंधुराजोजयद्रथोद्विरथः ॥ ३० ॥ ३१ ॥ ३२ ३३ ॥ ॥ इतिउद्योगप० नैलकंठीयेभारतभा० पंचषष्ट्यधिकशततमोऽध्यायः ॥ १६५ ॥ ॥७॥

सौमदत्तिर्महेष्वासोरथयूथपयूथपः ॥ बलक्षयममित्राणांसुमहांतंकरिष्यति ॥ २९ ॥ सिंधुराजोमहाराजमतोमेद्विगुणोरथः ॥ योत्स्यतेसमरेराजन्विक्रांतो रथसत्तमः ॥ ३० ॥ द्रौपदीहरणेराजन्परिक्लिष्टश्चपांडवैः ॥ संस्मरंस्तंपरिक्लेशंयोत्स्यतेपरवीरहा ॥ ३१ ॥ एतेनहितदाराजंस्तपआस्थायदारुणम् ॥ सुदुर्लभोव रोलब्धःपांडवान्योद्धुमाहवे ॥ ३२ ॥ सएषरथशार्दूलस्तद्वैरंसंस्मरन्रणे ॥ योत्स्यतेपांडवैस्तातप्राणांस्त्यक्त्वासुदुस्त्यजान् ॥ ३३ ॥ ॥ इतिश्रीमहाभारतेउद्यो० रथातिरथसंख्यानपर्वणिपंचषष्ट्यधिकशततमोऽध्यायः ॥ १६५ ॥ ॥७॥ ॥ भीष्मउवाच ॥ ॥ सुदक्षिणस्तुकांबोजोरथएकगुणोमतः ॥ तवार्थसिद्धिमा कांक्षन्योत्स्यतेसमरेपरैः ॥ १ ॥ एतस्यरथसिंहस्यतवार्थेराजसत्तम ॥ पराक्रमंयथेंद्रस्यद्रक्ष्यंतिकुरवोयुधि ॥ २ ॥ एतस्यरथवंशेहितिग्मवेगप्रहारिणः ॥ कांबो जानांमहाराजशलभानामिवायतिः ॥ ३ ॥ नीलोमाहिष्मतीवासीनीलवर्मारथस्तव ॥ रथवंशेनकदनंशत्रूणांवैकरिष्यति ॥ ४ ॥ कृतवैरःपुराचैवसहदेवेनमा रिष ॥ योत्स्यतेसततंराजंस्तवार्थेकुरुनंदन ॥ ५ ॥ विंदानुविंदावावंत्यौसंमतौरथसत्तमौ ॥ कृतिनौसमरेतातदृढवीर्यपराक्रमौ ॥ ६ ॥ एतौतौपुरुषव्याघ्रौरिपु सैन्यंप्रधक्ष्यतः ॥ गदाप्रासासिनाराचैस्तोमरैश्चकरच्युतैः ॥ ७ ॥ युद्धाभिकामौसमरेक्रीडंताविवयूथपौ ॥ यूथमध्येमहाराजविचरंतौकृतांतवत् ॥ ८ ॥ त्रिगर्ता भ्रातरःपंचरथोदारामताममम ॥ कृतवैराश्चपार्थैस्तेविराटनगरेतदा ॥ ९ ॥ मकराइवराजेंद्रसमुद्धततरंगिणीम् ॥ गंगांविक्षोभयिष्यंतिपार्थानांयुधिवाहिनीम् ॥ १० ॥ तेरथाःपंचराजेंद्रयेषांसत्यरथोमुखम् ॥ एतेयोत्स्यंतिसंग्रामेसंस्मरंतःपुराकृतम् ॥ ११ ॥ व्यलीकंपांडवेयेनभीमसेनानुजेनह ॥ दिशोविजयताराजन् श्वेतवाहेनभारत ॥ १२ ॥ तेहनिष्यंतिपार्थानांतानसाद्यमहारथान् ॥ वरान्वरान्महेष्वासान्क्षत्रियाणांधुरंधरान् ॥ १३ ॥ लक्ष्मणस्तवपुत्रश्चतथादुःशासनस्य च ॥ उभौतौपुरुषव्याघ्रौसंग्रामेष्वपलायिनौ ॥ १४ ॥ तरुणौसुकुमारौचराजपुत्रौतरस्विनौ ॥ युद्धानांचविशेषज्ञौप्रणेतारौचसर्वशः ॥ १५ ॥ रथौतौकुरुशा र्दूलमतौमेरथसत्तमौ ॥ क्षत्रधर्मरतौवीरौमहत्कर्मकरिष्यतः ॥ १६ ॥ दंडधारोमहाराजरथएकोनरर्षभ ॥ योत्स्यतेतवसंग्रामेस्वेनसैन्येनपालितः ॥ १७ ॥

सुदक्षिणइति ॥ १ ॥ २ ॥ ३ ॥ रथवंशेनरथसंघेनसहितइतिशेषः वंशःपुंसिकुलेवेणौपृष्ठावयववर्गयोरितिमेदिनी ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ समुद्धततरंगिणींउच्छ्रितपताकांसेनांउच्छ्रिततरंगवतीं गंगांच ॥ १० ॥ सत्यरथोनाम पंचानांमुखंश्रेष्ठः ॥ ११ ॥ व्यलीकंअप्रियं ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥

॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ ॥ इतिउद्योगप० नैलकंठीयेभारतभा० षट्षष्ट्यधिकशततमोऽध्यायः ॥ १६६ ॥ ॥७॥ ॥ शकुनिरिति ॥ १ ॥ विकृतानिनानाविधानिआयुधानितैर्भू

बृहद्बलस्तथाराजाकौसल्योरथसत्तमः ॥ रथोमममतस्तातमहावेगपराक्रमः ॥ १८ ॥ एषयोत्स्यतिसंग्रामेस्वान्बंधून्संप्रहर्षयन् ॥ उग्रायुधोमहेष्वासोधार्तरा ष्ट्रहितेरतः ॥ १९ ॥ कृपःशारद्वतोराजन्रथयूथपयूथपः ॥ प्रियान्प्राणान्परित्यज्यप्रधक्ष्यतिरिपूंस्तव ॥ २० ॥ गौतमस्यमहर्षेर्यआचार्यस्यशरद्वतः ॥ कार्तिकेय इवाजेयःशरस्तंबात्सुतोभवत् ॥ २१ ॥ एषसेनाःसुबहुलाविविधायुधकार्मुकाः ॥ अग्निवत्समरेतातचरिष्यतिविनिर्दहन् ॥ २२ ॥ ॥ इतिश्रीमहाभारतेउद्योग० रथातिरथसंख्यानपर्वणिषट्षष्ट्यधिकशततमोऽध्यायः ॥ १६६ ॥ ॥७॥ ॥ भीष्मउवाच ॥ ॥ शकुनिर्मातुलस्तेसौरथएकोनराधिप ॥ प्रयुज्यपांडवैर्वैरंयोत्स्य तेनात्रसंशयः ॥ १ ॥ एतस्यसेनादुर्धर्षासमरेप्रतियायिनः ॥ विकृतायुधभूयिष्ठावायुवेगसमाजवे ॥ २ ॥ द्रोणपुत्रोमहेष्वासःसर्वानेवातिधन्विनः ॥ समरेचि त्रयोधीचदृढास्त्रश्चमहारथः ॥ ३ ॥ एतस्यहिमहाराजयथागांडीवधन्वनः ॥ शरासनविनिर्मुक्ताःसंसक्तायांतिसायकाः ॥ ४ ॥ नैषशक्योमयावीरःसंख्यातुंरथसत्त मः ॥ निर्दहेदपिलोकांस्त्रीनिच्छन्नेषमहारथः ॥ ५ ॥ क्रोधस्तेजश्चतपसासंभृतोश्रमवासिनाम् ॥ द्रोणेनानुगृहीतश्चदिव्यैरस्त्रैरुदारधीः ॥ ६ ॥ दोषस्त्वस्यमहानेको येनैवभरतर्षभ ॥ नमेरथोनातिरथोमतःपार्थिवसत्तम ॥ ७ ॥ जीवितंप्रियमत्यर्थमायुष्कामःसदाद्विजः ॥ नह्यस्यसदृशःकश्चिदुभयोःसेनयोरपि ॥ ८ ॥ हन्या देकरथेनैवदेवानामपिवाहिनीम् ॥ वपुष्मांस्तलघोषेणस्फोटयेदपिपर्वतान् ॥ ९ ॥ असंख्येयगुणोवीरःप्रहंतादारुणद्युतिः ॥ दंडपाणिरिवासह्यःकालवत्प्रचरि ष्यति ॥ १० ॥ युगांताग्निसमःक्रोधात्सिंहग्रीवोमहाद्युतिः ॥ एषभारतयुद्धस्यपृष्ठंसंशमयिष्यति ॥ ११ ॥ पितात्वस्यमहातेजावृद्धोपियुवभिर्वरः ॥ रणेकर्ममहत्क र्ताअत्रमेनास्तिसंशयः ॥ १२ ॥ अस्त्रवेगानिलोद्भूतःसेनाकक्षेधनोत्थितः ॥ पांडुपुत्रस्यसैन्यानिप्रधक्ष्यतिरणेधृतः ॥ १३ ॥ रथयूथपयूथानांयूथपोयंनरर्षभः ॥ भरद्वाजात्मजःकर्ताकर्मतीव्रंहितंतव ॥ १४ ॥ सर्वमूर्धाभिषिक्तानामाचार्यःस्थविरोगुरुः ॥ गच्छेदंतंसृंजयानांप्रियस्त्वस्यधनंजयः ॥ १५ ॥ नैषजातुमहेष्वा सःपार्थमक्लिष्टकारिणम् ॥ हन्यादाचार्यकंदीप्तंसंस्मृत्यगुणनिर्जितम् ॥ १६ ॥ श्लाघतेयंसदावीरपार्थस्यगुणविस्तरैः ॥ पुत्रादभ्यधिकंचैनंभारद्वाजोनुपश्यति ॥ १७ ॥ हन्यादेकरथेनैवदेवगंधर्वमानुषान् ॥ एकीभूतानपिरणेदिव्यैरस्त्रैःप्रतापवान् ॥ १८ ॥

यिष्ठा ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ आश्रमवासिनामृषीणांक्रोधस्तेजश्चतयोःसमुदायरूपइत्यर्थः आश्रमेत्याकारस्यपूर्वरूपमार्षम् ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ पृष्ठंशेषम् ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥

॥ १९ ॥ २० ॥ सत्यश्रवाःसत्यकीर्तिः ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ उत्स्मयन्हृष्यन् ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ गजांकुशधरेषुगजयुद्धकुशलेषुश्रेष्ठः

पौरवोराजशार्दूलस्तवराजन्महारथः ॥ मतोममरथोदारःपरवीररथारुजः ॥ १९ ॥ स्वेनसैन्येनमहताप्रतपन्शत्रुवाहिनीम् ॥ प्रधक्ष्यतिसपंचालान्कक्षमग्निगतिर्यथा ॥ २० ॥ सत्यश्रवारथस्त्वेकोराजपुत्रोबृहद्बलः ॥ तवराजन्रिपुबलेकालवत्प्रचरिष्यति ॥ २१ ॥ एतस्ययोधाराजेंद्रविचित्रकवचायुधाः ॥ विचरिष्यंतिसंग्रामेनिघ्नंतःशात्रवांस्तव ॥ २२ ॥ वृषसेनोरथस्तेग्र्यःकर्णपुत्रोमहारथः ॥ प्रधक्ष्यतिरिपूणांतेबलंतुबलिनांवरः ॥ २३ ॥ जलसंधोमहातेजाराजन्रथवरस्तव ॥ त्यक्ष्यतेसमरेप्राणान्माधवःपरवीरहा ॥ २४ ॥ एषयोत्स्यतिसंग्रामेगजस्कंधविशारदः ॥ रथेनवामहाबाहुःक्षपयन्शत्रुवाहिनीम् ॥ २५ ॥ रथएषमहाराजमतोमेराजसत्तम ॥ त्वदर्थेत्यक्ष्यतेप्राणान्सहसैन्योमहारणे ॥ २६ ॥ एषविक्रांतयोधीचचित्रयोधीचसंगरे ॥ वीतभीश्चापितेराजन्शत्रुभिःसहयोत्स्यते ॥ २७ ॥ बाह्लीकोतिरथश्चैवसमरेचानिवर्तनः ॥ ममराजन्मतोयुद्धेशूरोवैवस्वतोपमः ॥ २८ ॥ नह्येषसमरंप्राप्यनिवर्तेतकथंचन ॥ यथासततगोराजन्सहिहन्यात्परान्रणे ॥ २९ ॥ सेनापतिर्महाराजसत्यवांस्तेमहारथः ॥ रणेष्वद्भुतकर्माचरथीपररथारुजः ॥ ३० ॥ एतस्यसमरंदृष्ट्वानव्यथास्तिकथंचन ॥ उत्स्मयन्नुत्पतत्येषपरान्रथपथेस्थितान् ॥ ३१ ॥ एषचारिषुविक्रांतःकर्मसत्पुरुषोचितम् ॥ कर्ताविमर्देसुमहत्त्वदर्थेपुरुषोत्तमः ॥ ३२ ॥ अलंबुषोराक्षसेंद्रःक्रूरकर्मामहारथः ॥ हनिष्यतिपरान्राजन्पूर्ववैरमनुस्मरन् ॥ ३३ ॥ एषराक्षससैन्यानांसर्वेषांरथसत्तमः ॥ मायावीदृढवैरश्चसमरेविचरिष्यति ॥ ३४ ॥ प्राग्ज्योतिषाधिपोवीरोभगदत्तःप्रतापवान् ॥ गजांकुशधरश्रेष्ठोरथेचैवविशारदः ॥ ३५ ॥ एतेनयुद्धमभवत्पुरागांडीवधन्वनः ॥ दिवसान्सुबहून्राजन्नुभयोर्जयगृद्धिनोः ॥ ३६ ॥ ततःसखायंगांधारेमानयन्पाकशासनम् ॥ अकरोत्संविदंतेनपांडवेनमहात्मना ॥ ३७ ॥ एषयोत्स्यतिसंग्रामेगजस्कंधविशारदः ॥ ऐरावतगतोराजादेवानामिववासवः ॥ ३८ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिरथातिरथसंख्यानपर्वणिसप्तषष्ट्यधिकशततमोऽध्यायः ॥ १६७ ॥ ॥ ७ ॥ ॥ भीष्मउवाच ॥ ॥ अचलोवृषकश्चैवसहितौभ्रातरावुभौ ॥ रथौतवदुराधर्षौशत्रून्विध्वंसयिष्यतः ॥ १ ॥ बलवंतौनरव्याघ्रौदृढक्रोधौप्रहारिणौ ॥ गांधारमुख्यौतरुणौदर्शनीयौमहाबलौ ॥ २ ॥ सखातेदयितोनित्यंयएषरणकर्कशः ॥ उत्साहयतिराजंस्त्वांविग्रहेपांडवैःसह ॥ ३ ॥

सप्तमीशौंडैरितिसमासः ॥ ३५ ॥ ३६ ॥ संविदंमैत्रीम् ॥ ३७ ॥ ३८ ॥ ॥ इतिउद्योगप० नैलकंठीयेभारतभावदीपेसप्तषष्ट्यधिकशततमोऽध्यायः ॥ १६७ ॥ ॥ ७ ॥ ॥ अचलइति ॥ १ ॥ २ ॥ ३ ॥

॥ ४ ॥ विचेतनःमूर्खः ॥ ५ ॥ घृणीनिंदकः ॥ ६ ॥ करणानांसहजकवचादीनाम् ॥ ७ ॥ ८ ॥ प्रमादीस्वीयंकल्पनावाक्यंविस्मरतिच ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ भवान्कर्णोऽर्धरथोमह्यंममममतइतिगांगेयोवदेत्तन्नमृषेतिसर्वस्यजगतोमतइतिसंबंधः त्वद्वाक्यात्सर्वेपिमामवमंस्यंतइतिभावः ॥ १३ ॥ १४ ॥ बिभेदयिषुर्भेदंकर्तुमिच्छुः अपरागंद्वेषम् ॥ १५ ॥ १६ ॥ १७ ॥ प्रकुरुतेप्रकारंभेदंकुरुते प्रकारस्तुल्य

परुषःकत्थनोनीचःकर्णोवैकर्तनस्तव ॥ मंत्रीनेताचबंधुश्चमानीचात्यंतमुच्छ्रितः ॥ ४ ॥ एषनैवरथःकर्णोनचाप्यतिरथोरणे ॥ वियुक्तःकवचेनैषसहजेनविचेतनः ॥ ५ ॥ कुंडलाभ्यांचदिव्याभ्यांवियुक्तःसततंघृणी ॥ अभिशापाच्चरामस्यब्राह्मणस्यचभाषणात् ॥ ६ ॥ करणानांवियोगाच्चतेनमेऽर्धरथोमतः ॥ नैषफाल्गुनमासाद्यपुनर्जीवन्विमोक्ष्यते ॥ ७ ॥ ततोब्रवीत्पुनर्द्रोणःसर्वशस्त्रभृतांवरः ॥ एवमेतद्यथात्थत्वंनमिथ्यास्तिकदाचन ॥ ८ ॥ रणेरणेभिमानीचविमुखश्चापिदृश्यते ॥ घृणीकर्णःप्रमादीचतेनमेऽर्धरथोमतः ॥ ९ ॥ एतच्छ्रुत्वातुराधेयःक्रोधादुत्फाल्यलोचने ॥ उवाचभीष्मंराधेयस्तुदन्वाग्भिःप्रतोदवत् ॥ १० ॥ पितामहयथेष्टंमांवाक्शरैरुपकृंतसि ॥ अनागसंसदाद्वेषादेवमेवपदेपदे ॥ ११ ॥ मर्षयामिचतत्सर्वंदुर्योधनकृतेनवै ॥ त्वंतुमांमन्यसेमंदंयथाकापुरुषंतथा ॥ १२ ॥ भवानर्धरथोमह्यंमतोवैनात्रसंशयः ॥ सर्वस्यजगतश्चैवगांगेयोनमृषावदेत् ॥ १३ ॥ कुरूणामहितोनित्यंनचराजावबुध्यते ॥ कोहिनामसमानेषुराजसूदारकर्मसु ॥ १४ ॥ तेजोवधमिमंकुर्याद्बिभेदयिषुराहवे ॥ यथात्वंगुणविद्वेषादपरागंचिकीर्षसि ॥ १५ ॥ नहायनैर्नपलितैर्नवित्तैर्नचबंधुभिः ॥ महारथत्वंसंख्यातुंशक्यंक्षत्रस्यकौरव ॥ १६ ॥ बलज्येष्ठंस्मृतंक्षत्रंमंत्रज्येष्ठाद्विजातयः ॥ धनज्येष्ठाःस्मृतावैश्याःशूद्रास्तुवयसाधिकाः ॥ १७ ॥ यथेच्छकंस्वयंब्रूयारथानतिरथांस्तथा ॥ कामद्वेषसमायुक्तोमोहात्प्रकुरुतेभवान् ॥ १८ ॥ दुर्योधनमहाबाहोसाधुसम्यगवेक्ष्यताम् ॥ त्यज्यतांदुष्टभावोयंभीष्मःकिल्बिषकृत्तव ॥ १९ ॥ भिन्नाहिसेनानृपतेदुःसंधेयाभवत्युत ॥ मौलाहिपुरुषव्याघ्रकिमुनानासमुत्थिताः ॥ २० ॥ एषांद्वैधंसमुत्पन्नंयोधानांयुधिभारत ॥ तेजोवधोनःक्रियतेप्रत्यक्षेणविशेषतः ॥ २१ ॥ रथानांक्वचविज्ञानंक्वचभीष्मोल्पचेतनः ॥ अहमावारयिष्यामिपांडवानामनीकिनीम् ॥ २२ ॥ आसाद्यमाममोघेषुंगमिष्यंतिदिशोदश ॥ पांडवाःसहपंचालाःशार्दूलंवृषभाइव ॥ २३ ॥ क्वचयुद्धंविमर्दोवामंत्रेसुव्याहृतानिच ॥ क्वचभीष्मोगतवयामंदात्माकालचोदितः ॥ २४ ॥ एकाकीस्पर्धतेनित्यंसर्वेणजगतासह ॥ नचान्यंपुरुषंकंचिन्मन्यतेमोघदर्शनः ॥ २५ ॥ श्रोतव्यंखलुवृद्धानामितिशास्त्रनिदर्शनम् ॥ नत्वेवह्यतिवृद्धानांपुनर्बालाहितेमताः ॥ २६ ॥

भेदयोरितिविश्वः ॥ १८ ॥ १९ ॥ मौलाःपारंपर्यागताःतेपिभिन्नाःसंतोदुःसंधेयाभवंतिकिमुनानापृथक्भूताःसंतएककार्यार्थंसमुत्थिताइति ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ क्वचेति युद्धेवृद्धोमंत्रेषुमूर्खश्चअशक्तत्वान्नष्टबुद्धित्वाच्चायोग्यइतिभावः ॥ २४ ॥ २५ ॥ येऽतिवृद्धास्तेपुनर्बालाएवमेमतास्तादृशश्चायंभीष्मइत्यर्थः ॥ २६ ॥

॥ २७ ॥ त्वयिहंतरिकुतोभीष्मंयशोगमिष्यतीत्याशंक्याह कृतइति ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ नहिछिंद्यामित्यन्वयः भेदभयादेवाहंत्वद्धनंकुर्यामित्यर्थः आशंकायांलकारः ॥ ३२ ॥ ३३ ॥

अहमेकोहनिष्यामिपांडवानामनीकिनीम्॥ सुयुद्धेराजशार्दूलयशोभीष्मंगमिष्यति ॥२७॥ कृतःसेनापतिस्त्वेषत्वयाभीष्मोनराधिप॥ सेनापतौयशोगंतान तुयोधान्कथंचन॥ २८॥ नाहंजीवतिगांगेययोत्स्येराजन्कथंचन॥ हतेभीष्मेतुयोद्धास्मिसर्वैरेवमहारथैः॥ २९॥ ॥ भीष्मउवाच॥ ॥ समुद्यतोयंभारोमे सुमहान्सागरोपमः॥ धार्तराष्ट्रस्यसंग्रामेवर्षपूगाभिचिंतितः॥ ३०॥ तस्मिन्नभ्यागतेकालेप्रतमेलोमहर्षणे॥ मिथोभेदोनमेकार्यस्तेनजीवसिसूतज॥ ३१॥ नत्यहंत्वद्यविक्रम्यस्यविरोपिशिशोस्तव॥ युद्धश्रद्धामहंछिंद्यांजीवितस्यचसूतज॥ ३२॥ जामदग्न्येनरामेणमहास्त्राणिविमुंचता॥नमेव्यथाकृताकाचित्त्वंतु मेकिंकरिष्यसि॥ ३३॥ कामंनैतत्प्रशंसंतिसंतःस्वबलसंस्तवम्॥ वक्ष्यामितुत्वांसंतप्तोनिहीनकुलपांसन॥३४॥ समेतंपार्थिवंक्षत्रंकाशिराजस्वयंवरे॥ निर्जि त्यैकरथेनैवयाःकन्यास्तरसाहृताः॥ ३५॥ ईदृशानांसहस्राणिविशिष्टानामथोपुनः॥ मयैकेननिरस्तानिससैन्यानिरणाजिरे॥ ३६॥ त्वांप्राप्यवैरपुरुषंकुरू णामनयोमहान्॥ उपस्थितोविनाशायययतस्वपुरुषोभव॥ ३७॥ युध्यस्वसमरेपार्थयेनविस्पर्धसेसह॥ द्रक्ष्यामित्वांविनिर्मुक्तमस्माद्युद्धात्सुदुर्मते॥ ३८॥ त मुवाचततोराजाधार्तराष्ट्रःप्रतापवान्॥ मांसमीक्षस्वगांगेयकार्यंहिमहदुद्यतम्॥३९॥चिंत्यतामिदमेकाग्रंममनिःश्रेयसंपरम्॥उभावपिभवंतौमेमहत्कर्मक रिष्यतः॥ ४०॥ भूयश्चश्रोतुमिच्छामिपरेषांरथसत्तमान्॥ येचैवातिरथास्तत्रयेचैवरथयूथपाः॥ ४१॥ बलाबलममित्राणांश्रोतुमिच्छामिकौरव॥ प्रज्ञाता यांरजन्यांवैइदंयुद्धंभविष्यति॥ ४२॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिरथातिरथसंख्यानप०भीष्मकर्णसंवादेअष्टषष्ट्यधिकशततमोऽध्यायः॥ १६८॥ ॥ भीष्मउवाच॥ ॥ एतेरथास्तवाख्यातास्तथैवातिरथानृप॥ येचाप्यर्धरथाराजन्पांडवानामतःशृणु॥ १॥ यदिकौतूहलंतेद्यपांडवानांबलेनृप॥ रथसंख्यांशृ णुष्वत्वंसहैभिर्वसुधाधिपैः॥ २॥ स्वयंराजारथोदारःपांडवःकुंतिनंदनः॥ अग्निवत्समरेतातचरिष्यतिनसंशयः॥ ३॥ भीमसेनस्तुराजेंद्ररथोष्टगुणसंमितः॥न तस्यास्तिसमोयुद्धेगदयासायकैरपि॥ ४॥ नागायुतबलोमानीतेजसानसमानुषः॥ माद्रीपुत्रौचरथिनौद्वावेवपुरुषर्षभौ॥ ५॥

॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ रथादिसंख्यातात्पर्यंतुभीष्मद्रोणौसमर्थाविपिपांडवान्नहनिष्यतः कर्णोपिकुंतीवरदानात्भीमादीन्हंतुंशक्तोपिनहनिष्यति अर्जुस्त्वनेनदुर्जे यएवेतिपांडवानामेवजयइति ॥ ४२ ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेअष्टषष्ट्यधिकशततमोऽध्यायः॥ १६८ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ एतेइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ उद्यतांउद्यच्छतांक्षिप्तामितियावत् उद्यंतुमितिपाठांतरं ज्योज्येकौटिल्येमर्मपीडनेइतियावत् भुजकौटिल्येःस्यरूपं पांसुविकर्षणेपांसुषुविकर्षणेभूमौमुष्टियुद्धेइत्यर्थः ॥ १२ ॥

अश्विनाविवरूपेणतेजसाचसमन्वितौ॥एतेचमूमुखगताःस्मरंतःक्लेशमुत्तमम्॥६॥रुद्रवत्प्रचरिष्यंतितत्रमेनास्तिसंशयः॥सर्वएवमहात्मानःशालस्तंभाइवो द्गताः॥ ७॥ प्रादेशेनाधिकाःपुंभिरन्यैस्तेचप्रमाणतः॥ सिंहसंहननाःसर्वेपांडुपुत्रामहाबलाः॥ ८॥ चरितब्रह्मचर्याश्चसर्वेतातपस्विनः॥ क्रीमंतःपुरुषव्याघ्रा व्याघ्राइवबलोत्कटाः॥ ९॥ जवेप्रहारेसंमर्देसर्वएवातिमानुषाः॥ सर्वैर्जिताःमहीपालादिग्जयेभरतर्षभ॥ १०॥ नचैषांपुरुषाःकेचिदायुधानिगदाःशरान्॥ विषहंतिसदाकर्तुमधिज्यान्यपिकौरव॥ ११॥ उद्यतांवागदागुर्वीःशरान्वाक्षेप्तुमाहवे॥ जवेलक्ष्यस्यहरणेभोज्येपांसुविकर्षणे॥ १२॥ बालैरपिभवंतस्तैःसर्व एवविशेषिताः॥एतत्सैन्यंसमासाद्यसर्वएवबलोत्कटाः॥ १३॥ विध्वंसयिष्यंतिरणेमास्मतैःसहसंगमः॥ एकैकशस्तेसंमर्देहन्युःसर्वान्महीक्षितः॥ १४॥ प्रत्य क्षंतवराजेंद्रराजसूयेयथाभवत्॥ द्रौपद्याश्चपरिक्लेशंद्यूतेचपरुषागिरः॥ १५॥ तेस्मरंतश्चसंग्रामेचरिष्यंतिचरुद्रवत्॥ लोहिताक्षोगुडाकेशोनारायणसहायवान्॥ १६॥ उभयोःसेनयोर्वीरोरथोनास्तीतितादृशः॥ नहिदेवेषुवापूर्वमनुष्येषूरगेषुच॥ १७॥ राक्षसेष्वथयक्षेषुनरेषुकुतएवतु॥ भूतोथवाभविष्योवारथः कश्चिन्मयाश्रुतः॥ १८॥ समायुक्तोमहाराजरथःपार्थस्यधीमतः॥ वासुदेवश्चसंयंतायोद्धाचैवधनंजयः॥ १९॥ गांडीवंचधनुर्दिव्यंतेचाश्यावातरंहसः॥अभे द्यंकवचंदिव्यमक्षय्यौचमहेषुधी॥ २०॥ अस्त्रग्रामश्चमाहेंद्रोरौद्रःकौबेरएवच॥ याम्यश्चवारुणश्चैवगदाश्चोग्रप्रदर्शनाः॥ २१॥ वज्रादीनिचमुख्यानिनानाप्र हरणानिच॥ दानवानांसहस्राणिहिरण्यपुरवासिनाम्॥ २२॥ हतान्येकरथेनाजौकस्तस्यसदृशोरथः॥ एषहन्याद्धिसंरंभीबलवान्सत्यविक्रमः॥ २३॥ तवसेनां महाबाहुःस्वांचैवपरिपालयन्॥ अहंचैनंप्रत्युदियामाचार्योवाधनंजयम्॥ २४॥ नतृतीयोस्तिराजेंद्रसेनयोरुभयोरपि॥ यएनंशरवर्षाणिवर्षंतमुदियाद्रथी॥ २५ जीमूतइवघर्मांतेमहावातसमीरितः॥ समायुक्तस्तुकौंतेयोवासुदेवसहायवान्॥ तरुणश्चकृतीचैवजीर्णावावामुभावपि॥ २६॥ ॥ वैशंपायनउवाच॥ ॥ एत च्छ्रुत्वातुभीष्मस्यराज्ञांदध्वंसिरेतदा॥ कांचनांगदिनःपीनाभुजाश्चंदनरूषिताः॥ २७॥ मनोभिःसहसंवेगैःसंस्मृत्यचपुरातनम्॥ सामर्थ्यंपांडवेयानांयथाप्रत्य क्षदर्शनात्॥ २८॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिरथातिरथसंख्यानप०पांडवरथातिरथसंख्यायामूनसप्तत्यधिकशततमोऽध्यायः॥ १६९॥ ॥ ७ ॥

॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ प्रत्युदियांयुद्धेसंमुखःस्यां॥ २४ ॥ २५ ॥ २६ ॥ दध्वंसिरेविगलिताः॥ २७ ॥ २८ ॥ ॥ इ० उ० नै० भा० ऊनसप्तत्यधिकशततमोऽध्यायः ॥ १६९ ॥

द्रौपदेयाइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ वीरगतेवीरैरनुस्तते ॥ ९ ॥ सितौबद्धौ ॥ १० ॥ एकायनगतौमरणैकशरणौ घट्टितारौघट्टनंसंघट्टकरिष्यतः ॥ १२ ॥ १३ ॥ त्यक्तात्मा ॥ १४ ॥ ॥ इतिउद्योग०नैलकंठीयेभारतभा०सप्तत्यधिकशततमोऽध्यायः ॥ १७० ॥ ॥७॥ ॥ पंचालेति ॥ १ ॥ नाशयन्पूर्वसंस्थितं प्राचीनंस्त्रीत्वेनावस्थानंअदर्शयन् पौरुषं दर्शयन्नित्यर्थः यद्वा पूर्वसंस्थितंपूर्वव्यूहसंस्थानंनाशयन्सैन्यानिविद्रावयन्नित्यर्थः ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

भीष्मउवाच ॥ द्रौपदेयामहाराजसर्वेपंचमहारथाः ॥ वैराटिरुत्तरश्चैवरथोदारोमतोमम ॥ १ ॥ अभिमन्युर्महाबाहूरययूपपूथपः ॥ समःपार्थेनसमरेवासु
देवेनचारिहा ॥ २ ॥ लध्वस्त्रश्चित्रयोधीचमनस्वीचदृढव्रतः ॥ संस्मरन्वैपरिक्लेशंस्वपितुर्विक्रमिष्यति ॥ ३ ॥ सात्यकिर्माधवःशूरोरथयूथपयूथपः ॥ एषट्शिन्र
वीराणाममर्षीजितसाध्वसः ॥ ४ ॥ उत्तमौजास्तथाराजन्रथोदारोमतोमम ॥ युधामन्युश्चविक्रांतोरथोदारोमतोमम ॥ ५ ॥ एतेषांबहुसाहस्रारथानागाहया
स्तथा ॥ योत्स्यंतेतेतनूस्त्यक्त्वाकुंतीपुत्रप्रियेप्सया ॥ ६ ॥ पांडवैःसहराजेंद्रतवसेनासुभारत ॥ अग्निमारुतवद्राजन्नाद्रवंतःपरस्परम् ॥ ७ ॥ अजेयौसमरेवृद्धौवि
राटद्रुपदौतथा ॥ महारथौमहावीर्यौमतौमेपुरुषर्षभौ ॥ ८ ॥ वयोवृद्धावपिह्येतौक्षत्रधर्मपरायणौ ॥ यतिष्येतेपरंशक्त्यास्थितौवीरगतेपथि ॥ ९ ॥ संबंधकेनरा
जेंद्रतौतुवीर्यबलान्वयात् ॥ आर्यवृत्तौमहेष्वासौस्नेहवीर्यसितावुभौ ॥ १० ॥ कारणंप्राप्यतुनराःसर्वएवमहाभुजाः ॥ शूरावाकातरावापिभवंतिकुरुपुंगव
॥ ११ ॥ एकायनगतावेतौपार्थिवौवृद्धधन्विनौ ॥ प्राणांस्त्यक्त्वापरंशक्त्याघट्टितारौपरंतप ॥ १२ ॥ पृथगक्षौहिणीभ्यांतावुभौसंयतिदारुणौ ॥ संबंधिभावंर
क्षंतौमहत्कर्मकरिष्यतः ॥ १३ ॥ लोकवीरौमहेष्वासौत्यक्त्वात्मानौचभारत ॥ प्रत्ययंपरिरक्षंतौमहत्कर्मकरिष्यतः ॥ १४ ॥ ॥ इतिश्रीमहाभारतेउद्योगप०रथा
तिरथसंख्यानप०सप्तत्यधिकशततमोऽध्यायः ॥ १७० ॥ ॥७॥ ॥ भीष्मउवाच ॥ ॥ पंचालराजस्यसुतोराजन्परपुरंजयः ॥ शिखंडीरथमुख्योमेमतःपार्थ
स्यभारत ॥ १ ॥ एषयोत्स्यतिसंग्रामेनाशयन्पूर्वसंस्थितम् ॥ परंयशोविप्रथयंस्तवसेनासुभारत ॥ २ ॥ एतस्यबहुलाःसेनाःपंचालाश्चप्रभद्रकाः ॥ तेनासौरथवं
शेनमहत्कर्मकरिष्यति ॥ ३ ॥ धृष्टद्युम्नश्चसेनानीःसर्वसेनासुभारत ॥ मतोमेतिरथोराजन्द्रोणशिष्योमहारथः ॥ ४ ॥ एषयोत्स्यतिसंग्रामेसूदयन्वैपरान्रणे ॥
भगवानिवसंक्रुद्धःपिनाकीयुगसंक्षये ॥ ५ ॥ एतस्यसद्रथानीकंकथयंतिरणप्रियाः ॥ बहुत्वात्सागरप्रख्यंदेवानामिवसंयुगे ॥ ६ ॥ क्षत्रधर्मातुराजेंद्रमतोमेधर्
रथोनृप ॥ धृष्टद्युम्नस्यतनयोबाल्यान्नातिकृतश्रमः ॥ ७ ॥ शिशुपालसुतोवीरश्चेदिराजोमहारथः ॥ धृष्टकेतुर्महेष्वासःसंबंधीपांडवस्यह ॥ ८ ॥

॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ क्षयिष्यतःसामर्थ्यंदर्शयिष्यतः ऐश्वर्यार्थोयंक्षयतिः ॥ १३ ॥ १४ ॥ १५ ॥ विदुषःविद्वांसः ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥
एषचेदिपतिःशूरःसहपुत्रेणभारत ॥ महारथानांसुकरंमहत्कर्मकरिष्यति ॥ ९ ॥ क्षत्रधर्मरतोमत्र्यंमतःपरपुरंजयः ॥ क्षत्रदेवस्तुराजेंद्रपांडवेषुरथोत्तमः ॥ १० ॥
जयंतश्चामितौजाश्चसत्यजिच्चमहारथः ॥ महारथामहात्मानःसर्वेपांचालसत्तमाः ॥ ११ ॥ योत्स्यंतेसमरेतातसंरब्धाइवकुंजराः ॥ अजोभोजश्चविक्रांतौपांड
वार्थेमहारथौ ॥ १२ ॥ योत्स्येतेबलिनौशूरौपरंशक्त्याक्षयिष्यतः ॥ शीघ्रास्त्रश्चित्रयोद्धारःकृतिनोदृढविक्रमाः ॥ १३ ॥ केकयाःपंचराजेंद्रभ्रातरोदृढविक्रमाः ॥
सर्वेचैवरथोदाराःसर्वेलोहितकध्वजाः ॥ १४ ॥ काशिकःसुकुमारश्चनीलोयश्चापरोनृप ॥ सूर्यदत्तश्चशंखश्चमदिराश्चश्वनामतः ॥ १५ ॥ सर्वएवरथोदाराःस
र्वेचाहवलक्षणाः ॥ सर्वास्त्रविदुषःसर्वेमहात्मानोमतामम ॥ १६ ॥ वार्धक्षेमिर्महाराजमतोममहारथः ॥ चित्रायुधश्चनृपतिर्मतोमेरथसत्तमः ॥ १७ ॥ सहि
संग्रामशोभीचभक्तश्चापिकिरीटिनः ॥ चेकितानःसत्यधृतिःपांडवानांमहारथौ ॥ द्वाविमौपुरुषव्याघ्रौरथोदारौमतौमम ॥ १८ ॥ व्याघ्रदत्तश्चराजेंद्रचंद्रसेनश्च
भारत ॥ मतौममरथोदारौपांडवानांनसंशयः ॥ १९ ॥ सेनाबिंदुश्चराजेंद्रक्रोधहंताचनामतः ॥ यःसमोवासुदेवेनभीमसेनेनवाविभो ॥ २० ॥ सयोत्स्यतिहि
विक्रम्यसमरेतवसैनिकैः ॥ मांचद्रोणंकृपंचैवयथासंमन्यतेभवान् ॥ २१ ॥ तथाससमरश्लाघीमंतव्योरथसत्तमः ॥ काश्यःपरमशीघ्रास्त्रःश्लाघनीयोनरोत्त
मः ॥ २२ ॥ रथएकगुणोमत्र्यंज्ञेयःपरपुरंजयः ॥ अयंचयुधिविक्रांतोमंतव्योष्टगुणोरथः ॥ २३ ॥ सत्यजित्समरश्लाघीद्रुपदस्यात्मजोयुवा ॥ गतःसोतिरथत्वं
हियृष्टद्युम्नेनसंमितः ॥ २४ ॥ पांडवानांयशस्कामःपरंकर्मकरिष्यति ॥ अनुरक्तश्चशूरश्चरथोयमपरोमहान् ॥ २५ ॥ पांड्यराजोमहावीर्यःपांडवानांधुरंधरः ॥
दृढधन्वामहेष्वासःपांडवानांमहारथः ॥ २६ ॥ श्रेणिमान्कौरवश्रेष्ठवसुदानश्चपार्थिवः ॥ उभावेतावतिरथौमतौपरपुरंजयौ ॥ २७ ॥ ॥ इतिश्रीमहाभारते
उद्योगपर्वणिरथातिरथसंख्यानपर्वणिएकसप्तत्यधिकशततमोऽध्यायः ॥ १७१ ॥ ॥७॥ ॥ भीष्मउवाच ॥ ॥ रोचमानोमहाराजपांडवानांमहारथः ॥ यो
त्स्यतेऽमरवत्संख्येपरसैन्येषुभारत ॥ १ ॥ पुरुजित्कुंतिभोजश्चमहेष्वासोमहाबलः ॥ मातुलोभीमसेनस्यसचमेतिरथोमतः ॥ २ ॥ एषवीरोमहेष्वासःकृतीचनि
पुणश्चह ॥ चित्रयोधीचशक्तश्चमतोमेरथपुंगवः ॥ ३ ॥ सयोत्स्यतिहिविक्रम्यमघवानिवदानवैः ॥ योधायेचास्यविख्याताःसर्वेयुद्धविशारदाः ॥ ४ ॥

॥ २६ ॥ २७ ॥ ॥ इति०उद्योगप०नै०भारत०एकसप्तत्यधिकशततमोऽध्यायः ॥ १७१ ॥ ॥७॥ ॥ रोचमानइति ॥ १ ॥ भीमसेनस्येतिकोधोद्दीपनार्थंभीमसेनसाम्यार्थंवाविशेषणम् ॥ २ ॥ ३ ॥ ४ ॥

भागिनेयकृतेवीरःसकरिष्यतिसंगरे ॥ सुमहत्कर्मपांडूनांस्थितःप्रियहितेरतः ॥ ५ ॥ भैमसेनिर्महाराजहैडिंबोराक्षसेश्वरः ॥ मतोमेबहुमायावीरथयूथपयूथपः ॥ ६ ॥ योत्स्यतेसमरेतातमायावीसमरप्रियः ॥ येचास्यराक्षसावीराःसचिवावशवर्तिनः ॥ ७ ॥ एतेचान्येचबहवोनानाजनपदेश्वराः ॥ समेताःपांडवस्यार्थे वासुदेवपुरोगमाः ॥ ८ ॥ एतेप्राधान्यतोराजन्पांडवस्यमहात्मनः ॥ रथाश्चातिरथाश्चैवयेचान्येर्धरथानृप ॥ ९ ॥ नेष्यंतिसमरेसेनांभीमांयौधिष्ठिरींनृप ॥ महेंद्रेणेववीरेणपाल्यमानांकिरीटिना ॥ १० ॥ तैरहंसमरेवीरमायाविद्भिर्जयैषिभिः ॥ योत्स्यामिजयमाकांक्षन्नथवानिधनंरणे ॥ ११ ॥ वासुदेवंचपार्थंचचक्रगांडीवधारिणौ ॥ संध्यागताविवार्केंदूसमेष्येतेरथोत्तमौ ॥ १२ ॥ येचैवतेरथोदाराःपांडुपुत्रस्यसैनिकाः ॥ सहसैन्यानहंतांश्चप्रतीयांरणमूर्धनि ॥ १३ ॥ एते रथाश्चातिरथाश्चतुभ्यंयथाप्रधानंनृपकीर्तितामया ॥ तथापरेयेर्धरथाश्चकेचित्तथैवतेषामपिकौरवेंद्र ॥ १४ ॥ अर्जुनंवासुदेवंचयेचान्येतत्रपार्थिवाः ॥ सर्वांस्तान्वारयिष्यामियावद्वक्ष्यामिभारत ॥ १५ ॥ पांचाल्यंतुमहाबाहोनाहंहन्यांशिखंडिनम् ॥ उद्यतेषुमथोदृष्ट्वाप्रतियुध्यंतमाहवे ॥ १६ ॥ लोकस्तंवेदयदहंपितुःप्रियचिकीर्षया ॥ प्राप्तंराज्यंपरित्यज्यब्रह्मचर्यव्रतेस्थितः ॥ १७ ॥ चित्रांगदंकौरवाणामाधिपत्येभ्यषेचयम् ॥ विचित्रवीर्यंचशिशुंयौवराज्येभ्यषेचयम् ॥ १८ ॥ देवव्रतत्वंविज्ञाप्यपृथिवींसर्वराजसु ॥ नैवहन्यांस्त्रियंजातुनस्त्रीपूर्वंकदाचन ॥ १९ ॥ सहिस्त्रीपूर्वकोराजन्शिखंडीयदितेश्रुतः ॥ कन्याभूत्वापुमान्जातोनयोत्स्येतेनभारत ॥ २० ॥ सर्वांस्त्वन्यान्हनिष्यामिपार्थिवान्भरतर्षभ ॥ यान्समेष्यामिसमरेनतुकुंतीसुतान्नृप ॥ २१ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिरथातिरथसंख्यानप० द्विसप्तत्यधिकशततमोऽध्यायः ॥ १७२ ॥ ॥ ७ ॥ ॥ रथातिरथसंख्यानपर्वसमाप्तम् ॥ ॥ अथांबोपाख्यानपर्व ॥ ॥ दुर्योधनउवाच ॥ ॥ किमर्थंभरतश्रेष्ठनैवहन्याःशिखंडिनम् ॥ उद्यतेषुमथोदृष्ट्वासमरेष्वाततायिनम् ॥ १ ॥ पूर्वमुक्त्वामहाबाहोपंचालान्सहसोमकैः ॥ हनिष्यामीतिगांगेयतन्मेब्रूहिपितामह ॥ २ ॥ ॥ भीष्मउवाच ॥ ॥ शृणुदुर्योधनकथांसहैभिर्वसुधाधिपैः ॥ यदर्थंयुधिसंप्रेक्ष्यनाहंहन्यांशिखंडिनम् ॥ ३ ॥ महाराजोममपिताशांतनुर्लोकविश्रुतः ॥ दिष्टांतमापधर्मात्मासमयेभरतर्षभ ॥ ४ ॥ मिशक्तिंधारयामि ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ देवव्रतत्वंब्रह्मचारिव्रतत्वं स्त्रीसंमुखेगमनेहिदृष्टिमैथुनंस्यात् स्त्रीपूर्वदर्शनेपिमनसातदीयस्त्रीभावस्मरणेनविकारःस्यादितिभावः ॥ १९ ॥ २० ॥ २१ ॥ इतिउद्योगप० नै० भारतभावदीपेद्विसप्तत्यधिकशततमोऽध्यायः ॥ १७२ ॥ ॥ ७ ॥ ॥ किमर्थमिति ॥ १ ॥ २ ॥ ३ ॥ दिष्टांतंमरणम् ॥ ४ ॥

॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ मिषितांपश्यतां अनादरेषष्ठी ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ इतिउ० नै० भारतभा० त्रिसप्तत्यधिकश

ततोहंभरतश्रेष्ठप्रतिज्ञांपरिपालयन् ॥ चित्रांगदंभ्रातरंवैमहाराज्येभ्यषेचयम् ॥ ५ ॥ तस्मिंश्चनिधनंप्राप्तेसत्यवत्यामतेस्थितः ॥ विचित्रवीर्यंराजानमभ्यषिंचंयथाविधि ॥ ६ ॥ मयाभिषिक्तोराजेंद्रयवीयानपिधर्मतः ॥ विचित्रवीर्योधर्मात्मामामेवसमुदैक्षत ॥ ७ ॥ तस्यदारक्रियांतातचिकीर्षुरहमप्युत ॥ अनुरूपादिवकुलादित्येवचमनोदधे ॥ ८ ॥ तथाश्रौषंमहाबाहोतिस्रःकन्याःस्वयंवराः ॥ रूपेणाप्रतिमाःसर्वाःकाशिराजसुतास्तदा ॥ अंबांचैवांबिकांचैवतथैवांबालिकामपि ॥ ९ ॥ राजानश्चसमाहूताःपृथिव्यांभरतर्षभ ॥ अंबाज्येष्ठाभवत्तासामंबिकात्वथमध्यमा ॥ १० ॥ अंबालिकाचराजेंद्रराजकन्यायवीयसी ॥ सोहमेकरथेनैवगतःकाशिपतेःपुरीम् ॥ ११ ॥ अपश्यंतामहाबाहोतिस्रःकन्याःस्वलंकृताः ॥ राज्ञश्चैवसमाहूतान्पार्थिवान्पृथिवीपते ॥ १२ ॥ ततोऽहंतान्नृपान्सर्वानाहूयसमरेस्थितान् ॥ रथमारोपयांचक्रेकन्यास्ताभरतर्षभ ॥ १३ ॥ वीर्यशुल्काश्चताज्ञात्वासमारोप्यरथंतदा ॥ अवोचंपार्थिवान्सर्वानहंतत्रसमागतान् ॥ भीष्मःशांतनवःकन्याहरतीतिपुनःपुनः ॥ १४ ॥ तेयतध्वंपरंशक्त्यासर्वेमोक्षायपार्थिवाः ॥ प्रसह्यहिहराम्येषमिषतांवोनरर्षभाः ॥ १५ ॥ ततस्तेपृथिवीपालाःसमुत्पेतुरुदायुधाः ॥ योगोयोगइतिक्रुद्धाःसारथीनभ्यचोदयन् ॥ १६ ॥ तेरथैर्गजसंकाशैर्गजैश्चगजयोधिनः ॥ पुष्टैश्चाश्वैर्महीपालाःसमुत्पेतुरुदायुधाः ॥ १७ ॥ ततस्तेमांमहीपालाःसर्वएवविशांपते ॥ रथव्रातेनमहतासर्वतःपर्यवारयन् ॥ १८ ॥ तानहंशरवर्षेणसमंतात्पर्यवारयम् ॥ सर्वान्नृपांश्चाप्यजयंदेवराडिवदानवान् ॥ १९ ॥ अपातयंशरैर्दीप्तैःप्रहसन्भरतर्षभ ॥ तेषामापततांचित्रान्ध्वजान्हेमपरिष्कृतान् ॥ २० ॥ एकैकेनहिबाणेनभूमौपातितवानहम् ॥ हयांस्तेषांगजांश्चैवसारथींश्चाप्यहंरणे ॥ २१ ॥ तेनिवृत्ताश्चभग्नाश्चदृष्ट्वातल्लाघवंमम ॥ अथाहंहास्तिनपुरमायांजित्वामहीक्षितः ॥ २२ ॥ ततोहंताश्चकन्यावैभ्रातुरर्थायभारत ॥ तच्चकर्ममहाबाहोसत्यवत्यैन्यवेदयम् ॥ २३ ॥ ॥ इतिश्रीमहाभारतेउद्योगप० अंबोपाख्यानप० कन्याहरणेत्रिसप्तत्यधिकशततमोऽध्यायः ॥ १७३ ॥ ॥ ७ ॥ ॥ भीष्मउवाच ॥ ॥ ततोहंभरतश्रेष्ठमातरंवीरमातरम् ॥ अभिगम्योपसंगृह्यदाशेयीमिदमब्रुवम् ॥ १ ॥ इमाःकाशिपतेःकन्यामयानिर्जित्यपार्थिवान् ॥ विचित्रवीर्यस्यकृतेवीर्यशुल्काहृताइति ॥ २ ॥ ततोमूर्धन्युपाघ्रायपर्यश्रुनयनानृप ॥ आहसत्यवतीहृष्टादिष्ट्यापुत्रजितंत्वया ॥ ३ ॥ सत्यवत्यास्त्वनुमतेविवाहेसमुपस्थिते ॥ उवाचवाक्यंसव्रीडाज्येष्ठाकाशिपतेःसुता ॥ ४ ॥ ततमोऽध्यायः ॥ १७३ ॥ ततोहमिति मातरंउपसंगृह्यपादयोःपतित्वा ॥ १ ॥ वीर्यशुल्काःवीर्यमेवशुल्कंमौल्यंयासांताः ॥ २ ॥ ३ ॥ ४ ॥

मङ्गलम् ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ सत्यव्रतोनित्यंब्रह्मचारी ॥ १० ॥ इतिउ०नै० भारतभावदीपेचतुःसप्तत्यधिकशततमोऽध्यायः ॥ १७४ ॥ ॥ ॥ ततइति ॥ १ ॥ समनुज्ञासिषंसमनु

भीष्मत्वमसिधर्मज्ञःसर्वशास्त्रविशारदः॥ श्रुत्वाचवचनंधर्म्यंमत्र्यंकर्तुमिहार्हसि॥ ५ ॥ मयाशाल्वपतिःपूर्वंमनसाभिवृतोवरः॥ तेनचास्मिवृतापूर्वंरहस्यविदितेपितुः॥ ६ ॥ कथंमामन्यकामांत्वंराजधर्ममतीत्यवै॥ वासयेथागृहेभीष्मकौरवःसन्विशेषतः॥ ७॥ एतद्बुद्ध्याविनिश्चित्यमनसाभरतर्षभ॥ यत्क्षमंतेमहाबाहोतदिहारब्धुमर्हसि॥ ८॥ समांप्रतीक्षतेव्यक्तंशाल्वराजोविशांपते॥ तस्मान्मांत्वंकुरुश्रेष्ठसमनुज्ञातुमर्हसि॥ ९॥ कृपांकुरुमहाबाहोमयिधर्मभृतांवर॥ त्वंहि सत्यव्रतोवीरपृथिव्यामितिनःश्रुतम्॥ १० ॥ ॥इतिश्रीमहाभारतेउद्यो० अंबोपाख्यानपर्वणिअंबावाक्येचतुःसप्तत्यधिकशततमोऽध्याय॥ १७४ ॥ ७ ॥

भीष्मउवाच॥ ॥ ततोहंसमनुज्ञाप्यकालींगंधवतींतदा॥ मंत्रिणश्चर्त्विजश्चैवतथैवचपुरोहितान्॥ १ ॥ समनुज्ञासिषंकन्यामंबांज्येष्ठांनराधिप॥ अनुज्ञाता ययौसातुकन्याशाल्वपतेःपुरम्॥ २॥ वृद्धैर्द्विजातिभिर्गुप्ताधात्र्याचानुगतातदा॥ अतीत्यचतमध्वानमासाद्यनृपतिंतथा॥ ३॥ सातमासाद्यराजानंशाल्वंवचन मब्रवीत्॥ आगताहंमहाबाहोत्वामुद्दिश्यमहामते॥ ४॥ तामब्रवीच्छाल्वपतिःस्मयन्निवविशांपते॥ त्वयान्यपूर्वयानाहंभार्यार्थीवरवर्णिनि॥ ५॥ गच्छभद्रेपु नस्तत्रसकाशंभीष्मकस्यवै॥ नाहमिच्छामिभीष्मेणगृहीतांत्वांप्रसह्यवै॥ ६ ॥ त्वंहिभीष्मेणनिर्जित्यनीताप्रीतिमतीतदा॥ परामृश्यमहायुद्धेनिर्जित्यपृथिवी पतीन्॥ ७॥ नाहंत्वय्यन्यपूर्वायांभार्यार्थीवरवर्णिनि॥ कथमस्मद्विधोराजापरपूर्वांप्रवेशयेत्॥ ८॥ नारींविदितविज्ञानःपरेषांधर्ममादिशन्॥ ययेष्टंगम्यतांभद्रे मात्वांकालोत्यगादयम्॥ ९॥ अंबातमब्रवीद्राजन्नंगशरपीडिता॥ नैवंवदमहीपालनैतदेवंकथंचन॥ १० ॥ नास्मिप्रीतिमतीनीताभीष्मेणामित्रकर्शन॥ ब लान्नीतास्मिरुदतीविद्राव्यपृथिवीपतीन्॥ ११ ॥ भजस्वमांशाल्वपतेभक्तांबालामनागसम्॥ भक्तानांहिपरित्यागोनधर्मेषुप्रशस्यते॥ १२॥ साहमामंत्र्यगां गेयंसमरेष्वनिवर्तिनं॥ अनुज्ञाताचतेनैवततोहंभृशमागता॥ १३॥ नसभीष्मोमहाबाहुर्मामिच्छतिविशांपते॥ भ्रातृहेतोःसमारंभोभीष्मस्येतिश्रुतंमया॥ १४॥ भगिन्यौममयेनीतेअंबिकांबालिकेनृप॥ प्रादाद्विचित्रवीर्यायगांगेयोह्यवीयसे॥ १५ ॥ यथाशाल्वपतेनान्यंवरंय्यामिकथंचन॥ त्वान्तेपुरुषव्याघ्रतथा मूर्धानमालभे॥ १६॥ नचान्यपूर्वाराजेंद्रत्वामहंसमुपस्थिता॥ सत्यंब्रवीमिशाल्वैतत्सत्येनात्मानमालभे॥ १७॥ भजस्वमांविशालाक्षस्वयंकन्यामुपस्थिताम्॥ अनन्यपूर्वांराजेंद्रत्वत्प्रसादाभिकांक्षिणीम्॥ १८॥ ज्ञातवान् अङ्गभावआर्षः ॥ २॥३॥४॥५॥६॥परामृश्यहस्तेधृत्वानीता॥ ७॥८॥९॥१०॥११॥१२॥१३॥१४॥१५॥१६॥१७॥१८॥

॥ १६३ ॥

॥ १९ ॥ २० ॥ २१ ॥ संतःसाधवःगतयःरक्षितारःसंतु॥ २२ ॥ करुणंदीनंयथास्यात्तथापरिदेवनंशोचंती ॥ २३ ॥ २४ ॥ अदीर्घदर्शिनेतिशाल्वस्याधर्मःसूचितः ॥ २५ ॥ २६ ॥ वारणेनहस्तिनास

तामेवंभाषमाणांतुशाल्वःकाशिपतेःसुताम्॥ अत्यजद्भरतश्रेष्ठजीर्णांत्वचमिवोरगः॥ १९॥ एवंबहुविधैर्वाक्यैर्याच्यमानस्तयानृपः॥ नाश्रद्दधच्छाल्वपतिःक न्यायांभरतर्षभ॥ २०॥ ततःसामन्युनाविष्टाज्येष्ठाकाशिपतेःसुता॥ अब्रवीत्साश्रुनयनाबाष्पविप्लुतयागिरा॥ २१॥ त्वयात्यक्तागमिष्यामियत्रतत्रविशांपते॥ तत्रमेगतयःसंतुसंतःसत्यंयथाध्रुवम्॥ २२॥ एवंतांभाषमाणांतुकन्यांशाल्वपतिस्तदा॥ परित्यत्याजकौरव्यकरुणंपरिदेवतीम्॥ २३॥ गच्छगच्छेतितांशा ल्वपुनःपुनरभाषत॥ बिभेमिभीष्मात्सुश्रोणित्वंचभीष्मपरिग्रहः॥ २४॥ एवमुक्तातुसातेनशाल्वेनादीर्घदर्शिना॥ निश्चक्रामपुराद्दीनारुदतीकुररीयथा॥ २५॥

॥ भीष्मउवाच॥ ॥ निष्क्रामंतीतुनगराच्चिंतयामासदुःखिता॥ पृथिव्यांनास्तियुवतिर्विषमस्यतरामया॥ २६॥ बंधुभिर्विप्रहीणास्मिशाल्वेनचनिराकृता॥ नचशक्ष्यंपुनर्गंतुंमयावारणसाह्वयम्॥ २७॥ अनुज्ञातातुभीष्मेणशाल्वमुद्दिश्यकारणम्॥ किंनुगर्ह्यंमयात्मानमथभीष्मंदुरासदम्॥ २८॥ अथवापितरंमूढं योमेकार्षीत्स्वयंवरम्॥ मयायंस्वकृतोदोषोयाहंभीष्मरथात्तदा॥ २९॥ प्रवृत्तेदारुणेयुद्धेशाल्वार्थेनापतंपुरा॥ तस्येयंफलनिर्वृत्तिर्यदापन्नास्मिमूढवत्॥ ३०॥ धिग्भीष्मंधिक्कमेमंदंपितरंमूढचेतसम्॥ येनाहंवीर्यशुल्केनपण्यस्त्रीवप्रचोदिता॥ ३१॥ धिङ्मांधिक्शाल्वराजानंधिग्धातारमथापिवा॥ येषांदुर्नीतभावेनप्रा प्तास्म्यापदमुत्तमां॥ ३२॥ सर्वथाभागधेयानिस्वानिप्राप्नोतिमानवः॥ अनयस्यास्यतुमुखंभीष्मःशांतनवोमम॥ ३३॥ साभीष्मेप्रतिकर्तव्यमहंपश्यामिसांप्रत म्॥ तपसावायुधावापिदुःखहेतुःसमेमतः॥ ३४॥ कोनुभीष्मंयुधाजेतुमुत्सहेतमहीपतिः॥ एवंसापरिनिश्चित्यजगामनगराद्बहिः॥ ३५॥ आश्रमंपुण्यशीलानांता पसानांमहात्मनाम्॥ ततस्तामवसद्रात्रिंतापसैःपरिवारिता॥ ३६॥ आचख्यौचयथावृत्तंसर्वमात्मनिभारत॥ विस्तरेणमहाबाहोनिखिलेनशुचिस्मिता॥ हरणं चविसर्गंचशाल्वेनचविसर्जनम्॥ ३७॥ ततस्तत्रमहानासीद्ब्राह्मणःसंशितव्रतः॥ शौखावत्यस्तपोवृद्धःशास्त्रेचारण्यकेगुरुः॥ ३८॥ आर्तांतामाहसमुनिःशौखाव त्योमहातपाः॥ निःश्वसंतींसतींबालांदुःखशोकपरायणाम्॥ ३९॥ एवंगतेतुकिंभद्रेशक्यंकर्तुंतपस्विभिः॥ आश्रमस्थैर्महाभागेतपोयुक्तैर्महात्मभिः॥ ४०॥

मानाह्वयंसमानाख्यंहस्तिनापुरम्॥ २७॥ २८॥ २९॥ ३०॥ ३१॥ ३२॥ ३३॥ ३४॥ ३५॥ ३६॥ ३७॥ शौखावत्यःशिखावान्वह्निस्तत्साध्यानिश्रौतस्मार्तकर्माणिशौखावतानितेषुसाधुःशौ खावत्यःकर्मणिनिष्णातःआरण्यकेउपनिषदिगुरुःब्रह्मविदित्यर्थः॥ ३८॥ ३९॥ ४०॥

प्राव्राज्यंप्रव्रज्यासंन्यासस्तत्रोचितंकर्मप्राव्राज्यम् ॥ ४१ ॥ ४२ ॥ ४३ ॥ तापस्यंतपसेहितंधर्मजातम् ॥४४॥ दृष्टांतोलौकिकोदाहरणंआगमोवेदःहेतुर्युक्तिस्तैःप्रारब्धकर्मभोगत्यापरिहार्यत्वज्ञात्वासमाश्वस्तांभवेत्युक्तेत्यर्थः ॥ ४५ ॥ इतिउद्योगप०नैलकंठीयेभारतभा०पंचसप्तत्यधिकशततमोऽध्यायः ॥ १७५ ॥ ॥ ७ ॥ ॥ ततइति ॥ १ ॥ २ ॥ ३॥४॥५॥६॥७॥८॥९ ॥ येदोषाविद्यंतेआश्रमेषुत्र

सात्वेनमब्रवीद्राजन्क्रियतांमदनुग्रहः॥ प्राव्राज्यमहमिच्छामितपस्तप्स्यामिदुश्चरम्॥४१॥ मयैवयानिकर्माणिपूर्वदेहेतुमूढया॥कृतानिनूनंपापानितेषामेतत्फलंध्रुवम्॥४२॥नोत्सहेतुपुनर्गंतुंस्वजनंप्रतितापसाः॥ प्रत्याख्यातानिरानंदाशाल्वेनचनिराकृता॥४३॥ उपदिष्टमिहेच्छामितापस्यंवीतकल्मषाः॥ युष्माभिर्देवसंकाशैःकृपाभवतुवोमयि॥४४॥ सतामाश्वासयत्कन्यांदृष्टांतागमहेतुभिः॥ सांत्वयामासकार्यंचप्रतिजज्ञेद्विजैःसह ॥ ४५ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिअंबोपाख्यानपर्वणिशैखावत्यांव्यासंवादेपंचसप्तत्यधिकशततमोऽध्यायः ॥ १७५ ॥ ॥७॥ ॥ भीष्मउवाच ॥ ॥ततस्तेतापसाःसर्वेकार्यवंतोभवंस्तदा॥ तांकन्यांचिंतयंतस्तेकिंकार्यमितिधर्मिणः॥ १॥ केचिदाहुःपितुर्वेश्मनीयतामितितापसाः॥ केचिदस्मदुपालंभेमतिंचक्रुर्हितापसाः॥ २॥ केचिच्छाल्वपतिंगत्वानियोज्यमितिमेनिरे॥नेतिकेचिच्चवस्यंतिप्रत्याख्याताहितेनसा॥३॥एवंगतेतुर्किंशक्यंभद्रेकर्तुमनीषिभिः॥ पुनरूचुश्चतांसर्वेतापसाःसंशितव्रताः॥४॥ अलंप्रव्रजितेनेहभद्रेशृणुहितंवचः॥ इतोगच्छस्वभद्रंतेपितुरेवनिवेशनम्॥५॥प्रतिपत्स्यतिराजासपितातेयदनंतरम्॥तत्रवत्स्यसिकल्याणिसुखंसर्वगुणान्विता॥६॥नचतेत्यागतिर्न्याय्याभवेद्भद्रेयथापिता॥ पतिर्वापिगतिर्नार्याःपितावावरवर्णिनि॥७॥ गतिःपतिःसमस्यायाविषमेचपितागतिः॥ प्रव्रज्याहिसुदुःखेयंसुकुमार्याविशेषतः॥८॥ राजपुत्र्याःप्रकृत्याचकुमार्यास्तवभामिनि॥ भद्रेदोषाहिविद्यंतेबहवोवरवर्णिनि॥९॥ आश्रमेवैवसंत्यास्तेनभवेयुःपितुर्गृहे॥ ततस्त्वन्येब्रुवन्वाक्यंतापसास्तांतपस्विनीम्॥१०॥ त्वामिहैकाकिनींदृष्ट्वानिर्जनेगहनेवने॥ प्रार्थयिष्यंतिराजानस्तस्मान्मैवंमनःकृथाः॥११॥ अंबोवाच॥ ॥नशक्यंकाशिनगरंपुनर्गंतुंपितुर्गृहान्॥ अवज्ञाताभविष्यामिबांधवानांनसंशयः॥ १२॥ उषितास्मितथाबाल्येपितुर्वेश्मनितापसाः॥नाहंगमिष्येभद्रंवस्तत्रयत्रपितामम॥ तपस्तप्तुमभीप्सामितापसैःपरिरक्षिता॥१३॥ यथापरेपिमेलोकेनस्यादेवंमहात्ययः॥ दौर्भाग्यंतापसश्रेष्ठास्तस्मात्तप्स्याम्यहंतपः॥ १४॥ ॥भीष्मउवाच॥ ॥इत्यवंतेषुविप्रेषुचिंतयत्सुयथातथम्॥ राजर्षिस्तद्वनंप्रामस्तपस्वीहोत्रवाहनः॥ १५॥

ज्यायांतेदोषाःपितुर्गृहेनभवेयुःसुंदरीतरुणीचत्वांदृष्ट्वामुनयोवामोहंप्राप्स्यंतित्वंबाधमातिस्खलिष्यसीतिभावः॥ १०॥ ११॥ १२॥ १३॥ महात्ययःसुखनाशः महउद्भवउत्सवइतिकोशः॥ १४॥१५॥

॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ततस्तेतापसाःसर्वेपूजयंतिस्मतंनृपम्॥ पूजाभिःस्वागताद्याभिरासनेनोदकेनच॥ १६॥ तस्योपविष्टस्यसतोविश्रांतस्योपशृण्वतः॥ पुनरेवकथांचक्रुःकन्यांप्रतिवनौकसः॥ १७॥ अंबायास्तांकथांश्रुत्वाकाशिराज्ञश्चभारत॥ राजर्षिःसमहातेजाबभूवोद्विग्नमानसः॥१८॥तांतथावादिनींश्रुत्वादृष्ट्वाचसमहातपाः॥ राजर्षिःकृपयाविष्टोमहात्माहोत्रवाहनः॥ १९॥ सवेपमानउत्थायमातुस्तस्याःपितातदा॥ तांकन्यामंकमारोप्यपर्यश्वासयतप्रभो॥ २०॥ सतामपृच्छत्कारुण्यैनव्यसनोत्पत्तिमादितः॥ साचतस्मैयथावत्तंविस्तरेणन्यवेदयत्॥ २१॥ ततःसराजर्षिरभूद्दुःखशोकसमन्वितः॥ कार्यंचप्रतिपेदेतन्मनसासुमहातपाः॥ २२॥ अब्रवीद्वेपमानश्चकन्यामार्तांसुदुःखितः॥ मागाःपितुर्गृहंभद्रेमातुस्तेजनकोत्यहम्॥२३॥दुःखंछिद्यामहंतेवैमयिवर्तस्वपुत्रिके॥ पर्याप्तंतेमनोवत्सेयदेवंपरिशुष्यसि॥ २४॥ गच्छमद्वचनाद्रामंजामदग्न्यंतपस्विनम्॥ रामस्तेसुमहद्दुःखंशोकंचैवापनेष्यति॥ २५॥ हनिष्यतिरणेभीष्मंनकरिष्यतिचेद्वचः॥ तंगच्छभार्गवश्रेष्ठंकालाग्निसमतेजसम्॥२६॥ प्रतिष्ठापयितासत्वांसमेपथिमहातपाः॥ ततस्तुसुस्वरंबाष्पमुत्सृजंतीपुनःपुनः॥२७॥ अब्रवीत्पितरंमातुःसातदाहोत्रवाहनम्॥अभिवादयित्वाशिरसागमिष्येतवशासनात्॥२८॥ अपिनामाद्यपश्येयमार्यंतंलोकविश्रुतम्॥कथंचतीव्रंदुःखंमेनाशयिष्यतिभार्गवः॥एतदिच्छाम्यहंज्ञातुंयथायास्यामितत्रवै॥२९॥ ॥होत्रवाहनउवाच॥ ॥रामंद्रक्ष्यसिभद्रेत्वंजामदग्न्यंमहावने॥ उग्रेतपसिवर्तंतंसत्यसंधंमहाबलम्॥३०॥ महेंद्रवैगिरिश्रेष्ठंरामोनित्यमुपास्तिह॥ ऋषयोवेदविद्वांसोगंधर्वाप्सरसस्तथा॥ ३१॥ तत्रगच्छस्वभद्रंतेब्रूयाश्चैनंवचोमम॥ अभिवाद्यचतंमूर्ध्नातपोवृद्धंदृढव्रतम्॥ ३२॥ ब्रूयाश्चैनंपुनर्भद्रेयत्तेकार्यमनीषितम्॥मयिसंकीर्तितेरामःसर्वंतत्तेकरिष्यति॥३३॥ममरामःसखावत्सेप्रीतियुक्तःसुदृच्चमे॥जमदग्निसुतोवीरःसर्वशस्त्रभृतांवरः॥ ३४॥ एवंब्रुवतिकन्यांतुपार्थिवेहोत्रवाहने॥ अकृतव्रणःप्रादुरासीद्रामस्यानुचरःप्रियः॥ ३५॥ ततस्तेमुनयःसर्वेसमुत्तस्थुःसहस्रशः॥ सचराजावयोवृद्धःसंजयोहोत्रवाहनः॥ ३६॥ ततोदृष्ट्वाकृतातिथ्यमन्योन्यंतेवनौकसः॥ सहिताभरतश्रेष्ठनिषेदुःपरिवार्यतम्॥३७॥ ततस्तेकथयामासुःकथास्तास्तामनोरमाः॥ धन्यादिव्याश्चराजेंद्रप्रीतिहर्षमुदायुताः॥ ३८॥ ततःकथांतेराजर्षिर्महात्माहोत्रवाहनः॥ रामंश्रेष्ठंमहर्षीणामपृच्छदकृतव्रणम्॥३९॥ क्वसंप्रतिमहाबाहोजामदग्न्यःप्रतापवान्॥ अकृतव्रणशक्योवैद्रष्टुंवेदविदांवर॥ ४०॥

॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ तंविचित्रवीर्यंवैवाहिकंविवाहार्थमुपतंसमुपार्जितंअभ्यंगकौतुकबंधादिनासंस्कृतंदृष्ट्वाइयंकन्यागांगेयमब्रवीदितियोजना ॥ ५० ॥

॥ अकृतव्रणउवाच ॥ ॥ भवंतमेवसततंरामःकीर्तयतिप्रभो॥सृंजयोमेप्रियसखोराजर्षिरितिपार्थिव ॥४१॥इहरामःप्रभातेश्वोभवितेतिमतिर्मम॥द्रष्टास्येन मिहायांतंतवदर्शनकांक्षया॥४२॥इयंचकन्याराजर्षेकिमर्थंवनमागता॥कस्यचेयंतवचकाभवतीच्छामिवेदितुम्॥ ४३॥ ॥होत्रवाहनउवाच॥ ॥दौहित्री यंममविभोकाशिराजसुताप्रिया॥ ज्येष्ठास्वयंवरेतस्थौभगिनीभ्यांसहानघ ॥ ४४॥ इयमंबेतिविख्याताज्येष्ठाकाशिपतेःसुता ॥ अंबिकांबालिकेकन्येकनी यस्यौतपोधन॥ ४५॥ समेतंपार्थिवंक्षत्रंकाशिपुर्यांततोभवत्॥ कन्यानिमित्तंविप्रर्षेतत्रासीदुत्सवोमहान् ॥ ४६ ॥ ततःकिलमहावीर्योभीष्मःशांतनवोनृपा न्॥अधिक्षिप्यमहातेजास्तिस्रःकन्याजहारताः॥४७॥ निर्जित्यपृथिवीपालानथभीष्मोगजाह्वयम्॥ आजगामविशुद्धात्माकन्याभिःसहभारतः॥४८॥ सत्य वत्यैनिवेद्याथविवाहंसमनंतरम्॥भ्रातुर्विचित्रवीर्यस्यसमाज्ञापयतप्रभुः॥४९॥तंतुवैवाहिकंदृष्ट्वाकन्येयंसमुपार्जितम्॥अब्रवीत्तत्रगांगेयंमंत्रिमध्येद्विजर्ष भ॥ ५० ॥ मयाशाल्वपतिर्वीरोमनसाभिवृतःपतिः॥ नमामर्हसिधर्मज्ञदातुंभ्रात्रेन्यमानसाम्॥ ५१ ॥ तच्छ्रुत्वावचनंभीष्मःसंमंत्र्यसहमंत्रिभिः॥ निश्चित्य विससर्जेमांसत्यवत्यामतेस्थितः॥ ५२॥ अनुज्ञातातुभीष्मेणशाल्वंसौभपतिंततः॥ कन्येयंमुदितातत्रकालेवचनमब्रवीत् ॥ ५३ ॥ विसर्जितास्मिभीष्मेण धर्मंमांप्रतिपादय॥ मनसाभिवृतःपूर्वंमयात्वंपार्थिवर्षभ॥ ५४ ॥ प्रत्याचख्यौचशाल्वोस्याश्चारित्रस्याभिशंकितः॥ सेयंतपोवनंप्राप्तातापस्येभिरताभृशम् ॥ ५५॥ मयाचप्रत्यभिज्ञातावंशस्यपरिकीर्तनात्॥ अस्यदुःखस्यचोत्पत्तिंभीष्ममेवेहमन्यते॥५६॥ ॥ अंबोवाच॥ ॥ भगवन्नेवमेवेहयथाहपृथिवीपतिः॥ शरीरकर्तामातुर्मेसृंजयोहोत्रवाहनः॥ ५७ ॥ नह्युत्सहेस्वनगरंप्रतियातुंतपोधन ॥ अपमानभयाच्चैवव्रीडयाचमहामुने॥ ५८॥ यत्तुमांभगवान्रामोवक्ष्य तिद्विजसत्तम॥ तन्मेकार्यतमंकार्यमितिमेभगवन्मतिः॥ ५९ ॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिअंबोपाख्यानपर्वणिहोत्रवाहनांबासंवादेषट्सप्तत्यधिक शततमोऽध्यायः॥ १७६॥ ॥ ७॥ ॥ अकृतव्रणउवाच॥ ॥दुःखद्वयमिदंभद्रेकतरस्यचिकीर्षसि॥ प्रतिकर्तव्यमबलेतत्त्वंवत्सेवदस्वमे॥ १॥

॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ उत्पत्तिकारणम् ॥५६॥५७॥५८॥५९॥ ॥ इतिउद्योगप०नैलकंठीये भारतभा०षट्सप्तत्यधिकशततमोऽध्यायः॥ १७६ ॥ ॥७॥ ॥ दुःखद्वयंदुःखकरद्वयं भीष्मशाल्वाख्यं यद्वा निर्भर्तृकत्वमेकंदुःखंत्वच्छत्रोर्वधश्चेतितापसानांदुःखद्वयंतथापिशत्रुद्वयमध्येकतरस्यकंप्रतिकर्तव्यंहंतुंयत्नंचिकीर्षसि यद्वा एकैकस्यगतिहानिर्मरणंवेतिदुःखद्वयंज्ञेयम् ॥ १ ॥

नियोक्तव्यस्तवपाणिग्रहणार्थमितिशेषः॥२॥भीष्मस्यनुसत्यप्रतिज्ञस्यत्वत्सुखार्थंजयमात्रंकर्तव्यंनतुतावतातवहितमित्याशयेनाह अथेति ॥ ३॥४॥५॥ विधानंप्रतीकारम् ॥६॥७॥८॥९॥१०॥११॥१२॥

यदिसौभपतिर्भद्रेनियोक्तव्योमतस्तव॥ नियोक्ष्यतिमहात्मासरामस्त्वद्धितकाम्यया॥ २॥ अथापगेयंभीष्मंत्वंरामेणेच्छसिधीमता॥ रणेविनिर्जितंद्रष्टुंकुर्या त्तदपिभार्गवः॥ ३॥ सृंजयस्यवचःश्रुत्वातवचैवशुचिस्मिते॥ यदत्रतेभृशंकार्यंतदद्यैवविचिंत्यताम्॥४॥ ॥ अंबोवाच॥ ॥ अपनीतास्मिभीष्मेणभगवन्न विजानता॥ नाभिजानातिमेभीष्मोब्रह्मन्शाल्वगतंमनः॥५॥ एतद्विचार्यमनसाभवानेतद्विनिश्चयम्॥ विचिनोतुयथान्यायंविधानंक्रियतांतथा॥६॥भीष्मे वाकुरुशार्दूलेशाल्वराजेथवापुनः॥ उभयोरेववाब्रह्मन्युक्तंयत्तत्समाचर॥ ७॥ निवेदितंमयाह्येतद्दुःखमूलंयथातथम्॥ विधानंतत्रभगवन्कर्तुमर्हसियुक्ति तः॥८॥ ॥ अकृतव्रणउवाच॥ ॥उपपन्नमिदंभद्रेयदेवंवरवर्णिनि॥ धर्मंप्रतिवचोब्रूयाःशृणुचेदंवचोमम॥९॥ यदित्वामापगेयोवैननयेद्गजसाह्वयम्॥ शा ल्वस्त्वांशिरसाभीरुगृह्णीयाद्रामचोदितः॥ १०॥ तेनत्वंनिर्जिताभद्रेयस्मान्नीतासिभाविनि॥ संशयःशाल्वराजस्यतेनत्वयिसुमध्यमे॥११॥ भीष्मःपुरुषमा नीचजितकाशीतथैवच॥ तस्मात्प्रतिक्रियायुक्ताभीष्मेकारयितुंतव॥१२॥ ॥ अंबोवाच॥ ॥ ममाप्येषसदाब्रह्मन्हृदिकामोभिवर्तते॥ घातयेयंयदिरणेभी ष्ममित्येवनित्यदा॥१३॥ भीष्मंवाशाल्वराजंवायंवादोषेणगच्छसि॥ प्रशाधितंमहाबाहोयत्कृतेहंसुदुःखिता॥ १४॥ ॥भीष्मउवाच॥ ॥एवंकथयतामेव तेषांसदिवसोगतः॥ रात्रिश्चभरतश्रेष्ठसुखशीतोष्णमारुता॥१५॥ततोरामःप्रादुरासीत्प्रज्वलन्निवतेजसा॥ शिष्यैःपरिवृतोराजन्जटाचीरधरोमुनिः॥ १६॥ धनुष्पाणिरदीनात्माखड्गंबिभ्रत्परश्वधी॥ विरजाराजशार्दूलसृंजयंसोभ्ययान्नृपम्॥१७॥ततस्तंतापसादृष्ट्वासचराजामहातपाः॥ तस्थुःप्रांजलयोराजन्सा चकन्यातपस्विनी॥ १८॥ पूजयामासुरव्यग्रामधुपर्केणभार्गवम्॥ अर्चितश्चयथान्यायंनिषसादसहैवतैः॥ १९॥ ततःपूर्वव्यतीतानिकथयंतौस्मतावुभौ॥ आसातांजामदग्न्यश्चसृंजयश्चैवभारत॥ २०॥ तथाकथांतेराजर्षिर्भृगुश्रेष्ठंमहाबलम्॥ उवाचमधुरंकालेरामंवचनमर्थवत्॥ २१॥ रामेयंममदौहित्रीका शिराजसुताप्रभो॥ अस्याःशृणुयथातत्त्वंकार्यंकार्यविशारद॥ २२॥ परमंकथ्यतांचेतितांरामःप्रत्यभाषत॥ ततःसाभ्यवदद्रामंज्वलंतमिवपावकम्॥२३॥ ततोभिवाद्यचरणौरामस्यशिरसौशुभौ॥ स्पृष्ट्वापद्मदलाभाभ्यांपाणिभ्यामग्रतःस्थिता॥ २४॥

॥१३॥१४॥१५॥१६॥१७॥१८॥१९॥ असातां लङिद्विवचनम्॥२०॥२१॥२२॥परमंतवविवक्षितंयत्तन्मेऽवश्यंवक्तव्यमित्यर्थः॥२३॥ शिरसौश्रेष्ठौ शिरःप्रधानेसेनाग्रइतिमेदिनी पुंस्त्वमार्षम् ॥ २४ ॥

॥ २५ ॥ संजयस्यदौहित्रीतिशेषः ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ लुप्तोयतोमांकृतवान् भीष्मोयतोमदंगीकारंस्वयंनकृतवान् अ

रुरोदसाशोकवतीबाष्पव्याकुललोचना ॥ प्रपेदेशरणंचैवशरण्यंभृगुनंदनम् ॥ २५ ॥ ॥ रामउवाच ॥ ॥ यथात्वंसंजयस्यास्यतथामेत्वंनृपात्मजे ॥ ब्रूहियत्तेम
नोदुःखंकरिष्येवचनंतव ॥ २६ ॥ ॥ अंबोवाच ॥ ॥ भगवन्शरणंत्वाद्यप्रपन्नास्मिमहाव्रतम् ॥ शोकपंकार्णवान्मग्नांघोरादुद्धरमांविभो ॥ २७ ॥ ॥ भीष्मउ
वाच ॥ ॥ तस्याश्चदृष्ट्वारूपंचवपुश्चाभिनवंपुनः ॥ सौकुमार्यंपरंचैवरामश्चिंतापरोभवत् ॥ २८ ॥ किमियंवक्ष्यतीत्येवंविममर्शभृगूद्वहः ॥ इतिदध्यौचिरंरामः
कृपयाभिपरिप्लुतः ॥ २९ ॥ कथ्यतामितिसाभूयोरामेणोक्ताशुचिस्मिता ॥ सर्वमेवययातत्त्वंकथयामासभार्गवे ॥ ३० ॥ तच्छ्रुत्वाजामदग्न्यलुराजपुत्र्यावच
स्तदा ॥ उवाचतांवरारोहांनिश्चित्यार्थविनिश्चयम् ॥ ३१ ॥ ॥ रामउवाच ॥ ॥ प्रेषयिष्यामिभीष्मायकुरुश्रेष्ठायभाविनि ॥ करिष्यतिवचोमत्र्यंश्रुत्वाचसनरा
धिपः ॥ ३२ ॥ नचेत्करिष्यतिवचोमयोक्तंजाह्नवीसुतः ॥ धक्ष्याम्यहंरणेभद्रेसामात्यंशस्त्रतेजसा ॥ ३३ ॥ अथवातेमतिस्तत्रराजपुत्रिनवर्तते ॥ यावच्छाल्वप
तिंवीरंयोजयाम्यत्रकर्मणि ॥ ३४ ॥ ॥ अंबोवाच ॥ ॥ विसर्जिताहंभीष्मेणश्रुत्वैवभृगुनंदन ॥ शाल्वराजगतंभावंममपूर्वमनीषितम् ॥ ३५ ॥ सौभराजमुपे
त्याहमवोचंदुर्वचंवचः ॥ नचमांप्रत्यगृह्णात्सचारिष्यपरिशंकितः ॥ ३६ ॥ एतत्सर्वंविनिश्चित्यस्वबुध्याभृगुनंदन ॥ यदत्रौपयिकंकार्यतच्चिंतयितुमर्हसि ॥ ३७ ॥
ममतुव्यसनस्यास्यभीष्मोमूलंमहाव्रतः ॥ येनाहंवशमानीतासमुत्क्षिप्यबलात्तदा ॥ ३८ ॥ भीष्मंजहिमहाबाहोयत्कृतेदुःखमीदृशम् ॥ प्राप्ताहंभृगुशार्दूलचरा
म्यप्रियमुत्तमम् ॥ ३९ ॥ सहिलुब्धश्चनीचश्चजितकाशीचभार्गव ॥ तस्मात्प्रतिक्रियाकर्तुंयुक्तात्मैत्वयानघ ॥ ४० ॥ एषमेक्रियमाणायाभारतेननतदाविभो ॥
अभवद्बुद्दिसंकल्पोघातयेयंमहाव्रतम् ॥ ४१ ॥ तस्मात्कामंममाद्येमंरामसंपादयानघ ॥ जहिभीष्मंमहाबाहोयथावज्रंपुरंदरः ॥ ४२ ॥ ॥ इतिश्रीमहाभारतेउ
द्योगपर्वणिअंबोपाख्यानपर्वणिरामांबासंवादेसप्तसप्तत्यधिकशततमोऽध्यायः ॥ १७७ ॥ ॥ ९ ॥ ॥ भीष्मउवाच ॥ ॥ एवमुक्तस्तदाराजोजहिभीष्ममितिप्र
भो ॥ उवाचरुदतींकन्यांचोदयंतींपुनःपुनः ॥ १ ॥ काश्येनकामंगृह्णामिशस्त्रंवैवरवर्णिनि ॥ ऋतेब्रह्मविदांहेतोःकिमन्यत्करवाणिते ॥ २ ॥

॥ १६६ ॥

कामुकस्यकन्याहरणंदोषइतिभावः ॥ ४० ॥ क्रियमाणायाःबलादाहरणेनहिंस्यमानायाः कहिंसायांत्वादिः ॥ ४१ ॥ ४२ ॥ ॥ इतिउद्योग०नैलकंठीयेभारतभावदीपेसप्तसप्तत्यधिकशततमोऽ
ध्यायः ॥ १७७ ॥ ॥ ९ ॥ ॥ एवमिति ॥ १ ॥ काश्येकाशिराजकन्ये ॥ २ ॥

॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ऋषिःअकृतव्रणः पाठांतरेनुत्स्पष्टमेवसकीर्त्यते ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

वाचाभीष्मश्चशाल्वश्चममराज्ञिवशानुगौ ॥ भविष्यतोनवद्यांगितत्करिष्यामिमाशुच ॥ ३ ॥ नतुशस्त्रंग्रहीष्यामिकथंचिदपिभाविनि ॥ ऋतेनियोगाद्विप्राणा
मेषमेसमयःकृतः ॥ ४ ॥ ॥ अंबोवाच ॥ ॥ ममदुःखंभगवताव्यपनेयंयतस्ततः ॥ तच्चभीष्मप्रसूतंमेतंजहीश्वरमाचिरम् ॥ ५ ॥ ॥ रामउवाच ॥ ॥ काशिकन्ये
पुनर्ब्रूहिभीष्मस्तेचरणावुभौ ॥ शिरसावंदनार्हौपिग्रहीष्यतिगिरामम ॥ ६ ॥ ॥ अंबोवाच ॥ ॥ जहिभीष्मंरणेरामगर्जंतमसुरंयथा ॥ समाहूतोरणेराममम चे
दिच्छसिप्रियं ॥ प्रतिश्रुतंचयदपितत्सत्यंकर्तुमर्हसि ॥ ७ ॥ ॥ भीष्मउवाच ॥ ॥ तयोःसंवदतोरेवंराजन्रामांबयोस्तदा ॥ ऋषिःपरमधर्मात्माइदंवचनमब्रवीत्
॥ ८ ॥ शरणागतांमहाबाहोकन्यांनत्यक्तुमर्हसि ॥ यदिभीष्मोरणेरामसमाहूतस्त्वयानघे ॥ ९ ॥ निर्जितोस्मीतिवाब्रूयात्कुर्याद्वावचनंतव ॥ कृतमस्याभवेत्का
र्यंकन्यायाभृगुनंदन ॥ १० ॥ वाक्यंसत्यंचतेवीरभविष्यतिकृतंविभो ॥ इयंचापिप्रतिज्ञातेतदारामंमहामुने ॥ ११ ॥ जित्वावैक्षत्रियान्सर्वान्ब्राह्मणेषुप्रतिश्रु
ता ॥ ब्राह्मणःक्षत्रियोवैश्यःशूद्रश्चैवरणेयदि ॥ १२ ॥ ब्रह्मद्विड्विततंवैहनिष्यामीतिभार्गव ॥ शरणार्थंप्रपन्नानांभीतानांशरणार्थिनाम् ॥ १३ ॥ नशक्ष्यामिप
रित्यागंकर्तुंजीवन्कथंचन ॥ यश्चकृत्स्नंरणेक्षत्रंविजेष्यतिसमागतम् ॥ १४ ॥ दीप्तात्मानमहंतंचहनिष्यामीतिभार्गव ॥ सएवंविजयीरामभीष्मःकुरुकुलोद्वहः ॥
तेनयुध्यस्वसंग्रामेसमेत्यभृगुनंदन ॥ १५ ॥ ॥ रामउवाच ॥ ॥ स्मराम्यहंपूर्वकृतांप्रतिज्ञामृषिसत्तम ॥ तथैवचकरिष्यामियथासाधैवलप्स्यते ॥ १६ ॥ का
र्यमेतन्महद्ब्रह्मन्काशिकन्यामनोगतम् ॥ गमिष्यामिस्वयंतत्रकन्यामादायपत्रसः ॥ १७ ॥ यदिभीष्मोरण०लाघीनकरिष्यतिमैवचः ॥ हनिष्याम्येनमुद्रिक्तमिति
मेनिश्चितामतिः ॥ १८ ॥ नहिबाणामयोत्सृष्टाःसज्जंतीहशरीरिणां ॥ कायेपुविदितंतुभ्यंपुराक्षत्रियसंगरे ॥ १९ ॥ एवमुक्ताततोरामःसहतैर्ब्रह्मवादिभिः ॥ प्रया
णायमतिंकृत्वासमुत्तस्थौमहातपाः ॥ २० ॥ ततस्तेतामुषित्वातुरजनींतत्रतापसाः ॥ हुताग्नयोजग्मुरजस्राःप्रतस्थुर्मज्जिघांसया ॥ २१ ॥ अभ्यगच्छत्ततोरामः
सहतैर्ब्रह्मवादिभिः ॥ कुरुक्षेत्रंमहाराजकन्ययासहभारत ॥ २२ ॥ न्यविशंततःसर्वेपरिगृह्यसरस्वतीम् ॥ तापसास्तेमहात्मानोभृगुश्रेष्ठपुरस्कृताः ॥ २३ ॥
भीष्मउवाच ॥ ॥ ततस्तृतीयेदिवसेसंदिदेशव्यवस्थितः ॥ कुरुप्रियंसमेराजन्प्राप्तोस्मीतिमहाव्रतः ॥ २४ ॥ तमागतमहंश्रुत्वाविषयांतंमहाबलं ॥ अभ्यगच्छं
जवेनाशुप्रीत्यातेजोनिधिंप्रभुम् ॥ २५ ॥ गांपुरस्कृत्यराजेंद्रब्राह्मणैःपरिवारितः ॥ ऋत्विग्भिर्देवकल्पैश्चतथैवचपुरोहितैः ॥ २६ ॥

॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ अवलिप्तस्यदृप्तस्य ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥

समामभिगतंदृष्ट्वाजामदग्न्यःप्रतापवान्॥ प्रतिजग्राहतांपूजांवचनंचेदमब्रवीत् ॥ २७ ॥ ॥रामउवाच॥ ॥भीष्मकांबुद्धिमास्थायकाशिराजसुतातदा॥ अकामेनत्वयानीतापुनश्चैवविसर्जिता ॥ २८ ॥ विभ्रंशितात्वयाहीयंधर्मादास्तेयशस्विनी॥ परामृष्टांत्वयाहीमांकोहिगंतुमिहार्हति ॥ २९ ॥ प्रत्याख्याताहि शाल्वेनत्वयानीतेतिभारत॥ तस्मादिमांमन्नियोगात्प्रतिगृह्णीष्वभारत॥ ३० ॥ स्वधर्मंपुरुषव्याघ्रराजपुत्रीमलभत्वियम्॥ नयुक्तस्त्ववमानोयंराज्ञांकर्तुंत्वयानघ॥ ३१ ॥ ततस्तंवैविमनसमुदीक्ष्याहमथाब्रुवं ॥ नाहमेनांपुनर्दद्यांब्रह्मन्भ्रात्रेकथंचन॥ ३२ ॥ शाल्वस्याहमितिप्राहपुरामामेवभार्गव॥ मयाचैवाभ्यनुज्ञातागतेयंनगरंप्रति॥ ३३ ॥ नभयान्नाप्यनुक्रोशान्नार्थलोभान्नकाम्यया॥ क्षात्रंधर्ममहंजत्यामितिमेव्रतमाहितं॥ ३४ ॥ अथमामब्रवीद्रामःक्रोधपर्याकुलेक्षणः॥ नकरिष्यसिचेद्देतद्वाक्यंमेनरपुंगव ॥ ३५ ॥ हनिष्यामिसहामात्यंत्वामद्येतिपुनःपुनः ॥ संरंभाद्ब्रवीद्रामःक्रोधपर्याकुलेक्षणः॥ ३६ ॥ तमहंगीर्भिरिष्टाभिःपुनःपुनररिंदम॥ अयाचंभृगुशार्दूलंनचैवप्रशशामसः॥ ३७ ॥ प्रणम्यतमहंमूर्ध्नाभूयोब्राह्मणसत्तमं॥ अब्रुवंकारणंकिंतद्यत्त्वंयुद्धंमयेच्छसि॥ ३८ ॥ इच्छ खंममबालस्यभवतैवचतुर्विधम्॥ उपदिष्टंमहाबाहोशिष्योस्मितवभार्गव॥ ३९ ॥ ततोमामब्रवीद्रामःक्रोधसंरक्तलोचनः॥ जानीषेमांगुरुंभीष्मगृह्णासीमांनचैवह॥ ४० ॥ सुतांकाश्यस्यकौरव्यमत्रियार्थमहामते ॥ नहितेविद्यतेशांतिरन्यथाकुरुनंदन ॥ ४१ ॥ गृहाणेमांमहाबाहोरक्षस्वकुलमात्मनः॥ त्वयाविभ्रंशिताहीयंभर्तारंनाधिगच्छति॥ ४२ ॥ तथाब्रुवंतंतमहंरामंपरपुरंजयम्॥ नैतदेवंपुनर्भावीब्रह्मर्षेर्किंश्रमेणते॥ ४३ ॥ गुरुत्वंत्वयिसंप्रेक्ष्यजामदग्न्यपुरातनम्॥ प्रसादयेत्वांभगवंस्यक्तैषातुपुरामया॥ ४४ ॥ कोजातुपरभावांहिनारींव्यालीमिवस्थिताम्॥ वासयेतगृहेजानन्स्त्रीणांदोषोमहात्ययः॥ ४५ ॥ नभयाद्वासवस्याविधर्मंजह्यांमहाव्रत॥ प्रसीदमावायद्वातेकार्यंतत्कुरुमाचिरम् ॥ ४६ ॥ अयंचापिविशुद्धात्मन्पुराणेश्रूयतेविभो॥ मरुत्तेनमहाबुद्धेगीतःश्लोकोमहात्मना ॥ ४७ ॥ गुरोरप्यवलिप्तस्यकार्याकार्यमजानतः॥ उत्पथप्रतिपन्नस्यपरित्यागोविधीयते॥ ४८ ॥ सत्वंगुरुरितिप्रेम्णामयासंमानितोभृशम्॥ गुरुवृत्तिंनजानीषेतस्माद्योत्स्यामिवैत्वया॥ ४९ ॥ गुरुंनहन्यांसमरेब्राह्मणंचविशेषतः॥ विशेषतस्तपोवृद्धमेवंक्षांतंमयातव ॥ ५० ॥ उद्यतेषुमथोदृष्ट्वाब्राह्मणंक्षत्रबंधुवत्॥ योहन्यात्समरेकुद्धंयुध्यंतमपलायिनम्॥ ५१ ॥ ब्रह्महत्यानतस्यस्यादितिधर्मेषुनिश्चयः ॥ क्षत्रियाणांस्थितोधर्मैक्षत्रियोस्मितपोधन॥ ५२ ॥

॥ १६७ ॥

यःपुमान्यस्मिन्नरेयथाप्रीत्याद्वेषेणवावर्ततेसनरस्तस्मिन्तथैवप्रीतिंद्वेषंवाप्रवर्तयन् ॥ ५३ ॥ ननुत्वामर्थैप्रवर्तयन्नहंत्वयिप्रीतिमेवकरोमीत्याशंक्याहार्थेवेति अर्थैगुरुवाक्याद्वारकरणे धर्मैपितृप्रीत्यर्थंस्वीकृतेब्रह्मचर्येविषयेदेशकालानुसारेणसमर्थोविवेककुशलः तत्रधर्मलोपेनगुरुवाक्यात्प्राप्यमाणोऽर्थःश्रेयानुतनेत्यर्थेसंशयवानुतगुरुवाक्यविरोधेनापिपाल्यमानोधर्मःश्रेयानुतनेतिधर्मेसंशयवान् एतयोर्म
योयथावर्ततेयस्मिंस्तस्मिन्नेवप्रवर्तयन्॥ नाधर्मंसमवाप्नोतिनचाश्रेयश्चविंदति ॥ ५३ ॥ अर्थेवायदिवाधर्मेसमर्थोदेशकालवित् ॥ अर्थसंशयमापन्नःश्रेयान्निःसंशयोनरः॥ ५४ ॥ यस्मात्संशयितेप्यर्थेऽयथान्यायंप्रवर्तसे॥ तस्माद्योत्स्यामिसहितस्त्वयारामहाहवे॥ ५५ ॥ पश्यमेबाहुवीर्यंचविक्रमंचातिमानुषं॥ एवंगतेपितुमयायच्छक्यंभृगुनंदन॥ ५६ ॥ तत्करिष्येकुरुक्षेत्रेयोत्स्येविप्रत्वयासह ॥ द्वंद्वरामयथेष्टंमेसज्जीभवमहाद्युते ॥ ५७ ॥ तत्रत्वंनिहतोराममयाशरशतार्दितः॥ प्राप्स्यसेनिर्जिताँल्लोकान्शस्त्रपूतोमहारणे ॥ ५८ ॥ सगच्छविनिवर्तस्वकुरुक्षेत्ररणप्रिय ॥ तत्रैष्यामिमहाबाहोयुद्धायत्वांतपोधन॥ ५९ ॥ अपियत्रत्वयारामकृतंशौचंपुरापितुः॥ तत्राहमपिहत्वात्वांशौचंकर्तास्मिभार्गव ॥ ६० ॥ तत्ररामसमागच्छत्वरितंयुद्धदुर्मद॥ व्यपनेष्यामितेदर्पंपौराणांब्राह्मणब्रुवः॥ ६१ ॥ यच्चापिकत्थसेरामबहुशःपरिवत्सरे॥ निर्जिताःक्षत्रियालोकेमयैकेनेतितच्छृणु॥ ६२ ॥ ननदाजातवान्भीष्मःक्षत्रियोवापिमद्विधः॥ पश्चाज्जातानितेजांसिहृणेपुज्वलितंत्वया॥ ६३ ॥ यस्तेयुद्धमयंदर्पंकामंचव्यपनाशयेत् ॥ सोहंजातोमहाबाहोभीष्मःपरपुरंजयः ॥ व्यपनेष्यामितेदर्पंयुद्धेरामनसंशयः॥ ६४ ॥ ॥भीष्मउवाच॥ ॥ततोमामब्रवीद्रामःप्रहसन्निवभारत॥ दिष्ट्याभीष्ममयासार्धंयोद्धुमिच्छसिसंगरे ॥ ६५ ॥ अयंगच्छामिकौरव्यकुरुक्षेत्रंत्वयासह॥ भ्रापितंतेकरिष्यामितत्रागच्छपरंतप॥ ६६ ॥ तत्रत्वांनिहतंमातामयाशरशताचितम्॥ जाह्नवीपश्यतांभीष्मगृध्रकंकबलाशनम्॥ ६७ ॥ रुपणंत्वामभिप्रेक्ष्यसिद्धचारणसेविता॥ मयाविनिहतंदेवीरोदतामद्यपार्थिव ॥ ६८ ॥ अतदर्हामहाभागाभगीरथसुतानघा ॥ यात्वामजीजनन्मंदंयुद्धकामुकमातुरं ॥ ६९ ॥ एहिगच्छमयाभीष्मयुद्धकामुकदुर्मद॥ गृहाणसर्वंकौरव्यरथादिभरतर्षभ ॥ ७० ॥ इतिब्रुवाणंतमहंरामंपरपुरंजयम्॥ प्रणम्यशिरसारामममवमस्त्वित्यथाब्रुवम्॥ ७१ ॥ एवमुक्त्वाययौरामःकुरुक्षेत्रंययुत्सया ॥ प्रविश्यनगरंचाहंसत्यवत्यैन्यवेदयम्॥ ७२ ॥

ध्येअर्थैसंशयमापन्नोऽर्थमननुतिष्ठन्श्रेयान् परिशेषात्धर्मैनुतिःसंशयोधर्ममेवानुतिष्ठन्श्रेयानित्यर्थः ॥ ५४ ॥ अयथान्यायमिति श्लेषः न्यायात्किंमेणमांप्रवर्तयसे ॥ ५५ ॥ बाहुवीर्यैबाणप्रक्षेपादौ एवंगतेएवंस्थितेत्वयि ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ अपियत्रेति पितृवद्वृहमरणेप्याशौचप्राप्तौसत्यांतत्रैवतीर्थेशौचंसचैलस्नानादिनादशमेह्निशुद्धिस्त्वस्यकरिष्यामीत्यर्थः शौचंरुधिरांजलिदानमित्यर्वाचीनः ॥ ६० ॥ पौराणंपुराकृतम् ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ बलाःकाकाःतेषामशनंअन्नभूतम् ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥

॥ ७३ ॥ सूपस्करंस्वंगं स्वधिष्ठानंसुचक्रं वैयाघ्र्यंव्याघ्रचर्मनद्धंदेवपरिवारणंआच्छादनंयस्यतम् ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ भार्गवस्यरामस्य ॥ ८५ ॥

ततःकृतस्वस्त्ययनोमात्राचप्रतिनंदितः॥ द्विजातीन्वाच्यपुण्याहंस्वस्तिचैवमहायुते॥७३॥ रथमास्थायरुचिरंराजतंपांडुरैर्हयैः॥ सूपस्करंस्वधिष्ठानंवैयाघ्रपरिवारणम्॥७४॥उपपन्नंमहाशस्त्रैःसर्वोपकरणान्वितम्॥ तत्कुलीनेनवीरेणहयशास्त्रविदारणे॥७५॥ यत्तंसूतेनशिष्टेनबहुशोदृष्टकर्मणा॥ दंशितःपांडुरेणाहं कवचेनवपुष्मता॥ ७६॥ पांडुरंकार्मुकंगृह्यप्रायांभरतसत्तम॥ पांडुरेणातपत्रेणध्रियमाणेनमूर्धनि॥ ७७॥ पांडुरैश्चापिव्यजनैर्वीज्यमानोनराधिप॥ शुक्लवासाःसितोष्णीषःसर्वशुक्लविभूषणः॥ ७८॥ स्तूयमानोजयाशीर्भिर्निष्क्रम्यगजसाह्वयात्॥ कुरुक्षेत्रंरणक्षेत्रमुपायांभरतर्षभ॥ ७९॥ तेहयाश्वोदितास्तेन सूतेनपरमाहवे॥ अवहन्मांशुशंराजन्मनोमारुतरंहसः॥८०॥ गत्वाहंतत्कुरुक्षेत्रंसचरामःप्रतापवान्॥ युद्धायसहसाराजन्पराक्रांतोपरस्परम्॥८१॥ ततः संदर्शनेतिष्ठंरामस्यातितपस्विनः॥ प्रगृह्यशंखप्रवरंततःप्राधममुत्तमम्॥ ८२॥ ततस्तत्रद्विजाराजंस्तापसाश्चवनौकसः॥ अपश्यंतरणंदिव्यंदेवाःसेंद्रगणास्तदा॥८३॥ ततोदिव्यानिमाल्यानिप्रादुरासंस्ततस्ततः॥ वादित्राणिचदिव्यानिमेघवृंदानिचैवह॥ ८४॥ ततस्तेतापसाःसर्वेभार्गवस्यानुयायिनः॥ प्रेक्षकाःसमपद्यंतपरिवार्यरणाजिरम्॥८५॥ततोमामब्रवीद्देवीसर्वभूतहितैषिणी॥मातास्वरूपिणीराजन्किमिदंतेचिकीर्षितम्॥८६॥ गत्वाहंजामदग्न्यंतुप्रयाचिष्ये कुरूद्वह॥ भीष्मेणसहमायोत्सीःशिष्येणेतिपुनःपुनः॥ ८७॥ मामैवंपुत्रनिर्बंधंकुरुविप्रेणपार्थिव॥ जामदग्न्येनसमरेयोद्धुमित्येवमर्त्सयत्॥ ८८॥ किंनवैक्षत्रियहणोहरतुल्यपराक्रमः॥ विदितःपुत्ररामस्तेयतस्तंयोद्धुमिच्छसि॥ ८९॥ ततोहमब्रुवंदेवीमभिवाद्यकृतांजलिः॥ सर्वंतद्धरतश्रेष्ठयथावृत्तंस्वयंवरे॥९०॥ यथाचरामोराजेंद्रमयापूर्वंप्रचोदितः॥ काशिराजसुतायाश्चययाकर्मपुरातनम्॥ ९१॥ततःसारामभ्येत्यजननीमेमहानदी॥मदर्थंतर्षिवीक्ष्यक्षमयामासभार्गवम्॥९२॥भीष्मेणसहमायोत्सीःशिष्येणेतिवचोब्रवीत्॥ सचतामाहयाचंतींभीष्ममेवनिवर्तय॥नचमेकुरुतेकाममित्यहंतमुपागमम्॥९३॥ ॥ वैशंपायनउवाच॥ ॥ ततोगंगासुतस्नेहाद्भीष्मंपुनरुपागमत्॥नचास्याश्चाकरोद्वाक्यंक्रोधपर्याकुलेक्षणः॥ ९४॥ अथादृश्यतधर्मात्माभृगुश्रेष्ठोमहातपाः॥आह्वयामासचतदायुद्धायद्विजसत्तमः॥९५॥ ॥ इतिश्री०उद्यो०अंबोपाख्यानप०परशुरामभीष्मयोःकुरुक्षेत्रावतरणेअष्टसप्तत्युत्तरशततमोऽध्यायः॥ १७८ ॥

वेदीमंगा ॥ ८६ ॥ ८७ ॥ ८८ ॥ क्षत्रियहणःक्षत्रियहंता ॥ ८९ ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ९५ ॥ ॥ इतिउद्योग०नैलकंठीयेभारतभा०अष्टसप्तत्युत्तरशततमोऽध्यायः॥१७८॥ ॥ ७ ॥

तमिति स्मयन्निवदृष्ट्यग्निव ॥ १ ॥ २ ॥ ३ ॥ वेदमातरोगायत्रीसावित्रीसरस्वत्यः ॥ ४ ॥ सव्यतिक्रमइतिपाठेलंघितक्रमः ॥ ५ ॥ अद्भुतोपमंअभूतोपमंदर्शनंयस्यतस्मिन् ॥ ६ ॥ ७॥ ८ ॥ ९ ॥ १० ॥

भीष्मउवाच॥ ॥तमहंस्मयन्निवरणेप्रत्यभाषंव्यवस्थितम्॥भूमिष्ठंनोत्सहेयोद्धुंभवंतंरथमास्थितः॥१॥ आरोहस्यंदनंवीरकवचंचमहाभुज॥ बधानसमरेरामयदियोद्धुंमयेच्छसि॥ २॥ ततोमामब्रवीद्रामःस्मयमानोरणाजिरे॥ रथोमेमेदिनीभीष्मवाहावेदाःसदश्ववत्॥ ३॥ सूतश्चमातरिश्वावैकवचंवेदमातरः॥ सुसंवीतोरणेताभिर्योत्स्येहंकुरुनंदन॥४॥ एवंब्रुवाणोगांधारेरामोमांसत्यविक्रमः॥ शरव्रातेनमहतासर्वतःप्रत्यवारयत्॥५॥ ततोपश्यंजामदग्न्यंरथमध्येव्यवस्थितम्॥सर्वायुधवरैश्रीमत्यद्भुतोपमदर्शने॥ ६॥ मनसाविहितेपुण्येविस्तीर्णेनगरोपमे॥ दिव्याश्वयुजिसन्नद्धेकांचनेनविभूषिते॥ ७॥ कवचेनमहाबाहोसोमार्ककृतलक्ष्मणा॥ धनुर्धरोबद्धतूणोबद्धगोधांगुलित्रवान्॥८॥ सारथ्यंकृतवांस्तत्रयुयुत्सोरकृतव्रणः॥ सखावेदविदत्यंतंदयितोभार्गवस्यह॥ ९॥ आह्वयानःसमांयुद्धेमनोहर्षयतीवमे॥ पुनःपुनरभिक्रोशन्नभियाहीतिभार्गवः॥ १०॥ तमादित्यमिवोद्यंतमनाधृष्यंमहाबलं॥ क्षत्रियांतकरंराममेकमेकःसमासदम्॥ ११॥ ततोहंबाणपातेपुत्रिषुवाहान्निगृह्यवै॥ अवतीर्यधनुर्न्यस्यपदातिर्ऋषिसत्तमम्॥ १२॥ अभ्यागच्छंतदाराममर्चिष्यन्द्विजसत्तमम्॥ अभिवाद्यचैनंविधिवदब्रुवंवाक्यमुत्तमम्॥ १३॥ योत्स्येत्वयारणेरामसदृशेनाधिकेनवा॥ गुरुणाधर्मशीलेनजयमाशास्वमेविभो॥ १४॥ ॥रामउवाच॥ ॥एवमेतत्कुरुश्रेष्ठकर्तव्यंभूतिमिच्छता॥ धर्मोत्त्येषमहाबाहोविशिष्टैःसहयुध्यताम्॥ १५॥ शपेयंत्वांनचेद्देवमागच्छेथाविशांपते॥ युध्यस्वत्वंरणेयत्तोधैर्यमालंब्यकौरव॥ १६॥ नतुतेजयमाशासेत्वांविजेतुमहंस्थितः॥ गच्छयुध्यस्वधर्मेणप्रीतोस्मिचरितेनते॥ १७॥ ततोहंतंनमस्कृत्यरथमारुह्यसत्वरः॥प्राध्मापयंरणेशंखंपुनर्हेमपरिष्कृतम्॥ १८॥ततोयुद्धंसमभवन्ममतस्यचभारत॥ दिवसान्सुबहून्राजन्परस्परजिगीषया॥ १९॥ समेतस्मिन्रणेपूर्वंप्राहरत्कंकपत्रिभिः॥ षष्ट्याशतैश्चनवभिःशराणांनतपर्वणाम्॥ २०॥ चत्वारस्तेनमेवाहाःसूतश्चैवविशांपते॥ प्रतिरुद्धास्तथैवाहंसमरेदंशितःस्थितः॥ २१॥ नमस्कृत्यचदेवेभ्योब्राह्मणेभ्योविशेषतः॥ तमहंस्मयन्निवरणेप्रत्यभाषंव्यवस्थितम्॥ २२॥ आचार्यतामानितामेनिर्मर्यादेत्यपित्वयि॥ भूयश्चश्रृणुमेब्रह्मन्संपदंधर्मसंग्रहे॥ २३॥ येतेवेदाःशरीरस्थाब्राह्मण्यंयच्चतेमहत्॥ तपश्चतेमहत्तन्नतेभ्यःप्रहराम्यहम्॥ २४॥

॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५॥ १६ ॥ नतुतेजयमाशासेइत्युक्तिर्भूतिमिच्छतात्वयाप्रागेवमदभिवंदनस्यजयहेतोःकृतत्वादितिभावः तच्चैवमेतत्कुरुश्रेष्ठकर्तव्यंभूतिमिच्छतेत्यनेनसूचितम् ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ मेमयामानिता ॥ २३ ॥ २४ ॥

॥ २५ ॥ २६ ॥ चिक्षेपेतिपारोक्ष्यार्थैलिट्प्रयोगोहेलयाकृतत्वसूचनार्थः ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ॥ इतिउद्योगप०नै०भा०

प्रहारेक्षत्रधर्मस्थयंत्वंरामसमाश्रितः॥ब्राह्मणःक्षत्रियत्वंहियातिशस्त्रसमुद्यमात्॥ २५॥ पश्यमेधनुषोवीर्यंपश्यबाह्वोर्बलंमम॥ एषतेकार्मुकंवीरच्छिनद्मिनिशितेषुणा॥२६॥ तस्याहंनिशितंभल्लंचिक्षेपभरतर्षभ॥ तेनास्यधनुषःकोटिंछित्त्वाभूमावपातयम्॥ २७॥ तयैवचपृषत्कानांशतानिनतपर्वणाम्॥ चिक्षेपकंकपत्राणांजामदग्न्यरथंप्रति॥२८॥ कायेविषक्तास्तुतदाबाणायुनासमुदीरिताः॥ चेलुःक्षरंतोरुधिरंनागाइवचतेशराः॥२९॥ क्षतजोक्षितसर्वांगःक्षरन्सरुधिरंरणे॥ बभौरामस्तदाराजन्मेरुर्धातुमिवोत्सृजन्॥ ३०॥ हेमंतांतेऽशोकइवरक्तस्तबकमंडितः॥ बभौरामस्तथाराजन्प्रफुल्लइवकिंशुकः॥ ३१॥ ततोन्यद्धनुरादायरामःक्रोधसमन्वितः॥ हेमपुंखान्सुनिशितान्शरांस्तान्हिववर्षसः॥ ३२॥ तेसमासाद्यमांरौद्रावद्रुधामर्मभेदिनः॥ अकंपयन्महावेगाःसर्पानलविषोपमाः॥३३॥ तमहंसमवष्टभ्यपुनरात्मानमाहवे॥ शतसंख्यैःशरैःक्रुद्धस्तदारामममवाकिरम्॥३४॥ सतैरभ्यर्कसंकाशैःशरैराशीविषोपमैः॥ शितैरभ्यर्दितोरामोमंदचेताइवाभवत्॥ ३५॥ ततोहंकृपयाविष्टोविषण्णभ्यात्मानमात्मना॥ धिग्धिगित्यब्रुवंयुद्धंक्षत्रधर्मंचभारत॥३६॥ असकृच्चाब्रुवंराजन्शोकवेगपरिप्लुतः॥ अहोबतकृतंपापंमयेदंक्षत्रधर्मणा॥ ३७॥ गुरुर्द्विजातिर्धर्मात्मायदेवंपीडितःशरैः॥ ततोनप्राहरंभूयोजामदग्न्यायभारत॥ ३८॥ अथावताप्यपृथिवींपूषादिवससंक्षये॥ जगामास्तंसहस्रांशुस्ततोयुद्धमुपारमत्॥ ३९॥ ॥ इतिश्रीम०उद्योगपर्वणिअंबोपाख्यानपर्वणिरामभीष्मयुद्धेऊनाशीत्यधिकशततमोऽध्यायः॥ १७९॥ ॥ भीष्मउवाच॥ ॥ आत्मनस्तुततःसूतोहयानांचविशांपते॥ ममचापनयामासशल्यान्कुशलसंमतः॥१॥स्नातापदत्तैस्तुरगैर्लंघतोयैरविह्वलैः॥ प्रभातेचोदितेसूर्येततोयुद्धमवर्तत॥ २॥ दृष्ट्वामांतूर्णमायांतंदंशितंस्यंदनेस्थितम्॥ अकरोद्रथमत्यर्थंरामःसज्जंप्रतापवान्॥ ३॥ ततोहंराममायांतंदृष्ट्वासमरकांक्षिणम्॥ धनुःश्रेष्ठंसमुत्सृज्यसहसावतरंरथात्॥४॥ अभिवाद्यतथैवाहंरथमारुह्यभारत॥ युयुत्सुर्जामदग्न्यस्यप्रमुखेवीतभीःस्थितः॥५॥ ततोहंशरवर्षेणमहतासमवाकिरम्॥ सचमांशरवर्षेणवर्षंतंसमवाकिरत्॥६॥ संकुद्धोजामदग्न्यस्तुपुनरेवसुतेजितान्॥ संप्रैषीन्मेशरान्घोरान्दीप्तास्यानुरगानिव॥ ७॥ ततोहंनिशितैर्भल्लैःशतशोथसहस्रशः॥ अच्छिदंसहसाराजन्नंतरिक्षेपुनःपुनः॥ ८॥

ऊनाशीत्यधिकशततमोऽध्यायः॥ १७९॥ ॥ ७ ॥ ॥ आत्मनइति॥ १॥ स्नातापदत्तैःस्नातैःपरादत्तैश्च॥ २॥ ३॥ ४॥ ५॥ सुतेजितान्सुतुनीक्ष्णीकृतान्॥ ६॥ ७॥ ८॥

॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥

ततस्त्वस्त्राणिदिव्यानिजामदग्न्यःप्रतापवान्॥ मयिप्रयोजयामासतान्यहंप्रत्यषेधयम्॥ ९॥ अस्त्रैरेवमहाबाहोचिकीर्षन्नधिकांक्रियाम्॥ ततोदिविमहान्नादःप्रादुरासीत्समंततः॥ १०॥ ततोहमस्त्रंवायव्यंजामदग्न्येप्रयुक्तवान्॥ प्रत्याजघ्नेचतद्रामोगुह्यकास्त्रेणभारत॥ ११॥ ततोहमस्त्रमाग्नेयमनुमंत्र्यप्रयुक्तवान्॥ वारुणेनैवतद्रामोवारयामासमेविभुः॥ १२॥ एवमस्त्राणिदिव्यानिरामस्याहमवारयम्॥ रामश्चममतेजस्वीदिव्यास्त्रविदरिंदमः॥ १३॥ ततोमांसव्यतोराजन्रामःकुर्वन्द्विजोत्तमः॥ उरस्यविध्यत्संक्रुद्धोजामदग्न्यःप्रतापवान्॥ १४॥ ततोहंभरतश्रेष्ठसंन्यषीदंरथोत्तमे॥ ततोमांकश्मलाविष्टंसूतस्तूर्णमुदावहत्॥ १५॥ ग्लायंतंभरतश्रेष्ठरामबाणप्रपीडितम्॥ ततोमामपयातंवैभृशंविद्धमचेतसम्॥ १६॥ रामस्यानुचराद्दृष्टाःसर्वेदृष्ट्वाविचुक्रुशुः॥ अकृतव्रणप्रभृतयःकाशिकन्याश्चभारत॥ १७॥ ततस्तुलब्धसंज्ञोहंज्ञात्वासूतमथाब्रुवम्॥ याहिसूतयतोरामःसज्जोहंगतवेदनः॥ १८॥ ततोमामवहत्सूतोहयैःपरमशोभितैः॥ नृत्यद्भिरिवकौरव्यमारुतप्रतिमैर्गतौ॥ १९॥ ततोहंराममासाद्यबाणवर्षैश्चकौरव॥ अवाकिरंसुसंरब्धःसंरब्धंचजिगीषया॥ २०॥ तानापततएवासौरामोबाणानजिह्मगान्॥ बाणैरवाच्छिनत्तूर्णमेकैकंत्रिभिराहवे॥ २१॥ ततस्तेसूदिताःसर्वेममबाणाःसुसंशिताः॥ रामबाणैर्द्विधाच्छिन्नाःशतशोथसहस्रशः॥ २२॥ ततःपुनःशरंदीप्तंसुप्रभंकालसंमितम्॥ अस्तृजंजामदग्न्यायरामायाहंजिघांसया॥ २३॥ तेनत्वभिहतोगाढंबाणवेगवशंगतः॥ मुमोहसमरेरामोभृशंचनिपपातह॥ २४॥ ततोहाहाकृतंसर्वंरामेभूतलमाश्रिते॥ जगद्भारतसंविग्नंयथार्कपतनेभवेत्॥ २५॥ ततएनंसमुद्विग्नाःसर्वएवाभिदुद्रुवुः॥ तपोधनास्तेसहसाकाश्याचकुरुनंदन॥ २६॥ ततएनंपरिष्वज्यशनैराश्वासयंस्तदा॥ पाणिभिर्जलशीतैश्चजयाशीर्भिश्चकौरव॥ २७॥ ततःसविह्वलंवाक्यंरामउत्थायचाब्रवीत्॥ तिष्ठभीष्महतोसीतिबाणंसंधायकार्मुके॥ २८॥ समुक्तोन्यपतत्तूर्णसव्येपार्श्वेमहाहवे॥ येनाहंभृशमुद्विग्नोव्याघूर्णितइवद्रुमः॥ २९॥ हत्वाहयांस्ततोरामःशीघ्रास्त्रेणमहाहवे॥ अवाकिरन्मांविस्रब्धोबाणैस्तैर्लोमवाहिभिः॥ ३०॥ ततोहमपिशीघ्रास्त्रंसमरप्रतिवारणम्॥ अवास्तृजंमहाबाहोतैतराधिष्ठिताःशराः॥ ३१॥ रामस्यममचैवाशुव्योमाद्यत्समंततः॥ नस्मसूर्यःप्रतपतिशरजालसमावृतः॥ ३२॥ मातरिश्वाततस्तस्मिन्मेघरुद्धइवाभवत्॥ ततोवायोःप्रकंपाच्चसूर्यस्यचगभस्तिभिः॥ ३३॥ अभिघातप्रभावाच्चपावकःसमजायत॥ तेशराःस्वसमुत्थेनप्रदीप्ताश्चित्रभानुना॥ ३४॥

॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ॥ इतिउद्योगप० नैलकंठीयेभारतभावदीपेअशीत्यधिकशततमोऽध्यायः ॥ १८० ॥ ॥ ७ ॥ ॥७॥ ॥ समागतस्येति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

भूमौसर्वेतदाराजन्भस्मभूताःप्रपेदिरे ॥ तदाशतसहस्राणिप्रयुतान्यर्बुदानिच ॥ ३५ ॥ अयुतान्यथखर्वाणिनिखर्वाणिचकौरव ॥ रामःशराणांसंकुद्धोमयि तूर्णन्यपातयत् ॥ ३६ ॥ ततोहंतानपिरणेशरैराशीविषोपमैः ॥ संछिद्यभूमौनृपतेपातयेयंनगानिव ॥ ३७ ॥ एवंतदभवद्युद्धंतदाभरतसत्तम ॥ संध्याकालेव्य तीततुव्यपायात्सचमेगुरुः ॥ ३८ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिअंबोपाख्यानपर्वणिरामभीष्मयुद्धेअशीत्यधिकशततमोऽध्यायः ॥ १८० ॥ ॥ ७ ॥

भीष्मउवाच ॥ ॥ समागतस्यरामेणपुनरेवातिदारुणम् ॥ अन्येद्युस्तुमुलंयुद्धंतदाभरतसत्तम ॥ १ ॥ ततोदिव्यास्त्रविच्छूरोदिव्यान्यस्त्राण्यनेकशः ॥ अयोजयत्स धर्मात्मादिवसेदिवसेविभुः ॥ २ ॥ तान्यहंतत्प्रतीघातैरस्त्रैरस्त्राणिभारत ॥ व्यधमंतुमुलेयुद्धेप्राणांस्त्यक्त्वामुदुस्त्यजान् ॥ ३ ॥ अस्त्रैरस्त्रेषुबहुधाहतेष्वेवचभारत ॥ अकुध्यतमहातेजास्त्यक्तप्राणःससंयुगे ॥ ४ ॥ ततःशक्तिंप्राहिणोद्वोररूपामस्त्रैरुद्दीप्तामदग्न्योमहात्मा ॥ कालान्तकृष्टांप्रज्वलितामिवोल्कांसंदीप्तामग्नितेजसाज्या प्यलोकम् ॥ ५ ॥ ततोहंतामिषुभिर्दीप्यमानांसमायांतीमंतकालार्कदीप्ताम् ॥ छित्त्वात्रिधापातयामासभूमौततोवव्रौपवनःपुण्यगंधिः ॥ ६ ॥ तस्यांछिन्नायांको धदीप्तोथरामःशक्तीर्घोराःप्राहिणोद्बादशान्याः ॥ तासांरूपंभारतनोतशक्यंतेजस्वित्वाल्लाघवाच्चैववक्तुम् ॥ ७ ॥ किंत्वेवाहंविह्वलःसंप्रदृश्यदिग्भ्यःसर्वास्तामहो ल्काइवाग्नेः ॥ नानारूपास्तेजसोग्रेणदीप्तायथादित्याद्बादशलोकसंक्षये ॥ ८ ॥ ततोजालंबाणमयंविदत्तंसंदृश्यभित्त्वाशरजालेनराजन् ॥ द्वादशेषून्प्राहिण वंरणेहंततःशक्तीरप्यधमंघोररूपाः ॥ ९ ॥ ततोराजन्जामदग्न्योमहात्माशक्तीर्घोराव्याक्षिपद्वेमदंडाः ॥ विचित्रिताःकांचनपट्टनद्धायथामहोल्काज्वलितास्त थाताः ॥ १० ॥ ताश्चाप्युग्राश्चर्मणावारयित्वाखड्गेनाजौपातयित्वानरेंद्र ॥ बाणैर्दिव्यैर्जामदग्न्यस्यसंख्येदिव्यानश्वानभ्यवर्षसमूतान् ॥ ११ ॥ निर्मुक्तानांप न्नगानांसरूपाद्दृष्ट्वाशक्तीर्हेमचित्रानिकृत्ताः ॥ प्रादुश्चक्रेदिव्यमस्त्रंमहात्माक्रोधाविष्टोहैहयेशप्रमाथी ॥ १२ ॥ ततःश्रेण्यःशलभानामिवोग्राःसमापेतुर्विंशि खानांप्रदीप्ताः ॥ समाचिनोच्चापिशतंशरीरंहयान्सूतंसरथंचैवमत्यम् ॥ १३ ॥ रथःशरैर्मेनिचितःसर्वतोभूत्तथावाहाःसारथिश्चैवराजन् ॥ युगंरथेषांचतथैव चक्रेतथैवाक्षःशरकृत्तोथभग्नः ॥ १४ ॥ ततस्तस्मिन्बाणवर्षेव्यतीतेशरौघेणप्रत्यवर्षंगुरुंतम् ॥ सविक्षतोमार्गणैर्ब्रह्मराशिर्देहादसक्तंमुमुचेभूरिरक्तम् ॥ १५ ॥

॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ निकृत्ताःछिन्नाः हैहयेशप्रमाथीकार्तवीर्यस्यहंता ॥ १२ ॥ १३ ॥ शरकृत्तःबाणैश्छिन्नः ॥ १४ ॥ १५ ॥

॥ १७० ॥

अस्तंमहीध्रंअस्ताचलम् ॥ १५ ॥ ॥ इतिउद्योगप० नै० भारतभा० एकाशीत्यधिकशततमोऽध्यायः ॥ १८१ ॥ ॥७॥ ॥ततइति ॥ १ ॥ अभ्रांतेमेघमंडलसमीपे ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ द्विजान्

यथारामोबाणजालाभितप्तस्तथैवाहंसुभृशंगाढविद्धः ॥ ततोयुद्धंव्यरमच्चापराह्णेभानावस्तंप्रतियातेमहीध्रम् ॥ १६ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिअंबो पाख्यानपर्वणिएकाशीत्यधिकशततमोऽध्यायः ॥ १८१ ॥ ॥७॥ ॥ भीष्मउवाच ॥ ॥ततःप्रभातेराजेंद्रसूर्येविमलतांगते ॥ भार्गवस्यमयासार्धंपुनर्युद्धमवर्त त ॥ १ ॥ ततोभ्रांतेरथेतिष्ठन्रामःप्रहरतांवरः ॥ ववर्षशरजालानिमयिमेघइवाचले ॥ २ ॥ ततःसूतोममसुदृच्छरवर्षेणताडितः ॥ अपयातोरथोपस्थान्मनोमम विषादयन् ॥ ३ ॥ ततःसूतोममात्यर्थंकश्मलंप्राविशन्महत् ॥ पृथिव्यांचशराघातान्निपपातमुमोहच ॥ ४ ॥ ततःसूतोजहात्प्राणान्रामबाणप्रपीडितः ॥ मुहूर्ता दिवराजेंद्रमांचभीराविशत्तदा ॥ ५ ॥ ततःसूतेहतेतस्मिन्क्षिप्तस्तस्यमेशरान् ॥ प्रमत्तमनसोरामःप्राहिणोन्मृत्युसंमितम् ॥ ६ ॥ ततःसूतव्यसनिनंविप्लुतंमांस भार्गवः ॥ शरेणाभ्यहनद्गाढंविकृष्यबलवद्धनुः ॥ ७ ॥ समेभुजांतरेराजन्निपत्यरुधिराशनः ॥ मयैवसहराजेंद्रजगामवसुधातलम् ॥ ८ ॥ मत्वातुनिहतंरामस्ततो मांभरतर्षभ ॥ मेघवद्विननादोच्चैर्जहर्षेचपुनःपुनः ॥ ९ ॥ तथातुपतितेराजन्मयिरामोमुदायुतः ॥ उदक्रोशन्महानादंसहतैरनुयायिभिः ॥ १० ॥ ममतत्राभवन्मे तुकुरवःपार्श्वतःस्थिताः ॥ आगताअपियुद्धंतज्ज्ञातास्तत्रदिदृक्षवः ॥ आर्तिंपरमिकांजग्मुस्तेतदापतितेमयि ॥ ११ ॥ ततोपश्यंपतितोराजसिंहद्विजानष्टौसूर्यहु ताशनाभान् ॥ तेमांसमंतात्परिवार्यतस्युःस्वबाहुभिःपरिधार्याजिमध्ये ॥ १२ ॥ रक्ष्यमाणश्चतैर्विप्रैर्नाहंभूमिमुपास्पृशम् ॥ अंतरिक्षेधृतोत्यस्मितैर्विप्रैर्बांधवैरि व ॥ १३ ॥ श्वसन्निवांतरिक्षेचजलबिंदुभिरुक्षितः ॥ ततस्तेब्राह्मणाराजन्नब्रुवन्परिगृह्यमाम् ॥ १४ ॥ माभैरितिसमंसर्वेस्वस्तितेस्त्वितिचासकृत् ॥ ततस्तेषामहं वाग्भिस्तर्पितःसहसोत्थितः ॥ मातरंसरितांश्रेष्ठामपश्यंरथमास्थिताम् ॥ १५ ॥ हयाश्चमेसंगृहीतास्तयासन्महानद्यासंयतिकौरवेंद्र ॥ पादौजनन्याःप्रतिगृह्यचा हंतथापितृणांरथमभ्यरोहं ॥ १६ ॥ ररक्षसामांसरथंहयांश्चोपस्कराणिच ॥ तामहंप्रांजलिर्भूत्वापुनरेवव्यसर्जयं ॥ १७ ॥ ततोहंस्वयमुद्यम्यहयांस्तान्वातरंहसः ॥ अयुध्यंजामदग्न्येननिवृत्तेहनिभारत ॥ १८ ॥ ततोहंभरतश्रेष्ठवेगवंतंमहाबलम् ॥ अमुंचंसमरेबाणंरामायहृदयाच्छिदम् ॥ १९ ॥ ततोजगामवसुधांममबाण प्रपीडितः ॥ जानुभ्यांधनुरुत्सृज्यरामोमोहवशंगतः ॥ २० ॥ ततस्तस्मिन्निपतितेरामेभूरिसहस्रदे ॥ आववुर्जलदाव्योमक्षरंतोरुधिरंबहु ॥ २१ ॥

ब्राह्मणरूपधरान्वसून् ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ भूरिसहस्रदेत्यर्णसहस्राणांदातरि भूरिर्नावासुदेवेचहरेचपरमेष्ठिनि नपुंसकंसुवर्णेचप्राज्येस्याद्वाच्यलिंगकइतिमेदिनी ॥ २१ ॥

सकंपनाःसविद्युतः ॥ २२ ॥ बलाबलाकाः ॥ २३ ॥ २४ ॥ २५ ॥ विद्रुलःव्याकुलः क्रोधावेशादेवबद्धिंगतः ॥ २६ ॥ बलसंनिभंगंधकरसवत् बलंगंधरसेरूपेइतिमेदिनी मयिमन्निमित्तं आददानंशर मितिशेषः शरंमय्यादत्तानमितिपाठांतरम् ॥ २७ ॥ मेमयि अहरत्संहृतवान् मुनीनांवाक्यादित्यर्थः ॥ २८ ॥ मंत्रमयाःमरीचयोमंडलंचयस्यसतथा तथाचश्रुतिः सैषाचरत्येवविद्यानपतीति प्रत्यवहारया

उल्काश्चशतशःपेतुःसनिर्घाताःसकंपनाः॥ अर्कंचसहसादीप्तंस्वर्भानुरभिसंदणोत् ॥ २२ ॥ ववुश्चवाताःपरुषाश्चलिताचवसुंधरा ॥ गृध्राबलाश्चकंकाश्चपरि
पेतुर्मुदायुताः॥२३॥ दीप्तायांदिशिगोमायुर्दारुणंमुहुरुन्नदत् ॥ अनाहताद्दुंदुभयोविनेदुर्भृशनिःस्वनाः॥ २४ ॥ एतदौत्पानिकंसर्वंघोरमासीद्भयंकरम् ॥ विसं
ज्ञकल्पेधरणींगतेरामेमहात्मनि ॥ २५ ॥ ततोवैसहसोत्थायरामोमामभ्यवर्तत ॥ पुनर्युद्धायकौरव्यविद्रुलःक्रोधमूर्छितः ॥ २६ ॥ आददानोमहाबाहुःकार्मुकं
बलसंनिभम्॥ ततोमय्याददानंतंराममेवन्यवारयन् ॥२७॥ महर्षयःकृपायुक्ताःक्रोधाविष्टोथभार्गवः ॥ समेऽहरदमेयात्माशरंकालानलोपमम् ॥२८॥ ततोर
विमंत्रमरीचिमंडलोजगामास्तंपांसुपुंजावगूढः ॥ निशाव्यगाहत्सुखशीतमारुततातोयुद्धंप्रत्यवहारयावः॥२९॥ एवंराजन्नवहारोभवतततःपुनर्विमलेभूत्सु
घोरम् ॥ कल्यंकल्यंविंशतिंवैदिनानितथैवचान्यानिदिनानित्रीणि ॥ ३० ॥ ॥ इतिश्रीम० उद्यो० अंबोपाख्यानपर्वणिरामभीष्मयुद्धेद्व्यशीत्यधिकशततमोऽ
ध्यायः॥ १८२ ॥ ॥७॥ ॥ भीष्मउवाच॥ ॥ ततोहंनिशिराजेंद्रप्रणम्यशिरसातदा ॥ ब्राह्मणानांपितॄणांचदेवतानांचसर्वशः ॥ १ ॥ नक्तंचराणांभूतानांरा
जन्यानांविशांपते ॥ शयनंप्राप्यरहितेमनसासमचिंतयम् ॥ २ ॥ जामदग्न्येनमेयुद्धमिदंपरमदारुणम् ॥ अहानिचबहून्यद्यवर्ततेसुमहात्ययम् ॥ ३ ॥ नचरामंम
हावीर्यंशक्नोमिरणमूर्धनि॥ विजेतुंसमरेविप्रंजामदग्न्यंमहाबलम्॥ ४॥ यदिशक्योमयाजेतुंजामदग्न्यःप्रतापवान्॥ दैवतानिप्रसन्नानिदर्शयंतुनिशांमम ॥ ५॥
ततोनिशिचराजेंद्रप्रसुप्तःशरविक्षतः ॥ दक्षिणेनेहपार्श्वेनप्रभातसमयेतदा ॥ ६ ॥ ततोर्हविप्रमुख्यैस्तैर्यैरस्मिपतितोरथात् ॥ उत्थापितोधृतश्चैवमाभैरितिचसां
त्वितः ॥ ७ ॥ तएवमांमहाराजस्वप्नेदर्शनमेत्यवै ॥ परिवार्यब्रुवन्वाक्यंतन्निबोधकुरूद्वह ॥ ८ ॥ उत्तिष्ठमाभैर्गांगेयनभयंतेस्तिकिंचन ॥ रक्षामहेत्वांकौरव्यस्व
शरीरंहिनोभवान् ॥ ९ ॥ नत्वांरामोरणेजेताजामदग्न्यःकथंचन ॥ त्वमेवसमरेरामंविजेताभरतर्षभ ॥ १० ॥

वःसमामंकृतवंतौ आवामितिशेषः ॥ २९ ॥ विमलेदिवसेवितमसीत्यर्थः कल्यंकल्यंप्रातःप्रातः ॥ ३० ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभा०द्व्यशीत्यधिकशततमोऽध्यायः ॥ १८२ ॥ ॥७॥ ॥ १७१ ॥
ततोहमिति ॥ १ ॥ रहितेएकांते ॥ २ ॥ ३ ॥ ४ ॥ निशांनिशि दर्शयंतुआत्मानंप्रकाशयंतु ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

प्रत्यभिज्ञापरिचयस्तंप्राप्स्यसे पूर्वस्मिन्वसुभावे॥ ११॥ १२॥ १३॥ १४॥ १५॥ १६॥ १७॥ १८॥ १९॥ ॥इतिउद्योगप०नैलकंठीयेभा०भा०व्यशीत्यधिकशततमोऽध्यायः॥ १८३॥ ॥७॥ ॥ततइति॥ १॥ २॥

इदमंस्वसुदयितंप्रत्यभिज्ञास्यतेभवान् ॥ विदितंहितवाप्येतत्पूर्वस्मिन्देहधारणे ॥ ११ ॥ प्राजापत्यंविश्वकृतंप्रस्वापंनामभारत ॥ नहीदंवेदरामोपिपृथिव्यांवापु
मान्क्वचित् ॥ १२ ॥ तत्स्मरस्वमहाबाहोभृशंसंयोजयस्वच ॥ उपस्थास्यतिराजेंद्रस्वयमेवतवानघ ॥ १३ ॥ येनसर्वान्महावीर्यान्प्रशासिष्यसिकौरव ॥ नचरा
मःक्षयंगंतातेनास्त्रेणनराधिप ॥ १४ ॥ एनसानतुसंयोगंप्राप्स्यसेजातुमानद ॥ स्वप्स्यतेजामदग्न्योसौत्वद्बाणबलपीडितः ॥ १५ ॥ ततोजित्वात्वमेवैनंपुनरुत्था
पयिष्यसि ॥ अस्त्रेणदयितेनाजौभीष्मसंबोधनेनवै ॥ १६ ॥ एवंकुरुष्वकौरव्यप्रभातेरथमास्थितः ॥ प्रसुप्तंवामृतंवेतितुल्यंमन्यामहेवयम् ॥ १७ ॥ नचरामेणम
र्तव्यंकदाचिदपिपार्थिव ॥ ततःसमुत्पन्नमिदंप्रस्वापंयुज्यतामिति ॥ १८ ॥ इत्युक्तांतर्हिताराजन्सर्वएवद्विजोत्तमाः ॥ अष्टौसद्दशरूपास्तेसर्वेभासुरमूर्तयः ॥ १९ ॥

॥ इतिश्रीमहाभारतेउद्योगपर्वणिअंबोपाख्यानपर्वणिभीष्मप्रस्वापनास्त्रलाभेऽशीत्यधिकशततमोऽध्यायः ॥ १८३ ॥ ॥७॥ ॥ भीष्मउवाच ॥ ॥ ततो
रात्रौव्यतीतायांप्रतिबुद्धोस्मिभारत ॥ ततःसंचिंत्यवैस्वप्नमवापंहर्षमुत्तमं ॥ १ ॥ ततःसमभवद्युद्धंममतस्यचभारत ॥ तुमुलंसर्वभूतानांलोमहर्षणमद्भुतं ॥ २ ॥
ततोबाणमयंवर्षंववर्षमयिभार्गवः ॥ न्यवारयमहंतच्चशरजालेनभारत ॥ ३ ॥ ततःपरमसंक्रुद्धःपुनरेवमहानपाः ॥ व्यस्तनेनचकोपेनशक्तिंवैप्राहिणोन्मयि
॥ ४ ॥ इंद्राशनिसमस्पर्शांयमदंडसमप्रभाम् ॥ ज्वलंतीमग्निवत्संख्येलेलिहानांसमंततः ॥ ५ ॥ ततोभरतशार्दूलधिष्ण्यमाकाशगंयथा ॥ सामाभ्यवधीत्तूर्णज
त्रुदेशेकुरूद्वह ॥ ६ ॥ अथास्त्रमस्त्रवद्घोरंगिरेर्गैरिकधातुवत् ॥ रामेणसुमहाबाहोक्षतस्यक्षतजेक्षण ॥ ७ ॥ ततोहंजामदग्न्यायभृशंक्रोधसमन्वितः ॥ चिक्षेपमृत्यु
संकाशंबाणंसर्पविषोपमम् ॥ ८ ॥ सतेनाभिहतोवीरोललाटेद्विजसत्तमः ॥ अशोभतमहाराजसशृंगइवपर्वतः ॥ ९ ॥ ससंरब्धःसमादत्यशरंकालांतकोपम
म् ॥ संदधेबलवल्लूष्यघोरंशत्रुनिबर्हणम् ॥ १० ॥ सवक्षसिपपातोग्रःशरोव्यालइवश्वसन् ॥ महींराजंस्ततश्चाहमगमंरुधिराविलः ॥ ११ ॥ संप्राप्यतुपुनःसं
ज्ञांजामदग्न्यायधीमते ॥ प्राहिण्वंविमलांशक्तिंज्वलंतीमशनीमिव ॥ १२ ॥ सातस्यद्विजमुख्यस्यनिपपातभुजांतरे ॥ विद्रुलश्चाभवद्राजन्वेपथुश्चैनमावि
शत् ॥ १३ ॥ ततएवंपरिष्वज्यसखाविप्रोमहातपाः ॥ अकृतव्रणःशुभैर्वाक्यैराश्वासयदनेकधा ॥ १४ ॥

॥३॥४॥५॥धिष्ण्यंनक्षत्रं धिष्ण्यंस्थानाग्निसद्मसु शक्तादक्षेचेतिमेदिनी जत्रुदेशेकंठकक्षयोरंतराले॥६॥अस्त्रंशोणितं पाठांतरेऽस्त्रगपितदेव॥७॥८॥९॥कृष्यआकृष्य ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ ॥ इतिउद्योगप॰नैलकंठीयेभारतभा॰चतुरशीत्यधिकशततमोऽध्यायः ॥ १८४ ॥ ॥ ७ ॥ ॥ ततइति दिविदेवानामिनिशेषः

समाश्वस्तस्ततोरामःक्रोधामर्षसमन्वितः॥ प्रादुश्चक्रेतदाब्राह्मंपरमास्त्रंमहाव्रतः॥१५॥ततस्तत्प्रतिघातार्थंब्राह्ममेवास्त्रमुत्तमम्॥ मयाप्रयुक्तंजज्वालयुगांत
मिवदर्शयन्॥१६॥तयोर्ब्रह्मास्त्रयोरासीदंतरावैसमागमः॥ असंप्राप्यैवरामंचमांचभारतसत्तम॥१७॥ततोव्योम्निप्रादुरभूत्तेजएवहिकेवलम्॥ भूतानिचै
वसर्वाणिजग्मुरार्तिंविशांपते॥१८॥ ऋषयश्चसगंधर्वादेवताश्चैवभारत॥ संतापंपरमंजग्मुरस्त्रतेजोऽग्निपीडिताः॥१९॥ततश्चचालपृथिवीसपर्वतवनद्रुमा॥
संतप्तानिचभूतानिविषादंजग्मुरुत्तमम्॥२०॥ प्रजज्वालनभोराजन्धूमायंतेदिशोदश॥ नस्यातुमंतरिक्षेचशेकुराकाशगास्तदा॥ २१॥ ततोहाहाकृतेलोके
सदेवासुरराक्षसे॥ इदमंतरमित्येवंमोक्तुकामोस्मिभारत॥२२॥ प्रस्वापमस्त्वरितोवचनाद्ब्रह्मवादिनाम्॥ विचित्रंचतदस्त्रंमेमनसिप्रत्यभात्तदा॥२३॥ ॥इ

तिश्रीम॰उद्यो॰अंबोपाख्यानपर्वणिपरस्परब्रह्मास्त्रप्रयोगेचतुरशीत्यधिकशततमोऽध्यायः॥ १८४॥ ॥७॥ ॥भीष्मउवाच॥ ॥ततोहलहलाशब्दोदि
विराजन्महानभूत्॥ प्रस्वापंभीष्ममास्राक्षीरितिकौरवनंदन॥ १॥ अयुंजमेवचैवाहंतदस्त्रंभृगुनंदने॥ प्रस्वापंमांप्रयुंजानंनारदोवाक्यमब्रवीत्॥२॥ एतेविय
तिकौरव्यदिविदेवगणाःस्थिताः॥ तेत्वांनिवारयंत्यद्यप्रस्वापंमाप्रयोजय॥३॥ रामस्तपस्वीब्रह्मण्योब्राह्मणश्चगुरुश्चते॥ तस्यावमानंकौरव्यमास्मकार्षीःक
थंचन॥४॥ ततोपश्यंदिविष्ठान्वैतानशौब्रह्मवादिनः॥ तेमांस्मयंतोराजेंद्रशनकैरिदमब्रुवन्॥ ५॥ यथाहभरतश्रेष्ठनारदस्यत्तथाकुरु॥ एतद्धिपरमंश्रेयोलो
कानांभरतर्षभ॥६॥ ततश्चप्रतिसंहृत्यतदस्त्रंस्वापनंमहत्॥ ब्रह्मास्त्रंदीप्तयांचक्रेतस्मिन्युधिययाविधि॥ ७॥ ततोरामोऽपितोराजसिंहदृष्ट्वातदस्त्रंविनिवर्तितं
वै॥ जितोस्मिभीष्मेणसुमंदबुद्धिरित्येववाक्यंसहसाव्यमुंचत्॥ ८॥ततोपश्यत्पितरंजामदग्न्यःपितुस्तथापितरंचास्यमान्यम्॥ तेतत्रचैनंपरिवार्यतस्थुरूचुश्चै
नंसांत्वपूर्वंतदानीम्॥९॥ पितरऊचुः॥ मास्मैवंसाहसंतातपुनःकार्षीःकथंचन॥ भीष्मेणसंयुगंगंतुंक्षत्रियेणविशेषतः॥ १०॥ क्षत्रियस्यतुधर्मोयंयद्युद्धंभृगु
नंदन॥ स्वाध्यायोव्रततपर्याब्राह्मणानांपरंधनम्॥ ११॥ इदंनिमित्तंकस्मिंश्चिदस्माभिःप्रागुदाहृतम्॥ शस्त्रधारणमत्युग्रंतच्चाकार्यंकृतंत्वया॥ १२॥वत्सपर्या
प्तमेतावद्भीष्मेणसहसंयुगे॥ विमर्दस्तेमहाबाहोव्यपयाहिरणादितः॥ १३॥ पर्याप्तमेतद्भद्रंतेतवकार्मुकधारणम्॥ विसर्जयैतद्दुर्धर्षतपस्तप्यस्वभार्गव॥ १४॥

॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ चक्रेकृतवानहम् ॥ ७ ॥ हेभीष्मसुमंदबुद्धिरहंजितोस्मीतिसंबंधः ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

॥ १७२ ॥

देवैर्निवारितइत्येतदेवाहुः निवर्तस्वेति ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ शाम्यशांतोभव ॥ २९ ॥ ३० ॥ न्यासयांचक्रिरेत्याजितवंतः ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥

एषभीष्मःशांतनवोदेवैःसर्वैर्निवारितः॥ निवर्तस्वरणादस्मादितिचैवप्रसादितः॥ १५॥ रामेणसहमायोत्सीर्गुरुणेतिपुनःपुनः॥ नहिरामोरणेजेतुंत्वयान्या
य्यःकुरूद्वह॥ १६॥ मानंकुरुष्वगांगेयब्राह्मणस्यरणाजिरे॥ वयंतुगुरवस्तुभ्यंतस्मात्त्वांवारयामहे॥ १७॥ भीष्मोवसूनामन्यतमोदिष्ट्याजीवसिपुत्रक॥ गां
गेयःशांतनोःपुत्रोवसुरेषमहायशाः॥ १८॥ कथंशक्यस्त्वयाजेतुंनिवर्तस्वेहभार्गव॥ अर्जुनःपांडवश्रेष्ठःपुरंदरसुतोबली॥ १९॥ नरःप्रजापतिर्वीरःपूर्वदेवः
सनातनः॥ सव्यसाचीतिविख्यातस्त्रिषुलोकेषुवीर्यवान्॥ भीष्मस्तत्युर्यथाकालंविहितोवैस्वयंभुवा॥ २०॥ ॥भीष्मउवाच॥ ॥एवमुक्तःसपितृभिःपितॄन्परा
मोब्रवीदिदम्॥ नाहंयुधिनिवर्तेयमितिमेव्रतमाहितम्॥२१॥ ननिवर्तितपूर्वश्चकदाचिद्रणमूर्धनि॥ निवर्त्यतामापगेयःकामंयुद्धात्पितामहाः॥२२॥नत्वहंवि
निवर्तिष्येयुद्धादस्मात्कथंचन॥ ततस्तेमुनयोराजन्चीकप्रमुखास्तदा॥ २३॥ नारदेनैवसहिताःसमागम्येदमब्रुवन्॥ निवर्तस्वरणात्तातमानयस्वद्विजोत्तम
म्॥२४॥ इत्यवोचमहंतांश्चक्षत्रधर्मव्यपेक्षया॥ ममव्रतमिदंलोकेनाहंयुद्धात्कदाचन॥२५॥ विमुखोविनिवर्तेयंदृष्ठतोभ्याहतःशरैः॥ नाहंलोभान्नकार्पण्या
न्नभयान्नार्थकारणात्॥२६॥ त्यजेयंशाश्वतंधर्ममितिमेनिश्चितामतिः॥ ततस्तेमुनयःसर्वेनारदप्रमुखानृप॥ २७॥ भागीरथीचमेमातारणमध्यंप्रपेदिरे॥ त
थैवात्तशरोधन्वीतथैवदृढनिश्चयः॥ स्थिरोहमाहवेयोद्धुंततस्तेराममब्रुवन्॥ २८॥ समेत्यसहिताभूयःसमरेभृगुनंदनम्॥ नावनीतंहिहृदयंविप्राणांशाम्यभा
र्गव॥२९॥रामरामनिवर्तस्वयुद्धादस्माद्विजोत्तम॥ अवध्योवैत्वयाभीष्मस्त्वंचभीष्मस्यभार्गव॥३०॥एवंब्रुवंतस्तेसर्वेप्रतिरुध्यरणाजिरम्॥ न्यासयांचक्रिरे
शस्त्रंपितरोभृगुनंदनम्॥३१॥ततोहंपुनरेवाथतानशौब्रह्मवादिनः॥ अद्राक्षंदीप्यमानान्वैग्रहानशाविवोदितान्॥३२॥तेमांसप्रणयंवाक्यमब्रुवन्समरेस्थितं॥
प्रैहिरामंमहाबाहोगुरुंलोकहितंकुरु॥ ३३॥ दृष्ट्वानिवर्तितंरामंसुदृढाक्येनतेनवै॥ लोकानांचहितंकुर्वन्नहमप्यादवंचः॥ ३४॥ ततोहंराममासाद्यववंदेभृ
शविक्षतः॥ रामश्चाभ्युत्स्मयन्प्रेम्णामामुवाचमहातपाः॥ ३५॥ त्वत्समोनास्तिलोकेस्मिन्क्षत्रियःपृथिवीचरः॥ गम्यतांभीष्मयुद्धेस्मिंस्तोषितोहंभृशंत्वया
॥३६॥ ममचैवसमक्षंतांकन्यामाहूयभार्गवः॥ उक्तवान्दीनयावाचामध्येतेषांमहात्मनाम्॥ ३७॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिअंबोपाख्यानपर्वणि
युद्धनिवृत्तौपंचाशीत्यधिकशततमोऽध्यायः॥ १८५॥ ॥ ३५ ॥ ३६ ॥ ३७ ॥ इतिउद्योगप॰नैलकंठीयेभारतभाव॰पंचाशीत्यधिकशततमोऽध्यायः॥१८५॥ ॥७॥

प्रत्यक्षमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ अत्याःकाशिराजकन्यायाः ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

रामउवाच ॥ प्रत्यक्षमेतल्लोकानांसर्वेषामेवभाविनि ॥ यथाशक्त्यामयायुद्धंकृतंवैपौरुषंपरम् ॥ १ ॥ नचैवमपिशक्रोमिभीष्मंशस्त्रभृतांवरम् ॥ विशेषयितुम त्यर्थमुत्तमास्त्राणिदर्शयन् ॥ २ ॥ एषामेपरमाशक्तिरेतन्मेपरमंबलम् ॥ यथेष्टंगम्यतांभद्रेकिमन्यद्वाकरोमिते ॥ ३ ॥ भीष्ममेवप्रपद्यस्वनतेन्याविद्यतेगतिः ॥ निर्जि तोत्यस्मिभीष्मेणमहास्त्राणिप्रमुंचता ॥ ४ ॥ एवमुक्ततोरामोविनिःश्वस्यमहामनाः ॥ तूष्णीमासीत्ततःकन्याप्रोवाचभृगुनंदनम् ॥ ५ ॥ भगवन्नेवमेवैतद्यथा हभगवांस्तथा ॥ अजेयोयुधिभीष्मोयमपिदेवैरुदारधीः ॥ ६ ॥ यथाशक्तियथोत्साहंममकार्यंकृतंत्वया ॥ अनिवार्यरणेवीर्यमस्त्राणिविविधानिच ॥ ७ ॥ नचै वशक्यतेयुद्धेविशेषयितुमंततः ॥ नचाहमेनंयास्यामिपुनर्भीष्मंकथंचन ॥ ८ ॥ गमिष्यामितुतत्राहंयत्रभीष्मंतपोधन ॥ समरेपातयिष्यामिस्वयमेवभृगूद्वह ॥ ९ ॥ एवमुक्कायकन्यारोषव्याकुललोचना ॥ तापस्येधृतसंकल्पासामेचिंतयतीवधं ॥ १० ॥ ततोमहेंद्रसहितैर्मुनिभिर्भृगुसत्तमः ॥ यथागतंतयासोगान्मा मुपामंत्र्यभारत ॥ ११ ॥ ततोरथंसमारुत्यस्तूयमानोद्विजातिभिः ॥ प्रविश्यनगरंमात्रेसत्यवत्यैन्यवेदयम् ॥ १२ ॥ यथावृत्तंमहाराजसाचमांप्रत्यनंदत ॥ पुरु षांश्चादिशत्प्राज्ञान्कन्यावृत्तांतकर्मणि ॥ १३ ॥ दिवसेदिवसेत्यस्यागतिजल्पितचेष्टितम् ॥ प्रत्याहरंश्चमेयुक्ताःस्थिताःप्रियहितेसदा ॥ १४ ॥ यदैवह्विनंप्राया त्साकन्यातपसेधृता ॥ तदैवव्यथितोदीनोगतचेताइवाभवम् ॥ १५ ॥ नहिमांक्षत्रियःकश्चिद्वीर्येणव्यजयद्युधि ॥ ऋतेब्रह्मविदस्तातत्पसासंशितव्रतात् ॥ १६ ॥ अपिचैतन्मयाराजन्नारदेपिनिवेदितम् ॥ व्यासेचैवतथाकार्यंतौचौभौमामवोचताम् ॥ १७ ॥ नविषादस्त्वयाकार्योभीष्मकाशिसुतांप्रति ॥ दैवंपुरुषकारेणको निवर्तितुमुत्सहेत् ॥ १८ ॥ साकन्यातुमहाराजप्रविश्याश्रममंडलम् ॥ यमुनातीरमाश्रित्यतपस्तेपेतिमानुषम् ॥ १९ ॥ निराहाराकृशारुक्षाजटिलामलपंकिनी ॥ ष ण्मासान्वायुभक्षाचस्थाणुभूतातपोधना ॥ २० ॥ यमुनाजलमाश्रित्यसंवत्सरमथापरम् ॥ उदवासंनिराहारापारयामासभाविनी ॥ २१ ॥ शीर्णपर्णेनचैकेन पारयामाससापरम् ॥ संवत्सरंतीव्रकोपापादांगुष्ठाग्रधिष्ठिता ॥ २२ ॥ एवंद्वादशवर्षाणितापयामासरोदसी ॥ निवर्त्यमानापिचसाज्ञातिभिर्नैवशक्यते ॥ २३ ॥ ततोगमद्गंगभूमिंसिद्धचारणसेविताम् ॥ आश्रमंपुण्यशीलानांतापसानांमहात्मनाम् ॥ २४ ॥ तत्रपुण्येषुतीर्थेषुसाप्लुतांगीदिवानिशम् ॥ व्यचरत्काशिकन्या सायथाकामविचारिणी ॥ २५ ॥ नंदाश्रममहाराजतथोलूकाश्रमेशुभे ॥ च्यवनस्याश्रमेचैवब्रह्मणःस्थानएवच ॥ २६ ॥

॥ १७३ ॥

॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ वार्षिकीवर्षास्वेववहतीतिवार्षिकी ॥ ३४ ॥ ३५ ॥ ३६ ॥ पतितागता परिधावंतीपर्यटंती ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ॥ इतिउद्योग

प्रयागेदेवयजनेदेवारण्येषुचैवह ॥ भोगवत्यांमहाराजकौशिकस्याश्रमेतथा ॥ २७ ॥ मांडव्यस्याश्रमेराजन्दिलीपस्याश्रमेतथा ॥ रामह्रदेचकौरव्यपैलग र्गस्यचाश्रमे ॥ २८ ॥ एतेषुतीर्थेषुतदाकाशिकन्याविशांपते ॥ आप्लावयतगात्राणिव्रतमास्थायदुष्करम् ॥ २९ ॥ तामब्रवीच्चकौरव्यमममाताजलेस्थिता ॥ कि मर्थंक्लिश्यसेभद्रेतथ्यमेववदस्वमे ॥ ३० ॥ सैनामथाब्रवीद्राजन्कृतांजलिरनिंदिता ॥ भीष्मेणसमरेरामानिर्जितश्चारुलोचने ॥ ३१ ॥ कोन्यस्त्रमुत्सहेज्जेतुमु यतेषुंमहीपतिः ॥ साहंभीष्मविनाशायतपस्तप्स्येसुदारुणम् ॥ ३२ ॥ विचरामिमहींदेवियथाहन्यामहंनृपम् ॥ एतद्व्रतफलंदेविपरमस्मिन्यथाहिमे ॥ ३३ ॥ ततोब्र वीत्सागरगाजिह्मंचरसिभाविनि ॥ नैषकामोनवध्यांगिशक्यःप्रापुंत्वयाऽबले ॥ ३४ ॥ यदिभीष्मविनाशायकाश्येचरसिवैव्रतम् ॥ व्रतस्थाचशरीरंत्वंयदिनामवि मोक्ष्यसि ॥ ३५ ॥ नदीभविष्यसिशुभेकुटिलावार्षिकोदका ॥ दुस्तीर्थानतुविज्ञेयावार्षिकीनाष्टमासिकी ॥ ३६ ॥ भीमग्राहवतीघोरासर्वभूतभयंकरी ॥ एवमु क्कातताराजन्काशिकन्यान्यवर्तत ॥ ३७ ॥ मानाममहाभागास्मयमानेवभाविनी ॥ कदाचिदहमेमासिकदाचिद्दशमेतथा ॥ नप्राश्नीतादकमप्युनःसाव रवर्णिनी ॥ ३८ ॥ सावत्सभूमिंकौरव्यतीर्थलोभात्ततस्ततः ॥ पतितापरिधावंतीपुनःकाशिपतेःसुता ॥ ३९ ॥ सानदीवत्सभूम्यांतुप्रथितांवेतिभारत ॥ वार्षिकी ग्राहबहुलादुस्तीर्थाकुटिलातथा ॥ ४० ॥ साकन्यातपसातेनदेहार्धेनव्यजायत ॥ नदीचराजन्वत्सेषुकन्याचैवाभवत्तदा ॥ ४१ ॥ ॥ इतिश्रीम० उद्योगपर्वणिअं बोपाख्यानपर्वणिअंबातपस्यायांषडशीत्यधिकशततमोऽध्यायः ॥ १८६ ॥ ॥ ७ ॥ ॥ भीष्मउवाच ॥ ॥ ततस्तेतापसाःसर्वेतपसेधृतनिश्चयाम् ॥ दृष्ट्वान्यवर्त यंस्तातर्किकार्यमितिचाब्रुवन् ॥ १ ॥ तानुवाचततःकन्यातपोवृद्धानृषींस्तदा ॥ निराकृतास्मिभीष्मेणभ्रंशिनापतिधर्मतः ॥ २ ॥ वधार्थंतस्यदीक्षामेनलोकार्थंत पोधनाः ॥ निहत्यभीष्मंगच्छेयंशांतिमित्येवनिश्चयः ॥ ३ ॥ यत्कृतेदुःखवसतिमिमांप्राप्तास्मिशाश्वतीं ॥ पतिलोकाद्विहीनाचनैवस्त्रीनपुमानिह ॥ ४ ॥ नाहत्वायु धिगांगेयंनिवर्तिष्येतपोधनाः ॥ एषमेहृदिसंकल्पोयदिदंकथितंमया ॥ ५ ॥ स्त्रीभावेपरिनिर्विण्णापुंस्त्वार्थेकृतनिश्चया ॥ भीष्मेप्रतिचिकीर्षामिनास्मिवार्येति वैपुनः ॥ ६ ॥ तांदेवोदर्शयामासशूलपाणिरुमापतिः ॥ मध्येतेषांमहर्षीणांस्वेनरूपेणतापसीं ॥ ७ ॥ छंद्यमानावरेणाथसावव्रेमत्पराजयम् ॥ हनिष्यसीतितांदेवः प्रत्युवाचमनस्विनीं ॥ ८ ॥

प०नै० भारतभा० षडशीत्यधिकशततमोऽध्यायः ॥ १८६ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ततइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

॥ ९ ॥ शांतंशौर्यधर्मरहितं ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ यमुनामभितः यमुनाह्रीपेइत्यर्थः ॥ १९ ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेसप्ताशीत्यधि

ततःसापुनरेवाथकन्यारुद्रमुवाचह ॥ उपपद्येत्कथंदेवस्त्रियायुधिजयोमम ॥ ९ ॥ स्त्रीभावेनचमेगाढंमनःशांतमुमापते ॥ प्रतिश्रुतश्चभूतेशत्वयाभीष्मपराजयः ॥ १० ॥ यथाससत्योभवतितथाकुरुवृषध्वज ॥ यथाहन्यांसमागम्यभीष्मंशांतनवंयुधि ॥ ११ ॥ तामुवाचमहादेवःकन्यांकिलवृषध्वजः ॥ नमेवागन्तनंप्राहसत्यंभद्रेभविष्यति ॥ १२ ॥ हनिष्यसिरणेभीष्मंपुरुषत्वंचलप्स्यसे ॥ स्मरिष्यसिचतत्सर्वंदेहमन्यंगतासती ॥ १३ ॥ द्रुपदस्यकुलेजाताभविष्यसिमहारथः ॥ शीघ्रास्त्रश्चित्रयोधीचभविष्यसिसुसंमतः ॥ १४ ॥ यथोक्तमेवकल्याणिसर्वमेतद्भविष्यति ॥ भविष्यसिपुमान्पश्चात्कस्माच्चित्कालपर्ययात् ॥ १५ ॥ एवमुक्तामहादेवःकपर्दीवृषभध्वजः ॥ पश्यतामेवविप्राणांतत्रैवांतरधीयत ॥ १६ ॥ ततःसापश्यतांतेषांमहर्षीणामनिंदिता ॥ समाहृत्यवनात्तस्मात्काष्ठानिवरवर्णिनी ॥ १७ ॥ चितांकृत्वासुमहतींप्रदायचहुताशनम् ॥ प्रदीप्तेग्नौमहाराजरोषदीप्तेनचेतसा ॥ १८ ॥ उत्क्रामीष्मवधायेतिप्रविवेशहुताशनम् ॥ ज्येष्ठाकाशिसुताराजन्यमुनामभितोनदीं ॥ १९ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिअंबोपाख्यानपर्वणिअंबाहुताशनप्रवेशेसप्ताशीत्यधिकशततमोऽध्यायः ॥ १८७ ॥ ॥ ९ ॥

दुर्योधनउवाच ॥ ॥ कथंशिखंडीगांगेयकन्याभूत्वापुरातदा ॥ पुरुषोभूयुधिश्रेष्ठतन्मेब्रूहिपितामह ॥ १ ॥ ॥ भीष्मउवाच ॥ ॥ भार्यातुतस्यराजेंद्रद्रुपदस्यमहीपतेः ॥ महिषीदयितात्यासीदपुत्राचविशांपते ॥ २ ॥ एतस्मिन्नेवकालेतुद्रुपदोवैमहीपतिः ॥ अपत्यार्थेमहाराजतोषयामासशंकरम् ॥ ३ ॥ अस्मद्वंशार्थनिश्चित्यतपोघोरंसमास्थितः ॥ ऋतेकन्यांमहादेवपुत्रोमेस्यादितिब्रुवन् ॥ ४ ॥ भगवन्पुत्रमिच्छामिभीष्मंप्रतिचिकीर्षया ॥ इत्युक्तोदेवदेवेनस्त्रीपुमांस्तेभविष्यति ॥ ५ ॥ निवर्तस्वमहीपालनैतज्जात्वन्यथाभवेत् ॥ सतुगत्वाचनगरंभार्यामिदमुवाचह ॥ ६ ॥ कृतोयत्नोमहादेवस्तपसाराधितोमया ॥ कन्याभूत्वापुमान्भावीइतिचोक्तोस्मिशंभुना ॥ ७ ॥ पुनःपुनर्याच्यमानोदिष्टमित्यब्रवीच्छिवः ॥ नतदन्यच्चभवितामवितव्यंहितत्तथा ॥ ८ ॥ ततःसानियताभूत्वाऋतुकालेमनस्विनी ॥ पत्नीद्रुपदराजस्यद्रुपदंप्रविवेशह ॥ ९ ॥ लेभेगर्भंयथाकालंविधिदृष्टेनकर्मणा ॥ पार्षतस्यमहीपालययामानारदोब्रवीत् ॥ १० ॥

कशततमोऽध्यायः ॥ १८७ ॥ ॥ ७ ॥ ॥ कथंशिखंडीति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ स्त्रीपुमान्पूर्वंस्त्रीसैवपश्चात्पुमान् पूर्वकालैकसर्वेतिसमासः ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ द्रुपदंप्रविवेशहृतेनसह मिथुनीभावंजगाम ॥ ९ ॥ विधिदृष्टेनशास्त्रदृष्टेनकर्मणागर्भाधानाख्येन पार्षतस्यगर्भंदधारइतिउत्तरेणसंबंधः ॥ १० ॥

॥ ११ ॥ अभिप्रायकृतान्वासनानिर्मितान्द्वेषहृदानीत्यर्थः ॥ १२ ॥ १३ ॥ प्राजायतप्रसूतवती ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ इतिउद्योगप०नै०भारतभा०अष्टाशीत्यधिक

ततोदधारसादेवीगर्भंराजीवलोचना ॥ तांसराजाप्रियांभार्यांद्रुपदःकुरुनंदन ॥ ११ ॥ पुत्रस्नेहान्महाबाहुःसुखंपर्यचरत्तदा ॥ सर्वानभिप्रायकृतान्भार्यालभतकौरव ॥ १२ ॥ अपुत्रस्यसतोराज्ञोद्रुपदस्यमहीपतेः ॥ यथाकालंतुसादेवीमहिषीद्रुपदस्यह ॥ १३ ॥ कन्यांप्रवररूपांतुप्राजायतनराधिप ॥ अपुत्रस्यतुराज्ञःसाद्रुपदस्यमनस्विनी ॥ १४ ॥ ख्यापयामासराजेंद्रपुत्रोत्पेषममेतिवै ॥ ततःसराजाद्रुपदःप्रच्छन्नायानराधिप ॥ १५ ॥ पुत्रवत्पुत्रकार्याणिसर्वाणिसमकारयत् ॥ रक्षणंचैवमंत्रस्यमहिषीद्रुपदस्यसा ॥ १६ ॥ चकारसर्वयत्नेनब्रुवाणापुत्रइत्युत ॥ नचतांवेदनगरेकश्चिदन्यत्रपार्षतात् ॥ १७ ॥ श्रद्दधानोहितद्वाक्यंदेवस्याच्युततेजसः ॥ छादयामासतांकन्यांपुमानितिचसोब्रवीत् ॥ १८ ॥ जातकर्माणिसर्वाणिकारयामासपार्थिवः ॥ पुंवद्विधानयुक्तानिशिखंडीतिचतांविदुः ॥ १९ ॥ अहमेकस्तुचारेणब्रचनान्नारदस्यच ॥ ज्ञातवान्देववाक्येनअंबायास्तपसातथा ॥ २० ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिअंबोपाख्यानपर्वणिशिखंड्युत्पत्तावष्टाशीत्यधिकशततमोऽध्यायः ॥ १८८ ॥ ॥ ७ ॥ ॥ भीष्मउवाच ॥ ॥ चकारयत्नंद्रुपदःसुतायासर्वकर्मसु ॥ ततोलेख्यादिषुतथाशिल्पेषुच परंतप ॥ १ ॥ इष्वस्त्रेचैवराजेंद्रद्रोणशिष्योबभूवह ॥ तस्यमातामहाराजराजानंवरवर्णिनी ॥ २ ॥ चोदयामासभार्यार्थंकन्यायाःपुत्रवत्तदा ॥ ततस्तांपार्षतोदृष्ट्वाकन्यांसंप्राप्तयौवनाम् ॥ स्त्रियंमत्वाततश्चैतांप्रपेदेसहभार्यया ॥ ३ ॥ ॥ द्रुपदउवाच ॥ ॥ कन्यामेयंसंप्राप्तायौवनंशोकवर्धिनी ॥ मयाप्रच्छादिताचेयंवचनाच्छूलपाणिनः ॥ ४ ॥ ॥ भार्योवाच ॥ ॥ नतन्मिथ्यामहाराजभविष्यतिकथंचन ॥ त्रैलोक्यकर्ताकस्माद्धिवृथावक्तुमिहार्हति ॥ ५ ॥ यदितेरोचतेराजन्वक्ष्यामिशृणुमेवचः ॥ श्रुत्वेदानींप्रपद्येथास्वांमतिंपृषतात्मज ॥ ६ ॥ क्रियतामस्ययत्नेनविधिवद्दारसंग्रहः ॥ भवितातद्वचःसत्यमितिमेनिश्चितामतिः ॥ ७ ॥ ततस्तौनिश्चयंकृत्वातस्मिन्कार्येथदंपती ॥ वरयांचक्रतुःकन्यांदशार्णाधिपतेःसुताम् ॥ ८ ॥ ततोराजाद्रुपदोराजसिंहःसर्वान्राज्ञःकुलतःसन्निशाम्य ॥ दाशार्णकस्यनृपतेस्तनूजांशिखंडिनेवरयामासदारान् ॥ ९ ॥ हिरण्यवर्मेतिनृपोयोसौदाशार्णकःस्मृतः ॥ सचप्रादान्महीपालःकन्यांतस्मैशिखंडिने ॥ १० ॥ सचराजादशार्णेषुमहानासीत्सुदुर्जयः ॥ हिरण्यवर्मादुर्धर्षोमहासेनोमहामनाः ॥ ११ ॥

शततमोऽध्यायः ॥ १८८ ॥ ॥ ७ ॥ ॥ चकारेति ॥ १ ॥ २ ॥ ३ ॥ शूलयुक्तःपाणिःशूलपाणिःसोस्यास्तीतिशूलपाणीतस्यशूलपाणिनः व्रीह्यादित्वान्मत्वर्थीयइनिः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

॥ १२ ॥ १३ ॥ धात्रीणांपितृगृहादागतानांसखीनांच ॥ १४ ॥ ताएवधात्र्यःस्वाःप्रेष्यादासीःप्रेषयामासुःदशार्णपतिमितिशेषः ॥ १५ ॥ विप्रलंभंवंचनाम् ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ उत्सार्यनीत्वा

कृतेविवाहेतुनदासाकन्याराजसत्तम ॥ यौवनंसमनुप्राप्तासाचकन्याशिखंडिनी ॥ १२ ॥ कृतदारःशिखंडीचकांपिल्यंपुनरागमत् ॥ ततःसावेदतांकन्यांकंचित्कालंस्त्रियंकिल ॥ हिरण्यवर्मणःकन्याज्ञात्वातांतुशिखंडिनीम् ॥ १३ ॥ धात्रीणांचसखीनांचव्रीडयानान्यवेदयन् ॥ कन्यांपंचालराजस्यसुतांतांवैशिखंडिनीम् ॥ १४ ॥ ततस्तंराजशार्दूलधात्र्योदाशार्णिकांस्तदा ॥ जग्मुरार्तिपरांप्रेष्याःप्रेषयामासुरेवच ॥ १५ ॥ ततोदशार्णाधिपतेःप्रेष्याःसर्वान्यवेदयन् ॥ विप्रलंभंयथा दत्तंसचचुक्रोधपार्थिवः ॥ १६ ॥ शिखंड्यपिमहाराजपुंवद्राजकुलेतदा ॥ विजहारमुदायुक्तःस्त्रीत्वंनैवातिरोचयन् ॥ १७ ॥ ततःकतिपयाहस्यतच्छ्रुत्वाभरतर्षभ ॥ हिरण्यवर्माराजेंद्रोषादार्तिंजगामह ॥ १८ ॥ ततोदाशार्णकोराजातीव्रकोपसमन्वितः ॥ दूतंप्रस्थापयामासद्रुपदस्यनिवेशनम् ॥ १९ ॥ ततोद्रुपदमासाद्यदूतःकांचनवर्मणः ॥ एकएकांतमुत्सार्यरहोवचनमब्रवीत् ॥ २० ॥ दाशार्णराजोराजंस्त्वामिदंवचनमब्रवीत् ॥ अभिषंगात्मकुपितोविप्रलब्धस्त्वयानघ ॥ ॥ २१ ॥ अवमन्यसेमांनृपतेनूनंदुर्मंत्रितंतव ॥ यन्मेकन्यांस्वकन्यार्थेमोहाद्याचितवानसि ॥ २२ ॥ तस्याद्यविप्रलंभस्यफलंप्राप्नुहिदुर्मते ॥ एषत्वांसजनामात्यमुद्धरामिस्थिरोभव ॥ २३ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिअंबोपाख्यानपर्वणिहिरण्यवर्मदूतागमनेऊननवत्यधिकशततमोऽध्यायः ॥ १८९ ॥ ॥ ९ ॥

॥ भीष्मउवाच ॥ ॥ एवमुक्तंस्यदूतेनद्रुपदस्यतदानृप ॥ चोरस्येवगृहीतस्यनप्रावर्ततभारती ॥ १ ॥ सयत्नमकरोत्तीव्रंसंबंधिन्यनुमानने ॥ दूतैर्मधुरसंभाषैर्नतदस्तीतिसंदिशन् ॥ २ ॥ सराजाभूयएवाथज्ञात्वातत्त्वमथागमत् ॥ कन्येतिपांचालसुतांत्वरमाणोविनिर्ययौ ॥ ३ ॥ ततःसंप्रेषयामासमित्राणाममितौजसाम् ॥ दुहितुर्विप्रलंभंतंधात्रीणांवचनात्तदा ॥ ४ ॥ ततःसमुदयंकृत्वाबलानांराजसत्तमः ॥ अभियानेमतिंचक्रेद्रुपदंप्रतिभारत ॥ ५ ॥ ततःसंमंत्रयामाससंमंत्रिभिःसमहीपतिः ॥ हिरण्यवर्माराजेंद्रपांचाल्यंपार्थिवंप्रति ॥ ६ ॥ तत्रवैनिश्चितंतेषामभूद्राज्ञांमहात्मनाम् ॥ तथ्यंभवतिचेदेतत्कन्याराजन्शिखंडिनी ॥ ७ ॥ बद्धापंचालराजानमानयिष्यामहेगृहम् ॥ अन्यंराजानमाधायपंचालेषुनरेश्वरम् ॥ ८ ॥ घातयिष्यामनृपतिंपांचालंसशिखंडिनम् ॥ ९ ॥ तत्तदानृतमाज्ञायपुनर्दूतान्नराधिपः ॥ प्रास्थापयत्पार्षतायनिहन्मीतिस्थिरोभव ॥ १० ॥

॥ १७५ ॥

॥ २० ॥ अभिषंगात्परोभवात् ॥ २१ ॥ २२ ॥ उद्धरामिउच्छेत्स्यामि ॥ २३ ॥

॥ इतिउद्योगप० नै० भारतभा० ऊननवत्यधिकशततमोऽध्यायः ॥ १८९ ॥ ॥ ९ ॥ ॥ एवमिति ॥ १ ॥ २ ॥ अगमत्तज्ञातवान् ॥ ३ ॥ ४ ॥ समुदयं समुदायम् ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ भार्यायाअदंड्यत्वंजाननप्यस्यनिर्दोषतांख्यापयितुमुभयकृतमप्यपराधंलोकमध्येभार्यायामेवासंजयितुंतामाह शिखंडिनीति यद्यप्यहंशिखंड्यस्मित्वयाशिखंडिन्याचवंचितस्तथापित्वंमाभैःशिखंडिनिविषयेविधास्येयुवयोर्धारणंपोषणंचकरिष्येननुहिंसिष्येइत्यर्थः यद्वाहेशिखंडिनित्वंमाभैःहेवरारोहेभार्येत्वंचमाभैरितिद्वयोरपिअभ

भीष्मउवाच ॥ ॥ सहिप्रकृत्यावैभीतःकिल्बिषीचनराधिपः ॥ भयंतीव्रमनुप्राप्तोद्रुपदःपृथिवीपतिः ॥ ११ ॥ विसृज्यदूतान्दाशार्णेद्रुपदःशोकमूर्छितः ॥ समेत्यभार्यारहितेवाक्यमाहनराधिपः ॥ १२ ॥ भयेनमहताविष्टोदहंशोकेनचाहतः ॥ पांचालराजोदयितांमातरंवैशिखंडिनः ॥ १३ ॥ अभियास्यतिमांकोपात्संबंधीसुमहाबलः ॥ हिरण्यवर्मानृपतिःकर्षमाणोवरूथिनीम् ॥ १४ ॥ किमिदानींकरिष्यावोमूढौकन्यामिमांप्रति ॥ शिखंडीकिलपुत्रस्तेकन्येतिपरिशंकितः ॥ १५ ॥ इतिसंचिंत्ययत्नेनसमित्रःसबलानुगः ॥ वंचितोस्मीतिमन्वानोमांकिलोद्वर्तुमिच्छति ॥ १६ ॥ किमत्रतथ्यंसुश्रोणिमिथ्यावाकिंब्रूहिशोभने ॥ श्रुत्वात्वत्तःशुभंवाक्यंसंविधास्याम्यहंतथा ॥ १७ ॥ अहंहिसंशयंप्राप्तोबालाचेयंशिखंडिनी ॥ त्वंचराज्ञिमहत्कृच्छ्रंसंप्राप्तावरवर्णिनि ॥ १८ ॥ सात्वंसर्वविमोक्षायतत्त्वमाख्याहिपृच्छतः ॥ तथाविदध्यांसुश्रोणिकृत्यमाशुशुचिस्मिते ॥ १९ ॥ शिखंडिनिचमाभैस्त्वंविधास्यतत्रतत्त्वतः ॥ कृपयाहंवरारोहेवंचितःपुत्रधर्मतः ॥ २० ॥ मयादाशार्णकोराजावंचितःसमहीपतिः ॥ तदाचक्ष्वमहाभागेविधास्येतत्रयद्धितम् ॥ २१ ॥ जानताहिनरेंद्रेणख्यापनार्थंपरस्यवै ॥ प्रकाशंचोदितादेवीप्रत्युवाचमहीपतिम् ॥ २२ ॥ ॥ इतिश्रीमहाभारतेउद्योगपर्वणिअंबोपाख्यानपर्वणिद्रुपदप्रश्नेनवत्यधिकशततमोऽध्यायः ॥ १९० ॥ ॥ ९ ॥ ॥ भीष्मउवाच ॥ ॥ ततःशिखंडिनोमातायथातत्त्वंनराधिप ॥ आचचक्षेमहाबाहोभत्रेंकन्यांशिखंडिनीम् ॥ १ ॥ अपुत्रयामयाराजन्सपत्नीनांभयादिदं ॥ कन्याशिखंडिनीजातापुरुषोवैनिवेदिता ॥ २ ॥ त्वयाचैवनरश्रेष्ठतन्मेप्रीत्यानुमोदितम् ॥ पुत्रकर्मकृतंचैवकन्यायाःपार्थिवर्षभ ॥ ३ ॥ भार्याचोढात्वयाराजन्दशार्णाधिपतेःसुता ॥ मयाचप्रत्यभिहितंदेववाक्यार्थदर्शनात् ॥ कन्याभूत्वापुमान्भावीत्येवंचैतदुपेक्षितम् ॥ ४ ॥ एतच्छ्रुत्वाद्रुपदोयज्ञसेनःसर्वंतत्त्वंमंत्रविज्ञोनिवेद्य ॥ मंत्रंराजामंत्रयामासराजन्यथायुक्तंरक्षणेवैप्रजानाम् ॥ ५ ॥ संबंधकंचैवसमर्थ्यतस्मिन्दाशार्णकेवैनृपतौनरेंद्र ॥ स्वयंकृत्वाविप्रलंभंयथावन्मंत्रैकाग्र्योनिश्चयंवैजगाम ॥ ६ ॥

यंदत्वाजनमध्येपृच्छति ॥ २० ॥ मयेति विधास्येकरिष्ये ॥ २१ ॥ परस्यशत्रोर्लोकस्यच ॥ २२ ॥ इतिउद्योगप० नैलकंठीयेभारतभावदीपेनवत्यधिकशततमोऽध्यायः ॥ १९० ॥ ॥ ९ ॥

ततइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ संबंधकंसमर्थ्ययुक्तमेवसांबंधिकंमयाकृतंनप्रतारणाकृतेतिउपपाद्य ॥ ६ ॥

॥ ७ ॥ ८ ॥ ९ ॥ देवीराज्ञी ॥ १० ॥ साधुमताकल्याणवतापिदेवानांप्रतिपत्तिःपूजानित्यंकर्तव्येतिशेषःकिमुदुःखार्णवंप्राप्यकर्तव्येति तस्मात्भवान्गुरून्देवाराधनार्थंब्राह्मणान्अर्चयतांपूजयतु॥११॥

स्वभावगुप्तंनगरमापत्कालेतुभारत ॥गोपयामासराजेंद्रसर्वतःसमलंकृतम्॥७॥ आर्तिंचपरमांराजाजगामसहभार्यया॥दशार्णपतिनासार्धंविरोधेभरतर्षभ॥८॥ कथंसंबंधिनासार्धंनमेस्याद्विग्रहोमहान्॥ इतिसंचिंत्यमनसादेवतामर्चयत्तदा ॥ ९ ॥ तंतुदृष्ट्वातदाराजन्देवीदेवपरंतदा॥ अर्चांप्रयुंजानमथोभार्यावचनमब्रवीत्॥१०॥ देवानांप्रतिपत्तिश्चसत्यंसाधुमतासताम्॥ किमुदुःखार्णवंप्राप्यतस्मादर्चयनांगुरून्॥ ११ ॥ दैवतानिचसर्वाणिपूज्यंतांभूरिदक्षिणम्॥अग्रयश्चापिहूयंतांदाशार्णप्रतिषेधने ॥१२॥ अयुद्धेननिवृत्तिंचमनसाचिंतयप्रभो॥ देवतानांप्रसादेनसर्वमेतद्भविष्यति॥१३॥मंत्रिभिर्मंत्रितंसार्धंत्वयापृथुललोचन॥पुरस्यास्याविनाशायययच्चराजंस्तथाकुरु॥१४॥ दैवंहिमानुषोपेतंभृशंसिध्यतिपार्थिव॥परस्परविरोधाद्धिसिद्धिरस्मिनचैतयोः॥१५॥तस्माद्विधायनगरेविधानंसचिवैःसह॥ अर्चयस्वयथाकामंदैवतानिविशांपते॥ १६ ॥ एवंसंभाषमाणौतुदृष्ट्वाशोकपरायणौ॥ शिखंडिनीतदाकन्याव्रीडितेवतपस्विनी॥ १७॥ ततःसाचिंतयामासमत्कृतेदुःखितावुभौ॥ इमावितिततश्चक्रेमतिंप्राणविनाशने॥ १८॥ एवंसानिश्चयंकृत्वाभृशंशोकपरायणा॥ निर्जगामगृहंत्यक्त्वागहनंनिर्जनंवनम्॥ १९॥ यक्षेणर्द्धिमताराजन्स्थूणाकर्णेनपालितं॥तद्भयादेवचजनोविसर्जयतितद्वनम्॥ २०॥तत्रचस्थूणभवनंसुधामृत्तिक लेपनं॥लाजोल्लापिकधूमाढ्यमुच्चप्राकारतोरणं॥२१॥तत्प्रविश्यशिखंडीसाद्रुपदस्यात्मजानृप॥ अनश्नानाबहुतिर्यंशरीरमुदशोषयत्॥२२॥दर्शयामास तांयक्षःस्थूणोमार्दवसंयुतः॥किमर्थोयंतवारंभःकरिष्येब्रूहिमाचिरम्॥२३॥ अशक्यमितिसायक्षंपुनःपुनरुवाचह॥करिष्यामीतिवैक्षिप्रंप्रत्युवाचाथगुह्यकः॥ २४॥ धनेश्वरस्यानुचरोवरदोस्मिनृपात्मजे॥ अदेयमपिदास्यामिब्रूहियत्तेविवक्षितम्॥२५॥ ततःशिखंडीतत्सर्वमखिलेनन्यवेदयत्॥ तस्मैयक्षप्रधानाय स्थूणाकर्णायभारत॥२६॥ ॥शिखंड्युवाच॥ ॥अपुत्रोमेपितायक्षनचिरान्नाशमेष्यति॥ अभियास्यतिसक्रोधोदशार्णाधिपतिर्हितम्॥२७॥ महाबलोमहोत्साहःसहेमकवचोनृपः॥तस्माद्रक्षस्वमायक्षमातरंपितरंचमे॥२८॥ प्रतिज्ञातोहिभवतादुःखप्रतिशमोमम॥ भवेयंपुरुषोयक्षत्वत्प्रसादादनिंदितः॥२९॥

भूरिदक्षिणंयथास्यात्तथा प्रतिषेधनेपरादृत्यर्थं ॥ १२ ॥ १३॥१४॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ सुधामृत्तिकलेपनम् सुधाचूर्णैसैवमृत्तिकातयालेपनंयस्य लाजोल्लापिकःलाजानिउशीराणिउल्लापयतिसूचयतीतिलाजोल्लापिकःउशीरपरिमलयुक्तधूमाढ्यमित्यर्थः उशीरेलाजमुद्दिष्टमितिविश्वः ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९॥

॥ ३० ॥ ॥ इतिउ०नै०भारतभा०एकनवत्यधिकशततमोऽध्यायः॥१९१॥ ॥७॥ ॥शिखंडीति चिंत्यचिंतयित्वा ॥ १ ॥ २ ॥ ३ ॥ विहंगमःआकाशगामी ॥ ४ ॥५॥६॥७॥समयंशपथं संदेहेलिंगे स

यावदेवसराजावैनोपयातिपुरंमम॥ तावदेवमहायक्षप्रसादंकुरुगुह्यक ॥ ३० ॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिअंबोपाख्यानपर्वणिस्थूणाकर्णसमागमेएकनवत्यधिकशततमोऽध्यायः॥ १९१॥ ॥ ९ ॥ ॥भीष्मउवाच॥ ॥शिखंडिवाक्यंश्रुत्वाथसयक्षोभरतर्षभ॥ प्रोवाचमनसाचिंत्यदैवेनोपनिपीडितः॥ १ ॥भवितव्यंतथातद्धिममदुःखायकौरव॥ भद्रेकामंकरिष्यामिसमयंतुनिबोधमे॥ २ ॥किंचित्कालांतरेदास्येपुल्लिंगंस्वमिदंतव॥ आगंतव्यंत्वयाकालेसत्यंचैववदस्वमे॥३॥ प्रभुःसंकल्पसिद्धोस्मिकामचारीविहंगमः॥ मत्प्रसादात्पुरंचैवत्राहिबंधूंश्चकेबलम्॥४॥ स्त्रीलिंगंधारयिष्यामितवेदंपार्थिवात्मजे॥सत्यंमेप्रतिजानीहिकरिष्यामिप्रियंतव॥५॥ ॥शिखंड्युवाच ॥प्रतिदास्यामिभगवन्पुल्लिंगंतवसुव्रत॥ किंचित्कालांतरंस्त्रीत्वंधारयस्वनिशाचर॥ ६ ॥ प्रतियातेदशार्णेतुपार्थिवेहमवर्मणि॥ कन्यैवहिभविष्यामिपुरुषस्त्वंभविष्यसि॥७॥ ॥भीष्मउवाच॥ ॥इत्युक्तासमयंतत्रचक्रातेतावुभौनृप॥ अन्योन्यस्याभिसंदेहेनौसंक्रामयतांततः॥ ८ ॥ स्त्रीलिंगंधारयामासस्थूणायक्षोथभारत॥यक्षरूपंचतद्वीमंशिखंडीप्रत्यपद्यत॥९॥ ततःशिखंडीपांचाल्यःपुंस्त्वमासाद्यपार्थिव॥ विवेशनगरंहृष्टःपितरंचसमासदत्॥१०॥यथावृत्तंतुतत्सर्वमाचख्यौद्रुपदस्यतत्॥द्रुपदस्तत्स्यतच्छ्रुत्वाहर्षमाहारयत्परम्॥११॥सभार्यस्तच्चसस्मारमहेश्वरवचस्तदा॥ ततःसंप्रेषयामासदशार्णाधिपतेर्नृपः॥ १२॥ पुरुषोयंममसुतःश्रद्धत्तांमेभवानिति॥अथदाशार्णकोराजासहसाभ्यागमत्तदा॥१३॥ पंचालराजंद्रुपदंदुःखशोकसमन्वितः॥ ततःकांपिल्यमासाद्यदशार्णाधिपतिस्ततः॥१४॥प्रेषयामाससत्कृत्यदूतंब्रह्मविदांवरम्॥ब्रूहिमद्वचनाद्भूतपांचाल्यंतंनृपाधमम्॥ १५॥ यन्मेकन्यांस्वकन्यार्थेदृतवानसिदुर्मते॥ फलंतस्यावलेपस्यद्रक्ष्यस्यद्यनसंशयः॥ १६॥ एवमुक्तश्चतेनासौब्राह्मणोराजसत्तम॥दूतःप्रयातोनगरंदाशार्णनृपचोदितः॥ १७॥ ततआसादयामासपुरोधाद्रुपदंपुरे॥ तस्मैपांचालकोराजागामर्घ्यंचसुसत्कृतम्॥ १८॥ प्रापयामासराजेंद्रसहतेनशिखंडिना॥ तांपूजांनाभ्यनंदत्सवाक्यंचेदमुवाचह॥ १९॥ यदुक्तंतेनवीरेणराज्ञाकांचनवर्मणा॥ यत्तेहमधमाचारदुहित्रास्म्यभिवंचितः॥ २०॥तस्यपापस्यकरणात्फलंप्राप्नुहिदुर्मते॥ देहियुद्धंनरपतेममाद्यरणमूर्धनि॥ २१॥ उद्धरिष्यामितेसद्यःसामात्यसुतबांधवम्॥ तदुपालंभसंयुक्तंश्रावितःकिलपार्थिवः॥ २२॥

स्मृगृदिक्षेतेउपचीयेतेरतिकालेप्रथेतेइतिण्युत्पत्तेः अभिसंदोर्हेइतिपाठेपिसंदुह्यतेप्रजाआभ्यामितिण्युत्पत्त्यातेएव ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

॥ २३ ॥ उत्तरंउत्कृष्टतरम् ॥ २४ ॥ २५ ॥ २६ ॥ आगमःपरीक्षा ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ लाज्यैःउशीरजैः पाठांतरेलाजैरुशीरैः भक्ष्यंलड्डुकेक्षुदंडादिदंतव्यापार

दशार्णपतिनाचोक्तोमंत्रिमध्येपुरोधसा ॥ अभवद्भरतश्रेष्ठद्रुपदःप्रणयानतः ॥ २३ ॥ यदाहमांभवान्ब्रह्मन्संबंधिवचनाद्वचः ॥ अस्योत्तरंप्रतिवचोदूतोराज्ञे वदिष्यति ॥ २४ ॥ ततःसंप्रेषयामासद्रुपदोपिमहात्मने ॥ हिरण्यवर्मणेदूतंब्राह्मणंवेदपारगम् ॥ २५ ॥ तमागम्यतुराजानंदशार्णाधिपतिंतदा ॥ तद्वाक्यमाददेरा जन्यदुक्तंद्रुपदेनह ॥ २६ ॥ आगमःक्रियतांव्यक्तःकुमारोयंसुतोमम ॥ मिथ्यैतदुक्तंकेनापितदश्रद्धेयमित्युत ॥ २७ ॥ ततःसराजाद्रुपदस्यश्रुत्वाविमर्षयुक्तो युवतीर्वरिष्ठाः ॥ संप्रेषयामाससुचारुरूपाःशिखंडिनंस्त्रीपुमान्वेतिवेत्तुम् ॥ २८ ॥ ताःप्रेषितास्तत्त्वभावंविदित्वाप्रीत्याराज्ञेतच्छशंसुर्हिसर्वं ॥ शिखंडिनंपुरुषंकौर वेंद्रदाशार्णराजायमहानुभावम् ॥ २९ ॥ ततःकृत्वातुराजासआगमंप्रीतिमानथ ॥ संबंधिनासमागम्यहृष्टोवासमुवासह ॥ ३० ॥ शिखंडिनेचमुदितःप्रादाद्वित्तं जनेश्वरः ॥ हस्तिनोश्वांश्चगाश्चैवदास्योथबहुलास्तथा ॥ ३१ ॥ पूजितश्चप्रतिययौनिर्भर्त्स्यतनयांकिल ॥ विनीतकिल्बिषेप्रीतेहेमवर्मणिपार्थिवे ॥ ३२ ॥ प्रतिया तेदशार्णेतुहृष्टरूपाशिखंडिनी ॥ कस्यचित्त्वथकालस्यकुबेरोनरवाहनः ॥ लोकयात्रांप्रकुर्वाणःस्थूणस्यागान्निवेशनम् ॥ ३३ ॥ सतद्गृहस्योपरिवर्तमानआलो कयामासधनाधिगोप्ता ॥ स्थूणस्ययक्षस्यविवेशवेश्मस्वलंकृतंमाल्यगुणैर्विचित्रैः ॥ ३४ ॥ लाज्यैश्चगंधैश्चतथावितानैरभ्यर्चितंधूपनधूपितंच ॥ ध्वजैःपता काभिरलंकृतंचभक्ष्यान्नपेयामिषदंतहोमम् ॥ ३५ ॥ तत्स्थानंतस्यदृष्ट्वातुसर्वतःसमलंकृतम् ॥ मणिरत्नसुवर्णानांमालाभिःपरिपूरितम् ॥ ३६ ॥ नानाकुसुमगंधा ढ्यंसिक्तसंमृष्टशोभितम् ॥ अथाब्रवीद्यक्षपतिस्तान्यक्षाननुगांस्तदा ॥ ३७ ॥ स्वलंकृतमिदंवेश्मस्थूणस्यामितविक्रमाः ॥ नोपसर्पतिमांचैवकस्मादद्यसमंदधीः ॥ ३८ ॥ यस्माज्जानन्समंदात्मामामसौनोपसर्पति ॥ तस्मात्तस्मैमहादंडोधार्यःस्यादितिमेमतिः ॥ ३९ ॥ ॥ यक्षाऊचुः ॥ ॥ द्रुपदस्यसुताराजन्राज्ञोजाता शिखंडिनी ॥ तस्यानिमित्तेकस्मिंश्चित्प्रादात्पुरुषलक्षणम् ॥ ४० ॥ अग्रहील्लक्षणंस्त्रीणांस्त्रीभूतोतिष्ठतेगृहे ॥ नोपसर्पतितेनासौसव्रीडःस्त्रीसरूपवान् ॥ ४१ ॥ एत स्मात्कारणाद्राजन्स्थूणोनत्वाद्यसर्पति ॥ श्रुत्वाकुरुयथान्यायंविमानमिहतिष्ठतां ॥ ४२ ॥ आनीयतांस्थूणइतिततोयक्षाधिपोब्रवीत् ॥ कर्तास्मिनिग्रहंतस्य प्रत्युवाचपुनःपुनः ॥ ४३ ॥

ग्राह्यं अन्नंअदनीयंओदनपायसखंडशर्करादिभोज्यलेह्यरूपं पेयंसुरासवादि आमिषंमांसं अभ्यर्हितत्वादस्यभक्ष्यात्पृथक्करणं एतान्येवदंतहोमादंतै र्हूयंतइतिव्युत्पत्त्याऽभ्यवहार्याणियस्मिन्तंभक्ष्यान्नपेयामिषदंतहोमं आमिषमप्रमेयमितिपाठस्तुमूर्खकल्पितः ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ तिष्ठतेगृहेएवस्थिरोस्ति ॥ ४१ ॥ त्वाद्यत्वामद्य ॥ ४२ ॥ ४३ ॥

॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ चतुष्पादंग्रहणधारणप्रयोगप्रतीकारैश्चतुर्भिःपादैर्युक्तम् ॥ ६१ ॥ ६२ ॥

सोभ्यगच्छतयक्षेंद्रमाहूतःपृथिवीपते ॥ स्त्रीसरूपोमहाराजतस्थौव्रीडासमन्वितः ॥ ४४ ॥ तंशशापाथसंक्रुद्धोधनदःकुरुनंदन ॥ एवमेवभवत्वद्यस्त्रीत्वंपापस्य गुह्यकाः ॥ ४५ ॥ ततोब्रवीद्यक्षपतिर्महात्मायस्माददास्त्ववमन्येहयक्षान् ॥ शिखंडिनोलक्षणंपापबुद्धेःस्त्रीलक्षणंचाग्रहीःपापकर्मन् ॥ ४६ ॥ अप्रवृत्तंसुदुर्बुद्धे यस्मादेतत्त्वयाकृतम् ॥ तस्मादद्यप्रभृत्येवस्त्रीत्वंसापुरुषस्तथा ॥ ४७ ॥ ततःप्रसादयामासुर्यक्षावैश्रवणंकिल ॥ स्थूणस्यार्थेकुरुष्वांतंशापस्येतिपुनःपुनः ॥ ४८ ॥ ततोमहात्मायक्षेंद्रःप्रत्युवाचानुगामिनः ॥ सर्वान्यक्षगणांस्तातशापस्यांतचिकीर्षया ॥ ४९ ॥ शिखंडिनिहतेयक्षाःस्वंरूपंप्रतिपत्स्यते ॥ स्थूणोयक्षोनिरुद्वेगो भवत्वितिमहामनाः ॥ ५० ॥ इत्युक्त्वाभगवान्देवोयक्षराजःसुपूजितः ॥ प्रययौसहितःसर्वैर्निमेषांतरचारिभिः ॥ ५१ ॥ स्थूणस्तुशापंसंप्राप्यतत्रैवन्यवसत्तदा ॥ समयेचागमत्तूर्णंशिखंडीतंक्षपाचरम् ॥ ५२ ॥ सोभिगम्याब्रवीद्वाक्यंप्राप्तोस्मिभगवन्निति ॥ तमब्रवीत्ततःस्थूणःप्रीतोस्मीतिपुनःपुनः ॥ ५३ ॥ आर्जवेनागतं दृष्ट्वाराजपुत्रंशिखंडिनम् ॥ सर्वमेवयथावृत्तमाचचक्षेशिखंडिने ॥ ५४ ॥ ॥ यक्षउवाच ॥ ॥ शप्तोवैश्रवणेनाहंत्वत्कृतेपार्थिवात्मज ॥ गच्छेदानींयथाकामंचर लोकान्यथासुखम् ॥ ५५ ॥ दिष्टमेतत्पुरामन्येनशक्यमतिवर्तितुम् ॥ गमनंतवचेतोहिपौलस्त्यस्यचदर्शनं ॥ ५६ ॥ ॥ भीष्मउवाच ॥ ॥ एवमुक्तःशिखंडीतुस्थूणय क्षेणभारत ॥ प्रत्याजगामनगरंहर्षेणमहतावृतः ॥ ५७ ॥ पूजयामासविविधैर्गंधमाल्यैर्महाधनैः ॥ द्विजातीन्देवताश्चैवचैत्यानथचतुष्पथान् ॥ ५८ ॥ द्रुपदःस हपुत्रेणसिद्धार्थेनशिखंडिना ॥ मुदंचपरमांलेभेपांचाल्यःसहबांधवैः ॥ ५९ ॥ शिष्यार्थंप्रददौचाथद्रोणायकुरुपुंगव ॥ शिखंडिनंमहाराजपुत्रंस्त्रीपूर्विणंतथा ॥ ६० ॥ प्रतिपेदेचतुष्पादंधनुर्वेदंनृपात्मजः ॥ शिखंडीसहयुष्माभिर्धृष्टद्युम्नश्चपार्षतः ॥ ६१ ॥ ममत्वेतच्चरास्तातयथावत्प्रत्यवेदयन् ॥ जडांधबधिराकारायेमु क्ताद्रुपदेमया ॥ ६२ ॥ एवमेषमहाराजस्त्रीपुमान्द्रुपदात्मजः ॥ ससंभूतःकुरुश्रेष्ठशिखंडीरथसत्तमः ॥ ६३ ॥ ज्येष्ठाकाशिपतेःकन्याअंबानामेतिविश्रुता ॥ द्रुप दस्यकुलेजाताशिखंडीभरतर्षभ ॥ ६४ ॥ नाहमेनंधनुष्पाणिंयुयुत्सुंसमुपस्थितम् ॥ मुहूर्तमपिपश्येयंप्रहरेयंनचाप्युत ॥ ६५ ॥ व्रतमेतन्ममसदापृथिव्यामपि विश्रुतम् ॥ स्त्रियांस्त्रीपूर्वकेचैवस्त्रीनाम्निस्त्रीसरूपिणि ॥ ६६ ॥ नमुंचेयमहंबाणमितिकौरवनंदन ॥ नहन्यामहमेतेनकारणेनशिखंडिनम् ॥ ६७ ॥ एतत्तत्वमहंवे दजन्मतातशिखंडिनः ॥ ततोनैनंहनिष्यामिसमरेष्वाततायिनम् ॥ ६८ ॥

॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥

॥ ६९ ॥ युक्तंस्त्रीषुअयुद्धमितिशेषः ॥ ७० ॥ ॥ इतिउद्योगप०नैलकंठीयेभारतभावदीपेद्विनवत्यधिकशततमोऽध्यायः ॥ १९२ ॥ ॥ ७ ॥ ॥ प्रभातायामिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

यदिभीष्मःस्त्रियंहन्यात्संतःकुर्युर्विगर्हणम्॥नैनंतस्माद्वनिष्यामिहत्वापिसमरेस्थितम्॥६९॥ ॥वैशंपायनउवाच॥ ॥एतच्छ्रुत्वातुकौरव्योराजादुर्योधनस्तदा॥ मुहूर्तमिवसध्यात्वाभीष्मेयुक्तममन्यत ॥ ७०॥ इति०महाभारतेउद्योग०अंबोपाख्यानप०शिखंडिपुंस्त्वप्राप्तौद्विनवत्यधिकशततमोऽध्यायः॥१९२॥

संजयउवाच॥ ॥प्रभातायांतुशर्वर्यांपुनरेवसुतस्तव॥ मध्येसर्वस्यसैन्यस्यपितामहमपृच्छत॥१॥ पांडवेयस्यगांगेययदेतत्सैन्यमुद्यतम्॥प्रभूतनरनागाश्वं महारथसमाकुलम्॥२॥भीमार्जुनप्रभृतिभिर्महेष्वासैर्महाबलैः॥लोकपालसमैर्गुप्तंधृष्टद्युम्नपुरोगमैः॥३॥अप्रधृष्यमनावार्यमुद्भूतमिवसागरं॥सेनासागरमक्षोभ्यमपिदेवैर्महाहवे॥ ४॥ केनकालेनगांगेयक्षपयेथामहाद्युते ॥ आचार्योवामहेष्वासःकृपोवाशुमहाबलः ॥ ५ ॥ कर्णोवासमरश्लाघीद्रौणिर्वाद्विजसत्तमः॥ दिव्यास्त्रविदुषःसर्वेभवंतोहिबलेमम॥ ६॥ एतदिच्छाम्यहंज्ञातुंपरंकौतूहलंहिमे ॥ तदिनित्यंमहाबाहोवक्तुमर्हसितन्मम॥७॥ ॥भीष्मउवाच॥ ॥अनुरूपंकुरुश्रेष्ठत्वय्येतत्पृथिवीपते॥ बलाबलममित्राणांतेषांयदिहपृच्छसि॥८॥शृणुराजन्ममरणेयाशक्तिःपरमाभवेत्॥ शस्त्रवीर्येरणेयच्चभुजयोश्चमहाभुज॥ ९॥ आर्जवेनैवयुद्धेनयोद्धव्यइतरोजनः॥ मायायुद्धेनमायावीइत्येद्धर्मनिश्चयः॥ १०॥ हन्यामहंमहाभागपांडवानामनीकिनीम्॥ दिवसेदिवसेकृत्वा भागंप्रागाह्निकंमम॥ ११॥ योधानांदशसाहस्रंकृत्वाभागंमहाद्युते॥ सहस्ररथिनामेकमेषभागोमतोमम ॥ १२॥ अनेनाहंविधानेनसन्नद्धःसततोत्थितः॥ क्षपयेयंमहत्सैन्यंकालेनानेनभारत॥ १३॥ मुंचेयंयदिवास्त्राणिमहांतिसमरेस्थितः॥शतसाहस्रघातीनिहन्यांमासेनभारत॥१४॥ ॥संजयउवाच॥ ॥श्रुत्वाभीष्मस्यतद्वाक्यंराजादुर्योधनस्ततः॥ पर्यपृच्छतराजेंद्रद्रोणमंगिरसांवरम्॥१५॥आचार्यकेनकालेनपांडुपुत्रस्यसैनिकान्॥ निहन्याइतितंद्रोणःप्रत्युवाचहसन्निव॥ १६॥ स्थविरोस्मिमहाबाहोमंदप्राणविचेष्टितः॥ शस्त्राग्निनानिर्दहेयंपांडवानामनीकिनीम्॥१७॥ यथाभीष्मःशांतनवोमासेनेतिमतिर्मम॥एषामेपरमाशक्तिरेतन्मेपरमंबलम्॥ १८॥ द्वाभ्यामेवतुमासाभ्यांकृपःशारद्वतोब्रवीत्॥ द्रौणिस्तुदशरात्रेणप्रतिजज्ञेबलक्षयम्॥ १९॥ कर्णस्तुपंचरात्रेणप्रतिजज्ञेमहास्त्रवित्॥ तच्छ्रुत्वासूतपुत्रस्यवाक्यंसागरगामुतः॥ २०॥ जहाससस्वनंहासंवाक्यंचेदमुवाचह॥ नहियावद्रणेपार्थबाणशंखधनुर्धरम्॥ २१॥

॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ प्रागाह्निकंअह्नःपूर्वभागकार्यम् ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

॥ १७८ ॥

॥ २२ ॥ ॥ इति०उ०नै०भा०भा०त्रिनवत्यधिकशततमोऽध्यायः ॥ १९३ ॥ ॥७॥ ॥ एतच्छ्रुत्वेति ॥ १ ॥ व्युषितांनिशांप्रभातकाले ॥ २॥३॥४॥५॥६॥७॥ ८॥९॥१०॥ भूतमुत्पन्नं भव्यमुत्पा

वासुदेवसमायुक्तंरथेनायांतमाहवे॥ समागच्छसिराधेयतेनैवमन्यिमन्यसे ॥शक्यमेवंचभूयश्चत्वयावक्तुंयथेष्टतः॥ २२॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणि अंबोपाख्यानपर्वणिभीष्मादिशक्तिकथनेत्रिनवत्यधिकशततमोऽध्यायः॥ १९३॥ ॥७॥ ॥वैशंपायनउवाच॥ ॥एतच्छ्रुत्वातुकौंतेयःसर्वान्भ्रातॄनुपह्वरे॥ आहूयभरतश्रेष्ठइदंवचनमब्रवीत्॥ १॥ ॥युधिष्ठिरउवाच॥ ॥धार्तराष्ट्रस्यसैन्येषुयेचारपुरुषामम॥ तेप्रवर्त्तिप्रयच्छंतिममेमांव्युषितांनिशाम्॥ २॥दुर्योधनःकिलापृच्छदापगेयंमहाव्रतम्॥ केनकालेनपांडूनांहन्याःसैन्यमितिप्रभो॥३॥मासेनेतिचतेनोक्तोधार्तराष्ट्रःसुदुर्मतिः॥तावताचापिकालेनद्रोणोविप्रतिजज्ञिवान्॥४॥ गौतमोद्विगुणंकालमुक्तवानितिनःश्रुतम्॥ द्रौणिस्तुदशरात्रेणप्रतिजज्ञेमहास्त्रवित्॥५॥तथादिव्यास्त्रवित्कर्णःसंपृष्टःकुरुसंसदि॥ पंचभिर्दिवसैर्हंतुंससैन्यंप्रतिजज्ञिवान्॥ ६॥तस्मादहमपीच्छामिश्रोतुमर्जुनतेवचः॥ कालेनकियताशत्रून्क्षपयेरितिफाल्गुन॥ ७॥ एवमुक्तोगुडाकेशःपार्थिवेनधनंजयः॥ वासुदेवंसमीक्ष्येदंवचनंप्रत्यभाषत ॥८॥ सर्वएतेमहात्मानःकृतास्त्राश्चित्रयोधिनः॥ असंशयंमहाराजहन्युरेवनसंशयः॥ ९ ॥ अपैतुतेमनस्तापोयथासत्यंब्रवीम्यहम्॥ हन्यामेकरथेनैववासुदेवसहायवान्॥१०॥सामरानपिलोकांस्त्रीन्सर्वान्स्थावरजंगमान्॥ भूतंभव्यंभविष्यंचनिमेषादितिमे मतिः॥ ११॥ यत्तद्घोरंपशुपतिःप्रादादस्त्रंमहन्मम॥ कैरातेद्वंद्वयुद्धेतुतदिदंमयिवर्तते ॥ १२॥ यद्युगांतेपशुपतिःसर्वभूतानिसंहरन्॥ प्रयुंक्तेपुरुषव्याघ्रतदिदंमयिवर्तते॥१३॥तन्नजानातिगांगेयोनद्रोणोनचगौतमः॥नचद्रोणसुतोराजन्कुतएवतुसूतजः॥१४॥नतुयुक्तंरणेहंतुंदिव्यैरस्त्रैःपृथग्जनम्॥ आर्जवेनैवयुद्धेनविजेष्यामोवयंपरान्॥ १५॥ तयेमेपुरुषव्याघ्राःसहायास्त्रवपार्थिव॥ सर्वेदिव्यास्त्रविद्वांसःसर्वेयुद्धाभिकांक्षिणः॥ १६॥वेदांतावभृथस्नाताःसर्वएतेऽपराजिताः॥ निहन्युःसमरेसेनांदेवानामपिपांडव॥ १७॥ शिखंडीयुयुधानश्चधृष्टद्युम्नश्चपार्षतः॥भीमसेनोयमौचोभौयुधामन्यूत्तमौजसौ॥ १८॥ विराटद्रुपदौचोभौभीष्मद्रोणसमौयुधि ॥ शंखश्चैवमहाबाहुर्हैडिंबश्चमहाबलः॥ १९॥ पुत्रास्त्यांजनपर्वातुमहाबलपराक्रमः॥ शैनेयश्चमहाबाहुःसहायोरणकोविदः॥ २०॥ अभिमन्युश्चबलवान्द्रौपद्याःपंचचात्मजाः॥ स्वयंचापिसमर्थोसित्रैलोक्योत्सादनेपिच॥२१॥

यमानं अनयोर्बीजभूतयोर्नाशेबीजाभावाद्व

विष्यस्यापिनाशोमयैवकर्तव्यइत्यर्थः॥ ११॥ १२॥ १३॥ १४॥ १५॥ १६॥ वेदांतावभृथस्नाताःवेदग्रहणांतएवदारक्रियायासहैवयागंकृतवंतइत्यर्थः॥ १७॥ १८॥ १९॥ २०॥ २१॥

॥ २२ ॥ इतिउद्योग०नै०भारतभा०चतुर्नवत्यधिकशततमोऽध्यायः॥१९४॥ ॥ ७ ॥ ॥ततःप्रभातेइति ॥१॥ आप्लाव्यस्नात्वा ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

क्रोधाद्यंपुरुषंपश्येस्तथाशक्रसमद्युते॥ सक्षिप्रंनभवेद्यक्तमितित्वांवेद्मिकौरव ॥ २२॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिअंबोपाख्यानपर्वणिअर्जुनवाक्ये चतुर्नवत्यधिकशततमोऽध्यायः ॥ १९४ ॥ ॥ ७ ॥ ॥वैशंपायनउवाच ॥ ॥ततःप्रभातेविमलेधार्तराष्ट्रेणचोदिताः ॥ दुर्योधनेनराजानःप्रययुःपांडवान्प्रति॥१॥ आप्लाव्यशुचयःसर्वेस्रग्विणःशुक्लवाससः ॥ गृहीतशस्त्राध्वजिनःस्वस्तिवाच्यहुताग्नयः॥२॥सर्वेब्रह्मविदःशूराःसर्वेसुचरितव्रताः॥ सर्वेकामकृतश्चैव सर्वेचाहवलक्षणाः॥३॥ आहवेषुपराँल्लोकान्जिगीषंतोमहाबलाः॥ एकाग्रमनसःसर्वेश्रद्दधानाःपरस्परम्॥ ४॥ विंदानुविंदावावंत्यौकेकयावाद्भिकैःसह ॥ प्रययुःसर्वएवैतेभारद्वाजपुरोगमाः॥ ५॥ अश्वत्थामाशांतनवःसैंधवोथजयद्रथः॥ दाक्षिणात्याःप्रतीच्याश्चपार्वतीयाश्चयेनृपाः ॥ ६ ॥ गांधारराजःशकुनिः प्राच्योदीच्याश्चसर्वशः॥ शकाःकिरातायवनाःशिबयोथवसातयः॥ ७॥ स्वैःस्वैरनीकैःसहिताःपरिवार्यमहारथम्॥ एतेमहारथाःसर्वेद्वितीयेनिर्ययुर्बले॥ ८ ॥ कृतवर्मासहानीकस्त्रिगर्तश्चमहारथः॥ दुर्योधनश्चनृपतिर्भ्रातृभिःपरिवारितः ॥ ९ ॥ शलोभूरिश्रवाःशल्यःकौसल्योथबृहद्रथः ॥ एतेपश्चादनुगताधार्तराष्ट्रपुरोगमाः॥ १० ॥ तेसमेत्ययथान्यायंधार्तराष्ट्रामहाबलाः॥ कुरुक्षेत्रस्यपश्चार्धेव्यवातिष्ठंतदंशिताः ॥ ११ ॥ दुर्योधनस्तुशिबिरंकारयामासभारत ॥ तथैवहास्तिनपुरंद्वितीयंसमलंकृतम्॥ १२॥नविशेषंविजानंतिपुरस्यशिबिरस्यवा॥कुशलाअपिराजेंद्रनरानगरवासिनः॥ १३॥ तादृशान्येवदुर्गाणिराज्ञामपिमहीपतिः॥ कारयामासकौरव्यःशतशोथसहस्रशः॥ १४॥ पंचयोजनमुत्सृज्यमंडलंतद्रणाजिरम्॥ सेनानिवेशास्तेराजन्नाविशञ्छतसंघशः॥ १५॥ तत्रतेपृथिवीपालायथोत्साहंयथाबलम्॥विविशुःशिबिराण्यत्रद्रव्यवंतिसहस्रशः॥ १६॥ तेषांदुर्योधनोराजाससैन्यानांमहात्मनां॥ व्यादिदेशसवात्यानांभक्ष्यभोज्यमनुत्तमम्॥ १७॥ सनागाश्वमनुष्याणांयेचशिल्पोपजीविनः॥ येचान्येनुगतास्तत्रसूतमागधबंदिनः॥ १८॥वणिजोगणिकाश्चारायेचैवप्रेक्षकाजनाः॥सर्वांस्तान्कौरवोराजाविधिवत्पत्यवैक्षत॥ १९॥ ॥इतिश्रीमहाभारतेउद्योगपर्वणिअंबोपाख्यानपर्वणिकौरवसैन्यनिर्याणेपंचनवत्यधिकशततमोऽध्यायः॥ १९५॥

वैशंपायनउवाच॥ ॥तथैवराजाकौंतेयोधर्मपुत्रोयुधिष्ठिरः॥ धृष्टद्युम्नमुखान्वीरांश्चोदयामासभारत॥ १॥ ॥ १३॥ १४॥ उत्सृज्यउत्कर्षेणस्थित्वा पंचयोजनंवर्तुलंपरिधिरूपत्वेत्यर्थः सेनानिवेशाःसैनिकाःवणिक्प्रभृताश्चादयः॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ ॥इति०उ०नै०भा०पंचनवत्यधिकशततमोऽध्यायः॥ १९५ ॥ ॥ ७ ॥ ॥ तथैवेति ॥ १ ॥

॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ बलस्कंधंसैन्यसमुदायम् ॥ ९ ॥ भांडंयुद्धोपकरणम् ॥ १० ॥ ११ ॥ भीमधन्वानःअयंतेप्रचरंत्यस्यामितिभीमधन्वायनी ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

चेदिकाशिकरूषाणांनेतारंदृढविक्रमम्॥ सेनापतिममित्रघ्नंधृष्टकेतुमथादिशत्॥ २॥ विराटंद्रुपदंचैवययुधानंशिखंडिनम्॥पांचाल्यौचमहेष्वासौयुधामन्यूत्तमौजसौ॥ ३॥ तेशूराश्चित्रवर्माणस्तनकुंडलधारिणः॥ आज्याबसिक्ताज्वलिताधिष्ण्येष्विवहुताशनाः॥४॥अशोभंतमहेष्वासाग्रहाःप्रज्वलिताइव॥अथसैन्ययथायोगंपूजयित्वानरर्षभः॥ ५॥ दिदेशतान्यनीकानिप्रयाणायमहीपतिः॥तेषांयुधिष्ठिरोराजाससैन्यानांमहात्मनाम्॥६॥ व्यादिदेशसवात्यानांभक्ष्यभोज्यमनुत्तमम्॥ सगजाश्वमनुष्याणांयेचशिल्पोपजीविनः॥ ७॥ अभिमन्युंबृहंतंचद्रौपदेयांश्चसर्वशः॥धृष्टद्युम्नमुखानेतान्प्राहिणोत्पांडुनंदनः॥८॥ भीमंचययुधानंचपांडवंचधनंजयम्॥ द्वितीयंप्रेषयामासबलस्कंधंयुधिष्ठिरः॥ ९॥ भांडंसमारोपयतांचरतांसंप्रधावताम्॥ त्रस्तानांतत्रयोधानांशब्दोदिवमिवास्पृशत्॥ १०॥ स्वयमेवततःपश्चाद्विराट्द्रुपदान्वितः॥अथापरैर्महीपालैःसहप्रायान्महीपतिः॥ ११॥भीमधन्वायनीसेनाधृष्टद्युम्नेनपालिता॥ गंगेवपूर्णास्तिमितास्यंदमानाव्यदृश्यत ॥ १२ ॥ ततःपुनरनीकानिन्ययोजयतबुद्धिमान्॥ मोहयन्धृतराष्ट्रस्यपुत्राणांबुद्धिनिश्चयम् ॥ १३ ॥ द्रौपदेयान्महेष्वासानभिमन्युंचपांडवः॥नकुलंसहदेवंचसर्वांश्चैवप्रभद्रकान्॥ १४॥ दशचाश्वसहस्राणिद्विसहस्राणिदंतिनाम्॥ अयुतंचपदातीनांरथाःपंचशतंतथा॥ १५॥ भीमसेनस्यदुर्धर्षंप्रथमंप्रादिशद्बलम्॥मध्यमेचविराटंचजयत्सेनंचपांडवः॥ १६॥महारथौचपांचाल्यौयुधामन्यूत्तमौजसौ॥वीर्यवंतौमहात्मानौगदाकार्मुकधारिणौ॥ १७॥ अन्वयातांतदामध्येवासुदेवधनंजयौ॥ बभूवुरतिसंरब्धाःकृतप्रहरणानराः॥ १८॥ तेषांविंशतिसाहस्राहयाःशूरैरधिष्ठिताः॥ पंचनागसहस्राणिरथवंशाश्चसर्वशः॥ १९॥ पदातयश्चयेशूराःकार्मुकासिगदाधराः॥ सहस्रशोऽन्वयुःपश्चादद्रतश्चसहस्रशः ॥ २० ॥ युधिष्ठिरोयत्रसैन्येस्वयमेवबलार्णवे ॥ तत्रतेपृथिवीपालाभूयिष्ठंपर्यवस्थिताः॥ २१॥ तत्रनागसहस्राणिहयानामयुतानिच॥ तथारथसहस्राणिपदातीनांचभारत ॥ २२ ॥ चेकितानःस्वसैन्येनमहतापार्थिवर्षभः॥ धृष्टकेतुश्चचेदीनांप्रणेतापार्थिवोययौ॥ २३॥ सात्यकिश्चमहेष्वासोवृष्णीनांप्रवरोरथः॥ वृतःशतसहस्रेणरथानांप्रणुदन्बली॥२४॥ क्षत्रदेवब्रह्मदेवौरथस्थौपुरुषर्षभौ॥ जघनंपालयंतौचपृष्ठतोनुप्रजग्मतुः॥ २५॥

॥ १७ ॥ कृतप्रहरणाःकृतयुद्धाः ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

शकटापणवेशाश्चयानंयुग्यंचसर्वशः ॥ तत्रनागसहस्राणिहयानामयुतानिच॥फल्गुसर्वंकलत्रंचयत्किंचिल्लशदुर्बलम्॥ २६॥कोशसंचयवाहांश्चकोष्ठागा
रंतथैवच ॥ गजानीकेनसंगृह्यशनैःप्रायाद्युधिष्ठिरः ॥ २७ ॥ तमन्वयात्सत्यधृतिःसौचित्तिर्युद्धदुर्मदः ॥ श्रेणिमान्वसुदानश्चपुत्रःकाश्यस्यवाविभुः ॥ २८ ॥
रथार्विंशतिसाहस्रायेतेषामनुयायिनः॥हयानांदशकोट्यश्वमहतांकिंकिणीकिनाम्॥२९॥गजार्विंशतिसाहस्राईषादंताःप्रहारिणः॥कुलीनाभिन्नकरटामेघा
इवविसर्पिणः॥ ३० ॥ षष्टिर्नागसहस्राणिदशान्यानिचभारत ॥ युधिष्ठिरस्ययान्यासन्युधिसेनामहात्मनः ॥ ३१ ॥ क्षरंतइवजीमूताःप्रभिन्नकरटामुखाः॥ रा
जानमन्वयुःपश्चाच्चलंतइवपर्वताः॥३२॥एवंतस्यबलंभीमंकुंतीपुत्रस्यधीमतः ॥ यदाश्रित्याथयुयुधेधार्तराष्ट्रंसुयोधनम्॥ ३३ ॥ ततोन्येशतशःपश्चात्सहस्रा
युतशोनराः॥ नर्दंतःप्रययुस्तेषामनीकानिसहस्रशः॥ ३४ ॥ तत्रभेरीसहस्राणिशंखानामयुतानिच ॥ न्यवादयंतसंहृष्टाःसहस्रायुतशोनराः ॥ ३५ ॥ ॥ इति
श्रीमहाभारतेउद्योगपर्वणिअंबोपाख्यानपर्वणिपांडवसेनानिर्याणेषण्णवत्यधिकशततमोध्यायः ॥ १९६ ॥ ॥ ७ ॥ ॥ समाप्तमुद्योगपर्व ॥ ॥ ७ ॥ ॥
अस्यानंतरंभीष्मपर्वभविष्यतितस्यायमाद्यःश्लोकः ॥ ॥ जनमेजयउवाच॥ कथंयुयुधिरेवीराःकुरुपांडवसोमकाः॥ पार्थिवाःसुमहात्मानोनानादेशसमा
गताः॥ १ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ॥ इतिश्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसगोविंदसूरिसूनोःश्रीनीलकंठस्यकृतौभारतभावदीपेषण्णवत्यधिकशत
तमोऽध्यायः ॥ १९६ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

अत्रश्लोकाध्यायसंख्ययोरादिपर्वलिखितसंख्यान्यथात्वंयत्तल्लिपिकरप्रमादाद्बोध्यंमध्यवर्तिपर्वान्यथात्वमपि
॥ इदमुद्योगपर्वमुंबय्याख्यराजधान्यांगणपतकृष्णाजीत्यभिधानांमुद्रायंत्रालयेमुद्रितं शकाब्दाः ॥ १८०८ ॥

॥ इति श्रीमहाभारते उद्योगपर्व समाप्तम् ॥